https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्यजित्

॥ ओ३म् ॥

वेदार्थ-कल्पद्रुमः

श्रीयुत-स्वामि-करपात्रिकृत-'दयानन्दीयमतखण्डन'-खण्डकः

[तृतीयः खण्डः]

प्रणेता

अखिल-भारतीय-वेद-वेदाङ्ग-पुरस्कार-सम्मानितः, आर्यरत्नम्

आचार्य-विशुद्धानन्द-मिश्रः शास्त्री

व्याकरणाचार्यः दर्शनवाचस्पतिः

पूर्वकुलपतिर्गुरुकुलविश्वविद्यालयस्य वृन्दावनस्य

भारतसर्वकार-मनोनीतपूर्वसदस्यो दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानस्य

हिन्दीरूपान्तरविधायिका

श्रीमती निर्मला मिश्रा

पूर्वप्राचार्या

पार्वती-आर्य-कन्याविद्यालयस्य बदायूंस्थस्य

दयानन्दाब्दाः-१७२ विक्रमाब्दाः-२०५३

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रकाशक :—

'आर्ष साहित्य प्रचार ट्रस्ट'
४२७, नया बांस, दिल्ली-६

पुस्तक-प्राप्ति-स्थानम्—

'आर्ष साहित्य प्रचार ट्रस्ट'
४५५, खारी बावली, दिल्ली-६

सर्वाधिकारो लेखकाधीनः

प्रथमं संस्करणम्—२०००

मूल्यम्— २००) रुप्यमम्

मई १९९६

लेज़र कम्पोजिंग :—

बिजनेस शौपी, नांगल राया, नई दिल्ली-४६

मुद्रण :—

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

रविन्द्रा ऑफसेट प्रैस नारायणा औद्योगिक क्षेत्र नई दिल्ली।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्राग्वाचा

शैशवमेवासीन् मामकीनम्, अहं स्मरामि यन्मम पूज्यपितृमहाभागा ऋषिकृतं सत्यार्थ-प्रकाशमथवा अन्यपुस्तकमधीयाना अभवन्तदा कतिपयक्षण एवातिशयानन्दभावसम्भूता-लोचनाभ्यां श्रद्धातिरेकवशाद् गङ्गायमुनयो र्धाराः प्रवाहिता भवितुमारेभिरे । पुस्तकपृष्ठानि चार्द्राणि समभूवन् । मम पूज्या सरलहृदया माता एतदनुभूतिमनुभाव्यैव प्रायशः प्रणिगदति स्म 'यदा पठित्वा रोदनमारभसे तदा पठस्येव किमर्थम् ?' ततोऽस्माकं पितृमहाभागमुखात् स्वभावात् केवलमियमेव शब्दावली निरसरत्—'महर्षे ! त्वमस्माकं कृते कथङ्कारमेतावत् कष्टव्यूहमसहथाः ?' असकृदिदमेव ब्रुवतां तेषामश्रुप्रवाहोऽबाधां तीव्रगतिं भजति स्म ।

अहं तमनुपमेयमजस्रास्रप्रवाहमद्याऽपि स्मरामि तदा तदेव करुणावसादमिश्रितं दृश्यमक्ष्णोः पुरस्तादुपतिष्ठति मामकीनमधीरभावुकं च मानसमस्राम्भोधौ निमज्जितुं विवशं प्रकुरुते । बहुकालं च चिन्तन-सन्तान-प्रवाहोत्तालतरङ्गमालासु उत्तरन्नवतरन् पूज्यचरण-जनकस्य अगाधमपारं च महर्षिभक्तिपारावारम् अप्रतिमवैदिकसिद्धान्तनिष्ठाम् अतुलनीयलगनशीलताम-खण्डानुसृतदृढव्रताचारं प्रमातुं च तदियत्तामसफलप्रयासं कुर्वे ।

प्रायेण मामर्चनीयपितृचरणाः सन्ततं शिक्षयन्तोऽभूवन् यद् ऋषेर्ऋणान् आत्मानं मोचयितुमाजीवनं प्रयतनीयं त्वया । पूज्यपितुरक्ष्णोः प्रवहमानश्राद्धजलेन योऽग्निः प्रचण्डं प्रज्वालितो मम हृदयेऽद्य, विश्वसिमि असावग्निरन्त्येष्टेरग्नेरूष्मणाऽत्यधिकं प्रवर्धमानो जन्मान्तरेऽप्यप्रशाम्य उदेष्यते । स्मरामि एकमात्रश्रीपुत्तूलालजीस्वर्णकारो ग्रामे श्रीपितुरभिन्नहृदय आर्यसामाजिकसज्जनो यदा कदाचिद् वैदिकधर्मप्रचारे सहयोगी जायते स्म । यस्यात्मजो महेन्द्रपालवर्मा नाम्ना दिल्ल्यामार्यसमाजप्रधानोऽपि अनारतमृषेर्भक्तः सुदृढः ।

अहमिदमपि स्मरामि मम पूज्यपितृपादा महर्षेरनन्यभक्तस्य ऋषिचरणसेवाप्राप्त-पुण्यावसरस्य श्री पं० द्वारिकाप्रसादपाठकस्य मम वन्दनीयश्वश्र्वाः श्रीमत्याः सुखदेवीमहाभागाया अपि पार्श्वे गत्वा स्वयं मम विवाहस्य प्रस्तावं प्रास्तौत् संस्कृतविदुष्या श्रीपाठकस्य दौहित्र्या साकं सम्पादयितुम् ।

अयं हि 'वेदार्थकल्पद्रुमो' नाम ग्रन्थ एतस्या मम धर्मपत्न्या अविश्रान्तस्य समुत्साहसातत्यवर्धनस्य सक्रियलेखनसहयोगस्य चिरन्तनचारुचिन्तनस्य च सुखदपरिणामो विद्यते प्रस्तुतः । यदा च प्रथम-खण्डप्रकाशनप्रस्तावः सार्वदेशिकार्यप्रतिनिधिसभा (दिल्ली) समक्षे आसीत् तदा नामकरणविषये एव कतिचन मासान् यावद् विवादो लम्बितः ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पुनः पूज्यश्रीशिवकुमारशास्त्रिणा साहित्यरसमर्मज्ञेन ग्रन्थादौ 'कल्पद्रुम' प्रशंसने लिखितान् श्लोकान् गम्भीराशयान् सन्ध्याय निर्णयः प्रादायि एतस्यैव नाम्नः सार-गर्भितत्वेन । एकोऽपर-प्रख्यातो विद्वानाचार्यव्यासस्तथाऽपि टिप्पणीं व्यधाद् यदेतस्मिन् नाम्नि पौराणिकताया गन्ध आयाति। परमसावपि न ध्यातवान् यदस्मिन्नाम्नि तु जनमनोरथपूरककल्पवृक्षविशेषस्या-भूतपूर्वसमाधानं सुनिहितं वर्तते यथा—वेदार्थ एव कल्पद्रुमः सर्वमनोरथपूरको नान्यः कश्चिद् वृक्षविशेष इति ।

प्रकृते प्रस्तूयमाने एकाऽन्याऽपि शङ्केह समाधेयाऽवश्यम्। यत् कतिपये कथयन्ति यदस्य ग्रन्थस्य लेखकेन नाम्नोऽन्ते 'शर्मा' इस्यस्य स्थाने ब्राह्मणत्वाख्यापकं 'मिश्र' इति रूढोपाह्वानं प्रायोजि, तेन जन्मजातिपरकतया रूढ्या रूढत्वमेव प्रशस्यतरतयाऽश्रीयते । एतस्य प्रश्नस्य समाधाने केवलमिदमेव निवेद्यते विचारशीलविज्ञवरमानसेषु यद् गुरुकुलेऽधीयानोऽ-हमपश्यमितिहासे यदनेके जन्मना ब्राह्मणा विद्वांसो महर्षेर्विरोधं प्रबलं प्रचक्रिरे, तेषु स्वामिविशुद्धानन्दोऽपि आसीत्। एष खलु जन्मजातब्राह्मणवर्णे महाकलङ्क आसीत् तमपमार्जयितुं व्यचारयं यदहमेव विशुद्धानन्दनाम आधाय प्राग् जन्मनि महर्षेर्विरोधमाचारिषम् । पुनरस्मिन् जन्मनि मुनिवर्यस्वामिदयानन्दस्यानुगामी भक्तो भूत्वा प्रायश्चित्तं विधास्ये यदेकेन जन्मजातब्राह्मणेनाचरितो विरोधस्ते महर्षे, परमयं जन्मनाऽपि ब्राह्मणो विशुद्धानन्दः स इवावतीर्य पाखण्डध्वंसनं करिष्यते, अतो 'मिश्र' इति योज्यते साभिप्राय उपाह्वः।

अपरं चैकं जघन्यं पापं कृतघ्नता वा महर्षिशिष्यस्य पुत्रेण मातृभाषासंस्कृतेन श्री पं० अखिलानन्दशर्मणाऽऽचर्यत, तत् स्मारं स्मारं मयाऽस्मिन् जन्मनि स्वबालानां मातृभाषा सुरवाणी एव विहिता । मम तेऽपि बाला महर्षिमार्गानुयायिनो निष्ठावन्तः साम्प्रतं सन्तीति प्रमोदास्पदम्, विश्वसिमि च यन्नेमे कदाऽपि कृतघ्ना भविष्यन्ति ।

मदीया सुपुत्री डा० मृदुलाशर्माचार्या तु हिन्दीसंस्कृत भाषयोः प्रसिद्धा सिद्धा च कवयित्री, मम पुत्रौ चाऽपि स्वबालानां संस्कृतमेव मातृभाषात्वेन व्यवहरन्ति वैदिकसिद्धान्तानुयायिनः सन्त इति ।

वेदार्थपारिजातग्रन्थस्य प्रणेतृभिरेतत् सदम्भं व्यज्ञायि यदेतेन महाग्रन्थेन जटिलसंस्कृतनिबद्धेनाभद्रवचनावलिसम्बलितेन आर्यसामाजिका विध्वस्तोत्साहाः सम्पत्स्यन्ते, परं तैस्तद्विषये स्मर्तव्या सूक्तिरेषा—

अस्मानवेहि कलमानलमाहतानाम्,
येषां प्रचण्डमुसलैरवदाततैव ।
स्नेहं विमुच्य सहसा खलतां प्रयान्ति,
ये स्वल्पपीडनवशान वयं तिलास्ते ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

परिणामस्तेषामाशाविपर्यस्त एव जातः। प्रत्यक्षं न कश्चिदपि श्रीकरपात्रिणः शिष्योऽनुयायी वा धारितोत्साहः सक्षमोऽभूद् वेदार्थकल्पद्रुमस्य समाधाने पुनराक्षेप्तुं प्रतिप्रहारान् वा निरस्तीकर्तुम्। एवं साम्प्रतं न कश्चिदपि साहसमाधास्यति कथयितुमन्यथा। फलतः 'ऋग्वेदादिभाष्यभूमिका' निष्कलङ्का निःशङ्का वैदिकसिद्धान्तसमुज्ज्वला वेदसम्बन्धिकुत्सितटीका-भाष्यप्रसारिताज्ञानध्वान्तं ध्वंसयन्ती सूर्यप्रकाशवत् प्रकाशतेऽद्य।

अत्रेदमपि सङ्केतनीयमावश्यकं प्रतीयते यद् 'वेदार्थपारिजाते' शास्त्रीयस्थलानां व्याख्यानं सङ्कीर्ण-दृशैव व्यधीयत, दृष्टिकोणोऽयं मानवमात्राय विहितस्येश्वरीय-ज्ञान-वेदस्य परिपन्थी एव। मध्यकालिक-रूढिग्रस्तमतय ईदृशान्येव व्याख्यानानि प्राकाशयन्, का कथात्रैषां यदा महाप्रज्ञवन्दनीयाचार्या अपि यत्र कुत्र एतल्लोकधारणानुगामिकुण्ठाग्रस्ता अजायन्त। नैतैर्विमृष्टं यत् कदाचिदेतेन भविष्यति मिथो वर्गसंघर्षोऽपि जन्म लप्स्यते।

मन्येत नाम यद् वेदस्य विद्याया वा अध्ययनाय ब्रह्मचर्यमाचारविचार-पवित्रता-पान-प्राशन-श्रेष्ठताऽपि वाञ्छिताऽऽस्ते, किन्तु केवलं जन्मनैवोच्चवर्णप्राप्तौ सत्याम् आचार-भ्रष्टताऽपि किं वेदाध्ययनाय पवित्रतां प्रदातुं शक्यते? वस्तुतो नैव कदापि।

महतो विषादस्य लज्जायाश्चास्पदमस्ति यत् समस्ता रूढि-गत-विचारानुगत-सङ्कीर्ण-भावना याः स्वकल्पिता एवाऽऽसन् ता वेदशास्त्रशिरस्येवारोपिताः। तासां मान्यता चाऽपि धर्मभीरुसमाजाय प्रघोषिताः कृताः। वेदार्थ-पारिजात-कर्तार एवंविधैरखिल-दोषैर्मण्डिता वर्तन्ते। क्रान्तदर्शी महर्षिदयानन्दस्तु सपादशतवर्षपूर्वमेव तासामशास्त्रकल्पितरूढीनामन्धविश्वासानां च विरोधे संघर्षे वा सकलं जीवनमयापयत्। एतावत्यपि ईदृग्विचाराः सर्वकारद्वाराऽपि पुरस्कृता जायन्ते। अन्धभक्ताः पक्षपातिनश्च तेषां जय-जयकारं प्रघोषयन्ते। वेदार्थकल्पद्रुमे च तेषामपव्याख्यानां दोषाणां प्रतिवादनं निराकरणं वा व्यधीयत। कतिपय दोषा इह प्रसङ्गतो निदर्श्यन्ते, यथा—

जगज्जनन्याः सीताया आयुषः षष्ठवर्षे विवाहप्रतिपादनम्, वेदाध्ययने जन्मना शूद्राणामनधिकारः, अश्वमेधे राज्ञ्या कुमारीभिश्च सह घोराश्लीलाचरणालपनम्, प्राचीन-वैदिककालिक-गुण-कर्मस्वभाव-सम्पादित-वर्णव्यवस्थायाः खण्डनम्, दुराचरितस्याप्युच्च-वर्णलब्धकुमारस्य वेदाध्ययनाधिकाराक्षुण्णता-प्रतिपादनम्, प्रतिभाशालिस्त्री-जन्मशूद्राणां बालानां यज्ञोपवीत-संस्कार-वञ्चनत्वम्, अस्पृश्यतायाः घोरमण्डनम्, अत्र हि स्पर्शेन्द्रियचतुर्थत्वचाया आब्राह्मणशूद्रव्यापित्वादेकरूपानुभूतत्वाच्छूद्रस्यास्पृश्यताप्रश्नः समाहितः स्वतः। 'अघायताम्' इत्यादिमन्त्राणां गोवधे विनियोग-विधानम्, बुद्धेर्दिव्यालयत्वमेव, यज्ञे मांसाहुति-विधानादि-निखिलमशास्त्र-समर्थितमपव्याख्यानमेवास्ति।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इदं सकलं कल्पद्रुमे यथार्थरूपे सुव्याख्यातम्, अतोऽत्र बहु पल्लविताद् विरम्य उपसंहाररूपेण निवेद्यते—

आर्षज्ञानप्रचण्डभानुविरजानन्दो धरण्यास्तले,
पूतब्रह्मगवीसुरक्षक इव प्रादुर्बभूव प्रभः ।
गोदोग्धा पुनरेकमात्रमुनिराडानन्दपूर्वां दयाम्,
ऋग्वेदादिकभाष्यभूमिमतुलां बिभ्रत् प्रणिन्ये मुदा ॥ १ ॥

तत् पीयूषवचः पयो मधुमयी सा मेघमालाऽमला,
वर्षत्येवमहर्निशं बुधमनः शुक्तौ सुमुक्ता भवन् ।
वाग्-बिन्दुः करपात्रमानसधरा-तप्तायसे वाष्पताम्,
आयात्येव परं विशुद्धमनसां सन्तृप्तयेऽत्रारतम् ॥ २ ॥

आम्नायाध्ययनेच्छुमानसबुधां सत्कामनापूर्तये,
सम्प्राप्योर्वरकं कुशङ्कनभृतं तत्पारिजातोद्भवम् ।
सत्तर्कामृतसेचनेऽपि सुतरां संवर्धितो निर्मलम्,
सानन्दं फलमुद्गिरत्यविरलं 'वेदार्थकल्पद्रुमः' ॥ ३ ॥

एतद्ग्रन्थप्रणयनेऽविरामप्रेरणास्रोतोभूतभव्यभावानुभाविनः प्रत्यपि सुबहुतरमाभारिताभावान् बिभर्मि । तेषु चेमे—

सत्याराधकदीपचन्द्रजनको जुष्टः सुबुद्धिश्रिया,
सद्वेदर्षियशोविवेकविभवे श्रीधर्मपाले सुते ।
आर्षग्रन्थप्रचारभारममितं विन्यस्य सन्निर्वृतिम्,
प्रापत्तत्तनयः प्रकाशयति सद् 'वेदार्थ-कल्पद्रुमम्' ॥ ४ ॥

यस्मिन् भूरिकृतश्रमः प्रियवरः श्रीचन्द्रदत्तः सुधीः,
साहाय्यं किल राजवीरसुबुधः सम्पादनेऽसाधयत् ।
एभ्यः श्रीलगणेशदत्तसुबुधे श्रीश्रोत्रियायाऽपि वा,
पूर्यात् सर्वमनोरथं सुखकरं 'वेदार्थकल्पद्रुमः' ॥ ५ ॥

ग्रन्थाऽऽलेखनतत्परः किल 'नयाबांसार्यसन्मन्दिरे',
आवासं कृतवान् तदा हि सकलश्रद्धालुसभ्या जनाः ।
ब्रह्मानन्दसुशर्मसोदरसमाः सम्प्रीणयन्तोऽभवन्,
तेभ्योऽहं वितनोमि प्रीतमनसा सद्धन्यवादं वचः ॥ ६ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भूमिका सत्य-सन्धित्साऽऽनन्द-विस्तीर्ण-वारिधिः ।
लघुकल्पद्रुम-ग्रन्थाञ्जलौ सम्मातु वै कथम् ? ॥ ७ ॥

सर्वश्रीयुतहेमराजतनयाऽयोध्याप्रसादः सुधीः,
तत्पुत्रो ललिताऽभिधानजननीकोऽहं महर्षेर्गिराम् ।
मर्मज्ञः शुचिभक्तिमान् सहचरीश्रीनिर्मलामण्डितः,
सन्मेधाव्रत एष प्राणयमिमं ग्रन्थं सुवेदव्रतः ॥ ८ ॥

पितृवात्सल्यसम्पुष्टमृदुमञ्जुलमानसः ।
वेदधर्मप्रचाराय, अरक्षमृषिभूमिकाम् ॥ ९ ॥

प्रेषयन्तं दयानन्दं कल्याणाय दिवो भुवि ।
ईश्वरं व्यापकं नौमि करुणावरुणालयम् ॥ १० ॥

इति शम्

विदुषां वशंवदः
आचार्य विशुद्धानन्द मिश्रः

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्राग्वाचा

मैं शैशव में ही था, उस समय मैं देखता था कि जब मेरे पूज्य पिताजी ऋषिकृत सत्यार्थप्रकाश या संस्कारविधि को पढ़ते थे तो कुछ ही क्षणों में आनन्दभावविभोर होते और उनकी आँखों से गङ्गा और यमुना की धारायें प्रवाहित होने लगतीं, पुस्तक-पृष्ठ भीग जाते। मेरी प्रातः स्मरणीया माँ इस अनुभूति को न समझ प्रायः कहने लगतीं—'तो पढ़ते ही क्यों हो, जब पढ़ के रोने लगते हो।' पूज्य पिता जी के मुख से केवल इतने शब्द ही निकल पाते—'महर्षि ! तुमने हमारे लिये इतने कष्ट क्यों सहे ?' और फिर आँसुओं का वही अजस्र प्रवाह यह कहते हुए और तीव्र हो जाता।

बस उस अनुपम अक्षय-आँसुओं के प्रवाह को आज जब मैं याद करता हूँ तो करुणापूर्ण अवसाद का दृश्य आँखों के समक्ष उपस्थित हो जाता है। मेरा अधीर भावुक मन उन जैसे आँसुओं में डूबने को मुझे विवश कर जाता है। सोचता रहता हूँ बहुत काल तक चिन्तन परम्परा की तरङ्गमालाओं में डूबता उतराता, पूज्य पिताजी की अपार ऋषि-भक्ति, अप्रतिम सिद्धान्तनिष्ठा, अप्रतिम लगन और अतुलनीय दृढव्रत को।

वे प्रायः मुझे सिखाते रहते कि ऋषि-ऋण उतारने की चेष्टा जीवन भर करते रहना। बस, उन आँसुओं के पानी ने मेरे हृदय में जो आजीवन स्थायी 'श्रद्धयाग्निः समिध्यते' की आग लगाई है, वह अप्रशाम्य है। मुझे विश्वास है कि अन्त्येष्टि-अग्नि तो उस ऊष्मा को और बढ़ायेगी, जो प्रवृद्धतर होकर जन्मान्तर को भी साथ जायेगी।

हार्दिक अभिलाषा है कि मेरी सन्तति भी उसी निष्ठा को अपना जीवन-व्रत बनाये।

मुझे यह भी याद आता है कि मेरे पूज्य पिता जी ऋषिवर की स्वयं चरणसेवा अपने हाथों से करनेवाले गानविद्याविशारद श्री पं० द्वारिकाप्रसाद जी पाठक की पुत्री मेरी वन्दनीया श्वश्रू श्रीमती माता सुखदेवी जी के पास निर्मला जी के संस्कृतज्ञ होने के कारण मेरे विवाहार्थ स्वयं प्रस्ताव लेकर पहुँचे थे। मेरा जीवन इस सुयोग्यतमा संगिनी को पाकर धन्य हो गया। यह 'वेदार्थकल्पद्रुम' इनकी ही अजस्र प्रेरणा, सतत लगन और अथक परिश्रम और लेखन का सुखद परिणाम है।

एक बात और कह दूँ कि जब श्री करपात्री जी के 'वेदार्थ-पारिजात' का उत्तर हमारे द्वारा लिखा जा चुका, तब इसके नामकरण पर कई मास विवाद रहा। अन्त में साहित्यिकहृदय स्वर्गीय श्री शिवकुमार जी शास्त्री ने प्रथम खण्ड के प्रारम्भ में ग्रन्थ नाम-प्रस्तुति में लिखे चार श्लोकों के गम्भीराशय पर मुग्ध होकर अपना निर्णय आदरणीय श्री राम गोपाल जी शालवाले (तात्कालिक

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सार्वदेशिक सभा के प्रधान) को दे दिया कि यही सार्थक सर्वोत्तम नाम रहेगा । 'पारिजात' तो केवल देववृक्ष ही माना जाता है, पर 'कल्पद्रुम' सर्वमनोरथपूरक देववृक्ष है । उस समय भी एक विद्वान् ने कहा था कि इस ग्रन्थ नाम में पौराणिकता की गन्ध आती है, पर उन्होंने गम्भीर विचार नहीं किया; क्योंकि इस नाम में तो उस धारणा का खण्डन निहित है अर्थात् 'वेदार्थ एव कल्पद्रुमो नान्यः' वेदार्थ ही कल्पवृक्ष है, अन्य कोई कल्पवृक्ष नहीं है । इस प्रकार किसी देशविशेष में स्थित पौराणिक कल्पवृक्ष की निवृत्ति हो गई ।

लगे हाथों एक शङ्का का और निवारण कर दिया जाये । कतिपयों का कथन है कि लेखक द्वारा 'शर्मा' के स्थान पर 'मिश्र' उल्लापन जातिरूढता को प्रकट करता है । इसके विषय में विज्ञ मानसों से इतना भर कहना है कि मेरे पूज्य पिताजी ने मुझे गुरुकुल में पढ़ाकर गुण कर्म और स्वभाव से भी ब्राह्मण बनने का सुअवसर प्रदान किया था । पर इसके साथ ही मैंने ब्राह्मणजात्युद्भव अनेक पण्डितों और विशेष रूप से स्वामी विशुद्धानन्द जी को ऋषिवर के विरुद्ध शास्त्रार्थ में प्रतिवादी रूप में पढ़ा, तो मैंने सोचा कि इन ब्राह्मणों ने ऋषि का शास्त्रार्थ में विरोध किया और एक जन्म के ब्राह्मण ने विष देकर महाकृतघ्नता और जघन्य आचरण किया तथा एक अन्य जन्मजात ऋषिवर के भक्त श्री पं० टीकाराम शर्मा के पुत्र विद्वद्वर पं० अखिलानन्द शर्मा ने किसी कारण से ऋषिमार्ग का त्याग कर दिया, तो मेरे हृदय में इस ऐतिहासिक रूढ जातिकलङ्क के अपमार्जन करने की ज्वाला प्रबल उद्दीप्त हो गई । मैंने सोचा कि ब्राह्मणकुलोत्पन्न स्वामी विशुद्धानन्द तो उस जन्म में ऋषि का विरोध करने आये, आज वही मैं उस पाप का प्रायश्चित्त करने के लिये ऋषि का अनन्य भक्त होकर वेदसिद्धान्तों का प्रचार और प्रसार करने आया हूँ । उस ऋषिवर के शिष्य के पुत्र अखिलानन्द, जिनकी मातृभाषा संस्कृत थी, ऋषिमार्ग से विचलित हो गये । पर आज ऋषि के अनन्यभक्त पूज्य पिता के पुत्र मैंने और ऋषि-सेवक श्री पाठक जी की दौहित्री श्रीमती निर्मला मिश्रा ने अपनी सन्तति की मातृभाषा संस्कृत बनाई । हम लोग और हमारी सन्तान ऋषिमार्ग पर दृढ़ हैं तथा आजीवन केवल इस मार्ग पर चलते ही नहीं रहेंगे, अपितु जब-जब विपक्षी पण्डित-समूहों के प्रहार पारिजात के रूप में आर्यसमाज पर होंगे, उनका मुँहतोड़ समाधान भी देते रहेंगे ।

अब कोई यह न कह सकेगा कि ब्राह्मण पिता की सन्तान ने सच्चा ब्राह्मण बनकर जातिगत रूढ अपवाद को नहीं मिटाया था । अस्तु ।

मेरी सुपुत्री डा० मृदुला शर्मा आचार्या हिन्दी तथा संस्कृत दोनों भाषाओं की भारतप्रसिद्ध और सिद्ध कवयित्री है, एवं मेरे दोनों सुपुत्र डा० मेधाव्रत और वेदव्रत एम.टेक. ये सभी अपनी सन्तानों की भी मातृभाषा संस्कृत को ही बनाने में निष्ठारत होकर वैदिक सिद्धान्त के परिपोषक और अनुगामी हैं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इस 'वेदार्थपारिजात' ग्रन्थ के प्रणेताओं ने सगर्व यही समझा था कि जटिल संस्कृतनिबद्ध, भद्दी शब्दावली सम्बलित महाग्रन्थ के प्रणयन से आर्यसामाजिक सदा-सदा के लिये हतोत्साह हो जायेंगे, परन्तु उनको हम आर्यों के विषय में निम्न सूक्ति का स्मरण आना चाहिये—

'हे मुसलप्रहारकर्ताओ ! आप हमको व्रीहि (चावल = धान) समझिये, जिनकी प्रचण्ड मुसलप्रहारों से उज्ज्वलता निखरती ही जाती है। स्वल्प निष्पीडन करने पर जो स्नेह (तैल) को निकाल कर खल बन जाते हैं, हम वे तिल नहीं हैं।'

पर परिणाम तो उनकी आशाओं के विपरीत ही सिद्ध हुआ कि प्रत्यक्ष में आज कोई भी श्री करपात्री जी का अनुयायी व शिष्य नहीं है, जो इस 'वेदार्थकल्पद्रुम' के समाधान पर पुनः आक्षेप करें या इसके द्वारा किये प्रतिप्रहारों का निरसन कर सके। इस प्रकार अब किसी को भविष्य में भी अन्यथा कुछ कहने का अवसर नहीं है। फलतः आज महर्षि की 'ऋग्वेदादि भाष्यभूमिका' निष्कलङ्क और निःशङ्क वैदिक सिद्धान्तों की प्रोज्ज्वल, वेदसम्बन्धी सभी कुत्सित टीका और भाष्यों द्वारा प्रसारित अज्ञान ध्वान्त का ध्वंसन कर सूर्यप्रभा के सदृश प्रकाशमान हो रही है।

यहाँ यह भी संकेत कर देना आवश्यक है कि वेदार्थपारिजात में शास्त्रों के स्थलों का व्याख्यान संकीर्ण दृष्टि से किया गया है, यह दृष्टिकोण मानवमात्र के लिये विहित-वेदज्ञान का विलोपक है। मध्यकालीन रूढिग्रस्त मतियों ने ऐसे अपव्याख्यान किये हैं। महाप्रज्ञाचार्य शंकर जैसे भी मध्यकालिक लोक धारणानुगामी कुण्ठा से मुक्त न हो सके थे, मध्यकालीन आचार्यों ने यह भी नहीं विचारा कि इससे समाज में वर्ग-संघर्ष को जन्म मिल सकता है।

यह माना कि वेद और विद्याध्ययन के लिये ब्रह्मचर्य, आचार-विचार-पवित्रता, खान-पान की श्रेष्ठता वाञ्छनीय है, किन्तु केवल जन्मना उच्च वर्ण प्राप्त करके भी आचारभ्रष्टता क्या वेदाध्ययन की पात्रता दे सकेगी ? कदापि नहीं।

महान् दुःख और लज्जा का स्थान है कि समस्त रूढिविचारानुगत संकीर्ण-भावनायें जो स्वकल्पित थीं, वेदों और शास्त्रों पर थोप दी गयीं और उनकी मान्यता धर्मभीरु समाज के लिये घोषित कर दी गई। 'वेदार्थ-पारिजात' कर्ता ऐसे समस्त दोषों से ग्रस्त हैं। क्रान्तदर्शी महर्षि दयानन्द ने आज से सवा सौ वर्ष पूर्व इन अशास्त्रमूलक रूढि और अन्धविश्वासों के विरुद्ध संघर्ष किया और सारा जीवन खपा दिया। इतने पर भी ऐसे विचार, सरकार द्वारा पुरस्कृत हो रहे हैं, गुटबाजी और अन्धानुसरण के जयकारे बोले जा रहे हैं।

वेदार्थकल्पद्रुम में उन दोषों, व्याख्यानों का सुदृढ़ प्रतिवाद किया गया है। कतिपय दोष-निदर्शन देखिये—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जगज्जननी सीता का ६ वर्ष की आयु में विवाह-प्रतिपादन, वेदाध्ययन में जन्मना शूद्रों को अनधिकार, अश्वमेध में रानी, कुमारी आदि से घोर अश्लील भाषणादि, प्राचीन वैदिक काल की गुण-कर्म-स्वभाव से मानी व प्रचलित वर्णव्यवस्था का खण्डन, दुष्कर्म में लिप्त होने पर भी वर्णों की उच्चता व पावनता का अखण्डित रहना, स्त्री और शूद्रों के कुशाग्रबुद्धि प्रतिभाशाली आचार-आहार विचारों से पवित्र बालकों को यज्ञोपवीत संस्कार से वञ्चित करना, घोर अस्पृश्यता का मंडन करना, जो कि चतुर्थ स्पर्शेन्द्रिय त्वचा के शिर (ब्राह्मण) से लेकर पैरों (शूद्र) तक एक-एक अनुभूति होने से अस्पृश्यता-विषयक प्रश्न स्वतः ही समाहित हो जाता है, 'अघायताम्' आदि मन्त्रों का गोवध में विनियोग दिखाना, बुद्धि का दिवालियापन, यज्ञ में मांसाहुति विधान आदि अप-व्याख्यान सर्वथा अशास्त्रीय हैं। यह सब कल्पद्रुम में सुव्याख्यात है, अतः यहाँ इस विषय से विराम लेकर उपसंहार रूप में निवेदन है—

आर्ष ज्ञान के प्रचण्ड भानु के सदृश देदीप्यमान श्री स्वामी विरजानन्द जी महाराज दण्डी जी इस धरती पर पवित्र वेदधेनु के संरक्षक होकर प्रादुर्भूत हुए थे, उस वेदधेनु के एकमात्र दोग्धा दया और आनन्द से पूर्ण मुनिराट् स्वामी दयानन्द सरस्वती हुए, जिन्होंने अतुलनीय इस भूमिका की रचना की ॥ १ ॥

तब वेद के अमृतवचनों के पथ की मधुमयी निर्मल मेघमाला अहर्निश बरसने लगी, वेदवाणी के बिन्दु, विद्वानों के मानस शुक्ति (सीप) में उज्ज्वल मुक्ता बन गये, परन्तु वही बिन्दु श्री करपात्री जी की मानस की मरुभूमि पर या तो विलीन हो गये या उस के मानस के तप्त तवे पर जल कर वाष्प हो गये, परन्तु वही जलबिन्दु विशुद्ध मनवालों के लिये पूर्ण तृप्तिकारक सिद्ध हुए ॥ २ ॥

वेदाध्ययन के अभिलाषी विद्वानों की कामनापूर्ति के लिये यह 'वेदार्थकल्पवृक्ष' पारिजात ग्रन्थागार में उत्पादित कुशङ्का और कुतर्करूपी उर्वरक (खाद) को प्राप्त कर तथा हमारे उत्तम तर्कों के अमृतसिञ्चन से संवर्धित होकर आनन्दमय निर्मल ज्ञान के सुफल प्रदान कर रहा है ॥ ३ ॥

इस ग्रन्थ के प्रणयन में अविराम प्रेरणा देनेवाले भव्य भावानुभावों के प्रति मैं निर्भर आभारिता प्रकाशित कर रहा हूँ। उनमें कतिपय निम्न हैं—

प्रशंसनीय सुबुद्धिमती श्री से सुशोभित, सत्य के आराधक परम ऋषिभक्त स्व० श्री दीपचन्द्र जी ने अपने सुपुत्र, वेद, सत्य, ऋषियों के यश और विवेकवैभव से सम्पन्न धर्मपाल आर्य पर 'आर्ष साहित्य प्रचार' के अपरिमित भार को विनिवेशित करके परम सुख को प्राप्त किया, वही श्री धर्मपाल आर्य इस अभिराम अभिनव 'वेदार्थकल्पद्रुम' का सोल्लास प्रकाशन कर रहे हैं ॥ ४ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इस ग्रन्थ के सम्पादन में भूरि परिश्रम करनेवाले मेरे प्रिय शिष्य श्री पण्डित चन्द्रदत्त जी हैं, जो श्री राजवीर जी शास्त्री के इस कार्य में अत्यन्त सहायक सिद्ध रहे हैं। लाजपतराय स्नातकोत्तर कालिज साहिबाबाद के अंग्रेजी, हिन्दी व संस्कृत के उद्भट विद्वान् प्राचार्य डा० गणेशदत्त शर्मा और ऋषिभक्त दार्शनिक प्रिय श्री वेदप्रकाश जी श्रोत्रिय, इन सभी के अभीष्ट सुखकर मनोभिलाष को यह कल्पद्रुम पूर्ण करेगा ॥ ५ ॥

अपने आर्यसमाज के विद्वानों, ऋषिभक्त व श्री भगतसिंह जैसे देशभक्तों की सेवा शुश्रूषा की प्राचीन सत्कार परम्परा पालन के लिये प्रसिद्ध, आर्यसमाज 'नया बांस' दिल्ली में पूर्व मन्त्री श्री ओम् प्रकाश जी कपड़ेवाले, वर्तमान प्रधान श्री ओम् प्रकाश जी क्रीम वाले, श्री प्रेमचन्द्र जी आदि श्रद्धालु सज्जनों की श्रद्धा व सत्कार भावना ने मुझे दिल्ली जाने पर सदा आवासादि के लिये पूर्ण सुविधा प्रदान की और मेरे सहोदर भाई के समान समाज के प्रतिष्ठित सदस्य श्री पं० ब्रह्मानन्द शर्मा जी ने जो सौहार्द मुझे प्रदान किया है, वह सदा अविस्मरणीय है या प्रतिक्षण स्मरणीय है। इन सभी का मैं अतितरां विशुद्ध आनन्दविभोर मन से बहुत-बहुत धन्यवाद कर रहा हूँ ॥ ६ ॥

सत्यानुसन्धान की इच्छा से आनन्द के विशाल वारिधिसदृश यह ऋषि की भूमिका छोटे से 'कल्पद्रुम' ग्रन्थ की अञ्जलि में भला कैसे समा सके? ॥ ७ ॥

पुठी रसूलपुर (बदायूं) निवासी सर्व श्रीयुत पं० हेमराज ज्योतिषाचार्य के तनय श्री पं० अयोध्याप्रसाद जी मिश्र वैद्यराज मेरे पिता जी स्वयं संस्कृत के उद्भट विद्वान् थे, उनका तथा पूज्या मातृश्री ललिता देवी के पुत्र मैंने महर्षि की वाणी के मर्म को समझकर अपनी विदुषी धर्मपत्नी श्रीमती निर्मलादेवी के सहयोग से उत्तम मेधा तथा वेदव्रत को धारण कर इस ग्रन्थ का प्रणयन किया है ॥ ८ ॥

पिता के वात्सल्य से सम्पुष्ट, मृदु और मञ्जुल मानस मैंने वेदार्थ के प्रसार के लिये इस ऋषि-भूमिका की इस प्रकार रखवाली की है ॥ ९ ॥

अन्त में मैं संसार के कल्याण के लिये स्वर्गलोक से भूमण्डल पर दयानन्द को भेजनेवाले करुणा के समुद्र व्यापक परमेश्वर को प्रणाम करता हूँ ॥ १० ॥

इति शम्

विदुषां वशंवदः
आचार्य विशुद्धानन्द मिश्रः

— : ० : —

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१३

ग्रन्थकारस्यान्ये प्रकाशिताऽप्रकाशिता ग्रन्थाः

प्रकाशिताः

१. चारुचरितामृतम् (लघुकाव्यम्)

२. सुरवाणीप्रशस्तिका ।

३. वेदार्थ-कल्पद्रुमः (प्रथम-द्वितीय-तृतीयखण्डाः)

४. जीवात्मा का शरीर में स्थान 'हृदयमीमांसा'

५. वेदमन्त्रों पर निर्दिष्ट-ऋषि मन्त्रद्रष्टा थे, मन्त्रकर्ता नहीं ।

६. शास्त्रार्थ-आह्वान (माधवाचार्य से शास्त्रार्थ)

७. वेदार्थ-भूमिका (संस्कृते अनूदिता)

८. वैदिक-निघण्टुः (गेयच्छन्दस्सु)

अप्रकाशिताः

१. को नु हिन्दुः (संस्कृत-काव्यम्)

२. भारतमहिमा (काव्यम् संस्कृते)

३. गोकरुणानिधिः (काव्यम् संस्कृते)

४. इन्दिरायशस्तिलकम् (संस्कृते)

५. विभिन्नविषयेष्वनुमानतः १५०० श्लोकाः

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थकल्पद्रुमस्य

सहायकग्रन्थसन्दर्भ-सूची

१. अत्रिस्मृतिः
२. अथर्ववेदः
३. अष्टाध्यायी
४. आपस्तम्बश्रौतसूत्रम्
५. आर्यभट्टीयम्
६. आश्वलायनगृह्यसूत्रम्
७. ऋग्वेदः
८. ऐतरेयब्राह्मणम्
९. ऐतरेयालोचनम्
१०. काठकसंहिता
११. काण्वसंहिता
१२. कात्यायनश्रौतसूत्रम्
१३. काशिका
१४. गीता
१५. गोपथब्राह्मणम्
१६. गोभिलगृह्यसूत्रम्
१७. गौडपादीयकारिका
१८. चरकः
१९. छान्दोग्योपनिषद्
२०. तैत्तिरीयब्राह्मणम्
२१. तैत्तिरीयारण्यकम्
२२. नाट्यशास्त्रम्
२३. निरुक्तटीका (दुर्गाचार्यः)
२४. निरुक्तभाष्यम् (स्कन्दस्वामी)
२५. निरुक्तम्
२६. निरुक्तालोचनम्
२७. न्यायदर्शनम्
२८. न्यायसिद्धान्तमुक्तावली
२९. पञ्चतन्त्रम्
३०. परापूजा (शङ्कराचार्यः)
३१. पातञ्जलमहाभाष्यम्
३२. पारस्करगृह्यसूत्रम्
३३. पाराशरस्मृतिः
३४. प्रशस्तपादभाष्यम्
३५. बालभारतम्
३६. बृहत्पाराशरस्मृतिः
३७. बृहदारण्यवार्तिकसारः
३८. ब्रह्मवैवर्तपुराणम्
३९. भट्टपादकुमारिलभाष्यम्
४०. भविष्यपुराणम्

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

४१. भागवतपुराणम्
४२. मनुस्मृतिः
४३. महादेववेदान्तवृत्तिः
४४. महाभारतम्
४५. मिस्टिक् एप्रोच् टु द वेदाज्
४६. मीमांसादर्शनम्
४७. मुण्डकोपनिषद्
४८. मेदिनीकोषः
४९. मैत्रायणीसंहिता
५०. यजुःप्रातिशाख्यम्
५१. यजुर्भाष्यम् (महर्षिः)
५२. यजुर्वेदः
५३. यजुर्वेदकल्पतरुः
५४. योगदर्शनम्
५५. योगदर्शनम् (व्यासभाष्यम्)
५६. रघुवंशमहाकाव्यम्
५७. लल्लसिद्धान्तः
५८. लाट्यायनश्रौतसूत्रम्
५९. लीलावती
६०. वसिष्ठस्मृतिः
६१. वात्स्यायनभाष्यम्
६२. वाल्मीकिरामायणम्
६३. विश्वकोषः
६४. विहारी सत्सई
६५. वेदवाणी (II विशे० १९५३)
६६. वेदान्तदेवीभागवतम्
६७. वैदिकगणितम्
६८. वैशेषिकदर्शनम्
६९. शतपथब्राह्मणम्
७०. शांख्यायनश्रौतसूत्रम्
७१. संवर्तस्मृतिः
७२. सत्यार्थप्रकाशः
७३. समराङ्गणसूत्रधारः
७४. सांख्यदर्शनम्
७५. सामवेदः
७६. सिद्धान्तशिरोमणिः
७७. सुभाषितरत्नभाण्डागारम्
७८. सूर्यसिद्धान्तः
७९. स्कन्दपुराणम्
८०. हारीतस्मृतिः

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शब्द-संकेत-सूची

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अ०-अध्यायः, अष्टाध्यायी
अथर्व०-अथर्ववेदः
अनु०-अनुच्छेदः
अनु०प०-अनुशासनपर्व
अष्टा०-अष्टाध्यायी
आप० श्रौ०-आपस्तम्बश्रौतसूत्रम्
आश्वलायन०-आश्वलायनगृह्यसूत्रम्
उ०-उत्तरम्
उणा०-उणादिकोषः
उ०प०-उत्तरपक्षः
ऋ०-ऋग्वेदः
ऋ० भा० भू०-ऋग्वेदादिभाष्यभूमिका
ऋषिः, महर्षिः-महर्षिदयानन्दः
ऐ०आ०-ऐतरेयारण्यकम्
ऐ०ब्रा०-ऐतरेयब्राह्मणम्
काशि०-काशिका
कौ० सू०-कौशिकगृह्यसूत्रम्
ख०-खण्डः
गी०-गीता
गो०ब्रा०-गोपथब्राह्मणम्
छां०उ०-छान्दोग्योपनिषद्
जै०सू०-जैमिनीसूत्रम्
तै०ब्रा०-तैत्तिरीयब्राह्मणम्
नि०,निरु०-निरुक्तम्
न्या०-न्यायदर्शनम्
न्यायसि०मुक्ता०-न्यायसिद्धान्तमुक्तावली
पं०-पंक्तिः
पद्मपु०-पद्मपुराणम्
पार०सू०-पारस्करगृह्यसूत्रम्
पू०प०-पूर्वपक्षः
पृ०-पृष्ठम्
प्र०-प्रश्नः
प्रशस्तपा०भा०-प्रशस्तपादभाष्यम्
ब्र०सू०-ब्रह्मसूत्रम्
ब्रा०-ब्राह्मणम्
बृहदा०-बृहदारण्यकोपनिषद्
भवि०पु०-भविष्यपुराणम्
भाव०पु०-भागवतपुराणम्
भा० भू०-ऋग्वेदादिभाष्यभूमिका
भूमिका-ऋग्वेदादिभाष्यभूमिका
मं०-मण्डलम्, मन्त्रः
म०-मनुस्मृतिः
मनु०-मनुस्मृतिः
म०भ०-महाभारतम्, महाभाष्यम्
महाभा०-महाभाष्यम्
माण्डू-माण्डूक्योपनिषद्
मी०-मीमांसा
मु०उ०-मुण्डकोपनिषद्
यजु०-यजुर्वेदः
यो०द०-योगदर्शनम्
वा०भा०-वात्स्यायनभाष्यम्
वा०सं०-वाजसनेयसंहिता
वे०-वेदान्तदर्शनम्
वे०क०-वेदार्थ-कल्पद्रुमः
वे०द०-वेदान्तदर्शनम्
वे०पा०-वेदार्थ-पारिजातः
वै०, वैशे०द०-वैशेषिकदर्शनम्
व्या०भा०-व्यासभाष्यम्
शत०-शतपथब्राह्मणम्
शत०प०-शतपथब्राह्मणम्
शां०प०-शान्तिपर्व
शां०भा०-शाङ्करभाष्यम्
समा०-समाधानम्
समु०-समुल्लासः
सां०द०-सांख्यदर्शनम्

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

॥ ओ३म् ॥

पावका नः सरस्वती

महर्षि–दयानन्द

©Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समर्पणम्

ग्रन्थ-प्रणयन-सहायिका

आचार्या श्रीमती निर्मला मिश्रा

(जन्म २१ जून १९३१-दिवंगत १८ जून १९९४)

त्वां विना देव्यकिञ्चिद्-धनो निर्धनोऽ हं प्रदद्यां प्रियं किञ्च प्राणाधिकम् ।
स्वीकुरुष्वाऽद्य 'वेदार्थ-कल्पद्रुमम्' अर्पये ते सहास्रैस्त्वदीयां कृतिम् ॥ १ ॥

यदा ऽऽरोपित-वेदार्थ-कल्पद्रुम इह त्वया ।
अकाले दिवि कल्पद्रुम् अन्वेष्टुं कथं गता ? ॥ २ ॥

विशुद्धानन्दमेतं हा ! भुवि त्यक्त्वा पतिव्रते ।
पतिं तु नश्वरं, प्राप्ता विशुद्धानन्दमव्ययम् ॥ ३ ॥

समर्पकः
आचार्य विशुद्धानन्द मिश्रः

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

वेद-वेदांग-पुरस्कार-सम्मानितः, आर्यरत्नम्

आचार्य-विशुद्धानन्द-मिश्रः शास्त्री

व्याकरणाचार्य-दर्शनवाचस्पतिः

पूर्वकुलपतिर्गुरुकुलविश्वविद्यालयस्य वृन्दावनस्य

भारत-सर्वकार-मनोनीतपूर्वसदस्यो दिल्लीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य

आर्यभाषारूपान्तर-विधायिका

श्रीमती निर्मला मिश्रा

पूर्वप्राचार्या

पार्वती-आर्य-कन्या-विद्यालयस्य बदायूँस्थस्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

आचार्य राजवीर शास्त्री

अवैतनिक सम्पादक: "दयानन्द सन्देश" मासिक
प्रधान: आर्ष साहित्य प्रचार ट्रस्ट, दिल्ली

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिभक्त, अथक परिश्रमी स्वर्गीय महाशय दीप चन्द जी आर्य

जन्म:- भादवा बदी- १ संवत् १९७६ निधन-पोष सुदी दूज संवत् २०३८

संस्थापक
आर्ष साहित्य प्रचार ट्रस्ट

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विद्याभास्कर, वेदरत्न
आचार्य उदयवीर शास्त्री,
न्याय-वैशेषिक-सांख्य-योगतीर्थ,
वेदान्ताचार्य, विद्यावाचस्पति

प्रसरन्तु नमोवाचो विशुद्धाश्चिरविस्मृताः ।
नतस्योदयवीरस्य विशुद्धानन्द-धीमते ॥
संप्राप्य भवतः पत्रं हर्षोल्लासमवाप्तवान् ।
सर्वतः सकुटुम्बस्य शुभं सञ्चिन्तयन् हृदा ॥
स्मृतो ऽहं भवता तातः व्याजेन केनचित्पुनः ।
धन्यं तथापि मन्ये ऽहमात्मानं कालपीडितम् ॥
मत्कृतेऽभिमतान् भावान् व्यक्तीभूतान् सदात्मना ।
लज्जां वहामि दुष्पूरां विज्ञाय नतमस्तकः ॥
पूर्वोत्तरात्मपक्षाभ्यां यद्धि निर्देशनं भवेत् ।
तन्माध्यमेन सम्यक् स्याद् ग्रन्थस्यालोचनं महत् ॥
दृष्टि-मान्द्यसमापन्नो ग्रन्थस्याऽध्ययने ऽक्षमः ।
वार्द्धक्याधिक्यदोषान्मे लेखने कम्पते करः ॥
काव्यकृतिं न जानामि न च जानाम्यलंकृतिम् ।
तथापि को न जावीयादक्षराणां नियोजनम् ॥
साधारणमितो वृत्तिमास्थाय किञ्चिदुच्यते ।
कल्पद्रुमसुवृक्षस्य ग्रन्थरूपस्य रोपणे ॥
एकेनाप्यसहायेन यः श्रमो भवता कृतः ।
तस्य संभारमात्रेण प्रीयन्तामार्यदेवताः ॥
या रीतिः स्वीकृता तत्र सुतीक्ष्णा परखण्डने ।
सर्वशास्त्रानुमोदिन्या वेद प्रामाण्यपूतया ॥
वेदार्थपारिजातस्य मूलोच्छेदनसंभवे ।
कस्य शंका प्रजायेत ? तयेव क्षुरधारेया ॥
सा सन्तोषप्रदा भूयात् सर्वेभ्यश्चिरञ्जीवना ।
इति कामयमानोऽहं विरमामि प्रसंगतः ॥
दयानन्दर्षिवाचां दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
समुद्धरणजं पुण्यमासोमरवि राजतां महत् ॥

विधेयः-
उदयवीरः शास्त्री

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वामी विद्यानन्द सरस्वती
पूर्व लक्ष्मीदत्त दीक्षित
प्रिंसिपल व फ़ैलो पंजाब यूनिवर्सिटी
डी- १४/१६ माडल टाऊन, दिल्ली

'बिभेत्यल्पश्रुताद्वेदः'-जब तक इस धरती पर स्वामी करपात्री जैस ज्ञानलवदुर्विदग्ध जीव विद्यमान हैं तब तक वेद का भयाक्रान्त होना स्वाभाविक है। एक दिन 'ऋग्वेदादिभाष्य-भूमिका' के माध्यम से आसुरी शक्तियों ने वेद पर धावा बोल ही दिया। पता लगने पर उसकी रक्षार्थ साधनापायों पर विचार करने के लिये अनेक महारथी धर्मक्षेत्र में एकत्र हुए। उनमें कुछ लोभोपहतचेत। थे तो कुछ कार्यण्यदोषोपहतस्वभाव थे और कुछ धर्मसंमूढचेता भी। मोर्चा संभालने के लिये कोई तैयार नहीं था। डूबते को देख कर किनारे पर खड़े-खड़े सहानुभूति की भाषा बोलने वाले तो बहुत होते हैं, किन्तु छलांग मार कर उसे बाहर निकाल लाने वाले विरले ही होते हैं। उधर वेदमाता कराह रही थी-'किं करोमि क्व गच्छामि को वेदानुद्धरिष्यति ?' तब कहीं से आकाशवाणी सुनाई पड़ी—

"मा मैषीर्हि त्वमद्याऽपि विशुद्धानन्दजीवने"

वैदिक वाङ्मय के व्यापक अध्ययन, कल्पना-वैभव, व्याकरण-निरुक्त-न्यायशास्त्र में पारङ्गत अप्रतिम प्रतिभा संपन्न व्यक्ति ही इस अखाड़े में उतर सकता था। आचार्य विशुद्धानन्द जी में यह क्षमता थी। 'वेदार्थ पारिजात' का अधिकांश विरोध-विसंगतिजन्य असम्बद्धता से युक्त, अनर्गल प्रलाप है। वस्तुतः यह सारा ग्रन्थ स्वामी करपात्री के अज्ञान, मूर्खता तथा असूया का प्रमाणपत्र है। आचार्य विशुद्धान्नद जी के वेदार्थ-कल्पद्रुम को देख कर स्पष्ट हो जाता है कि करपात्री जी को निरर्थक, अनर्गल अथवा सम्बद्ध प्रतीत होने वाले ऋषि दयानन्द के कथन अपने भीतर कितने गम्भीर तथा उपादेय अर्थों को समेटे हुए हैं। आवश्यकतानुसार वैदिक शब्दों के व्याकरण सम्मत विश्लेषण के साथ-साथ अपने मन्तव्य की पुष्टि में उन्होंने दर्शन, उपनिषद्, स्मृति तथा ब्राह्मणग्रन्थों आदि से पुष्कल प्रमाण प्रस्तुत किये हैं। वस्तुतः यह ग्रन्थ आचार्य जी की 'दीर्घकालनैरन्तर्यसत्कारासेवित' साधना का परिणाम है। इसके वैशिष्ट्य को समालोचक के शब्दों से नहीं, अपितु स्वयं आद्योपान्त देख कर ही जाना जा सकता है।

वर्तमान में धर्मपत्नी, सहधर्मिणी, अर्धांगिनी आदि शब्दों के रुढ़ हो जाने से इन उपाधियों पर प्रत्येक पत्नी का जन्मसिद्ध अधिकार है। परन्तु कीमती निर्मला जी की यह उपाधि अपने वैदुष्य तथा परिश्रम से अर्जित है। तर्कप्रधान ग्रन्थ में यत्र-तत्र उपलब्ध उनकी निर्मलोक्तियो ने उसे रसात्मक बना दिया है।

मिश्र दम्पती का यह प्रयास सर्वथा स्तुत्य एवं अभिनन्दनीय है।

विद्यानन्द सरस्वती

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गीतावाचस्पतिः
डॉ० रमेश चन्द्र शुक्ल

आचार्यः सरलस्वभावरुचिरः सौम्यो मनीषी भवान्
प्रह्वो निर्मलमानसः शुचिमतिर्विद्यानवद्यो महान् ।
ज्ञानस्तम्भसमोऽत्र भाति सुतरां श्रेयस्करोऽस्यां भुवि
वन्देऽहं नतमस्तकः सहृदयं वन्द्यं भवन्तं कवे ॥ १ ॥

सञ्जातानि विलोकितस्य भवतो विद्याम्बुधे धीमतः
भूयिष्ठानि दिनानि सम्प्रति मनो द्रष्टुं भवन्तं भृशम् ।
औत्सुक्यं विदधात्यतो मम सतां मान्यो यथासम्भवं
पत्रं स्वं प्रहितं विधाय कुरुतामस्मिज्जनेऽनुग्रहम् ॥ २ ॥

आदेशं भवतोऽधिगम्य विदुषः क्षिप्रं यतिष्येऽनुगः
आयातुं मतिमन्नहं गुणवतां मान्येन संसूच्यताम् ।
सर्वे सद्मनि सन्ति मातृसहिता बालाश्च पूज्यो भवान्
सक्षेमाः कुशलाश्च मे समुचिताचारोऽर्पणीयो मुहुः ॥ ३ ॥

धीमद्वृन्दमिलिन्दसंस्तुतगुणः सद्वृत्तपुण्यप्रियः
कीर्तिश्रीतसुरभिप्रमोदित कुलोभावैर्नवैरादृतः ।
आचारोज्ज्वलचारुपावनरसैः स्निग्धैः सुधासम्मितैः
आस्वाद्यो मधुरै र्वचोभिरमलैः कल्पद्रुमो राजते ॥ ४ ॥

श्रद्धाप्रेमनतो भवन् प्रणमति प्रह्वो रमेशामिधः
शुक्लः कोविदवृन्दमौलिमुकुटं विद्वत्सभाभूषणम् ।
आकाङ्क्षन् भवतः कृपालुहृदयो वृन्दावने किं भवान्
किं वा सम्प्रति शोभते स्वनगरे जिज्ञासतीदं मनः ॥ ५ ॥

वाणीं श्रोतुमनाः सुधीन्द्र भवतः श्रेयोमयीं मञ्जुलां
लोकानुग्रहतत्परांश्रुति-पथारुढां मनोज्ञामहम् ।
नूनं दर्शनमस्ति विज्ञ भवतः शान्तिप्रदं पावनम् ॥
धन्या सा नगरी विभूषयति यां विद्वद्वरेण्यो भवान् ॥ ६ ॥

भवत्कृपाकाङ्क्षी संस्कृतज्ञानां सेवकः,
रमेश चन्द्र शुक्लः
एम.ए., पी.एच डी. सांख्ययोगाचार्य,
साहित्याचार्य, साहित्यरत्न, शास्त्रचूडामणि

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वामी जगदीश्वरानन्द सरस्वती

आदरणीय बन्धु
सप्रेम नमस्ते ।
आपका पत्र मिला, धन्यवाद ।

'वेदार्थ कल्पद्रुम' का अभी एक ही भाग छपा है, इसे पूरा करें । अत्युत्तम ग्रन्थ है । इसके सम्बन्ध में एक रोचक संस्मरण भेज रहा हूं ।

आर्यजगत् के प्रकाण्ड विद्वान् पं० श्री युधिष्ठिर जी मीमांसक ने स्वामी विद्यानन्द जी सरस्वती से पूछा—'आपको 'वेदार्थ कल्पद्रुम' कैसा लगा ?' स्वामी जी ने डरते हुए दबी जुबान में कहा-"अच्छा है ।" पं० युधिष्ठिर जी बोले "अच्छा नहीं, बहुत अच्छा है ।"

मैं समझता हूं, आपकी पुस्तक की इससे उत्तम प्रशस्ति नहीं हो सकती ।

शुभ कामनाओं सहित
जगदीश्वरानन्द

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विषय-सूची

विषय :	पृष्ठम्
राजप्रजाधर्मविषयः	१-३८
राजसदःशब्दाभ्यां नृपसभयोर्ग्रहणमुचितम् ।	१
'त्रीणि सदांसि' इति पाठेन सभात्रयग्रहणम् ।	५
क्षत्रनाभिशब्दाभ्यां राजव्यवहारप्रबन्धकर्त्रर्थ एव साधीयान् ।	७
'इमं देवा असपत्नम्' इत्यत्र न दाशरथेर्वर्णनम् ।	११
'यत्र ब्रह्म' इति मन्त्रे 'यत्र' इति न ब्रह्मविशेषणम् ।	१२
'इन्द्रस्येन्द्रियेण', 'बाहू मे', 'प्रतिक्षत्रे', 'त्रातारम्' इति मन्त्राणामृषिव्याख्यानमेव साधीयः ।	१३
न समेषां मन्त्राणां यज्ञपरा व्याख्यैवोचिता ।	१८
'इमं देवा' इत्यस्य ऋषिकृतभाष्यमेवोचितं सुसङ्गतं च ।	२१
'इन्द्रो जयाति' 'त्वमिन्द्र' इत्यत्र इन्द्रशब्देन परमेश्वरस्य सभाप्रबन्धस्य वार्थस्य ग्रहणमेव श्रेयः ।	२३
'सभ्य सभां मे पाहि' इति मन्त्रस्य भूमिकाया अर्थः श्रेयान् ।	३०
'बृहत् पृष्ठम्', 'ब्रह्म वै रथन्तरम्', 'ओजो वा इन्द्रियम्' इत्यादीनां व्याख्यानं सम्यगेव ।	३२
अश्वहिंसनं नाश्वमेधे शास्त्रसम्मतम् ।	३३
वर्णाश्रमविषयः	३९-८८
ब्राह्मणादिवर्णानां व्यवस्था न जन्मनैव, प्रत्युत गुणकर्मस्वभावैः ।	३९
सर्ववर्णानां वेदाध्ययने यजने चाधिकारः ।	४७
पारिजातकथनमनर्गलम् ।	५६

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'समिधा विद्यया समिद्धः प्रकाशितः' इत्यर्थस्य सौष्ठवम्। ५७

'एति' आदिपदानामर्थसङ्गतिः भूमिकायाम्। ५८

'ब्रह्मचारी जनयन्' इत्यत्र विपरीतार्थप्रतिपादनमस्य। ५९

वेदविद्यापठनेन प्राणविद्याया लोकविद्यायाः प्रजापतिपरमेश्वरस्य प्रादुर्भूतिर्भवत्येव। ५९

किं रजोदर्शनात् प्राग् विवाहः कन्यायाः शास्त्रोदितः? ६१

कन्याया वेदाध्ययनविधानम्। ६३

'यद् ग्रामे यदरण्ये' इत्यत्र कृताक्षेपनिराकरणम्। ६५

'गृहा मा बिभीत' इत्यस्य व्याख्यानसौष्ठवम्। ६६

दयानन्दभाष्यं पदपदार्थसम्बन्धातीतं न क्वाऽपि। ६८

प्रथमाश्रमस्य दारयोगाभावेऽग्निहोत्राविधानमशास्त्रीयम्। ७१

'हृदये विचारयन्नेकान्तदेशं प्राप्य सत्यासत्यं विनिश्चिनुयात्' इत्यनेन ऋषे रहस्यार्थः। ७४

परमेश्वरः प्राप्यो दर्शनीयश्चेति साङ्गत्यम्। ७६

'प्राजापत्येष्टिः' 'सर्ववेदसम्' इत्यनयोर्व्याख्यानम्। ८२

संन्यासिनां यज्ञविधानस्वरूपम्। ८६

पञ्चमहायज्ञविषयः ८९-२१२

पञ्चमहायज्ञस्वरूपमिदं किं परम्पराविरुद्धम्? ८९

'अग्निं दूतम्' इत्यस्य ऋषिभाष्यं सर्वथा सङ्गतम्। ९०

'हव्य' पदस्य विज्ञानार्थवाचकतोचिता। ९१

'सायं सायं गृहपतिः' इत्यादिमन्त्रार्थसाङ्गत्यम्। ९३

भूमिकायां 'सूर्यो ज्योतिः' इत्यादीनामर्थस्य श्रेष्ठता। ९५

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'सजूर्देवेन सवित्रेन्द्रवत्या' व्याख्यानं भूमिकायां समुचितम् । ९९

श्राद्धतर्पण-शब्दार्थवैशिष्ट्यम् । १०५

विद्यमानसन्निकर्षशब्दप्रयोगरहस्यम् । १०७

स्वकृतकर्मणां फलं किमन्येभ्यः समर्पयितुं शक्यते ? १०८

विनियोगविषयकविशिष्टव्याख्यानम् । ११४

जीवितपितॄणां सन्तोषायैव श्राद्धं तर्पणं वोचितम् । ११८

यदि श्रद्धापूर्णकर्मार्थकः श्राद्धशब्दस्तर्हि कथं न विवाहादिमङ्गलकार्येषु श्राद्धशब्दप्रयोगः क्रियते ? १५२

'अघायताम्' इति मन्त्रस्य विनियोगो गोवधे सर्वानर्थकारः । १६९

सोमसदादिद्वादशपितॄणां वास्तविकार्थाः । १७१

पितृयज्ञसम्बन्धिशङ्कासमाधानम् । १८३

स्वर्गो मनुष्यलोकाद् भिन्नः किं स्थानविशेषः ? १९९

बलिवैश्वदेवयज्ञस्य वैदिकत्वम् । २०७

तद्यस्यादिमन्त्रद्वयेनातिथिसामान्यार्थो गृह्यते । २०८

ग्रन्थप्रामाण्याप्रामाण्यविषयः २१३-४०८

वेदानामीश्वरोक्तत्वे किं किमपि प्रमाणं नास्ति ? २१३

किं सूर्यादीनां प्रकाशकरणे नेत्रप्रकाशापेक्षा ? २१५

वेदानां स्वतः प्रकाशकत्वे प्रामाण्ये वा शास्त्रप्रमाणानि सन्ति, तत्राश्रद्दधानस्य पारिजातकर्तुर्गर्हा एव । २१७

अपौरुषेयताकथनेन जीवकर्तृत्वस्य निरसनं न तु ईश्वरकर्तृत्वस्य । २२०

'सत्यधर्मप्रियाचरणैः' इत्यत्र सत्यविशेषणस्य किं न सार्थक्यम् ? २२२

अर्थव्याख्यानशब्दयोस्तात्पर्यार्थो न एक एव । २२३

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विषय-सूची

वेदोपवेदाङ्गानि चतुर्दशविद्यानां ग्रन्थाः सन्ति। २२६

तर्कसंग्रहादीनामार्षग्रन्थापेक्षयोत्तमतां सिषाधयिषोः पारिजातकर्तुर्महोन्मादः। २२८

व्यासजैमिन्यादिदर्शनानामुपाङ्गत्वं किं चिन्त्यम्? २३७

ज्ञानस्य विधानं कर्तुं किं न शक्यम्? किं वा योगशास्त्रं नोपासनाविधायकम्? २३९

कपिलमुनिकृतं सांख्यशास्त्रं किं न विश्वसनीयं शङ्कराचार्यखण्डितत्वात्? २४१

रुद्रयामलादिग्रन्था नास्तिक्यावहा न प्रमाणार्हाः। २४४

नहि सन्दर्भिततन्त्रग्रन्थेषु कश्चिद् गूढोऽभिप्रायः। २४६

'द्यौर्मे पिता' इति मन्त्रस्य सङ्गतिः समीचीनाऽत्र। २५६

'शासद्वह्निर्दुहितुः' इति मन्त्रस्यालङ्कारिकव्याख्यानं समीचीनतरम्। २५७

'प्रजापतिर्वै स्वाम्' इति मन्त्रस्यालङ्कारिकऋषिव्याख्यानमेव समीचीनतरम्। २५९

इन्द्राहल्ययोः कथाया वास्तविकरहस्यबोधनमिहापूर्वमालङ्कारिकम्। २६८

ऐतिहासिकघटनानां वेदे सत्यमान्यतायामनर्थो महान् घटित इति सोदाहरणमत्र निदर्शनम्। २७४

'इन्द्रस्य सूर्यस्य परमेश्वरस्य वा' इत्यादिव्याख्यानस्य युक्तियुक्तप्रामाणिकता। २८०

'अहन् वृत्रं वृत्र' 'अपादहस्तो' इत्यनयोर्मन्त्रयोरर्थे करपात्रिकृताक्षेपनिराकरणम्। २८९

तीर्थविषयः

कश्यपगयादिकथानां वास्तविकार्थप्रकाशने ईश्वरस्य सशरीरत्वकल्पनाक्षेपनिराकरणम्। २९३

साक्षात् पारम्पर्येण वा सर्वमीशजन्यमिति मतं किन्नाशास्त्रीयम्? २९९

'गय' शब्देनात्र नहि मगधस्थ 'गया' ग्रहीतुं शक्यते। ३००

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'प्राणो वै बलम्' इत्यादिव्याख्यानं भूमिकायां सर्वथा समुचितम् । ३०२

'इदं विष्णुर्विचक्रमे' इति भाष्यस्य कृताक्षेपनिराकरणपूर्वकं प्रमाणबहुलं समीचीनतरत्वप्रतिपादनम् । ३०७

समारोढुमर्हे गयशिरसीति प्राणानां प्रजानां च यदुत्तमाङ्ग-प्रकृत्यात्मकं शिर इति भाष्यस्य विशदं व्याख्यानम् । ३१७

'पांसुरेप्यायनेऽन्तरिक्षे पदं पदनीयं परमाण्वाख्यं यज्जगत् तच्चक्षुषा न दृश्यते' इत्यस्य विशदं व्याख्यानम् । ३२४

'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः ? इति तात्पर्यं किं 'यज्ञादिषु विहितानि हिंसनान्यहिंसैव' इति मन्तव्यम् ? ३२५

किं जलादिषु तारकत्वं न परमाचार्यशास्त्रेषु ? ३२८

इडापिङ्गलासुषुम्णादीनां गङ्गादिसंज्ञात्वम् । ३२९

सर्वत्र शब्दयौगिकत्वे गोग्मादिशब्दानां रूढत्वं कथम् ? ३३३

सितासिताभ्यामिडापिङ्गलयोर्ग्रहणमिह सप्रमाणम् । ३३६

पुराणादिप्रोक्तमूर्त्तिपूजादीनां मिथ्यात्वे प्रमाणम् । ३३९

'ओं विष्णोर्दंष्ट्रोऽसि' इति मन्त्रेण किं क्षुरपूजनम् ? ३४६

'नमस्ते अस्तु विद्युते' इति जडदेवतानां नमस्कारादिकं 'प्रतिपदे स्वाहा' इत्यादिभिराहुतयः किं न जडपूजनम् ? ३५०

किं ब्रह्म वाणीविषयः ? ३५३

'प्रतिमानां भेदकः' इत्यादिवचनैः किं देवतानां मन्दिराणि पूजाविधयश्च सिध्यन्ति ? ३५७

किमखण्डकालस्य पलघट्यादिखण्डानामिव निराकारस्याऽपि मूर्तयो भवितुं शक्यन्ते ? ३६०

'जीविकार्थे चापण्ये' इत्यनेन किं न मूर्तिपूजा सिध्यति ? ३६३

'प्राची दिगग्निः' आदिमन्त्रैः परिक्रमामूर्तिरेव किं सम्भवति ? ३६४

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पूजाशब्दस्य विशिष्टार्थाः । ३६८

ग्रहपूजाविषये श्रीकरपात्रकृतशङ्कासमाधानम् । ३६९

मन्त्रार्थानुसारी विनियोगस्तूचितो न परं विनियोगशृङ्खलितो मन्त्रार्थः । ३७३

न चतुर्युगायुःप्रमाणं प्राणिनः सम्भवति । ३७६

'उद्बुध्यस्वाग्ने' इति व्याख्यानं प्रकरणसङ्गतमेव । ३७९

'अन्नात् परिस्रुतः' इत्यस्य व्याख्यानं सर्वथा समीचीनं सोमलताविषयकम् । ३८१

'शन्नो देवीः इति मन्त्रार्थे कृताक्षेपनिराकरणम् । ३८८

'कया नश्चित्र' आदिमन्त्राणां व्याख्यानमुचितम् । ३८९

आर्यसामाजिकमते विनियोगस्याकिञ्चित्करत्वाद् ग्रहादिपूजनेऽपि
विनियोगः कथन्नोचितः ? ३९१

वेददृशा अद्वैतवादस्थितिनिरूपणम् । ३९२

अधिकारानधिकारविषयः ४०९-४४३

वेदाध्ययने सर्वमनुष्याधिकारविधानम् । ४०९

'जातिपरिवृत्तौ' इत्यत्र जातिशब्दो वर्णवाचकः । ४१५

जन्मना शूद्राणां स्त्रीणां च किन्नाधिकारो वेदाध्ययने यजने वा ? ४१९

सीतायाः किं षष्ठे वर्षे विवाहोऽभूत् ? ४२५

'पद्भ्यां शूद्रो अजायत' इत्यस्यार्थः । ४२६

'यथेमां वाचम्' इति मन्त्रस्य ऋषिदयानन्दकृतव्याख्यानम् । ४२७

'अश्वस्य त्वा वृष्णः शक्ना धूपयामि' इत्यस्य भूमिकार्थस्यौचित्यम् । ४२९

'पावमानी द्विजानाम्' किमेतेन जन्मना द्विजानामेव पावनत्वम् ? ४३०

ईश्वरः कण्ठताल्वादिविना कथमुपदेष्टुं शक्नुयात् ? ४३४

'स्वाय' पदेन स्त्रीसेवकादीनाम् 'अरणाय' इत्यनेनातिशूद्राणां ग्रहणं कथङ्कारम् ? ४३६

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अग्न्यादीनामृषीणां कियदायुः कश्चोपनेताऽऽसीत् ? ४३७

किं शूद्रा मन्दबुद्धय एव भवन्ति ? ४४१

पठनपाठनविषयः ४४४-४५९

'प' इत्यस्योच्चारणमोष्ठौ संयोज्यैव कार्यम् किमत्र एवकारो व्यर्थः ? ४४४

किं 'दुष्टः शब्दः स्वरतो' इत्यस्य व्याख्याने 'गानकर्ता' इत्यस्य स्थाने भूमिकायां 'गायक' शब्दः प्रयोक्तव्यः ? ४४६

'उत त्वं सख्ये स्थिरपीतमाहुः' इत्यस्य विशिष्टं व्याख्यानम् । ४५२

'यो ह्यविद्वान् अपुष्पाम्' इत्यादिव्याख्यानस्य निरुक्तानुकूलं सौष्ठवमेव । ४५५

'सम्बन्धस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः' इति किं सायण एवावागच्छन् न ऋषिदयानन्दः ? ४५७

भाष्यकरणशङ्कासमाधानादिविषयः ४६०-५११

सर्वस्यैव वेदस्य कर्मकाण्डत्वमुक्तं सायणेन, तन्नोचितम् । ४६०

'इन्द्रं मित्रं वरुणम्' इति मन्त्रे अग्निशब्दो वारद्वयं पठितोऽन्यथार्थे वर्णितः । ऋषिकथने किम् 'अपर्यनुयोज्यानुयोग' इति नूतननामकं किञ्चिन्निग्रहस्थानम् ? ४६१

इन्द्रशब्दस्य प्रथमोपस्थितत्वात् किं विशेष्यत्वे कश्चिन्नियमः ? ४६३

सायणाचार्यस्य वेदरहस्याप्रतिबोधे निदर्शनम् । ४६६

अग्निशब्दस्य ईश्वरस्य भौतिकाग्नेर्वाचकत्वम् । ४६९

विशेष्यं प्रति विशेषणं पुनः पुनरन्वितं भवति हि । ४७१

सदग्निशब्दयोर्द्वयोर्मिथो विशेष्यविशेषणत्वसङ्गतिदर्शनम् । ४७३

सायणाचार्यकथने 'परमेश्वर एव' इत्यत्र एवकारो न युक्तः । ४७५

न प्रसिद्धार्थबाधस्यान्याय्यत्वं वेदार्थे । ४७६

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'आग्नेयोऽष्टाकपालो भवति इत्यादौ अधिष्ठात्री देवता गृह्यते' इत्यादेः पारिजातोक्तस्य युक्तायुक्तविवेचनम् । ४७७

'अथ येऽग्न्यादय इमे प्रत्यक्षा न त एते देवता अपितु एषामभिमानिनः सन्ति' इति व्यासवचनस्य युक्तं विवेचनम् । ४८२

परमेश्वरस्य शरीरित्वस्य निषेधतात्पर्यव्याख्यानम् । ४८४

'यतो वा इमानि भूतानि जायन्ते' इति वचनेन किं परमेश्वर-स्योपादानत्वमुच्यते ? ४८६

'एष एव प्रदानं मेदो वपानामुपन्यस्तः पुरोडाशानाम्' इत्यादिवाक्यैर्मांसाहुतिप्रतिपादनमवैदिकम् । ४८९

'ता उभौ चतुरः' इत्यादिमन्त्राणां माहीधरमपव्याख्यानमेव । ४९१

'यकासकौ' इत्यस्यापि अपव्याख्यानमेव । ऋषिकृतं व्याख्यानं प्रशस्तम् । ४९४

'उत्सक्थ्या' मन्त्रस्यार्षं व्याख्यानं सम्यक् । ४९९

यजमान-कुमारी-पत्नी-दासीनां वाश्लीलभाषणादिकं न सच्छास्त्रसङ्गतम् । ५०१

कात्यायनशतपथादिषु प्रक्षिप्तं निःसारं महर्षिस्त्याज्यममन्यत । ५०५

पशुहिंसनं किं सांख्यैः क्रतूपकारकं मन्यते ? ५०५

पारिजातकृता होलिकायामश्लीलभाषणं भारतीयसभ्यतायामनुमतं प्रतिपाद्यते, तत्खण्डनम् । ५०९

प्रतिज्ञाविषयः ५१२-५२१

ऋषिदयानन्दकृतमर्थं पातञ्जलादिविरुद्धमुक्त्वा यत् करपात्रिणा विगीयते तदसूयाप्रसूतम् । ५१२

प्रश्नोत्तरविषयः ५२२-५५३

वेदानां चत्वारो विभागा भिन्नभिन्नविद्याज्ञापनायैव । ५२२

इह पठितं 'षट्क' पदं न व्यर्थम् । ५२४

वैदिकशब्दानां यौगिकत्वमेव प्रशस्यते । ५२५

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विषय-सूची

मन्त्रद्रष्टुर्ऋषेर्नामोल्लेख आदरार्थः । ५२८

मन्त्रार्थज्ञानानुरूपकर्मानुष्ठानं सफलमृषित्वप्रतिपादकमस्ति । ५२९

'द्योत्यपदार्थानां प्राधान्येन यत्र स्तुतिस्तत्र मन्त्रमयी देवता' इति खण्डने पारिजातोक्तमतीव मन्दम् । ५३२

मन्त्राद् भिन्नार्थस्यैव सङ्केतः प्रकाश्यते । ५३३

दयानन्दभाष्ये सर्वत्र सङ्गतिरेव । ५३५

वेदेऽपि भौतिकैहिकज्ञानसम्भव एव । ५३७

'अग्नेः शिल्पविद्याहेतुत्वं न मन्त्रब्राह्मणसूत्रेषु क्वापि दृश्यते' इति पारिजातोक्तमतथ्यम् 'तुग्रा ह' आदिषूपलम्भात् । ५३९

त्रिषु लोकेषु त्रीणि ज्योतींषि दृश्यन्ते तेषां शिल्पविद्यायामुपयोगः । ५४५

सरस्वतीशब्देन परमेश्वरस्य वाण्या अनन्तविद्यावत्त्वे पारिजातकृतो नास्तिकत्व-प्रकल्पनम् । ५४७

'ब्रह्म ह देवेभ्यो विजिग्ये' इत्यादिप्रघट्टके उद्भावितशङ्कानां समाधानम् । ५५१

वैदिकप्रयोगविषयः ५५४-५६०

'मध्यमपुरुषप्रयोगार्थौ द्वौ भेदौ' इत्यत्राशुद्धिकथनमेव बुद्धेरशुद्धिरस्य । ५५४

वागाम्भृणी नाम्नी ऋषिकैव प्रमाणं स्त्रीणां वेदाधिकारे । ५५९

स्वरव्यवस्थाविषयः ५६१-५८८

प्रकृते स्वरव्यवस्थाविषये षड्जादिगानविद्यास्वराणां भिन्नोपयोगिता । ५६१

किन्नैकस्य मन्त्रस्यानेके स्वराः सम्भवन्ति ? ५६२

सामगानप्रकारे किञ्चित् संक्षिप्तवक्तव्यम् । ५६५

किं वेदार्थज्ञाने स्वरज्ञानमपरिहार्यम् ? ५६८

अत्र उपयोगिताशब्दस्य विशिष्टोऽर्थः । ५७६

शब्दनिष्पत्तौ अनेकधातूह्यो कथङ्कारं निर्दिष्टस्वरोपलब्धिः ? ५७७

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विषय-सूची

मन्त्रे स्वरानिश्चितिरेव किं समीचीनतरा स्यात् ? ५७९

किं सौवरेण स्वराणां वेदार्थसाधकत्वाभावोल्लेखः ? ५८१

एकश्रुतिविधानेन किमनेकार्थावबोधनं लक्षितम् ? ५८२

व्याकरणनियमविषयः ५८९-६१४

किं स्वामिदयानन्देन महाभाष्याभिप्रायवर्णने स्वैरिताऽऽचरिता ? ५८९

लोके रूढार्था न हि वेदेऽप्यनुसर्तव्याः । ५९५

स्वामिदयानन्दः छान्दसं बहुलं मत्वा किमनर्थं कुरुते ? ५९८

श्रीप्रशस्यमित्रेण विज्ञापितास्त्रुटयो वस्तुतो नैव त्रुटयः । ६०४

अलङ्कारविषयः ६१५-६२५

अदितिशब्दार्थविषये पारिजाते आक्षेपणं भ्रान्त्यैव । ६१५

पारिजातकर्तुरलङ्कारविषयकव्यामोहः । ६२२

उपसंहारः ६२६-६३३

महर्षिकृतभूमिकायामशक्यं वर्णेनाऽप्यनर्थकेन भवितुम् । ६२६

श्रीकरपात्रं प्रति कृतज्ञताज्ञापनम् । ६२९

उत्तमर्णमहर्षेरानृण्यं न कथमपि सम्भाव्यते । ६३२

— : ० : —

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्यार्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ओ३म्

अथ राजप्रजाधर्मविषयः संक्षेपतः

अज्ञानान्धतमःप्रगाढरजनी धर्मद्विषां भीषणा-
क्षेपवातमहान्धमूढपवना वान्ति प्रतीपं पुनः।
आवर्तभ्रमजालपाशितगतिर्ध्वस्ता च जीर्णा तरी,
तत्रालं ब्रुडितुं पुराणधिषणा यत्कर्णधारोऽभवः॥

पृ० १४३९, पं० ४—अत्रायं 'त्रीणि राजाना०' इतिमन्त्रस्य 'यथा—सूर्याचन्द्रमसौ (राजाना) सर्वमूर्त्तद्रव्यप्रकाशकौ भवतः, तथा सूर्यचन्द्रगुणशीलौ प्रकाशन्याययुक्तौ व्यवहारौ (त्रीणि सदांसि भूषथो) भूषयतोऽलङ्कुरुतः' इति कृतं भाष्यमाक्षिपति यत् "तत्त्वसङ्गतमेव, उदक्षरत्वात्। तथाहि राजाना इति पदेन कथं चन्द्रसूर्यवत् प्रकाशमानयोः सूर्यचन्द्रशीलयोर्व्यवहारयोर्ग्रहणम्? मूले ऽव्यवहारपदाभावात्। राजग्रहणमेव कुतो न

एक तो मतमतान्तरों के अज्ञान के घोर अन्धकार से गहराई रात, दूसरे धर्मद्वेषियों के भीषण आक्षेप-बवण्डरों के तूफानों के मूढ पवन उल्टे बह रहे हैं, तीसरे आवर्तों (भँवरों) के चक्रजाल में फँसी हुई कौम की नौका पुरानी और टूटी-फूटी है, इस पर भी पुरानी (पौराणिक) दकियानूसी रूढबुद्धिवाले इस सनातन कौम की नैया के खिवैया तुम बने हो, ये सब इसके डुबाने के लिये पर्याप्त हैं। सच कहा है—

अँधेरी रात, तूफाने बला, टूटी हुई किश्ती।
यही असबाब क्या कम था कि जिस पर रहनुमा तुम हो॥

पृ० १४३९, पं० ४—यहाँ 'त्रीणि राजाना०' इस मन्त्र के भाष्य में स्वामी जी ने 'तीन प्रकार की सभाओं को राजा मानना चाहिए, एक मनुष्य को कभी नहीं। ये तीनों आर्य राजसभा, आर्य विद्यासभा और आर्य धर्मसभा हैं'। इस व्यवस्था को करपात्रीजी असङ्गत कहते हैं, क्योंकि "यह अक्षरों के अर्थ से बाहर है। जैसे—'राजाना' पद से सूर्य और चन्द्र के समान प्रकाशमान व्यवहारों का ग्रहण कैसे होगा? मूल में तो व्यवहार पद है नहीं। दूसरे राजा का तथा इन्द्र और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्यात्? इन्द्रावरुणौ राजानौ कुतो न ग्राह्यौ? लक्षणाऽपि शक्यार्थसम्बन्धिन्येव भवति, सत्यामनुपपत्तौ यथाश्रुतार्थग्रहणे। न चात्रानुपपत्तिं पश्यामः। एवमेव सदःशब्देन सवनोऽपि ग्रहीतुं शक्यते यागप्रसङ्गे श्लिष्यते च। वेदेषु त्रीणि सवनानि प्रसिद्धानि न तथा सदांसि प्रसिद्धानि, ताभिः पुरूणि विजयादीनीत्यत्रापि किं बीजम्?" इति।

समाधानम्—इदं हि मयकाऽसकृदुक्तं यद् वैदिकाः शब्दाः खलु मूलतो यौगिकाः। यौगिकेनार्थेन यत्र यत्र सङ्गतिर्भवति तत्रासावर्थः सम्पद्यते। अत्र राजृ (दीप्तौ) धातोः 'राजानौ' इति सिध्यति। तथा राजप्रसङ्गे 'राजा प्रजाजनश्चेत्येतौ' (ऋग्वेदभाष्ये) इत्यर्थः। लुप्तोपमायां 'राजानौ देदीप्यमानौ यथा सूर्यचन्द्रौ' इत्यर्थः। तद्वद् राजप्रजाजनस्थत्वाद् व्यवहारो ग्रहीष्यते। यतः सद्व्यवहारः सभां भूषयति दुर्व्यवहारश्च नैव। व्यवहारस्यात्रोत्प्रेक्षणं भविष्यति। यदि सर्वत्र त्वदुक्तौ इन्द्रावरुणौ कौचिद्दिव्यौ देवावेव ग्रहीष्येते, तथा कदाऽपि किं नैव व्यावहारिक एतादृशोऽर्थो ग्रहीष्यते? इन्द्रस्य वरुणस्य च कस्तावदर्थो रूढेरपरः? सद इति पदं तु सभार्थे प्रसिद्धमेव, अत एव सदसि भवः सदस्यः कथ्यते। सदांसि सभाः राजानौ अर्थात् तयोर्व्यवहारावेव भूषयत इति लक्षणार्थः सूपपन्न एव।

वरुण का ग्रहण क्यों नहीं होगा? लक्षणा भी शक्यार्थ सम्बन्धी में ही होती है, वह भी तब, जबकि अर्थ जैसा सुनाई पड़ता है, वैसी उसकी उपपत्ति न बनती हो। यहाँ कोई अनुपपत्ति दिखाई नहीं पड़ती। इसी प्रकार 'सदः' शब्द से सवन का ग्रहण हो सकता है, इसका योग से सम्बन्ध भी है। उनसे युद्ध में विजयों की प्राप्ति होती है, इसमें क्या प्रमाण है?"

समाधान—यह हमने कई बार लिखा है कि वैदिक-शब्द मूलतः यौगिक हैं, यौगिक अर्थ की जहाँ-जहाँ जैसी संगति है, वहाँ वही अर्थ गृहीत होता है। यहाँ भी दीप्त्यर्थक 'राजृ' धातु से 'राजानौ' शब्द बनता है। तथा राजप्रसंग में 'राजानौ' द्विवचन से 'राजा और प्रजाजन' यह अर्थ निकलेगा। जैसे सूर्य और चन्द्रमा सब मूर्त्त द्रव्यों के प्रकाशक होते हैं, उसी प्रकार राजा और प्रजाजनों के प्रकाश-न्याययुक्त व्यवहार तीनों सभाओं को भूषित करते हैं, क्योंकि सद्व्यवहार सभाओं को भूषित करता है, दुर्व्यवहार नहीं। जैसे सूर्य और चन्द्र से प्रकाश उत्प्रेक्षित है, उसी प्रकार राजा और प्रजाजनों के सद्व्यवहार उत्प्रेक्षित हैं। 'राजा' शब्द से यदि सर्वत्र इन्द्र और वरुण अर्थ ही तुम्हारे कथनानुसार लिये जाते रहेंगे, तब तो कदापि राजनीत्यादिपरक ऐसा व्यावहारिक अर्थ ही सिद्ध नहीं होगा। और तुम्हारे मत में तो इन्द्र और वरुण के दो ही रूढ देवतार्थ ही लिये जाया करेंगे; क्योंकि इसके अतिरिक्त अन्य कोई वैज्ञानिक अर्थ ही तुम्हारी कल्पना से बाहर है। 'सदः' का जितना प्रसिद्ध अर्थ 'सभा' है, वैसा 'सवन' नहीं है। तभी तो सभा में होने से 'सदस्य' कहाता है। इन सभाओं को देदीप्यमान राजा और प्रजा के व्यवहार भूषित करते हैं, यह लक्षणार्थ संगत होता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नहि मन्त्रस्य सर्वप्रसंगे यज्ञार्थ एव ग्राह्यः, आध्यात्मिकादिपक्षाणामपि सत्त्वान्मन्त्रार्थस्य च घटितत्वात्। कश्चिदेवोत्प्रेक्षाविरहितो रूढिकीलके बध्नातु स्वमतिम्। ततो सवनार्थग्रहानुरोधः कुण्ठितधीपरिणामः स्यात्।

पुरु इति बहुनामस्वपि निघण्टौ पठितम्, तस्मात् 'पुरूणि' इति पदं 'सदांसि' इति पदस्य विशेषणत्वेनाविवक्षायां 'बहूनि विजयादीनि' इत्युपलक्षयति। यच्चाहात्र सदःशब्देन सवनोऽपि ग्रहीतुं शक्यते प्रसिद्धत्वात्, तत्र नास्ति मदीयाग्रहोऽग्रहणे, परं सभार्थग्रहणे कथमस्ति ते मतिविप्रतिपत्तिः ? महाशय ! कदाऽपि तु सायणमहीधरादिप्रस्तुतार्थशृंखलाबन्धनाद् उन्मोचयतु स्वबुद्धिम्। वस्तुतोऽयमूहाविरहितो न स्वप्नेऽपि मन्त्राक्षरलभ्ययौगिकार्थकल्पने समर्थो भवति।

अन्यत्र 'सदः सदः' इत्यस्य उव्वटमहीधराभ्यां गृहं गृहं प्रति इत्यर्थः स्वीकृतो न चाऽपि सवनोऽर्थः। यदि सभाप्रसिद्धार्थाग्रह एव, तदा ब्रूतां विशरण-गत्याद्यर्थाः क्व सार्थक्यं लप्स्यन्ते ? क्व च निरुक्तार्थाङ्गीकृतशरीरसंवत्सराद्यर्थः सार्थक्यमेयात् ?

पृ० १४४०, पं० ६—यच्चाह—"तदेतत् सर्वं कपोलकल्पितम्। तन्नाम्नीनां सभानां सत्त्वे प्रमाणाभावात्। यथा सनातनिभाष्येषु प्रतिपादिता अर्था मन्त्रैर्ब्राह्मणैः श्रौतसूत्रैश्च समर्थ्यन्ते,

---

सब प्रसंगों में केवल यज्ञार्थ ही क्यों लिया जावे, जबकि आध्यात्मिक आदि पक्षों में भी मन्त्रार्थ घटित होते हैं। कोई ही अज्ञानी होगा जो केवल रूढि के खूँटे से अपनी बुद्धि को बाँधे रहेगा। तब 'सवन' अर्थ के ग्रहण का दुराग्रह कुण्ठित-मति का ही परिणाम कहा जा सकता है।

'पुरु' शब्द निघण्टु में 'बहु' अर्थ में पठित है। जब हमें 'सदांसि' का 'पुरु' को विशेषण कहने की इच्छा नहीं है, तो विजय आदि का उपलक्षक हो जायेगा। 'सदः' शब्द से 'सभा' अर्थ के ग्रहण न करने में आपका दुराग्रह निरर्थक है। इसमें आपको क्या अनुपपन्नता दीख रही है ? महाशय कभी तो सायण और महीधर आदि के प्रस्तुत अर्थों के शृंखला-बन्धन से अपनी बुद्धि को छुड़ा लिया करो। वस्तुतः यह लेखक ऊहा-प्रतिभा से रहित है, अतः स्वप्न में भी मन्त्राक्षरों से लभ्य यौगिकार्थों की कल्पना करने में ही असमर्थ है।

दूसरे 'सदः सदः' इसका उव्वट और महीधर ने 'गृहं गृहं प्रति' (प्रतिगृह) अर्थ किया है, सवन अर्थ नहीं लिया, वहाँ आपको आक्षेप करने की नहीं सूझी। और यह भी बताओ कि सदा जन-प्रसिद्धार्थ ही लिया जायेगा, तो 'सद्' धातु के विशरण, गति, अवसादन अर्थ कहाँ सार्थक होंगे ? और निरुक्त के स्वीकृत संवत्सर और शरीर अर्थ कहाँ लिये जा सकेंगे ?

पृ० १४४०, पं० ६—ऋषि दयानन्द ने सभासदस्य के लिये मन से सत्याचरण व न्यायपक्षी होने की बात कही है। पृथ्वी-राजपालनादि-व्यवहारकुशल और पवन की तरह सर्वगामी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न तथाऽत्र व्याख्याने ब्राह्मणादिभिस्तिस्रः सभास्तत्कार्याणि तद्विभागाश्च समर्थ्यन्ते।" इति, तदप्यविचारमूलकमाक्षेपमात्रम्, 'त्रीणि सदांसि' इत्यनेन सभानां तिसृणां प्रमाणोपलब्धेः। नामानि वेदेन वेदशब्देभ्य ऋष्यादिभिः क्रियन्ते। ऋषेरयं स्वभावो यत् स प्रत्येकं वार्तं वेदमूलिकां प्रमाणकोटिं नयते। भवान् ब्राह्मणादिभिरेव प्रामाण्यमवगाहते। यदा हि ब्राह्मणादिप्रणेतृभिः स्वयमपि वेदेभ्य एव सकलमूहितम्।

इहापि राज्यव्यवस्थायाम् अज्ञानासुरक्षान्यायादीनां प्रतीकाराय तिस्र एव सभाः पर्याप्ताः। अज्ञाननिवारणाय विद्यार्यसभा, असुरक्षानिवारणाय राजार्यसभा, अन्याय-निवारणाय धर्मार्यसभा च। एतदेव पर्यालोच्य मनुरपि सङ्केतयति, तस्मादप्यूहनीयमुपरिगतम्। यथा—

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम्॥ ७। २॥

अत्र ब्राह्मसंस्कारेण विद्यार्यसभायाः, क्षत्रियेण राजार्यसभायाः, यथान्यायशब्देन

दूतोंवाले सभासदों की चर्चा की है। करपात्रीजी कहते हैं कि—"यह सब कपोलकल्पित है; क्योंकि उन नामों की सभाओं की कोई प्रामाणिकता नहीं है। सनातनियों द्वारा प्रतिपादित भाष्यों का श्रौतसूत्रादिकों से समर्थन होता है। परन्तु यहाँ पर ब्राह्मणादि के द्वारा तीन सभाएँ, उनके कार्य वा उनके विभागों का समर्थन नहीं मिलता।" यह भी सब विचार-रहित आक्षेपमात्र है। जबकि 'त्रीणि सदांसि' पद ही तीन सभाओं के होने में स्वतः प्रमाण हैं। नामकरण तो प्रारम्भ में वेदों से ही हुआ, फिर वेद के शब्दों से ऋषियों ने नाम रखे। ऋषि दयानन्द का यह स्वभाव है कि वे किसी भी बात की वेदमूलकता अवश्य देखते हैं, तभी उसे प्रामाणिक मानते हैं। आप केवल ब्राह्मणादि से ही प्रामाणिकता खोजते हैं, जबकि ब्राह्मणादि ग्रन्थ-कारकों ने भी स्वयं वेदों से ही समस्त की कल्पना की।

यहाँ पर भी राज्यव्यवस्था में तीन—अज्ञान, असुरक्षा और अन्याय के निवारणार्थ तीन ही सभाएँ पर्याप्त पाई गई। अज्ञान-निवारण के लिये विद्यार्यसभा, असुरक्षा शत्रु आदि के भय से रक्षा के लिये राजार्यसभा और अन्याय के निवारण के लिये धर्मार्यसभा। यही सब पर्यालोचन करके महाराज मनु ने भी संकेत किया है, उसमें भी उपरिगत की कल्पना करनी चाहिये। यथा—

'शास्त्रानुसार वेद को प्राप्त क्षत्रिय न्यायपूर्वक सब प्रजा की रक्षा करे।'

यहाँ ब्राह्म संस्कार से विद्यार्यसभा, क्षत्रिय द्वारा राजार्यसभा और यथान्याय शब्द से धर्मार्यसभा की परिकल्पना बुद्धिमानों को कर लेनी चाहिये। कदाचित् ब्राह्मणादि ग्रन्थों में न भी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

धर्मार्यसभायाः परिकल्पनमूह्यमुत्रेक्षावद्भिः । ब्राह्मणादिष्वनुक्तमपि ऋषिमुनिभिरूह्यत एव । यथा च मनुना—

कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः ।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥ ७ । १५४ ॥

तत्राष्टविधं कर्म—(१) विद्वत्संगतिः, (२) इन्द्रियजयः, (३) अमात्यादिनियुक्तिः, (४) दुर्गनिर्माणम्, (५) युद्धप्रशिक्षणम्, (६) दण्डः, (७) वेतनम्, (८) करग्रहः ।

उशनस्स्मृत्यनुसारं च—

आदाने च विसर्गे च तथा प्रैषनिषेधयोः ।
पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ।
दण्डशुद्ध्योस्तथा युक्तस्तेनाष्टगतिको नृपः ॥

मेधातिथ्यनुसारं चान्यदेवाष्टविधं कर्मोहितम् ।

तथैव पञ्चवर्गश्चाणक्यानुसारम्—"कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पद्, देशकाल-विभागः, विनिपातप्रतीकारः, कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः ।" (प्रक० १० । १४)

कुल्लूकभट्टानुसारं च कापटिकोदास्थितकृषकवाणिजकतापसव्यञ्जका इति पञ्चवर्गः ।

कहा गया है, तब भी वेद के अविरोध होने पर ऋषि-मुनि कल्पना भी कर लेते हैं । जैसा कि मनु ने कहा है—

'सम्पूर्ण अष्टविध कर्म तथा पञ्चवर्ग की व्यवस्था, लगाव व अपराग एवं मण्डल की गतिविधि—इन बातों पर ठीक-ठीक विचार करें ।'

इसमें मनुप्रोक्त अष्टविध कर्म—(१) ऋत्विक्-संगति, (२) इन्द्रियजय, (३) मन्त्री, (४) दुर्गनिर्माण, (५) युद्धप्रशिक्षण, (६) अपराधि-दण्ड, (७) वेतनादि और (८) करसंग्रह—ये हैं ।

परन्तु उशनस्-स्मृति में—(१) आदान, (२) विसर्ग, (३) प्रैष, (४) निषेध, (५) अर्थवचन, (६) व्यवहारावेक्षण, (७) दण्ड और (८) शुद्धि—ये आठ हैं ।

मेधातिथि के अनुसार आरम्भ समाप्ति आदि आठ कर्म हैं ।

इसी प्रकार आचार्य कौटिल्य के अनुसार—(१) कार्यारम्भ, (२) पुरुषद्रव्यसम्पत्ति, (३) देशकाल-विभाग, (४) विनिपात-प्रतीकार और (५) कार्यसिद्धि—ये पाँच वर्ग हैं ।

पर कुल्लूकभट्ट के अनुसार—(१) कापटिक, (२) उदास्थित, (३) कृषक, (४) वाणिजक और (५) तापस—ये पाँच वर्ग हैं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवमेव ऋषिदयानन्देन 'त्रीणि सदांसि' इति पदाभ्यां तिस्रः सभा ऊहिताः, तत्र ऐतिह्यमूलम्। तद्यथा—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः॥

इत्यश्वपतिप्रशासनेनाऽपि आहिताग्नित्वेन धर्मसभाया विद्वत्त्वेन विद्यासभायाः शिष्टपदै राज (प्रबन्धु)सभाया ऊहनं कृतम्। तथाविधसभानां प्राचीनकालिकलब्धसाहित्येनाऽपि प्रमाणितत्वात्।

पृ० १४४०, पं० ८—अत्र हि स्वप्रजामभिलक्ष्य ईश्वरो वदतीति लेखपूर्ववाक्येन सह योजनार्थो विशेषध्यानाकर्षणार्थश्च। यदाह—'यत्र सभया राजप्रबन्धो भवति, तत्रैव प्रजाहितं भवतीत्यपि न मन्त्रस्वारस्यम्।" तदभिधाधीफलम्, व्यञ्जनार्थाप्रतिपन्नत्वात्। अत इदं वचनं मन्त्रस्वारस्यमेव।

यच्चाप्याह—"जगन्वानित्यस्य कर्मत्वेन सत्यस्य न्यायस्य च ग्रहणे किं बीजम्?" तत्र भवानेव वक्तु, अत्र तावदग्रहणे ते किं बीजम्? भूमिकायां चकारापठनात्। सत्यं राजधर्म-

---

इसी प्रकार 'त्रीणि सदांसि' पद से ऋषि दयानन्द ने उक्त तीन सभाओं की परिकल्पना की है। इसमें इतिहास का प्रमाण देखिये—

'मेरे जनपद में कोई भी चोर, कंजूस, शराबी, यज्ञ न करनेवाला, मूर्ख और स्वेच्छाचारी नहीं है तथा न ही कोई व्यभिचारिणी स्त्री है।'

इस प्रकार अश्वपति के प्रशासन ने भी आहिताग्नि से धर्मसभा का, विद्वान् से विद्यासभा का तथा शिष्ट पदों से राजसभा का ऊहन किया है। इस प्रकार की सभाओं का प्रमाण प्राचीनकाल के उपलब्ध साहित्य में भी मिलता है।

पृ० १४४०, पं० ८—यहाँ पर स्वप्रजासन्तति को अभिलक्षित कर ईश्वर कह रहा है, यह बात 'अत्राहमपश्यम्' यह मैंने देखा है, इस विश्वास की दृढ़ता कराने की दृष्टि से लिखी गई तथा विशेष ध्यानाकर्षण के लिये भी कही गई है। 'जहाँ पर सभा से राज्यप्रबन्ध होता है, वहीं पर प्रजाहित होता है, यह मन्त्र-पदों से अभिहित भले न हो, परन्तु ध्वनित अवश्य है। अतः यह वचन मन्त्र का स्वरस ही है।

यह कहना कि "जगन्वान्' पद के सत्य और न्याय ये कर्म कहाँ से आ गये?" इसमें आप ही बताइये, जब 'जगन्वान्' क्रिया सकर्मक है कि 'मन से जाना तो क्या जाना' इसकी पूर्ति के लिये

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रकरणे न्याय एव भवति। 'व्रते मनसा जगन्वान्' अर्थात् सत्याचरणे मनसा विज्ञानेन जगन्वान् प्राप्तवान् प्राप्नोतीति। 'किं जगन्वान्' इति प्रश्ने स्वत एव यद् व्रतं तदेव प्राप्नोतीति ऋषिणा समीचीनतरं व्याख्यातम्।

पृ० १४४०, पं० १०—यच्चोक्तम्—"गन्धर्वानित्यस्य पृथिवीराजपालनादिव्यवहार-कुशलान् इत्यर्थकरणेऽपि किञ्चिद् बीजं नोपलभ्यते। नृत्यवादित्रादिकुशला इत्यनेन स्यात्।" तदखिलं बुद्धेरप्राशस्त्यद्योतनम्। ये गां पृथिवीं धरन्ति धारयन्तीति वा तत्पालनव्यवहारकुशला एव तां धारयन्तीति प्रज्ञावन्तो जानन्तीति तद्बीजोपलब्धिः। गन्धर्वशब्देन नृत्यवादित्रादिग्रहणं त्विह कामकेलिलोलमानसाराधकानामेव। अतोऽन्यदुन्मत्तप्रलपनम्।

पृ० १४४१, पं० १—"क्षत्रस्य योनिरित्यस्य भाष्यं विशृंखलम्,..... क्षत्रपदस्यापि क्षत्रजातिरर्थः, कोषादिसिद्धो राजव्यवहारस्तु लाक्षणिकः। लक्षणा चानुपपत्तिमूलिका, न चेह काचिदनुपपत्तिर्दृश्यते। नाभिरित्यस्य 'प्रबन्धकर्त्तासि इत्यपि निर्मूलम्, मा त्वा हिंसीत्, नहीश्वरस्य हिंसा सम्भवति, तस्य शस्त्राद्यगोचरत्वेन नित्यत्वात्। त्वं मां मा हिंसीरित्यपि निरर्थकम्, कारणमन्तरा परमेश्वरकर्त्तृकहिंसाया अप्राप्तत्वात्। लाक्षणिकार्थाश्रयणमन्तरा कस्यापि पदस्य यत्र व्याख्यानं न कर्तुं शक्यते, तद्व्याख्यानमपव्याख्यानमेव।"

ये कर्मत्वेन उपन्यस्त हैं। इनका ग्रहण न करे अन्य किसी पद के कर्मरूप में मानने में क्या बीज होता? अतः व्रत में विज्ञान से सत्य न्याय ही प्राप्त किया जा सकता है। अतः यह कर्म पद सुविचारित है।

पृ० १४४०, पं० १०—यह कथन कि "गन्धर्वान्' इसका पृथ्वी के राजपालनादि-व्यवहार में कुशल, इस अर्थ के ग्रहण करने में क्या बीज है?" आप नृत्य वादित्र आदि के ग्रहण करने में अभिरुचिवान् हैं। यह कथन आपकी बुद्धि के अभाव का द्योतक है; क्योंकि गो अर्थात् पृथिवी के धारण करनेवाले व्यक्ति या व्यवहार ही गन्धर्व कहला सकते हैं। यही इस अर्थ में बीज है। गन्धर्व से नृत्य वादित्र आदि अर्थ कामकेलिलोल मानस की आराधना करनेवालों को ही प्रिय हो सकता है। इससे अन्य आपका कथन उन्मत्तप्रलाप ही है।

पृ० १४४१, पं० १—यह कथन कि—"क्षत्रस्य योनिः' इस का भाष्य विशृंखल है। क्षत्र पद का अर्थ क्षत्रिय जाति है। कोषादिसिद्ध राजव्यवहार तो लाक्षणिक अर्थ है। जब कोई अनुपपत्ति हो, तब लक्षणा की जाती है। यहाँ कोई अनुपपत्ति नहीं है। 'नाभि' का 'प्रबन्धकर्ता' अर्थ करना भी निर्मूल है। ईश्वर की हिंसा भी नित्य होने से सम्भव ही नहीं है। तुम मुझे मत मारो, यह भी असंगत है; क्योंकि परमेश्वर बिना कारण किसी को क्यों मारेगा? लाक्षणिक अर्थ के आश्रयण के बिना किसी पद का अर्थ करना जहाँ सम्भव नहीं है, ऐसा व्याख्यान तो अपव्याख्यान ही है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—यदाह विशृंखलम्, तन्न, स्वमस्तिष्कस्यानेन स्वयं रूढिशृंखलाबद्धत्वात्। वेदा हि सृष्ट्यादौ तस्मात् परमपुरुषादाविर्भूता इत्यभिमतं तेषां मते वेदेषु व्यवहारमूलिकाया रूढेः कथं सम्भवः ? व्यवहारस्य वेदेभ्योऽर्वाचीनत्वात्। तथाऽह वागीश्वरो विद्यालंकारः—

शब्दान् वेदेभ्य आदाय, तद्गुणख्यापनेच्छया।
पश्चात् संज्ञा कृता येषाम्, न तेषां वर्णनं श्रुतौ ॥

तस्मात्—

प्रागधीत्यैव साहित्यं लौकिकं सपुराणकम्।
सर्वे प्राच्याः प्रतीच्या वा जना वेदमधीयते ॥
तत्संस्कारवशात्तेषां बुद्धौ लोकप्रतिष्ठितः।
अतिरूढोऽर्थ एवादावनुशीलयतां श्रुतिम् ॥
भाष्याणि सायणादीनां पाश्चात्यविदुषामपि।
अनुवादाश्च दिङ्मोहं प्रयच्छन्त्येव तत्पुनः ॥

परमृषिदयानन्दप्रदत्ता—

योगार्थकुञ्चिका मोहयन्त्रमुद्घाटयेद् यदा।
मन्त्रमञ्जूषिका गूढं तदा रत्नं प्रकाशते ॥

समाधान—इस भाष्य को विशृंखल कहना इस बात का द्योतक है कि इस लेखक की अपनी बुद्धि ही स्वयं रूढि की शृंखला से जकड़ी हुई है। वेद सृष्टि के आदि में उस परम पुरुष से आविर्भूत हुए—यह माननेवालों के मत में वेदों में मनुष्यों के व्यवहारमूलक रूढि इतिहास का सम्भव कैसे हो सकता है ? क्षत्रिय जाति आदि व्यवहार तो वेदों से ही मनुष्यों ने सीखा। व्यवहार वेदों की अपेक्षा अर्वाचीन है। वैदिक विद्वान् श्री वागीश्वर विद्यालंकार ने भी इस विषय में कहा है—

वेदों से शब्दों को लेकर, उन गुणों को कहने की इच्छा से जिन की बाद में (क्षत्र आदि शब्दों की) संज्ञा की गयी है, उनका वर्णन श्रुति में नहीं है। इसलिये आज के मनुष्य पहले पुराणसहित लौकिक साहित्य का अध्ययन करते हैं, पढ़ते हैं। इन ग्रन्थों के संस्कारों के कारण उन मनुष्यों की बुद्धि में अतिरूढ अर्थ लोकप्रतिष्ठित था, तब श्रुति का अनुशीलन किया। ऐसे सायणादि तथा पाश्चात्यों के भाष्य और अनुवाद दिङ्मोह पैदा करते हैं।

परन्तु ऋषि दयानन्द ने—

इन सायणादि के मोहयन्त्र को खोलनेवाली योगार्थ की कुञ्चिका (चाबी) दे दी, उससे जब मन्त्रों की मञ्जूषिका को खोल लेता है तो सत्यार्थ रत्न प्रकाशित हो जाते हैं। पहले तो रूढार्थ पूर्व-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्राक् प्रतीतश्च रूढोऽर्थो बाधितो यौगिकेन तु ।
विरोधाभासवच्चित्ते विदधाति चमत्कृतिम् ॥

तदिह एतस्याक्षेपो दुर्बलः । नहि वेदोत्पत्तेः प्राक् क्षत्रस्य क्षत्रजातिरर्थः । अयमपि क्षतात् त्रायत इति व्युत्पत्तिमेवानुसरति । अनया च व्युत्पत्त्या कथं राज्यराजव्यवहाराद्यर्थो बाध्येत ? न च लाक्षणिकोऽयमर्थः, निरुक्त्यैवोपलभ्यत्वाद् वाच्यस्यैतस्य । न ह्यत्र व्युत्पत्ति-लभ्यस्यार्थस्य बाधः । अस्य मन्त्रस्य सभेशो हि देवता ।

नह्यते यत्र स नाभिः क्षत्रं राज्यं राजकुलं च प्रबन्धकर्तरि जीवनहेतौ च परमात्मन्येव नह्यन्ते । अग्रे नहि परमात्मनो हिंसनं सम्भवतीत्यतो हिंसनं तिरस्कारो लक्षितस्तेन परमात्मानं तिरस्कृत्य कश्चिन्नास्तिको न भवेन्न वाऽपि परमात्मना स्वयमप्युपेक्षितो भवेदित्यर्थः सङ्गतः ।

यदुच्यते—"लाक्षणिकार्थाश्रयणमन्तरा कस्याऽपि पदस्य यत्र व्याख्यानं न कर्तुं शक्यते, तद् व्याख्यानमपव्याख्यानमेव ।" तदशास्त्रीयम्, अन्यथा तत्स्थलेऽपि लाक्षणिकार्थानां

धारणवश प्रतीत होता है, परन्तु यौगिकार्थ से बाधित हो जाता है, तब विरोधाभास जैसा चमत्कार उत्पन्न होता है ।

इसलिये इस अल्पश्रुत करपात्री का आक्षेप अत्यन्त हेय (दुर्बल) है । वेदोत्पत्ति से पूर्व क्षत्र जाति रूढ नहीं थी । वैसे कोई भी रूढि एकांश या सर्वांश में प्रायः यौगिक अर्थ का भी अनुवाद करती ही है । अतः क्षत अर्थात् व्रण या प्रहार से त्राण करने जैसे व्युत्पत्ति-लभ्य अर्थ का अनुसरण क्षत्रजाति शब्द भी करता है । फिर इस व्युत्पत्ति से राजव्यवहार अर्थ कैसे नहीं लिया जा सकेगा ? यह लाक्षणिक अर्थ नहीं है । यह अर्थ निर्वचन का वाच्यार्थ ही है । यहाँ पर व्युत्पत्तिलभ्यार्थ में बाधा नहीं है । तथा देखिये, इस मन्त्र का देवता स्वयं 'सभेश' (सभाध्यक्ष) है । अब बताइये, ऋषि दयानन्द का ही अर्थ सर्वथा सूपपन्न है कि नहीं ?

जिसमें बाँधा जाये, उसे नाभि कहते हैं । क्षत्र, राज्य तथा राजकुल, प्रबन्धकर्ता पुरुष और जीवनहेतु परमात्मा में ही सम्बद्ध किये जाते हैं । आगे भी कहा है कि परमात्मा का कभी हिंसन सम्भव नहीं है, अत एव यहाँ हिंसन का अर्थ तिरस्कार लक्षित है, इससे परमात्मा को तिरस्कृत करके कोई नास्तिक न हो और न परमात्मा के द्वारा ही कोई उपेक्षित हो, इस प्रकार यही अर्थ सर्वथा संगत है ।

यह कहना शास्त्रसंगत नहीं है कि—"लाक्षणिक अर्थ के आश्रय के बिना किसी भी पद का जहाँ व्याख्यान सम्भव नहीं हो सकता, वह अपव्याख्यान कहलाता है" क्योंकि जिन स्थलों पर अभिधा या व्यञ्जना द्वारा अर्थ किया जाता है और लक्षणा का आश्रय नहीं लिया जाता, तो

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्यर्थत्वापत्तेः। अतः 'कर्तुं न शक्यते' इति भवतो वाक्यमभीष्टार्थानभिधायकम्।

तथा च क्षत्रशब्दव्युत्पत्तिलभ्योऽर्थोऽभिधया उपन्यस्त इह। यथा—'छद्यते संव्रियते राज्ञा कर्मणि' क्तप्रत्ययेन क्षत्रशब्दस्य राष्ट्रार्थोऽभिधयैव। यथा—'क्षत्रं च एष प्रपद्यते—यो राष्ट्रे प्रपद्यते क्षत्रं राष्ट्रम्' इति, वैदिकशब्दानां समेषां यौगिकार्थकत्वात्, प्रयोगानन्तरं च व्यवहारे रूढावापादनात्। किंच 'क्षत्रियवर्णस्य नाभिः' इत्यर्थस्य परमात्मनि बाधितत्वात्, क्षत्रस्यार्थाद् राज्यसुखस्य परमात्माश्रयत्वाऽबाधे लाक्षणिकार्थस्याऽपि समुचितत्वान् महर्षेरर्थस्य सामीचीन्यमेव।

यदाह—"प्रतिपदमुदक्षरं मन्त्रादुच्यते" तद् वक्तु, "जानुप्रमाणपादामासन्दी, वेद्योर्मध्ये निदधाति, मुञ्जरज्जुकृताया आसन्द्या द्वौ पादौ दक्षिणवेद्यां द्वावुत्तरवेद्यां यथा भवेतां तथेति तदर्थः"(पृ० १४४१, पं० ८) इति पदावली क्वास्ति मन्त्रे ? तस्मात् सायणमनुकृत्योद्धृत-स्तवैवार्थ उदक्षरः।

अथवा 'क्षत्रस्य योनिः' इत्यत्र प्रसिद्धक्षत्रियजातेर्नहि ब्रह्म कारणम्, तच्छरीरस्य प्रकृतेरुपादानकारणत्वाज्जीवात्मनश्चाकारणवत्त्वात्। न च तदात्मतच्छरीर-संयोगे कर्मा-

---

क्या वह सब अपव्याख्यान होगा ? वस्तुतः नहीं। अतः आपकी शब्दावली आपके कथ्य को ठीक-ठीक अभिव्यक्त नहीं करती।

तथा च 'क्षत्र' शब्द का व्युत्पत्तिलभ्यार्थ राज्यार्थ अभिधा से ही लभ्य है; क्योंकि वैदिक शब्द प्रथम तो यौगिकार्थक ही होते हैं, प्रयोगानन्तर व्यवहार में रूढ या योगरूढ होते हैं। जैसा कि 'छद' धातु से कर्म में 'क्त' प्रत्यय का विधान मानकर क्षत्र का प्रयोग राष्ट्र या राज्यार्थ में किया है। जैसा कि शतपथब्राह्मण में कहा है—'क्षत्रं च एषः' इत्यादि। दूसरे 'क्षत्रिय वर्ण की नाभि' परमात्मा को मानने में वर्ण का सन्नहन परमात्मा में मानने में अर्थोपपन्नता में बाधा है, किन्तु राज्यसुख का परमात्मा के आश्रय से सम्भव होने से लक्षणा का आश्रयण सर्वथा समुचित है। अतः लक्षणा के समुचित होने से महर्षि का अर्थ उचित ही है।

यह कहना कि—"मन्त्र से प्रतिपदार्थ उदक्षर है" ठीक नहीं; क्योंकि वाक्यार्थ की संगति के लिये यह शब्दावली आवश्यक है, अन्यथा आप ही बताइये कि पृष्ठ १४४१ की आठवीं पंक्ति में पढ़ी हुई इतनी शब्दावली आपकी कहाँ से आ गयी ? जबकि मन्त्र में नहीं है। इसलिये सायणाचार्य का अनुकरण करके आपने जो अर्थ उद्धृत किया है, वही सब उदक्षर है।

अथवा 'क्षत्रस्य योनिः' इसमें प्रसिद्ध क्षत्रिय जाति का ब्रह्म कारण नहीं हो सकता; क्योंकि क्षत्रिय के शरीर का उपादानकारण प्रकृति है और उसमें प्रतिष्ठित जीवात्मा का कोई कारण भी नहीं है। यह नहीं कहना चाहिये कि उसके आत्मयुक्त शरीर के संयोग में ईश्वर निमित्तकारण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नुसारमीश्वरो निमित्तकारणमिति व[illegible]तव्यम्, सर्वसृष्टेरेव निमित्तत्वादविशेषः। तथा सति क्षत्रियान्वयानुपपत्तेस्तात्पर्यानुपपत्तिर्वा [illegible]क्षणाया मूलमिह। राजकुलादिव्यवहारवद् वेदस्य योनित्वाद् इत्येवंलक्षणोऽर्थः सर्वथा सूप[illegible]न्नः।

अथवा न क्षत्रस्य रूढ्यर्थाग्रहः का[illegible], क्षत्रं हि उदकनाम (नि० १।२) धननाम (नि० २।१०) आदित्याग्निसोमेन्द्रवरुणस्तोत्र[illegible]स्तराद्यर्थानामन्यतमस्य प्रकरणाद्यनुसारमर्थो ग्रहीष्यते।

आलोचकविद्वांसोऽनुवीक्षन्तां तावद् य[illegible]मे रूढिनिबद्धबुद्धयो वेदेतिहासपरिपोषका यजुषि (१०।१८) मन्त्रे 'इमं देवा असपत्नं सुव[illegible]ं महते०' इत्यत्र दशरथपुत्रं रामं सन्दृभ्णन्ति। तेषु महीधरोऽयं यथा— "हे देवाः सोमादयः! दशर[illegible]स्य पुत्रं कौशल्यायाः पुत्रं कौशलायै विशे प्रजायै तिष्ठन्तमिमं राममसपत्नं शत्रुरहितं कृत्वा महत[illegible] क्षत्राय यूयं प्रेरयध्वम्। अमी कोशलाः, एष रामो वो युष्माकं राजा, अस्माकं ब्राह्मणानां तु सोमो राजा। एतावन्तं मन्त्रं पठित्वा पुरोहितोऽध्वर्युर्वाभिषिञ्चेत्।" इत्यादि किं नास्ति [illegible]र्वमुदक्षरं बुद्धिबाह्यं वेति न भवताऽलोच्यते।

है; क्योंकि परमात्मा सर्वसृष्टि का ही निमित्तकारण है, फिर विशेषरूप से इसके कारणत्व का कथन कैसे किया जा सकता है? वैसा होने पर क्षत्रियवंश की अनुपपत्ति होने से तात्पर्य की भी अनुपपत्ति होगी—यही लक्षणा का मूल भी है। इसलिये राजकुलादिवान् वेद का तो ब्रह्म कारण ही है, इस प्रकार लक्षणार्थ संगत है।

अथवा कथमपि क्षत्र शब्द से रूढ्यर्थ-ग्रहण का आग्रह करना ही नहीं चाहिये। क्षत्र नाम उदक, धन, आदित्य, अग्नि, सोम, इन्द्र, वरुण, स्तोत्र, प्रस्तर आदि अर्थों का वाचक है। तो इनमें से कोई एक अर्थ प्रकरणादि के अनुसार लिया जा सकेगा।

आलोचक विद्वान् देखें तो सही कि इन रूढिनिबद्धबुद्धियों ने, वेद में इतिहास के परिपोषकों ने यजुर्वेद के (१०।१८) मन्त्र 'इमं देवा असपत्नं सुवध्वं महते०' में दशरथ-पुत्र राम का सन्दर्भ दे दिया। महीधर-भाष्य देखिये—"हे सोम आदि देवताओ! दशरथ-नन्दन कौशल्या-पुत्र राम के राज्य को प्रजा के लिये शत्रुरहित करके महान् क्षत्र के लिये प्रेरणा दीजिये। ये कोशल लोग हैं, यह राम तुम्हारा राजा है, हम ब्राह्मणों का राजा सोम है। इतने मन्त्र को पढ़कर पुरोहित या अध्वर्यु अभिषेक करें।" कहिये, क्या यह सारा बुद्धिबाह्य तथा मन्त्र से बाहर नहीं है? क्या इसे आपने कभी नहीं देखा? कहिये, अब आप और आपके अनुयायिओं की बटालियन अजायबघर में रखने योग्य है या नहीं?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वस्तुत एतादृशैरेव कूपमण्डूकैः पण्डितम्मन्यैर्वेदधर्मो विलोप्यते स्म। अत एव महर्षि-र्वेदोद्धाराय ब्रह्मणा प्रेषितः।

पृ० १४४१, पं० १५—यदाह—"दयानन्दार्थः कपोलकल्पितः, सायणाद्यर्थः श्रुतिसूत्रानु-सारी। न वा राजधर्मप्रसङ्गः।" इति, तत् सर्वं ते बुद्धिशत्रुतायाः फलम्। सायणादिभिस्तु रूढ एव पन्था अनुसृतो भवताऽपि तेषाम्। परमृषिणा तु नैरुक्तसृतिमनुसरता यौगिको बौद्धिको मार्गोऽनुष्ठितोऽर्थकरणे। केवलं यज्ञार्थं पश्यतस्तावद् दृग्वर्त्म कथमायाद् राजधर्मप्रसङ्गो यो महर्षिणा दृष्टः प्रदर्शितश्च।

पृ० १४४२, अनु० १— आ०—यदुक्तम्—"यत्र देशे ब्रह्म परमेश्वरो वेदो वा इति, तदपि यत्किञ्चित्, परमेश्वरस्य सर्वव्यापकत्वे यत्रेति विशेषणाऽयोगात्। वेदस्य ब्रह्मवेदनस्य चाधिकृतपुरुषाश्रयत्वं न देशाश्रयत्वम्, तथैव शौर्यधैर्यादयो न देशधर्माः। तादृशब्रह्मक्षत्रयोश्च

वस्तुतः ऐसे ही कूपमण्डूक अपने को महापण्डित समझनेवालों ने वेद-धर्म का तो विलोप ही कर दिया। इसीलिये भगवान् ने वेदोद्धार के लिये महर्षि को इस धराधाम पर भेजा। महाकवि पं० अखिलानन्द ने भी भाव-विभोर होकर इसीलिये तो कहा था—

क्रमेण कालस्य पुनर्दयालुना, भुवस्तले वैदिकधर्मवृद्धये।
ऋषिर्दयानन्दसरस्वती यतिः, प्रमोदलोकादिह नोदितः शिवः॥

अर्थात् कालक्रम से दयालु प्रभु ने वैदिक धर्म की वृद्धि के लिये मोक्षलोक से महर्षि दयानन्द सरस्वती यति को भेजा था।

पृ० १४४१, पं० १५—यह कहना कि—"दयानन्द का अर्थ कपोलकल्पित है, सायणादि का अर्थ श्रौतसूत्रों के अनुसारी है, यहाँ कोई राजधर्म का प्रसंग नहीं है।" यह सब बुद्धि से शत्रुता करने के फलस्वरूप है। सायण ने तो रूढ मार्ग ही अपनाया था और वही आपने भी, और उसी खारी पानी को ही आज तक पीते रहे। परन्तु महर्षि ने नैरुक्त पद्धति को अपनाया और अर्थ करने में बौद्धिक वा यौगिक मार्ग ही अपनाया। केवल सर्वत्र यज्ञार्थ को ही देखनेवाले को राजधर्म प्रसंग का मार्ग भला लोचनगोचर कैसे हो सकता था। वह मार्ग तो महर्षि ही देख पाये और उन्होंने सबको दिखा दिया।

पृ० १४४२, अनु० १—आ०—यह कथन कि—"जिस देश में ब्रह्म परमेश्वर या वेद-आदि, यह भी सब निःसार है; क्योंकि परमेश्वर के सर्वव्यापक होने से 'यत्र' उसके विषय में प्रयुक्त ही नहीं हो सकता। यह विशेषण नहीं हो सकता। और वेद भी अधिकृत पुरुष के आश्रय में रह सकता है, देश के आश्रय में नहीं तथा शौर्य-धैर्यादि गुण भी देशाश्रित नहीं रह सकते।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गुणरूपाश्रयत्वान्न विज्ञानाश्रयत्वम्। देशो न हि यज्ञेच्छाविशिष्टः सम्भवति, इच्छाया देशस्थ-जनाश्रयत्वात्। अग्नि-देवादिशब्दाश्च प्रसिद्धार्थका एव। न तयोः परमेश्वरो विद्वांसश्चार्थः, प्रसिद्धार्थत्यागे हेत्वभावात्।" इति।

समा०—

पक्षाघातरुजा ग्रस्ता नूनं बुद्धिस्तु तावकी।
छलपङ्कनिषण्णा या तथ्यार्थं विचिनोति नो॥

महाप्रज्ञ! नैवात्र 'यत्र' शब्दः परमेश्वरस्य विशेषणम्, किन्तु 'देशे' इत्यस्यैव, 'यत्र देशे' इति पाठे प्रत्यक्षदर्शनात्। नहि परमेश्वरस्य सर्वव्यापकत्वमृषिणा प्रतिषिध्यते। ऋषिणा तु केवलं 'ब्रह्म परमेश्वरो वेदो वा, ब्राह्मणः, ब्रह्मविच्चैतत् सर्वं ब्रह्म' इति प्रतिपाद्यते। वेदस्य जडाश्रयत्वं नाम मन्येत भवता परमस्माकमृषेस्तु सिद्धान्त एव ज्ञानस्य चेतनाश्रयत्वम्। सूर्यादयश्चास्माकं पक्षे जडा एव। तदनु 'शौर्यधैर्यादिगुणवन्तो मनुष्याश्च' इत्यनेनाभिव्यज्यत

इस तरह के ब्रह्म और क्षत्र का स्वरूप गुण की तरह का है, अतः इनकी सत्ता विज्ञान में नहीं मानी जा सकती। देश भी यज्ञ की इच्छा से विशिष्ट नहीं होता; क्योंकि इच्छा तो किसी पुरुष में ही रहेगी। अग्नि, देवता प्रभृति का भी प्रसिद्ध अर्थ हो भी सकता है, इन दोनों शब्दों का अर्थ परमेश्वर और विद्वान् नहीं हो सकता; क्योंकि प्रसिद्धार्थ को छोड़ने में कोई प्रमाण नहीं।"

समा०—इन प्रश्नों में थोड़ी तर्क-बुद्धि की सी बात करते हुए आप मालूम पड़ते हैं, अतः जी करता है कि आपको शाबाशी दे दूँ। पर उसी तर्क को, कदाचित् आप रूढिवाद के गर्त में जब पड़े होते हैं, तब जाने कहाँ भुला बैठते हैं। अस्तु समाधान सुनिये—

पर हा! अफसोस! आपकी बुद्धि तो पक्षाघात रोग से ग्रस्त हो चुकी है और छल के पङ्क में बैठ गई है, इसलिये वह तत्त्वार्थ-चिन्तन में सर्वथा असमर्थ हो रही है।

हे महाप्राज्ञ! यहाँ पर 'यत्र' शब्द परमेश्वर का विशेषण नहीं है, किन्तु 'यत्र देशे' देश का विशेषण है। यह आपको प्रत्यक्ष भी दिखायी नहीं पड़ा। परमेश्वर की सर्वव्यापकता का ऋषि ने कहीं प्रतिषेध नहीं किया है। ऋषि ने तो यहाँ 'ब्रह्म, वेद, ईश्वर, ब्राह्मण, ब्रह्म को जाननेवाला, यह सब ब्रह्म पद से ग्राह्य (प्रकरणानुसार) हो सकते हैं' यह बताया है। आप ही वेद को जड़ों के आश्रय मानते हैं, हमारे ऋषि का तो सिद्धान्त ही है कि वेद ज्ञान है, जो चेतन में ही ठहर सकता है। सूर्य आदि भी हमारे पक्ष, अर्थात् सत्यपक्ष में जड़देवता ही हैं। ऋषि ने यहाँ स्पष्ट लिखा है कि 'शौर्य-धैर्यवाले मनुष्य', इससे पूर्णतया स्पष्ट है कि शौर्यादि चेतनाश्रित हैं। आप किस स्वप्नलोक में विचरण कर रहे हैं? देश जड़ है, उसमें इच्छादि नहीं रहते। पर श्रीमन्! यही

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एव गुणानां चेतनाश्रयत्वम्। देशस्य जडत्वे गुणेच्छादीनामनाश्रयत्वे 'मञ्चाः क्रोशन्ति' इति-वल्लक्षणया तद्देशस्था जना एव ज्ञायन्ते इच्छादिविशिष्टाः देशस्यापि तथौपचारिकः प्रयोगो लोके।

अग्न्यादिशब्दैर्न केवलं जडाग्निवाचकता, प्रत्युत यथाप्रकरणं परमेश्वरार्थग्रहणं भवत्येव प्रतिभावतामकुण्ठितधियां मतेन। इयं निर्मलोक्तिः सत्येह—

उपास्यगुणसंयुक्ता, नूनं बुद्धिः प्रजायते।
चिदाराधनचैतन्या, जडोपासनया जडा॥

पृ० १४४२, अनु० ३—यदुक्तम्—"देवस्य त्वा सवितुः०' इति भाष्यमपि न सम्यक्, निर्मूलत्वात्। 'हे सभाध्यक्ष' इत्यस्य सम्बोधनस्य मूलानुपलम्भात्। सवितृशब्दोऽपि सूर्ये प्रसिद्धः, तत्त्यागे बीजानुक्तेः। एवमेव प्रसवशब्देन प्रजायाः, बाहुशब्देन बलवीर्यग्रहणमपि निर्मूलम्। पूष्णः पुष्टिकर्तुर्हस्ताभ्यां ग्रहण-दानाभ्यामित्यपि निर्मूलमेव।"

समा०—एतत्पारिजातकृतोऽनुर्वरमस्तिष्कदुश्चिन्तनफलम्। वक्तव्यम्—यजुः० २०। १ मन्त्रे उव्वटमहीधराभ्याम् 'आसन्द्यामभिषिक्तो गुणधर्मानर्हति राजेति भावः' इति वाक्यं

अनुपपत्ति ही तो लक्षणा का मूल होती है। जैसे 'मचान पुकारते हैं' इस लक्षणा के समान उस देश के मनुष्य ही इच्छादिविशिष्ट माने जायेंगे। लोक में देश का भी औपचारिक प्रयोग हो जाता है।

अग्नि आदि शब्द सर्वत्र जड़ अग्नि के ही वाचक होंगे, यह कोई शास्त्रीय नियम नहीं है। अतः प्रकरणानुसार परमेश्वर, विद्वान् आदि का ग्रहण हो ही जायेगा, ऐसा प्रतिभाशाली तीव्र बुद्धिवाले जन मानते हैं। यह निर्मलोक्ति यहाँ सत्य घटित हो रही है—

बुद्धि निश्चय ही उपास्य गुण से संयुक्त होती है, वह चेतन की आराधना से चेतन और जड़ की उपासना से जड़ हो जाती है।

पृ० १४४२, अनु० ३—यह कथन कि—"देवस्य त्वा०' इसका भाष्य भी ठीक नहीं है, निर्मूल होने से। 'हे सभाध्यक्ष!' इस सम्बोधन का क्या कारण है? 'सविता' शब्द भी सूर्यार्थ में प्रसिद्ध है। उस अर्थ के छोड़ने का भी कारण नहीं बताया। इसी प्रकार 'प्रसव' शब्द से प्रजा का, 'बाहु' शब्द से बल और वीर्य का ग्रहण करना भी निर्मूल है। 'पूषन्' का पुष्टिकर्ता, 'हस्त' से ग्रहण और दान अर्थ भी निर्मूल हैं।"

समा०—उक्त कथन पारिजातकार के अनुर्वरमस्तिष्क के दुश्चिन्तन का परिणाम है। आप बताइये, यजुः के २०। १ मन्त्र में उव्वट और महीधर ने 'आसन्दी में अभिषिक्त राजा गुण-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कुतोऽभ्यूहितम् ? न मन्त्राक्षरेभ्य उद्धृतम् । [illegible]मिनाऽभ्यूहितं 'सभाध्यक्ष' इति । राजा च भवत्येव सभाध्यक्षः । 'सवितृ' शब्दः सूर्यवत् सर्वजग[illegible]त्पादकः परमेश्वरोऽपि प्रसिद्ध एव । प्रसिद्धोऽपि नाऽभविष्यत् तदाऽपि आर्षप्रातिभः स्वामी उत्प्रे[illegible]तुमर्हति, 'सुनोति सूयते सुवति वोत्पादयति सृजति सकलं जगत् स सर्वपिता सर्वेश्वरः सविता प[illegible]पात्मा तस्येति धातुबीजत्वात्' । 'सविता वै प्रसवानामीशे' (ऐ० १ । ३०) इति प्रमाणादपि प्रसवः [illegible]न्ततिः प्रजा भवत्येव । 'बाहु' शब्दः स्वगुणबलवीर्ययोरपि द्योतकः, परं स्थूलधीः स्कन्धाभ्यामधोल[illegible]मानौ द्वावेव अस्थ्यन्तर्गत-चर्मावेष्टितौ दण्डावेव केवलं पश्यति । पुष्ट्यर्थक 'पुष्' धातोः पूष्ण इति स[illegible]पेव । एवमेव हस्तौ ग्रहणदाने द्योतयतः । एवमृषिकृतोऽर्थ एव सर्वथोत्तमः ।

पृ० १४४४, पं० ७—यदुक्तम्—"इन्द्रस्येन्द्रियेणेत्यादिमन्त्रभाष्यम् तदेतत् सर्वमसङ्गत वेदार्थबाह्यञ्च ।" तदेतदस्यैवासङ्गतम्, अविचार्यत्वादप्रामाणिकत्वाच्च । यज्ञादन्यत्रात्र तु दयानन्दकृतसम्बोधनमेव युक्तम् । यजमानस्य कथमपि प्रजापतित्वं न सङ्गच्छते, परमात्मनस्तु सङ्गतमेव । 'सत्यराजन्' इत्यादि महर्षिकृतोऽर्थः श्रेष्ठः । क इति सुखनाम, तद्रूपोऽतिशायने परमात्माऽऽनन्दयुक्त एव । यया भावनया उपासितः सन् परमात्मा तयैव योजयतीत्यसन्दिग्धम् ।

धर्मों के योग्य होता है' यह वाक्य कहाँ से बढ़ा दिया ? मन्त्र में तो इसका मूल ही नहीं है । स्वामी दयानन्द ने 'सभाध्यक्ष' का उत्प्रेक्षण समुचित ही किया है; क्योंकि राजा ही सभाध्यक्ष होता है । 'सवितृ' शब्द से सूर्य के समान सकल जगत् का उत्पत्तिकर्ता परमेश्वर अर्थ भी प्रकर्षेण प्रसिद्ध ही है । प्रसिद्ध न भी होता, तब भी आर्षप्रातिभ भगवत्पाद दयानन्द उत्प्रेक्षण कर ही सकते हैं । अतः सकल जगत् का उत्पादक परमेश्वर सविता है, यह अर्थ धातुमूलक है । 'सविता प्रसवों (प्रजाओं) का ईश्वर है' इससे भी प्रमाणित है । 'बाहु' शब्द स्पष्टतया बल और वीर्य का प्रतीक है । परन्तु मोटी बुद्धिवाला तो बाहु शब्द से कन्धों से नीचे लटकनेवाले अस्थि के ऊपर चर्मावेष्टित दो दण्डमात्र समझ रहा है । पुष्ट्यर्थक 'पुष्' धातु से निष्पन्न 'पूषन्' शब्द का निश्चित ही पुष्टिकर्ता अर्थ है । इसी प्रकार 'हस्त' शब्द से उसके ग्रहण और दान दोनों कार्य अभिप्रेत होने में कोई बाधा नहीं है । अतः ऋषिकृत अर्थ सर्वथा उत्तम है ।

पृ० १४४४, पं० ७—"इन्द्रस्येन्द्रियेण०' इत्यादि तीनों मन्त्रों का भाष्य असंगत और वेदबाह्य है ।" वस्तुतः यह असंगत कथन ही असंगत है; क्योंकि यह अविचारकथन है और अप्रामाणिक है । यज्ञविषय से अन्यत्र महर्षि दयानन्द द्वारा किया हुआ सम्बोधन ही सर्वथा युक्त है । यजमान कदापि यहाँ प्रजापति नहीं हो सकता । परमात्मा का प्रजापतित्व संगत है । 'सत्यराजन् अर्थात् हे सत्य-प्रकाशक, सत्यराज्यप्रद' यही अर्थ 'सत्येन राजते शोभते' इस रूप में ठीक है । 'क इति सुखनाम' तद्रूप परमात्मा सुखस्वरूप है । अतिशय अर्थ में आनन्दमय है । यह सिद्धान्त सत्य है कि जिस भावना से परमेश्वर की उपासना की जाती है, उसी गुण या भाव से वह भक्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवमस्य पारिजातकृतः प्रकृतिरेव अनर्गलाक्षेपकरणस्य।

यदुच्यते—'सत्यार्थप्रकाशकानीन्द्रियाणि' तदसत्यम्, आत्मनोऽपि सूर्यप्रकाशकवत् परमेश्वर एवेत्यस्य शङ्का कुतर्काधार एव।

पृ० १४४५, पं० ४-१४—यदुच्यते—"बाहू मे बल०' इत्यादि भाष्यमप्यनर्गलम्।" तद्वक्तव्यमनेन यत् कोऽस्ति शास्त्रीयः प्रतिबन्धः, येन बाहुना बलं नोपमातुं योग्यं भवति? अपरं चात्र राज्यं हि शरीरात्मकं शोभनं रूपकं हि चित्र्यते। ऋषिकृतमेतदर्थसौन्दर्यमबुद्ध्वाऽयमरसिकः कुतर्कपल्वलिकापङ्के हि लग्नोऽवसीदति। इयमुक्तिर्घटतेऽत्र—

दुल्लीलपल्लीपतिपुत्रहस्ते, कस्तूरि कस्ते वद दुर्विपाकः।
आरभ्य सौरभ्यकथासु मौनम्, मालिन्यमात्रे वचसोऽवकाशः॥

तस्मान्न किमप्यृष्युक्तं वेदबाह्यम्, मन्ये तव बुद्धेरविषयोऽवश्यम्।

को युक्त करता है। इस प्रकार यहाँ सिद्ध हो गया कि पारिजातकर्ता की उच्छृंखल प्रकृति ही आक्षेप करने की है।

इन्द्रियों को सत्य का प्रकाशक कहना तो बिल्कुल ठीक नहीं है, वस्तुतः जिस आत्मा की शरीर में स्थिति होने पर इन्द्रियाँ प्रकाशक होती हैं, उस आत्मा में भी सूर्यवत् सत्य का आदिप्रकाशक तो परमात्मा ही है। इसमें विकृत इन्द्रियाँ असत्य की भी प्रकाशक होती हैं। अत एव भी इन्द्रियों को सत्यप्रकाशक कहना व्यभिचरित है। अतः इस लेखक की कुशंका कुतर्काधार है।

पृ० १४४५, पं० ४-१४—यह कथन कि—"बाहू मे बलम्०' इत्यादि भाष्य भी अनर्गल है।" वस्तुतः यह अनर्गल वचन स्वयम् उच्छृंखल है; क्योंकि बिना विचारे कहा गया है। तो इस लेखक को बताना चाहिये कि कौन सा शास्त्रीय प्रतिबन्ध है, जो यह बाहु की बल से उपमा न हो सके? वास्तव में बड़े ही सुन्दर-रूप में यहाँ पर राष्ट्र को एक शरीर माना गया है और शरीर के अंगों को बलादि से रूपकत्वेन प्रस्तुत किया गया है। ऋषिकृत इस साहित्यिक सौन्दर्य से परिपूर्ण अर्थ को न समझ कर कुतर्क की तलैया की कीचड़ में यह अरसिक हिलग गया है। इस पर यह उक्ति सुघटित है—

कोई कस्तूरी का पारखी कहता है कि हे कस्तूरि! तुम्हारा कैसा दुर्भाग्य है जो इस अरसिक ग्रामणी के पुत्र के हाथ आ पड़ी हो। यह तो केवल तुम्हारी कालिमा को ही देख रहा है, पर मनोहारी सुरभि की कोई चर्चा भी नहीं कर रहा है।

अतः ऋषिकथित कुछ भी वेदबाह्य नहीं है, हाँ, इनकी अल्प बुद्धि का यह विषय अवश्य नहीं है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिणाऽस्य भावार्थो लिखितो यद्—"यथा स्वाङ्गेषु प्रीतिस्तत्पालने पुरुषस्य श्रद्धा भवति, तद्वदेव बुद्धिः प्रजापालनेऽपि कर्तव्या।" इति।

पृ० १४४७, अनु० २—'प्रतिक्षत्रे प्रतितिष्ठामि०' इत्यस्य भाष्यमाक्षिपन्नाहायम्—"नात्र परमेश्वरस्य प्रसङ्गः।" तच्चालीकम्, राष्ट्रयज्ञादिषु सर्वव्यापकत्वादीशस्य प्रसङ्गस्तु स्यादेव। यच्चाह—"न निराकारस्येशितुर्नाभ्यादिसम्बन्धः" तन्न, ज्ञानरूपचित्तस्यैव नाभिस्थानरूपकत्वात्। प्रसङ्गस्त्ववधार्यते चिन्तनेन। परन्त्वत्रोव्वटादिभिः—'आसन्दीतः कृष्णाजिनेऽवतरति' इति कल्पितः।

पृ० १४४८, अनु० २—एवं 'त्रातारमिन्द्रम्०' इत्यस्यापि भाष्ये आक्षिपन्नयमिन्द्रशब्दस्य देवराजपरमेवार्थं कात्यायनानुसारं ग्राह्यत्वेन प्रतिपादयति। तत्र ध्यातव्यं यत् कात्यायनादिभिरपि याज्ञिकप्राधान्यकाले तथाविध एव रूढार्थो गृहीतः। सत्यमस्ति—

याज्ञिकवादं परितः, वैदिकसाहित्यमभ्रमन्नित्यम्।
सायणकस्तु बलाद् हि, आकर्षदाध्यात्मतत्त्वानि॥

ऋषि ने इसका भावार्थ लिखा है—"जिस प्रकार अपने अंगों में प्रीति होती है, इनके पालन में पुरुष की श्रद्धा होती है, उसी प्रकार की बुद्धि प्रजा-पालन में करनी चाहिये।"

पृ० १४४७, अनु० २—'प्रतिक्षत्रे प्रतितिष्ठामि०' इस मन्त्र के भाष्य पर ये आक्षेप कर रहे हैं कि—"यहाँ परमेश्वर का कोई प्रसंग नहीं है।" पर यह कथन मिथ्या पर आधारित है; क्योंकि राष्ट्र और यज्ञादि सभी में सर्वव्यापक होने से ईश्वर का प्रसंग हो ही सकता है। यह जो कहा जा रहा है कि—"निराकार ईश्वर का नाभि आदि से तो कोई सम्बन्ध ही नहीं हो सकता।" पर यहाँ तो ज्ञानरूप चित्त का ही नाभिस्थान से रूपक प्रस्तुत किया गया है। और प्रसंग का अवधारण तो चिन्तन से किया जाता है, परन्तु यहाँ पर उव्वट आदिकों ने तो 'आसन्दी से कृष्णाजिन पर उतरता है' इस एक वेदबाह्य प्रसंग की कल्पना कर ली है।

पृ० १४४८, अनु० २—इसी प्रकार 'त्रातारमिन्द्रम्०' इसके भाष्य पर भी आक्षेपक कह रहा है कि इन्द्र शब्द का देवराजपरक अर्थ ही कात्यायन के अनुसार ग्राह्य है। तो वहाँ पर यह भी ध्यान देना चाहिये कि कात्यायन आदि के द्वारा भी याज्ञिक-प्राधान्य काल में इसी (यज्ञ) प्रकार का ही रूढ्यर्थ ग्रहण कर दिया गया। सच है—

उस समय समस्त वैदिक साहित्य याज्ञिकवाद के चारों ओर ही चक्कर काटता था। इसलिये सायण ने भी आध्यात्मिक तत्त्वों (मन्त्रों) को भी बलाद् यज्ञ में घसीट लिया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तथा सति वेदानां यज्ञादन्यत्र प्रक्रियायामर्थ-प्रतिबन्धे मते सति महाऽन्यायः स्याद् वेदान् प्रति। तस्मादिन्द्रशब्देन देवानां राजा परमेश्वरो ग्राह्य एव।

पृ० १४४९, पं० ९—अत्रायं लिखति यत्—"दयानन्दस्तु कर्मादिप्रकरणमज्ञात्वैव सर्वत्रैव क्वचित् परमात्मपरं क्वचिद् राजाऽमात्यसेनापतिपुरोहितादिपरं मन्त्रं योजयति। तद्रीत्या यथा सङ्गतिहीनं प्रकरणनिरपेक्षमुन्मत्तः क्वचिदपि किञ्चिदपि प्रलपति, तथैव परमेश्वरोऽपि वेदे वक्ति। वस्तुतस्तु इमे मन्त्रा यज्ञादिकर्मसम्बद्धास्तत्रैव विनियुक्ता न राजधर्मादिनिर्देशकाः। अन्यपरैरेव मन्त्रैः क्वचिद् राजधर्मोपयुक्ता उपदेशाः फलन्ति चेत् फलन्तु नाम।"

समा०—इदमखिलं कूपमण्डूकवृत्तिमतिपरिणतम्। महाशय! भवादृशां तु बुद्धिः सायणमहीधराभ्यां वाममार्गे प्रचालिता। सायणपूर्ववर्तिभिस्तु वेदानां त्रिविधाऽपि प्रक्रिया स्वीकृताऽसीत्। तद्यथा निरुक्तटीकायां दुर्गोऽप्याह—

"तत्रैवं सति प्रतिविनियोगमस्यान्येनार्थेन भवितव्यम्। त एते वक्तुरभिप्रायवशाद् अर्थान्यत्वमपि भजन्ते मन्त्राः। न ह्येतेषु अर्थस्येयत्ताधारणमस्ति। महार्था ह्येते दुष्परिज्ञाना-

---

वैसा होने पर वेदों के यज्ञ से अन्यत्र प्रक्रिया में अर्थ करने पर प्रतिबन्ध मान लिया गया था, जो वेदों के प्रति महा अन्याय था। इसलिये यहाँ पर भी इन्द्र शब्द से रूढ देवराज अर्थ न लेकर देवों के राजा परमेश्वर का ही ग्रहण किया गया।

पृ० १४४९, पं ९—यहाँ पर ये लिखते हैं कि—"दयानन्द तो कर्मादिप्रकरण को बिना जाने ही सर्वत्र, कहीं पर परमात्मपरक, कहीं पर राजा, अमात्य, सेनापति, पुरोहित आदिपरक इस मन्त्रार्थ की योजना करते हैं। उनकी रीति से जैसे उन्मत्त संगतिहीन प्रकरणनिरपेक्ष कहीं पर कुछ और कहीं कुछ प्रलाप करता है, उसी प्रकार परमेश्वर भी वेद में कहने लगता है। वास्तव में ये मन्त्र यज्ञादिकर्मसम्बन्ध के हैं, वहीं पर कात्यायन आदि ने इनका विनियोग बताया भी है, अतः इनमें राजधर्म का कोई उल्लेख नहीं मिलता। मन्त्रों का विनियोग तो यज्ञीय कर्मों में ही है, यदि इन्हीं में से राजधर्म आदि अर्थ प्रतिफलित हो जाते हैं तो हो जावें।"

समा०—उपर्युक्त समस्त कूपमण्डूकमति की परिणति ही है। महाशय! आप जैसों की बुद्धि सायण और महीधर के द्वारा वाममार्ग में डाली हुई है। सायण के पूर्ववर्तियों के द्वारा तो वेदों की तीनों प्रकार की प्रक्रिया स्वीकृत की गई थी। जैसा कि निरुक्त की टीका में दुर्ग ने कहा भी है—

"अर्थात् विनियोगभेद से मन्त्र का भिन्न-भिन्न अर्थ होगा। सो ये मन्त्र प्रवक्ता के अभिप्रायभेद से भिन्नता को प्राप्त हो जाते हैं। अमुक मन्त्र का अर्थ इतना ही है, इसकी सीमा नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्च। यथाश्वारोहवैशिष्ट्यादश्वः साधुः साधुतरश्च वहति, एवमेते वक्तृवैशिष्ट्यात् साधून् साधुतरांश्चार्थान् स्रवन्ति।"

"तत्रैवं सति लक्षणोद्देशमात्रमेवैतस्मिन् शास्त्रे निर्वचनमेकैकस्य क्रियते। क्वचिच्चाध्यात्माधिदैवाधियज्ञोपदेशनार्थम्। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन् अधिदैवाध्यात्माधियज्ञाश्रयाः सर्व एव ते योज्याः।.नात्रापराधोऽस्ति।" (निरु० २।८, दुर्गटीका पृ० १२६, दाधिमथसंस्करणम्)

दुर्गाचार्यस्यायं लेखः कियान् स्पष्टः। तथा चाग्रे—

"एवं व्याकरणेऽपि लक्षणप्रधाने सति अर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः, किमुत निरुक्ते यदर्थप्रधानमेव।" (निरु० २। २, दुर्गटीका, पृ० १०२, दाधिमथसंस्करणम्)

एवमिहार्थप्राधान्यं निर्दिष्टम्।

यज्ञमात्रपरकवेदमन्त्रा इत्यवधारकेणानेन उव्वटस्याऽप्ययं लेखो नाक्षिलक्षीकृतो यत्—

लगाई जा सकती। ये मन्त्र महान् अर्थों से युक्त हैं, अत्यन्त ही दुष्परिज्ञान, बड़े ही परिश्रम, विद्या तथा योगादि से जाने जा सकते हैं। जैसे सवार के भेद से घोड़ा अच्छा और अतीव अच्छा चलने लगता है, इसी प्रकार वक्ता जितना अधिक योग्य और तपस्वी होगा, उसके दर्शाए वेदार्थ में भी उतने ही अधिक साधु और साधुतर अर्थों का प्रकाश होगा।"

अर्थात् "इस प्रकार निरुक्तशास्त्र में लक्षणोद्देशमात्र (लक्षणों के दर्शन के लिये संकेतमात्र) के लिये ही एक-एक शब्द का निर्वचन दिखाया गया है। कहीं-कहीं आध्यात्मिक आधिदैविक आधियज्ञ अर्थों का बोध कराने के लिये शब्दों का निर्वचन दिखाया गया है। अतः इन मन्त्रों में जितने भी अर्थ उपपन्न हो सकें, उन सब की ही योजना करनी चाहिये। इसमें किसी प्रकार का दोष नहीं है"। (निरु० २।८, दुर्गटीका)

दुर्गाचार्य का यह लेख कितना स्पष्ट है। इसी प्रकार आगे भी—

"इस प्रकार व्याकरण में भी लक्षणप्रधान होने पर भी अर्थ के कारण लोप आगम तथा विपरिणाम शब्दों के होते हैं। फिर अर्थप्रधान निरुक्त में तो होना ही है।" (निरु० २।२, दुर्गटीका)

इस प्रकार यहाँ अर्थ की प्रधानता दिखाई है।

यज्ञमात्रपरक ही वेदमन्त्र हैं, ऐसा अवधारण करनेवाले इस लेखक ने उव्वट के इस लेख की भी उपेक्षा कर दी—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"एवं तावदधियज्ञमतोऽप्ययं मन्त्रोऽधिदैवमाचष्टे। अध्यात्मं तु वक्ष्यति।" (यजु:० ७। ४२, उ० भा०)

अत्रापि त्रिविधप्रक्रियादृता, परमयं रूढिग्रस्तमतिराक्षिपति यद् दयानन्दः क्वचिद् राजाऽमात्याद्यर्थान् मन्त्रे योजयति। सम्यगियमुक्तिरत्र घटते—

"मूलशाखाफलैः पत्रैः, नोपयोगे स्वयं क्वचित्।
कण्टकैः किन्तु रुन्धन्ति, बब्बूलः परमार्गकम्॥

अरे! युष्माभिरेव वेदस्य गलं रूढिरज्जुपाशेनावरुद्धम्, येनाऽसौ प्रस्तोतव्यार्थान् वक्तुकामो न पारयते वक्तुम्।

परेश्वरदयानन्दं देवमुन्मत्तमाह यः।
अशिष्टोऽयं समुन्मत्तः, कुविद्यामदनष्टधीः॥

एतस्य सङ्कीर्णस्य बुद्ध्यनुसारं यज्ञादन्यत्र न क्वाऽपि मन्त्रार्थः सम्भवति। समर्थयन्तां नाम स्कन्ददुर्गादयः कियन्तोऽपि विपश्चितः।

"इस प्रकार अधियज्ञ होने पर भी यह मन्त्र अधिदैव अर्थ को कह रहा है तथा आध्यात्मिक अर्थ को तो कहेगा।" (यजु:० ७।४२, उव्वट-भाष्य)

यहाँ पर भी त्रिविध प्रक्रिया संकेतित है, परन्तु यह रूढिग्रस्त मति आक्षेप करता है कि दयानन्द कहीं पर राजा, कहीं पर अमात्यादि अर्थों की मन्त्र में योजना करते हैं। आप पर यह उक्ति ठीक घटित होती है—

"आप न काहू काम के, डार, पात, फल, मूर।
औरन को रोकत फिरैं, जैसे पेड़ बबूर॥

अरे आप ही लोगों ने वेद का गला रूढि-रस्सी के पाश से अवरुद्ध कर दिया, जिससे वह प्रस्तोतव्य अर्थों को भी कहना चाहते हुए भी नहीं कह पा रहा है।

जो गर्वित होकर देव दयानन्द और परमेश्वर को उन्मत्त बता रहा है, वह कितना अशिष्ट, समुन्मत्त व कुविद्या के मद से नष्टबुद्धिवाला ही है।

इसकी सङ्कीर्ण बुद्धि के अनुसार तो यज्ञार्थ से अन्यत्र वेद के अर्थ हो ही नहीं सकते। चाहे स्कन्द, दुर्ग आदि अन्य प्राच्यतर विद्वान् कितना ही समर्थन क्यों न करें?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १४५०, पं० ६—आ०—यदुच्यते—"इमं देवा०' इति मन्त्रस्यापि भाष्यं विशृङ्खलम्, यत्किञ्चित् प्रलपनमेव। यतो हि क्षत्रशब्दस्यातुलराजधर्म इति लाक्षणिक एवार्थः, एवं ज्यैष्ठ्यशब्दस्यापि ज्ञानवृद्धव्यवहारस्थापनमप्रामाणिक एवार्थः। जानराज्यशब्दस्यापि जनानां विदुषां मध्ये परमराज्यकरणायेति न प्रामाणिकोऽर्थोऽपदार्थत्वात्। देवा विद्वांस इति सम्बोधनमपि प्रकरणविरुद्धम्, सवित्रादिदेवानां प्रकृतत्वात्। वेदविदां मध्ये यो मनुष्यः सौम्यगुणसम्पन्नः स एव सभाध्यक्षत्वेन स्वीकृतो राजा भवतु, इत्यपि प्रकरणविरुद्धम्, पूर्वमन्त्रे यजमानस्यैव राजत्वेन विवक्षितत्वात्। 'एष वोऽमी राजा' 'सोमोऽस्माकं ब्राह्मणानां राजा' इति पृथक्-पृथक् सम्बन्धः, अन्यथा द्वितीयराजशब्दस्य वैयर्थ्यापातात्।"

समा०—'भाष्यं विशृङ्खलम्' इत्युच्छृङ्खलवृत्तेरस्यैव प्रलपनम्, तन्मस्तिष्कस्य माहीधरवाममार्गविचारशृङ्खलानिगडितत्वात्। क्षत्रशब्देन महीधरेण तवाभीष्टक्षत्रियजातिर्न गृहीता, क्षत्रपदवी एव गृहीता सा च पदवी गुणप्रधाना भवति, गुणशब्दोऽप्यसौ राज्यधर्मं व्यतिरिच्य नान्यः। महत्शब्दस्यातुलार्थः साधुरेव। वृद्धा हि चतुर्विधा भवन्ति—वयोवृद्धाः, धर्मवृद्धाः, ज्ञानवृद्धाः, शास्त्रवृद्धाश्च। योऽतिशयेन वृद्धो ज्ञानवृद्धः, तस्य भावे कर्मणि च ष्यञि तस्मै इत्येवं ज्ञानवृद्धकर्म(व्यवहाराय) णे तत्स्थापनायेत्येव, यः शाब्दसम्मतोऽर्थो नान्यः। एतदर्थ-

---

पृ० १४५०, पं ६—आ०—यह कहना कि—"इमं देवा०' इस मन्त्र का भाष्य विशृङ्खल है, प्रलापमात्र है; क्योंकि क्षत्र शब्द का अतुल राजधर्म यह लाक्षणिक अर्थ ही है। 'ज्यैष्ठ्य' शब्द का भी ज्ञानवृद्ध व्यवहारस्थापन के लिये, यह अर्थ अप्रामाणिक है। 'जानराज्य' शब्द का भी विद्वान् लोगों के मध्य में राज्य करने के लिये, यह अर्थ प्रामाणिक नहीं है, क्योंकि यह इसका पदार्थ नहीं है। 'देव' का अर्थ विद्वान् करना प्रमाणविरुद्ध है। और 'सविता' का अर्थ प्रकृत में सवितादेव ही अर्थ ग्राह्य है। वेद के विद्वानों के बीच में जो मनुष्य सौम्यगुणसम्पन्न है, वही सभाध्यक्षरूप में राजा स्वीकृत हो, यह भी प्रकरणविरुद्ध है; क्योंकि पूर्व मन्त्र में यजमान ही राजत्वेन विवक्षित है। 'एष वोऽमी राजा' और 'सोमोऽस्माकं ब्राह्मणानां राजा' इनमें पृथक्-पृथक् सम्बन्ध है, अन्यथा द्वितीय 'राजा' शब्द व्यर्थ होने लगेगा।"

समा०—'भाष्यविरुद्ध है' ऐसा कथन इसी उच्छृङ्खल वृत्ति का प्रलपन है; क्योंकि इनका मस्तिष्क महीधर के वाममार्ग की विचारशृङ्खला से निगडित है। क्षत्र शब्द से तो तुम्हारे गुरु महीधर ने भी क्षत्रियजाति अर्थ नहीं लिया है, उसने क्षत्रपदवी अर्थ लिया है और वह पदवी गुणप्रधान होती है और यह गुण राजधर्म से व्यतिरिक्त और कुछ नहीं है। महर्षि ने 'महत्' शब्द का यहाँ अतुल अर्थ बिलकुल ठीक किया है। ज्येष्ठता का अर्थ स्वामीजी का उत्तम है; क्योंकि वृद्ध चार प्रकार के होते हैं—ज्ञानवृद्ध, वयोवृद्ध, धर्मवृद्ध और शास्त्रवृद्ध। जो अतिशयवृद्ध (ज्येष्ठ)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रत्याख्यापनं कुर्वतः कस्यचिदपि मौढ्यमेवानुमेयं स्यात्। जनानां राज्यं तत्र भवस्तस्मै जानराज्यायै, राज्यं हि विदुषां बुद्धिमतामेव भवति न मूर्खाणाम्। अथवा जनानामिदं समूहो वा तद्राज्याय। अयं हि पदार्थ एव।

'जनानां विदुषां मध्ये स्थित्वा एव उत्तमराज्यकरणाय निष्कण्टकं राज्यं कुरुत।' इति शब्दावल्या महर्षिणा एष मनुश्लोको लक्ष्यीकृतोऽनुमीयते—

ब्राह्मणान् पर्युपासीत, प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत् तेषां च शासने ॥ ७। ३७ ॥

न ह्यत्र देवा विद्वांसः प्रकरणविरुद्धाः, वस्तुतस्तु सवित्रादय एव प्रकरणविरुद्धाः, जडत्वात् तेषामसपत्नराज्यं च कर्तुमसमर्थत्वात्। 'ब्राह्मणानां सोमोऽस्माकं राजा' इत्यस्य महर्षिकृत एवार्थः साधीयान् प्रकरणसङ्गतश्च। ब्राह्मणास्तु विद्वांस एव भवन्ति, न तु जात्या ब्राह्मणा जडा अपीहाभीष्टाः। सोमः सौम्यगुणसम्पन्न एव। ये च ब्राह्मणाः सभासदो भवन्ति तेषामध्यक्षः सौम्यगुणसम्पन्न एव भवितुं योग्यः। किं चात्र प्रकरणविरुद्धम्? प्रकरणमपि नाम

हो, वह ज्ञानवृद्ध ही माना है। उसका भाव या कर्म ही ज्यैष्ठ्य होता है, उसकी स्थापना करने के लिये—यही अर्थ सर्वोत्तम है। यह बात शास्त्रविद्याधनी जानते हैं। ऐसे उत्तम अर्थ का प्रत्याख्यान करना तो मूढता के सिवाय और क्या है? जनों के राज्य के लिये—इसमें विद्वज्जन अभीष्ट हैं, न कि मूर्ख। अथवा जनों के समूह को जान कहते हैं। यह राज्य का विशेषण हो जायेगा। इस प्रकार समस्त पदों का अर्थ सुसंगत है।

'विद्वानों के बीच में स्थित होकर उत्तम राज्य करने के लिये राज्य को निष्कण्टक करो।' इस अर्थ को करते हुए महर्षि के समक्ष मनु का यह श्लोक भी अभिलक्षित होगा—

प्रातः उठकर राजा ब्राह्मणों (ब्रह्मज्ञ या वेदज्ञ) के संग में बैठे, जो कि वेदों के विद्वान् हैं, उनके शासन में रहे।

देव का अर्थ विद्वान् कदापि प्रकरणविरुद्ध नहीं है। आपके कहने से हरीतकी दश हाथ की नहीं हो सकती। वास्तव में सविता (सूर्य) अर्थ लेना तो अवश्य प्रकरण के विरुद्ध होता; क्योंकि यह जड़ है, जो राज्य को निष्कण्टक कर ही नहीं सकता। 'हम ब्राह्मणों का राजा सोम है' अर्थात् वेदवित् सभासदों के बीच में सकल विद्यायुक्त सभाध्यक्ष ही राजा है, यह अर्थ सुसंगत है। जो वेदविद् हैं, वे ब्राह्मण हैं, यह पक्ष तो सर्वथा सिद्ध है। यहाँ पर जाति-ब्राह्मण, जो मूर्ख हैं, वे अभीष्ट नहीं हैं। सोम अर्थात् सौम्यगुणसम्पन्न। जहाँ राज्य में ब्राह्मण सभासद् होंगे, उनकी अध्यक्षता सोमगुणसम्पन्न ही करने योग्य होता है। इसमें प्रकरणविरुद्ध क्या है, यह भी बताया? फिर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

त्वत्कल्पितमेव कथङ्कारं मन्तव्यं प्रामाणिकं वा स्यात् ? तोषन्यायेन यजमानोऽपि नाम राजत्वेन ते विवक्षितः स्यात् तदा किमसौ वेदविदभूत्वा मूर्खो विवक्षितः ?

पृ० १४५१—कुरुपाञ्चालादिवर्णनमैतिहासिकं त्वेतस्य कपोलकल्पितमेव।

पृ० १४५२, पं० १०—यदुच्यते—"इन्द्रो जयाति०' 'त्वमिन्द्राधिराजः०' इति मन्त्रद्वयस्य भाष्यम्, तदपि यत्किञ्चिदेव। 'परमेश्वरः सभाप्रबन्धो वा विजयोत्कर्षं प्राप्नोतु' इत्युक्तिरपार्थैव, परमेश्वरस्य निरतिशयैश्वर्यस्योत्कर्षान्तरप्राप्त्यसम्भवात्।" इति त्वेतस्य बुद्धिविकलाङ्गतैव। 'जयाति' इत्यत्र जयं प्राप्नोति, जयं प्रापयतीत्युभयार्थस्य समाहितस्याप्रतिबुद्धत्वात्। प्राप्नोतु इति प्रयोगस्तु वैकल्पिकं सभाप्रबन्धमभिलक्ष्य कृतः। नात्र ऋषिराह यत् परमेश्वरो निरतिशयैश्वर्योत्कर्षं प्राप्नोति, अपितु प्रापयति। प्रबन्धस्य जयेन प्रबन्धुरेवोत्कर्षोऽभिलक्षितो भवति। वस्तुतस्तु प्रबन्धस्यैव जयेन प्रबन्धुर्जयो जायते। एवमेव 'पराजयातै' इत्यत्रापि सङ्गतिरनुमन्तव्या।

यच्चाह—"प्रसिद्धस्य परमेश्वरस्य कृते प्रसिध्यतामित्युक्तिर्व्यर्था।" महामते! 'स ईश्वरः सत्यप्रकाशन्यायेन सदास्माकं मध्ये प्रसिध्यताम्' इत्याशयो यत् चक्रवर्तिनो माण्डलिका वा

प्रकरण भी तुम्हारा कहा हुआ कैसे मन्तव्य और प्रामाणिक होगा ? तोषन्याय से मान भी लिया जाये कि यजमान राजत्वेन विवक्षित हो सकता है, पर क्या वह वेदविद् न होकर मूर्ख विवक्षित होगा ?

पृ० १४५१—कुरु पाञ्चाल आदि ऐतिहासिक वर्णन तो इनका कपोलकल्पित है।

पृ० १४५२, पं० १०—यह कथन कि—"इन्द्रो जयाति०' 'त्वमिन्द्राधिराजः०' इन दो मन्त्रों का भाष्य भी कुछ नहीं है। 'परमेश्वर और सभा का प्रबन्ध विजयोत्कर्ष को प्राप्त करे' यह कथन निरर्थक है; क्योंकि परमेश्वर तो निरतिशय है, उसका और विजयोत्कर्ष क्या होगा ?" यह इनकी बुद्धि की विकलाङ्गता का सूचक है। श्रीमन्! 'जयाति' का अर्थ 'जय प्राप्त करता और जय प्राप्त कराता है' ये दोनों होते हैं, यह समाधान आपको सूझा ही नहीं। ण्यन्त अर्थ परमेश्वर पक्ष में लगेगा। 'प्राप्नोतु' क्रिया का प्रयोग विकल्पकथन सभाप्रबन्ध को अभिलक्षित कर किया गया है, परमेश्वर पक्ष में 'प्रापयति' यह अर्थ लगेगा। यहाँ पर ऋषि ने यह नहीं कहा है कि परमेश्वर विजयोत्कर्ष स्वयं प्राप्त करता है। प्रबन्ध के जय से उत्प्रेक्षित प्रबन्धक का जय है। वास्तव में तो जय प्रबन्ध का ही होता है। इसी प्रकार 'पराजयातै' यहाँ पर भी उक्त प्रकार संगति लगा लेनी चाहिये।

यह कहना कि "प्रसिद्ध परमेश्वर के लिये 'प्रसिध्यताम्' व्यर्थ है।" महामते! 'वह ईश्वर सत्यप्रकाश न्याय के साथ हम लोगों के मध्य में प्रसिद्ध होवे' इसका आशय है कि चक्रवर्त्ती

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

राजानः तमेव निरहङ्काराः सन्तः राजाधिराजं मन्येरन्। 'चर्कृत्यः' पुनः पुनः करणीयः, स एवेश्वरः कर्मभिः पुनः पुनरर्चनीयः, अर्थाद् उपासनीयः। 'कृञ्' धातोरनेकार्थत्वेनाऽपि सिद्ध्यति।

पृ० १४५३, पं० १३—यदाह—"परमेश्वरस्तु सर्वस्य जगतोऽधिराजोऽस्त्येव' एतत्कथनस्य कावश्यकताऽस्ति? ईश्वरवन्न जीवः सर्वस्य श्रोता, कृपया मामपि तादृशं कुरु इति कस्य शब्दस्यार्थः? श्रव इवाचरणं परमेश्वरस्य कथं भवति? 'आप्तों के समान सत्य न्याय के उपदेशक हैं' इति श्रवस्युरित्यर्थः कथम्?" इत्याद्यनर्गलकुतर्कग्रन्थविस्तरोऽस्य समाधीयते—

अधिराजस्तु कथ्यते सर्वैरत एव सोऽस्ति, न कथयेरन् तदा कथमवगच्छेयुर्लोकाः, ज्ञानव्यवहारस्य मिथः कथनाश्रयत्वात्। परमेश्वरः सर्वस्य श्रोता, परं जीवः स्वसामर्थ्यगत-सर्वस्य श्रोता भवितुं कथं नेच्छेत्? स प्रतिबन्धः शास्त्रीयो भवता नोपन्यस्तः। श्रव इत्यस्य नास्मादृशश्रोत्रे परमात्मनो व्यापकस्यैव, परं वयं ताभ्यां शृणुमः। परमसौ श्रोत्रं विनैव सर्वेषामभ्यर्थनं शृणुते, अत एव परमात्मनः पक्षे खलु श्रव इवाचरतीति कथनं सार्थकम्।

या महामाण्डलिक राजा लोग निरहङ्कार होकर उसी परमेश्वर को राजाधिराज माना करें। आप 'चर्कृत्यः' के पुनः-पुनः उपासनीय अर्थ पर आश्चर्य कर रहे हैं। प्रथम तो 'कृञ्' धातु के भी स्तुत्यादि अनेकार्थ हैं, दूसरे यह परमेश्वर हमें अपने कर्मों द्वारा बार-बार करणीय है अर्थात् उपासनीय है, यह अर्थ हो ही जायेगा।

पृ० १४५३, पं० १३—यह कहना कि —"परमेश्वर तो सब जगत् का अधिराज है ही, इसका क्या कहना?" वाह! खूब कहा। बिना कहे भी कैसे ज्ञात हुआ, होता है या हो सकेगा? यह नहीं विचारा।

प्रश्न—ईश्वर के समान जीव सब का श्रोता कैसे है? कृपया मुझे भी वैसा कर दो, यह किसका अर्थ है? श्रव के समान परमेश्वर का आचरण कैसे होगा? 'आप्तों के समान सत्य न्याय के उपदेशक' यह अर्थ कैसे?

समा०—उक्त अनर्गल प्रश्नावली है, तथापि समाधान लीजिये। ईश्वर का अधिराज-त्वकथन व्यवहार से ही तो जाना जाता है। परमेश्वर सबका श्रोता है, पर जीवात्मा अपने सामर्थ्यक्षेत्र में सबका श्रोता होना क्यों न चाहे? इस इच्छा में शास्त्रीय प्रतिबन्ध क्या है? और वह प्रतिबन्ध क्यों नहीं लिखा? 'श्रवः' का अर्थ श्रोत्र है। व्यापक परमात्मा के हमारे जैसे कान तो हैं नहीं, लेकिन हम तो अपने कानों से सुनते हैं। सबकी प्रार्थना में सुनता ईश्वर भी है, फिर बिना कानों से कैसे सुनता है, इसके समाधान के लिये 'श्रवः' का अर्थ कान होने के समान आचरण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यस्तदभावे तदिवाचरति तत्रैवैष प्रयोगः ।

यच्चात्रोपमिमीते 'इन्द्र इव अधिराजः' एतेनैव परमैश्वर्यवान् इव। यथा स सत्यन्यायोपदेशकस्तथा राजाऽपि स्यादिति ध्वन्यत एव ।

जनानामभिलक्षिता भूतिरित्यभिभूतिः । या चाभिलक्षिता तां परमेश्वर एव ददातीति नास्ति संशयः । यथा कश्चिद् याचको लोके दयालुस्त्वम्, धनिकस्त्वम्, न्यायवांस्त्वम्—इत्यादिविशेषणैः सम्बोधयति, तदभिप्रायेण अभिज्ञो दयां कुरुते, धनं ददाति, न्यायं वा तस्मै, तथैवाऽत्राऽप्याशयोऽयं ध्वन्यते यन् मामपि अनुग्रहेण अभिभूतिमन्तं कुरु इति ।

एवमयमाक्षेपकाऽल्पधीरूहाप्रतिभाविरहितः सामान्यस्थलान्यपि अवबोद्धुमुत्प्रेक्षितुं वा न पारयते । तदा वेदभाष्यकरणाय समुद्यमस्तादृश एव यथा काचिद् भेकी वराकी महासागरस्य पारमधिजिगमिषुर्जायेत ।

पृ० १४५४—यच्चात्र 'तं सभा च समितिश्च०' 'इमं वीरमनु हर्षध्वम्०' 'सभ्य सभां मे पाहि०'—इतिमन्त्रव्याख्यानमपि स्वपरम्परागतप्रकृत्याऽयमसङ्गतं कथयति । परमत्र विलक्षण-

---

करता है । यह उक्ति सर्वथा सार्थक है । उस कान के अभाव में कान होने जैसा कार्य कर लेता है । यह प्रयोग कानवाले के साथ नहीं होता ।

यह जो यहाँ उपमा दी गई है कि 'इन्द्र के समान अधिराज', इसी से ही परमैश्वर्यवान् जैसा है । जैसे वह सत्य न्याय का उपदेशक है, राजा भी वैसा ही बने—यह अर्थ ध्वनित होता है ।

मनुष्यों की तो अभिलक्षित भूति है, वही अभिभूति कहलाती है । उसी अभिलक्षित को परमेश्वर देता है, इसमें कोई संशय नहीं है । जैसे कोई याचक संसार में किसी से कहता है कि तुम दयालु हो, तुम धनिक हो, तुम असहायों के सहायक हो, न्यायकर्ता हो—इत्यादि विशेषणों से सम्बोधित करता है, उसके इस कथन के अभिप्राय को जाननेवाला स्थिति और आवश्यकता के अनुसार दया करता है, धन देता है, सहायता करता है या न्याय करता है, इसी प्रकार यहाँ भी यही आशय ध्वनित होता है कि मुझे भी अभिभूतिमान् करो ।

इस प्रकार ज्ञात होता है कि यह अल्पधी आक्षेपक ऊहा और प्रतिभा से विहीन है, जो कि यह सामान्य स्थलों को भी नहीं समझ पा रहा है । तब वेदभाष्य करने के लिये मन की छलाँग लगाना ऐसा है, जैसे बेचारी मेंढकी महासागर के पार जाना चाह रही हो ।

पृ० १४५४—यहाँ पर 'तं सभा च समितिश्च०' 'इमं वीरमनु हर्षध्वम्०' 'सभ्य सभां मे पाहि०'—इन मन्त्रों के व्याख्यान को भी यह पारिजातकार अपनी परम्परागत प्रकृति से असंगत

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

क्रियापदानां योगं न निर्दिशति । यत्राक्षिपति तत्रैव बीजं च मार्गयते । ऋषिणा 'सभाध्यक्षमभिषिच्य राजानं मन्यते' इति प्रत्यपादि । ततः पूर्वं तु निर्वाचनीय एव संभायाः । यत्र सर्वे समाना भान्ति तस्याः, तदनु राजा मन्तव्यः । अत्र न काऽपि विप्रतिपत्तिः । निर्वाचनपद्धतिर्वेदेषु पठनीयाऽऽसीदिति कथनं त्वसमञ्जसम्, बुद्धिमद्भिः पद्धतेराविष्कार्यत्वाद्वेदे सङ्केतमात्रं निर्दिश्यते ।

पृ० १४५४, पं० १६—यदुच्यते—"समितिर्युद्धमाचरणीयम्' इत्यप्यशुद्धम् । कर्तृपदप्रवाहे कर्मपरत्वे कारणं वक्तव्यम्, कर्तृपदं च तृतीयान्तं पृथङ्निर्देश्यम् । सेना च युद्धं कुर्यादिति कुतो लब्धम् ? सेनान्यादिकमाश्रित्येति निर्मूलम् ।"

समा०—सत्यमेव यत्—

न स्फूर्तिर्हि विचाराणां बुद्ध्यभावे प्रजायते ।
ऊषरायां यथा भूमौ, उप्तं बीजं प्रणश्यति ॥

महाशय ! इतः पूर्वमथर्ववेदस्याष्टमं सूक्तं पूर्वमध्येतव्यं भवता । तत्रास्ति—

सोऽरज्यत ततो राजन्योऽजायत ॥१॥
स विशः सबन्धूननमन्नाद्यमभ्युदतिष्ठत् ॥२॥
विशां च वै सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति
य एवं वेद ॥३॥

बता रहा है । परन्तु यह यहाँ पर प्रयुक्त विलक्षण क्रियापदों के योग का निर्देश नहीं करता । आक्षेप कर रहा है तथा बीज खोज रहा है । ऋषि ने तो लिखा है कि 'सभाध्यक्ष का अभिषेक करके राजा मानता है' । इससे पूर्व तो वह सभा का निर्वाचनीय ही होगा । जहाँ पर सभी समानरूप से प्रकाशित होते हैं, उसे सभा कहते हैं । इसके बाद ही वह राजा माना जाता है । इस अर्थ में कोई विप्रतिपत्ति नहीं है । निर्वाचन-पद्धति वेदों में पढ़ने योग्य थी, यह आपका कथन तो बड़ा अटपटा है । वेदों में क्या-क्या पढ़ते ? भाई, बुद्धिमान् लोगों ने तो उस पद्धति का आविष्कार कर ही लिया ।

पृ० १४५४, पं० १६—"समिति अर्थात् युद्ध का आचरण करना चाहिये, यह भी अशुद्ध है । जब यहाँ सभी कर्ता पद पढ़े गये हैं, तो बीच में कर्म पद पढ़ने में भी कारण बताना होगा । कर्मपद और तृतीयान्त पृथक् से पढ़ना था । सेना युद्ध करे, यह अर्थ कहाँ से कर लिया ? सेनानी आदि का आश्रय भी निर्मूल है ।"

समा०—सच है, बुद्धि के अभाव में विचार या चिन्तन का स्फुरण नहीं होता, जैसे ऊषर भूमि में बोया गया बीज अंकुर नहीं देता, अर्थात् नष्ट हो जाता है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तथा ९ मे सूक्ते— स विशोऽनुव्यचलत् ॥ १ ॥
तं सभा च समितिश्च सेना च सुराश्चानुव्यचलन् ॥२ ॥

अस्मिन् प्रकरणे परमात्मव्यपदेशेन राजन्यस्य तद्विशो राज्यलक्ष्म्याश्च वर्णनम्। स राजा स्वप्रजामनु विचलति, अनुव्यचलदनु विचलिष्यतीति वा। तं राजानं च सभा अनु विचलति, समितिः सङ्ग्रामोऽपि, अर्थाद् युद्धमपि करणीयं भवति अनुविचलने राज्ञः। तथा परमेश्वरमिव राजानं सेनाऽपि वीरपुरुषाणामनु विचलति अथवा अनुविचलेत्। अत्र मन्त्रे सभा, समितिः सेना च कर्तृपदानि वर्तन्ते, ताः सर्वा राजानमनु विचलिष्यन्ति।

इत्येवं न किमपि शङ्कास्थानमवशिष्यते। इयं निर्मलोक्तिरिह सत्या घटते—

ऐच्छत् समीपस्थफलं मुखेऽलसः,
कश्चित् समुत्थाप्य निवेशयेदिदम्।
तथैष बुद्धिश्रमहीन इच्छति,
प्रस्तौतु विज्ञो विषयं समीहितम् ॥

पृ० १४५५, पं० १३—अत्र 'इमं वीरम्०' इति मन्त्रे न कश्चिदुल्लेख्य आक्षेपः। यन्नाम 'विशृङ्खलम्' इति तु अयं सर्वत्र लिखत्येव। विशृङ्खलता एतस्य खलु सहचरीव।

महाशय पहले अथर्ववेद का आठवाँ सूक्त इससे पूर्व आपको पढ़ना चाहिये। तब संगति समझ में आयेगी। यहाँ पर परमात्मा के व्यपदेश से राजा की प्रजा और राज्यलक्ष्मी का वर्णन है। वह राजा प्रजा के पीछे चलता है और उस राजा के अनुकूल पीछे सभा चलती है। और इस अनुविचलन में समिति अर्थात् युद्ध भी करना होता है। जैसे परमेश्वर के पीछे सारी प्रजायें चलती हैं, उसी प्रकार राजा के पीछे वीर पुरुषों की सेना भी विचरती है। यहाँ मन्त्र में सभा, समिति और सेना ये सब कर्तृपद हैं। 'तम्' यह कर्म है, जो साकांक्ष है, अतः 'मन्येत' क्रिया की कल्पना की गई। मन्त्र में 'अनुव्यचलन्' के साथ सभी की संगति हो जायेगी। वहाँ भी अर्थ यही होगा कि सभा, युद्ध, सेना, सुरा अर्थात् राज्यलक्ष्मी राजा के अनुसार चले। इसमें असंगति कहीं नहीं है। आप केवल कर्तरी का काम ही अपनी बुद्धि से ले रहे हैं। कदाचित् संगति लगाने का थोड़ा सा भी प्रयास करते तो आदमी बन जाते। आप पर निर्मलोक्ति घटित हो रही है—

किसी आलसी ने पास पड़े हुए फल को खाने की इच्छा की, पर यह चाहा कि इसे उठा कोई इसके मुख में रख देवे। उसी प्रकार यह लेखक भी बुद्धिश्रम से हीन होकर चाहता है कि कोई विज्ञ इसे एक-एक पद समझावे।

पृ० १४५५, पं० १३—'इमं वीरम्०' इस मन्त्र पर इनका कोई उल्लेख्य आक्षेप नहीं है। प्रतिस्थल को विशृङ्खल कह देना इनका सहज है; क्योंकि विशृङ्खलता इनकी सहचारिणी है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'सभ्य सभां मे पाहि०' यदत्रार्थं वक्ति यन् 'मे' पदेन न केवलं दयानन्दोक्तमनुष्या एव ग्रहीतुं शक्यन्ते, देवा अपि शक्यन्ते। महोदय! नैतावदेव, राक्षसा अपि ग्रहीतुं शक्यन्ते सर्वनामत्वात्। परं मनुष्यसम्बन्धिप्रकरणे तु मनुष्या एव ग्राह्याः।

हे विचित्रमते! ये सभासदः सन्ति कुशलाः, ते कथं न प्रार्थ्यन्तां सभारक्षार्थम्? हे विपरीतमते? नात्र कथ्यते यद् राजधर्मज्ञानमात्रेण शतायुर्भविष्यतीति, परं कामना तु कर्तुं शक्यत एव, याऽत्र कृता 'सुखयुक्तमायुः प्राप्नुयाम्' इति।

पृ० १४५७, पं० १६—यदाह—"दयानन्दोक्तं तुच्छम्, मन्त्रब्राह्मणभागयोरुभयोरपि वेदत्वस्य प्रमाणसिद्धत्वोक्तेः।" इति। तत्रैवं निर्मलोक्तिरेषा ध्यातव्या मानमर्दिनी—

अपि ज्ञातं नैव त्वदभिनिचितस्वप्नरचितो,
महोच्चः प्रासादः प्रबलतरतर्केषु हतिभिः।
सुनाम्ना वेदः स्यात् कथमपि मतो ब्राह्मणमिति,
पुरो ध्वस्तो धूलिं धरणितलगां लेढि नितराम्॥

'सभ्य सभां मे पाहि०' इस मन्त्र के 'मे' पद पर आपका कहना कि 'मे' पद से दयानन्द के कहे हुए मनुष्य ही क्यों लिये जावें, आपके कहे हुए देवता भी क्यों न लिये जावें? हम आपकी मनःस्थिति को समझते हुए और छूट देते हैं कि 'मे' पद से अपने अभीष्ट राक्षस आदि भी ले लीजिये; क्योंकि 'मे' पद तो सर्वनाम ठहरा। परन्तु श्रीमान् जी? प्रकरण तो मनुष्यों का चल रहा है, अतः मनुष्य ही ग्राह्य हैं।

हे विचित्रमते? आप कहते हैं कि सभासद् मनुष्य होते हैं, अतः सभारक्षा की प्रार्थना उनसे क्यों की जाये, देवताओं से क्यों न की जाये? महाराज! आपके जड़ देवताओं की अपेक्षा तो चेतन कुशल सभासदों से प्रार्थना करना अधिक बुद्धिसंगत है। विपरीतमते! यहाँ यह नहीं कहा जा रहा है कि राजधर्म के ज्ञानमात्र से शतायु हो जायेगा, किन्तु कामना तो कर ही सकता है। जैसी कि यहाँ की गई है कि 'सुखयुक्त आयु प्राप्त करें।'

पृ० १४५७, पं० १६—यह कहना कि—"दयानन्द का कथन तुच्छ है, मन्त्र और ब्राह्मण दोनों को ही वेद सिद्ध कर चुके हैं।" इस विषय में यह निर्मलोक्ति पर्याप्त होगी—

क्या तुम्हें पता नहीं है कि तुम्हारे स्वप्नों में रचा ब्राह्मण को वेद सिद्ध करने का महोच्च प्रासाद प्रबलतर तर्कों के बाणों के प्रहारों से तुम्हारे देखते-देखते ध्वस्त कर दिया गया है, जो भूमि पर पड़ा धूल चाट रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १४५७, पं० १८—यदुच्यते—"जनिष्ठा उग्रः०' इत्यस्य भाष्यमपि न मनोऽनुगम्।" इति वचो बुद्धिविपरीतम्, एतन्मनस ऋषेः पश्चादुत्पन्नत्वात्। कथं तद्वचस्त्वन्मनसोऽनुगामि भवेत्, तत्तु शास्त्रानुगम्। ऋषिवचस्तव मनोऽनुगच्छेन्न वा। मन्ये यथा पश्चादुत्पन्नपुराण-कात्यायनानुगा एभिर्वेदाः कृताः, न च वेदानुगामित्वमन्यग्रन्थानां प्रतिपादितम्, तद्धारणयैव पूर्वकृतस्वामिभाष्यं स्वोच्छृङ्खलमनसोनुयायि विधातुमभिलषतीत्यनेन ध्वन्यते।

पृ० १४५८, पं० ३—आ०—यदाहात्र—"उत्तमकर्मकारिभ्य आनन्दकरो दुष्टेभ्यो दुःखप्रदश्चास्ति, इत्यात्मको राजधर्मः, तदपि मूढजनप्रतारणमेव, ब्राह्मणवचने तादृशार्थबोधकपदाऽभावात्। 'सहसे, तुराय' इति सूक्तपदानां नावधृतोऽर्थः। 'सूक्तमित्यस्य विशेषणमुग्रवत् सहस्वदिति, तदपि नावगतमित्यहो निर्लज्जताया नग्नताण्डवम्।" इति।

समा०—अत्रापशब्दप्रयोगकौशलमस्य उच्चकोटिनीचतायाश्चरमशिखरं चुम्बति, यत् स्वस्यैव निर्लज्जताया नग्नताण्डवं प्रायुङ्क्त। न चर्षेः कृत्यमस्ति भवादृशमूढजनप्रतारणम्, प्रत्युतायमृषिः शास्त्रगहनाम्बोधिगूढशब्दवीचिव्रातबुडितमतीन् मूढान् प्रतारयितुं परं पारं प्राप-

---

पृ० १४५७, पं० १८—यह तो कहा जा रहा है कि—"जनिष्ठा उग्रः०' इस मन्त्र का भाष्य मेरे मन का अनुगामी नहीं है।" यह वचन बुद्धिविपरीत है। विचारिये, कैसे? क्योंकि ऋषि दयानन्द के बाद आप और आपका मन पैदा हुआ, फिर उसका अनुगामी यह भाष्य कैसे हो सकता है? फिर ऋषि-वचन तो शास्त्रानुगामी हो सकता है, न कि तुम्हारा। हाँ, इस तरह तो माना जा सकता है, जैसा कि आपका अभिप्राय है। जैसे पश्चाद् उत्पन्न पुराणों और कात्यायन आदि के अनुचर इन लोगों ने वेद बना डाले, पर अन्य ग्रन्थों को वेदानुगामी नहीं बनाया। उसी धारणा से पूर्वभूत स्वामीजी के भाष्य को अपना मनोऽनुगामी बनाने का दुरभिलाष प्रकट कर रहे हैं।

पृ० १४५८, पं० ३—आ०—"उत्तमकर्मकारिभ्यः' उत्तम कर्म करनेवालों को आनन्द देनेवाला, दुष्टों का दुःखदायक, ऐसा राजधर्म—यह सब भूमिकावचन मूढजन-प्रतारण के लिये है। ब्राह्मण-वचन वैसा अर्थ ही नहीं बताते हैं। 'सहसे, तुराय' इन दोनों पदों का अर्थ ही नहीं कहा। 'उग्रवत्' और 'सहस्वत्' सूक्त के विशेषण हैं, यह भी स्वामीजी नहीं जान सके। अहो! यह निर्लज्जता का नग्न ताण्डव है।"

समा०—यहाँ पर इनका अपशब्दप्रयोगकौशल उच्च कोटि की नीचता के चरम शिखर को चूम रहा है। जो कि इन्होंने अपनी ही हरहरानन्द अभिख्या के अनुरूप निर्लज्जता का नग्न ताण्डव प्रारम्भ कर दिया। ऋषि का यह कृत्य कदापि नहीं है कि आपसदृश मूढजनों का प्रतारण करें। प्रत्युत इस ऋषि ने शास्त्र के गहन समुद्र की गूढ शब्दों की लहरों के समूह में डूबती मतिवाले

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यितुमित्यर्थः, अवश्यं प्रायतत। ब्राह्मणवचनं न तादृशार्थबोधकमित्यलीकम्। तव सम्मान्यसायणेनाऽपि क्षत्रस्य स्वरूपाख्याने उग्रवत्, सहस्वदित्येवमर्थकं व्याख्यातम्। यथा—

"तच्चोभयं क्षत्रियजातेः स्वरूपम्। क्षत्रियोऽपि क्रूरो बलवांश्च भवति।" महर्षिणा विशदीकृत्य व्याख्यातम्, येन मूढोऽपि तदवगच्छेत्। स्तुतिमोदमदाद्यर्थवान् 'मदि' धातोर्मन्द्रशब्द आनन्दकर इत्यर्थकः। दुष्टेभ्यश्च ओजिष्ठो भवति इति क्षत्रस्य राज्ञो राजधर्मस्य वा स्वरूपं निर्विवादम्।

सूक्तविशेषणमुग्रवत्, सहस्वदिति नावगतमिति मिथ्यारोपं कुर्वाणेन त्वयैव नावगतम्। तदाऽनवगमे या निर्लज्जतैतेन व्याहृता सैनमेवानुबध्नात्यत्र।

पृ० १४५९, पं० १६—अत्राप्ययं दुःसाहसी स्वकीयनिसर्गजधार्ष्ट्यशब्दावलीं प्रयुञ्जान आह, यदुक्तम्—"बृहत् पृष्ठम्' इतिभाष्यमपि अतीव साहसं धार्ष्ट्यं च, पौर्वापर्यावधारण-शून्यत्वात्।" इति।

अत्र कः पौर्वापर्यविरोधः प्रकरणं वेति नानेन दर्शितम्, यत् समाधीयेत। 'बृहत्' शब्दस्य क्वास्तीह 'रथन्तर'शब्देन साहचर्यमिति दिवान्धत्वमेव। 'उक्तक्षत्रराज्यकर्मणा मनुष्यो राजकर्म

सत्यासत्यज्ञान में मूढ लोगों को प्रतारण अर्थात् परले पार पहुँचाने के लिये अवश्य प्रयास किया है। 'ब्राह्मणवचन उस अर्थ को नहीं बताता' यह कथन मिथ्या है। तुम्हारे सम्मान्य सायण ने भी क्षत्र के स्वरूपाख्यान में 'उग्रवत्' और 'सहस्वत्' की व्याख्या की है। यथा—

"ये दोनों (उग्रवत् और सहस्वत्) क्षत्रिय जाति के स्वरूप हैं। क्षत्रिय भी क्रूर तथा बलवान् होता है।" महर्षि ने विशदीकृत व्याख्या कर दी है, जिससे मूढ जन भी समझ सके। स्तुति, मोद आदि अर्थवाले 'मदि' धातु से 'मन्द्र' शब्द सिद्ध होता है, जिसका अर्थ 'आनन्दकर' धातुसंगत है। दुष्टों के लिये राजा ओजिष्ठ होता है। यही राजा या राजधर्म का स्वरूप है।

'सूक्त के विशेषण ये दोनों नहीं जाने' यह आरोप मिथ्या है, वस्तुतः तुमने ही नहीं जाने। इसलिये न समझने में जो निर्लज्जता आपने दिखाई है, वह अब आपकी ही संगिनी बन गई है।

पृ० १४५९, पं० १६—यहाँ पर भी इस दुस्साहसी ने अपनी निसर्गज धृष्टता की शब्दावली का प्रयोग करते हुए कहा है कि—"बृहत् पृष्ठम्' इसका भाष्य भी साहस और धार्ष्ट्य है, क्योंकि पौर्वापर्य के निश्चय से शून्य है।"

यहाँ कौनसा पौर्वापर्य-विरोध तथा क्या नया प्रकरण है, यह नहीं लिखा, जिसका समाधान किया जाता। 'बृहत्' शब्द का यहाँ 'रथन्तर' शब्द से साहचर्य कहाँ है? क्या ही उल्लेख्य दिवान्धत्व है। 'क्षत्रराजकर्म से मनुष्य राजकर्म की वृद्धि करता है' इस भूमिका के वाक्य का

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वर्धयति' इत्यस्य भूमिकावाक्यस्यायमेवाशयो यद् राजा स्वकर्त्तव्यक्षत्रराजकर्मणा मनुष्यं वर्धयति। तदा प्रजाजनोऽपि तद्राजकर्मवर्द्धने सहयोगं ददाति। एवं क्षत्रेण क्षत्रसमृद्धिर्भवति। निरन्तरं केवलं सुखं हि निष्कैवल्यम्। शिष्टमप्रासङ्गिकमुक्तमिहानेन।

पृ० १४६१, पं० ९—यदुच्यते—'ब्रह्म वै रथन्तरम्' इत्यत्र यदाह—"ब्रह्मणि क्षत्रस्य प्रतिष्ठितत्वात् कर्मसाङ्कर्यं स्यात्।" तदत्र प्रतिबोधोऽस्य बुद्धिमान्द्यमेव। देवानाम्प्रिय! नह्यत्र ब्राह्मणवर्णेन क्षत्रियवर्णस्य वैवाहिकसम्बन्धः प्रतिपाद्यते। अत्र हि ब्राह्मणप्रतिनिधिरूपविद्यायां क्षात्रधर्मो न्यायैश्वर्यादि प्रतिष्ठितं भवति, न्यायादिना च विद्या रक्ष्यते। एवं शस्त्रेण शास्त्ररक्षा, शास्त्रेण च शस्त्रविद्यारक्षणमभीष्टम्। परं विपरीतबुद्धिरयं विपरीतमेव चिन्तयति, कुटिल-प्रकृतित्वात्। ऋषिणा यावदुपयोगि वाक्यमिहोद्धृतं व्याख्यातं च। एतेन पुस्तककलेवर-वर्धनार्थं सायणभाष्यमविकलमनुकृतम्।

पृ० १४६३, पं० ३—यदुक्तम्—"ओजो वा इन्द्रियम्०' इति व्याख्याऽपि धाष्ट्र्यमेव" इति विद्वांसो वीक्षन्त एव एतस्य धाष्ट्र्यम्। इह स्वामिना प्रकरणमनुसृत्य 'राजपुरुषैः' इति

आशय है कि राजा अपने कर्तव्य क्षत्रराजकर्म से मनुष्यों को बढ़ाता है, वे भी उसी राजकर्म की वृद्धि में पुनः सहयोग देते हैं। इस प्रकार क्षत्र से क्षत्रसमृद्धि होती है। निरन्तर केवल सुख को निष्कैवल्य कहते हैं। शेष समस्त इन्होंने यहाँ अप्रासंगिक कहा है।

पृ० १४६१, पं० ९—'ब्रह्म वै रथन्तरम्' यहाँ पर करपात्रीजी कहते हैं कि—"ब्रह्म में क्षत्र के प्रतिष्ठित होने से वर्णसङ्करता पैदा होगी।" इस कथन से ज्ञात होता है कि ये स्थल को समझ नहीं सके। इसे बुद्धिमान्द्य ही कहा जा सकता है। श्रीमन्! यहाँ ब्राह्मण की कन्या का क्षत्रिय से वैवाहिक सम्बन्ध नहीं बताया जा रहा है। यहाँ पर तो ब्राह्मण की प्रतिनिधि विद्या में न्याय ऐश्वर्यादि क्षात्र धर्मों की प्रतिष्ठा की जा रही है, अर्थात् विद्या के बिना न्यायादि प्रतिष्ठित नहीं होते और न्यायादि के बिना विद्या भी रक्षित नहीं होती। शास्त्र और शस्त्र का ऐसा ही सम्बन्ध प्रतिष्ठापक है। परन्तु कुटिल प्रकृति के कारण यह विपरीतमति विपरीत ही सोचता है। ऋषि ने जितना उपयोगी वाक्य समझा उद्धृत कर व्याख्यान कर दिया। उन्हें विषय का प्रामाणिक प्रतिपादन करना था, थोथा पोथा रचना उद्दिष्ट नहीं था। जैसी कि आपने सम्पूर्ण सायण की नकल उतार डाली।

पृ० १४६३, पं० ३—"ओजो वा इन्द्रियम्०' इसकी व्याख्या भी धृष्टता ही है।" इनके इस कथन की धृष्टता को विद्वान् देख ही रहे हैं। यहीं पर 'ओज' को क्षत्र और वीर्य कहा गया है, वहीं राजन्य का स्वरूप है। अतः राजा और राजा के पुरुषों को बल-पराक्रमवाली इन्द्रियों की सदैव रक्षा करनी चाहिये। यहाँ पर महर्षि ने प्रकरण के अनुरूप ही 'राजपुरुष' शब्द की कल्पना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उत्प्रेक्षितम् । एवमृषिदयानन्दकृतमविकलं बुद्धिप्रतिष्ठितविदुषां सम्मतौ न तु अल्पाधीत्यवलेपास्तमतीनाम् ।

पृ० १४६४, अनु० १—'तानहम्०' इतिमन्त्रस्याऽपि दयानन्दभाष्यं सर्वथा दोषरहितं विवेचका निभालयन्ति । पालनार्थक 'भुज' धातोः 'भौज्याय' इति निष्पद्यते, पालनं चापि न्यायधर्मयुक्तमेव प्रशस्तं भवति । अयं तु यत्किञ्चित् प्रलपन् मुखसत्तामेव प्रमाणयति । राज्यमनुगतं पदं सभापतिपदमेव भवतीति उत्प्रेक्षितः सभाध्यक्षार्थः । यश्चानेनार्थो दर्शितः, स केवलं शब्दाधारः शरीरव्यायाम एव, यदासन्दीपृष्ठे यजमान एव विनियोजितः ।

पृ० १४६५—'नमो ब्रह्मणे०' इत्यत्र ब्रह्मशब्देन आदौ परमेश्वरार्थग्रहणं कृतमास्तिकेनर्षिणा । तदनु ब्राह्मणवेदविद्याद्यर्थाः सङ्गच्छन्त एव । भवता ब्राह्मणाय नमस्कार उल्लिखितः, परं प्रत्येककार्ये परमात्मने नमः कार्यमिति प्रत्यनुशासनम् ।

पृ० १४६६, अनु० १तः पृ० १४६८, पं० २ यावत्—अयं हि विचारशून्यो यदाह—"सप्रजापतिकाः' इतिभाष्यं दयानन्दस्य पौर्वापर्यविचारशून्यम् ।" परं नोपन्यस्तं पौर्वापर्य-

---

की है । इस प्रकार दयानन्द सरस्वती का भाष्य अविकलरूपेण समझदारों की सम्मति में प्रतिष्ठित है, अल्पश्रुत के घमण्ड से अस्तबुद्धियों के मत में नहीं हो सकता है ।

पृ० १४६४, अनु० १—'तानहम्०' इसके भाष्य को भी विवेचक दोषशून्य ही मानते हैं । पालनार्थक 'भुज्' धातु से 'भौज्य' शब्द की सिद्धि होती है । इसी प्रकार 'पारमेष्ठ्य' तथा 'माहाराज्य' इन शब्दों की व्युत्पत्ति से अभीष्टार्थ लभ्य है । ये तो अनाप-शनाप कहकर अपने मुख की सत्ता को प्रमाणित करने पर लगे हैं । राज्य के अनुगत पद सभापति पद होता है । अतः सभाध्यक्ष अर्थ का उत्प्रेक्षण सर्वथा संगत है । इन्होंने जो अर्थ दिखलाया है, वह तो शब्दाधार व्यायाममात्र है, जो कि आसन्दी के पृष्ठ पर यजमान को विनियुक्त किया गया है ।

पृ० १४६५—'नमो ब्रह्मणे०' यहाँ पर ब्रह्म शब्द से परम आस्तिक ऋषि ने प्रथम परमेश्वर अर्थ ग्रहण किया है, इसके अनन्तर ब्राह्मण, वेद, विद्या आदि अर्थ संगत हो ही जाते हैं । आपने ब्राह्मण (जाति) के लिये नमस्कार लिखा है, परन्तु प्रत्येक कार्यारम्भ में परमात्मा को नमन करना चाहिये, यह प्राचीनों का अनुशासन है । इससे ही ध्वनित होता है कि सर्वगुणसम्पन्न भी राजा यदि आस्तिक नहीं है, तो ठीक नहीं ।

पृ० १४६६, अनु० १ से पृ० १४६८, पं० २ तक—यह लेख बहुत ही विचारशून्य है, जो कि कह रहा है कि "सप्रजापतिकाः' का दयानन्दभाष्य पौर्वापर्य विचारशून्य है" परन्तु वह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रकरणम्। देवादिशब्दैर्विद्वदादिग्रहणे मूढरूढप्रसिद्धार्थपरित्यागोऽर्थस्य गरीयस्तया श्रेयानेव। यदत्र निर्मूलमाहायं तत्तूत्प्रेक्षितव्यमृषिणा साध्वस्ति। को नाम जडो जडस्य कस्यचिद्देवस्य स्वकल्पितस्याभिषेकं विदध्यादिह। तस्मादिन्द्रोऽत्र राजैव।

पृ० १४६८—'सम्राजम्०' इत्यादौ आक्षिप्तमकिञ्चित्करम्। यदत्रानेनाविकलमुद्धृतं तत्तु ग्रन्थस्थौल्यवर्धनाय। एतेनैव 'स एतेन०' इत्यत्राप्याक्षिप्तं तत् समाहितम्, आक्षेपाणां बुद्धिबाह्यत्वात् तुच्छत्वाद् वा।

पृ० १४७१, अनु० ३—"स्वामिदयानन्दस्तु—'राष्ट्रपालनमेव क्षत्रियाणामश्वमेधाख्यो यज्ञो भवति। नाश्वं हत्वा तदङ्गानां होमकरणं च' इत्युक्तवान्, तत्तुच्छम्, तथात्वेऽश्वक्रतु-विधानवैयर्थ्यापातात्।"

इति निखिलं तुच्छमेव। वेदभक्तच्छलवेशं धारयन् वेदद्वेषी यज्ञे मांसाहुतिपोषकः सनातनधर्मकलङ्कावतार एष लेखको यज्ञे अश्वमेधे मांसाहुतिनिषेधपरकां स्वाम्युक्तिं तुच्छं मन्यते।

तदत्र विविच्यते। वेदार्थानभिज्ञाः स्वार्थिनो जिह्वालौल्यलुब्धा मीमांसाटीकास्वपि

पौर्वापर्यप्रकरण प्रस्तुत नहीं किया। देवादि शब्दों से विद्वान् आदि का ग्रहण करना, पर मूढरूढप्रसिद्धार्थ का त्याग, ऋषि के अर्थ की गरिमा को देखते हुए उत्तम है। आप यहाँ जितना निर्मूल कह रहे हैं, उस-उस अर्थ का तो ऊहन करके ऋषि ने बहुत अच्छा किया। कौन मूर्ख होगा जो यहाँ किसी जड़ देव का अभिषेक करायेगा? इसलिये यहाँ पर इन्द्र राजा ही है।

पृ० १४६८—'सम्राजम्०' इत्यादि भाष्य पर किया आक्षेप व्यर्थ ही है। यहाँ पर इस लेखक ने अविकल नकल उतार दी है, जिससे ग्रन्थ का कलेवर बढ़ जावे। 'स एतेन०' पर भी किया आक्षेप पूर्व ही समाहित कर दिया है। वह भी बुद्धिबाह्य तथा तुच्छ है।

पृ० १४७१, अनु० ३—"स्वामी दयानन्द ने तो राष्ट्रपालन ही क्षत्रियों का अश्वमेध यज्ञ बताया है। अश्व को मारकर उसके अंगों से होम करने का वे निषेध करते हैं, उनका यह कथन तुच्छ है; क्योंकि वैसा मान लेने पर तो अश्वक्रतुविधान की व्यर्थता आने लगेगी।"

यह सारा कथन वेद-भक्त का छलवेश धारण करनेवाले, पाखण्डी, वेदद्वेषी, यज्ञ में मांसाहुति के पोषक, सनातन (पौराणिक) धर्म के कलङ्कावतार स्वामी करपात्रीजी महाराज का है, जो यज्ञ में अश्व के अंग काटकर मांसाहुति देने के निषेध-लेख को तुच्छ बता रहे हैं। अब स्वयं विद्वान् और जनता निश्चय करे कि हिन्दू-संस्कृति में यह लङ्केश कहाँ से आ गया।

अतः इस विषय पर विवेचन प्रस्तुत है। वेदार्थ से अनभिज्ञ स्वार्थी जिह्वालौल्य लुब्धकों ने मीमांसा की टीकाओं में भी बहुत सा अनर्थ मिला दिया, जो कि मीमांसाशास्त्रकार के विरुद्ध

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बह्वनर्थममेलयन्, तच्च मीमांसाशास्त्रविरुद्धं हि। यथा हि ब्रह्ममीमांसा नानेश्वरवादं समूलमुदमूलयत्, तथैव धर्ममीमांसाऽपि यज्ञे पशुवधं सौत्रामण्यां सुरापानम् एवमन्यविधाननर्थान् समूलमनाशयत्। यथा 'मांसपाकप्रतिषेधश्च तद्वत्' (मी० १२।२।२), अनेन स्पष्टं यागे पशुहिंसानिषेधः। तथा 'मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात्' (मी० १२।२।६)। यतो हि आहवनीयादियज्ञाग्निषु घृतादिपदार्थानामेव होमो न तु मांसस्य।

अयं हि करपात्रोऽश्वमेधे अश्वाङ्गाहुतिं समर्थयते। एतस्य याज्ञिकसम्प्रदायस्तथाचरति। तदत्राश्वमेधस्वरूपं प्रतिपाद्यते।

अश्वमेधो हि नाम प्रायेण संवत्सरसाध्यं कर्म। तदधिकारी चाभिषिक्तः सार्वभौमो राजा भवति। फाल्गुनमासस्य शुक्लपक्षस्याष्टम्यां नवम्यां वा प्रारभ्यतेऽयम्। तदर्थचिताश्वस्य पूर्वाग्रभागः श्वेतः पश्चादर्धभागः कृष्णो भवति। ललाटे शकटाकारं श्वेतं चिह्नं चापि भवति। एतस्य द्वादशारत्निप्रमाणा च रशना भवति घृताक्ता। एवमग्रेऽपि बहुवर्णनमेतस्य। अश्वोऽयम् एतस्य रशना च सर्वमालङ्कारिकं राज्ञश्चतस्रः पत्न्यश्च (इदं विस्तरशो विद्वद्वरयुधिष्ठिरमीमांसक-भूमिकायां द्रष्टव्यं जिज्ञासुभिः)। परमत्र अश्वस्याङ्गानि छित्त्वा कदापि नाहूयन्त प्रत्नैरिति ध्यातव्यम्।

है। जैसे ब्रह्ममीमांसा ने नाना ईश्वरवाद को समूल उन्मूलन कर दिया है, उसी प्रकार धर्ममीमांसा ने भी यज्ञ में पशुवध का, सौत्रामणी में मदिरापान का, इसी प्रकार अन्यविध अनर्थों का समूल नाश किया है। मी० १२।२।२ में मांसपाक का प्रतिषेध किया है। इससे स्पष्ट ही पशुहिंसा का निषेध है। तथा मी० १२।२।६ में कहा है कि 'मांसपाक का आहुतिसंयोग से पूर्ण प्रतिषेध विहित है।' क्योंकि आहवनीयादि यज्ञाग्नियों में घृतादि पदार्थों का ही होम है, मांस का नहीं।

और ये भारत के आधुनिक शङ्कराचार्यों के गुरु श्री करपात्रीजी अश्वमेध में घोड़े के अङ्गच्छेद करके मांसाहुति देने का प्रतिपादन कर रहे हैं। इनका याज्ञिक सम्प्रदाय भी वैसा आचरण करता है। इसलिये यहाँ पर अश्वमेध का वास्तविक स्वरूप भी संक्षेपतः बताया जा रहा है।

अश्वमेध प्रायः संवत्सरसाध्य कर्म है। उसका अधिकारी अभिषिक्त सार्वभौम राजा होता है। यह यज्ञ फाल्गुन मास के शुक्लपक्ष की अष्टमी या नवमी में प्रारम्भ होता है। उसके लिये चुने गये अश्व का पूर्वाग्र भाग श्वेत और पश्चात् अर्ध भाग कृष्ण होता है। ललाट पर शकटाकार श्वेत चिह्न भी होता है। घोड़े की रस्सी बारह अरत्निमात्र (कुहनी से कनिष्ठिका अंगुली तक लम्बी) होती है, जो घी से चुपड़ी होती है। इसी प्रकार आगे बहुत सा वर्णन है। यह अश्व, इसकी रस्सी और राजा की चार पत्नियों की चर्चा रूपकालङ्कार में भी वैदिक ग्रन्थों में की गई है (विस्तार में पाठक श्री पं० युधिष्ठिर मीमांसक की मीमांसा-भूमिका देखें)। लेकिन यहाँ पर अश्व के अङ्गों को काटकर प्राचीन आचार्यों द्वारा आहुति नहीं दी जाती थी, यह ध्यान रखना चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पुरुषमेधाश्वमेधाजमेधगोमेधादीनामपि न कदापि वाममार्गानुगामि-प्रचारितार्थं ग्रहीतुं योग्याः। यथा शतपथे (१३।१।६।३) कथितम्— "राष्ट्रं वा अश्वमेधः। वीर्यं वा अश्वः।" यत्तु वेदस्य २३। १९-४० तमं मन्त्रं यावन् महीधरेण श्रीकरपात्रगुरुणा यावानश्लीलो महानर्थपरोऽश्वमेधसाधकोऽर्थः प्रसारितो न तावानन्येन। अतोऽयं स्वयमपि (२३। ३२ मन्त्रे) स्वीकुरुते—"अश्लीलभाषणेन दुर्गन्धप्राप्तानि मुखानि सुरभीणि यज्ञः करोत्वित्यर्थः।" अनेन समग्रा वेदाः कलङ्किताः कुलकलङ्केन। यद्यपि न मन्त्राक्षरेषु क्वाऽपि अश्वाङ्गच्छेदनबोधकं किमपि मूलम्।

महाभारतस्य शान्तिपर्वण्यपि अश्वमेधवर्णनमस्ति। तत्र हि स्पष्टं 'न तत्र पशुघातोऽभूत्' इति लिखितम्। अग्रे (अ० ३३७) लिखितमस्ति—

अजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः।
अजसंज्ञानि बीजानि छागान्नो हन्तुमर्हथ।
नैष धर्मः सतां देवा यत्र वध्येत वै पशुः॥

इदमपरं चास्मानार्यानपि लज्जयति यत् श्रीबलदेवोपाध्यायो वैदिकसाहित्ये ४३७ पृष्ठे

पुरुषमेध, अश्वमेध, अजमेध, गोमेध आदि का भी वाममार्ग-प्रचारित हिंसापरक अर्थ कदापि ग्राह्य नहीं है। जैसाकि शतपथ (१३।१।६।३) में लिखा है—"राष्ट्र ही अश्वमेध है। अश्व वीर्य को कहते हैं।" यजुर्वेद के २३वें अध्याय के १९ से ४० मन्त्र तक श्री करपात्र के आराध्य गुरु महीधर ने जैसा अश्लील, महानर्थकर अश्वमेध के विषय में अर्थ प्रसारित किया है, वैसा तो आज तक किसी ने नहीं किया। इसीलिये यह इस पाप को ३२वें मन्त्र के भाष्य में इस प्रकार स्वीकार भी करते हैं कि—"अश्लील भाषण से दुर्गन्ध को प्राप्त हुए हमारे मुखों को यह यज्ञ सुगन्धित कर दे।" इसने तो सारे वेदों को ही कलंकित कर दिया। यह कुलकलंक सिद्ध हुआ। यद्यपि २३वें अध्याय के किसी मन्त्र में कोई भी पद हिंसा का सूचक नहीं है।

महाभारत के शान्तिपर्व अध्याय ३३६ के श्लोक में अश्वमेध-वर्णन में स्पष्ट लिखा है कि 'वहाँ किसी प्रकार का पशुघात नहीं हुआ।' आगे श्लोक में लिखा है—

अजों से हवन करना चाहिये, यह वैदिक विधान है। परन्तु समझ लेना चाहिये कि अजसंज्ञक धान्य बीज होते हैं, बकरों की भ्रमवश हत्या नहीं करनी चाहिये। यह सत्पुरुषों का धर्म नहीं है कि यज्ञ में पशु को मारे।

यह दूसरी बात हम आर्यों को और भी लज्जाकर है कि श्री बलदेव उपाध्याय अपने 'वैदिक साहित्य का इतिहास' पुस्तक में लिखते हैं बड़ी निर्लज्जता से कि—'आर्य लोग शीतकाल

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निर्लज्जः सन् लिखति यदार्याः शीतकाले घृतपक्वेन भोजनेन सार्द्धं मांससेवनमप्यकार्षुः। परं पं० भगवद्दत्तो (भारतवर्ष का बृहद् इतिहास, भाग १, पृ० २१०-२१२, द्वि० सं०) लिखति यदादिमानवाः कन्दमूलफलादिकमेवासेवन्त। किं बहुना, बाइबिल-कुरानसदृशग्रन्था मांसाशिनामादमस्य हव्वायाश्च कन्दमूलफलमेवाहारं प्रतिपादयन्ति।

ऋग्वेदे—'अजीजन ओषधीर्भोजनाय' (५। ८३। १०), अथर्ववेदेऽपि—'व्रीहिमत्तं यवमत्तमथो०' (६। १४०। २) भोजने व्रीहियवादयो लिखिताः सन्ति। अत एषा यज्ञे पशुहिंसाप्रवृत्तिस्तु राक्षसैरेभिरेव धर्माङ्गत्वेन प्रत्यपादि।

अग्रे १४७२-७३ पृष्ठयोरपि न नूतनत्वमाक्षेपे पिष्टपेषणमेव केवलम्।

१४७४ पृष्ठेऽयमाक्षिपति यत् 'श्रीशब्दस्य समृद्धिरेवार्थो भवितुमर्हति'। तत्र कोऽस्ति नियम इति न कथितवान्। यदा विद्यासौन्दर्यादिकं सर्वमपि श्रीवाच्यम्।

श्रीर्वेशरचना शोभा भारती सरले द्रुमे।
लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मतौ॥

में घृतपक्व भोजन के साथ मांस-सेवन भी किया करते थे।' (पृ० ४३७)। इनके पूर्वजों को क्या मालूम था कि ऐसा कुलकलङ्की महाविद्वान् हमारे कुल में रिसर्चस्कालर होगा! हा शोक! परन्तु पं० भगवद्दत्तजी ने अपने ग्रन्थ ('भारतवर्ष का बृहद् इतिहास' भाग १, पृ० २१०-२१२, द्वि० सं०) में लिखा है कि 'आदि मानव कन्द-मूल-फलादि का ही सेवन करते थे'। और अधिक क्या कहें, मांसाहारियों के बाइबिल, कुरआन आदि ग्रन्थ तक आदिम आदम और हव्वा को कन्द-मूल-फल सेवन करनेवाला ही बताते हैं। सच है—

दिल के फफोले जल उठे, हसरत के दाग से।
इस घर को आग लग गई घर के चिराग से॥

ऋग्वेद (५। ८३। १०) में तथा अथर्ववेद (६। १४०। २) में ओषधि, व्रीहि, यव आदि का ही भोजन लिखा है। अतः यह यज्ञ में पशुहिंसा की प्रवृत्ति इन राक्षस डार्विन के मानसपुत्र बन्दरों की सन्तानों ने ही धर्म के अङ्गस्वरूप प्रतिपादित की है।

आगे १४७२ पृष्ठ पर भी आक्षेप में कोई नवीनता और मौलिकता नहीं है।

१४७४ पृष्ठ पर ये आक्षेप करते हैं कि 'श्री' शब्द का समृद्धि अर्थ ही हो सकता है। इसी अर्थ के ग्रहण करने में कौनसा शास्त्रीय नियम है, यह आपने नहीं बताया। जब कि 'श्री' के अर्थ विद्या, सौन्दर्य आदि हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

राष्ट्रशब्देन राष्ट्रे भवं कर्माऽपि वक्तुं पार्यते। यदाह—'न हि भार इत्यस्य सम्भारोऽर्थो भविष्यति' तच्च शब्दशास्त्रतत्त्वानभिज्ञताफलम्, यदा 'भृञ्' धातोर्भरणं पोषणं वाऽर्थो युक्त एव। भवानभिधाधीर्हिन्द्या भारं गृहणाति।

पृ० १४७४, पं० १४—यदुच्यते—"यदि यत्र सभया विनैकाकी पुरुषो राजा भवति, तत्र प्रजा सदा पीडिता भवतीत्यर्थस्तदापि स्वोक्तवाक्यस्य नैरर्थक्यमभ्युपगन्तव्यमिति निग्रहस्थान-मेव।" इति।

तत्सर्वमेतस्याविवेकमेव प्रकटयति। किं नाम निग्रहस्थानं भवतीति न प्रतिभातमे-तस्य। प्रत्युत भवानेव उत्तरमप्रतिबुध्यमानः 'अप्रतिभा' नामके निग्रहस्थाने आयाति। द्वितीयं च निग्रहस्थाने 'निरनुयोज्यानुयोग' नामके आयाति, यतोऽनिग्रहस्थानेऽपि निग्रहस्थानं ब्रूते तस्मात्। महाशय!

राष्ट्र शब्द से राष्ट्र में होनेवाले कार्य का भी ग्रहण होगा। आपका कथन तो शब्दशास्त्र के तत्त्व को न समझने के कारण है। यह जो कहा कि 'भार शब्द का सम्भार अर्थ नहीं होगा' ठीक नहीं, क्योंकि 'भृञ्' धातु का भरण-पोषण अर्थ होता ही है। अभिधाधी आपको हिन्दी का 'भार' (बोझा) अर्थ ही बोझों मारे डाल रहा है, यह भार आपका सम्भार नहीं बन सका, जबकि ऋषि दयानन्द ने मूल धातु से सम्भार अर्थ करके वेदों का गाम्भीर्य प्रकट कर दिया है।

पृ० १४७४, पं० १४—यह कहना कि—"यदि जहाँ सभा के बिना एकाकी राजा होता है, तब प्रजा सदा पीड़ित रहती है, इससे तो दयानन्द ने अपने ही उक्त वाक्य की निरर्थकता सिद्ध कर दी। इससे निग्रह-स्थान में आ गये।"

वाह जी वाह! खूब पकड़ की। पर श्रीमान् जी! बताया तो होता कि यह पकड़ (निग्रह) स्थान कौनसा है? खूब रही, नाम ही नहीं सूझा। इससे तो आपके ही विवेक की पोल खुल गई। वैसे तो ऋषि की बात का उत्तर ही नहीं सूझा तो आप ही 'अप्रतिभा' नामक निग्रहस्थान में आ गये। जिसका लक्षण है—'उत्तरस्याप्रतिपत्तिरप्रतिभा'। दूसरे बिना निग्रहस्थान के निग्रहस्थान कहना भी स्वयं एक 'निरनुयोज्यानुयोग' नामक निग्रहस्थान है, इसमें भी आप आ फँसे। जिसका लक्षण है—'अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः'।

महाशय! अब आप गुरुकुल में जाकर किसी वीतराग दर्शनानन्दी प्रतिभासम्पन्न प्रख्यात नैयायिक से दुराग्रह छोड़कर निश्चल मन से न्यायशास्त्र का अध्ययन करो, तब पौराणिक

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गत्वाधीष्व गुरोः कुले क्वचिदपि प्रख्यातनैयायिकात्,
न्यायं शास्त्रमचञ्चलेन मनसा निर्बन्धभावं त्यजन् ।
पौराणप्रतिबन्धनानि मतितो दूरे प्रकुर्वन् सदा,
ज्ञास्यस्येवमहर्निशं श्रमपरश्चैतद् रहस्यं पुनः ।।

इति श्रीमद्बिहारीलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'राजप्रजाधर्म-विषयः'
॥ सम्पूर्णः ॥

प्रतिबन्धों को अपनी बुद्धि से सदा दूर करते हुए रात-दिन परिश्रम करके महर्षि के इस रहस्य-ग्रन्थ (ऋग्वेदादिभाष्यभूमिका) को समझ लोगे ।

श्रीमान् पण्डित बिहारीलाल जी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मला मिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'राजप्रजाधर्म-विषय'
।। सम्पूर्ण हुआ ।।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ वर्णाश्रमविषयः संक्षेपतः

पृ० १४७७-७८—आ०—यच्चाह—"ब्राह्मणोऽस्य मुखमासीत्, वर्णो वृणोतेः, ब्रह्म हि ब्राह्मणः' इत्यादिना गुणकर्मभ्यां वर्णानुसारमधिकाराः प्रदेयाः, इति, तत्तुच्छम्, 'ब्राह्मणोऽस्य' इति मन्त्रेण विराट्पुरुषस्य परमेश्वरस्य मुखाद् ब्राह्मणस्य बाहुभ्यां राजन्यस्योरुभ्यां वैश्यस्य पद्भ्यां शूद्रस्योत्पत्तिवर्णनेन जन्मनैव वर्णोत्पत्तिनिर्धारणात्। वृक्षाणां वृक्षत्वेन रूपेण साम्येऽपि यथा निम्बत्वाश्वत्थत्वादिरूपेण वैषम्यमपि दृश्यते, तथा मनुष्यत्वेन रूपेण मनुष्याणां साम्येऽपि ब्राह्मणत्वक्षत्रियत्वादिरूपेण वैषम्येऽपि बाधाऽभावात्। न चात्र ज्ञानादिगुणकत्वेन ब्राह्मणस्य प्राधान्याद् ब्राह्मणे विराड्रूपस्य समाजस्य मुखत्वारोपः, बलसम्पन्ने क्षत्रिये विराड्-भुजत्वारोपः। तत एव ब्राह्मणो मुखमिति सामानाधिकरण्यप्रयोग इति वाच्यम्, पद्भ्यां शूद्रो अजायतेति वाक्यशेषविरोधात्। अत्र कण्ठरवेणैव शूद्रस्य पज्जत्वं बोध्यते। तदनुरोधेन मुखजत्वादेव ब्राह्मणो मुखमिति सामानाधिकरण्यम्। मृद्दो जातत्वान्मृद्घट इति सामानाधिकरण्यवदिति मन्तव्यम्। तथा च जन्मना वर्णो गुणकर्मादिभिरुत्कर्ष इत्येव सिद्धान्तः।"

पृ० १४७७-७८—आ०—"ब्राह्मणोऽस्य मुखमासीत्' इत्यादि के द्वारा गुण और कर्मों से वर्णानुसार अधिकार देने चाहिये, यह कथन तुच्छ है; क्योंकि 'ब्राह्मणोऽस्य' इस मन्त्र के द्वारा विराट् पुरुष परमेश्वर के मुख से ब्राह्मण, उसकी बाहुओं से राजन्य, उरुओं से वैश्य और पैरों से शूद्र की उत्पत्ति वर्णन करने से ही वर्णोत्पत्ति का निर्धारण किया गया है। वृक्षों का अन्य वृक्षों के वृक्षत्व से साम्य होने पर भी जैसे निम्बत्व, अश्वत्थत्वादि रूप से वैषम्य भी दिखाई देता है, उसी प्रकार मनुष्यरूप से मनुष्यों का साम्य होने पर भी ब्राह्मणत्व, क्षत्रियत्वादिरूप से वैषम्य होने पर भी कोई बाधा नहीं है। यह नहीं कह सकते कि ज्ञान कर्म आदि से ब्राह्मण की प्रधानता से ब्राह्मण में विराट् रूप समाज के मुख का आरोप है, बलसम्पन्न क्षत्रिय में विराट् रूप भुजाओं का आरोप है। इसलिये 'ब्राह्मण मुख है' यह सामानाधिकरण्य प्रयोग भी उपपन्न होता है। क्योंकि ऐसा मानने पर 'पैरों से शूद्र उत्पन्न हुआ' इस चतुर्थचरण के अर्थ से विरोध पड़ जायेगा। इस विरोध के परिहार के लिये यह मानना पड़ेगा कि ब्राह्मण आदि की भी उत्पत्ति उन-उन अंगों से मानी जाये। सामानाधिकरण्य की संगति तो इस तरह से भी बन सकती है कि मुख से उत्पन्न होने से ही ब्राह्मण को विराट् का मुख माना जाता है, जैसे कि मिट्टी से उत्पन्न होने के कारण 'मृद्घटः' यहाँ पर सामानाधिकरण्य का प्रयोग बनता है। इस तरह से पूरे प्रकरण पर विचार करने के उपरान्त यही निष्कर्ष निकलता है कि वर्ण-व्यवस्था जन्म के आधार पर ही स्थिर है, गुण-कर्म के आधार पर उसमें उत्कर्ष होता है।

©Mimansak Aarsh Anusandhan Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—अत्र हि विचार्यते ब्राह्मणशब्दनिर्मितिः। तत्र द्वेधा हि व्युत्पत्तिरस्य—ब्रह्मणोऽपत्यं ब्राह्मणः, ब्रह्म (तदधीते तद्वेद—अष्टा० ४। २।५८) वेदमधीते, ब्रह्म परमात्मानं वेद वेति ब्राह्मणः। अपत्यार्थे (सन्ताने) तु आपाततो जन्मनैव ब्राह्मणः प्रतीयते। तत्रालोचनीयं यत् सृष्ट्यादौ सर्वेऽपि ब्राह्मणा एवोदपद्यन्त। परं न तस्मिन् काले कश्चिद् ब्राह्मणो ब्राह्मणी वाऽस्तां यस्माद् मिथुनादयं ब्राह्मणो जनिं लेभे, आदावमैथुनसृष्टेर्जायमानत्वात्। एतेनायातं यन्नादौ शरीरजं जन्म एतस्याः सृष्टेः साङ्कल्पिकत्वात्।

तदनन्तरं ये जातास्ते मिथुनजाः। तदनु समनुशीलनीयं यत्तेषां कृते ब्राह्मणत्वाय किं मातृकुक्षिजन्म पर्याप्तमासीदथवा केचन नियमा व्रतानि वाऽसन् ब्राह्मणत्वाय? तदा पश्यामो गीतायाम्—

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ १८। ४२॥

यत्र नेमानि कर्माणि तत्र ब्राह्मणत्वमपि नैवेत्यर्थः।

समा०—यहाँ पर ब्राह्मण शब्द की रचना पर विचार किया जा रहा है। इसकी व्युत्पत्ति दो प्रकार से है। ब्रह्म या ब्राह्मण की सन्तान को, तथा ब्रह्म-वेद या परमेश्वर को पढ़ने या जाननेवाले को ब्राह्मण कहते हैं। अपत्य (सन्तान) अर्थ में आपाततः जन्म से ही ब्राह्मण की प्रतीति होती है। वहाँ यह देखना चाहिये कि सृष्टि के आदि में सभी ब्रह्म से उत्पन्न या उसकी सन्तान होने से ब्राह्मण ही उत्पन्न हुए थे, परन्तु उस समय कोई ब्राह्मण और ब्राह्मणी नहीं थी, जिसके मिथुन से इस ब्राह्मण ने जन्म लिया। आदि में तो अमैथुनी अर्थात् ब्रह्म की साङ्कल्पिक सृष्टि से जायमान होने से ब्राह्मण कहलाये। इस से यह सिद्ध हुआ कि आदि में शरीरज जन्म नहीं हुआ।

उसके अनन्तर जो उत्पन्न हुए, वे मिथुन से उत्पन्न हुए। तब समझना चाहिये कि उस समय भी उन ब्राह्मणों के लिये ब्राह्मणत्व में माता की कोख से उत्पन्न होना पर्याप्त माना जाता था, अथवा ब्राह्मणत्व के लिये कोई नियम और व्रत भी निश्चित किये गये थे, जिससे उस ब्राह्मणत्व आदि की रक्षा हो सके? तब हम देखते हैं कि मनुस्मृति व गीता में कुछ धर्म ब्राह्मणत्व के लिये व अन्यों के लिये बताये गये हैं। जैसे—

शम, दम, तप, पवित्रता, सहनशीलता, सरलता, ज्ञान, विज्ञान और आस्तिकता—ये स्वभावजात ब्राह्मण के कर्म हैं।

अर्थात् जहाँ पर ये नहीं हैं, वहाँ ब्राह्मणत्व भी नहीं हो सकता।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्चोच्यते 'ब्राह्मणोऽस्य' इति मन्त्रेण जन्मनैव सिध्यति वर्णव्यवस्था, तदलीकम्, तत्र जन्मना तत्साधकत्वे भावाऽभावात्। न च 'पद्भ्यां शूद्रो अजायत' इति निर्दिष्टपञ्चमी पूर्वत्र त्रिष्वपि सङ्गमयितव्या, पद्भ्यामित्यत्र व्याख्यातृभिस्तिसृष्वपि विभक्तिषु व्याख्यानात्, पूर्वत्र त्रिष्वपि सङ्गमनगौरवात्, तदपेक्षया तु पद्भ्यामित्यस्यापि पादौ (इव) शूद्र इत्यत्र विभक्तिव्यत्यये लाघवाच्च। अपरं च—

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत् किं बाहू किमूरू पादावुच्येते॥

इति प्राक्तनमन्त्रसन्दर्भितं दृष्ट्वा 'ब्राह्मणोऽस्य मुखमासीत्' इति मन्त्रस्योत्तरस्यापि तदानुकूल्यात् प्रथमैव विभक्तिः साधीयसी स्यात्।

सायणाचार्येण तु ब्राह्मणजातिविशिष्टो मुखात्, क्षत्रियजातिविशिष्टो बाहुभ्यामित्यादिकं पञ्चम्यन्तं सर्वं मत्वा व्याख्यातम्। तत्कल्पनाया आधारस्तु 'पद्भ्याम्' इत्येव, तन्न साधीयः कल्पनम्।

ब्राह्मणग्रन्थेष्वपि कर्मणामेवोद्दिष्टत्वेन ब्राह्मणत्वं प्रत्यपाद्यत। यथा—'गायत्रो वै ब्राह्मणः' (ऐ० १।२), 'आग्नेयो ब्राह्मणः' (तां० १५।४।८)।

यह कहना कि 'ब्राह्मणोऽस्य' इस मन्त्र से जन्म से ही वर्ण-व्यवस्था सिद्ध होती है, मिथ्या है; क्योंकि जन्म से ब्राह्मणादि की साधकता में यहाँ कोई संकेत नहीं है। यह भी कह सकते हैं कि 'पद्भ्याम्' में पञ्चमी विभक्ति है, वह पहले के तीनों में भी मान लेनी चाहिये, क्योंकि कई व्याख्याताओं ने ऐसा माना है, पर यह मान्यता भी बुद्धिविरुद्ध है; क्योंकि पहले तीन के अनुरूप इस एक पञ्चमी की व्याख्या या संगति न लगाई जाये और उन पूर्व तीनों में पञ्चमी मान ली जाये, यह कोई तर्क नहीं है और इस संगति में बहुत बड़ी कल्पना भी करनी पड़ती है। उसकी अपेक्षा तो 'पद्भ्याम्' के स्थान पर 'पादौ इव शूद्रः' मान लेने में सरलता भी है।

दूसरे 'यत् पुरुषं व्यदधुः' इस पहले मन्त्र में सन्दर्भित प्रश्न कि 'मुख क्या है, बाहू क्या हैं, ऊरु क्या है तथा पैर क्या हैं' को देखकर 'ब्राह्मणोऽस्य' इस बाद के मन्त्र के उत्तर को भी प्रश्न की विभक्ति की अनुरूपता में प्रथमा विभक्ति ही अधिक ठीक प्रतीत होती है।

सायणाचार्य ने तो ब्राह्मणजातिविशिष्ट मुख से, क्षत्रियजातिविशिष्ट बाहुओं से इत्यादि व्याख्यान में सर्वत्र पञ्चमी विभक्ति मानी है। उनकी कल्पना का आधार 'पद्भ्याम्' शब्द की पञ्चमी ही है, जो कि ठीक नहीं है।

ब्राह्मणग्रन्थों में भी कर्मों को उद्दिष्ट करके ही ब्राह्मणत्व का प्रतिपादन किया गया है। जैसे ऐतरेय में—गायत्रीनिष्ठ ही ब्राह्मण होता है। ताण्ड्यब्राह्मण में—अग्निगुणवाला तेजस्वी या प्रकाशस्वरूप परमात्मा का पूजक ब्राह्मण होता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नन्वेवं सत्यपि यो हि ब्राह्मणस्यापत्यं सोऽपि तु ब्राह्मण एव भविष्यति, न क्षत्रियादिष्वन्यतमः ? आम्, मन्येऽसौ जन्मना तु ब्राह्मणपुत्रः, परं यदा तस्मिन्—

सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥

इमानि लक्षणानि न स्युस्तदा किमसौ ब्राह्मणाख्यां लप्स्यते ? स किम् 'त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः' इत्यनुशासने शूद्रो न स्यात् ?

वृक्षत्वेन निम्बाश्वत्थादिग्रहणे मनुष्यत्वेन ब्राह्मणक्षत्रियादिग्राह्यत्वे दृष्टान्तवैषम्यम्, यतो हि निम्बःखलु वृक्षजातिर्यथा तथैव अश्वत्थेऽप्यन्यजातिस्तथा मनुष्यजातिरन्या न तथा ब्राह्मणजातिः क्षत्रियादिजातिर्वा । लोके नाम ब्राह्मणचाण्डालादयो जातित्वेन व्यवहृता भवन्ति तदन्यत्, परं या जातेः शास्त्रीया परिभाषा सा तु मनुष्यवद् ब्राह्मणादिषु न घटते । न्यायशास्त्रे यथा—

'आकृतिर्जातिलिङ्गाख्या' (२।२।७०) इति सूत्रे वात्स्यायनभाष्ये "यया जातिर्जातिलिङ्गानि च प्रत्याख्यायन्ते तामाकृतिं विद्यात् ।" तत्र जिज्ञासायां जातिलक्षणम् । यथा—'समान-

---

ऐसा होने पर भी जो ब्राह्मण की सन्तान है, वह भी ब्राह्मण क्यों नहीं होगी ? तथा क्षत्रियों की सन्तान भी क्षत्रियादि क्यों नहीं होगी ? प्रश्न उठना स्वाभाविक है, अतः हम कह सकते हैं कि व्याकरण के अनुसार सन्तान भी ब्राह्मणादि कहलायेगी, परन्तु वह केवल जन्मना ही ब्राह्मण कहलायेगी, पर जब जिसमें—सत्य, दान, अद्रोह, अनृशंसता, त्रपा, घृणा और तप दिखाई देंगे, धर्मशास्त्र के अनुसार वही ब्राह्मण कहलाने योग्य है । यह विचार्य है कि जिसमें उक्त लक्षण नहीं होंगे, क्या वह ब्राह्मण कहलाने के योग्य होगा ? वह वेद का त्यागी, अनाचारी होकर धर्मशास्त्र के अनुशासन के अनुसार शूद्र नहीं होगा ?

इस लेखक ने ऊपर दृष्टान्त दिया था कि जैसे वृक्ष जाति से नीम, पीपल आदि सभी का ग्रहण हो सकता है, उसी प्रकार मनुष्य जाति कहने पर ब्राह्मण-क्षत्रियादि का भी ग्रहण हो जाता है, पर सूक्ष्मता से विचार करिये तो उक्त कथन में दृष्टान्त-विषमता है; क्योंकि वृक्षों की जाति में नीम और पीपल आदि भिन्न-भिन्न जाति के वृक्ष हैं, इस प्रकार मनुष्यजाति में ब्राह्मण, क्षत्रिय आदि पृथक् जाति के नहीं, प्रत्युत वर्ण हैं । लोक-भाषा में तो हम ब्राह्मण आदि को जाति कह लेते हैं, पर जाति की जो शास्त्रीय परिभाषा है, वह मनुष्य में तो घटित होती है, ब्राह्मण, चाण्डाल आदि में घटित नहीं होती । जैसा कि न्यायशास्त्र मे कहा है—

'जाति और जातिलिङ्गों से आकृति होती है' (२ । २ । ७०) । इसी सूत्र के भाष्य में वात्स्यायन कहते हैं—"जिससे जाति और जातिलिङ्गों का कथन किया जावे, उसे आकृति जानना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसवात्मिका जातिः'(२।२।७१) अत्र वात्स्यायनभाष्ये—"या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु, यया बहूनि इतरेतरतो न व्यावर्तन्ते, योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तम्, तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद् भेदं करोति तत् सामान्यविशेषो जातिरिति।"

यथा गोप्रतीतिः सर्वास्वन्यासु गोषु इत्यभेदः, गोदर्शनेनाश्वज्ञानमिति भेदः। एवं मनुष्यो जातिर्मनुष्यत्वेन तु सर्वे ब्राह्मणादयो वर्णा मनुष्याः। यथाच विशिष्टान्नौषधजलादिदानेन गवामश्वानामाप्राणामश्वत्थादीनां वा मिथोऽपि पृथक् पृथग् विविधा गुणा ज्ञायन्ते तथैव एकस्यामपि मनुष्यजातौ ब्राह्मणादीनां तत्तन्निर्दिष्टविशिष्टगुणा भवन्ति। एवं ब्राह्मणादिवर्णानां निर्णयो गुणकर्मभिरेवावधार्यते। यतो हि—'वरणीया वरीतुमर्हा गुणकर्माणि च दृष्ट्वा यथायोग्यं विद्यन्ते ये ते वर्णाः' इति।

अन्यच्च 'ब्राह्मणोऽस्य मुखमासीत्' इत्यादौ तु वाचकलुप्तोपमामवगन्तव्या। ईश्वरस्य विराड्रूपसमाजस्य वा ब्राह्मणो मुखमिव, अथवा रूपकमपि। 'पद्भ्याम्' इति पाठेन न सामानाधिकरण्यप्रयोगेऽप्रतिपत्तिः।

न च भगवतः शरीरं प्रकल्प्य यथा मृदो घटो जायते, मृद् घट इति च सामानाधिकरण्येऽपि

चाहिये।" यहीं पर(२।२।७१) जाति लक्षण की जिज्ञासा में भी कहा जाता है कि "जो समान बुद्धि की भिन्न अधिकरणों में भी जननी हो, जिससे बहुत से भी एक-दूसरे से व्यावर्तित नहीं होते, जो अर्थ अनेक स्थानों पर उत्पन्न ज्ञान की अनुवृत्ति का निमित्त हो, वहाँ सामान्य होता है, तथा जब किन्हीं का भेद और किन्हीं का अभेद करता है, वह सामान्य में विशिष्ट होता है, वही जाति है।"

जैसे गाय की प्रतीति सारी अन्य गौओं में हो, यह अभेद है, जो दर्शनमात्र से ही अश्वज्ञान का भेद भी करा दे। इसी प्रकार सभी ब्राह्मणादि मनुष्यत्वेन एक (अभिन्न) है। हाँ, विशिष्ट अन्न, औषधादि-सेवन से गाय, घोड़े, आम, अश्वत्थ आदि में भी मोटे, पतले, तेज, मन्द आदि गुणों में भेद तो हो सकता है। उसी प्रकार एक ही मनुष्यजाति के ब्राह्मण क्षत्रिय आदि के शिक्षण, अन्नपानादि तत्तद् विशेष गुण हो जाते हैं। इस प्रकार ब्राह्मणादि वर्णों का निर्णय गुण और स्वाभाविक कार्यों के द्वारा ही हो सकता है। क्योंकि जो वरण करने योग्य हैं, वे ही तो गुण और कर्म हैं।

और 'ब्राह्मणोऽस्य मुखमासीत्' आदि मन्त्र में वाचक (इव आदि) लुप्तोपमा या रूपक समझना चाहिये। अथवा ईश्वर के विराड्रूप समाज का यह ब्राह्मण मुखसदृश मुख्य है 'पद्भ्याम्' इस पाठ से सामानाधिकरण्य में कोई अप्रतिपत्ति नहीं होगी

यहाँ पर भगवान् के शरीरधारी होने की कल्पना करके जैसे मिट्टी से घट पैदा होता है, हम 'घट मिट्टी है' ऐसा प्रयोग कर लेते हैं, उसी प्रकार शरीरधारी ईश्वर का ब्राह्मण मुख है, ऐसा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रयोगो भवति, तथैव ब्राह्मणो मुखम् इति प्रयोगोऽपि। शूद्रस्य च यथा पज्जत्वं तथैव मुखादिजत्वमपि ब्राह्मणादीनामिति वाच्यम्, घटं प्रति मृद उपादानत्वं न तथा ईश्वरकल्पित-कलेवरस्य ब्राह्मणादीन् प्रति उपादानत्वयोगः।

स्कन्दस्वामिना वर्णव्यवस्था प्रमाणीक्रियते गुणकर्मभिरेव (नि० २। ११) —"स (देवापिः) च किल च्यवननामाऽपरनाम्नि ऋष्टिषेणो ब्रह्मचर्यमुवास। स गुर्वनुग्रहात् तेनैव शरीरेण वीतहव्यवद् विश्वामित्रवच्च ब्राह्मणो बभूव।" तथा दुर्गेणाऽपि—"स किल तीव्रेण तपसा ब्राह्मणत्वमापेदे विश्वामित्रवत्" इति।

ननु जन्मनाऽपि ब्राह्मणादिवर्णत्वमभ्युपगम्य बीजक्षेत्रयोः प्रधानाप्रधानपक्षौ व्याख्यातौ, 'शर्मवद् ब्राह्मणस्य स्याद् राज्ञो रक्षासमन्वितम्'। एतदपि नामकरणावसरे कथनं जन्मना ब्राह्मणादित्वे सत्येव सम्भवति, इति चेत्, तत्र पितृद्वाराऽभिलष्यमाणवर्णस्येष्टत्वात् स्व-वर्णभावशर्मवर्मादियुक्तनामकरणस्य तत्तद्ब्राह्मणादिबुभूषोर्बालस्यौचित्यात्। गुणाधानाभावे च—

मानेंगे। जैसे पैरों से शूद्र उत्पन्न है, उसी प्रकार ईश्वर के शारीरिक मुखादि से ब्राह्मणादि उत्पन्न हुए। परन्तु यह कथन सर्वथा असंगत है; क्योंकि घट के प्रति जैसे मिट्टी की उपादानता है, उस प्रकार ईश्वर के कल्पित कलेवर के मुखादि अंगों की उपादानता कदापि नहीं, क्योंकि उपादान के गोलाकारता, लम्बता आदि गुण भी ब्राह्मणादि में भिन्नतारूप में आने चाहिये थे, जैसा कि नहीं है।

स्कन्दस्वामी के द्वारा भी वर्णव्यवस्था गुणकर्मों से ही प्रमाणीकृत है। जैसा कि निरुक्त २। ११ में कहा है कि—'देवापि ब्रह्मचर्यपूर्वक रहा और वीतहव्य तथा विश्वामित्र के समान ब्राह्मण हो गया'। इसी प्रकार दुर्गाचार्य लिखते हैं—'वह तीव्र तप से विश्वामित्र के समान ब्राह्मणत्व को प्राप्त हो गया।'

प्रश्न—अरे भाई! जन्म से भी तो ब्राह्मणादि वर्णता स्वीकार करके बीज और क्षेत्र के प्रधान और अप्रधान पक्षों की व्याख्या की गई है। जैसे— 'ब्राह्मण के नाम में शर्मा और राजा अर्थात् क्षत्रिय के नाम में रक्षाबोधक वर्मा लगाये।' यह भी नामकरण के अवसर पर कथन जन्म से ब्राह्मणत्वादि मानने पर ही सम्भव है।

समाधान—उस समय नामकरण के समय पिता माता द्वारा अभिलष्यमाण वर्ण की अभीष्टता को लक्षित कर कहा गया है। माता-पिता के अपने-अपने वर्ण से युक्त शर्मा, वर्मा आदि नाम में लगाकर उस-उस वर्ण में बच्चे के होने की इच्छा का वहाँ औचित्य प्रतीत होता है। तत्तद् वर्णों के गुणों के आधान न होने पर वह केवल जातिमात्र से ही कहलायेगा। जैसाकि महाभाष्यकार ने लिखा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"विद्या तपश्च योनिश्च, एतद् ब्राह्मणलक्षणम्।
विद्यातपोभ्यां यो हीनो जातिब्राह्मण एव सः॥"

इति महाभाष्यकारः।

अथ योऽसौ जातिब्राह्मणपदवाच्यः स एव मनुना 'ब्राह्मणब्रुव' शब्देन 'यथा काष्ठमयो हस्ती' इत्यादिना निस्सत्त्वो निष्फलः सूचितः, वस्तुतस्तु तस्मिन् गुणे स स शब्दस्तस्य तस्य वाच्यवस्तुनो वाचकः सम्भवति। यथा गन्धवती पृथिवी रूपदाहवत् तेजः, नहि गन्धवत्त्वमन्तरा रूपदाहाभ्यां च विना पृथिवीत्वं तेजस्त्वं वा कथमपि वक्तुं शक्यते। अत एव महाभाष्यकारेणाऽप्युक्तम्—

"यस्य गुणभावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलादयः।"

एवं ब्राह्मणादिपदवाच्येषु ब्राह्मणादित्वे गुणे सत्येव ब्राह्मणादयः शब्दा वाचकत्वेन स्थितिसम्बन्धमुपलभन्ते। नहि लोकोऽपि रूपदाहगुणाभ्यां विहीनं कञ्चित् पदार्थं वह्निं वदन्ति जानन्ति वा। एतेन गुणं त्यक्त्वा द्रव्यं किमस्तीत्यपि वक्तुं न शक्यते, यतो गुणेनैव द्रव्यस्य स्वरूपं प्रतीयते, तथापि द्रव्यं किमप्यस्ति यद् गुणविपर्यासेऽपि पूर्ववत् तिष्ठति। अत एवोक्तं गुणलक्षणे—

'विद्या, तप तथा उत्पत्ति ये ब्राह्मण के लक्षण हैं, परन्तु जो विद्या तथा तप से हीन है, वह तो जाति-ब्राह्मण ही है।'

तथा जो जाति से ही ब्राह्मणपदवाच्य है, उसी को मनु ने 'ब्राह्मणब्रुव' शब्द से बोधित किया है अर्थात् वह काष्ठ के हाथी के समान निःसत्त्व और निष्फल माना है। वस्तुतः उस-उस गुण के होने पर वह-वह शब्द उस-उस वाच्य वस्तु का वाचक होता है। जैसे गन्धवती पृथिवी, रूप और दाहवान् अग्नि होती है। गन्ध और रूप तथा दाह के बिना पृथिवी व अग्नि नहीं कहे जा सकते। इसीलिये महाभाष्यकार ने कहा है कि—

"जिस गुण के कारण द्रव्य में शब्द का प्रयोग होता है, उसी के बताने में त्व और तल् प्रत्यय होते हैं।"

इसी प्रकार ब्राह्मणादिपद-वाच्यों में ब्राह्मणत्वादि गुण होने पर ही ब्राह्मण आदि शब्द वाचकरूप में स्थिति सम्बन्ध को प्राप्त करते हैं। लोक में भी कोई रूप-दाह से हीन पदार्थ को आग न कहता है और न जानता है। इससे गुण को छोड़ने पर द्रव्य क्या है, यह कहा भी नहीं जा सकता, क्योंकि गुण के द्वारा ही द्रव्य का स्वरूप प्रतीत होता है। तब भी द्रव्य जो कुछ भी है, वह गुण के विपर्यास में भी पूर्ववत् रहता है, जैसे कि गुण के लक्षण में कहा गया है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"उपैत्यन्यज् जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि।
वाचकः सर्वलिङ्गानां द्रव्याश्रयो गुणः स्मृतः ॥"

यौवनावस्थायां येषां गुणानामाविर्भावस्ते वार्द्धके न भवन्ति, तथाऽपि स एवात्मा यौवनावस्थास्थगुणान् प्रत्यभिजानाति। अत्रापि ज्ञानस्मृत्यादयो गुणाः, आत्मा ज्ञाता द्रव्ये तेषां ज्ञानादिगुणानां विपर्यासे द्रव्यमात्मानं विपर्यस्यत इति द्रव्यगुणयोर्भेदः।

गुणाश्च केचन नित्या अपरे नैमित्तिकाश्च। नैमित्तिकाः स्वैः स्वैर्व्यञ्जकैस्तिरोभावकैर्वा हेतुभिः समये समये देशकालवस्तुभेदेनोत्पद्यन्ते नष्टा भवन्ति वा। नित्या अपि समये समये स्वानुकूलया विरोधिन्या वा सामग्र्या प्राबल्यं नैर्बल्यं वापन्ना व्यज्यन्ते तिरोभवन्ति वा। नैमित्तिका गुणाः शरीरादौ नैत्यिकाहारविहारादिना विपरिणंस्यन्ते। नित्यास्तु कारणत एव कार्य आगच्छन्ति। ये गुणाः कारणे कार्ये चोभयत्र सामान्येन तिष्ठन्ति कारणात् कार्यान्विता भवन्ति, ते नित्याः। यथा काठिन्यं मृत्तिकाया घटादौ चास्ति, एवमत्रापि बहवो गुणाः सन्ति, ये कारणात् कार्यमनुयान्ति।

यथा तारतम्यमापन्नाः सदैव तिष्ठन्ति त एव ब्राह्मणादिवर्णत्वसूचका यतोऽपि वर्णाः सन्ति। अत एव भगवति वेदेऽपि—'ब्राह्मणोऽस्य मुखम्' इत्यादि।

"द्रव्यान्तरों में देखा हुआ भी किसी को प्राप्त करता व किसी को छोड़ता है, सर्वलिङ्गों का वाचक द्रव्य का आश्रयवाला गुण कहा है।"

यौवन की अवस्था में जिन गुणों का आविर्भाव होता है, वृद्धावस्था में वे नहीं होते, तथापि यह आत्मा वही है, इस प्रकार यौवनावस्था के गुणों का प्रत्यभिज्ञान करता है। इसमें भी ज्ञान, स्मृति आदि गुण होते हैं और ज्ञाता आत्मा द्रव्य में उन ज्ञानादि गुणों के विपर्यास में द्रव्य आत्मा का विपर्यास होता है, यह द्रव्य और गुण का भेद है।

कुछ गुण नित्य होते हैं और कुछ नैमित्तिक। नैमित्तिक गुण अपने व्यञ्जकों के द्वारा और तिरोभावक हेतुओं के द्वारा समय-समय पर देश, काल, वस्तु भेद से उत्पन्न व नष्ट होते हैं। नित्य गुण भी अपने अनुकूल व विरोधी सामग्री होने पर प्रबल या निर्बल होकर व्यक्त होते या लुप्त होते हैं। नैमित्तिक गुण शरीर आदि में नैत्यिक आहार-विहार के द्वारा विपरिणाम को प्राप्त होते हैं। नित्य गुण कारण से कार्यत्व में आते हैं। जो गुण कारण और कार्य दोनों में सामान्यरूप से रहते हैं, कारण से कार्य में अन्वित होते हैं, वे नित्य हैं। जैसे मिट्टी की कठोरता घटादि में है, इसप्रकार यहाँ (वर्णाश्रमप्रकरण) भी बहुतसे गुण हैं, जो कारण से कार्य में आते हैं।

जो तारतम्य को प्राप्त हुए सदैव रहते हैं, वे ही ब्राह्मणादिवर्णत्वसूचक हैं; क्योंकि वे वर्ण अर्थात् वरणीय हैं। इसीलिये भगवद्वाणी वेद में 'ब्राह्मणोऽस्य मुखमासीद्' आदि कहा गया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्त्वप्रधानो ब्राह्मणः, रजःप्रधानः क्षत्रियः, रजस्तमसोः साम्ये वैश्यः, तमसःप्रधानः शूद्र इति। अर्थादेकैकस्मिन् वर्णचतुष्टयधर्मे विद्यमाने यत्र यत्र यस्य यस्य वर्णधर्मस्य प्राधान्यं सस ब्राह्मणादिपदवाच्यो भवति। एवं सति गर्भाधानावसरे मातापित्रोः शरीरे यस्य गुणोत्कर्षः स्वाभाविकप्रवृत्त्या नौमित्तिकव्यवहारेण वा भवति तयोरपत्यादयस्तादृश एवोत्पद्यन्ते। तथा चोक्तं सुश्रुतायुर्वेदस्य शारीरस्थाने—

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः॥

एतेन सिद्धं यत् कारणत एव कार्ये गुणाः प्रादुर्भवन्ति।

द्विविधश्च वर्णविचारो लौकिकः शास्त्रीयश्च। तत्र लौकिकविचारे गुणकर्मणामभावेऽपि ब्राह्मणादिशब्दाः प्रयुज्यन्त इति। शास्त्रसम्मत्या च यत्र ब्राह्मणादीनां गुणकर्माणि भवेयुस्तत्र तत्रैव ब्राह्मणादिपदवाच्यता भवेत्।

एवं न कथमपि जन्मना वर्णो भवति, गुणकर्मादिभिरेव भवतीति सिद्धान्तः सूपपन्नः।

पृ० १४७८, पं० १३—आक्षेपः— यदुक्तम्—"न च वर्णो वृणोतेरिति विरोधः, तत्र वर्ण-

---

सत्त्वप्रधान ब्राह्मण और रजःप्रधान क्षत्रिय, रज और तम के साम्य में वैश्य और तमःप्रधान शूद्र होता है। अर्थात् एक-एक में चारों वर्णों के पृथक्-पृथक् धर्म वर्त्तमान होने पर जहाँ-जहाँ जिस-जिस वर्णधर्म का प्राधान्य होगा, वह-वह ब्राह्मणादिपदवाच्य होता है। इस प्रकार गर्भाधान के अवसर पर माता-पिता के शरीर में जिस गुण का उत्कर्ष स्वाभाविक प्रवृत्ति से या नैमित्तिक व्यवहार से होता है, उनकी सन्तान वैसी ही उत्पन्न होती है। इसलिये सुश्रुतादि में कहा है—

जैसे भी आहार, आचार और चेष्टाओं के द्वारा स्त्री और पुरुष युक्त होते हैं, पुत्र भी उन्हीं गुणों से युक्त होता है। इससे सिद्ध हुआ कि कारण से ही कार्य में गुण आते हैं।

यह वर्ण-विचार अब दो प्रकार का कहा जायेगा। एक लौकिक और दूसरा शास्त्रीय। लौकिक विचार में गुण-कर्मों के अभाव में भी ब्राह्मणादि शब्दों का प्रयोग किया जाता है और शास्त्रसम्मति से जहाँ ब्राह्मणादि के गुण-कर्म होते हैं, वहाँ ही ब्राह्मणादि पद की वाच्यता होगी।

इस तरह हम देखते हैं कि जन्म से ब्राह्मणादि वर्ण मानने में शास्त्र साथ नहीं देते, हाँ, गुणकर्मों के द्वारा मानना ही सत्य सिद्धान्त अवश्य उपपन्न होता है।

पृ० १४७८, पं० १३—आ०—यह कहना कि—"वर्णो वृणोतेः' इस निरुक्तवचन से इस निष्कर्ष का कोई विरोध नहीं है; क्योंकि वहाँ वर्ण शब्द शुक्ल आदि रूपों के अर्थों में प्रयुक्त है, रूप को ही आश्रय अर्थात् द्रव्य की आवश्यकता पड़ती है। अतः यहाँ रूप गुण ही वर्ण पद

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शब्दस्य शुक्लरूपादिपरत्वेन रूपमाश्रयं वृणोतीति रूपमेव वर्णपदव्यपदेश्यम्। तत्र कल्याणवर्णं सुवर्णं तस्येव रूपं यस्य स कल्याणवर्णरूपोऽग्निरन्यो वा कश्चिदिति दुर्गाचार्यः। व्रियते वा कर्मभिरिति वर्णशब्दो ब्राह्मणादावपि प्रवर्तते, ब्राह्मणराजन्यादिकमुद्दिश्यैव ज्योतिष्टोमराजसूयादिकर्मप्रवृत्तेः। त्वद्रीत्या तु गुणाः कर्माणि वा वरीतुं योग्यानि तान्येव वर्णपदव्यपदेश्यानि स्युरिति, तदपि त्वद्विरुद्धमेव, ककारादिवर्णेष्वपि वर्णशब्दः प्रयुज्यते, तथैव ब्राह्मणादिष्वपि गुणकर्मादिवरणीयत्वेनापि वर्णशब्दः प्रयोक्तुं शक्यते। जन्मसिद्धमेव ब्राह्मणादिकमुद्दिश्य वैदिकानि कर्माणि विहितानि, अनुपनीतानां वेदाध्ययनानुष्ठानाद्यनुपपत्तेः। उपनयनं च ब्राह्मणादीनामेव विधीयते, न मनुष्यमात्रस्य।" इति।

समा०—वर्णशब्दो हि वरणार्थ 'वृञ्' धातोः 'कृवृजृसिद्रुपद्यर्तिस्वपिभ्यो नित्' (उणा० ३। १०) इति 'न' प्रत्यये व्रियतेऽनेनेति 'वर्णः' इत्येवं सिध्यति। वर्णक्रियाविस्तारगुण-वचनार्थक'वर्ण'धातोः, यद्वा वर्णाः सन्त्यस्येति 'अर्शआदिभ्योऽच्' (अष्टा० ५। २। १२७) इत्यच्यपि, अथवा प्रेरणार्थकवर्ण'धातोरपि निष्पद्यते। एवं "वर्णः स्वर्णे व्रते स्तुतौ। रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे। भेदे भीतक्रमे चित्रे यशस्तालविशेषयोः। अङ्गरागे च वर्णं तु कुङ्कुमे" इति हैमः। एष्वर्थेषु प्रयुज्यते यथाप्रकरणम्। तस्मान्न रूपमेव वर्णपदव्यपदेश्यम्।

से घोषित होगा। निरुक्त के इस वचन की व्याख्या करते हुए दुर्गाचार्य ने बताया है कि कल्याणवर्ण सुवर्ण के समान रूपवाला अग्नि अथवा अन्य कोई यहाँ निर्दिष्ट है। विभिन्न कर्मों के द्वारा जिनका वरण होता है, वह वर्ण है। इस व्युत्पत्ति के आधार पर ब्राह्मण आदि में भी प्रवृत्ति हो सकती है, क्योंकि ज्योतिष्टोम, राजसूय प्रभृति यज्ञ-कर्मों की प्रवृत्ति किसी एक ब्राह्मण, क्षत्रिय आदि वर्ण को लेकर ही हुई है। आपकी व्याख्या के अनुसार तो गुण अथवा कर्म ही वरणीय हैं, तब तो इन्हीं के लिये वर्ण पद का प्रयोग माना जायेगा और यह बात आपके मत के विपरीत पड़ेगी। ककार प्रभृति वर्णों के लिये भी वर्ण शब्द का प्रयोग किया ही जा सकता है। जन्म से सिद्ध ब्राह्मण आदि वर्णों को लेकर ही वैदिक कर्मों का विधान किया गया है। अनुपवीत व्यक्ति का न तो वेदाध्ययन में ही अधिकार है और न उसका किसी अनुष्ठान में ही। उपनयन ब्राह्मण आदि तीन वर्णों का ही होता है, मनुष्यमात्र को उद्दिष्ट कर इसका विधान नहीं है।"

समा०—वरणार्थक 'वृञ्' धातु से वर्ण शब्द निष्पन्न होता है, जो किसी से वरण किया जाये। तथा वर्ण-क्रिया-विस्तार-गुणवचनार्थक व प्रेरणार्थक 'वर्ण' धातु से अथवा वर्ण जिसके हैं इस अर्थ में 'अर्शआदिभ्योऽच्' से अच् प्रत्यय होने पर वर्ण शब्द सिद्ध होता है। इस प्रकार वर्ण शब्द 'स्वर्ण, व्रत, स्तुति, रूप, द्विजादि, शुक्लादि, कालीन, अक्षर, गुण' आदि उल्लिखित अर्थों में यथाप्रकरण प्रयुक्त होता है। इसलिये वर्ण पदार्थ से रूपमात्र व्यपदिष्ट नहीं है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदाह—यज्ञादिषु ब्राह्मणजातीया एव व्रियन्ते न तु गुणकर्मविशिष्टा इति तु परम्पराप्राप्तरूढ्यनुगतत्वम्। प्राचीनकाले तत्तद्वर्णभाजां तत्तद्वर्णगुणकर्माचरणसम्भावनायां सत्यां सन्तानेऽपि वर्णसरणिरेवानुसृता लोकैः। परमद्याऽपि ये कदाचारकुगुणमद्यमांसाहार-व्यसनदूषिता ये ब्राह्मणक्षत्रियादिजाता अपि ते बुद्धिमद्भिर्वर्ज्यन्ते निराद्रियन्ते च तत्स्थाने पूर्वानुसृतपरिपाटीं परित्यज्य नवीना ब्रह्मचारिणो गुरुकुलेभ्यश्चाचारवन्तो वैदिकविद्वांसः सश्रद्धं व्रियन्ते यज्ञादिपुण्यकृत्येषु।

ये ब्रह्म जन्म मनुस्मृत्यनुसारं धारयन्ते, यथा—

आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साऽजरामरा॥ २।१४८॥

अत्र भवन्तं पृच्छामि यो ह्यभिवादनप्रत्युत्तरमपि न जानीयात् स मन्वनुसारं ब्राह्मणोत्पन्नोऽपि शूद्रो भविष्यति न वा? यथा—

यह कथन कि यज्ञादि में ब्राह्मणजातीयों का ही वरण किया जाता है, न कि गुणकर्मविशिष्टों का, यह तो परम्पराप्राप्त रूढि के अनुसार है। प्राचीन काल में उन-उन वर्ण के भाजन बने लोगों में उन-उन वर्णों के निर्दिष्ट गुणकर्मों के आचरण की सम्भावना मानकर ही उनके सन्तान में भी वर्ण की पद्धति का लोगों ने अनुसरण किया। परन्तु आज भी जो बुरा आचरण और बुरे गुण मद्य मांस आदि आहार तथा व्यसनों से दूषित ब्राह्मणादि कुलों में पैदा हुए भी हैं, बुद्धिमान् लोग ऐसों को यज्ञादि में आमन्त्रित नहीं करते। वे निरादृत होते हैं और उनके स्थान पर पूर्वानुसृत परिपाटी को छोड़कर गुरुकुलों से आचारसम्पन्न नवीन ब्रह्मचारी विद्वानों का सश्रद्ध वरण किया जाता है। वैसे ऋषि दयानन्द ने संस्कारविधि में इसी सुन्दर आशय में कि ब्राह्मणकुलोत्पन्न बच्चों को भी तद्गुणादिविशिष्ट होना चाहिये, लिखा है कि "जाति अर्थात् जन्म से हो तो और विशिष्ट है।"

जो ब्रह्म जन्म मनुस्मृति के अनुसार धारण करते हैं, यथा—"वेदपारग आचार्य विधि-अनुसार गायत्री मन्त्र की दीक्षापूर्वक अर्थात् उपनयन संस्कार से इस विद्यार्थी या व्यक्ति के जिस जन्म अर्थात् ब्रह्म जन्म को प्रदान करता है, वही जन्म तो सत्य, अजर और अमर है।"

यहाँ पर हम आप से पूछते हैं कि जो अभिवादन का प्रत्युत्तर भी ठीक रूप में देना न जाने, वह मनु के अनुसार शुद्ध होगा या नहीं? जैसा कि मनु ने कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ २ । १२६ ॥

महाशय ! सोऽपि शूद्र एव—

शूद्रेण हि समस्तावद् यावद् वेदे न जायते ॥ २ । १७२ ॥

इदमपि कथनमकिञ्चित्करं यद् 'उपनयनं ब्राह्मणानामेव विधीयते न तु मनुष्यमात्रस्य ।' किं नेदमपि गुणकर्मवर्णव्यवस्थामेव पोषयति ? यतो जन्मना प्रत्येकस्यैव शूद्रत्वे न शूद्रस्योपनयनविधिः । मनुराह—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ २ । ३७ ॥

अर्थाद् यः स्वीयं बालकं ब्राह्मणं चिकीर्षति, क्षत्रियं वैश्यं वा तस्योपनयनकालो विनिर्दिष्टः । सर्वोऽपि नाम ब्राह्मणादिष्वन्यतम एव बुभूषुर्दृश्यते श्रूयते वा, न पुनः शूद्रः ।

न च गुणकर्माण्येव वर्णपदवाच्यानि । गुणकर्माणि च दृष्ट्वा यथायोग्यं ये व्रियन्ते तेऽपि वर्णाः' इदं हि वक्तव्यमेवास्माभिः ।

'जो विप्र अभिवादन का प्रत्युत्तर शास्त्रानुसार देना नहीं जानता, बुद्धिमान् के द्वारा ऐसे को अभिवादन नहीं करना चाहिये, क्योंकि वह शूद्र के समान है ।'

महाशय ! वह भी शूद्र है । जबतक उसका वैदिक जन्म नहीं होता, तबतक वह शूद्र है ।

इस कथन में भी विशेष सार नहीं कि ब्राह्मणों का ही उपनयन होता है, मनुष्यमात्र का नहीं । यह कहना तभी क्षम्य था कि ब्राह्मण, क्षत्रिय, वैश्य बनूँ, इस उद्देश्य से इन्हीं का होता है, ऐसा कहते । क्या यह बात गुण-कर्माधार पर वर्ण-व्यवस्था का पोषण नहीं करती ? यदि जन्म से प्रत्येक शूद्र होता, तब तो किसी का भी उपनयन नहीं हो सकता, क्योंकि शूद्र का उपनयन होता ही नहीं । इसलिये मनु के अभिप्राय को समझना चाहिये । वे कहते हैं—

ब्रह्मवर्चस की कामना करनेवाले ब्राह्मणबुभूषु का पञ्चम वर्ष में, बलार्थी क्षत्रिय का षष्ठ वर्ष में तथा अर्थ की कामना करनेवाले वैश्य का अष्टम वर्ष में उपनयन करना चाहिये । अथवा जो अपने बालक को ब्राह्मण बनाने की इच्छा या क्षत्रियादि बनाने की इच्छा करे, उसका तत्समय पर उपनयन करें । सभी पुनः द्विजाति ही होना चाहते हैं, शूद्र कोई नहीं होना चाहता ।

यह कहना भी युक्तियुक्त नहीं कि गुणकर्म ही वर्णपदवाच्य हैं; क्योंकि 'गुण कर्मों को देखकर यथायोग्य जो वरण किये जाते हैं, वे भी वर्ण हैं' ऐसा हमारा कथन है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अपरं च 'पञ्च जना मम होत्रं जुषध्वम्' इत्यस्य उव्वटभाष्यं त्वेवम्—"चत्वारो वर्णा निषादपञ्चमाः पञ्च जनाः तेषां यज्ञाधिकारोऽस्ति।" अत्र निरुक्तं (३।६) प्रमाणमनुगतम्। सामवेदोत्तरार्चिकेऽपि—

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयिः॥ ७।३।१९१॥

सामश्रमिमहाभागः 'ऐतरेयालोचने' तत्थ्यं प्रकाशयन्ति यदस्य ब्राह्मणस्य रचयिता महिदासो नाम दासीपुत्रः शूद्रः। भवदनुसारं वेदाधिकारविरहितत्वे सति कथं ब्राह्मणमरचयत्? सोऽग्रे समुल्लिखति—"यागादिविधायकब्राह्मणग्रन्थस्य प्रोक्तृत्वं तु किं तुच्छम्? मन्त्रद्रष्टृत्वमपि ज्ञायते दासीपुत्रस्यापि, तद्यथा श्रुतं तावदत्रैव कवषैलूषोपाख्यानम्।"

महर्षिदयानन्दस्तु शूद्रं सवर्णमजूघुषत्, तस्य च वेदपठने साक्षाद् वेदवचनमपि प्रादर्शयत्—'यथेमां वाचम्' इति। महर्षेरौदार्यं शूद्रान् प्रति जगद्विख्यात-रोमाँ-रोला मुक्तकण्ठं प्रशंसति। तवाराध्यमहीधरोऽपि 'पाञ्चजन्यः पुरोहितः' (यजु:० २६। ९)। इति भाष्ये 'विप्रादयश्चत्वारो वर्णा निषादश्चेति पञ्चजनास्तेषां यज्ञाधिकारात्' इत्येव व्याख्यांचक्रे। सायणोऽपि तथाऽह—'मित्राय पञ्च येमिरे' (ऋ० ३।४।६) इत्यत्र—'पञ्चजना निषादपञ्चमा-

---

दूसरे 'पञ्च जन मेरा यज्ञ करें' इसका उव्वट भाष्य तो इस प्रकार है—"चार वर्ण और पाँचवाँ निषाद, उन पञ्चजन का यज्ञाधिकार है।" यहाँ नि० (३।६) का प्रमाण भी अनुकूल है। पञ्चजन—गन्धर्व, पितर, देव, असुर और राक्षस। सा० (उ० ७।३।१९।१) में भी इसी के अनुरूप हैं।

सामश्रमी महाभाग 'ऐतरेयालोचन' में इस तथ्य को इस रूप में प्रकाशित कर रहे हैं कि इस ब्राह्मण के रचयिता महिदास नामक दासीपुत्र शूद्र थे। आपके अनुसार वेदाधिकाररहित होने पर आपके मत में वेदभूत ब्राह्मण की उन्होंने रचना क्यों की? आगे वे लिखते हैं कि "यागादिविधायक ब्राह्मणग्रन्थ का प्रोक्त करना क्या छोटी बात है? दासीपुत्र का मन्त्रद्रष्टृत्व भी ज्ञात होता है, जैसा कि यहीं पर कवषैलूष उपाख्यान में सुना गया है।"

महर्षि दयानन्द ने तो शूद्र की सवर्ण में घोषणा की है और वेद-पठन के लिये वेदमन्त्र 'यथेमां वाचम्' का प्रमाण प्रस्तुत किया है। महर्षि दयानन्द की शूद्रों के प्रति नवक्रान्ति लानेवाली उदारता की जगद्-विख्यात रोमाँ रोला ने मुक्तकण्ठ से प्रशंसा की है—"सत्य है, एकमात्र स्वामी दयानन्द ने आर्यमात्र को वेदाध्ययनाधिकार की सर्वप्रथम घोषणा की थी"। तुम्हारे आराध्य महीधर ने भी 'पाञ्चजन्यः पुरोहितः' (यजु:० २६।९) के भाष्य में चार वर्ण पाँचवें निषाद— ये पञ्चजन

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्चत्वारो वर्णा येमिरे हवींष्युद्यच्छन्ति।' एवममितप्रमाणानि जन्मशूद्राणामपि वेदाध्ययने यज्ञाधिकारे च वर्त्तन्ते।

पृ० १४८०—पू० प०—यदुक्तम्—"मित्रः सर्वेभ्यः सुखदाता, वरुण उत्तमगुणधारणेन श्रेष्ठः' इत्यत्रापि मूलं वक्तव्यम्। 'वीर्यं वा एतदपां रसः' इत्यस्य 'प्राणानां यो रस आनन्दस्तं प्रयच्छतः क्षत्रियस्य वीर्यं वर्धते' इति तून्मत्तप्रलपितमेव, वाक्यस्य तादृगर्थबोधकत्वासम्भवात्। यत्तु हिन्दीव्याख्याने निगदितम्—'हे जीव! त्वं विजानीह्यार्यान् ये च दस्यवः। तथा उत शूद्र आर्ये इत्यादिमन्त्रैर्ब्राह्मणक्षत्रियवैश्या आर्या उच्यन्ते, अनार्याः शूद्रा उच्यन्ते' इत्यादि, तदपि पाश्चात्यप्रभावमूलकमेव, मनुष्येष्वार्यदस्युत्वविद्वत्त्वमूर्खत्वादिभेदेषु सत्स्वपि ब्राह्मणादिभेदे बाधाऽभावात्। साधर्म्यवैधर्म्यवैविध्येऽपि बाधाऽभावात्। मित्रशब्दस्तु प्रकृते देवविशेषस्यैव वाचकः, तथैव वरुणशब्दोऽपि। राजसूययज्ञस्य प्रसङ्गे 'अथ बाहू उद्गृह्णाति' इति यजमानो बाहू ऊर्ध्वं कुर्यात्।" इत्यादि।

उ० प०—उक्तमल्पश्रुतफलम्, ऋष्युक्तार्थे प्रमाणसत्त्वात्। यथाह—'मित्रो वै शिवो देवानाम्' (तै० सं० ५।१।६।१)। शिवशब्दार्थः कोशे, यथा—'शिवं तु मोक्षे क्षेमे सुखे

माने हैं, क्योंकि इन्हीं का यज्ञाधिकार है। सायण ने भी 'मित्राय पञ्च येमिरे' (ऋ० ३।४।६) उक्त पाँच को हवि देने का अधिकार लिखा है। इस प्रकार जन्मतः शूद्र पर ब्राह्मणादि बुभूषुओं के वेदाध्ययन में अगणित प्रमाण हैं।

पृ० १४८०—पू० प०—"मित्र सब का सुखदाता और वरुण उत्तम गुण धारण करने से श्रेष्ठ' इसमें प्रमाण देना पड़ेगा। 'वीर्य वा एतदपां रसः' इसका अर्थ यह करना कि 'प्राणों के रस आनन्द को देनेवाले क्षत्रिय का बल बढ़ता है' केवल पागल का प्रलाप ही माना जा सकता है; क्योंकि इस वाक्य से यह अर्थ निकलना असम्भव है। हिन्दी-व्याख्या में आर्य और दस्यु की बात उठाकर ब्राह्मण, क्षत्रिय और वैश्य को आर्य तथा शूद्र को अनार्य बताया है। किन्तु ये सारी बातें भी पाश्चात्यप्रमाणमूलक ही हैं। मनुष्यों में आर्य, दस्यु, विद्वान्, मूर्ख आदि भेद भले ही रहे, इसके रहते हुए भी ब्राह्मणप्रभृति भेदों की स्थिति मानने में कोई बाधा नहीं है। इनमें नाना प्रकार के साधर्म्य और वैधर्म्य की स्थिति मानने में भी कोई बाधा नहीं है। प्रकृत मन्त्र में मित्र और वरुण शब्द देवविशेष के ही वाचक हैं। राजसूय यज्ञ के प्रसंग में यह ब्राह्मणवचन मिलता है—'अथ बाहू उद्गृह्णाति'। इसका अर्थ यह है कि यजमान अपनी दोनों भुजाओं को ऊपर फैलावे। इसी अर्थ को सम्पन्न करने में 'मित्रोऽसि वरुणोऽसि' का उच्चारण करे।" इत्यादि।

उ०प०—ऊपर कहा गया अल्पज्ञान से फलित है; क्योंकि ऋषि के कथन में प्रमाण है। यथा—'मित्रो वै शिवो देवानाम्' (तैत्ति० सं० ५।१।६।१)। कोश में भी शिव शब्द के अर्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जले। शिवो योगान्तरे वेदे गुग्गुलौ बालके हरे। पुण्डरीकद्रुमे कीले।' एवं शिवं सुखमस्येति 'अर्शआदिभ्योऽच्' (अष्टा० ५। २। १२७) इत्यचि शिवः सुखदातेत्यर्थः प्रमाणितः। व्रियते वृणोति वा 'वृञ्' धातोः 'कृवृदारिभ्य उनन्' (उणा० ३। ५३) इत्युननि वरुणशब्दः सिध्यति। यौगिकार्थे श्रेष्ठ एव स चोत्तमगुणकर्मधारणेनैव भवति। रूढावन्येऽप्यर्थाः। अत्रैतस्य उन्मत्तप्रलपितमेवैतद् दृष्ट्वा निर्मलोक्तिः सुघटते—

दुःशीलस्य कदर्यस्य, अवल्गं मुखमस्ति चेत्।
अपशब्दा विनिर्यान्ति, तत्र नैवाऽस्ति विस्मयः॥

अत इह नीरक्षीरविवेकिनो हंसा विद्वांसः प्रणिधास्यन्ति यदयं कूपमण्डूकवृत्तिर्मित्रवरुणादीनां रूढार्थानिव मनुते, परं महर्षिस्तु बहुप्रज्ञः शतपथादिसम्मतानर्थान् यथाप्रकरणं विनिवेशयते।

तथेहाऽपि 'प्राणा वा आपः' (तै० ३। २। ५। २), 'प्राणो ह्यापः' (जै० उ० ३। १०। ९) इत्याद्यनुसृत्य अपां प्राणानां रस आनन्द इत्याह। तमानन्दं यः प्रजायै प्रयच्छति, तदा जीवनानन्दं भुञ्जाना प्रजा तस्य राज्ञः प्रसन्ना सती वीर्यं बलं शक्तिं पराक्रमं वा वर्धयते एवेति न कश्चित् सन्देहः। वैदिकप्रमाणप्रस्तावेऽपि आर्यदस्युभेदयोः सतोः पाश्चात्यप्रभावारोपस्तून्मत्ततासाधनाऽस्य।

देखिये—शिव शब्द मोक्ष, क्षेम, सुख, जल, योगान्तर, वेद, गूगल, बालक, हर, पुण्डरीक, द्रुम तथा कील अर्थ में प्रयुक्त होता है। इस प्रकार शिव सुख जिसका है, अर्शाद्यच् करके शिव अर्थात् सुखदाता अर्थ होता है, जो इस प्रकार प्रमाणित है। जो वरण करे या वरण किया जाये, वह श्रेष्ठ ही होगा और जो उत्तम गुणों के धारण करने से ही श्रेष्ठ बन सकता है। अतः इस लेखक का उन्मत्त प्रलाप देखकर निर्मलोक्ति सही घटित हो रही है—

आप दुष्टशील और कदर्य का मुँह यदि बेलगाम हो जाये, तो उसके मुँह से प्रलापसदृश अपशब्द निकल पड़ते हैं, इसमें हमें कोई आश्चर्य नहीं।

अतः यहाँ नीरक्षीरविवेकी हँस विद्वान् लोग समझ ही लेंगे कि यह कूपमण्डूकवृत्ति लेखक वरुणादि शब्दों को केवल रूढ मान रहा है, परन्तु बहुप्रज्ञ महर्षि ने शतपथादिसम्मत अर्थों का यथाप्रकरण विनिवेशन किया है।

'जल प्राण है' इन प्रमाणों से अप् अर्थात् प्राणों का रस तो आनन्द ही होगा। उस आनन्द को प्रजा के लिये देता है, तब जीवनानन्द को भोगती हुई प्रजा उस राजा (क्षत्रिय) के वीर्य बल का वर्धन करती है, इसमें कोई सन्देह नहीं। वैदिक प्रमाण प्रस्तुत करने पर भी पाश्चात्य प्रभाव का आरोप लगाना इस लेखक की उन्मत्तता ही है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदाह—'मूर्खत्वादिभेदेषु सत्स्वपि न ब्राह्मणादिभेदे बाधः' इति वचनेन रूढित्वमेव ध्वन्यते। मूर्खत्वादिविशिष्टेऽपि ब्राह्मणे विद्वत्त्वसदाचारादिगुणमण्डितेष्वपि जन्मना निम्न-वर्णगतेषु शूद्रेषु जात्या ब्राह्मणाः शूद्रा वेति ते जडताप्रभावाभिभवस्तु। श्रूयताम्, महर्षिव्यास आह—

यस्तु शूद्रो दमे सत्ये धर्मे च सततं स्थितः।
तं ब्राह्मणमहं मन्ये व्रतेन हि भवेद् द्विजः॥
(महा० भा० व० ३। २१६)

सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः॥
(महा० भा० शा० प० १८९)

इत्यादि प्रमाणानभिज्ञानमेवैवास्य सूचयति। राजसूययज्ञप्रसङ्गस्तु तात्कालिक एव रूढः पक्षः। न चायमेवान्यप्रक्रिया अवमत्य पक्षो मन्तव्यः श्रेयानिति। ब्राह्मणन्त्वेकं पक्षं व्याख्याय एकैकमन्त्रगतशब्दानेकार्थान् विनिर्दिशद् अन्यानपि कर्त्तव्यार्थान् ध्वनयतीति दिङ्मात्रमिह।

यह कहना कि 'मूर्खत्वादि भेद होने पर भी ब्राह्मणादि भेद मानने में कोई बाधा नहीं है' इस कथन से केवल रूढ़ेवादिता ही ध्वनित होती है। मूर्खत्वादिविशिष्ट ब्राह्मण में और विद्वत्ता, सदाचारादिगुणविशिष्ट पर जन्मना शूद्रों में जाति से वे ब्राह्मण और शूद्र हैं और सदा रहेंगे, ऐसा मानना तो जड़ता का प्रभाव ही कहा जा सकता है। पर सुनिये, महर्षि व्यास क्या कहते हैं—

जो जात्या शूद्र भी दमन, सत्याचरण और धर्म में स्थित है, मैं उस को ब्राह्मण मानता हूँ, क्योंकि द्विज तो व्रत से ही होते हैं। (महा० भा० व० ३। २१६)

क्योंकि सत्य, दान, अद्रोह, दया, लज्जा, घृणा और तप जहाँ दिखाई पड़ते हैं, उसे मैं ब्राह्मण मानता हूँ। (महा० भा० शा० प० १८९)

इत्यादि प्रमाण इनके कभी नयनगोचर ही नहीं हुए। राजसूय यज्ञप्रसङ्ग तो तात्कालिक रूढ पक्ष है। अन्य समस्त प्रक्रियाओं की उपेक्षा करके केवल ऐसा ही मान बैठना श्रेयस्कर नहीं है। ब्राह्मणग्रन्थ तो एक पक्ष में व्याख्या करके अन्य सब कर्त्तव्य अनेकार्थों का विनिर्देश सर्वत्र कर देते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १४८१, पं० १०—यदाह—"तं ब्रह्मचारिणं द्रष्टुं देवा इन्द्रादयोऽभिसंयन्ति।" एतत्तु दृढमौढ्यजल्पनम्, इन्द्रादीनां त्वन्मतानां देवानामनागमनात्। अतो देवा विद्वांस एवेह मन्तव्याः।

पृ० १४८१, अनु० २—यदप्युच्यते—"गर्भमिव करोति' इत्यादिकं निर्मूलम्, त्रिदिनपर्यन्तं विद्यामये शरीरे गर्भवद्धारणेऽपि विद्वत्प्रशंसार्हविद्वत्त्वासम्भवात्, न तत् सङ्गतम्।" इति समग्रमचिन्तनफलम्, यतो 'गर्भीभूतम्' इति पारिजातकृता लिखितम्, 'गर्भमिव' इति ऋषिणा लिखितम्, तयोर्द्वयोरपि समानार्थत्वात्। न चर्षिणोक्तं त्रिदिवसेषु सर्वविद्यायुक्तो भवति। अयं भूमिकावाक्यं विपरिवर्त्य प्रस्तौति। भूमिकाशब्दावली त्वेषा—"अर्थात् सर्वां शिक्षां करोति, पठनस्य च रीतिमुपदिशति।" इति त्रिदिनेषु तु त्वयाऽत्र गुरुकुले गुरुषु कथं वर्तितव्यम्,पठने च दत्तावधानः कक्षासु च समयेन विनयेन सहाध्यायिषु च शिष्टव्यवहारं कुर्वन् तिष्ठेरित्यादिकमुपदिशत्याचार्यः। पूर्वं पाठयितारो विद्वांसस्त्रिदिवसानन्तरमायान्ति द्रष्टुं यदयं विनीतो बालो विद्वान् भविष्णुः प्रविष्टः। परं "यदा विद्यायुक्तो विद्वान् जायते, तदा तं विद्यासु जातं प्रादुर्भूतं देवा विद्वांसो द्रष्टुमभिसंयन्ति प्रसन्नतया तस्य मान्यं कुर्वन्ति। अस्माकं मध्ये महाभाग्योदयेनेश्वरानुग्रहेण च सर्वमनुष्योपकारार्थं त्वं विद्वान् जात इति प्रशंसन्ति।" इति। तत्र हिन्द्यां भूमिकायामित्येवालेखीद् यत् त्रिदिवसानन्तरमध्यापका द्रष्टुमायान्ति, अग्रिमस्य 'यदा

पृ० १४८१, पं० १४—यह कहना कि—"उस ब्रह्मचारी को देखने के लिये इन्द्र आदि देवता आते हैं।" मौढ्य जल्पन है, क्योंकि तुम्हारे सम्मत देव तो अपना स्थान छोड़कर आते नहीं। अतः विद्वानों में इन्द्रादि कोटि के लोग देखने आते हैं।

पृ० १४८१, अनु० २—यह कथन कि दयानन्द की 'गर्भमिव करोति' की व्याख्या में गर्भ की तरह अर्थात् जैसे माँ गर्भ की सुरक्षा रखती है, ऐसे ही आचार्य अपनी विद्या (ज्ञान) के मध्य में बालक को रखकर सिखाता है। विद्यार्थी के गुरुकुल में प्रवेश करने पर यह वैदिक नियम था कि तीन दिन तक उस विद्यार्थी को ईशोपासनाप्रकार, कुलोपयोग धर्म-नियम तथा परस्पर विद्या विचार व व्यवहार कैसे करेगा, यह सिखाते थे। फिर विद्वान् अध्यापक तत्तद्विषय के उस बालक को देखते थे कि यह कैसी प्रतिभा का है। वैसे ऋषि ने स्वभाष्य में 'गर्भीभूतम्' शब्द नहीं लिखा है, फिर अगर्भ होते हुए गर्भ में मान लेना या व्यवहार करना दोनों के अभिप्राय में कोई भेद नहीं। वैसे यहाँ पर 'तीन रातें' से विद्यास्नातक, व्रतस्नातक व उभयस्नातक अथवा वसु, रुद्र, आदित्य बनाने कालपर्यन्त से अभिप्राय है। ऋषि-शब्दावली देखिये, उन का आशय है कि तीन दिन-रात प्रारम्भिक शिक्षा देते व पठन-विधि बताते हैं और जब सम्पूर्ण काल में जात अर्थात् परिपक्व व प्रसिद्ध हो जाता है, तब अन्य विद्वान् भी देखने आते हैं। जितने अंश की आर्यभाषा नहीं की

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विद्यायुक्तो विद्वान्' इत्यादिवाक्यस्यार्यभाषा तु न कृतेति सत्यम्, तत्र संस्कृतभागादवगन्तव्यं मनीषिभिः संस्कृतज्ञैः।

पृ० १४८२—यदाह—"समिदिति प्रथमान्तस्य व्याख्यानं न कृतम्। द्वितीयसमिच्छब्दस्य अग्निहोत्रादिरर्थः, स निर्मूलः।" इति, इदमस्याल्पज्ञानमूलकम्, समिदित्यनेन तदर्थसम्भवात्। तद्यथा—सम्यगिध्यते दीप्यतेऽनया सा विद्या काष्ठादिर्वेति। अतो द्वितीयसमिधा अग्निहोत्रेणेत्यर्थस्य लाक्षणिकत्वादुपगमः। काष्ठसमिधा हि तदुपलक्षिका। यल्लाक्षणिको-ऽर्थः पृथिवी द्यौरन्तरिक्षमिति गृहीतो न तेन किञ्चित् प्रयोजनं सिध्यति, अतः पृथिव्यादि-सम्बन्धिन्यो विद्या एव लक्षणीयाः।

पृ० १४८३, पं० ७—यदुच्यते—'ब्रह्मैव परमेश्वरो विद्या च ज्येष्ठा सर्वोत्कृष्टा यस्य तं ब्रह्मज्येष्ठम् अमृतेन परमेश्वरमोक्षबोधेन परमानन्देन साकं सह वर्तमानं ब्राह्मणं ब्रह्मविदं जातं प्रसिद्धं देवा विद्वांसः सर्वे प्रशंसन्ति' इति, तन्न, विरोधात्" इत्यादि निखिलमल्पज्ञानविजृम्भि-तम्, भूमिकावचनानां सङ्गतत्वादविरोधाच्च।

इदं प्रकरणं तु ब्रह्मचारिणां तदा गृहस्थादीनामपि ब्रह्मज्येष्ठत्वप्रतिपादनमिहानर्गलम्। 'ब्राह्मणम्' इत्यस्य पर्यायवाचकं 'ब्रह्मविदम्' इति पुनरुक्तिवचनारोपस्तून्माद एव। यदत्र मोक्ष-

---

गई है, उसे विद्वान् संस्कृत से समझ लेंगे। याद रहे 'आचार्य०' आदि मन्त्र समस्त ब्रह्मचर्याश्रम के सम्बन्ध में है।

पृ० १४८२—यह कहना कि—"प्रथम समित् का अर्थ नहीं किया, द्वितीय समित् शब्द का अग्निहोत्रादि अर्थ किया है।" अल्पज्ञानमूलक है, जबकि पृथिवी, द्यौः, अन्तरिक्ष ये केवल 'इयम्' सर्वनाम के नहीं हो सकते, अतः ये अर्थ 'समित्' के ही हैं। इन तीनों की विद्याएँ भी समित् कहायेंगी, जैसाकि आर्यभाषा में स्पष्ट किया है, जिसके द्वारा दीप्त हो तो वे ये तीनों प्रकार की विद्यायें हैं। दूसरी इस भौतिक काष्ठ समिधा से अग्निहोत्र का अर्थ सिद्ध हो जाता है। केवल पृथिवी, द्यौ, अन्तरिक्ष (ब्रह्मचारी) यह आपका उल्लेखण सर्वथा निर्मूल है, व निष्प्रयोजन भी है। अतः तीनों से तीनों विद्याएँ उपलक्षित करना सुसङ्गत है।

पृ० १४८३, पं० ७—"जो ब्रह्मचारी पूर्व पढ़कर ब्राह्मण होता है, वह धर्मानुष्ठान से अत्यन्त पुरुषार्थी होकर सब मनुष्यों का कल्याण करता है। ब्रह्म ही परमेश्वर वा विद्या ही ज्येष्ठ जिसकी है, वह ब्रह्मज्येष्ठ, अमृत अर्थात् परमेश्वर मोक्ष बोध परमानन्द के साथ वर्त्तमान ब्रह्मविद् ब्राह्मण की सभी प्रशंसा करते हैं।" इनका कथन है कि "उक्त कथन ठीक नहीं, विरोध होने से।"

पर यह पारिजात-लेख समस्त ही अनर्गल है, अल्पज्ञानजन्य है। भूमिकालेख सर्वथा सङ्गत व अविरुद्ध है। जब यह प्रकरण ब्रह्मचर्य आश्रम का है तो गृहस्थ में घटाने की क्या

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बोधेन परमानन्देन साकं सामानाधिकरण्यगवेषणा त्वया क्रियते, तद्धि मौढ्यम्, परमेश्वरस्य मोक्षस्य बोधनस्यैव परमानन्दरूपत्वात्। यत्र हि परमेश्वरस्य मोक्षस्य वा बोधोऽनुभूतिस्तत्रैव परमानन्दस्थितिरिति पृथग् जल्पनं तु प्रलाप एव।

पृ० १४८४—यदाह—"समिधा विद्यया समिद्धः प्रकाशितः' इत्यपि न सङ्गतम्।" इति, तदपि खलु अज्ञानमेव। बाह्यदीप्तिरग्निना यथा तथैवान्तरिकदीप्तिर्विद्ययैव सम्भवति। तथाहि—'समिध्यते सन्दीप्यतेऽनया सा समित्।' को नु खल्वभिज्ञः केवलबाह्यार्थलब्धावात्मानं कृतकृत्यं मन्येत ? स्वयमपि च १४८४ पृष्ठे प्रथमपङ्क्तौ "समिधा सायंप्रातराधीयमानया" इति वचने तदर्थं लक्षयति। अन्यथा अग्निहोत्रं विना क्व समिधाऽधीयमाना स्यात् ?

यदाह—"दीर्घशब्दस्य श्मश्रुविशेषणत्वं सम्भवति अनुपस्थितकालस्य न विशेषणत्वम्।" इत्यनेन बुद्धेः शून्यतैवाविर्भूता स्वीया। न हि दीर्घं श्मश्रु दीर्घकालेन विना सम्भवति, इत्यल्पधीरपि समवयाति।

पृ० १४८४, पं० ९—पू० प०—यदुक्तम्—"एति आनन्दं प्राप्नोतीत्यप्यसङ्गतम्, आनन्दपदाध्याहारापेक्षया एतीत्यस्य 'वर्त्तते' इत्यर्थस्यैव युक्तत्वात्। उत्तरसमुद्रस्य गृहस्थाश्रमोऽर्थो-

---

आवश्यकता है और यदि ब्रह्मज्येष्ठत्व वहाँ भी घटे तो इसमें विरोध क्या है ? ब्रह्मज्येष्ठ का ब्रह्मवित् पर्याय दने को 'पुनरुक्त' कहना सर्वथा मूर्खता है; क्योंकि इस पर्याय से अर्थ स्पष्ट होता है। मोक्ष बोध और परमानन्द में जो सामानाधिकरण्य खोज रहे हैं, उसका क्या प्रयोजन है ? परमेश्वर का मोक्ष बोधन ही परमानन्द है। इसे पृथक्-पृथक् समझना मूर्खता है।

पृ० १४८४—यह कहना कि—"समिधा विद्या से समिद्ध प्रकाशित' सङ्गत नहीं है।" ठीक नहीं, अज्ञान ही है। बाह्य प्रकाश जैसे भौतिक अग्नि से होता है, उसी प्रकार आन्तरिक प्रकाश विद्या से ही सम्भव है। यथा—'समिध्यते सन्दीप्यतेऽनया सा समित्।' कौन ऐसा विद्वान् होगा, जो केवल बाह्यार्थप्राप्ति पर स्वयं को कृतकृत्य मान बैठेगा ? स्वयं भी पृ० १४८४, पं० १ में—"समिधा सायंप्रातराधीयमानया" इस कथन से ऋषि की पुष्टि हो रही है। अग्निहोत्र के बिना समिधा का 'आधीयमान' विशेषण व्यर्थ हो जाये, क्योंकि समिधा हवन में ही रखी जाती है।

यह जो कहा कि—"श्मश्रु का दीर्घ शब्द विशेषण हो सकता है, अनुपस्थित काल का विशेषण नहीं हो सकता।" इस कथन से बुद्धि की शून्यता ही प्रकट होती है; क्योंकि दीर्घ श्मश्रु दीर्घ काल के बिना सम्भव ही नहीं। यह बात तो अल्पमति भी समझ लेता है।

पृ० १४८४, पं० ९—पूर्वपक्ष—"एति का अर्थ आनन्द को प्राप्त करता है' करना असङ्गत है। 'आनन्द' पद के अध्याहार की अपेक्षा 'वर्त्तते' है, यह अर्थ करना ठीक है। उत्तर समुद्र का

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽप्यसङ्गतः, ब्रह्मचर्यकाले उपदेशप्रवृत्त्यसम्भवात्, स्नातकोत्तरकालस्यैव प्रवचनोपदेशादि-कालत्वात्। निवासयोग्यलोकस्य जडत्वे नोपदेशसम्भवः।" इति।

उ० प०— अयं हि नात्र सूक्तस्य पौर्वापर्यं पर्यालोचयति, परिव्राजकः सन्नसम्बद्धे स्थले पर्यटति। सम्प्रत्येव ब्रह्मचारिणो ब्रह्मज्येष्ठत्वमुक्तम्, तथा चात्राऽपि समिधा विद्यया समिद्धः प्रकाशितः सन्नपि कथन्नानन्दमेयात्। एवमानन्दाध्याहारोऽतितरां प्रकरणानुकूल्यमनुबध्नाति। 'वर्त्तते' इत्यनेन न किमप्यर्थवैशिष्ट्यम्। सम्मोदन्ते भूतानि यत्र स समुद्रोऽत्र गृहस्थाश्रमार्थ ऊह्यः, समावर्त्तनकालानन्तरं गृहस्थाश्रमप्रवेशस्यौचित्यात्। समावर्त्तनं मन्त्रस्य दीक्षितशब्द-पाठेनाभिव्यज्यते। एतेन स्नातकोत्तरकालोऽपि प्रसङ्गतोऽभ्यूहनीयस्तदा प्रवचनोपदेशादि-सङ्गतिरेव सूपपद्यते। निवासयोग्यलोकजडत्वेऽपि उपदेशप्रसङ्गे लक्षणया लोकवासिनो मनुष्या उपलक्ष्यन्ते हि। एवमविवेकपुरःसरभाषणं भषणमेव सिद्धमेतस्य।

गृहस्थाश्रम अर्थ करना असङ्गत है। ब्रह्मचर्यकाल में उपदेश-प्रवृत्ति असम्भव है। स्नातकोत्तरकाल ही प्रवचन, उपदेश आदि का काल है। निवासयोग्य लोक तो जड़ होता है, उसको उपदेश नहीं दिया जा सकता।

उत्तरपक्ष—यह लेखक असङ्गत स्थल में घूम रहा है, उपस्थित सूक्त के पौर्वापर्य का आलोचन नहीं कर रहा है। अभी-अभी ब्रह्मचारी का ब्रह्मज्येष्ठत्व वर्णन किया जा रहा है और यहाँ पर समिधा अर्थात् विद्या से प्रकाशित हो आनन्द को प्राप्त करेगा ही। अतः 'आनन्द' का अध्याहार प्रकरण के अत्यन्त अनुरूप व सङ्गत है। 'वर्त्तते' एति का अर्थ न हो सकता है और न कुछ अर्थ-वैशिष्ट्य सिद्ध होता है। 'जिसमें प्राणी मोद प्राप्त करते हैं, ऐसा गृहस्थाश्रम है' (निरुक्त २। १०) यही अर्थ ऊहनीय है। समावर्त्तन के अनन्तर तो गृहस्थाश्रम में ही प्रवेश करना उचित है। मन्त्र में 'दीक्षित' पद से समावर्त्तन अभिव्यक्त होता है। इससे स्नातकोत्तरकाल भी प्रसङ्गतः अभ्यूहनीय है।

ऋषि की आर्यभाषा में शब्दावली है—"गृहस्थाश्रम को प्राप्त होता है और अच्छी प्रकार विद्या-संग्रह करके अपने उपदेश का सौभाग्य बढ़ाता है।" इससे यह भी ध्वनित है कि वह गृहस्थ हो उस पूर्वोपदेश का सदुपयोग कर लाभ उठाता है। करपात्रीजी ने हमारे द्वारा उद्धृत अंश उद्धृत ही नहीं किया और अनर्गल प्रलाप किया है। निवासयोग्य लोकों का संग्रह तो असम्भव है, अतः लक्षणा से लोकस्थ प्राणियों का संग्रह है, जैसा कि गीता में भी 'लोकसंग्रह' का अर्थ है। अतः अविवेकपूर्वक इनका यह भाषण नहीं, प्रत्युत भषण सिद्ध हो रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १४८५, पं० ३—अत्रायं 'ब्रह्मचारी जनयन्' इत्यर्थं ब्रुवाणोऽनर्थं समर्थयते यत्—"पूर्वोक्तो ब्रह्मचारी ब्रह्मचर्यमहिम्ना ब्रह्म ब्राह्मणजातिम्, अपः स्नानपानाद्यर्था गङ्गाद्या नदीः, आत्मनः फलभूतं स्वर्गादिलोकम्, प्रजापतिं प्रजानां स्रष्टारमवान्तरसृष्टिकरं परमेष्ठिनं परमे उत्कृष्टे सत्यलोके तिष्ठतीति परमेष्ठी तमादिब्रह्माणम्, विराजं स्थूलप्रपञ्चशरीराभिमानिनमीश्वरं जनयन् च वर्तते। अर्थात् स्वस्वकारणादुत्पद्यमानानामेषां ब्रह्मचर्यमर्थाद् ब्रह्मचारी एव निमित्तकारणम्।" इत्याह। इदमपि सकलं पदार्थविज्ञानविमूढस्यैव पल्लवितं प्रतीयते। कथमयं ब्रह्मचारी भवतोऽवान्तरसृष्टिकरं परमेष्ठिनं प्रति निमित्तकारणं स्यात्, यथा सर्वसृष्टिं प्रति नवीनैरीश्वरोऽपि अभिन्ननिमित्तोपादानरूपे स्वीकृतः? तस्मादिदमुक्तमयुक्तम्। एतद्वचस्तु स्थालीपुलाकन्यायेनैव परीक्षितमिह।

पृ० १४८५, पं० १०—यदाह—"स ब्रह्मचारी ब्रह्म वेदविद्यां पठन् (अपः) प्राणान् (लोकं) दर्शनं प्रजापतिं विविधप्रकाशकं परमेश्वरं प्रकटयन् मोक्षस्य विद्यायां गर्भवन्नियमेन स्थित्वा यथावद् विद्यां गृहीत्वा सूर्यवत् प्रकाशकः सन् दुष्टकर्मकारिणो मूर्खान् पाखण्डिनो जनान् दैत्यरक्षःस्वभावान् तिरस्करोति सर्वान्निवारयति।" इति।

पृ० १४८५, पं० ३—'ब्रह्मचारी जनयन्' इसके अर्थ को कहते हुए अनर्थ का ही समर्थन किया है—"पूर्वोक्त ब्रह्मचारी अपने ब्रह्मचर्य के प्रभाव से ब्राह्मणजाति को, स्नान पान आदि के लिये गङ्गा प्रभृति नदियों को, प्रजाओं के स्रष्टा अवान्तरसृष्टिकर्ता प्रजापति को, परम उत्कृष्ट सत्यलोक में रहनेवाले परमेष्ठी को और स्थूल शरीर में अपने शरीर का अभिमान रखनेवाले ईश्वर को भी उत्पन्न करने में समर्थ है। अर्थात् अपने-अपने कारणों से उत्पन्न होनेवाले इन सब पदार्थों में निमित्तकारण के रूप में सर्वत्र ब्रह्मचारी की स्थिति रहती है। अतः वही इनको उत्पन्न करता है, ऐसा लाक्षणिक प्रयोग कर लिया जाता है।" यह पारिजातकार का अर्थ कितना अनर्गल है, यह विद्वान् समझ लेंगे। भला स्थूलशरीर में ईश्वर को उत्पन्न करने का निमित्तकारण ब्रह्मचारी कैसे हो जायेगा? यह विज्ञान विमूढ का सा कथन है। तथा यह परमेश्वर से अन्य अवान्तर सृष्टि करनेवाला परमेष्ठी कौन है, जिसका भी यह ब्रह्मचारी निमित्तकारण है। जबकि सर्वसृष्टि के प्रति नवीन वेदान्तियों द्वारा अभिन्ननिमित्तोपादान परमेश्वर ही स्वीकृत किया गया है। यहाँ लाक्षणिक प्रयोग मानना ऐसा ही है, जैसे 'महिषी दुग्धं प्रतिसमयं ददाति' इसका लाक्षणिक अर्थ कोई करे कि श्री करपात्रीजी की वाणीरूपी भैंस प्रतिसमय उपदेशरूपी दूध देती है। यहाँ हमने अतिसंक्षेप से इनके ऊटपटाँग कथन की परीक्षा की है।

पृ० १४८५, पं० १०— "यह ब्रह्मचारी वेदविद्या को यथार्थ जान कर प्राणविद्या, लोकविद्या तथा प्रजापति परमेश्वर, जो कि सबसे बड़ा और सबका प्रकाशक है, उसको जानता है और इन विद्याओं में गर्भरूप और इन्द्र अर्थात् ऐश्वर्ययुक्त होकर असुर अर्थात् मूर्खों की अविद्या का छेदन कर देता है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्रायमाक्षिपति—"वेदविद्यापठनेन प्राणदर्शनपरमेष्ठिविराजां कथं जननं सम्भवति? न चैतेषां ज्ञानमेव जननम्, तथात्वे घटादिजनकत्वव्यवहारापत्तेः। पठन्निति न मूले। मोक्षयोनिस्तु ब्रह्मविद्या भवति न विद्यामात्रम्। इन्द्रासुरयोः कथं गौणार्थाश्रयः? दैत्यरक्षः-स्वभावान् इति कथनमपि किमाश्रयम्?"

उत्तरपक्षः—श्रीमन्! यदा कदापि तु बुद्ध्या कार्यं ग्राह्यम्। किं वेदविद्यापठनेन प्राणविद्याया लोकविद्यायाः प्रजापतिपरमेश्वरस्य जननमर्थात् प्रादुर्भूतिर्न भवति? अपितु भवत्येव। अत्रोक्तानां ज्ञानमेवोत्पत्तिर्मन्तव्या जीवात्मनः।

न चेश्वरस्योत्पत्तिर्नित्यत्वात्, अजत्वात् सर्वव्यापकत्वाच्च। न च तव कथनेन ज्ञानं घटोत्पत्तावुपादानं भवितुमर्हेत्, यथा मृत्, तस्य ज्ञानस्य तत्र नैमित्तिकसाधकत्वात्। ब्रह्म जनयन् प्रादुर्भावयन्नर्थाद् ब्रह्म वेदं पठन्नित्यर्थ उपपन्न एव, न कुतोऽप्यध्याहारस्तस्य। इन्द्र इत्यस्य

इस भूमिका-कथन पर इस लेखक का आरोप है कि इस अर्थ का मूल पदों से कोई सम्बन्ध नहीं है, गौण अर्थ करके ही कहा जा सकता है। अस्तु, गौणता से ही आपको स्वीकृत है। पर आगे यह कहता है कि—"वेदविद्या के पढ़ने से प्राण, परमेष्ठी और विराट् की उत्पत्ति कैसे हो सकती है? इनके ज्ञान को ही उत्पत्ति नहीं माना जा सकता; क्योंकि ऐसा मानने पर घटादिजनकत्व व्यवहार भी होने लगेगा। 'पठन्' यह पद मूल मन्त्र में नहीं है। इसका प्रयोजन भी नहीं है। मोक्ष की योनि केवल ब्रह्मविद्या ही हो सकती है, विद्यामात्र नहीं। इन्द्र और असुर पदों का गौण अर्थ करने में कोई प्रमाण नहीं है। दैत्य और राक्षसों सरीखे व्यवहारवाले व्यक्तियों के कथन का क्या आश्रय है?"

उत्तरपक्ष—'मोक्षयोनि विद्या में गर्भ होना' कथन भूमिका में है ही नहीं। 'गर्भवत् नियमेन' दृष्टान्त विद्या सीखने के लिये सूपपन्न है। आप कहते हैं कि 'ब्रह्म जनयन्' से अन्वय बन ही जाता है, 'पठन्' तो मूल में है नहीं। महोदय! बुद्धि की बात कभी न कहने की जिद कभी तो छोड़ दिया करो। ऐसी रूढिवादिता किस काम की? 'जनयन्' का अन्वय तो 'ब्रह्मा अपः, लोकम्, प्रजापतिम्, परमेष्ठिनम्, विराजम्' सभी से है, तो ब्रह्म अर्थात् वेदविद्या के साथ 'जनयन्' का अर्थ तो 'पठन्' ही ध्वनित होता है। साथ ही यह भी व्यञ्जना है कि वेदविद्या को पढ़ते हुए ही प्राणविद्या, लोकविद्या और परमेश्वर को जाने। जैसे मातृगर्भ में सब प्रकार का पोषण बच्चे को मिलता है, उसी प्रकार मोक्ष की विद्या में जीवज्ञान का सर्व पोषण होता है।

ईश्वर की उत्पत्ति कहना दर्शनशास्त्रशून्यता है; क्योंकि वह अजन्मा, नित्य और सर्वव्यापक है। आपके कथन से भी ज्ञान घटोत्पत्ति का उपादान कदापि नहीं हो सकता। ऐश्वर्ययुक्त अर्थ स्वतः धातुलब्ध ही है, गौणत्व का प्रश्न नहीं है। असु अर्थात् स्व प्राणों के पोषण में रमनेवाला

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

धातुलब्ध एवार्थोऽयम्। असुषु स्वप्राणेषु रमतेऽसावसुरः। स तु दुष्टो मूर्खो वा। एतत्स्वभाव एवासुरः स्वभावः। नैतेषां मनुष्यातिरिक्ता जातिः। शिष्टं सामान्यं गतसमाधानैरपास्तं भवतीत्युन्नेयम्।

पृ० १४८७, पं० १०—यदुक्तम्—"यत्तु कन्या युवतिरिति व्याख्यानम्, तन्न युक्तम्, धर्मशास्त्रेषु रजोदर्शनात् प्रागेव विवाहविधानात्। 'अनड्वानित्युपलक्षणं वेगवतां पशूनाम्' इति, तन्न, तथात्वेऽश्वपदवैयर्थ्यात्। कश्चिदेतेन मन्त्रेण कन्यानां वेदाध्ययनं साधयति, तदपि मन्दम्, तथात्वेऽनडुदश्वादीनामपि वेदाध्ययनविधानापत्तेः।" इति सर्वं विवेकबाह्यम्।

कन्याशब्दो हि कन्यते दीप्यते काम्यते गच्छति वेति विग्रहे 'कनी दीप्तिकान्तिगतिषु' धातोः 'अघ्न्यादयश्च' (उणा० ४। ११२) इति यकि टापि सिध्यति। ततः 'कन्या कमनीया भवति, क्वेयं नेतव्येति वा कमनेनानीयत इति वा, कनतेर्वा स्यात् कान्तिकर्मणः।' (निरु० ४। १५) इत्यनेन कन्यार्थोपलब्धिर्भवति। अत्र मन्त्रोक्तपतिशब्दसाहचर्येण कन्या युवतिरेव ग्रहीष्यते। इति न काचिदप्रतिपत्तिः। यतोहि—

पञ्चविंशे ततो वर्षे पुमान्नारी तु षोडशे।
समत्वागतवीर्यौ तौ जानीयात् कुशलो भिषक्॥ (सुश्रुते सू० ३५। १०)

तथा जो सुर न हो, वह तो दुष्ट या मूर्ख ही होगा। यही असुरों का स्वभाव है। इनकी जाति मनुष्यों से अतिरिक्त नहीं होती। शिष्ट सामान्य है तथा गत सामाधान से समाहित हो जाता है, ऐसा समझिये।

पृ० १४८७, पं० १०—यह कथन कि—"कन्या को युवति कहना ठीक नहीं है; क्योंकि धर्मशास्त्रों में रजोदर्शन से पूर्व ही विवाह कर देने का विधान है। 'अनड्वान्' को वेगवान् पशुओं का उपलक्षण मानना भी ठीक नहीं। ऐसा मानने पर मन्त्र में 'अश्व' पद का पढ़ना व्यर्थ हो जायेगा। कोई-कोई इस मन्त्र में कन्याओं का वेदाध्ययन सिद्ध करते हैं, ऐसा मानना ग़लत है; क्योंकि ऐसा मानने पर बैल, घोड़ा आदि के भी वेदाध्ययन की बात सिद्ध होने लगेगी।" सर्वथा विवेकबाह्य है।

कन्या शब्द दीप्ति-कान्ति-गत्यर्थक 'कनी' धातु से सिद्ध होता है। अर्थात् जिसकी कामना की जाये, जो दीप्तिमती हो, जो कमनीया होती है तथा कहाँ ले जायी जावे, सुख जिसके द्वारा हो, इत्यादि अर्थों में कन्या शब्द है। इसी मन्त्र में पति शब्द पढ़ा है, उसके साहचर्य से कन्या (विवाहार्थ) युवति ही ग्रहण की जायेगी। अतः इस अर्थ में कोई अप्रतिपत्ति नहीं है। क्योंकि—

कुशल वैद्य १६ वर्ष की कन्या और २५ वर्ष के पुरुष को समानवीर्य समझे। तथा १६

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥

इति सुश्रुतर्षिणाऽपि नोनषोडशवर्षा विवाहार्थं निर्दिष्टा। महर्षिदयानन्देन महाप्रज्ञेन भवद्धर्मशास्त्रशीघ्रबोधादिप्रचारितकुप्रथाबालविवाहादिखण्डनार्थं मन्त्रे 'युवानं पतिम्' इत्यावीक्ष्य कन्या युवतिरेवेति व्याख्यातम्। मनुस्मृतावपि—

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्माद् विन्देत सदृशं पतिम्॥ ९।९०॥

अतो रजोदर्शनात् प्राग् विवाहप्रतिपादनं कुचेष्टा धर्मशास्त्रविमुखानामेव भवादृशां मनुष्यजातिं गम्भीरदुःखसागरे निमज्जयितुं प्रयासोऽस्ति।

अनः शकटं वहति 'अनसि वहेः क्विबनसो डश्च' इति अनड्वान् भारं वहन्नपि वेगवतां पशूनामुपलक्षकः। अश्वो यद्यपि तीव्रगामी परं न वृषभवद् भारं वहन् तीव्रं धावति। इत्येवं स्वस्वविशिष्टार्थबोधकत्वेन द्वयोरपि प्रयोगसार्थक्यम् इति ऋषेराशयोऽतो नाश्वपद-प्रयोगवैयर्थ्यम्।

वर्ष से कम आयुवाली कन्या में २५ वर्ष से कम आयुवाला पुरुष यदि गर्भाधान करता है, तो वह कुक्षिस्थ ही विपद्ग्रस्त हो जाता है।

इस प्रकार महर्षि सुश्रुत ने भी १६ वर्ष से कम की कन्या को विवाहार्थ निर्दिष्ट नहीं किया। महाप्रज्ञ महर्षि दयानन्द ने आपके माने धर्मशास्त्र शीघ्रबोधादि द्वारा प्रचारित बालविवाह आदि कुप्रथाओं के खण्डनार्थ मन्त्र में 'युवानं पतिम्' शब्द देखकर कन्या का विशेषण भी सर्वथा उपयुक्त रखा है। मनुस्मृति (९।९०) में भी लिखा है—

ऋतुमती कुमारी तीन वर्षों तक प्रतीक्षा करे। इससे अधिक समय होने पर सदृश पति का वरण करे।

अतः रजोदर्शन से पूर्व विवाह का प्रतिपादन करना कुचेष्टा है। आपसदृश धर्मशास्त्रविमुख लोगों ने मनुष्यजाति को गम्भीर दुःखसागर में डुबाने का प्रयास किया है।

'अनड्वान्' शब्द अधिभार वहन करते हुए वेगवाले पशुओं का उपलक्षक है। अश्व यद्यपि तीव्रगामी है, पर वृषभ के समान भार लेकर तीव्र नहीं चल सकता। इस प्रकार अपने-अपने विशिष्ट अर्थ को बतानेवाले अनड्वान् और अश्व दोनों के ही प्रयोग की सार्थकता है। यही ऋषि का आशय है। अतः अश्व पद की व्यर्थता कदापि न आ पड़ेगी।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदानड्वान् अन्यभारवाहकतीव्रगतिमतां पशूनामुपलक्षकस्तदा बहुत्वापेक्षया हि जिगीषन्तीत्यन्वयो व्यधायि। यत्तु केनचिदेतेन मन्त्रेण कन्यानामपि वेदाध्ययनं साधितं तद्धि विद्वांसं वेदज्ञातारं सदृशं पतिं विन्देतेत्यभिलक्ष्यैवेति सम्प्रज्ञावतामभिनन्दनकरम्, परं भवान् अनडुदश्वादीनामपि वेदाध्ययनविधानव्यञ्जनां जनयितुं प्रावर्तिष्टेति अद्भुतवस्त्वालय-योग्यमतीनां भवादृशां मनीषाया अभिनन्दनमेव। धन्यवादार्हा मतिर्याऽनडुहोऽश्वांश्च वेदानध्यापयति मनुष्यमात्रस्य च वेदाध्ययनं वारयन्ती।

एतेनाऽपि मन्त्रेण कन्यानां वेदाध्ययनं साध्यते तदपि शास्त्रसङ्गतमेव। यथा अष्टाध्याय्याम् 'इङश्च' (३। ३। २१) सूत्रे महर्षिपतञ्जलिनाऽपि 'उपेत्याधीयते तस्या उपाध्यायी, उपाध्याया' इत्युक्तम्। 'अनुपसर्जनात्' (अष्टा० ४। १। १४) सूत्रेऽपि महाभाष्ये 'आपिशलमधीते ब्राह्मणी आपिशला.... काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, काशकृत्स्नीमधीते ब्राह्मणी काशकृत्स्ना' इति पाठः। साङ्गरहस्यवेदाध्यापयित्री आचार्या, सैवोपनयनकर्त्री अप्यासीत्। 'इमं मन्त्रं पत्नी पठेत्' इति विधानात्, गार्गीसुलभाविद्याधर्यादीनां नारीणां च पाण्डित्यपूर्णशास्त्रार्थेतिवृत्तोपलम्भात्, 'स्त्री हि ब्रह्मा बभूविथ' (ऋ० ८। ३३। १९) इति प्रमाणाच्च सिध्यति कन्यानामपि वेदाध्ययनम्।

'अनड्वान्' वेगवाले पशुओं का उपलक्षक है तो बहुत्व की अपेक्षा या विवक्षा करके 'जिगीषन्ति' यह बहुवचन प्रयोग किया है। जो यह किसी समझदार ने इस मन्त्र से कन्याओं का वेदाध्ययन सिद्ध किया है, वह विद्वान् वेदवेत्ता सदृश पति के विधान को अभिलक्षित करके ही सिद्ध किया है। यह सम्प्रज्ञावालों के लिये अभिनन्दनीय है। परन्तु आप तो धन्य हैं, जो आपने अपनी बुद्धि संविदाकारों (ठेकेदारों) को किराये पर उठा दी, जो आप इसी मन्त्र से बैल और घोड़ों आदि को भी वेदाध्ययन के विधान की व्यञ्जना करने में प्रयत्नपर हैं। इस प्रकार अद्भुतालय के योग्य मतिवाले आपसदृश लोगों की बुद्धि का तो सबको अभिनन्दन करना चाहिये। कैसी विचित्र बुद्धि है, जो मनुष्यमात्र को तो वेदाध्ययन का निषेध करती है और बैल, घोड़ों को वेदाध्ययन कराने की मन्त्र से व्यञ्जना कर रही है।

इस मन्त्र से कन्याओं का वेदाध्ययन सिद्ध करना तो शास्त्रानुमत है। यथा अष्टाध्यायी में 'इङश्च' (३। ३। २१) सूत्र के भाष्य में भगवान् पतञ्जलि ने भी, जिससे जाकर पढ़े, उसे उपाध्यायी और उपाध्याया संज्ञा दी है। 'अनुपसर्जनात्' (अष्टा० ४। १। १४) सूत्र पर भी आपिशल का अध्ययन करनेवाली ब्राह्मणी छात्रा को आपिशला, काशकृत्स्नी का अध्ययन करनेवाली ब्राह्मणी को काशकृत्स्ना पढ़ा गया है। साङ्ग सरहस्य वेद की अध्यापयित्री आचार्या कहलाती थी, वही कन्याओं का उपनयन भी कराती थी। 'इस मन्त्र को पत्नी पढ़े' इस विधान से भी कन्या वेदाध्ययन की अधिकारवती थी। गार्गी, सुलभा, विद्याधरी आदि नारियों के पाण्डित्यपूर्ण शास्त्रार्थों का इतिहास मिलता है। 'स्त्री ब्रह्मा होती है' (ऋ० ८। ३३। १९) यह भी प्रमाण है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सायणाचार्योऽपि बृहदारण्यकस्य (१ । ४ । ९) 'तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते' इत्यस्योपरि वार्तिकसारे लिलेख श्लोकम्—

मनुष्यमात्रो विद्याया अधिकारी भवेद् ध्रुवम् ।
यतोऽतः सर्वभावाप्तिमनुष्या इत्युदीरितम् ॥

तथा 'वेदः पत्नीं वाचयति' (शांखायनश्रौ० १ । १५ । १३) इत्यादिप्रमाणैश्चाऽपि कन्यानां वेदाध्ययनसाधने न काऽपि विप्रतिपत्तिरवशिष्यते । 'भीमा जाया ब्राह्मणस्योपनीता' (ऋ० १० । १०९ । ४) इति मन्त्रे स्त्र्युपनयनविधानमस्ति ।

पृ० १४८८, पं० २—यदुच्यते—"देवा विद्वांसो ब्रह्मचर्येण वेदाध्ययनेन ब्रह्मविज्ञानेन तपसा धर्मानुष्ठानेन च मृत्युं मृत्युप्रभवं दुःखमुपाघ्नत नित्यं घ्नन्ति नान्यथा' इति दयानन्दोक्तं तुच्छम्, अनुपपत्तेः । वेदाध्ययनमन्तरा विद्वत्त्वमेव कथम् ? विद्वत्त्वं चेत् कुतो वेदाध्ययनापेक्षा ? न च सामान्यज्ञानवत्त्वमेव विद्वत्त्वम्, तथात्वे साम्प्रतिकानां जनानामपि विद्वत्त्वमेव, तथा सति मनुष्यत्वदेवत्वभेदस्य निर्मूलत्वमेव स्यात् । देवानां मनुष्येभ्यो भिन्नत्वं पूर्वं साधितमेव ।"

इत्यपि समग्रमविमर्शनफलम्, अव्यवस्थितप्रलपितत्वात् । नात्रर्षिर्न्यगादीद् वेदाध्ययनेन विना विद्वत्त्वमपि तु तदावश्यकतामेव प्रत्यपादयत् । न च सामान्यज्ञानमेव विद्वत्त्वख्यापनं

सायणाचार्य ने भी बृहदारण्यक (१ । ४ । ९) पर वार्तिकसार में श्लोक लिखा है । इसमें मनुष्यमात्र को विद्या का अधिकारी बताया है । आपस्तम्बश्रौतसूत्र (१ । ११) में लिखा है कि वेद पत्नी के लिये देकर वाचन कराये । इसी प्रकार शांखायनश्रौतसूत्र (१ । १५ । १३) में भी लिखा है । इत्यादि प्रमाणों से कन्याओं का वेदाध्ययन सिद्ध है । ऋ० १० । १०९ । ४ मन्त्र में स्त्री का उपनयन प्रमाणित है ।

पृ० १४८८, पं० २—"ब्रह्मचर्य और धर्मानुष्ठान से ही विद्वान् लोग जन्म-मरण को जीत के मोक्ष-सुख को प्राप्त हो जाते हैं ।' यह दयानन्द की व्याख्या ठीक नहीं है; क्योंकि ऐसा बन ही नहीं सकता । वेदाध्ययन के बिना विद्वत्ता कैसे आ सकती है ? यदि विद्वत्ता अपने-आप आ जाती है, तो वेदाध्ययन की क्या आवश्यकता है ? सामान्य ज्ञान से कोई विद्वान् नहीं कहलाता; क्योंकि ऐसा मानने पर तो आजकल के सामान्यज्ञानवाले मनुष्य भी विद्वान् माने जायेंगे । इस प्रकार मनुष्यत्व और देवत्व का विरोध सर्वथा निराधार मान लेना पड़ेगा । देवताओं की मनुष्यों से भिन्नता पहले ही सिद्ध की गई है ।"

पारिजातकार का उक्त कथन अविचारफलित है, अव्यवस्थित प्रलाप है । ऋषि ने तो वेद के बिना विद्वान् होने की बात कहीं नहीं कही है, प्रत्युत वेदाध्ययन की आवश्यकता का प्रतिपादन ही विद्वान् बनने के लिये किया है । मनुष्यों में ही देवकोटि है, यह हमने पूर्व ही प्रतिपादित किया

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कृतम्। मनुष्येष्वेव देवकोटिरिति प्राक् साधितम्। यच्च सूर्यस्येन्द्रियनिग्रहकल्पनं तत्तु बालिशत्वम्, जडत्वादिन्द्रियाभावात्। अतो ब्रह्मणः परमेश्वरस्य चर्येण नियमेन सूर्योऽपि इन्द्रियसुखं प्रकाशं ददात्येव।

पृ० १४८८, अनु० २—अयन्त्वक्षरशो माहीधरं सायणं वा भाष्यं सर्वत्रावतारयति। ततो 'यद्ग्रामे यदरण्ये०' इति मन्त्रस्य महर्षिभाष्ये आक्षिपति यद् गृहाश्रमविधानस्य निर्मूलत्वम्। परमिदं प्रत्यक्षं धूलिक्षेपश्चक्षुषोः। 'गृहा मा बिभीत' 'गृहानुपह्वयामहे' 'गृहेषु नः' (यजुः० ३।४१-४३) इतिमन्त्रेषु गृहाश्रमसम्बन्धिषु को नाम चक्षुष्मानाख्यातुमर्हेद् यत्रात्र गृहाश्रम-प्रकरणम्। ग्रामवासस्तु गृहस्थिनामेव नान्येषामतो ग्रामेऽर्थाद् गृहाश्रम इत्यर्थोऽर्थापत्त्या-ऽत्रोपपन्नः। नैव मनुष्यो मननशील आश्रमेषु पापमेव कुरुते, पुण्यमेव प्रयासपूर्वकं सिद्धं कुरुते। भ्रमेण कदाचिज्जायते पापं तदा आश्रमस्य नियमानुष्ठानेन तन्नाशयामः। इन्द्रिये मानसव्यवहारे यदुत्तमं कर्म भवति तत्तु ईश्वरमोक्षप्राप्त्यर्थमेव। अतो निराधारमाक्षिप्यतेऽनेन।

है। सूर्य तो जड़ है, अतः उसकी इन्द्रियाँ यहाँ कहीं वर्णित नहीं हैं। सूर्य तो इन्द्रियों के लिये अपने प्रकाश से सुख देता है। आप कहते हैं कि सूर्य इन्द्रियनिग्रह अर्थात् ब्रह्मचर्य कैसे रखेगा? महोदय! कुछ तो बुद्धि का व्यायाम किया होता। यहाँ पर ब्रह्म अर्थात् परमेश्वर के उस चर्य अर्थात् नियम से सब लोकों को सूर्य धारण करता व इन्द्रियों को सुख पहुँचाता है।

पृ० १४८८, अनु० २—पारिजातकार सर्वत्र सायण या महीधर के भाष्य की नकल उतार कर अपनी बुद्धि की छुट्टी कर देते हैं। अब 'यद्ग्रामे यदरण्ये०' मन्त्र पर किये गये ऋषिभाष्य पर ये आक्षेप करते हैं कि यह ग्राम शब्द से गृहाश्रम का विधान करना निर्मूल है। पर यह कथन आँखों में धूल झोंकना ही है, क्योंकि इससे पूर्व के 'गृहा मा बिभीत' 'गृहानुपह्वयामहे' 'गृहेषु नः' (यजुः० ३।४१-४३) इन मन्त्रों में गृहाश्रम का वर्णन है। इसे कौन आँखवाला नहीं देखता? और ग्रामवास तो गृहस्थों का होता है, अन्यों का नहीं, इसलिये ग्राम पद से अर्थापत्त्या गृहाश्रम अर्थ होगा। ब्रह्मचारी, वानप्रस्थ, संन्यासी सभी ग्राम से बाहर अरण्य में चले जाते हैं। अतः ऋष्यर्थ सुसङ्गत है। मननशील आश्रमों में पाप नहीं करता, प्रयासपूर्वक पुण्य ही करता है। भ्रम से कभी पाप हो जाता है तो आश्रम के नियमों का कड़ाई से पालन करने पर उसका नाश अर्थात् फिर वह पाप नहीं करता। इन्द्रिय और मन के व्यवहार में जो कर्म करे, वह ईश्वर तथा मोक्षप्राप्त्यर्थ करे। फलतः इनके आक्षेप निराधार हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कात्यायनं यत् प्रमाणयति तत्तु केवलं याज्ञिकपक्षाश्रयणमेवेह। तव कात्यायनेन कल्पितं यदिन्द्रो यजमानं कथयति—'देहि मे'। महर्षिदयानन्दोऽभिवदति यदत्र ईश्वर उपदिशति। यदत्र भवान्निर्मूलमाह तत् सर्वं बुद्धियुक्तिमूलकमिह।

पृ० १४९०, पं० ७—यत्त्वाह—"संस्कृतव्याख्याने विद्यां द्रव्यादिकमुत्तमस्वभावमुदारतां सुशीलतां च मे देहीत्युक्तम्, न च जीवा जीवान्तरेभ्यं उदारतां सुशीलतां दातुं प्रभवन्ति।" तदखिलं छलेनाभ्युपेतम्, भूमिकापाठस्यान्यथा पठितत्वात्। तद्यथा—"विद्यां द्रव्यादिकं च त्वं देहि, यदर्थं त्वमुत्तमस्वभावदानमुदारतां सुशीलतां च धेहि धारय।" तत्र हि उदारतायाः सुशीलताया धारणमुक्तं न तु दानम्। ईश्वरेणोपदिष्टे सति व्यवहारकर्तव्ये नाप्तकामतायां हानिर्भवति।

पृ० १४९१—'गृहा मा बिभीत' इत्यत्र ग्रामान्तरादागतो यजमानो मन्त्रत्रयेण गृहं प्राप्नुयादिति कात्यायनविनियोगोऽपि कल्पयितुं शक्यते, परमेवं विनियोगाग्रहस्तु तद्विनियोगं प्रत्यपि शङ्कां जनयते यत् कथङ्कारं स एव ?

यदाह—"दयानन्दभाष्ये 'हे मनुष्याः' इति कुतः कल्प्यते ?" इति प्रश्नस्तु बुद्धिशून्यतां द्योतयतेऽस्य। यतः 'हे गृहाः' इत्यनेनैव गृहवासिनो मनुष्या एवानुमीयन्ते, नान्ये। ईश्वर

पारिजातकार सब मन्त्रों को केवल यज्ञपरक मानता है, तब कात्यायन को प्रमाणरूप में उद्धृत करता है। तुम्हारे कात्यायन ने कल्पना की है कि इन्द्र यजमान से कहता है कि 'देहि मे'। महर्षि दयानन्द कहते हैं कि परमेश्वर जीव को आज्ञा देते या कहते हैं। पर करपात्रीजी कहते हैं कि भूमिका-कथन निर्मूल है। तो आपका कथन कैसे बुद्धि और युक्ति से सङ्गत है ?

पृ० १४९०, पं० ७—"संस्कृत-व्याख्यान में विद्या, द्रव्यादिक, उत्तम स्वभाव, उदारता और सुशीलता मुझे दीजिये' यह कहा है। जीव दूसरे जीवों को उदारता व सुशीलता नहीं दे सकते हैं" यह सब कथन छलभरा है; क्योंकि भूमिका का पाठ उलट दिया गया है। वहाँ उदारता और सुशीलता का धारण कहा गया है। ईश्वर के द्वारा उपदेश देने से उसकी आप्तकामना में कोई क्षति नहीं पहुँचती।

पृ० १४९१—आपने कात्यायन के विनियोग पर यह अर्थ किया, हम इसी पर पूछते हैं कि 'दूसरे घर से आकर यजमान' यह शब्दावली कैसे व कहाँ से आहृत कर ली ?

इसी के आगे आप पूछते हैं कि स्वामी दयानन्द ने 'हे मनुष्याः' यह सम्बोधन कहाँ से गढ़ लिया ? हम आपसे पुनः पूछते हैं कि आपने 'गृहाः' का अर्थ 'हे गृहदेवताओं' कैसे कर लिया ? ये मनुष्यातिरिक्त कौन से देवता इस घर में रहने लगे; यह भी तो करपात्रीजी को बताना चाहिये।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवोपदेष्टाऽत्र। सृष्ट्यादौ तेनैव ऋषिहृदयेषूक्तत्वमेव प्रमाणम्। 'गृहाः' इति सम्बोधनमेव लक्षणायां बीजम्। न च यथा यज्ञे जडो यूपः सम्बोध्यते तथैवेहाऽपि जडगृहसम्बोधनमेव मन्तव्यमिति वाच्यम्, तत्राऽपि यूपसम्बन्धिन एव सम्बोध्यत्वलक्षितत्वात्।

यच्चाह—'गृहाश्रमेच्छायां ततस्तद्वत्त्वे लक्षणायां गौरवं स्यात्' इति, तदपि नामाज्ञानमात्रम्। तथात्वे तु 'मञ्चाः क्रोशन्ति' इत्यत्रापि तव रीत्या पूर्वं मञ्चस्थानां क्रोशनेच्छा कल्प्या, तदनु तद्वत्ता। एवं गौरवात् तत्राऽपि लक्षणाया असम्भवताऽऽपद्येत। एवमस्य चिन्तनरीतिरुच्छृङ्खलैव।

एतस्मिन् मन्त्रे श्रीवागीश्वरविद्यालङ्कारो विमृशति, यथा—"गृहपदं सदनार्थे रूढम्। जडे सदने चेतनधर्मयोर्भयकम्पयोर्बाधात् तदाधाराधेयभावसम्बन्धेन पत्नीप्रभृतिगृहजनं लक्षयति। 'गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि' इति मेदिनी। लोकेऽपि न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। तेन पुंसि बहुवचनान्तस्य गृहपदस्य पत्न्यादिषु रूढिमूला लक्षणा। प्रवासप्रत्यावृत्तस्य पुंसो गृहजनैः सह सङ्गमे गृहपदवाच्यार्थस्य सदनस्यापि सङ्गमादुपादानलक्षणा। प्रवासेऽपि पुरुषो गृहजनैः सह गृहमपि स्मरति। चेतनधर्माणां भयकम्पज्ञानादीनां जडगृहे-

---

अतः ऋषि का सम्बोधन तर्कयुक्त है। सृष्ट्यादि में ऋषियों के हृदय में स्थित परमेश्वर ही इन मन्त्रों का कथयिता है। 'गृहाः' सम्बोधन जड़ को किया है, उनके भयभीत होने का प्रश्न ही नहीं, अतः 'गृहस्थजन' यह अर्थ लक्षणा से होगा। यह नहीं कह सकते कि जैसे यज्ञ में जड़ यूप सम्बोधित किया जाता है, इसी प्रकार यहाँ भी सम्बोधन किया गया है, यह कहना उचित नहीं; क्योंकि वहाँ पर भी यूपसम्बन्धी पुरुषादि लक्षणा से सम्बोध्य है।

यह कहना कि 'गृहाश्रम की इच्छा फिर इच्छावान्, ऐसा अर्थ करने में गौरव होगा' यह कथन भी अज्ञान है; क्योंकि इस प्रकार तो 'मञ्चाः क्रोशन्ति' में भी तुम्हारी रीति से पहले मञ्चस्थों की क्रोशन में इच्छा होगी फिर तद्वत्ता होने से यहाँ भी गौरव होने से लक्षणा असम्भव हो जायेगी। इस प्रकार तो आपकी चिन्तनरीति ही उच्छृङ्खल और असम्भव ठहरेगी।

इस मन्त्र पर श्री वागीश्वर विद्यालङ्कार विचार करते हैं कि गृह पद सदन अर्थ में रूढ है। जड सदन में चेतन धर्म भय और कम्प का बाध होने से पत्नी प्रभृति गृहजन को लक्षित करते हैं। लोक में भी अत एव कहा है कि घर-घर नहीं होता, प्रत्युत गृहिणी ही घर होती है। इसलिये बहुवचनान्त पुंलिंग में रूढिमूला लक्षणा है। प्रवास से लौटे पुरुष का गृहजनों के साथ संगम होने पर गृहपदवाच्यार्थ सदन के भी साथ संगम होने से उपादानलक्षणा है। चेतनधर्म भय, कम्प, ज्ञान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽभावात् तावत्यंशे लक्षणलक्षणा।" इति। तस्माद् 'गृहाः' इति पदस्यैव सम्बोध्यत्वेऽज्ञानमेव शरणम्।

पृ० १४९३, पं० ५—यदुच्यते—"तत्र प्रवसत इति विपरिणामे भानाभावात्।" इति, तदपि नामास्य भ्रम एव। तत्र प्रवसन् गृहसुखकारकान् पदार्थान् स्मरतीति स्पष्टं विलिखितम्। तत्र सः कथं स्मरतीति सन्दर्भाय प्रवसतो मनुष्यस्य सौमनस आनन्दः पूर्वमनुभूतो भवतीति लेखात्। स्वयंवरण-कृतप्रतिज्ञत्वादिकं च वेदसम्मतत्वाद् व्याख्याने योजितत्वाद् ऋषिभाष्यं सर्वथा गौरववत्।

अयं ह्यनुलिपिकरो नैतस्य किञ्चिदिह स्वोपज्ञत्वम्। मौलिकं भाष्यं तु महर्षेरेव। तथालोचन्तां मनीषालोचनवन्तः—

पृ० १४९४, पं० ६—अयं हि आक्षिपति यत्—"दयानन्दभाष्यं पदपदार्थसम्बन्धातीतमेव" इति, तदपि अज्ञानमेव, पदपदार्थानुगतत्वात्। गोशब्देनोत्प्रेक्षिताः पशुपृथिवीन्द्रियविद्या-

---

आदि का जड़ गृह में अभाव है, तो उतने अंश में लक्षणलक्षणा होगी। इसलिये केवल 'गृह' पद को सम्बोध्य मानना तो अज्ञान है।

पृ० १४९३, पं० ५—"येषामध्येति प्रवसन्०' इस मन्त्र में पढ़े 'प्रवसन्' पद को 'प्रवसतः' बदल देने में कोई प्रमाण नहीं है।" पारिजातकार का यह कथन भी भ्रान्तिपूर्ण है, क्योंकि संस्कृत में स्पष्ट ही 'प्रवसन्' और 'प्रवसतः' का यथायथ प्रयोग हुआ है। 'प्रवसन् येषामध्येति स्मरति' यहाँ पर 'अधीगर्थदयेषां कर्मणि' (अष्टा० २।३।५२) से 'येषाम्' में षष्ठी हुई है। जब 'येषु गृहेषु सौमनसो भवति' जिन घरों में आनन्द होता है, तो स्वतः प्रश्न होगा कि किसे आनन्द होगा? तब आकांक्षा की पूर्ति में 'येषु गृहेषु प्रवसतः' उत्तर होगा। अतः महर्षि का कथन बिलकुल स्पष्ट है। स्वयंवरण पद्धति वेदसम्मत होने से ऋषि-भाष्य गौरवास्पद है।

ये करपात्रीजी तो नकलची हैं, इनकी यहाँ कोई मौलिक उपज तो है नहीं। मौलिक भाष्य तो महर्षि का ही है। बुद्धिनेत्रवाले देखेंगे कि—

पृ० १४९४, पं० ६—ये करपात्रीजी आक्षेप करते हैं कि—"दयानन्द का भाष्य पदपदार्थसम्बन्ध से रहित है।" यह कथन अज्ञानपूर्ण है; क्योंकि ऋषि ने पदपदार्थानुगत अपने अर्थ को यास्कादि के प्रमाणों से पुष्ट मानकर लिखा है। ऋषि पर आप आक्षेप करते हैं कि परमेश्वर सम्बोधन करने में क्या मूल है? पर आपके 'हे वास्तुदेवताओ! आपकी कृपा से हमारे घर में सुख-शान्ति रहे' इसमें क्या मूल है? महोदय! देवाधिदेव परमेश्वर तो सम्बोध्य होना ही सर्वथा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रकाशाह्लादयः सर्वेऽप्यर्थाः प्राप्ता भवन्तु, इति सहृदयहृदयवेद्यम्। केवलं 'धेनुबोधकमेव पदम्' इति ववस्तु अल्पज्ञत्वख्यापकम्।

पृ० १४९४, पं० १०—यदाह—"क्षेमाय व इत्यत्र व इत्यस्य युष्मानिति वाच्यार्थमुपेक्ष्य पुरुषव्यत्ययेन पूर्वोक्तान् तान् पदार्थान् इत्यर्थकरणे किं मूलम्? पूर्वोक्तपदार्थप्राप्त्या पारमार्थिकं निःश्रेयसमाभ्युदयिकं च सुखं कथं लभ्यते? नहि पश्वादिप्राप्त्या निःश्रेयसप्राप्तिः सम्भवति।" इत्यादि।

तद् बुद्धिमान्द्यवचनम्, गाम्भीर्येण तद्विमर्शनाऽसमर्थत्वात्। 'वः' इत्यस्य 'युष्मान्', व्यत्ययेन पदार्थान् इति व्याख्यातमृषिणा। महर्षिणा गोशब्देन विद्या (ब्रह्मविद्याऽपि) गृहीता, तया च निःश्रेयसमधिगम्यते, नहि केवलं पशुप्राप्तिरिह कथिता।

यच्चोक्तमनेन माहीधरमुद्धरता (पृ० १४९३, पं० १७) यत् 'तत्राजमैहिकं द्वितीयमामुष्मिकम्' इति, अत्राजमित्यशुद्धम्, आद्यमिति महीधरेण पठितत्वात्। अपरं च शिवं हि पारमार्थिकं शग्ममिति सांसारिकं सुखं भवति। अनेन एतद्गुरुणा महीधरेण च विपरीतमेव

उचित है। आप कहते हैं कि 'अज, अवि' के साथ 'गावः' का अर्थ केवल धेनु होगा। महर्षि व्यापक दृष्टि से पशु, पृथिवी, इन्द्रिय, विद्या, प्रकाश, आह्लाद आदि सभी की प्राप्ति होने की बात कह रहे हैं, क्योंकि 'गो' शब्द के ये सभी अर्थ हैं। जैसा आपका संकीर्ण मस्तिष्क और छोटा वास्तुदेवता है, वैसी ही छोटी अकेली गौ की प्राप्ति कह रहे हैं, पर सर्वव्यापक सर्वदाता परमेश्वर से विशालदृष्टि महर्षि तो ये सभी वस्तुएँ माँग रहे हैं, जो कि बहुत ही संगत है।

पृ० १४९४, पं० १०—"क्षेमाय वः' इस मन्त्र के 'वः' पद का अर्थ 'तुम लोगों को' छोड़कर, पुरुष का व्यत्यय कर 'उन पदार्थों को' करने में क्या कारण है? पूर्वोक्त पदार्थों की प्राप्ति से पारमार्थिक निःश्रेयस और आभ्युदयिक सुख कैसे मिलता है? पश्वादि की प्राप्ति से निःश्रेयस तो मिलता नहीं।"

इत्यादि कथन भी इस लेखक की बुद्धि की मन्दता को ही प्रकट करता है; क्योंकि यह गम्भीरता से शास्त्र के विमर्शन करने में असमर्थ है। 'वः' से ऋषि ने प्रथम 'युष्मान्', फिर पुरुषव्यत्यय करके प्रत्यक्ष पदार्थों का ग्रहण किया है। आप नेत्र खोलकर देखिये, महर्षि ने गो, पृथिवी, प्रकाश, आभ्युदयिक सांसारिक सुख और विद्या (ब्रह्मविद्या), उसके प्रकाश से पारमार्थिक सुख की प्राप्ति अभीष्ट की है। केवल विवेचन-बुद्धि चाहिये, जिससे आप शून्य हैं।

आपने पृ० १४९३, पं० १७ में महीधर-भाष्य का मूल उद्धृत करते हुए 'आजमैहिकम्' अशुद्ध उतारा है, वहाँ 'आद्यमैहिकम्' होना चाहिये। दूसरे 'शिव' पारमार्थिक सुख होता है और शग्म सांसारिक सुख होता है। परन्तु करपात्रीजी और इनके गुरु वाममार्गी महीधर ने शग्म को

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्याख्यातम्। शिवशब्दो हि श्यति (शो तनूकरणे) पापमिति विग्रहे 'सर्वनिघृष्वरिष्वलष्व-शिव०' (उणा० १। १५३) इत्यादिना वनि निपातनाद् गुणाभावेऽन्तोदात्तत्वे च कृते तथा कल्याणार्थक 'शिव' धातोर्वा सिध्यति। 'शग्मम्' हि 'युजिरुचितिजां कुश्च' (उणा० १। १४६) इति 'शम्' धातोर्बाहुलकाद् 'मकि गत्वे च' प्रत्ययस्वरेणान्तोदात्तत्वे सिध्यति। 'शासनं च रोगाणां यावनं च भयानाम्' इति निरुक्तव्युत्पत्त्या शंयोरिति शब्दः पोष्यते। शंयोरिति पदनामसु पठनेनेह 'शग्मम्' इति व्याख्यातम्। यजुर्भाष्ये च "शंयोः कल्याणवतः साधनात् कर्मणः सुखवतो वा इति 'शंयोः' सुखादर्थादभ्यासपाठेन शंयोः शिवं शंयोः शग्ममिति च प्रपद्ये" इति तत्र स्पष्टीकृतम्। यद्यपि शिवं शग्ममिति च सुखनामसु पठितं सामान्यतया, तथापि सूक्ष्मभेदाकलनमृषिणा कृतमिति तत्त्वम्।

अथ वानप्रस्थविषयः संक्षेपतः

१४९५ पृ०, ७ पंक्तितः १४९६ पृ०, ५मीं पंक्तिपर्यन्तं शाङ्करभाष्यादवतारितम्। तत्र नास्योपज्ञालेशश्लेषः। यदाह—"सर्वेष्वाश्रमेष्वध्ययनं यज्ञो दानं च' इति, तन्न, प्रथमान्त्ययोर्दारयोगाऽभावेन दम्पत्योः सहाधिकारनियमेनाग्निहोत्रादिकर्मानधिकारात्।" इति, तत्त्वविचार-फलम्। 'अत्र सर्वेष्वाश्रमेषु' इत्यवतरणस्य 'अत्र' इति पदं मुक्तमिति छलम्। अत्रेति पदेन

पारमार्थिक और शिव को लौकिक सुख बताया है। तनूकरणार्थक 'शो' धातु से 'श्यति पापम्' अर्थात् पाप को क्षीण करनेवाला तथा 'शिष्' हिंसार्थक से भी दुःख का हिंसन करनेवाला शिव व 'शिवु कल्याणे' से भी शिव शब्द सिद्ध होता है। रोगों के शमन और भय के अमिश्रण करने से 'शंयोः' शब्द सिद्ध होता है। इसका अर्थ 'शग्म' है और यजुर्वेद-भाष्य में ऋषि ने 'शंयोः' के शिव और शग्म दोनों अर्थ किये हैं। यद्यपि 'शिवं शग्मम्' ये दोनों निघण्टु में सुख-नामों में पढ़े गये हैं, तथाऽपि ऋषि ने यहाँ पर सूक्ष्म भेद का आकलन कर दिया है। यह ऋषि की प्रतिभा का वैशिष्ट्य है।

वानप्रस्थ-विषय

१४९५ पृष्ठ, ७ पंक्ति से १४९६ पृ० की ५वीं पंक्ति तक इस लेखक ने शाङ्करभाष्य उतार दिया है। इसमें इनकी अपनी प्रतिभा का लेश भी नहीं है। यह कथन कि—"सभी आश्रमों में अध्ययन, यज्ञ, दान का विधान है, यह भूमिका-कथन गलत है; क्योंकि प्रथम और अन्तिम आश्रम के लिये स्त्री का सम्बन्ध मान्य नहीं है। अग्निहोत्र प्रभृति कर्मों में दम्पती का एक साथ अधिकार बताया गया है। अतः यज्ञ का सम्बन्ध सभी आश्रमों के साथ नहीं।" यह सारा कथन शास्त्रों का चिन्तन न करने का फल है। ऋषि ने 'अत्र सर्वेषु आश्रमेषु' यह कहा है, तो यहाँ तक

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्रह्मचर्यगृहस्थवानप्रस्थानामेव वर्णितत्वाद् ग्रहणम्। प्रथमाश्रमस्य दारयोगाऽभावेऽग्निहोत्रस्य यदविधानमुपन्यस्यते तदपि शास्त्रानध्ययनफलम्, तत्राग्निहोत्रविधेः प्रतिपादनात्। यथा समावर्त्तनं यावद् होमादिकर्तव्यकर्मविधानम्—

अग्नीन्धनं भैक्षचर्यामधः शय्यां गुरोर्हितम्।
आसमावर्तनात् कुर्यात् कृतोपनयनो द्विजः॥ मनु० २। १०८॥

ब्रह्मचारिणो दैनिकनियमेषु—

नित्यं स्नात्वा शुचिः कुर्याद् देवर्षिपितृतर्पणम्।
देवताभ्यर्चनं चैव समिदाधानमेव च॥ मनु० २। १७६॥

दूरादाहृत्य समिधः सन्निदध्याद् विहायसि।
सायम्प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः॥ मनु० २। १८६॥

इत्यादिप्रमाणैर्ब्रह्मचारिणोऽग्निहोत्रविधानमुपलभ्यते।

अर्थात् ब्रह्मचर्य, गृहस्थ और वानप्रस्थ आश्रमों में विधान है। करपात्रीजी ने 'अत्र' पद को महत्त्वपूर्ण समझकर या नासमझी में यहाँ उद्धृत न कर छल-बल का आश्रय लिया है। प्रथम ब्रह्मचर्य में दारयोग न होने पर अग्निहोत्र का अविधान करना भी शास्त्र के न पढ़ने का द्योतक है; क्योंकि वहाँ भी अग्निहोत्र का विधान किया गया है। जैसा कि समावर्त्तन तक होमादि कर्तव्य बताया गया है—

'यज्ञोपवीत संस्कार में दीक्षित द्विज अग्निहोत्र करना, भिक्षावृत्ति, भूमिशयन, गुरुसेवा समावर्तनसंस्कार तक करे।' (मनु० २। १०८)

ब्रह्मचारी के दैनिक नियमों में—

'प्रतिदिन विद्वानों, ऋषियों, ज्ञानवयोवृद्ध व्यक्तियों की अभिवादन आदि प्रसन्नताकारक कार्यों से तृप्ति और स्नान करके, शुद्ध होकर परमात्मा की उपासना और अग्निहोत्र किया करें।' (मनु० २। १७६)

'दूर से समिधाएँ लाकर इन्हें खुले स्थान में रख दे। फिर उनसे आलस्यरहित होकर सायं प्रातः अग्निहोत्र करे।' (मनु० २। १८६)

इत्यादि प्रमाणों से ब्रह्मचारी के लिए अग्निहोत्र का विधान है।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वानप्रस्थाश्रमिणो विधानं मनुना कृतमग्निहोत्रादीनाम् । यथा—

वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक् ।।६ । ११ ।।
इत्यत्र बलिवैश्वविधानम्—

देवताभ्यस्तु तद् हुत्वा वन्यं मेध्यतरं हविः ।
शेषमात्मनि युञ्जीत लवणं च स्वयं कृतम् ।।६ । १२ ।।

इत्येवं प्रथमान्त्ययोर्दारयोगाभावेन अग्निहोत्रानधिकारसूचकोऽपि पाठो जनप्रतारणाय, नह्यत्र संन्यासिनोऽग्निहोत्रविधानमृषिणा क्वाप्युद्दिष्टम् । यदत्र छलेनान्त्यशब्देनाऽयं संन्यासाश्रमग्रहणं करोति, तत्त्वनुक्तमृषिणा, 'ब्रह्मसंस्थोऽमृतत्वमेति' (छान्दो० प्रपा० २ । खं० २३) इत्यनेन संन्यासाश्रमप्रकरणे संन्यासिनो ग्रहणात् । एवमध्ययनं यज्ञो दानं च त्रिष्वप्याश्रमेषु घटन्ते ।

यस्मिन्नाश्रमे यदेव धनं भविष्यति तदेव खलु दास्यति, एवं ब्रह्मचर्ये वानप्रस्थे च विद्याद्युत्तमगुणदानं करिष्यते ।

वानप्रस्थियों का भी अग्निहोत्र-विधान देखिये—

'वसन्त और शरद् के पवित्र मुन्यन्नों को स्वयं लाकर यज्ञीय हवि की विधि के अनुसार पुरोडाश और चरुओं को यथाविधि पृथक् रखे ।' (मनु० ६ । ११)

'वन में उत्पन्न अत्यन्त पवित्र उस हविष्यान्न से देवों के उद्देश्य से हवन करके बचे हुए अन्न का भोजन करें तथा स्वयं बनाए हुए लवण को काम में लावे ।' (मनु० ६ । १२)

इस प्रकार आदि और अन्त्य में स्त्री-भोग न होने से अग्निहोत्र का अधिकार नहीं है, ऐसा कथन तो शास्त्रशून्य लोगों को ठगने के लिए है । ऋषि ने यहाँ कहीं पर संन्यासी के लिए अग्निहोत्र का विधान नहीं कहा है । यहाँ छल से अन्त्य अर्थात् संन्यासी ग्रहण करना भी इनकी मनमानी है । छान्दोग्यप्रकरण से कि 'ब्रह्म में अर्थात् संन्यासी लोग मोक्षमार्ग को प्राप्त होते हैं' यहाँ संन्यासाश्रम प्रकरण में संन्यासी का ग्रहण किया है । इस प्रकार अध्ययन, यज्ञ, दान तीन आश्रमों में घटित होते हैं ।

जिस आश्रम में जो धन होगा, उसी का दान किया जायेगा । इस प्रकार ब्रह्मचर्य और वानप्रस्थ में विद्या आदि उत्तम गुण धन का दान किया जायेगा ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

आचार्यशङ्करेणाऽपि 'सर्वे एते त्रयोऽप्याश्रमिणो यथोक्तैर्धर्मैः पुण्यलोका भवन्ति' इत्युक्त्वा महर्षेराशय एव समर्थ्यते।

पृ० १४९६, पं०—यदाह—"यज्ञतपोदानानामेकत्वलक्षणं प्राथम्यमुक्तम्।" इत्यत्र तपः-शब्दस्य प्रथमस्कन्धे पठनं त्वस्य प्रामादिकमेव। यच्च—"प्रथमो ब्रह्मचारी सुशिक्षाधर्मानुष्ठाने-नाचार्यकुले वसतीति तु विरुद्धम्" इति, वस्तुतस्तु भवत्कथनमेव विरुध्यते, भूमिका-ऽभिप्रायानवगमात्। महर्षिदयानन्दाचार्यशङ्कराभ्यां त्रयाणामपि स्कन्धानां सर्वेष्वेतेषु त्रिष्वप्याश्रमेषु पुण्यलोकसाधनत्वमुक्तम्। तस्मात् प्रथमद्वितीयतृतीयशब्दानां स्कन्धाना-माश्रमाणामुभयेषामपि ग्रहणं जायते। प्रथमस्कन्धे पठितं त्रिकमपि आश्रमक्रमेण भूमिकाया-मन्वितं प्राधान्येन। यथा—अध्ययनं यज्ञो दानमिति, परमेतत्त्रयस्य प्रत्येकाश्रमेऽप्यन्वयो भविष्यति। एवं प्रथमाश्रमस्थो ब्रह्मचारी अध्ययनं तपोऽनुष्ठानपूर्वकं परमेश्वरनिष्ठया सर्वविद्याज्ञानञ्च करोति। अयं हि आचार्यकुलवसनशीलः। अग्रेऽप्युन्नेयं यथा—आश्रमोऽपि द्वितीयः स्कन्धोऽपि द्वितीयो यज्ञः। एतस्य गृहमेधिनस्तपसाश्रमानुकूलधर्मानुष्ठानम्। अत्र

आचार्य शंकर ने भी 'ये तीनों आश्रमी यथोक्त धर्मों से पुण्यलोकभागी होते हैं।' यह कहकर ऋषि की ही बात का समर्थन किया है। दुर्जनतोषन्याय से यज्ञ, अध्ययन, दान चारों आश्रमों को मान लें तो वहाँ द्रव्यमय यज्ञ से लेकर शतपथ के 'यज्ञेनाराकेन =नाशरहितेन विज्ञानेन' नाशरहित विज्ञानार्थ ग्रहण कर लीजिए। शेष दोनों संगत हैं।

पृ० १४९६ पं० ८—यह कहना कि—"यज्ञ, तप और दान तीनों को एकत्र कर प्राथमिकता बताई गयी है।" यहाँ पर 'तपः' शब्द का प्रथम स्कन्ध (अवयव) में करपात्र द्वारा पढ़ना तो प्रामादिक है। यहाँ पर "प्रथम जो ब्रह्मचारी है, वह तप अर्थात् वेदोक्त धर्मानुष्ठान, आचार्यकुल में निवास तथा तृतीय परमेश्वर का ठीक-ठीक स्वरूप ज्ञान विचार करते हुए विद्याध्ययन करे।" इसमें पूर्वोक्त से कोई विरोध नहीं, अतः आपका कथन ही विरुद्ध है; क्योंकि आपने भूमिका का अभिप्राय ही नहीं समझा। महर्षि दयानन्द और भगवत्पाद शङ्कर दोनों ने ही यज्ञादि स्कन्धों का तीनों आश्रमों में पुण्यलोक का साधन माना है। इसलिये प्रथम, द्वितीय और तृतीय शब्दों का अन्वय यज्ञादि स्कन्ध और ब्रह्मचर्यादि तीन आश्रम, दोनों से ग्रहण किया जाता है। प्रथम स्कन्ध में पढ़ा हुआ यज्ञादि त्रिक आश्रम क्रम से प्रधानरूप में भूमिका में अन्वित दिखाया है। जैसे—प्रथमाश्रमस्थ ब्रह्मचारी प्रधानरूप से तप (एक), अनुष्ठान (द्वितीय) और परमेश्वर का निष्ठापूर्वक अध्ययन (तृतीय) करे। यह आचार्यकुल में वसनशील भी हो। आगे भी इसी प्रकार समझना चाहिये। यथा—आश्रम भी दूसरा (गृहस्थ) और स्कन्ध भी दूसरा—यज्ञ अर्थात् कर्मकाण्ड का अनुष्ठान। यह भी तपःपूर्वक हो तथा प्रथम स्कन्ध का अध्ययन जो ब्रह्मचारी को प्रमुख था, वह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रथमस्कन्धस्यापि यथाविधानं पालनम्। एवं तृतीयाश्रमे तृतीयस्य स्कन्धस्य 'अत्यन्तमात्मानमाचार्यकुले वानप्रस्थाश्रमोपदेशकुशलाचार्यकुले अत्यन्तमवसादयन् हृदये विचारयन्नेकान्तदेशं प्राप्य सत्यासत्ये निश्चिनुयाद् वानप्रस्थाश्रमी' इत्यात्मकस्य पालनम्। अत्रापि प्रथमत्रिकस्य स्कन्धस्य द्वितीयस्य वा यज्ञस्य तथा विशेषरूपेणान्तिमस्य विशेषेण पालनम्।

यदुच्यते—"अवपूर्वस्य सदेर्नाशार्थत्वप्रसिद्धेः' भूमिकोक्तमिदं विरुद्धं व्याख्यानम्" इत्यपि वास्तविकार्थानूहनफलमेव। अत्र हि 'अत्यन्तमवसादयन् आत्मानमेकान्तदेशे तत्त्वज्ञानार्थं क्लेशं सहमानः' इत्येवार्थः। अवपूर्वसदेर्नाशार्थस्यैव प्रतिपादनं तु शब्दार्थकोशाननुशीलनमेवान्यार्थस्यापि प्राप्तेः।

पृ० १४९६, पं० १०—यदाह—"वानप्रस्थ एव ब्रह्मात्मविचारे सम्पन्ने संन्यासाश्रमस्य वैयर्थ्यापाताच्च" इति तु तत्त्वार्थानवबोधादेव। तत्राश्रमे 'हृदये विचारयन्नेकान्तदेशं प्राप्य

गृहाश्रम में गौणरूप से पालनीय है। इसे घर में रहना है, आचार्यकुल में नहीं। इसी प्रकार तृतीय वानप्रस्थाश्रम में तृतीय स्कन्ध अर्थात् 'सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते' के अनुसार ब्रह्मदान (वेदविद्याप्रचार) से स्वयं को वानप्रस्थाश्रमोपदेशकुशल आचार्यकुल में स्वयं को अत्यन्त कसता हुआ हृदय में ईश्वर-विचार करता हुआ एकान्तदेश में जाकर सत्यासत्य का निश्चय करे।

यह कहना कि "अवपूर्वक 'सद्' धातु का अर्थ नाश होता है, यदि वानप्रस्थ में ही ब्रह्म विचार कर लिया गया, तो संन्यास व्यर्थ होगा" ठीक नहीं; क्योंकि आपने भूमिका के इस सारभूत संक्षिप्त स्थल का मनन ही नहीं किया। यहाँ पर 'क्लेश को सहता हुआ स्वयं को आराम से दूर रखे' यह अर्थ है। अवपूर्वक 'सद्' धातु का प्रयोग नाश अर्थ में ही होता है, इस कथन में कोई प्रमाण नहीं दिया। इससे प्रतीत होता है कि इन्होंने शब्दार्थकोश का अनुशीलन नहीं किया है। वस्तुतः अवसादन के कष्ट, पीड़न, हिंसा आदि अर्थ होते हैं। अन्यथा 'पङ्के गौरिव सीदति' या 'सीदद्भिः कुष्यमिच्छद्भिः' में कष्ट सहन अर्थ नहीं माना जा सकेगा। नाश अर्थ यहाँ पर भी मानना चाहिए; क्योंकि विशरण और गति अर्थ तो हैं नहीं, और धातु का तीसरा अर्थ 'अवसादन' अर्थात् आपके मत में केवल नाश ही अर्थ है, तो अन्यार्थ प्राप्त नहीं होंगे।

पृ० १४९६, पं० १०—यह कथन कि—"वानप्रस्थ में ही जब ब्रह्मविचार सम्पन्न हो जाएगा तो संन्यास धारण करना व्यर्थ आ पड़ेगा" ठीक नहीं है; क्योंकि इससे प्रतीत होता है कि आपने तत्त्वार्थ समझा ही नहीं। महर्षि की शब्दावलि पर ध्यान दीजिए—'हृदय में विचार करते हुए एकान्तदेश को प्राप्त कर सत्याऽसत्य का विनिश्चय करे' अर्थात् विचार वा स्वाध्याय कर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्यासत्ये विनिश्चिनुयात्' इति पाठेन विध्यादिषु लिङ्विधानाद् विनिश्चयं कुर्यादित्येवानुदेशः । न हि ब्रह्मविचारस्य सम्पन्नताऽत्र प्रतिपादिता । अतएव विनिश्चयानन्तरं 'तमेतं वेदानुवचने विविदिषन्ति, विदित्वा च प्रव्रजन्ति' इति शतपथेऽग्र उक्तम् ।

एवं न यथाश्रुतार्थातिक्रमो निर्दिष्टो न वाऽपि क्वापि भूमिकाव्याख्यानं श्रुतिपाठं विरुणद्धि, अपि तु संस्कृतार्यभाषाभ्यां तद्भावं स्पष्टं व्याचष्टे ।

महर्षिणा 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यस्य भाष्यं 'चतुर्थो ब्रह्मसंस्थः संन्यासी अमृतत्वम् एति प्राप्नोति' इति शङ्कराचार्योऽपि पुष्णाति । अस्य पारिजातकृतस्तु न किञ्चिदप्यत्र स्वोपज्ञत्वम्, केवलं शाङ्करभाष्यमेवान्वक्षरमवातारयत् पुस्तककलेवरवर्धनार्थम्, तदपि च नाम नाऽस्य प्रयोजनं साधयति ।

पृ० १४९९, अनु० १—यदुक्तम्—"यस्य पुत्रैषणा तस्यावश्यं वित्तैषणाऽपि भवति, यस्य वित्तैषणा तस्य निश्चयेन लोकैषणा भवति, यस्यैका लोकैषणा भवति तस्योभे पूर्वे पुत्रैषणावित्तैषणे भवतः' इति, तत्तु सर्वथा विशृङ्खलम्, वेदाक्षरबहिर्भूतत्वात् ।" इत्यपि

संयत रह सत्य में श्रद्धा और असत्य में अश्रद्धा करे । महाशय ! विचार करने पर तो सविचार समाधि होती है, उत्तम निर्विचार समाधि के लिए तो संन्यास की आवश्यकता भी यहाँ ध्वनित हो रही है । दूसरे यहाँ पर विचार की सम्पन्नता हो गई, ऐसा भी नहीं कहा गया है । अतएव विनिश्चय विचार और जानने के बाद भी प्रव्रज्या तो शेष रह ही गई । इसीलिये तो शतपथकार ने कहा है कि—'इसे वेद के अनुवचन में जानना चाहते हैं या प्राप्त करना चाहते हैं । तदनन्तर प्रव्रजन करते हैं' और प्रव्रजन तीव्र वैराग्य की स्थिति में होता है ।

इस प्रकार यथाश्रुत अर्थ का न तो अतिक्रमण है और न कहीं भूमिकार्थ में श्रुतिपाठ का विरोध है, प्रत्युत संस्कृत व आर्य भाषा में उसका स्पष्ट व्याख्यान है ।

महर्षि के 'ब्रह्मसंस्थः अमृतत्त्वमेति' के भाष्य की पुष्टि 'चौथा ब्रह्मसंस्थ संन्यासी अमृतत्त्व को प्राप्त करता है' इस शाङ्करवचन से भी होती है । पारिजातकार ने यहाँ जो भी कहा है, वह उसकी बुद्धि की कुछ भी उपज नहीं, यहाँ शाङ्कर भाष्य उतार दिया है । वह भी इनके प्रयोजन को सिद्ध नहीं कर पाया, केवल पुस्तक-कलेवर बढ़ाया है ।

पृ० १४९९, अनु० १—"स्वामी दयानन्द ने इसका अर्थ किया है कि जिसकी पुत्रैषणा रहती है, उसकी वित्तैषणा भी रहती है, उसको लोकैषणा भी अवश्य होगी । जिसको अकेली लोकैषणा रहती है, उसके साथ भी पहले की पुत्रैषणा और वित्तैषणा लग जाती हैं, किन्तु यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अविचारचारु, तत्सूक्ष्मतात्पर्यानाकलनात्। ऋषिणा तु स्पष्टतयाऽत्र विवृत्तिर्विहिता। एषणात्वेनाऽभेदेऽपि लोकैषणाया उक्तोभे मूलम्। यदि तिसृणामप्यभेदत्वमभविष्यत्, न तदा भेदत्रितयमपि समभविष्यत्। भवेन्नाम फलार्थत्वेन अभिन्ना, परं स्वरूपतस्तु भिन्नतैव। एवं भ्रामकवाक्यजालेनैतस्य छलनमेवास्ति।

पृ० १५००, पं० ४—यदुच्यते—"यज्ञेन नाशरहितेन विज्ञानेन धर्मक्रियाकाण्डेन चैतं परमात्मानं विदित्वा मुनिर्भवति' इति, तत्तुच्छम्, कर्मणां विज्ञानानामुत्पत्तिमतां समेषामेवानित्यत्वे भङ्गुरत्वाविशेषात्। 'परमेश्वरः प्राप्यो लोको दर्शनीयश्चास्ति' इत्यपि न सङ्गतम्, प्राप्यस्य ग्रामादेरिव परिच्छिन्नत्वेनानित्यत्वापातात्। दर्शनीयस्यापि घटादेरिवानित्यत्वमेव। सिद्धान्ते स्वात्मभूतत्वे नित्यप्राप्तत्वात् स्वप्रकाशत्वाच्चाविद्याव्यवधानिवृत्त्यैव तदद्वयोपपत्तिः।" इति।

तदपि छलवचनम्। नह्यत्र नाशवद् धर्मक्रियाकाण्डं विशेष्यते नाशरहितेनेतिशब्देन,

---

व्याख्या सर्वथा निराधार है और वेद के अक्षरों के प्रतिकूल भी है।"

पर पारिजातकार का यह आरोप विचार करने पर निःसार है, क्योंकि महर्षि के कथन का सूक्ष्म तात्पर्य इन्होंने नहीं समझा। ऋषि ने विस्पष्ट बताया है—परमात्मप्राप्ति की इच्छा तथा तद्भिन्न अन्य तीनों इच्छाएँ इच्छामात्र होने से तो एक हैं, पर स्वभावतः भिन्न हैं। पर लोकैषणा के पूर्वोक्त दोनों मूल हैं, क्योंकि काम से पुत्रैषणा, पुत्र के प्रति मोह से पालनार्थ वित्तैषणा, धनार्जन के लिए लोभ से लोकैषणा (प्रतिष्ठास्तुति निन्देच्छा) होती है। साध्य-साधन की बात उठाना वाग्जाल है। श्रीमन्! महर्षि की दृष्टि में संन्यास-प्रकरण में लोकैषणा न साध्य हैं और न उनकी साधनपूर्वेच्छाएँ कही गई।

पृ० १५००, पं० ४—आपका कहना है कि—"यज्ञ अर्थात् नाशरहित विज्ञान से और धर्मक्रियाकाण्ड से इस परमात्मा को जानकर मुनि होते हैं, यह भूमिकोक्त कथन तुच्छ है; क्योंकि सभी विज्ञानात्मक कर्म उत्पत्तिशील और नश्वर हैं। 'परमेश्वर प्राप्य और दर्शनीय है' यह सङ्गत नहीं है; क्योंकि परमेश्वर को प्राप्य मानने पर ग्राम प्रभृति नश्वर प्राप्य वस्तुओं के समान वह (परमेश्वर) भी परिच्छिन्न और अनित्य हो जायेगा। दर्शनीय भी घटादि के समान अनित्य ही होगा। हमारे मत में तो परमात्मा अपना ही स्वरूप है, यह तो हमें सदा से ही प्राप्त है और स्वयं प्रकाशित हो रहा है। उसकी अविद्या का आवरण हट जाने मात्र से प्राप्ति हो जाती है।"

करपात्रीजी का सब कथन हेत्वाभास और छल से भरा हुआ है। यहाँ नाशवत् का नाशरहित विज्ञान विशेषण कैसे सम्भव है? यह व्यक्ति न जाने बुद्धि को कहाँ गिरवी रख देता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रत्युत तद्विज्ञानं विशेष्यते, येन परमेश्वरज्ञानं भवति। यथा चाह—'विज्ञानेनेदं सर्वम्'। यज्ञशब्दस्यार्थद्वयं विज्ञानं धर्मक्रियाकाण्डं च। अत्र चकारो नोपेक्षणीयः।

इदं तु मौढ्यमाश्रयते वचनं यदाह प्राप्यः सर्वोऽपि ग्राम इव नश्वरत्वात् परिच्छिन्नोऽनित्यः स्यादीश्वरोऽपि, तथा ग्रामादीनां दूरता देशकृता दिशाकृता वा। न ग्रामादयो व्यापकत्वात् प्राप्ताः पूर्वतः। परमीश्वरस्तु प्राप्तो व्यापकत्वात्, परं जीवात्मा तमप्राप्त एव ज्ञानकृतदूरत्वात्। दर्शनीयत्वकथनमपि न त्वदाराध्यमूर्तित्वमभिप्रैति, किन्तु जीवात्मनो ज्ञाननेत्रेण प्रत्यक्षीकरणमेवाभीप्सितम्।

यं सिद्धान्तं घोषयते यत् स्वात्मभूतो हि परमात्मा स तु सदाप्त एवेति नैव सत्यम्, प्रत्युत भवदज्ञानमेव वक्ति। तथात्वे ज्ञानस्वरूपे तव दृष्ट्या दयानन्दस्यापि ब्रह्मत्वे तन्मतस्याखण्डनीयत्वापत्तेः।

भवतोऽविद्याया ब्रह्मण्यावृते संसारावस्थायामानन्दप्रतीतिर्न भवतीति न युक्तम्, चितेर्नित्यत्व आनन्दस्वरूपत्वे च न प्रच्युतिस्तस्या आनन्दस्वरूपात्। प्रच्युतौ वा का आनन्द-

---

है, जबकि शतपथ का पाठ ही 'अनाशकेन' है। वस्तुतः उपनिषदों का 'तद्विजिज्ञासस्व' ही विज्ञान अभीष्ट है। यहाँ विज्ञानात्मक कर्मकाण्ड कहा ही नहीं गया है, प्रत्युत विज्ञान और कर्मकाण्ड दोनों अभीष्ट हैं, विशेषण-विशेष्यभाव यहाँ नहीं है, यह बात 'चकार' से स्पष्ट है।

और यह कथन तो मूढ़तासम्पन्न ही है कि 'प्राप्य सभी ग्राम्य के समान परिच्छिन्न और अनित्य होते हैं'। महाशय! बुद्धि को तिलाञ्जलि क्यों दे दी है? ग्रामादि की दूरता तो देश और दिशाकृत है, पर ईश्वर व्यापक होने से जीव से दूर नहीं है, केवल ज्ञानकृत दूरी है। वह दूरी ब्रह्मविद्या अर्थात् विज्ञान के द्वारा दूर हो सकती है। दर्शनीय से आपकी स्थूल दृष्टि केवल आँखों से दृश्यमान मूर्ति तक ही पहुँच पाती है। किन्तु यहाँ जीवात्मा के ज्ञान के नेत्रों से ही परमात्मा का प्रत्यक्ष करना अभीप्सित है।

जिस सिद्धान्त की ये घोषणा कर रहे हैं कि परमात्मा स्वात्मा ही है, जो सदा प्राप्त है, प्राप्तव्य नहीं, यह सत्य नहीं है, किन्तु आपका अज्ञान बोल रहा है। वैसा ज्ञानस्वरूप होने पर तुम्हारी और दयानन्द की ज्ञानदृष्टि में भेदाऽभाव होने पर दयानन्द के ब्रह्मस्वरूप होने पर उनके मत की अखण्डनीयता आ जायेगी।

आपके ब्रह्म के अविद्या द्वारा आवृत होने पर आनन्द की प्रतीति नहीं होती, यह कहना उचित नहीं है। उस सर्वव्यापक चिति के नित्य होने पर तो आनन्दस्वरूप से उसकी प्रच्युति कदाऽपि सम्भव नहीं होनी चाहिये, यदि होती है तो प्रच्युति होने पर आनन्दस्वरूप की नित्यता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वरूपनित्यता स्यात् ? तस्मान्नित्य आनन्दो नित्यया चित्या चेत्यमानो द्वयोरप्यवस्थयोरविशेषेण चेत्यते। न चैवमस्ति, संसारावस्थायामुत्पन्नापवर्गिणो विषयेन्द्रियाधीनज्ञानस्य सुखस्यानुभवात्। तस्मान्नित्यशुद्धबुद्धमुक्तस्वभावः परमात्मा जीवात्मनो भिन्नः।

आत्मानश्चाऽप्यनेके, यतो नानाभेदभाविनां ज्ञानसुखादीनामन्याप्रतिसन्धानम्। ऐकात्म्ये हि यथा बाल्यावस्थायामनुभूतं वृद्धावस्थायामनुसन्धीयते मम सुखमासीन् मम दुःखमासीदिति, एवं देहान्तरानुभूतमप्यनुसन्धीयेत अनुभवितुरेकत्वात्। न चैवमस्ति, अतः प्रतिशरीरं नानात्मानः।

यथा सर्वत्रैकाकाशस्य श्रोत्रत्वे कर्णशष्कुल्याद्युपाधिभेदाच्छब्दोपलब्धि-व्यवस्था, तथात्मैकत्वेऽपि देहभेदादनुभवादिव्यवस्था चेद् ?

विषमोऽयमुपन्यासः, प्रतिपुरुषं व्यवस्थिताभ्यां धर्माधर्माभ्यामुपगृहीतानां शब्दोपलब्धिहेतूनां कर्णशष्कुलीनां व्यवस्थानाद्युक्ता तदधिष्ठाननियमेन शब्दग्रहणव्यवस्था। ऐकात्म्ये तु धर्माधर्मयोरव्यवस्थानाच्छरीरव्यवस्थाऽभावे किंकृता सुखदुःखोत्पत्ति-

---

अक्षुण्ण कैसे रहेगी ? इसलिये आनन्दानुभूति नित्य चिति के द्वारा नित्यरूपेण अनुभूत होती रहनी चाहिये, पर होती नहीं। संसारावस्था व अपवर्गावस्था दोनों में आनन्दानुभूति एक सी नहीं होती। संसारावस्था में इन्द्रियजन्य सुख की ही अनुभूति होती है। इससे सिद्ध है कि इन्द्रियवान् आत्मा परमात्मा से भिन्न है।

आत्मा के अनेक होने में यही युक्ति है कि एक आत्मा के ज्ञानसुखादि का दूसरे को स्मरण नहीं होता। आत्मा अगर एक माना जाये तो जैसे बाल्यावस्था का वृद्धावस्था में स्मरण होता है, वैसे ही और देहों का भी स्मरण होना चाहिये, मगर नहीं होता, अतः प्रत्येक शरीर के आत्मा भिन्न-भिन्न हैं।

प्रश्न—जैसे यह नियम है कि आकाश के एक होने पर भी कर्णशष्कुलीरूप उपाधि से युक्त आकाश से ही शब्द सुना जाता है, वैसे ही आत्मा के एक होने पर भी जिस देहरूप उपाधि से युक्त होकर यह जिन सुखादि का अनुभव करता है, उस देहरूप उपाधि से युक्त आत्मा ही उन सुखादि का स्मरण भी करेगा, दूसरा आत्मा नहीं, यह व्यवस्था भी की जा सकती है। एतदर्थ आत्मा को नाना मानने की आवश्यकता नहीं है।

उत्तर—प्रत्येक पुरुष की शब्दोपलब्धि की अदृष्ट से कर्णशष्कुलीरूप कारण की कल्पना की गई है, अतः यह ठीक है कि उसी कर्णशष्कुलीरूप उपाधि से युक्त आकाश (श्रवणेन्द्रिय) से ही शब्द का प्रत्यक्ष होता है, औरों से नहीं। किन्तु आत्मा को एक मान लेने से धर्म और अधर्म की कोई व्यवस्था नहीं रहेगी, फिर सुख-दुःखादि की भी व्यवस्था नहीं होगी और सुख-दुःखादि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्यवस्था ? मनःसम्बन्धस्याऽपि साधारणत्वात्। यस्य तु नानात्मानः, तस्य सर्वेषामात्मनां सर्वगतत्वेन सर्वशरीरसम्बन्धेऽपि न साधारणो भोगः। यस्य कर्मणा यच्छरीरमारब्धं तस्यैव तदुपभोगायतनं न सर्वस्य। कर्माऽपि यस्य शरीरेण तस्यैव तद् भवति, नाऽपरस्य, एवं शरीरान्तरनियमः कर्मान्तरनियमादित्यनादिः। 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति जीवपरमात्मनोस्तादात्म्यश्रुतिविरोधाद् जीवात्मनः पृथगेवावस्थितिः परमात्मनः।

आचार्यशङ्करोऽपि जीवब्रह्मणोर्भेदं स्पष्टं कुर्वन्नाह—

"नन्वीश्वरोऽपि शरीरे भवति, सत्यम्। शरीरे भवति न तु शरीर एव भवति (शरीराद् बहिरपि भवति), जीवस्तु शरीर एव भवति, तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्।" (शां० भा० १।२।३)

अविद्याऽऽवरणं न ब्रह्मणि सम्भवतीति बहुधा प्रथमखण्डे निगदितम्। मनुरपि न्यायाधीशसमक्षे साक्ष्यं प्रस्तुवन्तं पुरुषं सत्यभाषणप्रेरणाय आह—

का नियम भी नहीं रहेगा; क्योंकि मन का सम्बन्ध तो सभी देहों में समान ही है, अतः उक्त आक्षेप असङ्गत है। यद्यपि जिन के मत में आत्माएँ अनेक हैं, उनके आत्मा सभी मूर्त्त द्रव्यों के साथ सम्बद्ध हैं, फिर भी भोग के सर्वसाधारण की आपत्ति नहीं होती है; क्योंकि जिस आत्मा के कर्म से जो शरीर उत्पन्न होगा, वह कर्म उसी आत्मा का होगा, अन्य आत्माओं का नहीं। इसी प्रकार अन्य शरीर और अन्य कर्मों की व्यवस्था समझनी चाहिये। 'इस जीवात्मा से अनुप्रवेश करके नामरूप करता हूँ' इस श्रुति से भी परमात्मा से जीवात्मा की पृथक्ता सिद्ध है, अतः अद्वैतसिद्धान्त तर्कसङ्गत नहीं ठहरता।

आचार्य शङ्कर भी जीव और ब्रह्म के भेद को स्पष्ट कह रहे हैं—

"ईश्वर भी शरीर में होता है, हाँ होता है, किन्तु शरीर में ही होता है ऐसा नहीं, शरीर से बाहर भी होता है। किन्तु जीव शरीर में ही होता है, अपने भोग के अधिष्ठान शरीर से बाहर उसकी वृत्ति का अभाव है।" (शां० भा० १।२।३)

अविद्या से बृहत्तम ब्रह्म का आवरण नहीं हो सकता। इस विषय पर प्रथम खण्ड में बहुत कुछ कहा जा चुका है। मनु ने न्यायाधीश के समक्ष साक्षी को सत्य-भाषण की प्रेरणा देते हुए कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एकोऽहमस्मीत्यात्मानं यत्त्वं कल्याण ! मन्यसे ।
नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ॥८ । ९१ ॥

वस्तुतस्तु सापेक्षत्वादेव जीवब्रह्मणोर्नैवैक्यम् । तथाहि—

प्राचीं प्रतीची हि सुखं हि दुःखं हानिं च लाभो लघुतां महत्त्वम् ।
विदूरतामन्तिकता तथैव, सर्वज्ञताल्पज्ञमपेक्षते वै ॥

अतः सर्व एतस्य प्रलाप एव ।

पृ० १५००, अनु० २—यदाह—"किञ्च, वेदादिप्रामाण्यानभ्युपगन्तॄणां पुत्रवित्तैषणयोः सत्त्वेऽपि न लोकैषणा भवति, तेषां परलोकविश्वासाभावात् । न चात्र सम्मानप्रतिष्ठाकामनैव लोकैषणेति वाच्यम्, प्रकरणविरोधात् । तथाहि—'पुत्रेणायं लोको जय्यः, कर्मणा पितृलोकः, विद्यया देवलोकः ।" इति ।

तदपि शास्त्रतात्पर्यानवबोधादेव । अत्रेयं नास्तिकानां परलोकेऽविश्वासाद् लोकैषणामेतल्लोकगतां न मन्यते, एषैव युक्तिः परमन्यं लोकं साधयति । अर्थाद् यदा पुत्रेणायं

'हे कल्याण की इच्छा करनेवाले पुरुष ! जो तू 'मैं अकेला हूँ' ऐसा अपने आत्मा में जानकर मिथ्या बोलता है, सो ठीक नहीं है, किन्तु दूसरा तेरे हृदय में अन्तर्यामी रूप से पुण्य-पाप का देखनेवाला मुनि परमेश्वर स्थित है । उस परमात्मा से डरकर सदा सत्य बोला कर ।'(मनु० ८ । ९१)

वस्तुतः सापेक्षता के कारण भी जीव और ब्रह्म की एकता नहीं है । यथा—

प्रतीची (पश्चिम) दिशा पूर्व की, सुख दुःख की, लाभ हानि की, महत्त्व लघुता की, पास दूर की अपेक्षा रखते हैं, उसी प्रकार सर्वज्ञता अल्पज्ञ की अपेक्षा रखती है ।

अत एव इस लेखक का यह सारा प्रलाप ही है ।

पृ० १५००, अनु० २—"एक बात और भी है, जो व्यक्ति वेद प्रभृति को प्रमाण नहीं मानते, उनमें पुत्र और वित्त की एषणा तो हो सकती है, किन्तु लोकैषणा न हो पायेगी, क्योंकि उनका परलोक में विश्वास है ही नहीं । लोकैषणा का अर्थ लौकिक सम्मान आदि की प्रतिष्ठा नहीं है; क्योंकि ऐसा अर्थ प्रकरणविरुद्ध पड़ेगा । यहाँ तो बताया गया है कि पुत्र से इस मनुष्यलोक को, कर्म से पितृलोक को और विद्या से देवलोक को जीतना चाहिये ।"

पारिजातकार का यह सारा कथन भी शास्त्रतात्पर्य न समझने के कारण है । यहाँ यह नास्तिकों का परलोक में विश्वास न होने के कारण लोकैषणा को इस लोकगत प्रतिष्ठादि को नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

लोको जय्यस्तदा व्यज्यते यत् पितृलोको देवलोको वा अस्माल्लोकाद् भिन्नः। अभिन्नश्चेद-परलोकत्वमेव। अतो ब्रह्मनिष्ठातोऽन्यत्र लोकोऽयं वेदप्रामाण्यविमुखानप्यनुबध्नाति, अत-स्तेषामपि लोकैषणा भवतीत्यविसंवादम्। नैव ब्रह्मानन्दवित्तेन तुल्यं लोकवित्तं कदाचिद् भवितुमर्हतीति कथनं प्रकरणं सर्वथानुबध्नात्येव।

अत्राहं महाकविश्रीशम्भुविरचितान्योक्तिमुक्तालताया अस्याः सूक्तेरुद्धरणान्न स्वं मनो वारयितुं प्रभवामि याऽत्र सुघटते—

उत्कण्ठाकुलमस्तु कण्टककुले सञ्जायतां ते मनः,
सानन्दं पिचुमन्दकन्दलदलास्वादेषु का वा क्षतिः।
एतत् किन्तु तव क्रमेलक कथङ्कारं सहे दुःसहम्,
तस्मिन् पुण्ड्रककन्दलीकिसलये येनाऽसि निन्दापरः॥

यदत्राह—"संन्यासाश्रमस्य पक्षत्रितयमेतद् अविचारितरमणीयम्, सर्वत्रैव संन्यासे वैराग्यस्यैव हेतुत्वेनैकपक्षस्यैव युक्तत्वात्। यतो हि संन्यासाश्रमाय ब्रह्मचर्यापेक्षया वैराग्यमेव

मानता। परन्तु स्वयं अन्य लोक की सिद्धि भी कर रहा है। अर्थात् जब पुत्र से यह लोक जीतने योग्य है, तब पितृलोक और देवलोक आपके मत से इस लोक से भिन्न हैं। अतः ब्रह्मनिष्ठा से भी भिन्न अन्यत्र लोक तो वेदप्रामाण्य न माननेवालों के भी मत में सिद्ध है। अतः उन्हें भी लोकैषणा निःसन्देह होती है। आप अपर विद्या नामक जो तीसरी एषणा मानते हैं, वह भी तो इसी लोक से सम्बन्ध रखती है। महोदय! 'व्युत्थाय भिक्षाचर्यं चरन्ति' इस कथन से तीनों एषणाओं का उठना और संन्यास लेकर भैक्ष्यचर्या करने से ध्वनित है कि ब्रह्मानन्द के तुल्य अन्य कोई प्रतिष्ठा नहीं। अतः यह कथन सर्वथा प्रकरणसङ्गत है।

यहाँ मैं महाकविशम्भु-विरचित अन्योक्ति के उद्धरण के लोभ का संवरण नहीं कर पा रहा, जो यहाँ सुघटित हो रही है—

हे क्रमेलक (ऊँट)! माना कण्टकजाल में तुम्हारा मन उत्कण्ठाकुल हो रहा है, पिचु अर्थात् कपास के कन्दल दलों के स्वाद में आनन्द की अनुभूति करो, कोई क्षति नहीं है, परन्तु यह हमें सह्य नहीं हो रहा है कि तुम वासन्तीलता के कोमल किसलयों (पत्रों) की निन्दा कर रहे हो।

पारिजातकार का यह कथन कि—"संन्यास लेने के तीन पक्ष—एक ब्रह्मचर्यादि के क्रम से आश्रम में रहकर संन्यासाश्रम में जाये, दूसरे वैराग्य होने पर वानप्रस्थ के बिना भी संन्यासी बने, तीसरे ब्रह्मचर्य के बाद ही संन्यासी हो जावे' ये अविचारित हैं; क्योंकि वैराग्य से संन्यास का लेना एक पक्ष ही युक्तियुक्त है। क्योंकि संन्यासाश्रम के लिये ब्रह्मचर्य की अपेक्षा वैराग्य ही प्रधान कारण माना गया है।" भी बुद्धि तथा तर्क से दूर है। और अन्तिम वाक्य में ब्रह्मचर्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रधानं कारणममन्यत।" इति, तदेतेन ब्रह्मचर्यस्योपेक्षैवाभिव्यज्यते, यतो ब्रह्मचर्ये वैराग्ये वा न विकल्पोपपत्तिः सम्भवति। अखण्डे ब्रह्मचर्ये सत्येव सद्वैराग्यसम्भूतिः, ब्रह्मचर्यं भूमिर्वैराग्यं वै अङ्कुरः। अन्यथा त्वद्यतनविषयासक्तदम्भिनामपि मिथ्या वैराग्यं 'मिथ्याचार' एव। एवं भवादृशां 'शारदा'नुरक्तचेतसामपि रागद्वेषावलेपप्रलेपसंसक्तमनीषाणां वैराग्यं सत्यकोटौ गणयितुं प्रवर्तेरन् कदाचिद् विवेचकाः।

पृ० १५०१, पं० ९—यदप्याह—"प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं हुत्वा ब्राह्मणः प्रव्रजेत्' इति, 'सः संन्यासी प्राजापत्यां परमेश्वरदेवताकामिष्टिं कृत्वा हृदये सर्वमेतन्निश्चित्य तस्यां सर्ववेदसं शिखासूत्रादिकं हुत्वा मुनिर्मननशीलः सन् प्रव्रजति संन्यासं गृह्णाति' इति, तदप्यसङ्गतम्, संन्यासस्येष्ट्यामनधिकारात्। किञ्च, हृदये निश्चित्येति कस्य शब्दस्यार्थः? सर्ववेदसमित्यस्य शिखासूत्रादिकं कथमर्थः? नहि कस्यामिष्टिदिष्टौ संन्यासे वा शिखायज्ञोपवीतादिहोमो विधीयते, तादृग्विधेरभावात्।" इति।

और वैराग्य में वैकल्पिक तुलना करके तो आपने जनता के भाग्य का भाण्डा ही फोड़ दिया। श्रीमन्! ब्रह्मचर्य तो सभी गुण और आश्रमों की आधारशिला है, उसके ऊपर दीवार रेत से चुनी या सीमेण्ट से, यह प्रश्न है। वैराग्याभाव काम क्रोध मोह आदि रेत है, वैराग्य सीमेण्ट है, जिससे संन्यास की भित्ति का चयन होना है। ऋषि का कथन तो यह है कि ब्रह्मचर्यानुष्ठान अवश्य करना चाहिये, अन्यथा अपरिपक्व ब्रह्मचर्य या अल्प आयु में संन्यासाभास वैरागी बनानेवाले बहुत घूमते हैं। अतः ब्रह्मचर्याश्रम अवश्य पूर्ण करे, तब पूर्ण वैराग्य होने पर संन्यास ले। अन्यथा ढोंगी विषयी भी अनेक वैरागी साधु-वेश धारण कर घूम रहे हैं। उनका यह 'मिथ्याचार' है। इस प्रकार आप जैसे 'शारदा' में अनुरक्त चित्तवाले, राग-द्वेष के घमण्ड-प्रलेप से युक्त मनीषियों का वैराग्य भी सत्यकोटि में गिना जाने लगेगा।

पृ० १५०१, पं० ९—"प्राजापत्य इष्टि में अपने सर्वस्व का दान कर, गृहस्थ आश्रम को छोड़कर, विरक्त होकर मनुष्य संन्यासाश्रम को स्वीकार करे।' 'इस प्राजापत्य इष्टि में अपने सर्वस्व का दान कर ब्राह्मण संन्यास ग्रहण करता है।' इसमें स्वामी दयानन्द ने प्राजापत्येष्टि का अर्थ किया है—'परमेश्वर जिसके देवता हैं' यह ठीक नहीं है; क्योंकि संन्यासी का इष्टि में अधिकार ही नहीं होता है। 'ऐसा हृदय में निश्चय कर' यह अर्थ किस शब्द से निकलेगा? इसी तरह 'सर्ववेदस' शब्द से शिखासूत्र आदि का ग्रहण किस प्रमाण के आधार पर किया जायेगा? किसी भी इष्टि में अथवा संन्यास आश्रम को स्वीकार करने पर भी शिखा, यज्ञोपवीत आदि का होम कहीं भी विहित नहीं है। इस प्रकार की विधि का बोधक कोई वेदवाक्य भी उपलब्ध नहीं है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तदविचारशीलतायाः परिपाकः, यथार्थमवबोद्धुमशक्यत्वात्। अत्र प्रजापतिर्मनो वाग् यज्ञो वायुः सूर्यो हिरण्यगर्भो ब्रह्म परमेश्वर इत्यादिदेवता अस्याः सा प्राजापत्या इष्टिः। 'सास्य देवता' इत्यर्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (अष्टा० ४। १। ८५) इति ण्यः। संन्यास-काले परमेश्वरातिरिक्तवस्तुनोऽनुबन्धत्याग एव श्रेयान् भवति, तस्माद् अन्यभौतिकसूर्यादि-देवताकामिष्टिमनभिलक्ष्य परमेश्वरदेवताकामेवेष्टिं यज्ञं करोति संन्यासी बुभूषुः। यदत्राह 'नहि संन्यासिन इष्ट्यामधिकारः' तदपि छलमथवा वाक्यरचनाऽज्ञानम्, व्याकरण-क्त्वाप्रत्ययस्य भूतकालचिन्तनमपि यो न मनसि कुरुते।

न्यायदर्शनस्य (४। १। ६२) वात्स्यायनभाष्ये अग्निहोत्रादिबाह्यकर्मणामाध्यात्मिक-रीत्या भावना समारोपणं कथ्यते। 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यनुसंधम्। तथा गीतायां चतुर्थाध्याये—

उक्त कथन अविचारशीलता का परिणाम है; क्योंकि यह लेखक शास्त्रीय स्थलों को समझने में असमर्थ है। प्रजापति शब्द मन, वाक्, यज्ञ, वायु, सूर्य, हिरण्यगर्भ, ब्रह्म परमेश्वर आदि अर्थ में आता है। इससे 'ण्य' प्रत्यय होने पर प्राजापत्य शब्द सिद्ध होता है। यहाँ संन्यासकाल में परमेश्वर से अतिरिक्त वस्तु से लगाव छोड़ना ही श्रेयस्कर है, इसलिये संन्यासी होने का इच्छुक अन्य भौतिक सूर्यादिदेवतावाली इष्टि को अभिलक्षित न करके परमेश्वर देवतावाली (इष्टि) यज्ञ करता है। यहाँ पर यह कहना भी छल है कि संन्यासी का किसी भी इष्टि का अधिकार नहीं है। और न इनको वाक्य-रचना का ज्ञान है, क्योंकि वहाँ 'क्त्वा' प्रत्यय तो भूतकाल में होता है।

जीवनपर्यन्त जो बाह्य अग्निहोत्रादि का विधान किया गया है, वह तत्त्वज्ञान का विरोधी नहीं है, क्योंकि—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥ गी० ५। २॥

अर्थात् कर्मसंन्यास और कर्मयोग—ये दोनों ही परम कल्याण के करनेवाले हैं, परन्तु उन दोनों में भी कर्मसंन्यास से कर्मयोग साधन में सुगम होने से श्रेष्ठ है।

न्यायदर्शन (४। १। ६२) के वात्स्यायन-भाष्य में लिखा है कि 'बाह्य कर्मों की आध्यात्मिक भावना ही समारोपण कहलाती है'। उन्हीं कर्मों को संन्यासी आध्यात्मिक रीति से करता है। जैसाकि गीता के चतुर्थाध्याय में वर्णित है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥२९॥

प्रव्रजेदिति क्रियानिर्दिष्टप्रव्रजनात् पूर्वं त्वसौ इष्टिं सर्वधनदानं कर्तुं शास्त्रानुमत एव। यजनकाले नायं ब्राह्मणः संन्यासी अस्ति, अपितु बुभूषुर्विद्यते। यदपृच्छः—'हृदये निश्चित्येति कस्यार्थः ?' तदत्र बोद्धव्यम्—'रु शब्दे', 'रुपु विमोहने', 'रूप रूपकरणे' इति धातुभिरथवैकतमेन 'नि' पूर्वकं 'निरूप्य' इति सिद्धं रूपम्। निश्चयेन रूपयित्वा इति निरूप्य, निश्चयश्च हृदय एव भवतीति विदांकुर्वन्ति विद्वांसः। एतद्वचनेनाऽनुमीयते यदयं श्रीकरपात्रो हृदयेन न निश्चित्यैव यतिवेशमधारयत्।

'कई एक योगी जीवात्मा को आत्मसमर्पण द्वारा ब्रह्मरूप अग्नि में हवन करते हैं और दूसरे श्रोत्रादि इन्द्रियों को धारणा, ध्यान, समाधि इन तीनों के एकतारूप संयम ('त्रयमेकत्र संयमः' योग०) में होम करते हैं, एवं ज्ञान से प्रदीप्त हुई आत्मसंयमरूप अग्नि में ज्ञानेन्द्रिय तथा कर्मेन्द्रिय अर्थात् ज्ञानेन्द्रियों के विषयभूत शब्द स्पर्शादि तथा कर्मेन्द्रियों के विषयभूत वचनादि कर्मों को और प्राणादि की क्रिया को हवन करते हुए निष्पाप हो जाते हैं, और संन्यासी लोग योगावस्था में निरन्तर अपानवायु में प्राण तथा प्राणवायु को अपान में हवन करते हुए प्राणापान की गति को सर्वथा निरुद्ध करके प्राणायाम में तत्पर होते हैं।'

प्राजापत्येष्टि-वाक्य में 'प्रव्रजेत्' क्रियानिर्दिष्ट प्रव्रजन से पूर्व 'निरूप्य' और 'हुत्वा' दो पूर्वकालिक क्रियाएँ हैं। इससे स्पष्ट है कि संन्यास (प्रव्रज्या) लेने से पूर्व वह प्राजापत्य इष्टि और सर्ववेदस दो काम कर ले। यजन करते हुए तो यह ब्राह्मण संन्यासी ही नहीं, अपितु होने का इच्छुक है। यह जो आप पूछ रहे हैं कि 'हृदय में निर्णय करके' यह अर्थ कहाँ से आ गया, वह समझिये—शब्दार्थक 'रु', विमोहनार्थक 'रुप', 'रूप' रूपकरणार्थक तथा 'रुच' दीप्त्यर्थक से 'नि' उपसर्गपूर्वक 'निरूप्य' शब्द सिद्ध होता है। निरूप्य अर्थात् जानकर, निश्चय करके। निश्चय हृदय में होता है, अतः यह अर्थ सर्वथा युक्तियुक्त है। इससे पता चलता है कि आपने हृदय में विना निश्चय करके ही यतिवेश धारण कर लिया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इह चिन्तकैरवगन्तव्यं यत् परमश्वरेष्ट्यनन्तरं भौतिकधनं नावशिष्यते। अवशिष्टमपि सर्ववेदसमित्याज्ञया देयम्। न च स्वामी दयानन्द इह धनमित्यर्थं न कृतवान् वेदःशब्दस्य, तस्य तदर्थाऽविज्ञानाद् इति वाच्यम्, स्वभाष्ये ऋग्वेदे २।१७।६, ३।६०।१, १।८१।९, ४। २५।७ इति स्थलेषु धनार्थविधानात्। तदेह प्रश्नः कथं शिखासूत्रमित्यर्थः? तत्रोच्यते—

'इष्ट्वा च शक्तितो यज्ञैः' (मनु० ६।३६) इति निर्देशेन शक्तिर्हि लौकिकी धनमपि, तद्दानं दक्षिणायां कुरुत एव यजमानः, साऽपि दक्षिणा 'प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्' (मनु० ६। ३८) भवति सर्वा। इयं परमात्मप्राप्तिनिमित्ता प्राजापत्येष्टिर्यस्यां सा दक्षिणा सर्ववेदसम् अर्थाल्लौकिकधनादतिरिक्तमपि गृहस्थाश्रमस्थपदार्थ-मोह-यज्ञोपवीतशिखादिकं हुत्वा त्यक्त्वा ब्राह्मणः प्रव्रजेत्।

अत्र 'हुत्वा' इत्यस्य नैवार्थो यदग्नौ होमं कृत्वा धनस्याऽपि रूप्यकादेर्न तथा कर्त्तुं शक्यत्वात्। इष्टिनिरूपणं चापि सदक्षिणमेव मन्यते, तस्मादिह 'हुत्वा' इत्यस्य तात्पर्यं त्यक्तार्थ एव।

यहाँ पर विचारशीलों को जानना चाहिये कि परमेष्टि के अनन्तर भौतिक धन अवशिष्ट नहीं रहता। अवशिष्ट भी 'सर्ववेदस' में सर्वस्व दे दिया जाता है। स्वामी दयानन्द ने 'सर्ववेदस' का अर्थ धन नहीं किया। क्या 'वेदः' शब्द का अर्थ ऋषि धनरूप में नहीं जानते थे? पर यह बात नहीं। उन्होंने ऋग्वेद की २।१७।६, ३।६०।१, १।८१।९, ४।२५।७ ऋचाओं में धन अर्थ किया है। तब प्रश्न यह है कि फिर 'शिखासूत्र' यह अर्थ क्यों कर दिया? इस विषय में सुनिये—

मनु के ६।३६ श्लोक के अनुसार वानप्रस्थ में शक्तिभर यज्ञ करके मन को मोक्ष में लगाए। शक्ति लौकिक धन है, उसका दान यजमान दक्षिणा में कर देता है। वह दक्षिणा सर्वस्व होती है। 'सर्वे वेदसां वेदा विज्ञायन्ते येन' वेदपठनाधिकार यज्ञोपवीत से ही होता है, तथा वेद्यतेऽभिज्ञायतेऽनेन' जिसके द्वारा पहचाना जाये। तो शिखासूत्र यज्ञव्रत आदि होने के चिह्न हैं, वे चिह्न भी हटा दिये जाते हैं, जिससे केवल जन्म-समय का स्वरूप मानव मात्र रह जाता है।

यहाँ 'हुत्वा' का अर्थ अग्नि में हवन करके नहीं; क्योंकि यदि केवल 'अग्नि में डालकर' यही अर्थ किया जावे तो आपका सम्मत 'सर्ववेदसं हुत्वा' धन को आग में डालकर अर्थ भी किया जाना शक्य नहीं। इसलिये 'हुत्वा' का अर्थ छोड़कर ही सङ्गत है।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५०२—यदुक्तम्—"संन्यासिनां प्राणाऽपानहोमः, अग्निहोत्रम्। सत्योपदेशो ब्रह्मयज्ञः, ब्रह्मोपासनं देवयज्ञः। विज्ञानिनां प्रतिष्ठाकरणं पितृयज्ञो ह्यज्ञेभ्यो ज्ञानदानादि-र्भूतयज्ञः। सत्योपदेशेन सर्वमनुष्यसत्कारानुष्ठानमतिथियज्ञः' इति भावार्थात्मकं दयानन्दोक्तं निर्मूलम्, संन्यासिनां कृते पञ्चयज्ञविधानानुपलम्भात्।" इति।

इदं सर्वं हृदयमतिशून्यं विलपनमेव, सहृदयहृदयवेद्यत्वाल्लोकोत्तररसाम्बुधिमग्नस्य महर्षे रूपकालङ्कारकृतेरेतस्याः। 'आत्मन्यग्नीन् समारोप्य' इत्यस्यैतद् रमणीयमतितरां मनोज्ञव्याख्यानम्।

पृ० १५०३, पं० १—यदाह—"न च संन्यासिनां कृते पञ्चयज्ञविधानमतस्तत्र गौणी पञ्चयज्ञकल्पनाऽपि व्यर्थैव।" इति, तदपि असारमस्य नीरसहृदयस्य वचः। एवं तु भर्तृहरिसदृशमहाप्रज्ञसहृदयकवीनां सरसाः सूक्तिमुक्ता अपि अकिञ्चित्कराः सिध्येरन् अरसिकेषु काव्यचर्चावत्। यथा—

पृ० १५०२—"परन्तु 'पूर्णविद्यावताम्' आदि भूमिका-कथन निर्मूल है; क्योंकि संन्यासियों के लिये कहीं भी पाँच यज्ञों का विधान नहीं किया गया है। स्वामी दयानन्द के द्वारा—संन्यासियों का प्राणापानहोम, दोषों से इन्द्रिय और मन का निवर्त्तन और सत्यधर्म का अनुष्ठान ही अग्निहोत्र है, किन्तु पूर्व के तीन आश्रमों का अनुष्ठानयोग्य बाह्य क्रियामय कर्म संन्यासियों को विहित नहीं है। सत्योपदेश ही संन्यासियों का ब्रह्मयज्ञ है, ब्रह्मोपासना देवयज्ञ है, विज्ञानियों (वेद-ब्रह्मज्ञानी) की प्रतिष्ठा करना पितृयज्ञ, अज्ञों के लिये ज्ञानदान, सर्व प्राणियों पर अनुग्रह और उनका अपीडन भूतयज्ञ, सर्वमनुष्यों के उपकारार्थ भ्रमण, अभिमानशून्यता और सत्योपदेश करने से सब मनुष्यों का सत्कारानुष्ठान अतिथियज्ञ है। उक्त लक्षणवाले पाँच महायज्ञ विज्ञान-धर्मानुष्ठानमय होते हैं।"

यह सब कथन निराधार है। आजीवन यज्ञ करे, तथा मनु के 'आत्मन्यग्नीन् समारोप्य' कि पाँच आवहनीय अग्नियों को पञ्च प्राणों में समारोपण करने की महर्षि द्वारा विशद व्याख्या की गई है।

श्री करपात्री का उक्तारोपरूप विलाप हृदय और मस्तिष्क से कोई सम्बन्ध नहीं रखता। लोकोत्तर आनन्दसागर में मग्न महर्षि दयानन्द का ऊपर वर्णित रूपकालङ्कार अतितरां सहृदयसंवेद्य है।

पृ० १५०३, पं० १—"संन्यासियों का यज्ञ का विधान है ही नहीं, तो उसकी गौणी कल्पना करना भी व्यर्थ है।" यह भी इस नीरसहृदय का वचन सारहीन है। इनके समान सोचनेवालों के लिये तो महाराज भर्तृहरिसदृश महाप्रज्ञ सरस सहृदय कवियों के रसनिर्झर सूक्तिमुक्ता भी निष्प्रभावी ही सिद्ध होंगे। जैसे अरसिकों में काव्यरसचर्चा व्यर्थ होती है। भर्तृहरि-वचन जैसे—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मही रम्या शय्या विपुलमुपधानं भुजलता,
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः,
सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥

महाशय! वास्तवं त्विदमस्ति 'अशक्यास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते।' महर्षियोग्यतामनाप्नुवानो भवान्, अतो नालङ्कृतिमयं भावमूल्यमुररीकुरुते। सत्योक्तिर्महाकवेः शम्भोः—

आनीतैरिषुकार कारणमिह श्लाघ्यैः किमेभिः शरैः,
प्रख्यातामपि किन्न पामरपुरीमेतां पुरः पश्यसि।
दात्रं पात्रमिति ब्रवीति कुरुते स्तोत्राणि तोत्रे रसम्,
धत्ते यत्तु हले कुतूहलमपि ग्रामीणकग्रामणीः ॥

उक्तरूपकेण व्यज्यते यन्न संन्यासिभिर्द्रव्ययज्ञेषु पौरोहित्यादिपदमलङ्करणीयमिति।

'मुनि भी राजा के समान अपार सम्पदाशाली होता है; क्योंकि उसकी रमणीय शय्या वसुन्धरा है, भुजलता ही विशाल उपधान (तकिया) है, आकाश का सुन्दर तम्बू और अनुकूल पवन-प्रवाह ही व्यजन है। उसके प्राकृतिक मदन का चन्द्रमा ही स्फुरणशील दीपक है और विरति (वैराग्य) रूप वनिता के साथ निरन्तर मुदित होकर रहता है।'

प्यारे! वास्तविकता तो यह है कि 'ये बुद्धि और हृदय के उस स्तर तक तो पहुँच नहीं सकते, इसलिये निन्दा कर रहे हैं।' उस योग्यता तक न पहुँचते हुए अलङ्कृतिमय भावप्राञ्जलता को भी हृदयङ्गम नहीं कर पा रहे हैं। महाकवि शम्भु की उक्ति सच घट रही है—

'हे सुन्दरबाण-निर्माता! इन श्लाघनीय बाणों को लाकर इन्हें क्या दिखाना? क्या तुम इस प्रख्यात पामरपुरी को देख नहीं रहे हो? यहाँ तो निरन्तर दात्र (हँसिया) पात्र आदि की चर्चा और बैलों को हाँकने के पैने के ही रस-स्तोत्रों की चर्चा रहती है तथा इस ग्रामीणों के मुखिया का तो परम कौतूहल हल में ही है।'

ऊपर लिखे रूपक से व्यक्त होता है कि संन्यासियों द्वारा द्रव्ययज्ञों में पौरोहित्यादि पद अलंकृत नहीं करना चाहिये।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५०३—अत्र उपासना सत्यधर्मानुष्ठानं चैकमेव सर्वेषामाश्रयणमिह, एकमर्थात् समानमेवेत्यर्थः। यच्चोच्यते 'आत्मज्ञः पूजनीयो न तु संन्यासी' एतेन ज्ञायते यन्नोरीकृत ऋषिभाषाभावो भवता। भाष्ये त्वेवम्—'आत्मानं परमेश्वरं जानाति यस्तं संन्यासिनमेव सत्कुर्यात्'। अत्र संन्यासप्रकरणे सहजोऽयं भावो निष्पीड्यते यश्चात्मज्ञः संन्यासी, स एव पूज्यो नान्यः। तदा कथन्न भवानपि बुभूषुरात्मज्ञः ?

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'वर्णाश्रम-विषयः'
॥ सम्पूर्णः ॥

पृ० १५०३—यहाँ पर उपासना और सत्यधर्मानुष्ठान सब धर्मों का एक अर्थात् समान है, यह कहकर स्वामीजी ने लिखा है कि 'आत्मा अर्थात् परमेश्वर को जो जानता है, उस संन्यासी की सदा पूजा करनी चाहिये।' आप कहते हैं कि 'आत्मज्ञं ह्यर्चयेद् भूतिकामः' का अभिप्राय आत्मज्ञ की पूजा करने का विधान है, संन्यासी की पूजा का नहीं। धन्य है आपकी मति, जो संन्यासी का आत्मज्ञ होना अनिवार्य नहीं समझती। इसीलिये तो अनात्मज्ञ यतिवेशधारी गेरुआ वस्त्रों में बहुत साधु बने घूम रहे हैं। ऋषिवर की यही पवित्र कामना थी कि आत्मज्ञानी ही संन्यासी बने। फिर आप भी आत्मज्ञानी क्यों नहीं बनते ?

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मला मिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'वर्णाश्रम-विषय'
॥ सम्पूर्ण हुआ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ पञ्चमहायज्ञ-विषयः संक्षेपतः

पृ० १५०४, अनु० १—यदाह—"सत्यार्थप्रकाशादौ पञ्चमहायज्ञस्वरूपं यल्लिखितं तदपि परम्पराविरुद्धम्।" इति, तदज्ञानम्, तत्र तत्र शास्त्रप्रमाणनिदर्शनपूर्वकं स्वरूपाणां वर्णितत्वात्। नेहानेन 'परम्पराविरोधः' स्पष्टीकृतः। यदि काऽपि परम्परा मूर्खैरुच्छास्त्रैः प्रचालिता नाऽसावनुसरणीया विज्ञैः, लोकानां गतानुगतिकत्वात् पारमार्थिकचिन्तनाभावाच्च।

प्रमाण उद्धृतस्य मन्त्रस्य महीधरकृतार्थं प्रस्तुवन् 'दुवस्यत' इत्यर्थेऽपशब्दं 'परिचयत' इति प्रायूयुजत्, यदा महीधरेण 'परिचरता' इत्यलेखि। महर्षेरर्थं प्रस्तुवंश्च 'सर्वमुदक्षरम्' इत्यचीकथत। वस्तुतस्तु महर्षेरर्थ एव गरीयान्। तद्यथा—'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायमनुसृत्य पूर्वं प्रयोजनं प्रस्तौति यज्ञस्य 'वाय्वोषधिवृष्टिजलशुद्ध्या परोपकाराय' इति। तदनु मन्त्रे साधनानि प्रधानानि सामान्यानि चोपक्रान्तानि। प्रधानं हि अग्निः, सामान्यानि समिद्घृतहव्यानि।

पृ० १५०४, अनु० १—यह जो कहा है कि—"सत्यार्थप्रकाश आदि में जो पञ्चमहायज्ञ का स्वरूप लिखा है, वह भी परम्परा-विरुद्ध है।" यह पारिजातकार का अज्ञान है; क्योंकि वहाँ शास्त्र-प्रमाण उद्धृत कर उन यज्ञों का स्वरूप वर्णन किया गया है। इन्होंने यहाँ परम्पराविरोध का उदाहरण तो दिया नहीं। यदि कोई परम्परा शास्त्रविरुद्ध मूर्खों के द्वारा प्रचालित है, उसका विज्ञ पुरुषों को अनुसरण नहीं करना चाहिये। लोक तो गतानुगतिक होते हैं तथा उनमें पारमार्थिकचिन्तन का प्रायः अभाव होता है।

प्रमाण में उद्धृत मन्त्र का महीधरकृत अर्थ देते हुए इन्होंने यहाँ पर 'दुवस्यत' इस अर्थ में 'परिचयत' यह अपशब्द प्रयुक्त किया है। महर्षि के अर्थ को प्रस्तुत करते हुए 'सब उदक्षर है' यह कहा है। वास्तव में तो महर्षि का अर्थ ही गरीयान् है। सो देखिये—'प्रयोजन को उद्दिष्ट करके विद्वान् पुरुष प्रवृत्त होता है' इस न्याय के अनुसार पहले महर्षि ने प्रयोजन प्रस्तुत किया है कि यज्ञ 'वायु, जल, ओषधि की शुद्धिद्वारा परोपकार के लिये होता है'। इसके बाद मन्त्र में प्रधान और सामान्य साधन बताये हैं। प्रधान साधन अग्नि है और सामान्य साधन समिधा, घृत और हव्य हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यज्ञे भौतिकोऽग्निः, आध्यात्मिकेऽर्थेऽग्निरीश्वरः। यच्चाऽप्याह "वाय्वादिशुद्धिरन्यथाऽपि भवति" इत्यलीकम्, तत्राऽपि हव्यादि विना शुद्धेरसम्भवः। हव्यं होतुं योग्यम् एवंविधः पदार्थोऽपि यज्ञप्रक्रियान्तर्गतः, परमग्निहुतघृतादिभिर्यथा शुद्धिर्भवति न तथाऽन्यप्रकारेण। इदमखिलं प्रथमखण्डे विस्तरेण वर्णितम्। हव्याशब्देन होतुमर्हाणि पुष्टि-मधुर-सुगन्ध-रोगनाशकैर्गुणैरिति व्याख्यानं मन्त्रगतहव्यशब्देनैव ध्वनितं बुद्धिसङ्गतम्, तस्मान्न मन्त्रबाह्यम्। यदीदम् उदक्षरं तत्पूर्वं 'होष्यमाणैः पूर्णाहुतिसम्बन्धिभिः' इत्यपि माहीधरं नोक्तमुदक्षरम्? भवान् पुष्ट्यादिकं तूदक्षरमगादीत्।

पृ० १५०४, अनु० २—'अग्निं दूतम्' इति मन्त्रस्यार्षभाष्यमेष आक्षिपति यत्—"निर्मूलमेव, तथा भावनाविधानादर्शनात्।" इति। वस्तुतस्तु तद्वैज्ञानिकार्थचिन्ताऽक्षमत्वमेवैतद्बुद्धेर्येन तथाह। 'हव्यवाहम्' इत्यन्वयस्तु 'अग्निं दूतं हव्यवाहं पुरोदधे' सङ्गतः। 'उपब्रुवे' इति क्रियाऽक्षिप्तं 'जिज्ञासून्' इति साधीयान् तर्कः। 'देवान्' दिव्यगुणान्आसादयति इत्यपि सङ्गतमेव।

पृ० १५०५, अनु०१—ऋषिणा 'अग्निं दूतम्०' इति मन्त्रस्य द्वितीयोऽर्थोऽपि दर्शितः। तत्राप्याक्षिपन्नाह यत्—"हे परमेश्वर! दूतं सर्वेभ्यः सत्योपदेशकम् अग्निसंज्ञकम्' इत्यत्र कया

यज्ञ में भौतिक अग्नि और आध्यात्मिक पक्ष में अग्नि शब्द से परमेश्वर का ग्रहण होगा। यह कहना कि 'वायु आदि शुद्धि तो अन्य प्रकार से भी हो जाती है' निष्प्रमाण है। हव्यादि के बिना सूक्ष्मता से शुद्धि नहीं हो सकती। हव्य शब्द से ही अग्नि में होतव्य पदार्थ यज्ञ-प्रकिया के अन्तर्गत ही आयेगा। अतः अग्नि में मन्त्र द्वारा थोड़ी-थोड़ी मात्रा में आहुति देने से जो क्रमिक शुद्धि होती है, वह अन्यथा सम्भव नहीं। यह विस्तार से प्रथम खण्ड में कहा गया है। हव्य पदार्थ पुष्टिकारक, मधुर, सुगन्ध और रोगनाशक—चार प्रकार के ही होते हैं, यह हव्य शब्द से ही ध्वनित है। आपने हव्य पद के व्याख्यान पुष्टिकारक आदि को तो उदक्षर कहा, पर इसी मन्त्र पर महीधर द्वारा लिखित 'होष्यमाण पूर्णाहुतिसम्बन्धी' इस शब्दावली को मन्त्रबाह्य नहीं कहा।

पृ० १५०४, अनु०२—'अग्निं दूतम्०' इस मन्त्र के ऋषिभाष्य पर ये आक्षेप करते हैं कि—"निर्मूल है; क्योंकि इस तरह की भावना करने की विधि वेद में कहीं विहित नहीं है।" वास्तव में इसकी बुद्धि ऋषि के वैज्ञानिक अर्थ समझने में असमर्थ रही है। महोदय! 'हव्यवाह' अग्नि का विशेषण है, अतः कर्म है और आक्षिप्त जिज्ञासु भी कर्म है 'उपब्रुवे' क्रिया का। 'देव' का यौगिक अर्थ दिव्यगुण हो जाने में क्या बाधा है? एक शब्द के अनेकार्थ होने में न कोई अर्थ गौण है न मुख्य। यथाप्रकरण ऋषि अर्थ ही सङ्गत होता है।

पृ० १५०५, अनु० १—ऋषि ने 'अग्निं दूतम्०' इस मन्त्र का द्वितीय अर्थ भी किया है। उस पर भी आक्षेप करते हुए ये कहते हैं कि—"हे सब प्राणियों के सत्योपदेशक परमेश्वर! यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वृत्त्या 'सत्योपदेशकः' इत्यर्थः कृतः ?" तत्र श्रूयताम्—'दु गतौ' 'टुदु उपतापे' आभ्यां धातुभ्यां दूतसिद्धिः। दवति गमयति (अन्तर्भावितण्यर्थत्वात्) ज्ञानमिति सृष्ट्यादौ सत्योपदेशकः। दुनोति दुष्टान् परितापयति अथवा दोषान् सत्यवेदज्ञानोपदेशेनेति वा। एवमर्थसिद्धिः। अथवा तव महीधरो यजुः० २९। २५ मन्त्रे 'दूतः कविः क्रान्तदर्शी' इत्यर्थं यया वृत्त्या करोति, तयैवात्राप्यवधेयम्। निरुक्ते तु 'जवतेर्वा, द्रवतेर्वा, वारयतेर्वा दूतः' (५।१) इति सिद्ध्यति।

पृ० १५०५, पं० ९—"विज्ञानस्य हव्यपरता निर्मूलैव" इत्युक्तिस्तु अनन्तवेदार्थस्येयत्तावधारयितुः सर्वमन्त्राणां याज्ञिकप्रक्रियायामेव योजयितुराध्यात्मिकाधिदैविकार्थोपेक्षितुरेवाल्पधियः। 'स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः' (मनु० ३।७) इति मनूक्तिमनालोचयन्तो भवन्तो वेद-ब्राह्मण-निरुक्त-पतञ्जलि-भर्तृहरि-मीमांसाकार-स्कन्द-दुर्गाद्यनुसृतयौगिकप्रक्रियामनभिध्यायन्त एव वक्तुं क्षमन्त एवं यन्न हव्यशब्दस्य विज्ञानमित्यर्थो भवितुमर्हति। तथाहि होतुं दातुमादातुं वा योग्यं तदिह विज्ञानम्।

किस प्रकार हो गया ?" इसका समाधान यह है कि गत्यर्थक तथा उपतापार्थक 'दु' धातु से 'दूत' शब्द की सिद्धि होती है। जो ज्ञान देता है, वह दूत है। परमेश्वर सृष्टि के आदि में प्रथम ज्ञानदाता दूत है। वही दुष्टों को उपतप्त करने वाला है, अत एव भी दूत है। 'दूतो देवानामुत मर्त्यानाम्' इससे ही मनुष्यों का भी सन्देशप्रापक दूत कहलाता है। अथवा आपके आराध्य महीधर ने यजुः० २९। २५ मन्त्र मे 'दूत कवि व क्रान्तदर्शी होता है' यह अर्थ जिस वृत्ति से कर लिया, उसी वृत्ति से ऋषि दयानन्द ने कर लिया। वैसे निरुक्त में 'जू' 'द्रु' आदि धातुओं से भी दूत शब्द निर्मित कर अर्थ दिखाया गया है।

पृ० १५०५, पं० ९—विज्ञान की हव्यपरता को निर्मूल कहना ही निर्मूल है; क्योंकि 'होतुम् आदातुं योग्यं हव्यम्' अर्थात् जब ज्ञानदाता अग्नि है, उसी को यहाँ हव्य अर्थात् ग्रहण करने योग्य विज्ञान का वहन करनेवाला कहा है। 'दधे' क्रिया के साथ उससे पूर्व का अन्वय और हव्यवाहम् का अन्वय 'उपब्रुवे' क्रिया के साथ किया गया है। सब मन्त्रों के अर्थ की इयत्ता का अवधारण करनेवाले, याज्ञिक प्रक्रिया में ही सब मन्त्रों को लगानेवाले तथा आध्यात्मिक और आधिदैविक अर्थों की उपेक्षा करनेवाले किसी अल्पधी का ऐसा कथन सम्भव है। मनु द्वारा कहा हुआ सब कुछ वेदोक्त है, क्योंकि वेद तो सर्वज्ञानमय है। इसको न देख तथा वेद, ब्राह्मण, निरुक्त, पतञ्जलि, भर्तृहरि, जैमिनि तथा स्कन्द और दुर्ग आदि से अनुसृत यौगिक प्रक्रिया का ध्यान न करनेवाले ही आपसदृश कह सकते हैं कि हव्य शब्द विज्ञान का वाचक नहीं हो सकता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थावगमनाकृततपश्श्रममहानुभाव ! 'तपस्विनो नहि असाध्यं किञ्चिदस्ति। तपसां हि स्वयमपि वेदार्थः प्रादुर्भवेदेव। मेधावी स्वयमप्युत्प्रेक्षितुं शक्नुयात्।' इति दुर्गोक्त्याऽपि महर्षेस्तपोऽवाप्तविज्ञानं समर्थ्यते, अन्यथा कथं सायणेन यौगिकप्रक्रियानङ्गीकृतौ अश्वादित्य-वसिष्ठेन्द्रभ्रातृरथादीनां पति-परमेश्वर-वासयितृतम-पर्जन्य-परोपकारक-यज्ञाद्यर्थाः कृताः। स्कन्देनाऽपि असुर-सिन्धु-श्वादीनां प्राणवदुद्गातृरश्मि-वाय्वाद्यर्था गृहीताः। असंख्याः खलु दुर्ग-भट्टभास्करोव्वटात्मानन्द-जयतीर्थादिविदुषां रूढिप्रसिद्धशब्दार्थान् परिहाय यौगिकार्थाः परिलब्धाः। एवं महर्षिप्रतिभा स्वैरचारितामनधिगत्य रूढिकीलकाऽबद्धप्रतिभानामप्रतिमानां विपश्चितां पन्थानमेवावललम्बे।

पृ० १५०५, अनु० ४—आ०—"अस्माकमयमग्निर्भौतिकः परमेश्वरश्च गृहपतिः गृहात्मपालकः प्रातः सायं परिचरितः सूपासितश्च सौमनस्यारोग्यस्य आनन्दस्य च दाता' इति भूमिकार्थो न सङ्गतः, भौतिकस्य जडस्याग्नेः सम्बोद्ध्यत्वानुपपत्त्या साधिदेवो गार्हपत्योऽग्निरेवेह ग्राह्यः, सर्वाधिपतेरीश्वरस्य गृहपतित्वे वैशेष्यानुपपत्तेः।"

हे वेदार्थ जानने में श्रम न करनेवाले महानुभाव ! 'तपस्वी को कुछ असाध्य नहीं है, तप से वेदार्थ खुल जाता है। मेधावी स्वयं भी उत्प्रेक्षण कर सकता है' दुर्ग के इस कथन से महर्षि के तप से प्राप्त 'विज्ञान' अर्थ समर्थित होता है। अन्यथा अर्थात् बिना यौगिक प्रक्रिया को माने तो सायणाचार्य भी अश्व, आदित्य, वसिष्ठ, इन्द्र, भ्रातृ, रथ आदि के पति, परमेश्वर, वसानेवालों में श्रेष्ठ, परोपकारक, यज्ञ आदि अर्थ कैसे कर सकते थे, जबकि रूढ्यर्थ या आपके मन्तव्य से मुख्यार्थ मान्य ही हैं। स्कन्द ने भी असुर, सिन्धु, श्व आदि के प्राणवान्, उद्गातृ, रश्मि, वायु आदि अर्थ अत एव ग्रहण किये हैं। दुर्ग, भट्टभास्कर, उव्वट, आत्मानन्द, जयतीर्थ आदि विद्वानों के रूढार्थों को छोड़कर असंख्य यौगिकार्थ परिलब्ध होते हैं। इसी प्रकार महर्षि की प्रतिभा ने स्वैरचारिता का ग्रहण न करके रूढि के खूँटे से असम्बद्ध प्रतिभावाले अनुपम विद्वानों के ही मार्ग का आलम्बन किया है।

पृ० १५०५, अनु० ४—आक्षेप—"दयानन्द ने 'सायं सायं गृहपतिः०' मन्त्र का अर्थ किया है—'प्रतिदिन प्रातः सायं श्रेष्ठ उपासना को प्राप्त यह गृहपति अर्थात् घर और आत्मा का रक्षक भौतिक अग्नि और परमेश्वर सौमनस्य, आरोग्य, आनन्द और वसु अर्थात् धन का देनेवाला है।' यह अर्थ सङ्गत नहीं है; क्योंकि भौतिक जड़ अग्नि को सम्बोधित नहीं किया जा सकता, इसलिये आधिदैविक गार्हपत्य अग्नि ही यहाँ गृहीत है। परमेश्वर तो सबका ही स्वामी है, उसको गृहपति कहने से क्या विशेषता आ सकती है ?"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०— श्रीमन् ! प्रत्येक आध्यात्मिकोऽर्थस्तव बुद्धिस्तरादुपरि, न हि अस्मदावासभूतं लघुगृहमेव गृहम्, प्रत्युत 'ऋतवो (प्राणाः) गृहाः' (ऐ० ५ । २५) अथवा अन्तरिक्षलोकोऽपि गृहं यत्पतिर्वायुर्गृहपतिः । अस्मद्रक्षकः परमेश्वरोऽस्ति, नैतस्य तात्पर्यं यन्नान्येषाम् । तत्र स्वत्वनिवृत्तिनिष्ठैव सूच्यते । तथैवेहाऽपि बोध्यम् ।

पृ० १५०६, पं० २—आ०—"एवं राज्यादिव्यवहारे हृदये च एधि प्राप्तो भव' इत्यप्यसङ्गतम् ।"

समा०—"नैतदसङ्गतम्, तस्मिन् काले राष्ट्रस्य पारतन्त्र्यपीडामनुभवन् जडमूर्ति-पूजायामीश्वरप्राप्तेरलीकां च लोकानां भक्तिमवलोक्य ऋषिः परमात्मानं वसुदानं प्रार्थयते । यत्त्वं राज्यादिव्यवहारे हृदये च सदा प्राप्तो भव, तदैव तवेश्वरस्य उत्तमपदार्थदानं सार्थकमिति भावः, एतद्धि व्याख्यानम् । वसुदान इत्यत्र 'डुदाञ्' धातोः कर्तरि ल्युट् । अत्र वसुदानो हि कर्ता, 'एधि' इत्यस्यार्थो भव, अर्थात् प्राप्तो भव, अतः कर्त्रभावे 'प्राप्तः' कर्तृत्वेनाऽक्षिप्यते ।

पृ० १५०६, पं० ३—आ०—"हे परमेश्वर ! त्वामिन्धानाः प्रकाशमाना इत्यप्यसङ्गतम्, परमेश्वरस्य स्वप्रकाशत्वेन प्रकाशकर्मत्वानुपपत्तेः ।"

समाधान—महोदय ! प्रत्येक आध्यात्मिक अर्थ आप की बुद्धि के स्तर से ऊपर है । जडोपासना के कारण इस अर्थ से आप में भी कोई विशेषता नहीं आ सकती । हमारे शरीरों को आवास देनेवाला यह ईट-मिट्टी का बना हुआ घर ही तो केवल घर नहीं है । ऋतु, प्राण, अन्तरिक्षलोक भी गृह कहलाते हैं । इस अन्तरिक्ष गृह का पति वायु है । हमारे शरीररूप आत्मगृह का रक्षक परमेश्वर है । इस 'अस्माकम्' कहने से इतरों का गृहपति नहीं है, ऐसा तात्पर्य नहीं । वहाँ पर स्वत्वनिवृत्ति निष्ठा ही सूचित हो रही है, इसी प्रकार यहाँ पर भी समझिये ।

पृ० १५०६, पं० २—आक्षेप—"इसी प्रकार हे परमेश्वर ! आप राज्यादि व्यवहार और हृदय में प्राप्त होवें' यह अर्थ भी सङ्गत नहीं है ।"

समाधान—ऋषि परमेश्वर के प्राप्त होने की प्रार्थना कर रहे हैं, परन्तु इस समय देश परतन्त्र था, उसकी दासता की पीड़ा की तीव्र अनुभूति ऋषि को सदा रहती थी, अतः उन्होंने राज्यादि व्यवहार में भी 'परमेश्वर हमें प्राप्त हो' 'परमात्मा वसुदान है' कहा । 'वसु' से ऋषि ने ऋ० १ । १५ । ८ में वसु अर्थात् विद्या चक्रवर्ती राज्य प्राप्य धन की प्रार्थना की, उसी प्रकार यहाँ पर भी उत्तम पदार्थ की प्रार्थना की । यह अर्थ सर्वथा सङ्गत है । यहाँ वसुदानः' कर्ता 'एधि' क्रिया है, जिसका अर्थ है 'प्राप्तो भव' अर्थात् प्राप्त होओ । अतः क्रिया से कर्ता का आक्षेप हो जाता है ।

पृ० १५०६, पं० ३—आक्षेप—"हे परमेश्वर हम तुमको प्रकाशित कर स्वयं शरीर को पुष्ट करें' दयानन्द का यह अर्थ भी असङ्गत है; क्योंकि परमेश्वर स्वयं प्रकाशमान है, इसे कोई प्रकाशित क्या करेगा ?"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—नैष आक्षेपो बुद्धिमनुबध्नाति। न चात्र स्वयं प्रकाशकस्य अन्यः प्रकाशको भवितुमर्हति, परं तत्प्रकाशस्तु वेदविज्ञानविलसितान्तःकरणेष्वेव न तु तमोनिगूढधीषु। तस्माद् 'वयं त्वां प्रकाशयन्तः प्रकाशयमानाः प्रकथयन्तः स्वयमपि त्वत्कीर्तिगानेन प्रकाशमानाः तन्वं शरीरं पुष्टं कुर्याम'। ननु प्रकाशमाना इति अण्यन्त एव, कथं तावत् त्वामित्यस्य कर्मत्वं भवेदिति तु न वाच्यम्, तत्र यथा 'इन्धानाः' इत्यन्तर्भावितण्यर्थोऽपि तथाऽत्राप्यवसेयम्। न चैतदेकस्यैव पदस्य अन्तर्भावितण्यर्थत्वमण्यर्थत्वं नोभयं कल्पयितुं शक्येतेति वाच्यम्, यजुषि (३। १८) 'इन्धानास्त्वा' इत्यत्र उव्वटेन 'आदीपयन्तः प्रकाशयन्तः', महीधरेण च 'इन्धानाः दीप्यमानाः' इति व्याख्यातत्वात्। तथा स्वामिनाऽपि 'इन्धानाः प्रकाशयितारः' इति व्याख्यातम्।

पृ० १५०६, पं० ११—ऋषिणा 'ताम्रस्य मृत्तिकाया वा कुण्डे पलाशाम्रादिसमिधाभिरुक्तमन्त्रैर्नित्यं होमं कुर्यात्' इति प्रत्यपादि, तत्रायमसङ्गतं ब्रूते, तादृशाऽग्निहोत्रस्यानार्षत्वात्। 'न चैतद्धि अग्निहोत्रं स्मार्तं न वाऽपि श्रौतम्' इत्यप्याह। तदपि तुच्छम्, नैत्यिकाग्निहोत्रविधानस्य शास्त्रप्रतिपादितत्वादार्षत्वम्। तथा च मनुः—

पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥ ३। ६९॥
स्वाध्याये नित्ययुक्तः स्याद् दैवे चैवेह कर्मणि॥ ३। ७५॥

समाधान—उक्त आक्षेप में बुद्धि की कहीं सङ्गति नहीं है। वह स्वयं प्रकाशित अर्थात् दीप्तिमान् अवश्य है, परन्तु जीवात्मा को तो उसकी दीप्ति (प्रकाश) अपने अन्तःकरणों में करनी है और वे अन्तःकरण वेदविज्ञान से विलसित होवें। तमसाच्छन्न बुद्धियों में उसका प्रकाश नहीं होता। ईश्वर को प्रकाशित करने का अर्थ यही है कि उसके कीर्तिगान से हम भी प्रकाशमान होवें। 'इन्धानाः' यह अन्तर्भावितण्यन्त है, अतः 'त्वाम्' यह कर्म सङ्गत है। यह नहीं कहा जा सकता कि एक ही पद ण्यन्त और अण्यन्त दोनों कैसे हो सकता है। इस विषय में यजुर्वेद ३। १८ मन्त्र के 'इन्धानास्त्वा' इसका उव्वट ने 'आदीपयन्तः' अर्थात् प्रकाशित करनेवाले और महीधर ने दीप्यमान (प्रकाश्यमान) दोनों प्रकार का व्याख्यान कर दिया है। इसी प्रकार स्वामी जी ने 'प्रदीपयितारः' यह अर्थ कर दिया है।

पृ० १५०६, पं० ११—"यहाँ स्वामी दयानन्द ने ताँबा व मिट्टी की वेदि में आम्रादि की समिधाओं से उक्त मन्त्रों से नित्य होम करने की बात कही है, वह अनार्ष है; क्योंकि यह अग्निहोत्र न स्मार्त है, न श्रौत है।" परन्तु पारिजातकार का यह कथन तुच्छ है; क्योंकि नैत्यिक अग्निहोत्र का विधान तो आर्ष है, जैसाकि मनु ने कहा है—

महर्षियों ने गृहस्थियों के लिये नित्य कर्तव्य पाँच महायज्ञों का विधान किया है॥ ३। ६९॥नित्य ब्रह्मयज्ञ तथा अग्निहोत्र करे॥ ३। ७५॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वस्तुतस्तु यजुः० ३ । ९ इत्ययं मन्त्रो भागशो मैत्रायणीसंहितायाम् आधानप्रकरणे (मै० १ । ६ । १०), अग्निहोत्रप्रकरणे (१ । ८ । १५), कात्यायनश्रौतसूत्रे त्वग्निहोत्रप्रकरण एव (का० ४ । १४) विनियुज्यत इति ध्येयम् ।

उक्तप्रमाणेषूद्धृतेष्वर्थेषु च इदं हि वैशिष्ट्यं यदाध्यात्मिकोऽर्थोऽपि ब्रह्मयज्ञप्रमाणपरकः प्रतिपादितः ।

पृ० १५०८, पं० ४—यदाह—"सूर्यो ज्योतिरिति मन्त्रस्य भूमिकाकृतार्थो वेदबाह्यः" तदज्ञानम्, जडपूजनस्वभावत्वात् सर्वत्राध्यात्मिकार्थाऽनवबोधनात् । चेतनपरमेश्वरस्थाने जडानामुपास्यत्वप्रतीकारे एव सर्वत्र ऋषेरभीष्टस्तस्मादयमेवार्थः श्रेयान् । सूर्यो जडो ज्योतिः, परमात्मा तु तेषां सूर्यादीनामपि ज्योतिषां ज्योतिरित्यसन्दिग्धम् ।

पृ० १५०८, पं० १०—आ०—"यो वर्चः सर्वविदां ज्योतिषां ज्ञानवतां जीवानां वर्चोऽन्तर्यामितया सत्योपदेष्टा सर्वात्मा सूर्यः परमेश्वरोऽस्ति' इत्यपि वेदबाह्यम्, सर्वविदां ज्योतिषां ज्ञानवतां जीवानामित्यर्थबोधकपदानां मन्त्रेऽभावात्, न जीवानां सर्ववित्त्वं सम्भवति, प्रत्यक्षादिविरोधात् । वर्चःपदस्यान्तर्यामिसत्योपदेष्टृपरत्वमपि न सम्भवति, प्रमाणाऽभावात् ।"

अन्यथा आपको बताना चाहिये कि नित्य करनेयोग्य अन्य कौनसा अग्निहोत्र है ? आपके उव्वट और महीधर तो 'अग्निर्ज्योतिः (यजुः० ३ । ५) आदि मन्त्रों को अग्निहोत्र-मन्त्र ही मानते हैं ।

ऊपर के मन्त्रों में तथा आगे 'सूर्यो ज्योतिः' आदि में ऋषि द्वारा आध्यात्मिक अर्थ का भी प्रतिपादन करना उनका वैशिष्ट्य है ।

पृ० १५०८, पं० ४—यह कहना कि—"सूर्यो ज्योतिः' आदि मन्त्रों का भूमिकाकृत अर्थ वेदबाह्य है" अज्ञानसूचक है; क्योंकि इनका जड़पूजा करने का स्वभाव है, अतः ये चेतनपरक सूर्य के आध्यात्मिक अर्थों को समझते ही नहीं । जड़ोपासना के उपास्यत्वेन खण्डन में ऋषि ने चेतन परमेश्वरपरक अर्थ किये हैं, वे ही उत्तम कल्याणकारी हैं । परमात्मा सूर्यादि भौतिक ज्योतियों को भी ज्योति देनेवाला है, यह असन्दिग्ध है ।

पृ० १५०८, पं० १०—आक्षेप—"जो सूर्य परमेश्वर सब विद्याओं का देनेवाला और हमसे उनका प्रचार करानेवाला है, उसी के अनुग्रह से हम लोग अग्निहोत्र करते हैं ।' यह अर्थ भी वेदबाह्य है; क्योंकि इस अर्थ के बोधक मन्त्र में कोई शब्द नहीं हैं । जीव सर्ववेत्ता नहीं हो सकते, यह बात प्रत्यक्ष के विरुद्ध है । वर्च पद का अर्थ अन्तर्यामी और सत्य का अर्थ उपदेष्टा भी नहीं होता ।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जातविज्ञानान् करोतु' इति भूमिकोक्तं मन्दम्, तादृशार्थस्य निष्प्रमाणत्वात्। निराकारस्य त्वत्परमेश्वरस्य चक्षुराद्यभावेन कटाक्षाभवेन कृपाकटाक्षस्याऽप्यसम्भवात्।"

समा०—इदं मन्दवचनमेव मतिमान्द्यमस्य द्योतयति, तदर्थस्य प्रमाणबहुलपुष्टत्वात्। प्रेरणप्रसवैश्वर्याद्यर्थवतः 'षु'धातोर्निष्पन्नसवितृशब्दस्य सूर्यलोको जीवो वाप्यर्थो भवति, न कश्चित्तत्र प्रत्यूहव्यूहः। 'पुरुष एव सविता' (जै० उ० ४।२७।१७), 'प्राणो वै सविता' (ऐ० १।१९), 'मनो वै सविता' (शत० ६।३।१।१३) इत्यादिप्रमाणैर्जीवोऽर्थो गृह्यते। 'सजूः' इत्यस्य सहार्थः। व्युत्पत्तिस्तु यथा—'सजूः यः समानं जुषते सेवते प्रीणाति वा सः' इति ऋषिभाष्यम्।

यत्त्वत्रोव्वटमहीधरसायणादिभिः—'समाना जूः प्रीतिर्यस्यासौ सजूः समानप्रीतिः' इति व्याख्यातम्, तद् बहुव्रीहौ पूर्वपदप्रकृतिस्वरप्राप्तेः सर्वमयुक्तम्। अव्युत्पन्नपक्षे तु चादिपाठान्निपाताद्युदात्तत्वप्राप्तिरपि 'एवादीनामन्तः' (फि० ८२) इत्येवं वारणीया। बहुव्रीहिं प्रदर्शयतां कृत्स्वरेण कथमिष्टस्वरसिद्धिरिति एव प्रष्टव्याः। (इति जिज्ञासुमहाभागाः)

इन्द्रः सूर्यो जीवात्मा वाऽपि यथा पाणिनिः—'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टम्' (अष्टा० ५।२।९३) इत्यादिना इन्द्रस्यार्थो जीवः। अतः सूर्यप्रकाशवत्या

प्रमाणों से शून्य है। आपका परमेश्वर तो निराकार है। उसके जब आँखें नहीं है, तो कटाक्ष कहाँ से रहेंगे।"

समाधान—इनका यह मन्द कथन इनकी मतिमन्दता का द्योतन कर रहा है; क्योंकि ऋषिकथन बहु प्रमाणों से परिपुष्ट है। प्रेरण-प्रसव-ऐश्वर्य आदि अर्थवाली 'षु' धातु से निष्पन्न 'सवितृ' शब्द का अर्थ सूर्यलोक तथा जीव भी है। इस अर्थ के ग्रहण में कोई विघ्न नहीं है। सविता से सूर्यलोक अर्थ सर्वविदित है। पुरुष, प्राण और मन के सविता होने से जीव अर्थ गृहीत हो जाता है। 'सजूः' का अर्थ 'सह' है, जिसकी व्युत्पत्ति है—जो समानरूप से सेवन करता व प्रीति करता है।

उव्वट, महीधर, सायणादि ने 'समान है प्रीति जिसकी' इस रूप में सजूः शब्द की व्याख्या की है, वह बहुव्रीहि में पूर्वपदप्रकृतिस्वर की प्राप्ति होने से अयुक्त है। अव्युत्पन्न पक्ष में चादिगण में पढ़ने से निपात होने से आद्युदात्तत्व की प्राप्ति भी फिट्सूत्र (८२) से वारणीय है। बहुव्रीहि समास दिखाने वालों के पक्ष में कृत्स्वर से इष्ट स्वरसिद्धि कैसे होगी, यह इन्हें ही बतानी चाहिये।

इन्द्र सूर्य और जीवात्मा का भी वाचक है। पाणिनिसूत्र (५।२।९२) इसमें प्रमाण है। अतः सूर्यप्रकाशवाली उषा और जीव-पक्ष में उषा अर्थात् मानसवृत्ति के साथ, यह श्लिष्ट अर्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उषसा, जीवपक्षे उषसा मानसवृत्त्या सहेत्यर्थः साधीयान्।

यदुक्तम्—"निराकारस्य त्वत्परमेश्वरस्य चक्षुराद्यभावेन कृपाकटाक्षस्याऽप्यसम्भवात्" इति, तत्तु बालिशोक्तिरेव। 'सहस्राक्षः' इत्यनेन सर्वद्रष्टृत्वं तस्य। अपरं चायं भवतोऽपि सिद्ध पक्षः साकारस्य साध्यत्वात्। तदा किं 'सः सर्वज्ञः सः सर्ववित्' इत्यनेन निराकारस्याऽपि सर्वद्रष्टृत्वमनुमन्यते भवताऽपि? अन्यच्चालङ्कारिकदृष्टिरेवैतस्य मन्दा, या कृपारूपं कटाक्षत्वं नोपमितं समवबुध्यते। अत्र कृपातिशयिताक्षत्वमेवाऽवगन्तव्यं परमात्मनः, कटशब्दस्यातिशयवाच्यत्वात्। यथा—'कटः श्रोणौ द्वयोः पुंसि कलिञ्जेऽतिशये शवे' इति मेदिनी।

पृ० १५१०, पं० ४—यदप्याह—"सूर्यलोकस्य जीवस्य सूर्यपदेन कथं बोधः" इति वचो मतिमान्द्यदर्शकम्। नह्यत्र सूर्यपदेन बोधो लिखितः, प्रत्युत सवितृपदेन, तच्चोपरिष्टाद् द्रष्टव्यम्। कथन्न सूर्यपदेन सूर्यलोको गृह्येत?

पं० ५—"एवमेवेन्द्रवत्या वायुचन्द्रवत्या रात्र्या सह वर्तते सोऽग्निः सम्प्रीतोऽस्मान् नित्यानन्दमोक्षसुखाय स्वकृपया कामयतु, इत्युक्तिः कथमनुन्मत्तस्य सम्भवति? वस्तुतस्तु

महर्षि के भाष्य की विशेषता है। उष दाहे, उच्छी विवासे तथा वश कान्तौ धातुओं से सिद्ध उषा शब्द (कान्त्यर्थक) मानसवृत्ति का भी द्योतक है।

यह कहना कि—"निराकार परमेश्वर के कृपाकटाक्ष तो हो नहीं सकते; क्योंकि उनके नेत्र नहीं हैं।" तो बचपना है। क्योंकि 'सहस्राक्ष' से उसका सर्वद्रष्टृत्व सिद्ध है। दूसरे आपका ईश्वर को साकार मानना भी तो अभी साध्य कोटि में है। तो क्या 'वह सर्वज्ञ तथा सर्ववित् है' यह कहकर आप निराकार को भी सर्वदृष्टता मानते हैं? जैसा कि आपका भी हमारा सम्मत सिद्धान्त पक्ष है। दूसरे आप में साहित्यिक आलङ्कारिक दृष्टि का सर्वथा अभाव है, जो कि आप सादृश्यसम्पन्न कृपारूपी कटाक्ष को भी नहीं समझ पाये और उल्टा ऋषिभाष्य पर कटाक्ष करने लगे। यहाँ परमात्मा की कृपा की अतिशय दृष्टि ही कृपाकटाक्ष है। कट शब्द के अतिशयार्थ कहने में मेदिनीकोष प्रमाण है।

पृ० १५१०, पं० ४—"सूर्यलोक और जीव का सूर्य पद से कैसे बोध हुआ" आपका यह वचन आपकी दृष्टि और मति दोनों की मन्दता का परिचायक है, क्योंकि 'सविता' पद के उक्त दोनों अर्थ हैं। भला सूर्य पद से सूर्य लोक का कैसे ग्रहण नहीं होगा? और 'सूर्यलोकस्य जीवस्य' यहाँ 'चकार' भी पढ़ना चाहिये, जैसा ऋषि ने 'जीवेन च' पढ़ा है, अन्यथा अपपाठ ठहरेगा।

पं० ५—आक्षेप—"इसी प्रकार इन्द्रवती अर्थात् वायु और चन्द्रमा वाली रात्रि के साथ रहनेवाला अग्नि हम पर प्रसन्न हो। हमें नित्य आनन्द अर्थात् मोक्षसुख प्रदान करने की कामना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दयानन्दोऽन्ये च तदीया एभिर्मन्त्रैरग्निहोत्रस्य विडम्बनामेव कुर्वन्ति।"

इति समग्रमपि स्वाध्यायबुद्धिविहीनस्य भङ्गतरङ्गविलोलितमानसस्य विक्षिप्तस्येव वचनम्। यतो हि 'अयं वा इन्द्रो योऽयं (वातः) पवते' (शत० १४। २। २। ६), 'यो वै वायुः स इन्द्रो य इन्द्रः स वायुः' (शत० ४। १। ३। १९) इत्यादिप्रमाणैर्वायुरपि इन्द्रः। चन्द्रस्याऽपि सूर्यकिरणेनैव द्योतितत्वादिन्द्रार्थे चन्द्रप्रयोग औपचारिकः। अथवा 'इन्द्रो ह वै षोडशी' (शत० ४। ५। ३। १) इत्यत्र योजनीयम्। उव्वटमहीधराभ्यां तु एतद्व्याख्यानं न स्फुटं कृतम्। अयं कि करपात्रोऽपि—"रात्रिस्तु (देवराजेन्द्र) पूज्या सर्वप्रपञ्चस्वामिनी महाशक्तिः। स्वापोन्मुखायास्तस्या रात्रिपदव्यपदेश्यता" इत्यादि व्याहरन् कस्मिंश्चिद् अतथ्ये स्वप्नलोके विचरन् कल्पयते, यन्न शास्त्रप्रमाणितम्।

करे। इस तरह की बात कोई पागल ही कह सकता है। वास्तव में दयानन्द और उनके अनुगामी इन मन्त्रों से अग्निहोत्र करके इन पवित्र कृत्यों के साथ मज़ाक ही करते हैं।"

समाधान—अब आपने अपने 'पागल' शब्द का प्रयोग करके बुद्धिविहीन भङ्ग की तरङ्ग में डोलते मन की विक्षिप्तता ही प्रकट कर दी है। क्योंकि इन्द्र के वायु अर्थ में शतपथ-प्रमाण पोषक है और इन्द्र अर्थात् सूर्य की किरण से ही चन्द्रमा प्रकाशित होता है, अतः औपचारिकता से इन्द्र पद से चन्द्रमा अर्थ गृहीत होता है, अथवा उक्त शतपथ-प्रमाण से इन्द्र षोडशी अर्थात् सोलहकलायुक्त चन्द्रमा का भी ग्रहण कर लेना उपयुक्त है। उव्वट और महीधर तो इसकी व्याख्या स्पष्टरूप में करने में असमर्थ रहे। महीधर लिखते हैं—'इन्द्रवत्या रात्र्या इन्द्रेण देवेनोपेतया रात्रिदेवतया।' इस पर प्रश्न है कि वह कैसा देवता इन्द्र है, जो केवल रात्रि का ही देवता है। करपात्री जी ने पृष्ठ १५०९ पर इसकी व्याख्यारूप कुछ अक्ल की बात किसी की नकलरूप में उतारी है, पर वहाँ पर भी वे देवराज इन्द्र पद से परमात्मा का ग्रहण न कर किसी अन्य को देवराज मान रहे हैं।

इस प्रकार तो—"इन्द्र की रात्रि, इन्द्र की पूज्य सारे प्रपञ्च की स्वामिनी महाशक्ति है; क्योंकि यह महाशक्ति जब सोने लगती है, उस अवस्था को रात्रि कहा जाता है और जब यह जगती है, तो उसको उषःकाल कहा जाता है।" यह उद्धृत कर करपात्र भी स्वयं किसी अवास्तविक कल्पनालोक में ही विचर रहे हैं। इस उदक्षर व्याख्या में इन्हें शास्त्र का प्रमाण देना चाहिये। अस्तु, हम पूछते हैं कि क्या यह यहाँ शक्ति गुण है या द्रव्य? इसकी भी यह कल्पनात्मक स्थिति है या वस्तुस्थिति? यदि गुण है तो जिस देव का यह गुण है, गुण के सो जाने पर उस गुणवान् को नींद आती है या नहीं? नियमतः आनी चाहिये। यदि द्रव्य की वस्तुस्थिति है तो अद्वैतता अक्षत नहीं रह सकती। आपने इसी सन्दर्भ में पढ़ा है कि 'अग्निहोत्रमन्त्रोऽयम्' फिर भी आप स्वामी जी द्वारा 'मज़ाक' बता रहे हैं। तब तो आप भी वही मज़ाक कर रहे हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यत्तु—"हविर्वेतु भक्षयतु, 'वी प्रजननकान्त्यवसादनेषु" इति वक्ति, तदपि महीधरस्य भ्रान्तानुकृतिमात्रम्, मूलधातुपाठानभिज्ञानात्। महीधरेण 'वी प्रजननकान्त्यसनखादनेषु' इति लिखितम्, अनेन तत्राऽप्यपपाठो व्यधायि। धातुपाठे तु 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' एवमस्ति। एतेन एतस्य वस्तुतो ज्ञानापात्रस्य करपात्रस्य तदीयानुयायिनां वा भूमिकालेखे आक्षेपसंरम्भो दुःसाहसमुपहासास्पदमेव तत्त्वविदां विपश्चितां मते।

सुधीजना इहैतस्य छलाचरणं परिचिन्वन्तु, एतस्य हिन्दीकारो लिखति—"सायङ्कालिक-'सजूर्देवेन' इति मन्त्रस्य संस्कृतस्यानुवादे यत् 'रात्रि के साथ रहनेवाला अग्नि हम पर प्रसन्न हो।' एतदग्रे—'हमें नित्य आनन्द, अर्थात् मोक्षसुख प्रदान करने की कामना करे।'" यदा हि एतदनुवाद एवं कारयितव्य आसीद् यत्—"हम लोगों को नित्य आनन्द, अर्थात् मोक्षसुख के लिये अपनी कृपा से कामना करने योग्य बनाये।" वस्तुतस्तु शब्दशास्त्रायार्द्धचन्द्रं दत्त्वा वाक्ययोजनाप्रक्रियां च घ्रात्वा विक्षिप्तमतिरिव असन्तुलितमस्तिष्क आक्राम्यति सुघटित-वाक्यरचनायां यत्—'आप्तकामोऽस्मान् कामयतु'। इह एवं प्रक्रियाऽवगमनीया स्वामि-वाक्ये यत्—'वयं काम्यामः, काम्यतोऽस्मान् कृपा प्रेरयतु इति ताम् ईश्वरः प्रयुङ्क्ताम् इति ईश्वरः कृपया अस्मान् कामयतु'।

'हविर्वेतु' अर्थात् खाये या पिये (उव्वट-पिबतु)। वेतु शब्द की सिद्धि 'वी' धातु से की है, वह ठीक है। पर महीधर ने स्वयं भी 'प्रजननकान्त्यसनखादनेषु' यह पाठ किया, जो अपपाठ है। जबकि सायणाचार्यविरचित माधवीयधातुवृत्ति में 'वी गतिप्रजनकान्त्यसनखादनेषु' पाठ है, पर धातुपाठ में 'गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इन छः अर्थों में 'वी' धातु का प्रयोग दिखाया है। ज्ञान के अपात्र श्री करपात्र और उनके अनुयायियों का भूमिकालेख पर आक्षेप करने का दुःसाहस करना तत्त्वज्ञ विद्वानों के लिये उपहासास्पद ही है।

सुधीजन इस लेखकमण्डल के छलाचरण को देखें। सायंकाल के 'सजूर्देवेन०' मन्त्रभाष्य 'सम्प्रीतोऽस्मान् वेतु, नित्यानन्दमोक्षसुखाय स्वकृपया कामयतु' का अर्थ इन हिन्दीकार ने लिखा है कि 'अग्नि हमें नित्यानन्द अर्थात् मोक्षसुख प्रदान करने की कामना करे।' जबकि भाष्य अनुवाद ठीक-ठीक होना चाहिये कि 'प्रसन्न होकर वह अग्नि (परमेश्वर) हम लोगों को नित्य आनन्द अर्थात् मोक्षसुख के लिये अपनी कृपा से कामना करनेयोग्य बनाये।' वस्तुतः शब्दशास्त्र को अर्धचन्द्र देकर और वाक्ययोजना-प्रक्रिया को सूँघकर विक्षिप्त मति के समान असन्तुलितमस्तिष्क होकर भूमिका की सुघटित वाक्यरचना पर यह आक्रमण कर रहा है कि 'वह आप्तकाम परमेश्वर हमारे लिये कामना करे। यहाँ स्वामी जी की वाक्यरचना समझने के लिये इसप्रकार समझिये—'वयं काम्यामः, काम्यतोऽस्मान् कृपा प्रेरयतु इति, तां कृपामीश्वरः प्रेरयतु इति, ईश्वरः स्वकृपया अस्मान् नित्यानन्दमोक्षसुखाय कामयतु'। इसमें ईश्वर स्वयं कामना करे, यह अर्थ निकालना समझ का फेर है। आश्चर्य है कि स्वयम् उन्मत्ताचरण कर अन्यों पर आक्षेप कर रहे हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५१०, पं० ७—यदप्याह—"सर्वथाऽप्यग्निहोत्रदर्शपूर्णमासचातुर्मास्यज्योतिष्टोमादिज्ञानशून्यानामेव वायुजलादिशुद्ध्यर्थं तद्रीत्याग्निहोत्रादिकम्।" इति, तदपि ईर्ष्यादहदन्तःकरणस्य मृषा वचनम्, अग्निहोत्रादिविधिविशेषज्ञार्यविदुषामुपलम्भात्। ग्रन्थाश्च तत्तद्विधिबोधकाः पूर्वत आसन्। महर्षिणा अत एव न नूतना निर्मिताः। परं शाहपुराधीशराजप्रासादेषु दर्शपूर्णमासादिषु आहवनीय-गार्हपत्य-दक्षिणाग्नि-आवसथ्याग्नि-सभ्याग्निकुण्डानामृषिजीवनकालेऽपि रचना कारिताऽऽसीत्। आर्यविद्वांसः कर्मकाण्डनिष्णातास्तत्तद्यज्ञविधिज्ञाः सन्त्येव, नहि भवत्स्वपि पौराणिकेषु समेऽपि तद्विदः। वायुजलादिशुद्ध्यर्थं दृष्टमपि यज्ञफलं न कथमपि अपलपितुं शक्यते।

पृ० १५१०, अनु०२—यदाह—"ओं भूरग्नये०' इत्यादयो मन्त्रास्तैत्तिरीयोपनिषदाशयेनैकीकृताः' इति, तत्तु मूढजनप्रतारणमेव, यतो हि मन्त्रा निगदोक्ता भवन्ति। न केषाञ्चिदाशयेन मन्त्रा निर्मीयन्ते।"

इत्यविकलमेव मूढजनप्रतारणायैव असन्दिग्धम्, यतो हि न महर्षिणोक्तमिह यत्तदाशयेन निर्मीयन्ते, निर्मिता वा, यथाऽयमलीकमाक्षिपति। तत्र तु 'एकीकृताः' इत्येवोच्यते।

पृ० १५१०, पं० १२—यच्चाह—"तथैवानेन दयानन्देन वैदिकसन्ध्यायां 'वाग् वाग्'

पृ० १५१०, पं० ७—"अग्निहोत्रादि के ज्ञान से शून्य लोगों की दृष्टि में केवल जल-वायु शुद्धि से यज्ञ का प्रयोजन है।" यह कथन ईर्ष्या से धधकते अन्तःकरण का ही मिथ्या वचन है। अग्निहोत्रादि के विधिविशेषज्ञ विद्वान् अब भी आर्यसमाज में हैं। तत्तद्विधि के बोधक ग्रन्थ तो पहले से ही थे। महर्षि ने इसलिये इन विधियों के ग्रन्थ नहीं लिखे। परन्तु शाहपुराधीश के महलों में दर्शपूर्णमासादि और आहवनीय, गार्हपत्य, दक्षिणाग्नि, आवसथ्य और सभ्याग्नि आदि अग्नियों के कुण्डों की रचना ऋषि के जीवनकाल में करायी गई थी। आर्यविद्वानों में तत्तद्विधि के ज्ञाता हैं, आप पौराणिकों में भी तो सभी तद्विधिज्ञ नहीं हैं, कतिपय ही हैं। वायुजल आदि की शुद्धि के यज्ञ के दृष्ट फल का किसी प्रकार कोई भी अपलाप नहीं कर सकता।

पृ० १५१०, अनु० २—"स्वामी दयानन्द ने 'भूरग्नये स्वाहा' आदि मन्त्रों को कहा है कि तैत्तिरीयोपनिषद् के आशय से एकीकृत हैं। यह सब मूढ जनों के ठगने के लिये है; क्योंकि मन्त्र वेद में प्रत्यक्ष पढ़े गये हैं। किसी के आशय से मन्त्रों का निर्माण नहीं होता।"

श्रीमन्! आपका यह कथन ही मूर्खजनों के ठगने के लिये है, क्योंकि महर्षि ने यह नहीं कहा कि हमने निर्मित किये हैं, प्रत्युत उन का अभिप्राय है कि तैत्तिरीय उपनिषत् के आशय को प्रकट करनेवाले ये मन्त्र वेद से ही एकत्र कर यहाँ लिखे गये हैं।

पृ० १५१०, पं० १२—आपका यह कथन भी मिथ्या है कि—"उसी प्रकार दयानन्द ने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादयोऽपि स्वाभ्यूहिता मन्त्रा उपन्यस्ताः।" इति, तदपि मिथ्या, एतेषां मन्त्राणां पूर्वाभ्यूहितानां प्रचलितत्वात्। यदा च तवैव वाराणसीतः प्रकाशिते 'बृहद्यजुर्वेदीयसन्ध्योपासनम्' इतिनामकपुस्तके 'वाग् वाग्' इति मन्त्रोल्लेखः, कालिकातः प्रकाशिते 'त्रिकालसन्ध्या' नाम्नि च पुस्तके 'ओं भूः पुनातु शिरसि' इत्यादिमन्त्राश्चोल्लिखिताः।

ननु स्वामिना तु पूर्वप्रचलितानामपि 'नमो भगवते वासुदेवाय' इत्यादिमन्त्राणां खण्डनमेवाऽकारि परं नानुकृतिः, कथं पुनरिह पौराणिकपद्धतेरनुसृतिर्व्यधायि इति न वक्तव्यम्, वेदानुकूलस्य विधेः सर्वत्र मण्डितत्वात्, 'वाग् वाग्' इत्यादीनां च 'वाङ् म आसन्नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः' (अथर्व० १९।६०।१-२), 'वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि' (यजुः० ६।१४) आदिमन्त्रमूलकत्वाच्च।

ये च मन्त्रा भवादृग्जनकपोलकल्पितास्तेषामवैदिकत्वात् खण्डनमेवाभीष्टम्। यथा—

(क) 'इमं देवा असपत्नं' (यजुः० ९।४०) इति मन्त्रे 'एष वोऽमी राजा' अत्र 'अमी' पदस्य सामान्यवाचकस्य स्थाने 'एष वो भरता' (तै० सं० १।८।१०।१२), मैत्रायण्यां च 'एष वः कुरवो राजा, एष पञ्चाला राजा' एषा ऐतिहासिकी विशिष्टवाचकपदानां कल्पना कृता।

(ख) गायत्रीमन्त्रस्य च 'धीमहि, नः प्रचोदयात्' इति पदन्यासपुरःसरं मैत्रायणीसंहिता-

---

वैदिकसन्ध्या में 'वाग् वाक्' आदि मन्त्र स्वयं गढ़ कर लिख दिये।" जबकि वाराणसी से प्रकाशित तुम्हारे ही 'बृहद् यजुर्वेदीयसन्ध्योपासनम्' नामक पुस्तक में पूर्व से ही 'वाग् वाक्' मन्त्र आया हुआ है। कलकत्ता से प्रकाशित 'त्रिकालसन्ध्या' नामक पुस्तक में 'भूःपुनातु शिरसि' इत्यादि मन्त्रों का उल्लेख है।

प्रश्न—स्वामी जी ने तो 'नमो भगवते वासुदेवाय' आदि मन्त्रों का खण्डन किया है, अनुकरण तो किया नहीं, फिर पौराणिक पुस्तकों में पाई जानेवाली सन्ध्या आदि विधिमन्त्रों का अनुसरण या उल्लेख क्यों किया?

उत्तर—'वाग् वाग्' आदि मन्त्रों का मूल 'वाङ् म आसन्' (अथ० १९।६०।१-२), 'वाचं ते शुन्धामि०' (यजुः० ६।१४) आदि मन्त्रों में है, अतः वेदानुकूल विधि का ऋषि ने सर्वत्र ग्रहण किया है, वेदविपरीत का खण्डन किया है।

(क) 'इमं देवा असपत्नं' (यजुः० ९।४०) इस मन्त्र में 'एष वोऽमी राजा' इसमें 'अमी' सामान्य सर्वनाम के स्थान पर 'एष वो भरताः' (तै० सं० १।८।१०।१२) और मैत्रायणी में 'एष वः कुरवो राजा, एष पञ्चाला राजा' यह ऐतिहासिकी विशिष्ट कल्पना कर ली गई।

(ख) तथा गायत्री मन्त्र के 'धीमहि, नः प्रचोदयात्' इन पदों को लेकर मैत्रायणीसंहिता में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

याम् 'तत्पुरुषाय विद्महे, महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्' इत्यादिमन्त्राणाम्, 'वीरमित्रोदयभक्तिप्रकाशे' रामगायत्र्युद्धरणे 'दाशरथाय विद्महे, सीतावल्लभाय धीमहि, तन्नो रामः प्रचोदयात्' आदिमन्त्राणाम्, अथवा 'ऊँ ह्राँ ह्रीं ह्रूँ बगलामुख्यै फट् स्वाहा' (श्रौतयज्ञ-मीमांसा—श्रीमीमांसकः) इत्यादि तान्त्रिकमन्त्राणां कपोलकल्पितानां खण्डनमेवाभीष्टम्।

पृ० १५११, पं० १—यदाह—'सुगन्धि-पुष्टि-मिष्ट-बुद्धिवृद्धि-शौर्य-धैर्य-बल-रोगनाश-करैर्गुणैः०' इत्यत्र "सुगन्धीत्यादयो गुणाश्चेत् कथं सुगन्धिपदनिष्पत्तिः ? मिष्टपदं च कथं गुणपरमित्यपि चिन्त्यम्।" इति, तदपि एतद्विषयानभिज्ञत्वमेवास्य। सुगन्धिपदविषये प्रथम-खण्डे विस्तरशो लिखितम्, तदत्र नाधिकं प्रपञ्च्यते। तस्मिन् वाक्यरचने समासे एवमवगन्तव्यं यत्—सुगन्धीनि च पुष्टानि च मिष्टानि च तेषां सुगन्धिपुष्टमिष्टानामिति पाठः। 'पुष्टि' इत्यत्र मुद्रणदोषादिकारः। अग्रेऽपि रोगनाशपर्यन्तं द्वन्द्वं विधाय कुर्वन्तीति करास्तैर्गुणैर्युक्तानां द्रव्याणाम्। अत्र सुगन्धिपुष्टमिष्टानां बुद्धि-वृद्धि-शौर्य-धैर्य-बल-रोगनाशकरैर्गुणैर्युक्तानां द्रव्याणामिति पाठोऽवगन्तव्यः।

इत्यग्निहोत्रविधिः समाप्तः

'तत्पुरुषाय विद्महे, महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्' आदि मन्त्रों की रचना, 'वीरमित्रोदय भक्तिप्रकाश' के रामगायत्री-उद्धरण में 'दाशरथाय विद्महे, सीतावल्लभाय धीमहि। तन्नो रामः प्रचोदयात्' मन्त्रों और 'ऊँ ह्राँ ह्रीं ह्रूँ बगलामुख्यै फट् स्वाहा' आदि तान्त्रिक मन्त्रों की कल्पना कर ली गई, जो सब अमान्य व अवैदिक है।

पृ० १५११, पं० १—आक्षेप—'सुगन्धि-पुष्टि-मिष्ट-बुद्धिवृद्धि-शौर्यादिकर गुणों से युक्त द्रव्यों के होम करने से' इसमें "सुगन्धि आदि गुण हैं तो सुगन्धि शब्द की निष्पत्ति कैसे होगी? तथा मिष्ट शब्द गुणपरक कैसे होगा?"

समाधान—आप इस विषय को समझ नहीं सके। सुगन्धि शब्द की निष्पत्ति विस्तृतरूप से प्रथम खण्ड मे दिखाई गई है। पुष्ट तथा मिष्ट पद पदार्थ के विशेषण हैं। यहाँ 'मिष्टानाम्' ऐसा पाठ होना है। आगे के बुद्धि आदि रोगनाशपर्यन्त शब्दों में द्वन्द्व समास करके उनके करनेवाले गुणों से युक्त द्रव्यों के होम करने से—ऐसा अन्वय करने पर भाष्य सर्वथा सङ्गत है।

अग्निहोत्रविधि समाप्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ पितृयज्ञः

पृ० १५११, पं० ३—आ०—यदाह—"तृतीयस्य पितृयज्ञस्य तर्पणश्राद्धरूपेण प्रकारद्वयमुक्त्वा किमपि जल्पितम्, तत्तु विचित्रमेव। 'तत्र येन कर्मणा विदुषो देवान् ऋषीन् पितॄंश्च तर्पयन्ति सुखयन्ति तत्तर्पणम्' इति, तदपि तुच्छम्, तर्पणशब्दस्य योगरूढत्वात्। अन्यथा मनुष्यपश्वादिसुखकराणामन्नघासादिदानस्याऽपि तर्पणशब्दवाच्यत्वापत्तेः। देवर्षिपितृजातीनां मनुष्यजातेर्भिन्नत्वेन मन्वादिभिरुक्तत्वाच्च।"

समा०—महर्षिणा तृतीयपितृयज्ञस्य तर्पणं श्राद्धं च द्वौ भेदौ कृतौ। एतत्सूक्ष्मतामधिगन्तुं नाक्षमिष्ट मतिरेतस्य, फलतश्चेदमाह विचित्रम्। तर्पणं हि अन्नादिभिस्तर्प्यमाणस्य तृप्तिं जनयति न परं तर्पकस्य। यदि श्रद्धा श्रद्धेयस्य हृदि न सन्तोषं तृप्तिं वा जनयति परं श्रद्दधानस्य तु हृदि जनयते। पूर्वेण कृत्येन पितॄणां सुखमपरेण च सन्तानस्य। तृप्त्याधारस्तर्पणीयः परं श्रद्धाधारः श्रद्दधानः। एवं विविच्यैव महर्षिराह—'येन कर्मणा पितॄन् तर्पयन्ति सुखयन्ति तत्तर्पणम्, प्रीत्या यत् सेवनं क्रियते तत्तर्पणम्, श्रद्धया श्राद्धम्।' एवं विवेचनं तुच्छेभ्यस्तुच्छमेव हि नाश्चर्यम्।

अथ तृतीय पितृयज्ञ

पृ० १५११, पं० ३—आक्षेप—"स्वामी दयानन्द ने तृतीय पितृयज्ञ के दो भेद किये हैं—तर्पण और श्राद्ध। उनका यह विभाग बड़ा विचित्र है। 'वहाँ पर जिस कर्म से विद्वानों देवों पितरों को तृप्त या सुखी करते हैं, उसे तर्पण कहते हैं।' यह कथन तुच्छ है; क्योंकि तर्पण शब्द योगरूढ है। अन्य मनुष्य पशु आदि को सुख देनेवाला अन्न, घासादि का दान भी तर्पण कहा जाने लगेगा। देव, ऋषि, पितृगण—ये मनुष्यजाति से भिन्न हैं, इनका तर्पण मनु आदि ने कहा है।"

समाधान—इस लेखक की मति ऋषि के सूक्ष्म विश्लेषण तक नहीं पहुँच सकी। अत एव ये कहते हैं कि विचित्र है। इसलिये समझिये—तर्पण से तर्प्यमाण की अन्नादि से तृप्ति की जाती है, तब तृप्ति तर्पक की नहीं होगी, वरन् तर्प्यमाण की होगी। पर श्रद्धा श्रद्धेय के हृदय में न होकर श्रद्धधान के हृदय में होती है। तर्पण का फल उद्दिष्टगामी होगा, पर श्राद्ध का फल कर्तागामी होगा। तर्पण कर्मप्रधान तथा श्रद्धा भावप्रधान होगी। अतः श्रद्धापूर्वक तर्पण किया जा सकता है, पर तर्पणपूर्वक श्रद्धा नहीं हो सकती। फलतः हृदय में श्रद्धा रखकर अन्नादि से देव, ऋषि और पितरों को तृप्त करे। पूर्वकृत्य अर्थात् तर्पण से देवादि को सुख मिलता है और दूसरी श्रद्धा से सन्तान को सुख मिलता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तर्पणशब्दस्य योगरूढत्वे उक्तार्थो न निःसरिष्यतीति कथं सिध्यति? यौगिकत्वात् पितृषु घटतेऽयमर्थः। रूढत्वादेवं पश्वादिषु नातिव्याप्नोति। गच्छतीति गौरिति विगृह्य गोषु एव घटते लक्षणन्न कश्चिद् भवान् गच्छतीति भवति घटयति।

मृषोक्तिरेषा तु यच्चेतनदेवाः पितरो मनुष्यजातेर्भिन्नाः। न च मनुना समर्थ्यते। 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्न तु प्रतिज्ञामात्रेण' इति न्यायेन नैतद्वचः प्रमाणम्। ते मनुष्या एवात्र। तत्र प्रमाणम्—

आङ्गिरसनामा विद्वान् बालकः स्वपितॄन् पितृव्यानध्यापयामास। तदा ज्ञानदातृत्वात् तान् पितॄन् 'पुत्रकाः' इति सम्बोधयामास। उक्तसम्बोधनं श्रुत्वा ते शिष्यभूताः पितरोऽन्यान् ज्यायसो विदुषः पप्रच्छुस्तत्सम्बोधनौचित्यम्। ते प्रोचुः—

(अ) ते तमर्थमपृच्छन्त देवानागतमन्यवः।
देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान्॥ मनु० २।१५२॥
न तेन वृद्धो भवति येनाऽस्य पलितं शिरः।
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः॥ मनु० २।१५६॥

(आ) 'देवा वा एते पितरः।' (गो० उ० १।२४)

यह कहना भी ठीक नहीं कि तर्पण शब्द को योगरूढ मानने पर उक्तार्थ सिद्ध नहीं होता। यौगिक होने से तर्पण देवतादि पितरों में घटित होता है, रूढ होने से पशु आदि में घटित नहीं होगा। 'गच्छति' इस निरुक्ति से गौ में लक्षण घटित होगा, पर रूढ होने से गमन करते हुए भी आपमें घटित नहीं होगा।

यह कथन मिथ्या है कि देव व पितर मनुष्यजाति से भिन्न हैं। मनु द्वारा आपका कथन पोषित नहीं होता। लक्षण और प्रमाण से ही वस्तुसिद्धि होती है, प्रतिज्ञामात्र से नहीं। प्रमाण देखिये—

आङ्गिरस नामक विद्वान् बालक ने अपने पितरों को 'हे पुत्रों' कहकर सम्बोधित किया, जबकि ये अपने पितृव्यों को पढ़ा रहे थे। इस प्रकार सम्बोधित पितरों ने अन्य बड़े विद्वानों से पूछा कि क्या ऐसा सम्बोधन करना उचित है? वे बोले—

(अ) शिशु ने आप देवों को न्यायसङ्गत सम्बोधन किया है।

(आ) ये पितर देव भी कहलाते हैं (गो० उ० १।२४)।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(इ) 'मर्त्या वा पितरः।' (शत० २।१।३।४)

वस्तुतस्तु मनुष्येषु ज्ञानादिना पितृदेवर्षीणां कोट्य एव।

पृ० १५११, पं० ६—"यत्तेषां श्रद्धया सेवनं क्रियते तच्छ्राद्धम्' इत्यपि मन्दम्, तर्पणस्याऽपि श्राद्धत्वाविशेषात्।" इत्युक्तवते मन्दमतये पूर्वसमाधानमनुसन्धेयम्। "स्वामिनोक्तम्—'विद्वत्सु विद्यमानेषु एतत् कर्म सङ्घट्यते नैव मृतकेषु। कुतस्तेषां प्राप्त्यभावेन सेवनाशक्यत्वात्। तदर्थकृतकर्मणः प्राप्त्यभाव इति व्यर्थतापत्तेश्च। तस्माद् विद्यमानाभिप्रायेणैतत् कर्मोपदिश्यते। सेव्यसेवकसन्निकर्षात् सर्वमेतत् कर्तुं शक्यते'। इति, तदपि तुच्छम्, 'सङ्घटते' इत्येतावतैव कार्यनिर्वाहे भावार्थकप्रत्ययस्य नैरर्थक्यापातात्।"

इत्येतद्वचनं तुच्छवचनशीलस्यासङ्गतम्, भावार्थकप्रत्ययस्य (सङ्घट्यते) नैरर्थक्येऽपि मृतकानां समक्षेऽविद्यमानत्वात् सेवाया अशक्यत्वान् मृतकश्राद्धाऽप्रमाणितत्वाच्च। अत्र 'सङ्घटते' इत्येव साधु, यकारस्तु मुद्रणदोषात्। अथवा 'सङ्घट्यते' इत्यपि साधु, जना विद्वत्सु विद्यमानेषु (उपस्थितेषु) एतत् कर्म सङ्घटयन्ते। कर्मणि यकि (जनैरेतत् कर्म सङ्घट्यते) न तु भावे यकि, इति।

ननु मृतेष्वपि विद्वत्सु शरीररहितनित्यात्मरूपेण विद्यमानेषु कथं न सेव्यसेवकसन्निकर्षो

(इ) ये पितर मर्त्य हैं (शत० २।१।३।४)।

वास्तव में मनुष्यों में ज्ञान आदि के द्वारा पितर, देव और ऋषि कोटियाँ हैं।

पृ० १५११, पं० ६—"यह कथन भी मन्द है कि उनका श्रद्धा से सेवन करना श्राद्ध है; क्योंकि तर्पण भी श्राद्ध से भिन्न नहीं है।" यह कहनेवाले आप को उक्त समाधान समझना चाहिये। "स्वामीजी ने कहा है कि 'विद्यमान विद्वानों में यह कर्म घटित होता है, मृतकों में नहीं। मृतकों की सेवा नहीं की जा सकती। सेव्य और सेवक दोनों प्रत्यक्ष होने चाहिये।' यह कथन भी तुच्छ है; क्योंकि भावार्थक 'सङ्घट्यते' की निरर्थकता है। 'सङ्घटते' से ही कार्य चल जाता है।"

तुच्छवचनशील पारिजातकार का यह आरोपकथन ही तुच्छ है। यदि तोषन्याय से भावार्थ में प्रत्यय मानकर 'सङ्घट्यते' को निरर्थक मान लिया जावे, तब भी मृतक श्राद्ध की निरर्थकता तो बनी ही रहेगी; क्योंकि मृतकों के प्रत्यक्ष अविद्यमान होने से सेवा की ही नहीं जा सकती। अतः मृतक श्राद्ध अप्रमाणित है। यहाँ 'सङ्घट्यते' में यकार का अधिक होना मुद्रणदोष है। अथवा उक्त प्रयोग साधु ही है, यथा—मनुष्य विद्यमान विद्वानों के कर्म सङ्घटित करते हैं। कर्म में 'यक्' प्रत्यय होने पर मनुष्यों के द्वारा कर्म सङ्घटित किया जाता है।

प्रश्न—अच्छा, मान भी लिया जाये कि मृतकों के शरीर अविद्यमान हो गये, पर नित्य आत्मा तो मृत नहीं होता। वहाँ सेव्य-सेवक सन्निकर्ष क्यों नहीं हो सकता?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मन्तव्य इति चेन्न, उपरि विद्यमानेषु उपस्थितेषु इत्येवार्थः। सन्निकर्षोऽपि नाम न शरीरेण विना सम्भवति, सेवकैर्मृतप्राभिज्ञानाऽसम्भवात्।

पृ० १५१२, पं० १—यच्चोक्तम्—"लोके शासकीयनिधानेषु स्वनाम्ना निहितद्रव्याणां यथाऽन्यनाम्ना समर्पणे नैव काठिन्यम्, तथैव स्वकृतकर्मणामप्यन्येभ्यः समर्पणे बाधाऽनुपपत्तेः।" इति लेखस्तु अकृतशास्त्राध्ययनस्यैव सम्भवति, नान्यस्य, स्वकृतकर्मणामेव फलभोगेऽनिवार्यतायाः सर्वतन्त्रसिद्धान्तत्वात्। तथा च—

'आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात्' (वैशे० ६।१।५)।

'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात्' (मी० ३।७।१८)।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' (यजुः० ४०।२)।

अत्र कुर्वन्नेव जिजीविषेन्न तु कारयन् इति।

उत्तर—ऊपर हमने विद्यमान अर्थात् उपस्थित होने पर अर्थ किया है, आत्मा चक्षुरादि से ग्राह्य है नहीं, फिर कैसे जानेंगे कि आत्मा पास में स्थित है। अतः ऋषि की तर्कपूर्ण भाषा में प्रयुक्त 'विद्यमान' और 'सन्निकर्ष' शब्द अतितरां महत्त्वपूर्ण हैं। अतः विद्यमान का अर्थ जीवित अर्थात् शरीरसहित किया है, पर किसी भी सेव्य की सेवक से सन्निकृष्टता भी परमावश्यक है, तभी 'सेवन' कर्म सिद्ध हो सकता है। सन्निकृष्टता या विप्रकृष्टता का सम्बन्ध देश-कालकृत है। मृत व्यक्ति तो सर्वथा दूर हो जाता है। सेवक को मृत सेव्य का ज्ञान ही नहीं होता कि वह किस योनि में या किस स्थान पर है।

पृ० १५१२, पं०१—"लोक-व्यवहार में भी देखा जाता है कि बैङ्कों में अपने नाम से जमा राशि में से अन्य व्यक्ति के नाम से चैक काट कर कुछ धन समर्पण करने में कोई काठिन्य नहीं आता। इसी प्रकार अपने किये कर्मों का फल दूसरे को समर्पित करने में भी कोई बाधा नहीं रहती।"

उक्त लेख शास्त्र को न जाननेवाला ही कर सकता है, अन्य नहीं। क्योंकि अपने कृतकर्मों का फल भोगना ही सर्वतन्त्रसिद्धान्त है।

'आत्मान्तर गुणों का आत्मान्तर में कारण नहीं हो सकता (वैशे० ६।१।५)।

'शास्त्रोक्त अग्निहोत्र आदि कर्मों का फल प्रयोक्ता (अनुष्ठाता) में होता है; क्योंकि वही उसका भोक्ता शास्त्रसिद्ध है, इसलिये स्वयं ही अग्निहोत्रादि का अनुष्ठाता बने' (मी० ३।७।१८)।

'कर्म करते हुए ही जीने की इच्छा करे, न कि कराते हुए' (यजुः० ४०।२)॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः' (वेदा० २ । ३ । ४२)

इत्यादिप्रमाणैर्न स्वकृतकर्मणां समर्पणं फलभोगायान्यस्मै कर्तुं पार्यते । योऽपि नामाज्ञै-र्भोगः प्रतीयतेऽन्यकर्मद्वारा, सोऽपि स्वकर्मणामेव फलम् । परन्न कर्हिचित् स्थूलशरीर-साधनमन्तरा मृतैः संसारगतं किमपि भोक्तुमनुभवितुं वा शक्यते ।

पृ० १५१२, पं० ४—यदाह—"यत्तु सत्कर्तव्येषु देवानां सत्त्वे प्रमाणमुपन्यस्तम्—'पुनन्तु मा०' इति, तदपि निर्मूलम्, मन्त्रस्यार्थान्तरत्वात् । किञ्च, विद्यादानाय विद्वांसः प्रार्थनीया न भगवान् ।" इदमपि नास्तिकवद् वचनम्, छलाचरणं चाविकलपाठानुद्धरणात् ।

यथा हि विभिन्नप्रसङ्गेषु सत्कर्तव्या अन्येऽपि भवन्ति, परमत्र 'तत्र' शब्देन 'पितृयज्ञे' इत्यर्थ उपलभ्यते । भवता 'तत्र' इति शब्दोऽनुद्धृतः । 'पुनन्तु मा' इति मन्त्रस्य ऋषिदयानन्दकृत एवार्थः श्रेयान् । परमास्तिको दयानन्दः सर्वत्र प्रभुकृपामेव याचमानः प्राग् ईश्वरनिष्ठान् तदाज्ञापालकानेव तदनु अनुमनुते । ये च नेश्वरनिष्ठावन्तो नास्तिकास्तदाज्ञापालनविमुखाश्च न ते पवित्रं कर्तुं क्षमन्त इति तदाशयः ।

'कृतप्रयत्न की अपेक्षा न हो तो विहित निषिद्ध कर्म व्यर्थ हो जाते' (वेदा० २ । ३ । ४२) ।

इत्यादि अकाट्य प्रमाणों से स्वकृत कर्मों का समर्पण फलभोग के लिये होता है, जो कर्मफल दूसरे के लिये समर्पित नहीं किया जा सकता । अज्ञ लोगों को जो कर्मफल अन्यों द्वारा किये कर्म का प्रतीत होता है, वह भ्रान्ति है और वह भी अपने कर्मों का ही फल है । परन्तु स्थूल शरीर-साधन के बिना, जीवात्मा की बाह्य ज्ञान की प्रतीति इन्द्रियों द्वारा निश्चित होने से मरे हुए लोगों के द्वारा भोग या अनुभव नहीं किया जा सकता ।

पृ० १५१२, पं० ४—"तर्पण आदि कर्म से सत्कार करने योग्य तीन हैं—देव, ऋषि और पितर, इसमें प्रमाण के रूप में 'पुनन्तु मा०' यह मन्त्र उद्धृत है । वह निर्मूल है, क्योंकि मन्त्र का अन्य अर्थ है ।" आगे आप लिखते हैं कि "विद्यादान के लिये भगवान् से प्रार्थना न करके विद्वानों से करनी चाहिये ।"

उक्त कथन नास्तिकसदृश है और अविकल पाठ का उद्धरण न करने में भी छल किया है । आपने यहाँ पाठ के उद्धरण में 'तत्र' शब्द छोड़ दिया, जिसका अर्थ है—'पितृयज्ञ-प्रकरण में' । आपके वचन नास्तिक के समान हैं । परमास्तिक दयानन्द का किया हुआ अर्थ ही उत्तम है । वे सर्वत्र कोई भी उत्तम याचना प्रभु से ही करते हैं, उसके बाद वे ईश्वर में निष्ठ उसके आज्ञापालक विद्वानों से कामना करते हैं कि वे विद्यादान करें । कदाचित् विद्यादान की प्रार्थना आपके कथनानुसार ईश्वर से ही मान ली जावे, तब क्यों बुरा है, जबकि सर्वविद्यानिधान ईश्वर अन्तर्यामी की कृपा से यह भी सम्भव है । वस्तुतः ऋषि का आशय यह है कि उस ईश्वर की निष्ठा और आज्ञापालन से रहित विद्यादान से पवित्र नहीं कर सकते ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५१२, पं० ११—आ०—"किञ्च, विद्यादानेन विद्वांसो विद्वत्त्वं सम्पादयितुं शक्नुवन्ति, परन्न ते पावित्र्यं सम्पादयितुं प्रभविष्यन्ति। यदपि भगवद्दत्त आह—"विज्ञानेनास्माकं बुद्धयः पुनन्तु पवित्रा भवन्तु' इति, तदपि मन्दम्, सकर्मकस्य पुनातेरकर्मत्वा-योगात्। विवक्षायां युक्तहेत्वभावात्। मनसेत्यस्य ज्ञानपरत्वमपि भाक्तमेव।.....पुनातेः सुखानन्दादियुक्तार्थत्वे मानाभावः। तथात्वे मद्यमांसाशिनां सुखकरत्वे मद्यमांसादीनामपि पवित्रत्वं स्यादेव।"

समा०—एतादृशी पण्डितम्मन्यमाना मतिस्त्वद्भुतालये संग्राह्याऽऽसीत्, या पावित्र्यं सुखानन्दादौ हेतुं मत्वाऽपि मद्यमांसादिसेवने आनन्दं मण्डयते। महोदय! पवित्रं हि नाम शुद्धं निष्पाद्यं भवति, निर्मले चान्तःकरणे यत् सुखमानन्दो वा भवति तदलौकिकम्, न तद् मद्यमांसादिसेवनजन्यसुखेनोपमातुं योग्यम्। ऋषिमतेनात्र तर्पणीयाः श्रद्धेया वा देवा ईश्वर-निष्ठास्तदाचारिणः, तेऽसंशयं पवित्रीकर्तुमपि प्रभवन्त्येव।

अत्र विदुषो दत्तावधानानभ्यर्थये यदेषा तुन्दपरिमृजानां सेना नावलोकितवती मूलपाठम्, यत् 'भगवद्दत्तविज्ञानेन बुद्धयः पवित्रा भवन्तु' इति स्थाने 'भगवद्दत्त आह' इति

पृ० १५१२, पं० ११—आक्षेप—"विद्यादान कर विद्वद्गण दूसरे व्यक्ति को विद्वान् तो बना सकते हैं, पर पवित्र कैसे कर सकते हैं? यहाँ पर 'भगवद्दत्त' ने व्याख्या की है कि 'विज्ञान के द्वारा हमारी बुद्धियाँ पवित्र होती हैं।' यह कथन भी मन्द है; क्योंकि सकर्मक 'पूञ्' धातु का यहाँ कोई कर्म नहीं रखा। अकर्मक प्रयोग में कोई विवक्षा का हेतु नहीं दिया। मन का ज्ञानपरक अर्थ भी गौण किया है। 'सब संसारी जीव आपकी कृपा से पवित्र और आनन्द में रहें' यह कथन भी मन्द है; क्योंकि 'सुख और आनन्द' पुनाति धातु से होने में प्रमाणाभाव है। इस तरह तो मद्य-मांससेवियों के लिये ये पदार्थ भी पवित्र मानने पड़ेंगे।"

समाधान—ऐसी स्वयं को पण्डित माननेवाली दम्भपूर्ण मति तो किसी संग्रहालय में रखनेयोग्य थी, जो कि पवित्रता को सुख और आनन्द का हेतु मानकर मद्य मांस-सेवन में आनन्द व सुख का मण्डन करने लगी है। महोदय! पवित्र होकर जो आनन्द होता है, वह भी तो पवित्र व उत्तम कोटि का होगा। आप उस आनन्द की तुलना मद्यादि के तुच्छ सुख से कर रहे हैं, धन्य हैं आप। ऋषि के मत से यहाँ तर्पणीय वा श्रद्धेय देव हैं, जो कि ईश्वरनिष्ठ और उसके आज्ञापालक हैं। ऐसे देव निश्चय स्व दर्शन ज्ञानोपदेश से पवित्र करने में समर्थ हैं।

यहाँ पर मैं विद्वानों का ध्यान आकर्षित करूँगा कि इन्होंने व इस तोंद पर हाथ फेरनेवाले उदरम्भरियों की सेना ने मूलपाठ को देखा ही नहीं। मूल में तो 'भगवद्दत्त' अर्थात् 'प्रभुप्रदत्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मूलकारोऽनुवादकर्ताऽपि च एकधैवालेखिष्टां भङ्गाऽभङ्गतरङ्गाप्लावितधिषणौ। अहो! प्रमादस्य पराकाष्ठा। आश्चर्यं नेत्रान्धस्य'नाम नयनसुख इति।

भवानत्र शङ्कते यद् "विद्वांसः पावित्र्यं सम्पादयितुं कथं प्रभविष्यन्ति?" अपरं तव गुरुर्महीधरो विलिखति भाष्ये—'विश्वानि भूतानि मां पुनन्तु'! तत्र भूतेषु जडेषु प्राणिषु वा पावनक्षमतां न परं शङ्कते। अहो! एतावान् पक्षपातप्रलेपावलेपः।

'बुद्धयः पवित्रा भूतानि वा पवित्राणि भवन्तु' इत्युल्लेखे महर्षिर्ज्ञात्वैव धातोरकर्मकत्वे विवक्षां कुरुते। ईश्वरस्य देवानां च चेतनानां कर्तृत्वे 'मां पवित्रं कुरु कुर्वन्तु वा'इति समुट्टङ्कयति च। भवतो हिन्दीकारः 'पुनानि' इति धातुं लिखति, आश्चर्यम्।

पृ० १५१३, पं० १०—"अहं यजमान इदमस्मादनृतान्मनुष्यजन्मन उद्गत्य सत्यं देवता-शरीरमुपैमि।" इति स्ववचनेनैव ते देवानामपि मनुष्यजातेरभिन्नत्वमेव साध्यते। तदेतेनाऽग्रिमावप्यनुच्छेदौ समाहितौ।

पृ० १५१५, अनु० १—आ०—"ऋषिप्रमाणत्वेन यदुक्तम्—'तं यज्ञं बर्हिषि०', 'अथ यदेवानुब्रवीत्', 'अथार्षेयं वृणीते' इति, तदपि मन्दम्, उक्तमन्त्रेषु ऋषिशब्दसत्त्वेऽपि तत्र

विज्ञान से' यह लिखा है। कमाल है, आप और आपकी हिन्दी करनेवाला दोनों ही लिख रहे हैं कि 'भगवद्दत्त व्याख्या कर रहे हैं'। प्रमाद की पराकाष्ठा है। धन्य है, 'आँखों के अन्धे, नाम नयनसुख'।

आप यहाँ पर शङ्का करते हैं कि विद्वान् पवित्र कैसे कर सकते हैं? भाई! चेतन विद्वान् अपने उपदेशों से पवित्र नहीं करेंगे तो क्या पत्थर पवित्र करेंगे? समझ का फेर देखिये, यह इनका गुरु महीधर अपने भाष्य में लिखता है—'ये सब जड़ भूत मुझे पवित्र करें'। जड़भूतों की पावनक्षमता पर इसे कोई शङ्का नहीं हो रही है। अहो! बुद्धि पर इतना मोटा पक्षपात का प्रास्तर चढ़ा हुआ है।

'बुद्धियाँ पवित्र होवें या भूत पवित्र होवें' ये वाक्य जानबूझ कर अकर्मक-विवक्षा में ऋषि ने रखे हैं। परमेश्वर व ज्ञानी जहाँ पर कर्ता है, वहाँ कर्म की विवक्षा की है। आश्चर्य है कि आपका हिन्दीकार 'पुनानि' धातु है, ऐसा लिख रहा है।

पृ० १५१३, पं० १०—"मैं यजमान इस अनृत मनुष्यजन्म से उठकर सत्य देवता के शरीर को प्राप्त करता हूँ।" इस तुम्हारे अपने वचन से ही देवता का मनुष्यजाति से अभिन्नत्व साधित है। इससे ही अग्रिम अनुच्छेद भी समाहित हो गये।

पृ० १५१५, अनु० १—आक्षेप—"ऋषियों की चर्चा आरम्भ करते हुए दयानन्द ने 'तं यज्ञम्०' इत्यादि मन्त्रों को उद्धृत किया है, यह सब उचित नहीं है। उक्त मन्त्रों में ऋषि शब्द के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तल्लक्षणानुक्तेः ।"

समा०—अयं हि वसन्तप्रस्तावे हेमन्तमाकलयति। अत्र सन्दृब्धमेतद् यत् 'त्रयः सत्कर्तव्याः, देवा ऋषयः पितरश्चेति'। सत्कर्तव्य ऋषिरित्यत्र प्रमाणं प्रस्तूयते। अयमृषि-लक्षणमप्रकृतमन्विष्यन् मन्दमिति ब्रूते, तदा मन्दमतित्वमेवाविष्क्रियते। एतत्प्रस्तुतार्थस्तु मही-धरानुकृतिः। ऋषिप्रमाणैस्तु ऋषीणामृणमपाकर्तुमिदं तर्पणं श्राद्धं वाऽनुष्ठेयम्।

पृ० १५१६, पं० १—यदुक्तम्—"सर्वविद्यां पठित्वा यदनुवचनमध्यापनं कर्मानुष्ठानमस्ति, तदृषिकृत्यं विज्ञायते। तेनाध्ययनाऽध्यापनकर्मणैवर्षयः सेवनीया जायन्ते।' इत्यादि तदपि यत्किञ्चित्, अध्यापनस्यैव ऋषित्वप्रयोजकत्वे समेषामध्यापकानामृषित्व-व्यवहारापत्तेः।" इति, तदज्ञानम्, यथार्थानवबोधनात्, बुद्ध्वाऽपि वा छलपूर्वकप्रस्तवनात्। न हि अध्यापनमात्रेण ऋषित्वं प्रतिपाद्यते। तत्र ऋषीणां कृत्यम् अर्थाद् ऋषिभ्यः कृत्यम्। तदेव हि पञ्चमहायज्ञविधौ स्पष्टम्—'तेनाध्ययनाध्यापनकर्मणा ऋषिभ्यो देयमृणं जायते'। इहापि च—'अध्ययनाध्यापनकर्मणा एव ऋषयः सेवनीया जायन्ते'। एवं मन्वादिवचनानि अस्थाने

रहने पर भी ऋषि का लक्षण नहीं बताया गया है।"

समाधान—यह लेखक वसन्त के प्रकरण में हेमन्त की व्याख्या कर रहा है। यहाँ सन्दर्भ है कि तीन सत्कर्तव्य हैं। 'ऋषि सत्कर्तव्य हैं' इसमें प्रमाण दिया जा रहा है। यह अप्रकृत ऋषि-लक्षण खोजता हुआ कह रहा है। इसलिये स्वामीजी की व्याख्या मन्द है। इस प्रकार इनकी ही मन्दता आविष्कृत हो रही है। हम आपसे पूछते हैं कि यहाँ पर आपने लक्षण, प्रकरण आदि शब्दों का प्रयोग तो किया है, पर लक्षण भी क्यों नहीं किया ? आप कहें कि इनका लक्षण करना यहाँ हमारा उद्देश्य नहीं है, इसी प्रकार ऋषि के लक्षण करने के अभीष्ट पर लक्षण किया गया है। इनके द्वारा प्रस्तुत अर्थ महीधरकृत है, वह यहाँ हमारा आलोच्य नहीं है। ऋषि-ऋण को उतारने के लिये तर्पण वा श्राद्ध करना चाहिये।

पृ० १५१६, पं०१—"सब विद्याओं को पढ़कर जो अनुवचन, अध्यापन व कर्मानुष्ठान है, वह ऋषिकृत्य समझा जाता है। उस अध्ययन-अध्यापन कर्म से ही ऋषि लोग तर्पणीय हो जाते हैं।' इत्यादि भी तुच्छ है। अध्यापनमात्र के ऋषित्व प्रयोजक होने पर तो सभी अध्यापकों का ऋषित्व होने लगेगा।" पारिजातकार का यह कथन अज्ञानपूर्ण है; क्योंकि इन्होंने यथार्थ को नहीं समझा। भूमिका में अध्यापनमात्र से ही ऋषित्व नहीं कहा गया। वहाँ पर ऋषियों का अथवा ऋषियों के लिये करणीय कहा गया है। इसी को पञ्चमहायज्ञविधि में स्पष्ट किया है—'उस अध्ययन अध्यापन कर्म से ऋषियों के लिये देय ऋण होता है तथा इसी कर्म से वे सेवनीय होते हैं। 'ऋणं ह वै' इत्यादि का स्वयम् उद्धरण कर ऋषि की बात ही पुष्ट की है। 'उपनीय०' इस

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उद्धृतानि नैव किल पुष्णन्ति। तदेव स्वयमपि ऋषेराशयमुपेक्ष्यात्मीयं कृत्वा तदेव प्रस्तौति—'ऋणं ह वै जायते' इत्यादि। एवं देवर्षिपितॄणामृणान्यपाकार्याणीति ऋषिः साध्नोति।

अयं हि मक्षिकास्थाने महिषीनिपातकुशलं न स्वकीयप्रतिभोन्मेषणमादृणाति। वस्तुतः 'यः सर्वविद्याविद् भूत्वाऽध्यापयति तमनूचानमृषिमाहुः'। यः किञ्चिदधीत्याध्यापयेत् तत्र कथमृषित्वमापद्येत? अथवैवं वाच्यम्—सर्वविद्याज्ञाता एव ऋषिः, स एव च मन्त्रद्रष्टा। एतेन १५१७ पृष्ठं यावत् समाहितं भवति।

पृ० १५१८, अनु० १—"पितृप्रमाणत्वेन—'ऊर्जं वहन्ती०' 'आयन्तु नः०' इति मन्त्रद्वयमुद्धृतम्, तदप्यसङ्गतम्, मन्त्रार्थानवबोधात्।" इत्युक्तमनेनाप्रतिबुद्धस्वबुद्धिना महीधरार्थोद्धरणप्रवीणेन, तदज्ञानम्, ऋषिदयानन्दस्यार्थस्यैव सर्वथा तर्कयुक्तत्वात्। तदर्थं मूलमधीयताम्। यदयमाह यत् 'पुष्पेभ्यः परिस्रुतं त्रिविधं सारं वहन्त्यो यथा—ऊर्जं घृतं पय इति।' इह हि प्रत्यक्षं नहि पुष्पेभ्य ऊर्जं घृतं पयो निःसृतं भवति। तस्माद् ऋषिकृतोऽर्थः एवमवगन्तव्यः—पुष्पेभ्यः परिस्रुतं मधु हृद्यं जलम्, पक्वं फलादिकम्, अमृतात्मकं रसम्, आज्यम्, दुग्धं संस्कारैः सम्पादितमन्नमिति यावन्निवेद्य पितॄन् प्रसन्नान् कुर्यात्।

पृ० १५१८, पं० ३—यदाह—"ऊर्जमित्यपो निषिञ्चति' (का० श्रौ० सू० ४।१।१९)

मनुवचन का उद्धरण भी अप्रकृत है। ऋषि दयानन्द ने यहाँ पर देव, ऋषि और पितरों के ऋण के अपाकरण की सिद्धि बतायी है।

करपात्रीजी तो मक्खी के स्थान पर भैंस बिठाने के अपने कौशलमय प्रतिभोन्मेष का ही आदर नहीं कर रहे हैं। वस्तुतः जो सर्वविद्यावेत्ता होकर अध्यापन करता है, उस विद्याविज्ञानसम्पन्न को ऋषि कहते हैं। परन्तु जो किञ्चित् पढ़कर ही पढ़ाने लगे, वह ऋषि नहीं कहला सकता। अथवा इसे इस प्रकार भी कहा जा सकता है कि जो सर्वविद्यावेत्ता है, वही मन्त्रद्रष्टा ऋषि है। इतने से १५१७ पृष्ठ तक किये इनके कथन का समाधान हो गया।

पृ० १५१८, अनु० १—"इसके आगे दयानन्द ने पितृगण की सत्ता में प्रमाण दिये हैं, किन्तु ये असङ्गत हैं; क्योंकि ये मन्त्रार्थ को ठीक नहीं समझ सके हैं।" अप्रतिबुद्धस्वबुद्धि श्री करपात्र का उक्त कथन अज्ञानसङ्गत है। अपनी ओर से दिखाया गया अर्थ तो महीधर की नकल है, इनकी अपनी सूझ-बूझ कुछ नहीं। ऋषि दयानन्द का भाष्य तर्कसङ्गत और ठीक है, जिसे मूल में पढ़िये। महीधर ने कहा है कि 'फूलों से ऊर्ज, घी और दूध निकलता है'। यह प्रत्यक्ष के विरुद्ध कथन है। शायद इनका आशय वनस्पति (डालडा आदि) घी से होगा। इसलिये पुष्पों से परिस्रुत मधु, बलकारक हृद्य जल, रस, घी, अन्न फलादि को देकर जीवित पितरों को तृप्त करने की बात ही सुसङ्गत है।

पं० १५१८, पं० ३—यह कथन कि—"ऊर्जमित्यपो निषिञ्चति' (का० श्रौ० सू० ४।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति रीत्या ऊर्जं वहन्तीति मन्त्रस्यापां निषेचने विनियोग उक्तः ।" इति सन्दर्भ्य किञ्चिदिहाऽपि कथ्यते । यद्यपि प्रथमखण्डे विनियोगविषय आलोचितः । यद्विनियोगो रूपसमृद्ध्या युक्त एव प्रशस्तो भवति, मन्त्रार्थाऽसङ्गतो ह्यसौ विनियोगो न प्रशस्यः । याज्ञकैः सर्वे मन्त्रा यज्ञ एव विनियुक्ताः, एतेनैतदायाति यन्न यज्ञातिरिक्तो विषयो वेदेऽस्ति । तदेयमप्युक्तिर्मृषा यत्— 'सर्वज्ञानमयो हि सः' । तथा सतीश्वरज्ञानमपि न सम्भवति ।

मध्यकालसम्भूतवेदभाष्यकारा वेदानां केवलं यज्ञपरताऽवधारणायैव भाष्यं व्यधुः । तत्र विनियोग एव प्रमुखो न तु वेदमन्त्रार्थः । परं तत्रेदमपि समालोच्यं यन् मन्त्राणां रचना विनियोगानुसारं जाता, उत मन्त्राः पूर्वं निर्मितास्तदनु विनियोगाः कृताः सन्ति । तत्र मन्त्राणामीश्वरोक्तत्वाद् विनियोगानां चानीश्वरोक्तत्वाद् मन्त्राणामेव प्राथम्यं निर्विवादम् । एतेषां यज्ञसम्बन्धिविनियोगधारणामैतरेयशतपथादिब्राह्मणग्रन्था अप्यपोषयन् । परं नैतत् तथ्यं यतो ब्राह्मणग्रन्था अपि सत्यपक्षं पुष्णन्ति । यथा—

तदाहुरुदुत्यं जातवेदसमिति सौर्याणि प्रतिपद्येतेति ।
तत्तन्नादृत्य यथैव गत्वा काष्ठामपराध्नुयात् तादृक् तत् ॥
(ऐतरेयब्रा० ४ । २ । ९)

---

१ । १९) इस रीति से 'ऊर्जं वहन्ति' इस मन्त्र का विनियोग जल से सिञ्चन करने में बताया है ।" यह सन्दर्भ देकर कुछ यहाँ भी कहा जा रहा है, यद्यपि प्रथमखण्ड में विनियोगविषय का विस्तृत आलोचन किया गया है कि विनियोगरूप समृद्धि से युक्त ही प्रशस्त होता है । यदि वहाँ मन्त्रार्थ की सङ्गति घटित न हो तो वह विनियोग प्रशस्त नहीं है । याज्ञिकों ने तो प्रायः सारे ही मन्त्रों का विनियोग यज्ञ में ही किया है । इससे ज्ञात होता है कि वेदों में द्रव्ययज्ञातिरिक्त अन्य वैज्ञानिक ज्योतिष् आदि कोई विषय है ही नहीं । तब यह उक्ति भी मृषा ठहरती है कि 'वेद सर्वज्ञान का भण्डार है' । वैसा होने पर ईश्वरीय ज्ञान अर्थात् सर्वज्ञ का ज्ञान ही कैसे सिद्ध होगा ?

मध्यकालीन भाष्यकारों ने केवल यज्ञपरक अर्थ ही समझकर वेदभाष्य किये । इससे सिद्ध हुआ कि विनियोग ही प्रमुख है, वेदमन्त्र की प्रधानता नहीं है । परन्तु यहाँ पर यह भी विवेचनीय है कि क्या वेदमन्त्रों की रचना विनियोगानुसार हुई, अथवा विनियोग वेदमन्त्रों के बाद या अनुसार निश्चित किये गये । मन्त्र तो ईश्वरप्रणीत हैं, परन्तु ये विनियोग मनुष्यों द्वारा ब्राह्मण निरुक्तादि के बाद निश्चित किये गये । क्या इन मन्त्रों की यज्ञपरक धारणा की ऐतरेय शतपथ आदि ने भी पुष्टि की है ? पर ऐसा नहीं है ।

'तदाहुरुदुत्यम् ।' (ऐतरेयब्राह्मण ४ । २ । ९) कुछ का कथन है कि इस स्थल पर 'उदुत्यम्' पर कहा है कि इस सूर्यमन्त्र को पढ़कर आरम्भ करे, परन्तु यह मानना ठीक नहीं; ऐसा मानना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतेन विभिन्नावसरेषु विभिन्नमन्त्रपाठ एवामन्यत,नैकतो हि पक्षो विनियोगस्य सिद्धः, एकं तिरस्कृत्याऽपरानुमोदनात्। एतेनाऽपि असंशीति मन्त्ररचना प्राक्तनी विनियोगापेक्षया सिद्ध्यति। नैव मन्त्राणां निश्चितविनियोगे सति भिन्न-भिन्नावसरे तद्विनियोगोपलम्भो युक्तः स्यात्। यदि ब्राह्मणगृह्यकल्पादिप्रणीतयज्ञार्थमेव मन्त्राणां निर्मितिरभविष्यत् तदा मन्त्रा अपि पूर्णरीत्या तदनुरूपा एव निरमास्यन्त, किन्तु न तथाऽस्ति। यस्य यस्य वा मन्त्रस्यार्थः तत्क्रियानुरूपस्तत्र तु रूपसमृद्धता ज्ञेयैव। एतन्नैपुण्यमेव गेयं यदवसरोचितं मन्त्रचयनम्। यथा इन्दुमतीचिरवियोगे कालिदासोक्तिः—'मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः' इति कुत्राऽपि कस्याऽपि मृत्युप्रसङ्गे प्रयुज्यते।

वस्तुतस्तु निश्चितमतविनियोगेन मन्त्रार्था एव सङ्कुचितीकृताः। तदेकं निदर्शनमिह प्रस्तूयते। 'मनोतायै हविषोऽवदीयमानस्यानुब्रूहीत्याहाध्वर्युः।' इति। 'त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह' इति।

इह सायणाचार्यो लिखति—"तदर्थं हृदयाद्येकादशाङ्गरूपं हविरवदीयते। तस्य हविषोऽनुकूला ऋचोऽनुब्रूहीत्यध्वर्युः प्रैषमन्त्रं पठेत्" इति। तदा 'त्वं ह्यग्ने' (ऋ० मं० ६, सू० १) आदिमन्त्रान् पठति। नैतेषु च परं क्वाप्यङ्गच्छेदसङ्केतोऽपि। सूक्तान्ते ऋषिदयानन्देन

मानो दौड़ते हुए उद्दिष्ट सीमा को ही भूल जाना है। इससे तो केवल विभिन्न अवसरों पर मन्त्रपाठ ही माना गया है, इससे विनियोग के निश्चित होने का पक्ष सिद्ध नहीं होता; क्योंकि एक विनियोग को तिरस्कृत कर दूसरा स्वीकार किया जाता देखा जाता है। दूसरे असंशय रूप से मन्त्ररचना प्राक्तनी है और विनियोग तो बाद को ही गढ़े हुए हैं। इससे सिद्ध है कि यदि विनियोग निश्चित होता तो भिन्न-भिन्न अवसरों पर वही विनियोग माना जाता। यदि ब्राह्मण, गृह्यसूत्र, कल्पादि द्वारा प्रणीत यज्ञार्थ ही मन्त्रों की रचना की गयी होती, तो मन्त्र भी पूर्ण रूप से तदनुरूप ही बनाये जाते, किन्तु वैसे नहीं हैं। जिस-जिस मन्त्र का अर्थ उस-उस क्रिया के अनुरूप है, वहाँ रूपसमृद्धता समझनी चाहिये। इसे निपुणता ही माननी चाहिये कि अवसरोचित मन्त्र का चुनाव किया गया है। जैसे कि इन्दुमती के मृत्युप्रसङ्ग पर कालिदास की सूक्ति है कि—'शरीरधारियों का मरण तो प्रकृति (स्वभाव) है, पर जीने को विद्वान् विकृति कहते हैं'। यह उक्ति किसी के मृत्युप्रसङ्ग पर सुघटित हो सकती है।

वास्तव में विनियोग के निश्चित मानने पर मन्त्रार्थ को सङ्कुचित मानना पड़ेगा। जैसे 'त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह' (ऋ० मं० ६, सूक्त १) यहाँ पर सायणाचार्य लिखते हैं कि—"हृदय आदि एकादशाङ्गरूप हवि दी जाती है। उस हवि के अनुकूल ऋचाओं को अध्वर्यु

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

लिखितं स्वभाष्ये—

"अत्राग्निविद्वदीश्वरगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या।"

यथा चाऽपि न 'इषे त्वोर्जे०' (यजु:० १।१) इति मन्त्रस्य विनियोगः काण्वब्राह्मणे छेदनेऽनुमार्जने च पलाशशाखायाः कृतः, न च मन्त्रे पलाशशाखानामाऽपि। कश्चाधारः पुनरेतस्य? तस्मात् पश्चात् कल्पिते विनियोगे न रूपसमृद्धिरपि।

पलाशशाखायाश्च सम्बोधने तात्पर्यं सायणः समाधत्ते—"यद्यपि अचेतना शाखा तथापि तदभिमानिनीं देवतामनुद्दिश्य एवमभिधातुं शक्यते। यथा शास्त्रज्ञा अचेतनेऽपि शालग्रामे शास्त्रदृष्ट्या विष्णुसन्निधिमभिप्रेत्य तं विष्णुं सम्बोधनावाहनादीन् षोडशोपचाराननुतिष्ठन्ते।" इति। परमेतदुपचारे न वेदशास्त्रप्रमाणम्। एवं कात्यायनः पठेत् कण्वो वा नैव वेदोपरि प्रमाणम्। महर्षिरत एव स्वतः प्रमाणीभूतसंहिताचतुष्टयीं प्रमाणं कुरुते न त्वन्याधिश्रितशाखाः।

विनियोगेन निगडितपादा वेदमन्त्रा उपक्षीणशक्तयो जायन्ते, यदा च वेदमन्त्रशब्दा

पढ़े, वह इन मन्त्रों को पढ़ता है।" अब प्रश्न यह है कि इन मन्त्रों में तो अङ्गच्छेद का कहीं सङ्केत ही नहीं है। परन्तु ऋषि दयानन्द सूक्तान्त में लिखते हैं—

"यहाँ पर अग्नि, विद्वान् और ईश्वर के गुणों के वर्णन से इस अर्थ की पूर्व सूक्तार्थ के साथ सङ्गति समझनी चाहिये।"

और भी जैसे 'इषे त्वोर्जे०' (यजु:० १।१) इस मन्त्र का विनियोग काण्व ब्राह्मण में पलाश शाखा के छेदन तथा अनुमार्जन में किया गया है, इस में क्या आधार है? अर्थात् कोई आधार नहीं। मन्त्र के बाद कल्पित इस विनियोग में रूपसमृद्धि भी नहीं है।

पलाशशाखा के सम्बोधन में तात्पर्य क्या है, इस पर सायणाचार्य कहते हैं कि—"यद्यपि शाखा अचेतन है, तब भी तदभिमानिनी देवता को उद्दिष्ट करके ऐसा कहा जा सकता है। जैसा कि शास्त्रज्ञ अचेतन शालग्राम में शास्त्रदृष्टि से विष्णु की सन्निधि मानकर उस विष्णु के सम्बोधन, आवाहन आदि षोडश उपचार करते हैं।" परन्तु इस उपचार में वेद-शास्त्र का कोई प्रमाण नहीं है। इस प्रकार चाहे कात्यायन हों या कण्व, वेद के ऊपर प्रमाण नहीं है। इसीलिये महर्षि चार संहिताओं को ही स्वतः प्रमाण मानते हैं, अन्य शाखाओं को नहीं।

विनियोग से निगडितचरण वेदमन्त्र उपक्षीण शक्तिवाले हो जाते हैं और जबकि वेदशब्द

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अनुपक्षीणशक्तयो भवन्ति। यथाऽऽह दुर्गाचार्यः—

"अनुपक्षीणशक्तयो हि विभवो वेदशब्दाः। यथा—प्रज्ञपुरुषाणामर्थाभिधानेषु विपरिणममानाः सर्वतोमुखा अनेकार्थान् प्रब्रुवन्तीत्येव प्रदर्शितं भवति।"

अत एवार्थानां निरवधिकतया दुर्गोऽन्यत्राप्याह—"अथ पुनरनन्वितेऽर्थे न्याय्यस्वरसंस्कारयुक्तेन शब्देन यत्र निपुणमन्विष्यमाणः शब्दोऽर्थान् कल्पयितुं न शक्यते, अन्यथैवार्थो व्यवतिष्ठते (अन्यथैव शब्दः), तत्र किं कर्तव्यम्? उच्यते—तत्रैवं सति अर्थनित्यो भूत्वा..... अर्थनित्य इत्युक्ते अर्थप्रधान इति गम्यते। अर्थप्राधान्येनादृत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधानं बुद्ध्या केनचिद् वृत्तिसामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थसामान्यमिहास्ति इति तत्र तर्कयित्वा सामान्यं ते निर्ब्रूयात्। अर्थो हि प्रधानं तद्गुणभूतः शब्दः। तस्मादर्थसामान्यं बलीयः शब्दसामान्यात्।"

एतेनाऽपि मन्त्रार्थकरणे विनियोगनिगडितत्वं नोचितमिति ध्वन्यते इति दिक्।

पृ० १५१८, अनु० २—"सर्वे मनुष्या एवं जानीयुश्चाज्ञापयेयुः' इति कुतोऽर्थः? 'मे पितॄन् यूयं तर्पयत' इति वा कुतोऽर्थः? सर्वैरेव स्वस्य पितरः कथन्न तर्पणीयाः?" इत्यपि

अनुपक्षीण शक्तिवाले माने गये हैं। जैसा कि आचार्य दुर्ग कहते हैं—"वेद के व्यापक शब्द अनन्त शक्तिवाले हैं। जैसे कोई प्रकृष्टबुद्धिवाला पुरुष अर्थकथन में विपरिणाम (वैसे-वैसे बदलते) सब ओर मुख करके अनेक अर्थों को कहता है, यह देखा जाता है। इसलिये अर्थ निरवधिक हैं।"

अन्यत्र भी आचार्य दुर्ग ने कहा है—"जब न्यायसङ्गत स्वर और व्याकरणसंस्कारसङ्गत शब्द से अच्छे प्रकार खोजने पर भी अर्थ नहीं निकल रहा है तो, और उन शब्दों के स्वर-संस्कारों से अन्यथा ही अर्थ व्यवस्थित हो रहा है, तो क्या करना चाहिये?" इस विषय में वे कहते हैं कि—"ऐसी स्थिति में अर्थ नित्य होकर अर्थात् अर्थ को प्रधान मानकर स्वरसंस्कारों की उपेक्षा कर अर्थसङ्गति की परीक्षा करे। तब उस कथन को समझकर क्रियागुणसामान्य वृत्ति से किसी भी धातुसामान्य से निर्वचन अवश्य करे; क्योंकि शब्दसामान्य से अर्थसामान्य बलवान् होता है।"

इससे भी अभिव्यक्त है कि मन्त्रार्थ करने में विनियोग की बेड़ियाँ पहना कर वेदमन्त्रों को पङ्गु बनाने में औचित्य नहीं है।

पृ० १५१८, अनु० २—"सब मनुष्य इस प्रकार जानें और आज्ञा दें' यह अर्थ कहाँ से आ गया? तथा 'मेरे पितरों को आप तृप्त कीजिये' यह अर्थ कैसे हुआ? लोक में तो सब अपने-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

रूढिकीलकबद्धमतित्वादेव । जीवितपितॄणां तर्पणे 'सर्वे मनुष्या एतं वेदविधिं जानीयुः, ज्ञात्वा च शिक्षेरन्नाज्ञापयेयुश्चान्यान् कदाचिद् वयमनुपस्थिता अपि कार्यवशात् स्याम, तदा युष्माभिरेव पुत्रैः पौत्रैश्च स्त्रीभिर्भृत्यैश्च पितरः पितामहादयश्च तर्पणीयाः' इत्याशयेन 'मे पितॄन् यूयं तर्पयत' इत्यूहितो बुद्धिसङ्गतोऽर्थः ।

पृ० १५१९, अनु० २—यदुच्यते—"नहि जीवतां पितॄणां सन्तोषाय पयोहोमविधानं युक्तं स्यात्" इत्यप्यज्ञानमेव, जीवन्तो धर्मशीलाः पितरः पयोभिर्जुहृतः पुत्रादीन् वीक्ष्य सन्तुष्टा भवन्ति । एवंविधा धर्मविदः पुत्रादयः पयोऽन्नादिप्राशनं कारयित्वाऽपि सन्तोषयन्ति ।

पृ० १५२०, अनु० १—"आयन्तु०' इत्यस्य व्याख्यानं सर्वथा कपोलकल्पितं प्रमाणविरुद्धमेव, अनुपपत्तेः । तथाहि—तद्दृष्ट्याऽस्मिन् मन्त्रे वैज्ञानिकाः पितर उक्ताः ।..... अग्निपदेनैव प्रकृते परमेश्वरः किमर्थमुक्तः ? तस्याऽपरिच्छिन्नत्वात् कथमादानं सम्भवति ।" इत्यादि सर्वमपि अनर्गलम्, भूमिकार्थस्य मन्त्रानुगतत्वात् ।

एतस्यैवार्थः कल्पितो यथा—'सोम्यासः सोमपानार्हाः', यदि न ते जीवितास्तदा कथं

अपने पितरों को तृप्त करते हैं ।" यह सभी कथन मृतक पितरों का तर्पण-श्राद्ध करने की धारणारूप खूँटे से बँधी हुई बुद्धि के कारण किया गया है । जीवित पितरों का तर्पण करने में तो उक्त ऊहन सर्वथा सुसङ्गत है कि वे इस वेदमत विधि को जानें और जानकर सिखाएँ व आज्ञा दें कि कदाचित् हमारी कार्यवश बहिर्गमन से अनुपस्थिति हो जावे, तो तुम पुत्र, पौत्र, स्त्रियाँ और भृत्य उनकी सेवा का यथावत् ध्यान रखें । इस आशय से ऋषिप्रोक्त उचित व ठीक है ।

पृ० १५१९, अनु० २—"जीते हुए पितरों के लिये दुग्ध के होम की कोई आवश्यकता नहीं होती ।" यह कथन भी अज्ञानमात्र है । जीवित पितर भी अपने पुत्रादि को पय आदि से होम करते देखकर प्रसन्न होंगे ही । ऐसे धर्मशील पुत्रादि पय आदि का प्राशन कराके पितरों को सन्तुष्ट करते हैं ।

पृ० १५२०, अनु० १—"आयन्तु०' मन्त्र का अर्थ सर्वथा कपोलकल्पित प्रमाणविरुद्ध है; क्योंकि यह हमारे तर्कों के सामने टिक नहीं पाता । दयानन्द के अनुसार वैज्ञानिकों को ही पितृगण माना है । पहले पिता-पितामहादि को पितर कहा गया ।....प्रस्तुत मन्त्र में परमेश्वर को अग्नि पद से ग्रहण क्यों किया गया ? अपरिच्छिन्न परमेश्वर का ग्रहण कैसे सम्भव है ?"

इत्यादि सभी प्रश्न अनर्गल हैं । भूमिकार्थ मन्त्राक्षरों से अनुगत है । करपात्रीजी द्वारा दिखाया गया अर्थ ही कल्पित है । आप बताइये कि आपके इस अर्थ में कौनसी बुद्धिसङ्गतता है कि अग्नि दग्ध शरीर और आपके पितर स्वधा अर्थात् अन्न के खाने से कैसे तृप्त होंगे ? उनके

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सोमपानमर्हन्ति? अग्निना स्वादिताः, अग्निर्यान् दहन् स्वादयति। बोधयतु भवान् भवत्प्रेरको महीधरो वा यदग्निः दहन् कं स्वादयति, अथ चेत् पुत्रादीन्, तदाऽत्र कथं सङ्गतिः?

महोदय! न महर्षेः कपोलकल्पना, प्रत्युत अद्भुतोहाशक्तिप्रकाशितचमत्कार एषः, यदयमर्थः—"अग्निः परमेश्वरोऽभ्युदयाय सुष्ठुतयाऽऽत्तो गृहीतो यैस्ते, तथा होमकरणार्थः शिल्पविद्यासिद्धये च भौतिकोऽग्निरात्तो गृहीतो यैस्ते (पितरः) विज्ञानवन्तः पालकाः सन्ति।"

अयमसंशीतिर्वेदमहिमोद्घोषकोऽर्थो महर्षेः। अपरतः 'स्वधयाऽन्नेन मदन्तस्तृप्यन्तः' इत्यप्यर्थो जीवितपितरमेव साधयति, मृतकस्यान्नाशनानर्हत्वात्। तथा च जीवितपितॄणां पुष्टिस्तव ब्रह्मवैवर्तेनाऽपि कृता, किं सावमन्तव्या ते?

अन्नदाता भयत्राता, पत्नी तातस्तथैव च।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम्॥ ब्र० आ० १०। १५३॥

तव मृताः पितरः 'आयन्तु०' इति मन्त्रेणाहूता क्व स्थास्यन्ति, यदि नास्तीर्णमासनादिकम्?

मुखादि तो हैं ही नहीं। यदि वे जीवित पितर माने जायेंगे तो हमारे देवताओं के साथ यज्ञ में पधारेंगे तथा सोमपान व अन्नादि ग्रहण भी कर सकेंगे। महीधर के अर्थ में अग्नि तो पितरों को जलाता रहेगा और श्रौत-स्मार्त कर्मों का अनुष्ठान करनेवाले पुत्रादि को स्वाद आता रहेगा। इसमें सङ्गति कहाँ है?

महोदय! महर्षि की कल्पना नहीं, प्रत्युत अद्भुत ऊहाशक्ति का यह चमत्कार है। यह अर्थ सर्वथा उत्तम है कि "अग्नि अर्थात् विद्या की सिद्धि करें, शिल्पविद्या जाननेवाले तो वैज्ञानिक पितर होंगे।"

महर्षि का अर्थ निःसंशय ही वेदमहिमा का उद्घोषक है। दूसरे अन्नसेवन से प्रसन्नता व सन्तुष्टि जीवित पितरों को ही हो सकती है, मृतक तो अन्न का सेवन करने में अशक्त हैं। जीवित पितरों की पुष्टि तुम्हारे ब्रह्मवैवर्तपुराण से भी हो रही है—

अन्नदाता, भय से त्राता, पत्नी, पिता, विद्यादाता और जन्मदाता—ये पाँच पितर होते हैं (ब्र० आ० १०। १५३)।

तुम्हारे मरे हुए पितर इस मन्त्र से बुलाये गये तो वे मरे हुए तुम्हारी पुकार को कैसे सुनेंगे? क्योंकि शब्द तो श्रवणेन्द्रिय द्वारा ग्राह्य होता है, जो मृतक में होती नहीं। फिर उनके आसनादि पर बैठने का प्रश्न ही नहीं उठता। आप व्यर्थ ही काल्पनिक मोदकों से क्षुधा शान्त करने का दुष्प्रयास कर रहे हैं।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्चाह—"नहि विदुषामविदुषां मार्गभेदः सामाजिकैः स्वसंस्थास्वपि कल्पितः।" इति, सत्यमिदं प्रशस्यमेव यद् विद्वद्भिः सामाजिकैर्नान्यः पृथक् पन्थाः कल्पितो यथा सत्याग्रहकाले 'दीवानहाल' आर्यसमाजे भवतां प्रवेशाय पृथक् पन्था न कारितः। एवं जीवितानामेव तर्पणं सिध्यति, न मृतानाम्।

किञ्च, आश्विनकृष्णपक्षस्य पितृपक्षसंज्ञाऽपि ग्रामादिपरिसरोपान्तकृतचतुर्मासनिवासानां वर्षान्ते धर्मप्रचाराय कृतोपक्रमाणां कृतविविधप्रदेशप्रतितिष्ठासानां जीवितानां वानप्रस्थसंन्यासिनां पितॄणां प्रस्थानकालकृतभोजनादिसत्काराणां सेवामभिलक्ष्य न व्यभिचरेत्।

मनुस्मृतावपि—

देवताऽतिथिभृत्यानां पितॄणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति॥३।७२॥

इह देवताशब्देन देवयज्ञस्य अतिथिशब्देन अतिथियज्ञस्य भृत्यानां भरणीयानामित्यनेन बलिवैश्वदेवस्य पितॄणामित्यनेन पितृयज्ञस्य (कुल्लूकभट्टोऽप्याह—'वृद्धमातापित्रादयोऽवश्यं

यह कहना कि "आर्यसमाज के लोग विद्वान् तथा मूर्खों में भेद अपनी संस्थाओं में नहीं करते।" यह आपका कथन सत्य है; क्योंकि आर्यसमाजी राग-द्वेष के कारण कोई भेद-भाव नहीं वरतते, क्योंकि आप जानते हैं कि 'दीवानहाल' दिल्ली में जब आप सत्याग्रह में पधारे थे, आयु और अनुभव से वृद्ध होने से जैसा जीवित पितरों का सत्कार करना चाहिये था, आपका भी किया। पृथक् कोई अन्यमार्ग नहीं किया। इस प्रकार भी जीवितों का ही तर्पण सिद्ध है, मरे हुओं का नहीं।

दूसरे आश्विन कृष्णपक्ष की पितृपक्ष संज्ञा भी ग्रामादि परिसर के समीप चार मास तक निवास करनेवाले तथा वर्षा ऋतु के अन्त में धर्मप्रचार की तैयारी करनेवाले, विविध प्रदेशों में स्थान की इच्छा करनेवाले जीवित वानप्रस्थ और संन्यासी पितरों की प्रस्थान के समय विशिष्ट भोजनादि से किये गये सत्कार-सम्बन्धी सेवा को अभिलक्षित करके सुघटित हो जाती है।

मनुस्मृति में भी कहा है—

'जो गृहस्थी देवता, अतिथि, भृत्य और पितर तथा अपना, इन पाँचों के लिये उनके भागों को नहीं देता अर्थात् पाँच महायज्ञों को नहीं करता, वह साँस लेते हुए भी वास्तव में जीता नहीं है।'

यहाँ पर देवता शब्द से देवयज्ञ का, अतिथि शब्द से अतिथियज्ञ का, (भरणीय) भृत्यों से बलिवैश्वदेव का, पितृ शब्द से कुल्लूकभट्ट द्वारा भी वृद्ध माता-पिता आदि का संवर्धन पितृयज्ञ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

संवर्धनीयाः' इति) आत्मन इत्यनेन ब्रह्मयज्ञस्यावश्यकर्तव्यता प्रतिपादिता।

अत्र मृतानां देवतानां मृतानामतिथीनां मृतानां भृत्यानां मृतानां पितॄणामिति देवातिथि-भृत्यपितॄणां मृतानामिति विशेषणं कुत आयातम्?

अग्रिमश्लोकेन पुष्टिरेवैतस्य—

ऋषयः पितरो देवा भूतान्यतिथयस्तथा।
आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता॥ मनु० ३।८०॥

इह कुल्लूकभट्टेन लिखितम्—'एते गृहस्थेभ्यः सकाशात् प्रार्थयन्ते' इति, न मृतैः प्रार्थनं सम्भवति।

पृ० १५२०, अनु० २—"अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अमीमदन्त पितरो यथाभागमावृषायिषत' हे पितरः! अत्र सभायां पाठशालायां वा विद्याविज्ञानदानेनानन्द-युक्तान् कुरुत। यथाभागं विद्वद्वत् स्वीकृत्य 'आवृषायध्वम्' आनन्देसक्तारो वृषा इवाचरत।" इति भूमिकापाठमाक्षिपन्नाह यत्—"यदा कात्यायनानुसारं श्वासनिरोधेन ग्लानिपर्यन्तमुदङ्-मुख आस्ते, इत्यादिष्टम्, तदा कथं भूमिकाकृद् अत्रेति 'सभायां पाठशालायाम्' विनियुङ्क्ते?" इति तु न वाच्यम्, वेदमन्त्रेभ्यः पूर्वं विनियोगस्याऽभावे उत्तमार्थे योजनार्हत्वाद् ऋषिकृत-विनियोगः श्रेयान्। यद् मृतपितृपिण्डयज्ञे विनियोगः प्रतिपाद्यते, स तु पौराणिककालकल्पितः,

---

और आत्मशब्द से ब्रह्मयज्ञ की आवश्यकता प्रतिपादित की गयी है।

यहाँ पर मरे हुए देवता, मरे हुए अतिथि, मृत भृत्य और मृत पितर—इन सब में मृत विशेषण कहाँ से आ जायेगा?

इसी आशय की पुष्टि आगे के श्लोक से भी हुई है—

'ऋषि मुनि लोग, माता-पिता, अग्नि आदि देवता, भृत्य तथा अतिथि लोग कुटुम्बी अर्थात् गृहस्थियों से आशा करते हैं गृहस्थसम्बन्धी कर्तव्यों को समझनेवाले व्यक्ति को चाहिये कि वह इनके लिये सहायता कार्य करे।'(मनु० ३।८०)

इस पर कुल्लूकभट्ट भी लिखते हैं—'ये गृहस्थियों के पास से सहायता की प्रार्थना करते हैं'। यह सब प्रार्थन मृतकों द्वारा सम्भव नहीं है।

पृ० १५२०, अनु० २—'अत्र पितरो मादयध्वम्' इस मन्त्र के भाष्य पर आक्षेप करते हुए पारिजातकार का कथन है—"श्वास रोककर उत्तर को मुख कर ग्लानिपर्यन्त इस मन्त्र का जप करे। ऐसा कात्यायन के अनुसार कहा गया, तो भूमिकाकार ने सभा या पाठशाला में इस मन्त्र का विनियोग किया है।" इस पर हमें यह कहना है कि मन्त्र से पूर्व तो विनियोग था नहीं, सर्वविद्याविज्ञानसम्पन्न ऋषि दयानन्द ने उत्तमार्थ में विनियुक्त कर लिया तो श्रेयस्कर है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'पितरः' इत्यस्य जीवितार्थपरत्वात्। नहि स्वामिना प्रतिपदार्थोऽत्र निदर्शितः, सन्दर्भित-विषयेऽल्पार्थनिर्देशनपुरःसरं प्रमाणोपस्थापनस्यैव प्रयोजनवत्त्वात्। हिन्दी भाषा च मूलार्थस्य परिष्कृतोऽर्थः, न त्वक्षरानुवादः।

आगामिविषयमामूलचूलं विशदीकर्तुं विस्तृतरूपेण के पितरस्तर्पणीयाः, मृता जीविता वेति प्रतिपाद्यते।

पाणिप्रक्षालकाः के नाम पितरः ?

'पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्॥' (यजुः० १९। ३६)

अत्रोव्वटभाष्यम्—"सुधां प्रति गमनशीलाः स्वधायिनः, स्वधा नमः अन्नमस्तु। अक्षन् अत्तवन्तो भक्षितवन्तः पितरः। अमीमदन्त मादिताः पितरः। अतीतृपन्त तर्पिताः पितरः। पितरः शुन्धध्वं पाणिप्रक्षालनं कुरुध्वम्।"

महीधरोऽपि—"हे पितरः शुन्धध्वं पाणिप्रक्षालनेन शुद्धा यूयं भवत।"

पौराणिक काल में किया विनियोग कल्पित है; क्योंकि 'पितर' से जीवितों का ही ग्रहण होगा। स्वामी जी ने प्रतिपद का अर्थ यही नहीं किया है, सन्दर्भित विषय में अल्पार्थनिर्देशनपुरस्सर प्रमाण प्रस्तुत करना मात्र उद्दिष्ट है। हिन्दी मूलार्थ का थोड़ा परिष्करण है, अक्षरानुवाद नहीं है। यहाँ 'भागमनतिक्रम्य' अर्थात् सच्चाई से अपना भाग लेकर, इतने से 'विद्वानों के समान भाग स्वीकृत कर' यह अर्थ ध्वनित होता है।

आगामी विषय को आमूलचूल स्पष्ट करने के लिये कि कौन से पितर तर्पणीय हैं, मृत या जीवित ? यह प्रतिपादन किया जाता है।

पाणिप्रक्षालक पितर कौन हैं ?

यजुः० १९। ३६ पर उव्वट का भाष्य इस प्रकार है—"स्वधा (अन्न) के प्रति गमनशीलों के लिये अन्न होवे। पितरों ने भक्षण किया, हर्षित हुए, पितर तृप्त किये गये। हे पितरो ! आप लोग पाणिप्रक्षालन करिये।"

महीधर ने भी यही अर्थ किया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किमन्नग्रहीतारस्तत्प्राशितारस्तेन हर्षमुपयातास्तृप्ता भोजनान्तरं च हस्तप्रक्षालयितारः पितरो मृता भवितुमर्हन्ति? कदापि नैव, प्रत्युत ते जीवितपितर एव।

सोमसम्पादिनः पितरः

'पुनन्तु मा पितरः सोम्यासः' (यजु:० १९। ३७) । अत्रोव्वटमहीधरौ 'सोम्यासः = सोमसम्पादिनः, सोमं सम्पादयन्ति' इति व्याख्यानं चक्रतुः। तेऽपि जीविता एव।

पवित्रेण शतायुषा जीविता एव पुनन्ति, मृतानां शतायुष्ट्ववचनायुक्तत्वात्, मुक्तानामायुःसीमाऽबन्धनाच्च।

समानजातिरूपादयः समनसः पितरः

'ये समानाः समनसः०' (यजु:० १९। ४५) । अत्रोव्वटः—"समानाः जात्यादिभिः (महीधरः) जातिरूपादिभिस्तुल्याः तुल्यमनस्कास्तेभ्यः स्वधाऽन्नमस्तु।" इति। नहि जीवितेभ्यो व्यतिरिक्तेषु उक्तसम्भवः।

अस्मिन् लोकेऽवस्थिताः पितरः

'उदीरतामवर उत्परासः०' (यजु:० १९। ४९) । उव्वटमहीधरावत्राहतुः—

क्या अन्न को खानेवाले और खाकर हाथ धोनेवाले पितर मृत हो सकते हैं? कदापि नहीं। वे पितर तो जीवित ही हैं।

सोमसम्पादन करनेवाले पितर

यजु:० १९। ३७ मन्त्र के भाष्य में उव्वट और महीधर कहते हैं कि पितर सोमसम्पादन करते हैं। वे भी जीवित हैं, मृत नहीं।

पवित्र शतायुः से जीवित ही पवित्र करते हैं। मृतों को शतायु विशेषण नहीं दिया जा सकता। मुक्तों की भी यह आयु की सीमा नहीं हो सकती।

समान जाति रूप तथा समान मनवाले पितर

यजु:० १९। ४५ पर उव्वट और महीधर 'समाज जाति रूप आदि से तुल्य मनवालों के लिये अन्न हो' ऐसा कहते हैं। जीवितों से अन्य में जाति, रूपादि सम्भव नहीं हैं।

इस लोक में अवस्थित पितर

यजु:० १९। ४९ पर उक्त भाष्यकार कुछ अन्यथा अवर, मध्य और ऊर्ध्वलोक के पितर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"अवरे येऽस्मिन् लोकेऽवस्थिताः, (ये) परस्मिन् लोकेऽवस्थिताः, मध्यमा वा पितरः, (ते) ऊर्ध्वलोकं गच्छन्तु अवन्तु च।"

इह ऋषिभाष्यभावाऽर्थः, यथा—"ये जीवन्तो निकृष्टमध्यमोत्तमाः स्तेयादिदोषरहिता विदितवेदितव्या अधिगतयाथातथ्या विद्वांसः सन्ति ते विद्याभ्यासोपदेशाभ्यां सत्यधर्म-ग्राहकत्वेन बाल्यावस्थायां विवाहनिषेधेन सर्वाः प्रजाः पालयन्तु।"

एवं जीवितानामेव पितॄणामुत्तरोत्तरं विशिष्टतरं स्थानप्राप्तिः शक्यते न तु मृतानाम्, नवीनशरीरधारणमन्तरा नवकर्मसंस्कारसञ्चयं विना विशिष्टतरस्थानप्राप्तेरसम्भवात्। नहि वातरूपं प्राप्ताः पितरोऽस्माकं प्रार्थनं श्रोतुमर्हन्ति न वाऽवितुम्।

यज्ञियानां सुमतौ स्याम

'अङ्गिरसा नः पितरो नवग्वा०' (यजुः० १९। ५०)। अत्रोव्वटमहीधरयोर्भावः—'यज्ञसम्पादिनां नवगतीनां पितॄणां सुमतौ वयं भवेम' इति। न च मृतकाः पितरो यज्ञं सम्पादयन्ति, न वा नव-नवगतयो भवन्ति, न चाऽपि तेषां मतौ वयं भवितुमर्हाः, तेषामेतल्लोक-स्थानामस्माकमिन्द्रियादिभिर्विना सम्बद्धत्वात् तन्मतिस्थितेरभावात्।

ये चात्र ताभ्याम् अङ्गिरस आदयो मानवशरीरधार्यृषिपरका व्याख्यातास्तदपि न साधु,

---

बता रहे हैं। महर्षि दयानन्द ने इनकी तीन कोटियाँ निकृष्ट, मध्यम और उत्तम स्तेयादिदोषरहित बताकर पितर जीवित ही लिखे हैं। ये विद्वान् विद्याभ्यास और उपदेश से धर्मग्राहक होकर बाल्यावस्था में विवाहनिषेध कर प्रजा का पालन करें।

इस प्रकार जीवित पितरों की ही विशिष्टतर स्थानप्राप्ति सम्भव है, मृतों की नहीं। नवीन शरीर-धारण के बिना नये कर्मसंस्कारों के सञ्चय के विना विशिष्टतर स्थानप्राप्ति असम्भव है। वातरूप को प्राप्त पितर हमारी प्रार्थना को सुन भी नहीं सकते।

याज्ञिकों की सुमति में होवें

यजुः० १९। ५० पर उव्वट और महीधर का भाव है—'यज्ञसम्पादन करनेवाले नूतनगतिवाले पितरों की सुमति में हम होवें।' मृतक पितर यज्ञ का सम्पादन नहीं करते, न उनकी नई-नई गतियाँ होती हैं और न उनकी सुमति में हम हो सकते हैं और उनको इस लोक में रहने के लिये हमारी इन्द्रियों से जब तक उनका सम्बन्ध न हो, तब तक सुमति में कैसे रह सकते हैं।

तथा उन दोनों भाष्यकारों ने 'अङ्गिरस' आदि की जो शरीरधारी ऋषिपरक व्याख्या की है, वह भी ठीक नहीं है। सृष्टि के आदि में वेद-प्रादुर्भाव काल में उन ऋषियों की उत्पत्ति नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सृष्ट्यादौ वेदप्रादुर्भावकाले तेषामृषीणामुत्पत्तेरभावात्, ईश्वरज्ञानस्य नश्वरेतिहासयुक्तस्याऽसम्भवाच्च। अत एव महर्षिदयानन्दो व्याख्यातवान्—"अङ्गिरसः = सर्वविद्यासिद्धान्तविदः, अथर्वाणः = अहिंसकाः, भृगवः = परिपक्वविज्ञानाः" इति।

बर्हिषदः पितरो हव्यानि जुषध्वम्

'बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या०' (यजु:० १९। ५५)। अत्रोव्वटमहीधरौ व्याख्यातवन्तौ—"बर्हिषि सीदन्तीति बर्हिषदः पितरो यानि हव्यानि वयं चकृम तानि यूयं जुषध्वम्।" इति। तन्न हि मृतका दर्भे स्थातुमर्हन्ति, न वा हव्यानि भोजनानि सेवितुमर्हन्ति, तस्मादिमे जीविता एव पितरः।

बर्हिषदः पितरः स्वधयाऽन्नेन सह सुतस्य सोमस्य पानं सेवन्ते

'आहं पितॄन् सुविदत्राँ २॥ अवित्सि०' (यजु:० १९। ५६)। अत्रोव्वटमहीधरयोर्मतेनाऽपि तथात्वे कथं दिवङ्गताः पितरोऽन्येन सह सोमं सेविष्यन्ते?

उपहूताः पितर आगच्छन्ति, शृण्वन्ति, वदन्ति अवन्ति च

'उपहूताः पितरः०' (यजु:० १९। ५७)। अत्र महीधरो यथा—"हे पितर इह यज्ञे

थी। ईश्वरीय ज्ञान में नश्वर इतिहास नहीं हो सकता। इसीलिये महर्षि दयानन्द ने व्याख्या की है कि—"अङ्गिरसः अर्थात् सर्वसिद्धान्तवेत्ता, अथर्वाणः अर्थात् अहिंसक, भृगवः अर्थात् परिपक्वज्ञानवाले।"

बर्हिषद् पितर हव्यों का सेवन करें

यजु:० १९। ५५ मन्त्र की उक्त भाष्यकारों ने व्याख्या की है—"बर्हिः अर्थात् दर्भ पर बैठनेवाले पितर हमारे किये द्रव्यों का प्रीतिपूर्वक सेवन करें।" सो मृतक दर्भासन पर नहीं बैठ सकते, न हव्यों (भोजन) का सेवन कर सकते हैं, अतः ये जीवित पितर ही हैं।

बर्हिषद् पितर अन्न के साथ सोम का पान करते हैं

यजु:० १९। ५६ मन्त्र पर दोनों के ही भाष्य से सिद्ध है कि दिवङ्गत पितर अन्न के साथ सोम का पान नहीं कर सकते।

बुलाये गये पितर आते हैं, सुनते हैं, कहते और रक्षा करते हैं

यजु:० १९। ५७ पर महीधर का भाष्य है कि—"बुलाये गये पितर आवें, हमारा वचन

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

आगच्छन्तु, अस्मद्वचः शृण्वन्तु श्रुत्वा च अधिब्रुवन्तु पितृभिः पुत्राणां यद् वक्तव्यं तद् वदन्तु, तेऽस्मानवन्तु। अभिरुचितेषु बर्हिषि सादितेषु विधिवत् स्थापनीयेषु हविःषु।" इति।

एतेऽपि आकारिताः पितरः श्रोत्रवन्त एवागता वचः श्रोष्यन्ति, श्रुत्वा च वक्ष्यन्ति पितृयोग्योपदेशं पुत्रान् अभिलक्ष्य तथा रक्षिष्यन्ति। एतत् सर्वं जीवितेष्वेव पितृषु सम्भवति न पुनर्मृतेषु।

अग्निष्वात्तपितृणामागमनं प्रतिगृहे सुखोपवेशने भोजनम्

'अग्निष्वात्ताः पितर एह०' (यजुः० १९।५९)। अत्र महीधरभाष्यम्—"हे अग्निष्वात्ताः पितर इह यज्ञे यूयमागच्छत। एत्य च गृहं गृहं प्रति उपविशत। सदस्युपविष्टाः सन्तः हवींषि अत्र भक्षयत।" इत्यादि। इदं हि जीवितेषु सङ्गच्छते न मृतकेषु।

वामजानु पातयित्वा प्राचीनावीतिनः

'आच्या जानु दक्षिणतो निषद्येमम्०' (यजुः० १९। ६२)। इत्यत्र उव्वटमहीधर-भाष्यम्—"पितरः आच्या जानु वामजानु पातयित्वा। तथा दक्षिणतो निषद्य दक्षिणाभिमुखा उपविश्य। स हि तेषां स्वभावः। 'अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदन्' इति श्रुतेः।" इति।

वामजानुनिपातनं दक्षिणस्कन्धोपरि यज्ञोपवीतं निधाय वामपार्श्वे च कृत्वा तिष्ठन्ति

सुनें, सुनकर कहें, पितरों के साथ जो वक्तव्य हो वह कहें, वे हमें पालें। अभिरुचित कुशासनों पर विधिवत् स्थापनीयों पर बुलाये गये।"

यह सब कृत्य जीवित पितरों में ही घटित हो सकता है, मृतों पर नहीं।

अग्निष्वात्त पितरों का आगमन प्रतिघर में सुखासन पर भोजन

'अग्निष्वात्ताः पितर एह०' (यजुः० १९।५९) पर महीधर का भाष्य है—"हे अग्निष्वात्त पितरो! यहाँ यज्ञ में तुम आओ, आकर प्रति घर में बैठो, हवियों को खाओ।" यह भी जीवितों पर सङ्गत है, मृतकों पर नहीं।

वामजानु गिराकर प्राचीनावीती पितर

'आच्या जानु दक्षिणतो निषद्येमम्०' (यजुः० १९।६२)। इस मन्त्र पर ये दोनों भाष्य करते हैं कि—"पितरों से कहा जा रहा है कि बाएँ घुटने को गिरा कर, दक्षिणाभिमुख बैठकर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ते प्राचीनावीतिनः । अनयोर्भाष्यानुसारं पितृभिरेवमास्थेयम्। तच्च जीवितेष्वेव सङ्गतम्।

अत्र महर्षिभाष्यं तु सर्वथा साधिष्ठम्। यथा—"येषां पितरो यदा सामीप्यमागच्छेयुः स्वयं वैतेषां निकटे समभिगच्छेयुस्तदा भूमौ जानुनी निपात्य नमस्कृत्यैतान् प्रसादयेयुः । पितरश्चाशीर्विद्यासुशिक्षोपदेशेन स्वसन्तानान् प्रसन्नान् कृत्वा सततं रक्षेयुः ।"

ऊर्णानामुपरिभागे आसीनाः

'आसीनासो अरुणीनामुपस्थे०' (यजुः० १९। ६३) । इत्यत्र अरुणवर्णानामूर्णानामुपरिभागे आसीना उपविष्टाः पितरोऽपि जीविता न मृतकाः, तदासनाऽघटितत्वात्। एवमेव यजुः० १९। ६७ इत्यत्र 'यतीन् शुचीन् नित्यनैमित्तिकाऽनुष्ठानैर्निष्पापान् (पितॄन्) त्वं वेत्थ' इत्यादिष्वपि पितृशब्दो जीवितेष्वेव घटितः । यत्र वा दिवङ्गतानां कृते प्रयुक्तोऽपि स्यात्तत्र हस्तप्रक्षालनमासनं भोजनं चादिनोपहर्तव्यं स्यात्।

तथैव गीतायामपि पितृशब्दप्रयोगो जीवितेषु कृतः । यथा—

तत्राऽपश्यत् स्थितान् पार्थः पितॄनथ पितामहान्।
आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा ॥ १ । २६ ॥

आप यज्ञ की अभिष्टुति करें।" बायाँ घुटना झुकाकर, दाहिने कन्धे पर यज्ञोपवीत रखकर—यह सब जीवितों के प्रति घटित हो सकता है।

इस पर महर्षि दयानन्द का भाष्य अत्युत्तम है । यथा—"जिनके पितर जब समीप आयें, या स्वयं उनके निकट जावें, तब भूमि पर घुटनों को झुकाकर प्रणाम करके इन पितरों को प्रसन्न करे । पितर लोग आशीः, विद्या, उत्तमशिक्षोपदेश से अपनी सन्तानों को प्रसन्न करके रक्षा करें ।"

ऊन के ऊपर भाग पर बैठे हुए

यजुः० १९ । ६३ में लाल वर्ण की ऊन के आसन पर आसीन पितर भी जीवित हैं; क्योंकि मृतकों का ऊर्णासन पर बैठना सम्भव नहीं है। इसी प्रकार ६७वें मन्त्र में—'जिन परिचित या इनके सम्बन्धी अपरिचित भी पितर या नित्य नैमित्तिक अनुष्ठानों से निष्पाप हुओं को तुम जानते हो ।' ये सभी अर्थ जीवितों पर घटित हैं, मृतकों पर नहीं; क्योंकि दिवङ्गतों का हस्तप्रक्षालन, आसन, अशनादि सम्भव नहीं है ।

गीता में प्रयुक्त 'पितृ' शब्द जीवितों पर घटित है । यथा—

पार्थ ने युद्धस्थल में पिता, पितामह, आचार्य, पितर, पुत्र आदि को स्थित देखा, जिन्हें वह

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥ १ । ३४ ॥

एतान्न हन्तुमिच्छामि—

ननु— संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ १ । ४२ ॥

अत्र तु स्पष्टतया मृतेभ्यः पिण्डदानं जलदानं च तयोर्लोपः संकरे सञ्जाते विलिखित इति वाच्यम्, नैतत्, लुप्ता पिण्डस्य अन्नग्रासस्य उदकस्य जलस्य क्रिया येषां ते, इत्यर्थो जीवितेषु सर्वथा सङ्गच्छते । यथाऽह 'इटावा' निवासी श्री पं० भीमसेनशर्मा—'अष्टौ पिण्डान् समश्नीयाद्' इति प्रामाण्याद् ग्रासार्थे पिण्डशब्दः । अत्र भाष्यम्—

'अस्मत्कुले पुत्राः पौत्राश्च भवेयुस्ते जरावस्थायामशक्तेऽस्मिन् कलेवरे जलान्नादि-दानेन स्वदेहांशादुत्पन्नत्वादात्मीयप्रेम्णाऽस्मान् सन्तोषयिष्यन्तीति सर्व इच्छन्ति । येषां पुत्राः पौत्रा न भवन्ति ते मध्यमा दुःखिनः, येषां च कुले स्वेषां निजपुत्रपौत्राणामभावेऽन्ये जारकाः कण्टका इवोत्पद्यन्ते, ते तान् वृद्धान् दृष्ट्वैव दुःखायितं मनो दधते । पितरश्चामुकस्य वधूजोऽमुकस्त्रीजोऽयं जारक इति निशम्यास्माकमन्नादिदानेन कश्चित् तारको नास्ति किन्तु जारका एवेमे इति मत्वा दुःखसागरे निमज्जन्ति ।'

मारना नहीं चाह रहा था। (१ । २६, ३४)

प्रश्न—'कुलघ्नों का संकर नरक के लिये है, ऐसों के पितर पिण्ड और जलदान की क्रिया के लुप्त हो जाने पर पतित हो जाते हैं ।' यहाँ पर तो स्पष्टरूप से पिण्डदान और जलदान लिखा है ?

उत्तर—इसमें पिण्ड अर्थात् अन्नग्रास और जल देने की क्रिया जीवितों में ही सम्भव है । जैसा कि 'इटावा' निवासी विद्वद्वर पं० भीमसेन जी ने लिखा है कि 'आठ पिण्ड खाये', इससे पिण्ड शब्द का अर्थ ग्रास है । इस पर भाष्य देखिये—

"हमारे कुल में पुत्र और पौत्र होवें, वे जरावस्था से अशक्त शरीर में जल अन्नादि देकर अपने देहांश से उत्पन्न होने से आत्मीय प्रेम से हम लोगों को सन्तुष्ट करेंगे, यह सभी चाहते हैं । जिन के पुत्र-पौत्र नहीं होते, वे मध्यम दुःखी हैं और जिनके कुल में अपने निज पुत्र-पौत्रों का अभाव होता है, तब अन्य जारक कण्टक के समान उत्पन्न होते हैं, वे उन वृद्धों को देखकर ही मन को दुःखित कर लेते हैं । पितर लोग सुनकर कि यह अमुक की वधू या स्त्री से उत्पन्न जारक है, अन्नादि देकर कोई हमारा तारक नहीं है किन्तु जारक है, यह मानकर दुःखसागर में डूब जाते हैं ।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न चात्र पिण्डशब्दस्य पितृषु मृतेषु यवचूर्णादिनिर्मितपिण्डानामेव ग्रहणमिति वाच्यम्, पिण्डशब्दस्यानेकार्थत्वेऽपि, यथा—

'पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः ।
देहमात्रे निवापे च गोलसिह्लकयोरपि ॥
औण्ड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः ।' (इति मेदिनी)
पिण्डो वृन्दे जपापुष्पे.....कवले पिण्डं तु । (इति हेमचन्द्रः)

अस्मिन् प्रकरणे कवलार्थत्व एव । तथाऽऽह मनुरपि कृच्छ्रोपवासे—

एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥ ११ । २१६ ॥

अत्र कुल्लूकः—"सायंप्रातर्मध्याह्नेषु स्नानं कुर्वाणः पौर्णमास्यां पञ्चदशग्रासानशित्वा ततः कृष्णप्रतिपत्—क्रमेणैकैकं ग्रासं ह्रासयेत् ।"

अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ॥ मनु० ११ । २१८ ॥

कुल्लूकटीकायाम्—'अष्टावष्टौ ग्रासान् युञ्जीत' इति । तथैव ११ । २१९, २२० श्लोकयोरपि पिण्डस्यार्थो ग्रासः कृतः ।

महाभारते वनपर्वणि (अ० १९३ । ३४-३५) —

यावतो ह्यन्धसः पिण्डानश्नाति सततं द्विजः ।
तावद् ग्रामसहस्राणां फलमाप्नोति दायकः ॥

यही नहीं कहना चाहिये कि मरे हुए पितरों के लिये जौ के चूर्ण से निर्मित पिण्डों का ग्रहण है, पिण्ड शब्द के अनेकार्थ होने पर भी इस प्रकरण में ग्रास अर्थ ग्रहण किया जायेगा ।

पिण्ड शब्द का इन अर्थों में प्रयोग होता है, यथा—बोर, बल, घना, देह, घर का एकदेश, पितृदान, गोल, लोहवान, पौंडे का फूल आदि । मनु ने कृच्छ्रोपवास में कहा है—

पूर्णिमा के दिन २५ ग्रास भोजन कर कृष्णपक्ष में एक-एक ग्रास कम करे तथा शुक्लपक्ष में एक-एक ग्रास बढ़ावे । इस प्रकार करता हुआ तीन समय स्नान करे । यह चान्द्रायण व्रत कहाता है (मनु० ११ । २१६) ।

इस पर कुल्लूकभट्ट ने भी पिण्ड का अर्थ ग्रास किया है । उसी प्रकार २१९ तथा २२० श्लोकों में भी ग्रास अर्थ है । महाभारत के वनपर्व में—

अन्न के जितने पिण्डों के ग्रास द्विज खाता है, उतने हजार ग्रासों का फल दानदाता को प्राप्त होता है (अ० १९३ । ३४, ३५) ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्रैवाध्याये षट्त्रिंशे युधिष्ठिरस्य भीष्मं प्रति वचनम्—

समा यद्यपि भीष्मस्य वृत्तिरस्मासु तेषु च।
द्रोणस्य च महाबाहो कृपस्य च महात्मनः ॥ १५ ॥
अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः।
तस्मात् त्यक्ष्यन्ति संग्रामे प्राणानपि सुदुस्त्यजान् ॥ १६ ॥

गीताप्रेसप्रकाशितहिन्द्यां पिण्डस्यार्थो ग्रास एव। तथा—

लाङ्गूलचालनमधश्चरणावपातम्,
भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु,
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ (भर्तृहरिसंग्रहे ५७)

इहाऽपि पिण्डस्य ग्रास एवार्थः।

'नमो वः पितरः०' इति मन्त्रस्याऽपि माहीधरेऽर्थ उद्धृतः, परन्तत्र भाष्ये—'सतो धनादि युष्मभ्यमस्माभिर्दातव्यम्, युष्मभ्यमेतद् वासः सूत्रमेव परिधानमस्तु' इत्युक्तम्, तत्र मृतेभ्यो धनदानं वासोदानं च परिधानाय कथं सम्भाव्यते? तत्तु जीवितेभ्य एव पितृभ्यो योग्यम्।

परं ब्रवीतु 'सतः' इति बहुवचनस्य धनादि इत्येव कथमर्थः? अनेन तु तदसङ्गतमाज्ञाय ऋषेरर्थ एवानुकृतः 'सतः विद्यमानान् पदार्थान्' इति।

इसी अध्याय के ३६वें श्लोक में युधिष्ठिर का भीष्म के प्रति वचन है—

भीष्म की वृत्ति यद्यपि हम में और उनमें समान है तथा द्रोणाचार्य और कृपाचार्य की भी, उनके द्वारा भी राजग्रास रखनेयोग्य है, जिससे वे संग्राम में दुस्त्यज प्राणों को छोड़ देंगे।

गीताप्रेस गोरखपुर से प्रकाशित महाभारत की हिन्दी में भी पिण्ड का अर्थ ग्रास किया गया है। इसी प्रकार 'श्वा पिण्डदस्य' में भी पिण्ड का ग्रास अर्थ है।

'नमो वः पितरः०' इस मन्त्र पर महीधर का भाष्य जो उद्धृत किया है, उसके अर्थानुसार धनदान और वस्त्रदान परिधान के लिये जीवित पितरों के ही लिये योग्य है। मन्त्र में 'सतः' यह बहुवचन है, अतः महीधर द्वारा भाष्य में इसके अर्थ 'धनादि' एकवचन देना व्याकरणसम्मत नहीं है। इसी प्रकार उव्वट के द्वारा 'सतः' के अर्थ में 'विद्यमानान् द्रव्यान्' यहाँ द्रव्य शब्द का नपुंसकलिङ्ग में प्रयोग न कर पुंलिङ्ग में प्रयोग करना भी ठीक नहीं। अतः ऋषि दयानन्द का 'सतः' अर्थात् 'विद्यमानानुत्तमान् पदार्थान्' यह अर्थ ही साधीयान् है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५२२, पं० ४—ननु 'आधत्त पितरो गर्भम्' इति मन्त्रस्य कात्यायनविनियोगानुसारं दर्शित एवार्थः सम्भवति, यथा—'मृताः पितरः स्वाशीर्भिः पुत्रं पुष्करस्रजमुत्पादयन्ति' इति वक्तव्यम्, इति चेन्न, मृतानामाशीर्दानसामर्थ्याभावात्, महर्षेरर्थस्यैव सम्भाव्यत्वात्, जीवित-पित्राशीर्भिर्ब्रह्मचारिणः पुष्करस्रग्धारित्वसम्भवाच्च। अन्यथा धारित-स्रजश्च पुत्रस्य मातुरुदरे पुष्करस्रजभावे स्रग्वित्वासम्भव एव, नवोदरे उद्यानव्यवस्था काचित्। वस्तुतस्तु नायं मन्त्रो भवत्पितृपिण्डव्यवस्थायां प्रमाणम्, अपितु वेदारम्भप्रकरणक एव।

पृ० १५२२, पं० ८—यदाह—"रसाय सोमलतादिरसविज्ञानानन्दग्रहणाय, शोषाय अग्निवायुविद्याप्राप्तये, जीवाय जीविकाविद्याप्राप्तये (स्वधायै) मोक्षविद्याप्राप्तये (घोराय) आपत्कालनिवारणाय सर्वविद्याप्राप्तये च' इत्यादिकं तत्तु निर्मूलमेव, तत्तत्पदानां तदर्थकत्वे मानाभावात्।" इति।

तत् करपात्राक्षिप्तं समस्तमपि शब्दसामर्थ्याज्ञानमेव सूचयति। 'रस्यते आस्वाद्यत इति रसः' एतद्व्युत्पत्त्या सोमलतादिनिष्पीडितोऽपि रसः। 'रसो वै सः' इति प्रामाण्याद् विज्ञानानन्दो-ऽपि रसः। शोषणार्थक 'शुष्' धातोरग्निवाय्वोः परमशोषकत्वादयमर्थः। प्राणधारणार्थक 'जीव'-धातोर्जीवति, प्राणं धारयति, जीवयतीति वेति जीविका जीव एव। या स्वमेव दधाति धारयति इति स्वधा मोक्षविद्यैव। हिंसागत्यर्थकाद् 'हन्' धातोः 'हन्तेरच् घुर च' (उणा० ५।६४) इति

पृ० १५२२, पं० ४—"आधत्त पितरः०' इस मन्त्र का कात्यायन-विनियोग के अनुसार दिखाया अर्थ ठीक है कि मृत पितर अपने आशीर्वादों से पुत्र को पुष्करमालायुक्त उत्पन्न करते हैं।" यह बात निरर्थक है; क्योंकि मृतों में आशीर्वाद देने की क्षमता नहीं रहती, अतः महर्षि का अर्थ ही ठीक है। जीवित पितर ही ब्रह्मचारी को मालायुक्त बना सकते हैं। माता के उदर में कोई उद्यानव्यवस्था भी नहीं, जो गर्भ में पुत्र स्रग्वी किया जा सके। वास्तव में यह मन्त्र आपकी सम्मत पितृपिण्डदान व्यवस्था में प्रमाण नहीं है। यह वेदारम्भ प्रकरण में सङ्गत है।

पृ० १५२२, पं० ८—"इस अर्थात् विद्यानन्द, ओषधि और जलविद्या का यथावत् ज्ञान हो। तथा शोष अर्थात् अग्नि और वायु की विद्याप्राप्ति व जीव अर्थात् जीविकाप्राप्ति के लिये, घोर अर्थात् आपत्कालनिवारण के लिये और सर्वविद्याप्राप्ति के लिये' यह भूमिकार्थ अशुद्ध है।"

इस कथन से करपात्रीजी के शब्दसामर्थ्य का अज्ञान सूचित होता है। ये तो केवल रूढार्थ ही जानते हैं, जबकि वैदिक शब्द यौगिक हैं। अतः ऋषि के अर्थों की मौलिकता देखिये। 'रस्यते' इस व्युत्पत्ति से रस (पारदादि) ओषधि, 'रसो वै सः' से विज्ञानानन्द, 'शुष्' धातु से शोषण अर्थात् अग्नि वायु जो शोषक पदार्थ हैं, उनकी विद्या जानने के लिये। 'जीव' धातु प्राणधारणार्थक है, अतः जीव ही जीविका है, उसकी प्राप्ति के लिये। 'स्वम्' आत्मा को जिस विद्या के द्वारा धारण या पोषण किया जाये, वह 'स्वधा' अर्थात् मोक्ष विद्या है। जिसमें दुःख नष्ट हो, उसे घोर कहते हैं,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

हन्यन्ते यस्मिंस्तद् घोरं तस्मै आपत्कालनिवारणाय—इत्येवमर्था युक्ताः प्रामाणिकाश्च।

पृ० १५२३, पं० १—यच्चोच्यते—"युष्मद्रीत्या पितरः पितृपितामहादयो भवन्ति, ते चाऽविद्वांसोऽपि भवन्ति। ते विद्यागर्भं कथं धारयितुं समर्थाः? किञ्च, गर्भं कुमारमिति समानविभक्तिकत्वेन सामानाधिकरण्यम्। तदा कुमारपदेन कथं सम्बन्धः? कुमारपदस्य च कथं पुष्करस्रजमिति विशेषणम्, तस्य स्रग्धारणविधेरभावात्।" इति, तत् समग्रमृषेरर्थ-गाम्भीर्यमचिन्तयतोऽज्ञानविजृम्भितम्।

तथाहि—पूर्वं तु विद्यारूपगर्भाधानप्रार्थनेनैव पितॄणां विद्यावत्त्वमावश्यकं ध्वन्यते, अपरं नाऽस्मत्कुलेऽब्रह्मविद् भूयादिति ध्यातव्रतेनाऽपि नैव क्वचिदपि पितॄणाम-विद्यावत्त्वमाशास्यते। न कथमपि तद्बालापेक्षया विद्यायामल्पत्वं सम्भाव्यते तेषाम्, अतस्ते विद्यारूपं गर्भं धारयितुमवश्यं समर्था एव। अथ च प्यन्तरूपेण स्वयमन्यद्वाराऽपि विद्याध्यापनं सम्भावितम्। भवत्पक्षेऽपि सामानाधिकरण्ये कुमारं गर्भमिति कथं सङ्गतं स्यात्, गर्भे कौमार्यावस्थाया अघटितत्वात्। अत ऋषिणा सर्वदोषापनोदमाधाय 'गर्भमिव' इत्यौपम्येन भाष्ये प्रत्यपादि। 'आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः' (अथर्व० ११।५।३) इत्यपि निदर्शनं ब्रह्मचारित्वे स्रजमित्यनेन यज्ञोपवीतसूत्रमभिद्योतयते।

अतः आपत्ति के निवारण के लिये—इस प्रकार भूमिकार्थ ठीक और प्रामाणिक है।

पृ० १५२३, पं० १—"स्वामी जी की रीति से पितर पितामह आदि जो हैं, वे अविद्वान् भी होते हैं, तो वे विद्यागर्भ को कैसे धारण करा सकते हैं? दूसरे 'गर्भं कुमारम्' इन शब्दों की समान विभक्ति होने से सामानाधिकरण्य है। अब यदि गर्भ पद का विद्यागर्भ अर्थ कर भी लिया जाये तो कुमार पद से सम्बन्ध कैसे होगा? किसी तरह कुमार पद का अर्थ ब्रह्मचारी कर भी लिया जाये तो 'पुष्करस्रजम्' विशेषण कैसे घटित होगा; क्योंकि ब्रह्मचारी को मालाधारण निषिद्ध है।" यह समग्र कथन ऋषि के गम्भीरार्थ को समझने की सामर्थ्य न होने के कारण किया गया है।

उसे समझिये, प्रथम तो विद्यारूप गर्भ की प्रार्थना से ही पितरों का विद्यावत्त्व सिद्ध है। दूसरे हमारे कुल में 'अब्रह्मवित्' न होवे, इस प्रार्थित परम्परा से भी विद्यावत्त्व होना सम्भव है। बालक की अपेक्षा तो पितरों की विद्यावत्ता अधिक ही होने में कोई सन्देह नहीं। आप यहाँ पर विद्या का अर्थ ही ग़लत समझ रहे हैं कि वे पितर किसी पाठशाला में पढ़े हुए नहीं हो सकते। आप ही बताइये कि आपके पक्ष में कुमार और गर्भ एकविभक्तिक हैं तो भी सामानाधिकरण्य घटित होने का प्रश्न समान है। दूसरे गर्भावस्था में कुमारत्व (कौमार्य) तो कदापि घटित नहीं होगा। अतः ऋषि ने इन सब दोषापत्तियों को समझ कर भी उक्तार्थ 'गर्भमिव' इस उपमा से प्रदर्शित किया है। अथर्ववेद का 'आचार्य उपनयमानः' यह मन्त्र भी निदर्शन है। ब्रह्मचर्य अवस्था में 'स्रज्' यज्ञोपवीत का द्योतक है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्राचार्य उपनयमान इति पित्रोरुपात्तप्रथमजन्मानं द्विजताप्राप्तये समायातं ब्रह्मचारिणं विधिपूर्वकं गृहीतब्रह्मचर्यव्रतं बालकम् उपनयनसंस्कारविधिना स्वीकुर्वन्नाचार्यो गर्भमन्तः कृणुते, गुरुकुलरूपे स्वगर्भे स्थितमिव कुरुते। मातृगर्भे स्थितः शिशुः प्रसवात् पूर्वं यथा नवमासान् यावद् अनिष्टैर्ऋतुपरिवर्तनप्रतिकूलपरिवेशादीनां कुप्रभावैरप्रभावितोऽहर्निशम् आत्मनिर्माणं पूर्णविकासं च करोति, तथा गुरुकुलरूपे गुरुगर्भे स्थितो ब्रह्मचार्यपि ग्राम-नगरादीनामशान्तदूषितपर्यावरणादारात् सुरक्षितो भाविजीवनयात्रायै आत्मानं तदुचितशिक्षा-दीक्षादिसाधनैः सन्नह्यति।

आचार्यो बालकं तिस्रो रात्रीरुदरे बिभर्ति। तत्र कास्तिस्रो रात्रयः? व्यक्ताव्यक्तज्ञविषयकं त्रिविधमज्ञानमेव तिस्रो रात्रयः। कार्यरूपं स्थूलं जगद् व्यक्तम्, गुणानां साम्यावस्था अव्यक्तं कारणजगत्, जानातीति ज्ञः, आत्मा परमात्मा च। अथवा पृथिव्यन्तरिक्षद्युलोकसम्बन्धि सर्वमज्ञानम्। यावत्पर्यन्तमुक्तमज्ञानत्रितयं न विनश्यति, तावत्पर्यन्तमाचार्यस्तमन्तेवासिनं स्वोदरे स्वविद्यामन्दिरे दधाति बिभर्ति च। सम्यक् समापिताध्ययनं सर्वविद्याव्रतस्नातकं तं जातमुत्पन्नं गृहीतद्वितीयजन्मानं द्रष्टुमभिनन्दितुं च सर्वे देवा विद्वांसः सत्पुरुषाश्च तस्य दीक्षायज्ञावसरे समवेता भवन्ति। यथा चाह मनुः—

'आचार्य उपनयमानः' इसका अर्थ है कि माता-पिता से प्राप्त प्रथम जन्मवाले द्विजत्वप्राप्ति के लिये गुरुकुल में आये हुए ब्रह्मचारी (विधिपूर्वक ब्रह्मचर्यव्रतधारी) बालक को उपनयन संस्कार की विधि से स्वीकार करते हुए आचार्य गुरुकुलरूपी मानो अपने गर्भ में रखता है। प्रसव से पूर्व माता के गर्भ में स्थित शिशु जैसे नौ मास तक अनिष्ट ऋतुपरिवर्तन पर प्रतिकूल परिवेश आदि के प्रभावों से रात-दिन अप्रभावित रहकर आत्मनिर्माण और पूर्ण विकास को प्राप्त करता है। तथा गुरुकल-गर्भ में स्थित ब्रह्मचारी भी ग्राम नगर आदि के अशान्त दूषित पर्यावरण से सुरक्षित रहकर भाविजीवन-यात्रा के लिये स्वयं को उचित शिक्षा-दीक्षादि से सन्नद्ध करता है।

आचार्य बालक का तीन रात उदर में भरण-पोषण करता है। वहाँ तीन रात्रियाँ कौनसी हैं? व्यक्त, अव्यक्त और ज्ञ—एतद्विषयक यह त्रिविध अज्ञान ही तीन रात हैं। कार्यरूप स्थूल जगत् व्यक्त है, गुणों की साम्यावस्था अव्यक्त कारणजगत् है और ज्ञ अर्थात् आत्मा और परमात्मा को न जानना। अथवा पृथिवी, अन्तरिक्ष और द्युलोकविषयक अज्ञान तीन रात्रियाँ हैं। जब तक यह त्रितय अज्ञान नष्ट नहीं होता, तब तक आचार्य उस अन्तेवासी को अपने विद्यामन्दिररूप उदर में धारण करता और भरण-पोषण करता है। सम्यक् अध्ययन समाप्त कर 'सर्वविद्याव्रतस्नातक' इस रूप में द्वितीय जन्म ग्रहण करनेवाले का अभिनन्दन करने के लिये सब विद्वान् सत्पुरुष उसके दीक्षा-यज्ञ के अवसर पर समवेत होते हैं। जैसा कि मनु महाराज ने कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्॥ २। १६९॥

इत्थमिह 'गर्भमन्तः कृणुते', 'तिस्रो रात्रीः', 'उदरे बिभर्ति', 'जातम्' इत्यादीनि पदानि स्वमुख्यमर्थं सर्वथा तिरस्कृत्य गौण्या लक्षणलक्षणया गुरुकुलवास-त्रिविधाज्ञानावसान-पूर्वविकास-द्विजन्मत्वाऽवाप्तिरूपानर्थान् लक्षयन्ति। एतेन तरुणेषु प्रसुप्तसर्वशक्तीनां विकासस्तेषां चरित्रनिर्माणम्, उत्तमनागरिकलाभस्तदैव सम्भवति, यदा तेषां विद्यामन्दिराणि ग्रामनगरादीनामशान्तक्षेत्रेभ्यो दूरेऽवस्थितानि स्युः। अत्र वस्तुध्वनिरुपमाध्वनिरपि (वै० सा० सौदामनी)।

ननु स्वामिना त्वत्र स्पष्टमेव पुष्पमालाधारिणमित्युक्तम्, तदा कथमन्यदभिधानमुत्प्रेक्षितम् इति चेन्न, 'विद्याग्रहणार्था स्रग् धारिता येन तम्' इति भाष्येण तु विद्याग्रहणार्था स्रग् उपनयनसूत्रमेव भवतीति शास्त्रप्रतिपादितत्वात्। या चोव्वटेन स्रक्शब्देन मुण्डमाला उत्प्रेक्षिता, तत्तु सर्वथा बुद्धिबाह्यत्वं सूचयति। तेन तु न महीधरोऽपि सहमतः स्वभाष्ये। अथवा पद्मपुष्पमालाधारणे तस्मिन् काले शरीरसौन्दर्यप्रसाधनेऽलिप्तत्वं विद्यासूर्यप्रकाशेन च तस्य विकासित्वं वाऽप्यभिव्यज्यते।

वेद के कथनानुसार माता से प्रथम जन्म, दूसरा मौञ्जिबन्धन संस्कार से और तीसरा यज्ञ की दीक्षा लेने से होता है (२। १६९)।

इस प्रकार यहाँ पर 'गर्भमन्तः कृणुते, तिस्रो रात्रीः, उदरे बिभर्ति, जातम्' ये शब्द अपने अभिहितार्थ को छोड़कर गौणी लक्षणलक्षणा से गुरुकलवास, तीन प्रकार के अज्ञान का अवसान, पूर्व विकास और द्विजन्मत्व की प्राप्तिरूप अर्थों को लक्षित करते हैं। इस से लक्षणों में प्रसुप्त सर्व शक्तियों का विकास तथा उनका चरित्रनिर्माण, उत्तमनागरिकत्व-लाभ तभी सम्भव है, जब उनका विद्यामन्दिर ग्राम-नगरादि के अशान्त क्षेत्रों से दूर अवस्थित हो, यह वस्तुध्वनि है।

शङ्का—जब स्वामी जी ने यहाँ तो 'पुष्पमाला धारण करनेवाले को' यह स्पष्ट ही लिख दिया है, फिर अन्य कथन की उत्प्रेक्षा क्यों की जावे?

समाधान—आपका कथन ठीक नहीं है। 'पुष्पमालाधारिणम्' इसके 'विद्याग्रहणार्थ स्रक् धारित की है जिसने' इस भाष्य से विद्याग्रहणार्थ स्रक् (माला) उपनयन स्रक् ही ठहरता है, ऐसा ही शास्त्रप्रतिपादित है और जो उव्वट ने स्रक् शब्द से 'मुण्डमाला' उत्प्रेक्षित की है, वह तो सर्वथा बुद्धिबाह्य कल्पना को ही सूचित करती है। इस कल्पना से तो अपने भाष्य में महीधर भी सहमत नहीं है। अथवा उस समय में कमलपुष्पों की माला धारण करने में कमल पर जलस्थिति के गुणानुरूप शरीरसौन्दर्य प्रसाधन में अलिप्तता तथा विद्यासूर्य प्रकाश से उसकी विकासिता अभिव्यञ्जित होती है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५२३, पं० ८—यदप्याह—"यदि लौकिकाः पितरस्तदा (विविधप्राचीनावीतादि) यज्ञोपवीतधारणस्य किं प्रयोजनम् ?" तच्छ्रूयताम्, उपर्यस्माभिर्दर्शितं यत् तव प्राचीनावीतिनस्तु पितरः । अत्र विविधयज्ञोपवीतपरिवर्तनं माध्यकालिकम् ।

यच्चाह—"जीवा विद्यमानजीवनाः' इति, तन्न सम्भवति ।" महाशय ! क्व चरितुं याता बुद्धिर्यदा स्वयं 'जीवेषु प्राणिषु' इत्यर्थमुद्धृतवान् । कोऽनयोर्भेदः ?

पृ० १५२३, पं० १३—यच्चोच्यते—"समनसः 'धर्मेश्वरसर्वमनुष्यहितकरणैकनिष्ठाः' इति निर्मूलम् ।" वस्तुतस्तु इदं निर्मूलवच एव अनुर्वरमस्तिष्कमूलम् । यतो हि यदा प्रत्येकप्राणिनो मनसोऽभिसम्बन्धो निवार्य एव तदा निरर्थकमेतद् विशेषणं किञ्चिदिष्टं कल्पयति यन् मनस्तु तदेव गेयं यद् धर्मे ईश्वरे सर्वमनुष्यहितकरणे एकनिष्ठं भवेदिति ऋष्यर्थोऽतिरिच्यते गुणैः । तेनाऽग्रेऽमनस्कत्वकथनमप्यपास्यते ।

यदाह—"'मयि' पदं न व्याख्यातं स्वामिना", परं प्रभो ! त्वया तु किमपि न व्याख्यातम्, केवलमन्यव्याख्यातमुद्धृतम् । अविकलव्याख्यानं नेहोद्दिष्टम्, परं प्रमाणपुरस्करणमिष्टम् ।

पृ० १५२३, पं० ८—आपका यह कथन कि—"यदि लौकिक जीवित पितर अभीष्ट हैं तो (विविध प्राचीनावीत आदि रूप में) यज्ञोपवीत धारण का क्या प्रयोजन है ?" गम्भीर अचिन्तन का परिणाम है । समाधान सुनिये—जैसे हमने ऊपर ही दिखला दिया है कि तुम्हारे प्राचीनावीती आदि पितर मध्यकालिक चिन्तन के अनुसार विविध प्रकार से यज्ञोपवीत परिवर्तन करते हैं ।

पृ० १५२३, पं० १३—"इसी तरह से दयानन्द ने 'समनसः' पद का अर्थ 'धर्म, ईश्वर और सर्वहित करने में उद्यत' किया है, यह निराधार है ।" वस्तुतः इस निर्मूल वचन का मूल ही आपका अनुर्वरमस्तिष्क है; क्योंकि जब प्रत्येक प्राणी का मन का सम्बन्ध अनिवार्य है ही, तब यह विशेषण निरर्थक होकर कुछ इष्ट कल्पना कराता है कि वस्तुतः मनवाले तो वे ही हैं, जो धर्म, ईश्वर और सब मनुष्यों के हित करने में एकनिष्ठ हों । अतः ऋषि का अर्थ गुणों से विशिष्ट है । ज्ञानावबोधनार्थक 'मन' धातु से 'मनः' शब्द बनता है । गो० उ० ४ । ११ में 'यन्मनः स इन्द्रः (ईश्वर)' तथा शतपथ में 'कामः सङ्कल्पः' इस पाठ में धृति (धर्म) आदि अर्थ दर्शित हैं । इससे आगे अमनस्कता का कथन भी अपास्त हो जाता है ।

यह कहना कि—"स्वामी जी ने 'मयि' पद की व्याख्या नहीं की है", पर श्रीमन् ! आपने तो कुछ भी स्वयं व्याख्या नहीं की है, केवल अन्य के व्याख्यान को उतार दिया है । पहले भी बताया जा चुका है कि ऋषि का उद्दिष्ट प्रमाण प्रस्तुत करना है, उन प्रमाणों की अविकल व्याख्या करना उद्दिष्ट यहाँ नहीं है । प्रतिपद् व्याख्यान देखने की इच्छा हो तो वेदभाष्य देखिये । दूसरे

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्याख्यानं प्रतिपदं दिदृक्षा चेद् यजुर्भाष्ये द्रष्टव्यम्। न भवताऽपि अत्र 'ये' पदं व्याख्यातम्। ततो बालिशतैव।

पृ० १५२४, पं० १७—यत् कथ्यते—"हवेषु आह्वानेष्वित्यर्थस्यैव यज्ञादिप्रसङ्गे युक्तत्वात्।" इति, तत्तु निर्बुद्धिजल्पितमिव, यदा यज्ञादतिरिक्तप्रसङ्गो युज्यत एव न ते मते तदा कथं 'यज्ञादि' अत्र 'आदि' पदम्, तस्योपादानस्य वैयर्थ्यात्। उव्वटमहीधराभ्यां 'हवम्' इत्यस्याह्वानमेवार्थः प्रायेण कृतः, अन्यार्थस्याप्रतिबुध्यमानत्वात्। यदा हि 'हु दानादानयोः' 'ह्वेञ् स्पर्धायां शब्दे च' इत्याभ्यामनेकार्थेषु हवेत्यस्य प्रयुज्यमानार्हत्वम्। तथाहि 'हु' इत्यस्माद् 'ऋदोरप्' (अष्टा० ३।३।५७) इत्यपि, 'ह्वेञ्' धातोः 'भावेऽनुपसर्गस्य' (अष्टा० ३।३।७५) इति सूत्रेणापि सम्प्रसारणे च सिध्यति।

पृ० १५२५, पं० ६—ननु—"जीवतां सेव्यत्वेऽपि मरणानन्तरमपि वैदिकश्राद्धादिविधानात्, तत्तद्योनिषु जन्मवतामपि तृप्त्यादिसम्पादनसम्भवेन तादृशशङ्काकलङ्कस्पर्शाभावः। नहि स्थूलदेहसम्बन्धेनैव सेवादिसम्बन्धः, ईश्वरस्य देहाभावेऽपि स्तुत्यादिभिः सेवादिसम्भवात्।" इति चेन्न वाच्यम्, मृतानामन्यलोकगतानामसान्निध्याद् अन्नाद्यप्राप्तौ तृप्त्याद्यसम्भवाद् असंशयं चानवाप्त्याशङ्कापङ्ककलङ्काङ्कवलितत्वात् श्राद्धभोजनस्य। तत्तद्योनिषु

'मयि' का अर्थ दुरूह तो है नहीं। आपने भी 'ये' पद की यहाँ कोई व्याख्या नहीं की। अतः यह आपका कथन बचपना है।

पृ० १५२४, पं० १७—"स्वामीजी ने 'हवेषु' का अर्थ 'देयग्राह्यव्यवहारेषु' किया है, यह ठीक नहीं; क्योंकि यज्ञप्रसङ्ग में 'हव' का अर्थ बुलाना ही हो सकता है।" यह आक्षेप भी निर्बुद्धिजल्पित सा है। श्रीमन्! आप तो यज्ञ से अन्यत्र इन मन्त्रों का प्रयोग युक्तियुक्त मानते ही नहीं, तो 'यज्ञादिप्रसङ्ग' में 'आदि' पद आपने किस अभिप्राय से पढ़ा? वह व्यर्थ है। उव्वट-महीधर ने 'हव' का अर्थ आह्वान किया है; क्योंकि वे भी यज्ञ से अतिरिक्त प्रसङ्ग नहीं मानते। जबकि दानादानार्थक 'हु' तथा स्पर्धा और शब्दार्थक 'ह्वेञ्' धातु से 'हव' शब्द निष्पन्न होता है।

पृ० १५२५, पं० ६—शङ्का—"जीवितों के सेव्य होते हुए भी मरण के अनन्तर भी वैदिक श्राद्धादि के विधान से तत्तद्योनियों में जन्म धारण करनेवालों का भी तृप्ति आदि का सम्पादन सम्भव होता है, तो उनको तृप्ति नहीं हो सकेगी, ऐसी शङ्का करना ठीक नहीं।"

समाधान—आप का 'ठीक नहीं' कहना ही ठीक नहीं है। आप का शङ्काकथन तर्क व बुद्धि से बाह्य है; क्योंकि मरे हुए या अन्य लोक अज्ञातस्थानगत श्राद्ध करनेवालों के पास नहीं हैं, तो अन्नादि द्रव्य उन्हें प्राप्त नहीं हो सकते तो तृप्ति आदि असम्भव है। उन-उन विविध तृणचर,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जन्मवतां विविधभोजनस्याहार्यत्वात् तत्र ज्ञानस्यासत्त्वात् श्राद्धकर्तॄणां च। परमात्मनश्चाकायस्य सर्वव्यापकत्वात् सेवादिभावनासम्पृक्तत्वान् मृतानां च तत्सम्पर्कासम्भवोऽव्यापकत्वात्, सेवाग्रहणसामर्थ्यस्यानुदयात् सेवादेरशक्यत्वाच्च।

इह निर्मलोक्तिस्थिमुपयुज्यते—

पाषाण-प्रतिमार्चनेन खलु ते जाड्यं समायान् मतौ,
तेनानल्पधियर्षिणा समुदितं सूक्ष्मार्थसम्भूषितम्।
भाष्यं, नो रुचिरन्तवास्ति विकृतं यद्वा मनोमानितम्,
जल्पन्नो लजसे महीधरसृतौ बद्ध्वा स्वकीयां धियम्॥

पृ० १५२६, पं० ३—यदाह—"महीधराद्यनुकारित्वेऽपि विकृतमेव (स्वामिभाष्यम्), स्वाभ्यूहितत्वात्। यतोऽङ्गेषु रसभूतोऽपि प्राणो न परमेश्वरः।" इति, तदप्यल्पधीवचनम्, नहि ऋषिणाऽनुकृतो महीधरः, तस्याऽतत्त्वार्थवित्त्वात्। स्वाभ्यूहाशक्तिविरहितस्य तु वेदमप्यतथ्यम्, यतो हि त्वया भौतिकप्राणः परमेश्वरात् पृथक् प्रतिपाद्यते। ऋषिणा तु 'येन प्राणः प्राणिति, येन प्राणः प्रणीयते' इति ध्यात्वा प्राणानामेषामपि प्राणः परमेश्वर उद्यते इह।

जलचर, मलभक्षी आदि का जो विविध प्रकार का भोजन है, तथा उन पितरों की योनि जन्म भी अज्ञात है। परमात्मा तो अकाय सर्वव्यापक, सेवा आदि की भावना से अवगत है, पर मृतक लोग व्यापक नहीं, जो हमारे सेवादि भावों को जान सकें। न उनकी सेवाग्रहण की सामर्थ्य है और न हम लोग उनकी सेवा करने में शक्त हैं।

इस विषय में यह निर्मलोक्ति उपयुक्त है—

श्रीमन्! जड़ प्रतिमा के अर्चन से तुम्हारी बुद्धि में भी जड़ता आ गई है। अतः अनल्पबुद्धि महर्षि दयानन्द के सूक्ष्मार्थविभूषित प्रकाशित भाष्य को आप अच्छा नहीं समझते, तथा जो विकृत मनमाने अर्थ को कहते हुए महीधर के मार्ग पर अपनी बुद्धि को बाँधकर किञ्चित् भी लज्जित नहीं हो रहे हैं।

पृ० १५२६, पं० ३—"महीधर आदि का अनुकरण करने पर भी स्वामी जी का भाष्य विकृत है; क्योंकि उन्होंने अर्थों का अभ्यूहन स्वयं किया है। क्योंकि अङ्गों में रस होता हुआ भी परमेश्वर प्राण नहीं हो सकता।" यह सारा कथन अल्पबुद्धि का है। ऋषि ने महीधर का अनुकरण नहीं किया है; क्योंकि महीधर वेदतत्त्वार्थ के बिलकुल जानकर नहीं थे। आप तो अभ्यूहा शक्ति से शून्य हैं, इसलिये अनुकरण की अतथ्य बात कह रहे हैं। जैसा कि आप यहाँ भौतिक प्राणों को परमेश्वर के नियन्त्रण से बाहर बताते हैं। ऋषि ने तो 'जिसके विना प्राण नहीं रह सकता तथा जिन प्राणों का प्राण मन होता है' ऐसा समझकर प्राणों का भी प्राण परमेश्वर बताया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथर्वाण इत्यस्यार्थः स्वभाष्ये अहिंसका इति कृतः, हिंसनं च प्राणपीडनं शरीरपीडनमिति द्विधा भवति। तत्प्रतीकारम् अथर्ववेदज्ञाः, आयुर्वेदज्ञा धनुर्वेदवेत्तारश्च अथर्वाण इति पदेन उभयोर्ग्रहणम्। एवं भृगुशब्दस्य।

पृ० १५२६, अनु० २—"यमलोके ये पितरो वर्तन्ते, 'धर्मराजः पितृपतिः' इत्यभिधानात्।" इत्यादि सकलमज्ञानम्, यमस्य लोकस्य धर्मराजादिशब्दानां यथार्थानवगमात्। नहि यमो यमराड् वा कश्चित् पौराणिककल्पितो मृत्युनियन्ता अतिरिच्य परमात्मानम्। स एव यमराड् यः समस्तजीवान् पदार्थान् वा यमयति नियमयति। यमो नाम प्राणोऽपि, सूर्योऽग्निरपि वा यमः, यथा ब्राह्मणग्रन्थेषु अन्येषु वा प्रत्यपादि। यमो वन्तो राजाऽपि न्यायाधीशोऽपि। न्यायाधीशत्वेनाधिकृताः पितरस्तु न्यायस्य दर्शयितारः कर्तार एव।

भवतो या संयमनी नाम काऽपि नगरी पौराणिकी प्राख्यायते, सा तु कल्पितैव। 'यज्'धातोः त्रिष्वर्थेषु इज्यते सङ्गम्यते यस्मिन् एवंविधः प्रजापालनरूपराजधर्मव्यवहारो यज्ञो भविष्यति।

१५२७-पृष्ठे—'ये नः पूर्वे पितरः' इत्यादीनां भवता दर्शितोऽर्थोऽविशिष्ट एव माहीधरः।

यह कथन कि—"अथर्व' का धनुर्वेदज्ञाता अर्थ कैसे हो गया?" सुनिये—अथर्व का अर्थ ऋषि ने अहिंसक किया है। 'हिंसन' सूक्ष्म प्राण और स्थूलशरीर-भेद से दो प्रकार का है, उसका न होने देनेवाले अथर्वाणः अर्थात् प्रथम आयुर्वेदज्ञ और दूसरे शरीर को शत्रुपीडा से बचानेवाले धनुर्वेदज्ञ होते हैं। 'भ्रस्ज पाके' धातु से भृगु शब्द की निष्पत्ति होती है—'भृज्जन्ति दुःखमविद्यां वेति भृगवः'। इस प्रकार परिपक्व ज्ञानवाले शुद्ध, यह अर्थ तर्कसङ्गत सिद्ध है। ईश्वरोपदिष्ट धर्म, अर्थ, काम और मोक्ष का उपदेश तो लौकिक पिता पितामह आदि ही करेंगे, मृत पितर नहीं कर सकते हैं।

पृ० १५२६, अनु० २—पारिजातकार का यमलोक के पितर धर्मराज, पितृपति आदि कथन अज्ञान है। यमलोक, धर्मराज आदि शब्दों का अर्थ ही आप नहीं जानते। परमात्मा के अतिरिक्त मृत्यु का नियन्ता अन्य चेतन नहीं है। वही यमराट् जीव तथा सांसारिक पदार्थों का नियमन करता है। यम नाम प्राण, सूर्य, अग्नि आदि का भी ब्राह्मणग्रन्थों में वर्णित है। यम नाम न्यायाधीश का भी है। न्यायाधीशरूप में अधिकृत पितर न्याय के दिखाने तथा करनेवाले हैं।

आपकी संयमनी नाम की पौराणिक नगरी तो काल्पनिक है। यज्ञ शब्द के राजधर्म पक्ष में प्रजापालनादि व्यवहार अर्थ बिलकुल ठीक है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदाह—"वसिष्ठपदस्य 'सर्वविद्याद्युत्तमगुणेषु रममाणः' इत्यर्थकरणं निर्मूलम्। सोमपीथमित्यस्यापि 'सोमविद्यारक्षणम्' इत्यर्थो निर्मूल एव।" इति, तन् मूलस्य धातोरर्थस्यानवगाहनादज्ञानमेव।

इह अतिशयेन वसन्ति सद्गुणेषु त एव वसिष्ठाः। 'वस्'धातोर्निवासार्थकात् तृजन्तात् कर्तरि अतिशायन इष्ठन्। 'तुरिष्ठेमेयस्सु' (अष्टा० ६।४।१५४) इति तृचो लोपे। 'वसिष्ठ' शब्दः सिध्यति। 'ये वै ब्राह्मणाः शुश्रुवांसस्ते वसिष्ठाः' (जै० २।२४२)। 'सोमपीथम्' इत्यपि सोम-पीथपदयोः समासेन सिध्यति। पीथ इति 'पा पाने, पा रक्षणे' धातोर्वा 'पातृतुदिवचिरिचि०' (उणा० २।७) इति सूत्रेण थकि सिध्यति। एवं सोमं सोमविद्यां पाति रक्षतीति कृत्वा ऋषेरर्थ एव साधिष्ठः।

यच्चोच्यते—"बर्हिषि सर्वोत्तमे ब्रह्मणि ब्रह्मविद्यायां च ये निषण्णाः' इत्यपि निर्मूलम्, दर्भकुशादिबोधकस्य बर्हिष्पदस्य तदर्थत्वाऽभावात्। अर्वागित्यस्याधस्तादित्येवार्थो न पश्चात्।" इति सर्वं शब्दमूलानवगाहनशीलस्य महीधरभाष्यकूपपालितबुद्धिमण्डूकस्याज्ञानम्।

नहि बर्हिः शब्दः केवलदर्भार्थवाचकः। तथाहि 'बृहि वृद्धौ' (भ्वा०) धातोः 'बृंहेर्नलोपश्च' (उणा० २।१०९) सूत्रेण इसि नलोपे सिध्यति। बर्हिः अन्तरिक्षनाम (निघं०

पृ० १५२७—आक्षेप—"इसके आगे दयानन्द ने 'ये नः पूर्वे' इत्यादि तीन मन्त्रों को उद्धृत किया है, वह अर्थ ठीक नहीं। जैसे 'वसिष्ठ' पद का 'सर्व विद्या आदि उत्तम गुणों में रमनेवाला' यह अर्थ कैसे कर दिया? 'सोमपीथम्' का 'सोमविद्यारक्षण' अर्थ करना ठीक नहीं।"

समाधान—'वस्' तथा 'पा' धातुओं का इन्होंने अवगाहन नहीं किया। जो सद्गुणों में अतिशय रहें, वे वसिष्ठ कहलाते हैं। तृजन्त वस् धातु से अतिशायन अर्थ में 'इष्ठन्' प्रत्यय करने से 'वसिष्ठ' शब्द सिद्ध होता है। 'जो ब्राह्मण वेद के सुननेवाले हैं, वे भी वसिष्ठ कहलाते हैं' (जै० २।२४२)। इसी प्रकार पान और रक्षण अर्थवाली 'पा' धातु से 'पीथ' शब्द सिद्ध होता है। जो सोमविद्या का रक्षक हो, वह 'सोमपीथ' हुआ। अतः ऋषि का अर्थ अतिश्रेष्ठ है।

आक्षेप—"बर्हि अर्थात् सर्वोत्तम ब्रह्म और विद्या में स्थित' अनर्गल है; क्योंकि बर्हि पद दर्भ कुशाग्रादि का बोधक है, स्वामी दयानन्द कृत अर्थ का बोधक नहीं। तथा 'अर्वाक्' का अर्थ नीचे है, न कि पश्चात्।"

समाधान—करपात्रीजी का उक्त सारा कथन शब्द के मूलार्थ को अनवगाहन करने का फल है तथा महीधर के भाष्य-कूप में पली हुई बुद्धिवाले मेंढक का अज्ञान है। बर्हि शब्द केवल

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१।३), उदकनाम (निघं० १।१२), पदनाम (निघं० ५।२), बर्हिः परिबर्हणात् (नि० ८।९), 'प्रजा वै बर्हिः' (कौ० ५।७), 'पशवो वै बर्हिः' (ऐ० २।४), 'ओषधयो वै बर्हिः' (ऐ० ५।२८), 'अयं लोको बर्हिः' (शत० १।४।१।२४), 'शरद् वै बर्हिरिति' (शत० १।५।३।१२), 'क्षत्रं वै प्रस्तरो विश इतरं बर्हिः' (शत० १।३।४।१०), 'भूमा वै बर्हिः' (शत० १।५।४।४) इति।

बृंहन्ति वर्धन्ते सर्वे पदार्था यस्मिंस्तदन्तरिक्षं सर्वोत्तमं ब्रह्म तद्विद्यां वेति महर्षिणा कूपमण्डूकानामपि बुद्धिं रूढिबन्धनादुन्मोच्य वेदा अनन्ता इति स्वाऽप्रतिमप्रतिभाप्रकाशेन साधिता इमेऽर्थाः। एवमृषेरर्थ एव श्रेष्ठः।

यदाह—"अर्वाग् इत्यस्य अधस्तादित्यर्थो न तु पश्चात्" तदपि अज्ञानसूचकम्। अमरकोशस्य सुधाख्यव्याख्यायाम् 'अवरे त्वर्वाक्' इत्यत्र 'अवरे पूर्वकालतः पश्चात्' इत्यर्थो लिखितः। अथवा अर्व अनन्तरार्थे उपपदे अञ्चु धातोः क्विपि, अन्यत्र 'अधः' इत्यप्यर्थः कृतः। दर्भकुशयोः पर्यायवाचित्वेऽन्यतरस्य पाठस्यानावश्यकत्वमनौचित्यं च।

पृ० १५२९, पं० २—यदाह—"प्राशनं भजन्त इति त्वशुद्धमेव। पित्व इत्यनेन पानं भजन्त इत्यन्वयोपपत्तावध्याहारस्यानौचित्यात्। विष्णोः परमेश्वरस्य विक्रमणं विविधक्रमेण जगद्-रचनमिति तु निर्मूलम्, विक्रमणशब्दस्य सृष्ट्यर्थताऽप्रसिद्धेः।"

दर्भ का ही वाचक नहीं है, वृद्ध्यर्थक 'बृहि' धातु से 'बर्हिः' शब्द सिद्ध होता है। इसके अर्थ हैं अन्तरिक्ष, उदक, प्रजा, पशु, ओषधि, लोक, शरद् आदि। जिनका आधार पाकर सब पदार्थ बढ़ते हैं, ऐसे अन्तरिक्ष, ब्रह्म तथा विद्या हैं। महर्षि ने कूपमण्डूकों की भी बुद्धि को रूढ़ि के बन्धन से उन्मुक्त कर 'वेद अनन्त हैं' इस उक्ति को सार्थक करने के लिये अपनी अप्रतिम प्रतिभा के प्रकाश से ये अर्थ सिद्ध किये हैं। इस प्रकार ऋषिकृत अर्थ ही श्रेष्ठ है।

"अर्वाक् का 'नीचे' अर्थ होगा, 'पश्चात्' नहीं" यह कथन तो अज्ञान है। अमरकोश की सुधा नामक व्याख्या में देखिये, यहाँ पर अवर का पूर्वकाल और अर्वाक् का पश्चात्काल अर्थ दिखाया गया है। अथवा अर्व का अर्थ अनन्तर है। 'दर्भकुशादि' इसमें किसी एक का ही पाठ करना चाहिये; क्योंकि ये परस्पर एकार्थवाचक हैं।

पृ० १५२९, पं० २—"आहं पितॄन्०' इस मन्त्र में दयानन्द ने 'प्राशन' पद का अध्याहार किया है, जो कि गलत है; क्योंकि 'पित्व' पद का अर्थ 'पान करते हैं' है ही। 'विष्णु' परमेश्वर का विक्रमण अर्थात् विविध क्रमण व जगद्रचन अर्थ भी निर्मूल है। विक्रमण का सृष्टि अर्थ प्रसिद्ध नहीं है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति तु सर्वं गहनचिन्तनाभावफलितम्। सूयते स्म इति सुतः 'षु अभिषवे'धातोः, एवं सोमवल्ल्यादि-सुतस्य निष्पादितस्य रसस्य भजन्त इति क्रियया सहान्वये आकांक्षायां प्राशनमित्युत्प्रेक्षणं सर्वथा समुचितम्। हिन्दीभाषायां च स्वधया उपदेशेन सुतस्य पुत्रस्य (भावनया सह) भजन्ते इति विशिष्टोऽर्थोऽप्यूहितः। यदा स्वधयाऽन्नेन सह रसः सेव्यते तदा प्राशनं यदा च केवलं रसस्य सेवनं विवक्षितं तदा पानम्, यतोऽशनाया उदन्या भिन्ना। भवतो गुरुणा महीधरेण (यजुः० १०। १९) अत्र मन्त्रे त्रिविक्रमावतारस्य कल्पना कृता, यन्न सम्भवति सर्वव्यापकस्य जगदीश्वरस्य अवतारानावश्यकत्वाद् असम्भवाच्च। अत्र ऋषेरर्थ एव गरीयान्।

पृ० १५२९, पं० १५—यदाह—"प्रतिष्ठार्हाः पितरस्ते बर्हिष्येषु प्रकृष्टेषु निधिषु उत्तम-वस्तुस्थापनार्हेषु प्रियेषु प्रीत्युत्पादनेषु आसनेषु उपहूता निमन्त्रिताः सन्तः सीदन्तु सत्कारं प्राप्यास्मत्समीपं वारं वारमागच्छन्तु। त इहागत्यास्मत्प्रश्नान् शृण्वन्तु। श्रुत्वा तदुत्तराणि अधिब्रुवन्तु। एवं विद्यादानेन व्यवहारोपदेशेन सदास्मान् रक्षन्तु' इति दयानन्दकृतोऽर्थो विडम्बनामात्रम्, वेदाक्षरबाह्यत्वात्। किञ्चैवं व्यवहारस्तु लोकसिद्ध एव। तत्प्रतिपादने लोकसिद्धानुवादकत्वादप्रामाण्यमेव स्यान्मन्त्राणाम्।"

पारिजातकार का उक्त कथन गहन चिन्तन का अभाव सूचित कर रहा है। सोमवल्ली आदि के निष्पादित रस का 'भजन्ते' क्रिया के साथ अन्वय करने पर कर्म विवक्षित होने से 'रस का प्राशन सेवते हैं' यह अर्थ ही सुसङ्गत है। महर्षि ने हिन्दी भाषा में विशेष अर्थ का अभ्यूहन किया है कि विद्वान् स्वधा अर्थात् अमृतोपदेश से पुत्र की भावना के साथ विद्यादान करते हैं। जब स्वधा का अर्थ अन्न के साथ रस का सेवन है तब रस का प्राशन, तथा जब केवल रस हो तो पान का अन्वय होगा; क्योंकि अशना (भूख) से उदन्या (प्यास) भिन्न होती है। आपके गुरु महीधर ने (यजुः १० । १९) मन्त्र में त्रिविक्रमावतार की कल्पना कर डाली है, जो कि सर्वव्यापक परमेश्वर का अवतार अनावश्यक व असम्भव है। यहाँ ऋषि का अर्थ ही श्रेष्ठ है।

पृ १५२९, पं० १५—"उपहूताः पितरः" इस मन्त्र का अर्थ स्वामी दयानन्द ने किया है—'उन पितरों को हम लोग निमन्त्रण देते हैं कि वे हमारे समीप आकर, उत्तम आसनों पर बैठकर, जो कि बहुमूल्य और देखने में प्रिय हों, हम को उपदेश करें। जब वे पितर आवें, तो सब लोग इनका इस प्रकार से सम्मान करें कि आप आइये, उत्तम आसन पर बैठिये, यहाँ विद्या की बातें और प्रश्न सुनिये, इन प्रश्नों के उत्तर दीजिये और मनुष्यों को ज्ञान देकर उनकी रक्षा कीजिये।' किन्तु यह सारा अर्थ विडम्बना मात्र है; क्योंकि वह वेदाक्षरबाह्य है। इस तरह का व्यवहार तो लोकसिद्ध ही है, तब उसमें मौलिकता क्या है? अतः यह अप्रमाण है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्याद्यपि 'कणे हत्य खण्डयिष्यामि' इति प्रतिज्ञानिर्वाहाय क्वचिन्निर्मूलम्, क्वचिद् वेदबाह्यम्, क्वचिदकिञ्चित्करम्, क्वचिदनर्गलमित्यादिप्रयोगैः प्रातिवादं कर्तुं प्रवर्तते, प्रतिवादे किमपि तत्त्वं भवेन्न वा। इहापि तथैव।

अथ च महर्षेर्गुरुतरार्थसाधने वक्तव्यमदः। ये सोममर्हन्ति अर्थात् सोमरसप्रस्तुति-पुरःसरं सत्कर्तव्यास्ते प्रतिष्ठार्हा एव। प्रियेषु इति 'प्रीञ् तर्पणे कान्तौ च' इत्यस्माद् धातोः 'इगुपधज्ञाप्रीकिरः कः'(अष्टा० ३।१।१३५) इति कप्रत्यये सिद्धे प्रीणाति कामयते आनन्द-यतीति वा। एवमासनं वस्तुतः प्रीतिकारकं भवत्येव, नात्र काचित् संशीतिः। बर्हिषि वृद्धौ साधु यति सिद्धे शब्दे बर्हिष्येषु वृद्धेषु उत्तमेषु इत्यर्थः साधीयानेव।

पृ० १५२९, पं० १९—"शास्त्रैकसमधिगम्य पितृदेवब्रह्मणामनधिगतानां गन्तृत्वेनैव वेदानां प्रामाण्यसम्भवात्।" इति वचनमपि शास्त्ररहस्यानधिगन्तृत्वमेव। प्रामाण्येऽनधिगतार्थ-गन्तृत्वं प्रथमखण्डे परीक्षितम्, एतदसल्लक्षणं तत्रैव द्रष्टव्यम्। भूतो पित्रादिगुरुभ्यो ज्ञातानां विषयाणां पुष्टौ यदि वेदप्रामाण्यमधिगम्येत। किन्तदैतदप्रामाण्यं स्यात्? कदापि नैव।

पृ०१५३०,पं०१—यच्चाह—"हविषां निधित्वं तु सम्भवति, न त्वासनानां निधिभूतत्वं न वा तेषां विशेषतः प्रीत्युत्पादकत्वम्" इति, तन्न मनीषामनुमन्यते, लोकप्रचलितस्य निधि-

---

उक्त सारा आक्षेप 'तलछट खण्डन' करने की प्रतिज्ञा के असफल निर्वाहार्थ कहीं पर निर्मूल, कहीं वेदबाह्य, कहीं अकिञ्चित्कर, कहीं अनर्गल इत्यादि प्रयोगों से प्रतिवाद करने के लिये ये प्रवृत्त होते हैं, प्रतिवाद में सार हो या न हो। यहाँ पर भी वैसा ही किया है।

महर्षि के गुरुतर अर्थ के साधन में हमे यह कहना है कि जो सोमरस प्रस्तुति पुरस्सर सम्मान के योग्य हैं, वे प्रतिष्ठा के योग्य हैं। प्रिय शब्द 'प्रीञ्' तर्पण और कान्त्यर्थक धातु से सिद्ध है। इस प्रकार आसन प्रीतिकारक होता है। 'बर्हिः' से यत् प्रत्यय करके 'बर्हिष्य अर्थात उत्तम—यह अर्थ सिद्ध है।

पृ० १५२९, पं० १९—"वेदों का प्रामाण्य तो तभी हो सकता है, जब कि उनमें एकमात्र शास्त्र के ही द्वारा जिनका ज्ञान होता है, ऐसे धर्म, पितृगण, देवगण, ब्रह्म आदि लौकिक प्रमाणों से अज्ञात पदार्थों का ज्ञान कराया जाय।" यह सब बालालाप है; क्योंकि आदि सृष्टि में सभी पदार्थ अज्ञात थे, उनका वेद से ज्ञान हुआ। तो अब लौकिक ग्रन्थ या अनुभवी पुरुषों से धर्म का ज्ञान हो जाये, जो कि वेदानुकूल हो, तो इससे शास्त्र का अप्रामाण्य तो हो नहीं सकता। जहाँ तक 'अनधिगताधिगन्तृत्वं ज्ञानम्' इस परिभाषा का प्रश्न है, उसका समाधान हम पूर्व खण्ड में कर चुके हैं।

पृ० १५३०, पं० १—"हवि को तो निधि माना जा सकता है, किन्तु आसन न तो निधि है और न प्रीतिकारक ही।" पर पारिजातकार के इस कथन को बुद्धि की सहमति नहीं मिल रही है;

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शब्दार्थस्य वेदशिरसि मण्डनानौचित्यात्। निधिर्हि नितरां दधाति पोषयत्यनेन। निधीयन्ते पदार्था यस्मिन् सः। 'धि धारणे' (त० प० अ०) अस्मात् 'सम्पदादिभ्यः' (वा० ३।३।१०८) इति क्विपि आगमशास्त्रस्यानित्यत्वान्न तुक्। अथवा निपूर्वकाद् धातोः 'कर्मण्यधिकरणे च' (अष्टा० ३।३।९३) सूत्रेण किः। 'निधिर्ना शेवधिः' इत्यमरः। 'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि' इत्यनेन विद्याऽपि निधिः। व्युत्पत्त्या आसनमपि, तदपि विदुषः पितॄन् नितरां दधाति।

पृ० १५३०, पं० २—"न वा तेषां निमन्त्रणं प्रदीयते, तेषामेव गृहस्वामित्वात्। किञ्च शिक्षार्थिनः प्रतिदिनं यदा कदा वा गुरूनाचार्यान् वोपगच्छन्ति। न तु तान् विद्यादानव्यवहार-शिक्षणाय प्रतिदिनमाह्वयन्ति।" इति सर्वं बालालपितामिव वयोवृद्धेनानेन सम्मान्येन।

नायं वनेचरो दण्डी बालशिष्टाचारशिक्षणपद्धत्या अभिज्ञातो। कमण्डलुभाण्ड-मण्डितोद्दण्डदण्डिनां मण्डले न भवेन्नाम स्थविरं वीक्ष्योत्थानामन्त्रणादिशिष्टसरणिः, परमस्माकं गृहमेधिनामियमनिवार्या। नैत्यिकगृहकृत्येऽपि यज्ञादिकाले पूर्वत आसनेषु स्थिताः पुत्रस्नुषादयः शिष्टाचारानुबन्धेन पश्चादुपस्थितान् पित्रादीन् आसनादि मुक्त्वोत्थाय चामन्त्रयन्ति विनिवेशयन्ति चेति दिवानिशं प्रतिनिशान्ते द्रष्टुमर्हमभिवादनपुरस्सरम्।

क्योंकि लोकप्रचलित निधि शब्द का अर्थ आदि का ज्ञान वेद पर नहीं लादा जा सकता है। जिस के द्वारा नितरां पोषण हो तथा जिस में पदार्थ रखे जावें। इस प्रकार पृथिवी, कोषागार, विद्या आदि निधि कहलाते हैं। निधि और शेवधि पर्यायवाची हैं। 'विद्या ह वै ब्राह्मणमाजगाम०' में विद्या भी निधि सिद्ध है। आतिथ्य-प्रकरण में विद्वान् पिता के बिठाने के लिये वेद में निधि शब्द का प्रयोग है।

पृ० १५३०—आक्षेप—"उन जीवित पितरों को निमन्त्रण भी नहीं किया जा सकता; क्योंकि वे तो घर के समीप ही हैं। दूसरे शिक्षार्थी प्रतिदिन गुरु वा आचार्यों के पास जाते हैं, न कि विद्यादान व्यवहारशिक्षण के लिये बुलाते हैं।"

समाधान—वृद्ध होकर भी इनका यह सब बालभाषित है। यह बेचारा दण्डी बालशिक्षण पद्धति का भी अभिज्ञाता नहीं है। कमण्डलु-भाण्ड-मण्डित उद् (ऊर्ध्व) दण्ड दण्डियों के मण्डल में वृद्ध को देखकर उठने और आमन्त्रण करने की आदिष्ट पद्धति चाहे प्रचलित न हो, पर हम गृहस्थियों को तो यह पद्धति अनिवार्य है। नैत्यिक गृहकृत्य में भी यज्ञादिकाल में पहले से समय पर आसनों पर स्थित पुत्र, वधुएँ आदि शिष्टाचार के अनुबन्ध से बाद में आये हुए पिता आदि को, आसनों को छोड़ उठकर सादर आमन्त्रित करते हैं। रात-दिन ये या रात के बाद प्रति प्रभात में देखने को उत्सुक हो आमन्त्रित करते तथा सत्कारपूर्वक बिठाते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्चाहात्र—"किञ्चैवम्, व्यवहारस्तु लोकसिद्ध एव। तत्प्रतिपादने लोकसिद्धानुवादकत्वादप्रामाण्यं स्यात्" इति तु अबुधजनप्रलाप इव, सर्वव्यवहारस्य वेदशास्त्रादेवादौ प्रसिद्धत्वात् प्रवर्तितत्वाच्च। भारतीयपरम्परावेक्षितिर्वेदं सर्वविद्यानिधानं मनुते। यथा—

'भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिध्यति।'

न किमपीह कर्तव्यं लोके यन्न वेदे।

'सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।'
'अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्ति वाम्॥'

इत्यादीनि अगणितानि प्रमाणानीह विषये।

पृ० १५३०, अनु० १—अयं यो हिन्दीकारो महीधरस्यापि भाष्यमविकलं न कलं चिनोति तथा स्वीयमेकेष्टकाकुटीरं पृथगेव रचयति, यः—" (इन कुशाओं द्वारा निर्मित गृहों में बैठकर) हमारी दी गयी हवि को स्वीकार कीजिये।" इह कोष्ठान्तर्गतभागः कस्यानुवादः?

यह कहना कि—"ऐसा व्यवहार तो लोक से सिद्ध है, उसके प्रतिपादन करने में शास्त्र द्वारा लोकसिद्ध का अनुवाद करने से तो शास्त्र का अप्रामाण्य होगा।" मूर्खजन के प्रलाप के समान ही समझना चाहिये; क्योंकि वेद-शास्त्र तो सृष्टि के आदि में मिला था, उससे ही लोक ने यह शिष्टाचार सीखा तब प्रचलित हुआ। भारतीय पारम्परिक दृष्टि तो वेद को सब विद्याओं का निधान मानती है।

देखिये मनु को—'भूत, वर्तमान और भविष्यत् का समस्त व्यवहार वेद से प्रसिद्ध होता है।' कोई कर्तव्य ऐसा लोक में नहीं है, जो वेद में न हो। देखिये—

'संग चलना, सम्यक् बोलना, मनों में समान सोचना, पिता के व्रत के अनुकूल पुत्र हो, माता से उस का मन मिला हुआ हो, पत्नी पति के लिये मधुमती वाणी बोले' इत्यादि अगणित प्रमाण इस विषय पर हैं।

पृ० १५३०, अनु० १—यह जो हिन्दीकार है, वह महीधर के भी भाष्य को ठीक नहीं समझ रहा है, जो यह हिन्दी में लिखता है कि—" (इन कुशाओं द्वारा निर्मित गृहों में बैठकर) हमारी दी गयी हवि को स्वीकार कीजिये।" यहाँ कोष्ठान्तर्गत भाग किस का अनुवाद है?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५३०, पं० ११—यदुच्यते—"व्यवहारे श्राद्धेषु दर्भेषु पितृपिण्डानि निधीयन्ते। तादृशं स्पष्टं व्यवहाररूढमर्थमपहाय यथाकथञ्चिद् जीवत्पित्रादिपरं मन्त्रव्याख्यानमव्यापारेषु व्यापारमात्रम्।" इत्यपि सर्वं कल्पनामात्रम्, अयथार्थत्वात्।

पौर्वापर्योक्तिविस्मरणशील! सम्प्रत्येवाह यत्—"व्यवहारस्तु लोकसिद्ध एव, तत्प्रतिपादने लोकसिद्धानुवादकत्वादप्रामाण्यमेव स्यान् मन्त्राणाम्" (पृ० १५२९, पं० १८) तत् कथमिह व्यवहारे सिद्धं पिण्डदानं वेदप्रतिपादितं स्यात्? भवन्मते व्यवहारतोऽसिद्धे एव प्रामाण्यम्। अनेनाऽपि पितॄणामागमनम्, प्रतिसदः स्थानं प्रति कुशे च, पुनर्भक्षणं जीवतामेव सम्भवम्।

अथापि दुर्जनतोषन्यायेन मन्येताऽपि मृतानाम्। कल्प्यताम्, ते आगताः, कुशे स्थिताः, तदा कुश एव पिण्डदानं कृतं भवता। तदा तेषां दर्शनाभावे किं न तदुपरि एव पिण्डाधान-सम्भवः? तत्तेषां पृष्ठेऽपि सम्भवति, यतो हि न मुखस्थानं ज्ञातम्। अत्र भवतां कुकल्पनया दिव्यशरीरेण ते स्थिताः, न किं तर्हि तत् पञ्चभूत-निर्मितम्? नैवं चेत्, दिव्यं भौतिकं पिण्डं कथङ्कारमश्नीयात्? यदि दिव्यं न भौतिकं काल्पनिकमेव तदा भौतिकपिण्डस्याऽपि भावनात्मककाल्पनिकमभौतिकमेव तानि दिव्यानि शरीराणि ग्रहीष्यन्ते, तदा कल्पनयैव काल्पनिकदेहवन्तोऽपि कथन्न तर्पिताः स्युः? काऽवश्यकता पिण्डदानस्य?

पृ० १५३०, पं० ११—यह कहना कि—"व्यवहार में श्राद्ध में पितृपिण्डों को दर्भों पर रखते हैं। ऐसे स्पष्ट प्रचलित रूढ्यर्थ को छोड़कर जैसे-तैसे जीवित पित्रादिपरक मन्त्र का व्याख्यान करना अव्यापारमात्र है।" भी कल्पनामात्र है, क्योंकि इस में वास्तविक अर्थ नहीं है।

हे पौर्वापर्यकथनविस्मरणशील! अभी-अभी तो आपने ऊपर १५२९ पृष्ठ की १८वीं पंक्ति में कहा है कि "व्यवहार में सिद्ध वेदप्रतिपादित नहीं किया जाता"। फिर यहाँ क्योंकर व्यवहारसिद्ध पिण्डदान कहकर इस में वेदप्रमाण कहा जा रहा है? आपके मत से व्यवहार से असिद्ध में ही वेद का प्रामाण्य होगा। इससे भी पितरों का आगमन, प्रति सभा व यज्ञ तथा कुश पर बैठना, फिर खाना—यह सब जीवित पितरों से ही सम्भव है।

अन्यथा चलो, दुर्जनतोषन्याय से मृतकों का माने लेते हैं और कल्पना भी कर लीजिए कि वे आ गये, कुशासन पर बैठ गये, तब आपके द्वारा कुश पर ही पिण्डदान भी कर दिया गया। जब वे दिखाई तो देंगे नहीं कि वे कुश पर कहाँ पर बैठे, तो पिण्ड तो फिर उन्हीं के ऊपर रख दिया जायेगा। वह उनकी पीठ पर भी रखा जा सकता है। आपकी इस कल्पना से तो वे दिव्यशक्ति के होंगे, तो यह तो बताइये कि उनका वह शरीर पञ्चभूतनिर्मित होगा? यदि नहीं तो दिव्यकल्पनानिर्मित मुख इस भौतिक पिण्ड को कैसे खायेगा? जब कल्पनाजन्य है तो कल्पनाजन्य पिण्ड भी ठहरेगा, फिर इस भौतिक पिण्डदान की आवश्यकता भी क्या रहेगी?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ननु वस्तुतस्तु ते मृता ह्यस्माकं श्राद्धभावनामेव सेवन्ते न तु भौतिकमन्नादिकमित्येव स्वीकर्तव्यमिति चेन्न, मृतानां बाह्येन्द्रियाभावे शब्दादीनामग्राह्यत्वात् शब्दादिप्रकटित-श्राद्धभावनाया अपि ग्रहणाऽसम्भवात्। न च हृदयस्थश्राद्धभावनामेवेन्द्रियाभावे ग्रहीष्यतीति वाच्यम्, पितॄणां हृदयस्थत्वाभावे तदग्रहणात्। जीवितास्तु पितर आगच्छन्ति, ब्रुवन्ति, पश्यन्ति, गृह्णन्ति, अश्नन्ति आशिषश्चापि ददते।

प्रश्नः—तदा किं भवतां मतेन अहरहः श्राद्धं मासिकमाश्विनमासे वार्षिकमपि श्राद्धं श्राद्धकर्मणा ब्राह्मणादिविदुषां मान्यानां च भोजनं दक्षिणादानादिकम्, मृतपितॄणां स्मृतौ धर्मशालापाठशालागुरुकुलादिनिर्माणं समस्तमुपकृतिकर्तव्यादि अकर्तव्यमेव।

समा०—प्रियवर! महर्षिदयानन्देन मृतपितॄणां परम्परागतश्राद्धप्रक्रियाया अकर्तव्यत्वमत एव प्रतिषिध्यते यत् ते तन्न प्राप्नुवन्ति असान्निध्यात्, जन्मान्तरे कदाचित् सन्निधावपि अज्ञातृत्वाद् वा। स्वपितॄणां स्मृतौ भरणतिथेः स्मृतिकारणत्वाच्चेत् तदा अन्यथा परोपकारकृत्यानि विदुषां विद्यार्थिनां वा पोषणं वेदाश्रयशालादीनां स्थापनं तु न महर्षिणा प्रतिषिध्यते।

यदि हम यह कहें कि वास्तव में तो वे मर चुके हैं तो वे हमारी श्राद्ध भावना का ही सेवन करते हैं, जो पिण्डदान के समय रहती है, भौतिक अन्नादि ग्रहण नहीं करते, तब भी ठीक नहीं; क्योंकि मृतकों की श्रवणादि बाह्य इन्द्रियों के अभाव में शब्दादि की अग्राह्यता होने से तन्निहित भावना का भी ग्रहण नहीं होगा। शब्दों में अनाश्रित मनःस्थित श्राद्धभावना का ही ग्रहण हो जायेगा, ऐसा कथन भी तर्कसंगत नहीं है; क्योंकि हृदय में पितर उपस्थित नहीं हैं, तो ग्रहण सम्भव ही नहीं। जीवित पितर तो आते भी हैं, बोलते भी हैं, देखते, खाते और आशीर्वाद भी देते हैं।

प्रश्न—तो आपके मत से प्रात्यहिक, मासिक पितृयज्ञ का वार्षिक श्राद्ध भी तथा श्राद्धकर्म से ब्राह्मणादि विद्वानों, मान्यों को भोजन, दक्षिणा, दानादि देना, मृतों की स्मृति में धर्मशाला, पाठशाला, गुरुकुलादि निर्माण—ये समस्त कर्तव्य उपकार भी अकर्तव्य ठहरेंगे।

समाधान—प्रियवर! महर्षि दयानन्द ने मृत पितरों को पितृयज्ञ आदि में भोजन पहुँचाने की विधि को अतर्कसम्मत व अवैज्ञानिक बताया कि वे पास न होने से प्राप्त नहीं कर सकते। जन्मान्तर में कदाचित् शरीरधारी होने से पास होकर भी न जानकारी के कारण अन्नादिदान सम्भव नहीं। अपने पितरों की भरण-तिथि की स्मृति के कारण परोपकार कर्तव्य, विद्वान् व ब्रह्मचारियों का पोषण वेद के आश्रयभूत शालाओं आदि के निर्माण का महर्षि ने निषेध नहीं किया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रश्नः—श्रूयते वर्षाकाले ऋषयो देवा पितरश्च मार्गाणां पङ्किलत्वाद् विचरणं प्रचारकार्यं वा स्थगितं कुर्वन्ति स्म। प्रावृट्कालानन्तरं च सर्वेऽपि इमे पितरः स्वाश्रयेभ्यः प्रस्थातुकामा अभूवन्। तदैव तेषामिदं श्राद्धं कर्म तर्पणं वाऽऽश्विनमासे कुर्वन्त आसन्। एष एकपक्षः श्राद्धाय विनिश्चित आसीत्, तदा किं तेषु दिवसेषु नेदं श्राद्धं करणीयम्?

समा०—एतेन तु जीवितानामेव पितॄणां श्राद्धमायातम्, नो काऽपि हानिः, प्रत्युत लाभ एव। भोजयन्तु तान् सत्कुर्वन्तु श्रद्धया। देवर्षिपितृतर्पणं कुर्वन्तु। परं साम्प्रतं ये ब्राह्मणादीन् प्राशयन्ति तत्र तु तेषां श्राद्धकर्मकर्तॄणामेष एवाशयो भवति यदस्माकं मृताः पितर एतच्छ्राद्ध-कृत्येन सन्तुष्टा भवन्ति। एतदज्ञानमपि नश्येत् तेषां च सन्तोषस्त्वविदित एवाप्रमाणितश्च। परमस्माकं तोषो देवर्षिपितृतर्पणमेव भवतीत्येव सत्यम्। न वैतेन दानेन पुण्येन श्राद्धेन तर्पणेन गोदानादिना च मृतानां पितॄणां वैतरणीतरङ्गिणीसन्तरणमपि जायते। स्वानुष्ठितकर्माण्येव भवजन्मवैतरणीतरणाय तस्यां ब्रुडनाय चार्थात् पौनःपुन्यजन्ममृत्युकारणायालम्।

प्रश्नः—अत्र वेदव्याख्यायां यमराजादयः सङ्केतिता यत्र तत्र पुराणेषु भूधराकारशरीराः पितरो वर्णिताः।

प्रश्न—सुना जाता है कि वर्षा में ऋषि, देव और पितर मार्गों के अवरुद्ध होके पङ्किल होने से विचरण व प्रचारकार्य स्थगित कर देते थे। वर्षाकाल के अनन्तर ये सभी पितर प्रस्थानेच्छुक अपने आश्रयस्थानों को छोड़ देते थे। तभी इनका यह श्राद्धकर्म या तर्पण आश्विन मास में करते थे। यही एकमात्र समय श्राद्ध के लिये निश्चित था, तो क्या उन दिनों में यह श्राद्ध नहीं करना चाहिये?

समाधान—इससे तो जीवित पितरों का ही श्राद्ध सिद्ध हुआ, यह तो करना ही चाहिये। उनको श्राद्ध से भोजन कराना चाहिये व सत्कार करना चाहिये। देव, ऋषि, पितृतर्पण करना चाहिये। परन्तु आजकल जो ब्राह्मणादि को खिलाते हैं, वहाँ तो श्राद्धकर्त्ता का आशय अपने पितरों के लिये ब्राह्मणों के माध्यम से अन्नादि पहुँचाना उद्दिष्ट है। अतः यह अज्ञान नष्ट होना चाहिये कि उन का सन्तोष अविदित और अप्रमाणित है, परन्तु हमारा तोष हो जाता है। न इस गोदानादि के द्वारा वैतरणी नदी से उन मृत पितरों को पार किया जा सकता है। अपने उत्तम कर्म ही संसार के जन्मपरम्परारूपी वैतरणी नदी को पार करने के लिये अभीष्ट हैं या विकृत कर्म बार-बार जन्म-मरण के लिये सक्षम हैं।

प्रश्न—यहाँ वेदव्याख्या में सङ्केतित यमराज आदि का वर्णन यत्र तत्र पुराणों आदि से उपलब्ध है कि पितर भूधराकारशरीरवाले भी होते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—नहि वेदे यमराजो धर्मराजो वा पुराणकल्पनानुरूपः। स तु परमात्मा एव। यमशब्दार्था अचिरमेव व्याहृताः। गिरिसंकाशानि यमराजशरीराणि त्वसम्भावितानि, श्रुत्यनुदितत्वात्।

अग्निष्वात्ता हि नाम पितरः—अग्निः परमेश्वरः, सुष्ठुतया आत्तो गृहीतो यैस्ते, यद्वा अग्नेर्गुणज्ञानाद् भू-जल-व्योम-यान-यन्त्ररचनादिका पदार्थविद्या सम्यगात्ता यैस्ते। न चैते कल्पिता एककुशे स्थाप्यमाना अदृश्या अग्निष्वात्ताः।

पृ० १५३०, अनु० २—"हे पूर्वोक्ताः पितरः, अस्मत्सन्निधौ प्रीत्या आगच्छत' इति कथनम्, तदसङ्गतमेव, व्यवहारे बाला युवानो वा पितृपितामहादीनां सन्निधौ स्वयं गच्छन्ति, न तु तान् स्वसन्निधावाकारयन्ति। शोभना प्रकृष्टा नीतिर्येषामिति त्वपव्याख्यानमेव, प्रपूर्वस्य नयतेर्निर्माणार्थत्वप्रसिद्धेः। न च लौकिकाः पितृपितामहादयः प्रतिगृहं भ्राम्यन्ति, न वा तत्सम्भवः।"

इत्यपि समग्रं क्षपणकस्यास्य व्यवहारानभिज्ञत्वमेवावगमयति। यतोहि शास्त्रस्य विधानमस्ति—'पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा', 'ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा' इति अनुमन्वादेशं केषुचिद् वनस्थेषु संन्यासिषु वा जातेषु न गृह एव सर्वे उप-

---

समाधान—वेद में यमराज या धर्मराज पुराणकल्पनानुसारी नहीं हैं। यम शब्द के अर्थ अभी हमने ऊपर कहे हैं। पर्वतसदृश यमराज-शरीर तो असम्भव है, न वेद में कहे गये हैं।

अग्निष्वात्त नामक पितर—अग्नि अर्थात् परमेश्वर का जिन्होंने अच्छे प्रकार ग्रहण किया है, वे अथवा अग्नि के गुणज्ञान से भू, जल, व्योम, यान-यन्त्र रखना आदि पदार्थविद्या सम्यक् प्रकार से जिन्हें आती है, वे पितर 'अग्निष्वात्त' कहलाते हैं। ये कल्पित एक कुश पर बैठाए जानेवाले अदृश्य पितर कोई नहीं हैं।

पृ० १५३०, अनु० २—"हे पूर्वोक्त पितरों, हमारे पास प्रीति से आओ' स्वामी जी का यह कहना असङ्गत है। व्यवहार में देखा जाता है कि बालक, युवा पिता-पितामह आदि के पास में स्वयं जाते हैं, उनको अपने पास नहीं बुलाते। प्रणीति का अर्थ निर्माण होता है, प्रकृष्ट नीति अर्थ करना अपव्याख्यान है। लौकिक जीवित पिता-पितामहादि प्रति गृह में भ्रमण नहीं करते और न यह सम्भव है।"

पारिजातकार क्षपणक का यह कथन व्यवहार की अनभिज्ञता ही दिखा रहा है; क्योंकि शास्त्र का विधान है कि 'पुत्रों पर भार्या को छोड़कर वन चला जावे अथवा साथ लेकर भी', 'ब्रह्मचारी, गृहस्थ, वानप्रस्थ और यति अर्थात् संन्यासी' इस मनु के आदेश के अनुसार किन्हीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

लप्स्यन्ते। अत एव 'उपहूता०' इति मन्त्रे ऋषिणा आमन्त्रिताः कृताः। एतेन ध्वन्यते यत् पूर्वमामन्त्रयितुं स्वस्थविरान् पुत्रादय उपयास्यन्ति, तदनु आमन्त्रिता आकारिताः सन्तः पितरो गृहमायास्यन्ति ते गृहाद् बहिर्वसन्तः। तदैतस्य विमर्शनमबोधमेवाश्रयते।

न वा सुप्रपूर्वकनीतेर्निर्माणमेवार्थः प्रामाणिकः। महर्षेरर्थस्तु अतितरां शोभनः। तव गुरुणा महीधरेणाऽपि (यजुः २१।५) इति मन्त्रे 'शोभना प्रणीतिः प्रणयनं भजनं यस्यास्ताम्' यजु:० ११।४९ मन्त्रे—'प्रणीतौ प्रणयने अभ्यनुज्ञायां परिचर्यायाम्' इत्यर्थो यजु:० ७।३५ मन्त्रे च—'प्रणीती, प्रणीत्या प्रणयनेनानुज्ञया' इत्यर्थो विहितो न तु निर्माणमिति तवोन्मत्तप्रलपितमेव।

पृ० १५३१, पं० १—यच्चाह—"उपदेशार्थमपि प्रतिगृहभ्रमणं न युक्तम्। तथात्व उपदेशस्य लघुत्वापत्त्या गौरवहानिप्रसङ्गात्। न च प्रतिगृहमुपदेशका भोजनं कुर्वन्ति।" इत्यपि अल्पाधीतिफलम्। विदुषां वानप्रस्थानां संन्यासिनां सर्वभूतानुकम्पकत्वात् 'दाता नित्यमनादाता सर्वभूतानुकम्पकः' इति प्रमाण्याद् दातृत्वाद् विद्यादिदानदातृत्वात् प्रतिगृहभ्रमणमपि फलितम्।

न च 'अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत्' इति विधानेन केवलमुदरपूर्त्यर्थं भिक्षार्थमेवाटेद् इति वाच्यम्, यतो हि देहे शीर्षस्येवाश्रमेषु संन्यासाश्रमस्यावश्यकता विद्यते,

---

के वनस्थ या संन्यासी हो जाने पर वे घर में तो उपलब्ध होंगे नहीं, अत एव 'उपहूता०' इस मन्त्र में ऋषि ने आमन्त्रित अर्थ लिखा है। इस से ध्वनित है कि पहले पितरों को आमन्त्रित करने के लिये पुत्र आदि उनके पास जायेंगे फिर वे घर आयेंगे; क्योंकि वे घर से बाहर रहते हैं। इस प्रकार इस लेखक का चिन्तन अज्ञानमय है।

तथा सु या प्र पूर्वक 'नी' धातु का निर्माण अर्थ ही करना भी प्रामाणिक नहीं है। महर्षिकृत अर्थ तो अतितरां शोभन है। तुम्हारे वाममार्गी गुरु महीधर ने (यजु:० २१।५) इस मन्त्र में शोभन सेवन अर्थ किया है तथा ११।४९ मन्त्र में प्रणीति का अर्थ अभ्यनुज्ञा अर्थात् परिचर्या किया है, निर्माण अर्थ नहीं किया। इसलिये 'निर्माण' ही अर्थ होगा, यह कहना बकवास है।

पृ० १५३१, पं० १—"उपदेश के लिये भी प्रतिगृह भ्रमण ठीक नहीं है। वैसा होने पर उपदेश की लघुता से गौरवहानि होगी। न प्रतिघर में उपदेशक भोजन ही करते हैं।" यह कथन भी अल्पश्रुत होने का फल है। विद्वान् वानप्रस्थ और संन्यासी तो सब प्राणियों पर कृपा करने वाले होते हैं। 'नित्यदाता पर अग्रहीता सर्वप्राणियों पर कृपा करनेवाला' प्रमाण भी है। सर्वस्वत्यागी तो विद्यादान करता घूमेगा, अतः प्रतिघर जाना यह अर्थ प्रतिफलित होता है।

'अनग्नि और अनिकेत होकर अन्न के लिये ग्राम का आश्रय ले' इस विधान से 'केवल उदरपूर्ति के लिये ही भिक्षार्थ भ्रमण करे' यह भी नहीं कहना चाहिये; क्योंकि देह में शिर के समान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यतस्तेन विना कदाऽपि विद्याधर्मयोरुन्नतिर्भवितुं न शक्यते। यतोऽन्याश्रमिभिर्यथाक्रमं विद्याग्रहणगृहकृत्यसम्पादनतपश्चरणादिप्रसङ्गादतो वाल्पः समयो लभ्यते। पक्षपातराहित्येन वर्तनमन्याश्रमिभिर्दुष्करम्। यथा संन्यासी सर्वतो मुक्तः सन् जगदुपकारं तनुते, तथान्याश्रमिणः कर्तुं न समर्थाः। यतः संन्यासिनः सत्यविद्यया पदार्थविज्ञानोन्नतये यावन्तमवकाशं लभन्ते तावान्नन्याश्रमिभिर्न लभ्यते। (स० प्र० ५ समुल्लासः)

भोजनार्थं ग्रामं गृहं द्वारं वा गतवतां न गौरवहानिः, न तथा कर्हिचिदपि कर्तव्यत्वेन विनिमये वाऽप्युपदेशेन गौरवहानिर्भविष्यति तेषां पितृपितामहादीनाम्। न चैवमुपदेशस्य गौरवं क्षयमभ्येति, प्रत्युत गौरवं वर्धत एव। यच्च 'रयिं सर्ववीरम्' तत्तु विद्याधनमेव पितृभ्यः प्राप्तव्यमभिलषितव्यमेव वरं न तु इदम्।

पृ० १५३१, अनु १—यच्च—"ये अग्निष्वात्ता ये अग्निस्वात्ताः खादिता आस्वादिता ये चानास्वादिताः श्मशानक्रियामप्राप्ताः" इति कुव्याख्यानेन यवनपद्धतिः कुणपनिखातरूपा परिपोष्यते, यच्च नानुमतं शास्त्रेण। महर्षिकृतार्थ एव वेदगौरवरक्षकः। स्वर्गस्य च याऽन्यलोकगता कल्पना सा तु भ्रान्तिरेव, स्वर्गस्य सुखवाचकत्वात्। न च वेदशब्दनिरुक्त्योपलब्धोऽर्थो गौणः कश्चित्। ततो 'दिव' इत्यस्य सर्वविद्याप्रकाश एवार्थः। शिष्टं समाहितं सन्न पिष्टपेषणायते।

आश्रमों में संन्यास आश्रम की आवश्यकता है, इसके बिना विद्या और धर्म की उन्नति नहीं हो सकती। अन्य आश्रम तो क्रमशः विद्याग्रहण, ग्रहकृत्यसम्पादन तथा तपश्चर्या आदि में लगे होंगे, उन पर अवकाश बहुत कम मिलता है। पक्षपात छोड़कर वर्तना दूसरे आश्रमों को दुष्कर है, जैसा संन्यासी सर्वतोमुक्त होकर जगत् का उपकार करता है, वैसा अन्य आश्रमी नहीं कर सकता (सं० प्र० ५ समुल्लास)।

उन पिता, प्रपितामहादि के भोजनार्थ प्रति घर द्वार जाने पर गौरव हानि नहीं होगी और न कर्तव्य उपदेश करने तथा उसके विनिमय में भोजन ग्रहण करने में गौरवहानि होगी, बल्कि गौरववृद्धि होगी। विद्याधन तो इन पितरों से लेना ही चाहिये।

पृ० १५३१, अनु० १—करपात्री जी द्वारा "जो अग्नि-संस्कार को प्राप्त या जिनका अग्नि-संस्कार नहीं हुआ है" यह व्याख्या करना तो मुर्दे गाढ़ने की यवनप्रथा जाग्रत करना मात्र है, यह अशास्त्रीय है। महर्षिकृत अर्थ वैज्ञानिक व वेदगौरववर्धक है। अन्यत्र स्वर्गलोक या अन्य लोक की कल्पना भ्रान्ति है, स्वर्ग का अर्थ सुख है। वेद शब्दों के निर्वचन द्वारा यौगिक पद्धति से उपलब्ध अर्थ गौण नहीं है। 'दिव' का अर्थ विद्याप्रकाश अत्युत्तम है। शिष्ट समाधान कर दिया गया, अतः पिष्टपेषण नहीं किया जा रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५३२, पं० १२—यदाह—"हे मनुष्या इति सम्बोधनम्, तत्तु न सङ्गतम्, सम्बोधकानां मनुष्यत्वाऽविशेषात्। यदीश्वरः सम्बोद्धाः, तदा यथा वयमृतुविद्यावतोऽर्थाद् यथासमयमुद्योगकारिणोऽग्निष्वात्ताः पितरः सन्ति तान् आह्वयामहे, तथैव युष्माभिरपि, तत्सेवनायाह्वानं नित्यं कार्यमिति त्वदुक्तिविरोधात्।" इति सर्वं तत्त्वाचिन्तनजन्यम्, मनुष्यैरपि मनुष्याणां सम्बोधनस्य युक्तत्वं प्रत्यक्षतः। ज्येष्ठा मनुष्याः कनिष्ठानत्र शिक्षयन्ति।

'परमेश्वरः (सम्बोद्धाः)' इत्यत्र कोष्ठान्तर्गतं त्वशुद्धम्। 'नाराशंसे' इति पदस्य तु 'नरैः प्रशस्येऽनुष्ठातव्ये कर्मणि' इत्येवार्थः। 'कुशलाः' इत्युत्प्रेक्षितस्तु 'ये च ते विप्राः' इत्येतेषां पदानां पाठे 'ये' इत्यस्य। अत्र 'नौः' इति पाठः प्रामादिकः। व्युत्पत्तिलभ्ये ऋष्यर्थे तु प्रमाणं निरुक्तम्—'येन नराः प्रशस्यन्ते स नाराशंसः' (९।९)। स मन्त्रोऽपि भवितुमर्हति।

पृ० १५३३ पं० १२—शङ्का—"स्वामिदयानन्देन समीपस्थानां जीवितानामेव पितॄणां श्राद्धमुक्तं पूर्वम्। अत्र ये दूरदेशे सन्ति यान् वयं न विद्मस्तेषामपि वर्णनं श्राद्धप्रकरणे कृतम्। तत्सङ्गमायेश्वरः प्रार्थ्यते तदा लोकान्तरगतानां मृतानामपि परमेश्वरः सङ्गमं विधास्यति।

पृ० १५३२, पं० १२—"स्वामी दयानन्द ने मनुष्यों को सम्बोधित किया है, यह उचित नहीं है; क्योंकि इस तरह से सम्बोध्य और सम्बोधक दोनों मनुष्य ही रहेंगे। यदि ईश्वर को सम्बोध्य माना जाये तो वह आपकी इस उक्ति के विरुद्ध पड़ेगा कि 'जैसे इस ऋतुविद्या के जानकार अर्थात् समय के अनुसार उद्योग करनेवाले अग्निष्वात्त पितरों को बुलाते हैं, उसी तरह तुम लोग भी उनके पास जाते और बुलाते रहो।" यह समस्त कथन बुद्धि से असङ्गत है, मनुष्य सम्बोध्य और सम्बोधक प्रत्यक्ष में भी देखे जाते हैं, उसका अपलाप नहीं हो सकता। यहाँ पर ज्येष्ठ कनिष्ठों को शिक्षा दे रहे हैं।

'सम्बोद्धाः' यह व्याकरण-दृष्टि से अपशब्द है। 'नरों के द्वारा आसमन्तात् शस्य अर्थात् प्रशंसनीय कर्म में जो लोग हैं, वे विप्र अर्थात् मेधावी'। 'जो' को स्पष्ट करने के लिये ऋषि ने 'कुशल' शब्द की उत्प्रेक्षा की है। आप कहते हैं कि "नाराशंसे सोमपीथमिति सन्निहितसम्बन्धस्य त्यागे कारणाभावात्"। पर आपके हिन्दीकर्ता का मस्तिष्क ही अनुपस्थित है, जो लिखता है—"नराशंस पद का समीप में विद्यमान सोमपीथ शब्द से सम्बन्ध जोड़ना ग़लत है।" 'नौः' शब्द अशुद्ध पढ़ा गया है। ऋष्यर्थ में प्रमाण है—'मनुष्य जहाँ प्रशंसित हों' (निरु० ९।९), अथवा मनुष्यों से प्रशंसनीय, वह मन्त्र भी हो सकता है।

पृ० १५३३, पं० १२—शङ्का—स्वामी दयानन्द ने समीपस्थ जीवित पितरों का श्राद्ध कहा है। यहाँ पर जो दूर देश में हैं, जिन्हें हम नहीं जानते, उनका वर्णन भी श्राद्धप्रकरण में किया है। उनकी सङ्गति के लिये ईश्वर से प्रार्थना की जा रही है। तो लोक-लोकान्तर गये मरे हुओं का भी सङ्गम परमेश्वर करेगा।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—श्रीमन् ! ऋषिरत्राप्याह—'यावन्तः परोक्षा विद्यमाना विद्वांसः सन्ति, तानस्मान् प्रापय'। परमेशप्रार्थना तु इयं तानज्ञातानपि प्रति अस्माकं श्रद्धा हृदि सदैव जागर्ति, ते च भवत्कृपया एव प्राप्ता भविष्यन्ति। मृतान् परमेश्वरस्तु जानीते परमदेहधारिणस्तान् सोऽस्माकं सन्निधौ कथं प्रापयितुमर्हति, अथवा वयमदृश्यत्वात् कथं परिचेष्यामस्तान्? कथं वा ते अन्नादिकं प्राप्तुं शक्नुयुः ?

यच्चाह—"विवाहाद्यवसरे श्रद्धया सत्क्रियते एव तदा निमन्त्रणपत्रेऽपि विवाहसमये भवतां श्राद्धमपि भविष्यतीति विज्ञापनीयम्।" इत्यपि स्वाबोधख्यापनमेवाऽस्य।

श्रीमन्नव्युत्पन्नमते ! नैव तथा क्रियते। तथा किं श्राद्धकर्माऽशुभं येनोपहास एषः। यद्यशुभं तदा भवद्भिस्तु विवाहे नान्दीमुखं श्राद्धं क्रियते कथम्? वस्तुतस्तु प्रधानेन कृत्येन व्यपदेशो भवति।

पृ० १५३३, पं० १६—यदुच्यतेऽनेन—"जीवतामेव श्राद्धं भवतीति सामाजिकानां रीत्या विवाहाद्यवसरेऽपि पितृपितामहादिसम्बन्धिनां श्रद्धया सत्कारो भवत्येव। तथा च तैर्निमन्त्रण-मेवं लेख्यं यत् पित्रादीनां श्राद्धमपि भविष्यति, तत्र भवद्भिरागन्तव्यम्।" इति समग्रमपि

समाधान—श्रीमन् ! ऋषि ने यह कहा है कि 'जितने परोक्ष विद्यमान विद्वान् हैं, उन्हें भी हमें प्राप्त कराइये'। परमेशप्रार्थना तो यह है कि उन अज्ञातों के प्रति भी हमारे हृदय में श्रद्धा सदैव जागती रहती है, वे आपकी कृपा से ही प्राप्त होंगे। मृतकों को परमेश्वर जानता तो है पर देह न धारण करनेवाले उन्हें वह हमारे पास कैसे प्राप्त करा सकता है, अथवा अदृश्य होने से हम कैसे पहचानेंगे तथा वे अन्नादि का सेवन कैसे कर सकेंगे।

यह कहना कि—"विवाहादि अवसर पर श्रद्धा से सत्कार किया जाता है, तब निमन्त्रणपत्र में 'विवाह के समय आपका श्राद्ध भी होगा' ऐसा विज्ञापन करना चाहिये।" यह सब अपना अज्ञान-प्रकाशन ही है।

हे अव्युत्पन्नमते ! यदि विज्ञापन नहीं किया जाता है तो स्यात् आप समझ रहे हैं कि विवाहसमय श्राद्ध शब्द का प्रयोग करना अशुभ होगा, इसीलिये आप ऐसा कहकर उपहास कर रहे हैं। यदि अशुभ है तो आप लोगों के द्वारा विवाहसमय में 'नान्दीमुख' श्राद्ध क्यों किया जाता है ? वस्तुतस्तु प्रधान से व्यपदेश होता है। विवाहकर्म मुख्य है, अतः गौण कर्म नहीं लिखे जाते।

पृ० १५३३, पं० १६—"विवाह के अवसर पर पिता-पितामह आदि का श्रद्धापूर्वक सत्कार किया जाता है तो 'श्राद्ध' शब्द का प्रयोग क्यों नहीं करते?" इनका यह लेख व्यवहारशब्दार्थ से अनभिज्ञता प्रकट करता है। जैसे स्वर्गप्राप्ति तो सर्वथा अलभ्य है, पर प्राणियों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्यवहारशब्दार्थानभिज्ञस्येव प्रलापः। यथा हि अलभ्यायां दिवङ्गतौ प्राणिनां सत्यामपि नहि तस्मिन् काले कश्चिद् व्यवहारकुशलः स्वकीयां हार्दिकीं प्रसन्नतां प्रकटयति। नाऽपि कश्चिद् भवच्छिष्य एवं वाचको भवत्समागमे यत्—'प्रभो ! चिरं भवतो विनाशो जातः'। इदमेव वक्ष्यति यत्—'भवतश्चिरमदर्शनं जातम्'। यद्यप्यमरकोशे उभयोरैकार्थ्यमेव। यथा—'विनाशः स्याददर्शनम्'। न वा भवान्नुच्चारितवान् स्वशिष्यां काञ्चिदपि यत्—'एकेनोपदेशेन तव प्रसवं करिष्यामि'। यद्यपि प्रसवार्थः प्रेरणेऽपि। न चापि विधुरशब्दस्य विकलार्थे सत्यपि कश्चिदेवमवोचत् कामपि स्त्रियम्—'यदद्य ते पतिः कथं विधुरो (विकलो) ऽस्ति ?" इति।

तथैव श्राद्धशब्दस्य श्रद्धायुक्तं कर्मैव। परं पौराणिककाले मृतकानभिलक्ष्यैतस्य श्राद्धशब्दस्य प्रचारोऽभूत्। अतोऽशिक्षितजनेषु तत्रैव रूढोऽयं शब्दो न व्युत्पत्तिलभ्यमर्थं तान् बोधयिष्यति। यथा च 'रामनाम सत्यमस्ति' इत्यपि मृतकयात्रातोऽतिरिक्ते विवाहाद्यवसरे भवन्तः प्रयुञ्जते पुराणगाः ? अथाऽपि 'प्रभुर्यत् करोति तत् सम्यगेव' इति न कस्यचिन् मृत्युवृत्तं श्रुत्वा भवन्तो ब्रुवन्ति।

पृ० १५३४, अनु० २—यदपाठीत्—"ये पितरोऽद्येहानीमध्ययनाध्यापने कर्मणि वर्तन्ते, ये पूर्वमधीत्य विद्वांसः सन्ति।' इति, तदपि तुच्छम्। तथात्वे त्वदीयाश्छात्रा अध्यापका एव

को प्राप्त हो जाने पर भी किसी के 'स्वर्गवास' हो जाने पर कोई भी हार्दिक प्रसन्नता प्रकट नहीं करता, अपितु दुःख और समवेदना प्रकट करता है। और आपके बहुत समय बाद मिलने पर आपका श्रद्धालु शिष्य यही कहता है कि—'हे प्रभो ! आपके चिरकाल तक अदर्शन ही रहे'। यह नहीं कहता कि—प्रभो ! आपका चिरकाल तक विनाश हो गया था'। जबकि अमरकोश में 'अदर्शन' और 'विनाश' पर्यायवाची हैं। और न आप ही अपनी शिष्या को यह कहते हैं कि—'मैं तुम्हारा एक ही उपदेश से प्रसव कर दूँगा'। जबकि 'प्रसव' और 'प्रेरण' एकार्थक हैं। और 'विधुर' शब्द के 'विकल' अर्थ होते हुए भी 'आज तुम्हारे पति विधुर हो गये हैं' ऐसा नहीं कहा जाता।

इसी प्रकार श्राद्ध शब्द का अर्थ श्रद्धायुक्त कर्म ही हैं, परन्तु पौराणिक काल में मृतकों को अभिलक्षित कर 'श्राद्ध' शब्द का प्रयोग प्रचार किया गया, अतः यौगिकार्थ गौण होता चला गया। जैसे 'राम नाम सत्य है' यह वाक्य आप पौराणिक लोग शुभ अर्थवाला होते हुए भी मृतक-यात्रा के अतिरिक्त विवाहादि अवसर पर अपने निमन्त्रण-पत्रों में नहीं छापते। ऐसे ही 'भगवान् जो करता है, वह अच्छा करता है' यह वाक्य आप किसी के घर समवेदना प्रकट करते समय प्रयुक्त नहीं करते।

पृ० १५३४, अनु० २—"जो पितर आज इस समय हमारे पास अध्ययन-अध्यापन कर्म में हैं, जो पहले पढ़कर विद्वान् हो गये हैं।' यह लिखना भी तुच्छ है। वैसा होने पर तुम्हारे शिष्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पितरः । एतेषामेव श्राद्धं त्वया कर्तव्यमित्यापतति । .....पार्थिवे रजसीत्यनेन भूगर्भविद्या कथं गृह्यते ? किं त्वदीये परमेश्वरे शब्ददारिद्र्यमेवास्ति ? येनान्यशब्दैरेवान्यार्थबोधः कार्यते ?"

इति समग्रमपि शङ्कनं नास्यापराधः, प्रज्ञाऽभावापराधत्वात् । इह 'पितरो अद्य' इत्यपपाठ एव । ईदृशी मांसलप्रज्ञा तु अद्भुतागारन्यासयोग्या । यैवमपि न विमृशति यत् 'अध्ययनाध्यापने कर्मणि वर्तन्ते' इत्यनेन 'स्वाध्यायकर्मणि केचन अन्याध्यापनरूपकर्मणि वर्तन्ते' इत्येवार्थः । न च वक्ताऽध्यापकः । पूर्वासः पूर्वे पूर्वं जाताः, उपरासः गृहस्थाश्रमासक्ति-जनककर्मभ्यो विरक्ता इति । उपपूर्वाद् 'रम्' धातोः 'अन्येष्वपि दृश्यते' (अष्टा० ३ । २ । १०१) इति 'ड'प्रत्यये सिध्यति बहुवचने ।

न चात्र 'ईयुः' इति पदस्य 'अधीत्य विद्वांसः सन्ति' इत्यर्थः कृतो महर्षिणा, यश्चोच्यते भवता । उ परासा ये विरक्ताः संन्यासिनस्त एवाधीत्य विद्वांसः सन्ति । यदि प्रभुर्निखिलमेवानन्तज्ञानं शब्दैरेवाभ्यदास्यत् तदा निखिला पृथिवी शब्दसम्पत्तिसम्बलितग्रन्थैरेवापूरयिष्यत, न वा जीवानां कृते गवेषणाविषयोऽवाशिष्यत, बौद्धिकपुरुषार्थोऽपि तदा नाऽपैक्षिष्यत । अतः

ही अध्यापक बन पितर हो जायेंगे, तो उनका भी तुम्हें श्राद्ध करना होगा । 'पार्थिवे रजसि' इस शब्द से 'पृथिवीसम्बन्धी भूगर्भविद्या' यह अर्थ भी कैसे कर लिया ? क्या तुम्हारे परमेश्वर पर शब्दों की दरिद्रता थी ? जो कि अन्य शब्दों के द्वारा अन्य अर्थ ग्रहण किये जाते हैं ?"

पारिजातकार का यह समग्र कथन इनका नहीं, इनकी बुद्धि का अपराध है । यहाँ पर 'पितरो अद्य' यह अपशब्द कर पढ़ा गया है । इसमें व्याकरणानभिज्ञता ही है । ऐसी मांसल बुद्धि तो अद्भुतालय में रखने योग्य थी, जो ऐसा भी नहीं सोच सकती कि अध्ययन और अध्यापन कर्म में हैं, इससे स्वाध्याय कर्म तथा अन्यों को अध्यापन कर्म में हैं । 'पूर्वासः' अर्थात् प्रथम जात तथा 'उपरासः' अर्थात् गृहस्थाश्रम में आसक्तिजनक कर्मों से विरक्त । 'उपरासः' शब्द उप पूर्वक 'रम्'धातु से 'ड' प्रत्यय करने पर बहुवचन में बनता है ।

यहाँ पर 'ईयुः' इस पद का 'पढ़कर विद्वान् होते हैं' यह अर्थ स्वामीजी ने नहीं किया है, जैसा कि आप कह रहे हैं । प्रत्युत 'संन्यासी लोग जो पढ़कर विद्वान् हुए हैं ' यह पूर्वासः का अर्थ है । यहाँ 'उ' पृथक् पद है 'परासः' पृथक् । यदि यौगिक पद्धति न अपना कर सम्पूर्ण अनन्त ज्ञान अभिधा शक्ति से ही वेदों में कहा जाता तो सारी पृथिवी पर भी वे पुस्तकें नहीं आ पातीं और फिर तो जीवों के बौद्धिक विकास के लिये भी कोई अवकाश नहीं रहता तथा बिना परिश्रम किये मूढ व्यक्ति भी कदाचित् भयावह आविष्कार ग्रन्थ में पाकर विनाशलीला रच देता । अतः परमेश्वर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

परमेश्वरशब्ददारिद्र्यशङ्का तु कस्यचिदबुद्धेरस्यैव सम्भवति। यथा चायमाशङ्कते—किं त्वदीये परमेश्वरे.....इत्यादि।

पृ० १५३५, अनु० २—"यत्तु, स्वामिदयानन्देन पितॄणां वसुसंज्ञकत्वम्, पितामहा रुद्राः, प्रपितामहा आदित्या मताः, इत्यादि,तत्तु निर्मूलम्।" इति।

वस्तुतस्तु पारिजातोक्तमेव निर्बुद्धिमूलम्, मनुस्मृत्यादौ तेषां वस्वादिसंज्ञाप्रतिपादनात्। यथा—

वसून् वदन्ति तु पितॄन् रुद्रांश्चैव पितामहान्।
प्रपितामहांस्तथादित्यान् श्रुतिरेषा सनातनी॥ मनु० ३।२८४॥

पृ० १५३५, पं० १५—अत्र यदुच्यते—"स्वामित्यनेनामृताख्या मोक्षविद्या केन प्रमाणेन गृहीता?" इति शङ्कया तु एतस्य न व्याकरणशास्त्रे प्रवेशोऽनुमितो जायते। यदयं शब्दसिद्धिव्युत्पत्तिप्रक्रियानभिज्ञ एव। अत्रैव—

स्वम् आत्मानं दधाति या सा स्वधा, तां कर्तुं वेत्तुं वा शीलं येषां ते, तेभ्यः स्वधायिभ्य इति। अत्र स्वधोपपदे 'इण् गतौ' (अदादि) धातोस्ताच्छील्ये णिनिः। एतेन महर्षेः शब्दशास्त्राधिकारो व्यज्यते। तस्मात् केन प्रमाणेन गृहीता इति वक्तुमशक्यत्वहेतुरहेतुरेव।

में शब्द-दरिद्रता की शङ्का करना तो अपनी बुद्धि की ही दरिद्रता है, जैसा कि करपात्रीजी कहते हैं।

पृ० १५३५, अनु०, २—"स्वामी दयानन्द ने पितरों की वसु संज्ञा, पितामह की रुद्र और प्रपितामह की आदित्य संज्ञा कही है, वह सब निर्मूल है।"

वास्तव में पारिजातकार का कथन ही निर्मूल है; क्योंकि इनकी ये संज्ञाएँ तो मनुस्मृति शास्त्र में भी कही गयी हैं। यह ३। २८४ श्लोक देखिये—

पितरों को वसु, पितामह को रुद्र तथा प्रपितामह को आदित्य कहते हैं, यही सनातनी रीति है।

पृ० १५३५, पं० १५—"स्वाम् का अर्थ 'अमृताख्या मोक्षविद्या' यह कहाँ से ले लिया?" इस कथन से तो इनके व्याकरणज्ञान की पोलपट्टी ही खुल गयी। समझिये—

अध्यात्म पक्ष में स्वा अर्थात् मोक्षविद्या ही होगी। मोक्षविद्या को धारण करने का जिनका स्वभाव हो, उनके लिये 'स्वधायिभ्यः' प्रयुक्त हुआ है। इससे महर्षि का शब्दशास्त्र पर अधिकार व्यक्त होता है। इसलिये 'यह अर्थ किस प्रमाण से लिया' यह हेतु न बता सकना तो अहेतुमात्र

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भवता वक्तुमशक्यं स्यात् परमस्माभिस्तु तद्ग्रहणे हेतुर्व्युत्पत्तिश्चाप्युदिता।

तस्मिन् काले केवलकर्मकाण्डपरकविनियोगपरत्वात् कात्यायनादीनां यज्ञसम्पन्नतैवाभिलक्षिता, न तु वेदानां विशालज्ञानराशिरनवीक्षिताऽलक्षिता वाऽऽसीत्। फलतोऽयमपि सङ्कीर्णयज्ञवृत्तिविनिहितविनियोगपुच्छं गृहणन् वेदानामानन्त्यमुपेक्ष्य यज्ञवेद्यामेव समावेशयत्। यत्र गोऽश्वबालकृतेन पवित्रेण इत्यादि। महर्षिणा भूयिष्ठश्रमेण यौगिकार्थप्राधान्यमाविरक्रियत। अत एव 'पवित्रेण' इति पवित्रकर्मानुष्ठानप्रकरणोपदेशेनेत्यर्थो गृहीतः।

नहि कदाचिदपि 'दक्षिणाग्रवंशस्थशिक्ये शतच्छिद्रां कुम्भीं निधाय, कुम्भीतले बालादीनि निधाय तत्र सुराशेषं सिक्त्वाऽग्नेरुपरि स्रवत्यां सुरायां नवर्चं यजमानं वाचयेत्।' इत्यादिना शतायुर्यजमानो भवितुमर्हति, नैवं पवित्रीभूय यजमानः शतायुर्भवितुं शक्नोति।

पृ० १५३६, पं० ११—आ०—यदुच्यते—"हविषे अत्तवे सद्विद्याग्रहणाय तेभ्यो धनाद्युत्तमपदार्थदानायानन्दभोगाय च' इति स्वामिनोक्तं निष्प्रमाणम्। 'उशन्नुशत आवह पितॄन् सत्योपदेशविद्याकामयमानान् कामयमानः संस्त्वमस्मानासमन्तात् वह प्रापय' इति, तदपि निरर्थकम्, परमेश्वरप्रार्थनाधीनैवाध्यापकप्राप्तिः स्यात्, तदा तदर्थं गुरूपसदनादिप्रयत्नवैयर्थ्यमेव

ही है। आप इसके कहने में भले असमर्थ हों पर हमलोग समर्थ हैं, अतः व्युत्पत्ति भी स्पष्ट कर दी।

उस समय केवल कर्मकाण्डपरक विनियोग में कात्यायनादि लगे हुए थे। यज्ञसम्पन्नता ही अभिलक्षित थी। प्रजा मूढ और वेदविद्या के न जाननेवाले केवल कर्मकाण्डज्ञ, सो भी बहुधा अविहित। वेदों की विशाल ज्ञानराशि अदृष्ट और अलक्षित थी। फलतः इन्होंने भी सङ्कीर्ण यज्ञवृत्ति में विनिहित विनियोग की ही पूँछ पकड़कर वेदों की अनन्तता की उपेक्षा करके यज्ञवेदी में ही सबका समावेश कर दिया। जहाँ पर गो अश्व के बालों से बने पवित्र आदि का विधान कर दिया। महर्षि ने महान् परिश्रम से यौगिकार्थ की प्रधानता का आविष्कार किया। इसीलिये ऋषि ने मन्त्र में आये 'पवित्र' शब्द से 'पवित्र कर्मानुष्ठान करनेवाले उपदेश से' यह अर्थ किया।

स्वामी जी ने कभी भी 'दक्षिणाग्रवंशस्थ छीके पर शत छिद्रवाली कुम्भी (घटी) को रखकर तथा कुम्भी की तली पर बाल आदि रखकर वहाँ सुराशेष छिड़क कर आग के ऊपर टपकती सुरा में यजमान नवर्च सूक्त का पाठ करे' इत्यादि द्वारा यजमान को पवित्र करने की विधि का समादर नहीं किया है। न वह इससे शतायु हो सकता है।

पृ० १५३६, पं० ११—आक्षेप—"स्वामी दयानन्द ने 'हविषे अत्तवे' का अर्थ 'पितरों से सद्विद्या के ग्रहण के लिये, पितरों को धन आदि उत्तम पदार्थ देने के लिये और आनन्द का उपभोग करने के लिये' ऐसा किया है, किन्तु इसमें कोई प्रमाण नहीं है। इसी प्रकार 'हे भगवन्! आप हमारे कल्याण के लिये सत्यविद्या का उपदेश करने की इच्छावाले पूर्वोक्त पितरों के पास

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्यात्।" इति।

समा०—नास्तिकाभासं वचनमेतत्, जडपूजापरायणधिषणत्वात्। प्रत्येककार्यप्रारम्भे परमेश्वरस्मृतिस्तु मङ्गलाचरणं पारम्परिकम्। न च परमेश्वरप्रार्थनाय क्वाऽपि गन्तव्यम्, क्षणेनैव हृदयस्थस्य ध्यानसम्भवात्। अत एवर्षिराह—'इष्टत्वेन हृदयाकाशे, न्यायाधीशत्वेन राष्ट्रे त्वां कामयमाना वयं स्थापयामः'।

'हविषे अत्तवे' इति तु हविर्दातुमादातुं वाऽर्हं हविः। अत्र व्यत्ययेन द्वितीयास्थाने चतुर्थी ज्ञेया। भक्षणार्थकाद् 'अद्'धातोः 'तुमर्थे सेसेनसे०' (अष्टा० ३। ४। ९) इत्यनेन तवेन्-प्रत्ययः। एवमिष्टाध्यात्मपक्षे सद्विद्याग्रहणाय राष्ट्रपक्षे च अन्नाद्युत्तमपदार्थदानाय इति हविरर्थः। अत्तवे अत्तुं भोक्तुमर्थाद् आनन्दं भोक्तुं कामयमानाः। इति महर्षिकृतोऽर्थो गौरवेणातिशेतेऽन्यभाष्याणि।

पृ० १५३७, पं० १—'ये निखाता०' (अथर्व० १८। २। ३४) अनेन मन्त्रेणाकारिताः पितरश्चतुर्विधा अपि पितर आमन्त्रितब्राह्मणानां शरीरेषु प्रविष्टाः श्राद्धं स्वीकुर्वन्ति। यथा—'निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान्।' (मनु० ३। १८९) इत्याहायम्। शूद्राणां च पितरः 'शूद्राणां तु सुकालिनः' (मनु० ३। १९७) इति सुकालिनः। यदा हि अस्मिन् प्रसङ्गे—

हमें नित्य पहुँचाइये' यह व्याख्या भी निरर्थक है।"

समाधान—यह कथन नास्तिक जैसा है, जड़पूजापरायण बुद्धि होने से। प्रत्येक कार्य के प्रारम्भ में परमेश्वर की स्मृति तो पारम्परिक मङ्गलाचरण है। परमेश्वर की प्रार्थना के लिये कहीं जाना तो होता नहीं, अतः क्षण भर में हृदय में ध्यान सम्भव है। इसीलिये ऋषि ने उक्त मन्त्र में कहा है कि—'इष्ट होने से हृदयाकाश में, न्यायाधीश रूप से राष्ट्र में तुम्हारी कामना करते हुए हम स्थापित करते हैं'।

'हविषे अत्तवे' इसमें हवि का अर्थ है—जो वस्तु देने या ग्रहण करने योग्य हो। भक्षणार्थक 'अद्'धातु से तवेन् प्रत्यय करने से 'अत्तवे' शब्द निष्पन्न हुआ। अतः अध्यात्मपक्ष में हवि का अर्थ सद्विद्या और राष्ट्रपक्ष में उत्तम पदार्थ देने के लिये अर्थ पूर्ण सङ्गत है। 'अत्तवे' का अर्थ आनन्द के उपभोग की इच्छा करते हुए होगा। इस प्रकार महर्षि का अर्थ अन्य सभी भाष्यों से उत्तम है।

पृ० १५३७, पं० १—"ये निखाता०' (अथर्व० १८। २। ३४) इस अथर्व मन्त्र से बुलाये गये पितर चार प्रकार के हैं, जो आमन्त्रित ब्राह्मणों के शरीरों में प्रविष्ट होकर श्राद्ध को स्वीकार करते हैं। जैसा कि मनु ने कहा है कि निमन्त्रित पितर उन द्विजों के पास बैठते हैं (३। १८९)। शूद्रों के पितर सुकाली संज्ञक होते हैं। जब इस प्रसङ्ग में 'घ्राण से शूकर, मुर्गा के पंखों की हवा,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः ।
श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥ मनु० ३ । २४१ ॥

इत्यनेन शूद्रस्पर्शेन श्राद्धवस्तुनः फलहीनत्वविधानेन शूद्रास्तु न करिष्यन्ति सुकालिनां श्राद्धम्, तर्हि किमन्ये द्विजाः करिष्यन्ति ? अथवा शूद्रा अपि नाम स्वपितॄणां कुर्युश्चेत् श्राद्धं तदा के ब्राह्मणा भवान् भवदनुगामिनो बल्लभाः षट्टाभिरामशास्त्रिणः शूद्राणां गृहे भोक्तुमुद्यताः श्राद्धम् ? अन्येषां भोजनस्य तु प्रश्न एव कुतः ? श्राद्धं भुञ्जानानां ब्राह्मणानामेव शरीरे प्रवेशार्हत्वात् सुकालिनाम् । वस्तुतस्त्विमे प्रक्षिप्ता एव श्लोका अस्मन्मत्या ।

ननु नहि जीविताः पितरो द्विजान् वायुवच्चानुगच्छन्ति, तस्मान् मृतपितॄणामेवैतद् बोधकं वाक्यम्, इति तु न वाच्यम्, उक्तश्लोकस्य प्रक्षिप्तत्वात् । दुर्जनतोषन्यायेन यदेऽपि एकस्मिन् भोज्यमाने आमन्त्रिते ब्राह्मणे पित्रादयः सर्व आविशन्ति, उत क्रमशः ? उभयथाऽपि वायुरूपत्वात् तेषां नान्नादिग्रहणसम्भवः ।

किञ्च भ्रातृषु विभक्तसम्पत्तिषु स्पर्धया सहैवैकस्यां तिथौ निमन्त्रितेषु ब्राह्मणेषु मृता पितरः कतमस्य भ्रातुर्गृहे भुञ्जानानां शरीरेषु वायुवत् प्रविक्ष्यन्ति, द्विजान् वा उपस्थास्यन्ति ? सर्वथा स्थितिरसम्भवैव । अतः 'तिर इव वै पितरो मनुष्येभ्यः' (शत० २ । ३ । ४ । २१) इत्यस्य

कुत्ते की दृष्टि पड़ने से और शूद्र के स्पर्श से श्राद्ध वस्तु की फलहीनता हो जाती है (मनु० ३ । २४१), इस प्रकार शूद्र तो अपने सुकालीन पितरों का श्राद्ध करेंगे नहीं, तो उन सुकालियों का श्राद्ध अन्य द्विज करेंगे ? अथवा शूद्र भी यदि अपने पितरों का श्राद्ध करें तो उनके घर आप या आपके अनुयायी प्रियजन आदरणीय श्री षट्टाभिराम जी शास्त्री जैसे लोग शूद्रों के यहाँ श्राद्ध खाने जायेंगे या नहीं ? अन्यों के भोजन का तो प्रश्न ही कहाँ है ? श्राद्ध खानेवाले ब्राह्मणों के शरीर में सुकालियों का प्रवेश सम्भव है । आपके मान्य श्लोक हमारे मत से तो प्रक्षिप्त हैं ।

प्रश्न—जीवित पितर वायुवत् द्विजों का अनुगमन नहीं करते, इसलिये यह वाक्य मृत पितरों का बोधक है ।

उत्तर—यह कथन ठीक नहीं । उक्त श्लोक प्रक्षिप्त हैं । अच्छा, दुर्जनतोषन्याय से यदि मान भी लें तो बताइये कि श्राद्ध के लिये निमन्त्रित ब्राह्मण में सभी पिता-पितामह आदि एक साथ आविष्ट होते हैं अथवा क्रमशः ? दोनों ही स्थितियों में पितरों के वायुरूप होने से वे अन्नादि ग्रहण नहीं कर सकते ।

दूसरे यह भी बताइये कि भाइयों में जब बँटवारा हो गया, वे सब एक साथ एक ही तिथि पर अपने पूर्वजों का श्राद्ध करने लगें, तो पितर किस भाई के जिमाये जा रहे ब्राह्मण के शरीर में प्रवेश करेंगे ? या किन द्विजों के पास बैठेंगे ? यह स्थिति तो सर्वथा असम्भव ही हो जायेगी । अतः 'मनुष्यों से पितर तिरोहित रहते हैं' (शत० २ । ३ । ४ । २१) इसका आपका सम्मत अर्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न भवन्मतोऽर्थो युक्तः। तस्यायमाशयो यत् ते वनस्थिनः संन्यासिनो मनुष्येभ्यः साधारणेभ्योऽस्मद्गृहस्थेभ्यस्तिरोहिता इव, गृहाद् दूरस्थत्वात्। 'तिरस्तीर्णं भवति' (निरु० ३। २०)। अतस्ते साधारणमनुष्येभ्यस्तीर्णस्थितयो भवन्ति।

किञ्च, अस्माकं शरीरेषु पञ्चतत्त्वनिर्मितेषु क्षितितत्त्वस्य प्रधानता, जलचरेषु जलतत्त्वस्य, एवं वायुतत्त्वस्य पक्षिषु। न चैवं पञ्चेन्द्रियसमन्वितेषु मृतेषु। अतो नान्ययोनिः पितॄणाम्।

पृ० १५३७, पं० ७—यच्चाह—"पितरः सूक्ष्मत्वान्मनुष्यदृष्ट्यगोचरा भवन्ति।" इत्यज्ञानम्, त्वन्मान्यग्रन्थप्रमाणविरुद्धत्वात्। यथा—'जरत्त्वारुः स्वपितरं यायावरं गर्ते विपरीतं लम्बमानमपश्यत्' इति महाभारते। गरुड़पुराणे प्रेता० १०। ३२, ४४, ४६-४८ श्लोकेषु सीता ब्राह्मणशरीरेषु असुरादीन् त्रीन् पितॄनपश्यत्। सम्प्रति ब्रवीतु, भवान् मृषावादी अथवा उक्तग्रन्थौ मिथ्या स्तः?

प्रश्नः—अन्ययोनिगतपितृभ्यः 'स्वधा' इत्युच्चार्य अन्नप्रापणाय परमेश्वरः प्रार्थितः किमर्थः?

समा०—स्वधाशब्दार्थोऽन्नमपि। पितरस्तु स्वकर्मानुसारं विविधयोनिषु गच्छन्त्येव, परं

ठीक नहीं है। इसका आशय यह है कि वे वनस्थी और संन्यासी हम साधारण गृहस्थ मनुष्यों से घर से दूर स्थित होने से तिरोहित रहते हैं।

दूसरे हम लोगों के पञ्चतत्त्वनिर्मित शरीरों में पृथिवी तत्त्व की प्रधानता, जलचरों में जल तत्त्व की प्रधानता तथा पक्षियों में वायु तत्त्व की प्रधानता, इस प्रकार पञ्चेन्द्रियसमन्वित मृतों में घटित नहीं होता। अतः पितरों की अन्य योनियाँ नहीं होतीं।

पृ० १५३७, पं० ७—"पितर सूक्ष्म होने से मनुष्यों के दृष्टिगोचर नहीं होते" इस कथन में अज्ञान है; क्योंकि तुम्हारे मान्य ग्रन्थों में दिये प्रमाणों से उक्त बात विपरीत है। यथा—'जरत्त्वारु ने अपने पितर यायावर को गड्ढे में विपरीत लम्बमान पड़ा हुआ देखा' (महाभारत)। तथा गरुड़पुराण प्रेताध्याय १०। ३२, ४४, ४६ से ४८ तक श्लोकों में—'सीता ने ब्राह्मण-शरीर धारण किये असुर आदि तीन पितरों को देखा'। अब आप बताइये कि आप मिथ्यावादी हैं या कि उक्त ग्रन्थ मिथ्या हैं?

प्रश्न—अन्ययोनिगत पितरों के लिये 'स्वधा' यह उच्चारण कर अन्न पहुँचाने के लिये परमेश्वर से किस लिये प्रार्थना की गयी है?

उत्तर—स्वधा शब्द का अर्थ अन्न भी है। पितर तो अपने कर्मों के अनुसार विविध योनियों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

योन्यपरिचये न वयमन्नं प्रापयितुं शक्नुमः । ईश्वरः प्रार्थितोऽप्रार्थितो वापि सर्वयोनिगतजीवानां भोजनप्रबन्धं स्वानन्तानुग्रहेण स्वत एव कुरुते । स्पष्टं मनुस्मृतौ—

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥ ४ । २३९ ॥

अथ च— यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ (पञ्चतन्त्रे २ । १३२)

कृतहान्यकृताभ्यागमदोषापत्तेश्चान्नप्रापणाय प्रार्थनाया वैयर्थ्यम् । तथा च पौराणिक-पितृषु अयमपरो विद्युन्निपातो यदेषामवरकर्मणामपि फलं त एव भोक्ष्यन्ति । यथा—

यथोक्तवादिनं दूतं क्षत्रधर्मरतो नृपः ।
यो हन्यात् पितरस्तस्य भ्रूणहत्यामवाप्नुयुः ॥ (महाभा० शा० प० ८५ । २७)
श्राद्धं भुक्त्वा त्वधीयीत वृषलीतल्पगश्च यः ।
पुरीषे तस्य तं मासं पितरस्तस्य शेरते ॥ (महाभा० अनु० प० ९० । १३)
श्राद्धं भुक्त्वा च दत्त्वा च पुरुषो यः स्त्रियं व्रजेत् ।
पितरस्तस्य तं मासं तस्मिन् रेतसि शेरते ॥ (महाभा० अनु० प० १२५ । २४)

में जाते ही हैं, पर योनि का परिचय न होने पर हम लोग अन्न नहीं पहुँचा सकते । ईश्वर से प्रार्थना की जाये या नहीं, वह तो अपने स्वाभाविक अनुग्रह से सब योनि के जीवों का भोजन-प्रबन्ध करता है—

परलोक की सहायता के लिये माता-पिता तो नहीं रहते, पुत्र, स्त्री, बन्धुबान्धव कोई भी नहीं होते, केवल धर्म ही उनका सहायक होता है (मनु० ४ । २३९) ।

और—सहस्र धेनुओं में भी जैसे बछड़ा अपनी माता को पहचान लेता है, उसी प्रकार पूर्वकृत कर्म कर्ता को प्राप्त कर लेता है (महाभारत, पञ्चतन्त्र २ । १३२) ।

कृतहानि और अकृत-अभ्यागम दोषापत्ति की सम्भावना में अन्न पहुँचाने के लिये प्रार्थना की व्यर्थता है । तथा पौराणिक पितरों पर यह दूसरा विद्युन्निपात हो रहा है कि इनके अवर कर्मों का फल वे ही भोगेंगे । जैसे—

यथोक्त कहनेवाले दूत को जो क्षत्रियधर्मरत राजा मारेगा, उसके पितरों को भ्रूणहत्या का पाप लगता है (महाभारत, शान्तिपर्व ८५ । २७) ।

श्राद्ध खाकर जो पढ़े, उसके पितर उस महीने पुरीष में शयन करते हैं । इसी प्रकार महाभारत का और भी प्रमाण है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अतो जीवितानामेव श्राद्धं प्रात्यहिकं विहितम्—

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥ मनु० ३। ८२॥

पुनस्ते पितरो वार्षिकश्राद्धे पञ्चदश षोडश वा दिवसान् भुक्तवन्तः पूर्णं वर्षं कथङ्कारं निर्वक्ष्यन्ते ?

किञ्च, श्राद्धभोजनमपि पितरो न प्राप्तुं प्रभवन्ति। यथा—महाभा० अनु० ८५। ३, ५, ६-१० श्लोकेषु—

भाविजन्मनि सुमित्रो वृषभोऽभूत्, जयश्रीश्च कुक्कुरी जाता। सुमित्रपुत्रः सुमतिः पुत्रवधूचन्द्रावती च श्राद्धमकुरुताम्। तद्दिने सुमतिर्वृषभं हलं च नीत्वा क्षेत्रं कर्षितुं गतः। तस्मिन् काले कुक्कुरी अपश्यद् यदेकः सर्पः पायसे विषं निर्मुच्यापसर्पितः। शुनी व्यचारयद् यत् श्राद्धे निमन्त्रितो ब्राह्मणोऽत्स्यत्येतेन मरिष्यति च, अतः सा तत्पायसे मुखमपातयत्। चन्द्रावती शुनीं (श्वश्रूम्) दहदेधसाऽताडयत्। कुक्कुरी वृषभमुपेत्याकथयद् यदद्य न ग्रासोऽपि लब्धः, क्षुधया मुमूर्षुरिवाऽस्मि। वृषभः प्रत्युदतरत्—

इसीलिये जीवितों का ही प्रतिदिन का श्राद्ध बताया गया है—

पितरों के लिये नीत्यनुसार प्रतिदिन अन्न, जल, दूध, कन्दमूल फलों से श्राद्ध करे (मनु० ३।८२)।

फिर तुम्हारे वे पितर वार्षिक श्राद्ध में १५ या १६ दिन खाकर सारा वर्ष कैसे काटेंगे ?

दूसरे श्राद्धभोजन को भी पितर नहीं पा सकते। यथा महाभारत में कहा है—

भावी जन्म में सुमित्र तो बैल बना और जयश्री कुतिया बनी। सुमित्रपुत्र सुमति और पुत्रवधू चन्द्रावती ने श्राद्ध किया। उस दिन सुमति ने वृषभ और हल को ले जाकर खेत जोता। उस समय कुतिया ने देखा कि खीर में एक सर्प विष छोड़कर सरक गया। कुतिया ने विचारा कि श्राद्ध में निमन्त्रित ब्राह्मण इसे खायेगा और मर जायेगा। अतः उस कुतिया ने उस खीर में मुँह डाल दिया। चन्द्रावती ने शुनी (सास) को जलती हुई लकड़ी से मारा। कुतिया ने बैल से जाकर कहा कि आज तो भोजन का एक ग्रास भी नहीं मिला, भूख से प्राण निकल से रहे हैं। बैल ने उत्तर दिया—क्या

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किं करोमि अशक्तोऽहं भारवाहत्वमागतः ।
अद्याहमात्मनः क्षेत्रे वाहितः सकलं दिनम् ॥
मारितश्चात्मजेनाऽहं मुखं बद्ध्वा बुभुक्षितः ।
वृथा श्राद्धं कृतं तेन जाताऽद्य मम कष्टता ॥
(भविष्योत्तर० अ० ७८ । ४०, ४१)

पृ० १५३८, पं० ४—पू० प०—'आधत्तेति मध्यमं पिण्डं पत्नी प्राश्नाति पुत्रकामेति' (कात्या० श्रौ० सू० ४ । १ । २२) इति ।

पतिव्रता धर्मपत्नी पितृपूजनतत्परा ।
मध्यमं तु ततः पिण्डमद्यात् सम्यक् सुतार्थिनी ॥ मनु० ३ । २६२ ॥

इत्यनेनाऽपि मृतानामेव पितॄणां चर्चा ।

उ० प०—प्राक् तु मृतपितॄन् सन्तानं याचेत इत्येवासङ्गतम् । जीवितानामाशीर्वादयाचना तु सङ्गच्छेत । उक्तमुभयमपि प्रमाणं वेदविरुद्धम् । 'आधत्त०' इति मन्त्रो वेदारम्भविषयकः । गर्भशब्देनेमे भ्रान्ताः । अथवा मध्यमपिण्डेन तात्पर्यमस्ति यद् जीवितपितृपूजनतत्परा भोजने संयमं वर्तेत अर्थान्न क्षुधिता तिष्ठेन्नाप्यत्यश्नीयात् ।

करूँ मै अशक्त हूँ, भारवाहक बना हूँ । आज मैं भी अपने ही खेत मे दिन भर जुता रहा । पुत्र ने मारा भी और मुँह बाँधे भूखा रहा हूँ । उसने बेकार ही श्राद्ध किया है, मुझे तो कष्ट ही हुआ है ।' (भविष्यपुराण, अ० ७८ । ४०,४१)

पृ० १५३८, पं० ४—पूर्वपक्ष—'आधत्त पितरो गर्भम्' इस मन्त्र को पढ़कर पुत्रकामनावाली मध्यम पिण्ड का प्राशन करती है (का० श्रौ० सू० ४ । १ । २२) । इसकी पुष्टि मनु ने भी की है । यथा—पतिव्रता धर्मपत्नी पितृपूजन करती हुई पुत्र की कामना से मध्यम पिण्ड का प्राशन करे (३ । २६२) । इस से भी मृत पितर ही सिद्ध हैं ।

उत्तरपक्ष—पहले तो मरे हुए पितरों से सन्तान माँगना ही असङ्गत है, जीवितों से आशीर्वाद की याचना सङ्गत है । ऊपर के दोनों प्रमाण वेद-विरुद्ध हैं । 'आधत्त०' यह मन्त्र वेदारम्भविषय में सुघटित है । ये पौराणिक इस मन्त्र में आये 'गर्भ' शब्द से भ्रान्त हो रहे हैं । अथवा उक्त का तात्पर्य यह है कि मध्यम पिण्ड खाये, अर्थात् न भूखी रहे और न अधिक खाये । यही निर्देश आयुर्वेद में है । तथा वह माता-पिता आदि वृद्ध पितरों की पूजा करे, जिससे शिष्ट सन्तान उत्पन्न हो ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५३८, पं० ८—यदुच्यते—"उदन्वती द्यौरवमा०' (अथर्व० १८ । २ । ४८) इह उदन्वती, पीलुमती, प्रद्यौरिति त्रयो निवासाः त्रीणि निवासस्थानानि । एषु त्रिषु आकाशेषु वसन्ति पितरः ।" इति तत्र प्रमाणं देयमासीदनेन यत् किंपरिमाणाः पितरः कस्मिन्नाकाशे वसन्ति, तत्र च को हेतुः । 'द्यौर्वै सर्वेषां देवानामायतनम्' (शत० १४ । ३ । २ । ८) इति विविच्यतां कतरस्मिन् भागे तव देवाः पितरो वा वसन्ति । अथर्ववेदसङ्केतो भ्रान्तिजनकः, अशुद्धत्वात् । तत्र विमानादिविद्यामाविष्कृत्यास्माकं पितॄणां गमनसम्भव इत्यत्र श्रुतिनिर्देशः ।

पृ० १५३८, पं० १२—यच्चाह—"इयमोदनं निदधे०' (अथर्व० ४ । ३४ । ८) अनेन मन्त्रेण पितॄणां तृप्त्यर्थं ब्राह्मणानां समीपे ओदनादिकं निधीयते । ओदनं विस्तारवन्तं मन्त्रबलात् परमेश्वरानुग्रहाच्च एकैककणा अपि पर्वतोपमाः ।" इति सर्वमनर्गलमिव वेदबाह्यत्वात् ।

नह्यत्र कश्चिच्छब्दः पितृबोधकः, न वाऽपि श्राद्धपरकः । ओदनशब्दो न लोकप्रसिद्ध-भक्तबोधकः । उदरम्भरयो निमन्त्रणार्पितसर्वस्वा अप्रसङ्गेऽपि सिद्धमन्नमेवान्विष्यन्ति ।

पृ० १५३८, पं० ८—यह कहना—"उदन्वती द्यौ०" इस मन्त्र में जो मेघवाली द्यौ निम्न, ग्रह-नक्षत्रवाली मध्यम तथा प्रकृष्ट द्यौ उत्तम है, जहाँ पितर रहते हैं, जिनका हम श्राद्ध करते हैं ।" भी मिथ्या है; क्योंकि बताइये मन्त्र में किन शब्दों का यह अर्थ है कि 'जिन का हम श्राद्ध करते हैं' ।

इसमें आपने कहा है कि आकाश में लौकिक पितर नहीं ठहर सकते, यह भी बुद्धिहीनता की बात है, जब कि आज वैज्ञानिक आकाश में ऊँचे पहुँचकर महीनों रहकर पृथिवी पर आये हैं । आपको यहाँ यह भी बताना था कि उन आपके पितरों का क्या परिमाण होता है ? तथा उन मृत पितरों के आपके बताये तीन प्रकार के आकाश में बसने का कारण क्या है ? शतपथ के प्रमाणों से द्यौ में तो सभी विद्वानों का निवास रहता है । यहाँ पर 'द्यौ' का अर्थ आत्मविद्या है । आपके वे कल्पित चेतन देवता किस भाग में रहते हैं ? जड़ देवता ग्रह-नक्षत्र आदि तो रहते ही हैं, यह प्रत्यक्ष है । वास्तविक अर्थ की ओर श्रुति का निर्देश है कि आविष्कार करके इस आकाश में देव (विद्वान्) लोग पहुँचे ।

पृ० १५३८, पं० १२—यह कहना भी निःसार है कि—"ब्राह्मणों के समीप में पितरों की तृप्ति के लिये ओदन आदि रखा जाता है । और यह ओदन विस्तारवाला है, परमेश्वर की कृपा और मन्त्रबल से उस ओदन का एक-एक कण पर्वताकार हो जाता है ।" भला, इतना बड़ा गपौड़ा वेदसम्मत कैसे हो सकता है ? ये तो मिथ्या के पुलिन्दे पुराणों में ही लिखे हो सकते हैं ।

इस मन्त्र में इनके पितरों के लिये कोई शब्द नहीं आया है और न कोई शब्द श्राद्धपरक है । ओदन शब्द लौकिक भात का भी बोधक यहाँ नहीं है । ये उदरम्भरि निमन्त्रण के लिये सर्वस्व

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'बिडालः स्वप्नेऽपि मूषिका एव पश्यति।'

अत्र 'उन्दी क्लेदने' इति धातोः 'उन्देर्नलोपश्च' (उणा० २।७६) इति युचि नलोपे च 'ओदन' शब्दः सिध्यति, 'ऊर्द क्रीडायाम्' धातोर्वा—ऊर्दतेऽनेनेति ल्युटि पृषोदरादित्वाद् ओदनं सिद्धम्।

'परमेष्ठी वा ओदनः' (तै०), 'प्रजापतिर्वा ओदनः' (शत० १३।३।१।७), 'रेता वा ओदनः' (शत० १३।१।१४।४) इति प्रमाणेषु प्रजापतिः परमात्मा ओदनः। तथा सत्ययमर्थः—"ब्रह्मज्ञानिषु विस्तारवन्तं लोकजयशीलं सुखस्वरूपमिमं स्वकरुणावारिभिः सेक्तारमहं निदधे नितरां धारयामि। स प्रभुः स्वधारणशक्त्या वर्धमानो मह्यं नाल्यो भवेत्। विश्वरूपा च तर्पयित्री वेदवाणी (धेनुः) मम कामदुघा अस्तु।" इति।

हे जल्पाक (गप्पि) शिरोमणे! 'मन्त्रबलात् परमेश्वरानुग्रहाच्च एकैककणाः पर्वताकाराः' एषोऽर्थः कुतो लब्धः? न चैककणो मन्त्रबलात् पर्वताकारो भवति। न वा स्वसृष्टिनियमविरुद्धानुग्रहो जगदीश्वरस्य कल्पनीयः। 'जन्मवन्तां' (पं० ११) इत्यपपाठ एव।

पृ० १५३९, पं० ४—यदत्र कलियुगिब्राह्मणानां प्रशंसा क्रियते वस्तुतस्तु सा प्रशस्तिर्घोरनिन्दैव। यतो हि सत्यब्राह्मणास्तु नोदरम्भरयो भवन्ति। यदाह—"यस्यास्येन सदा-

---

समर्पित करनेवाले लोग ही अप्रसङ्ग में भी परिपक्व भोजन को खोज लेते हैं। जैसे बिलौटा स्वप्न में भी चुहियों को ही देखता है।

यहाँ पर 'उन्दी क्लेदने' धातु से न-लोप होकर 'युच्' प्रत्यय में 'ओदन' शब्द सिद्ध होता है, अथवा 'ऊर्द' (क्रीडार्थक) धातु से भी ओदन शब्द सिद्ध होता है। परमेष्ठी, प्रजापति, रेतः इत्यादि अर्थ होने से ओदन का अर्थ परमात्मा लिया जायेगा। तब यह अर्थ होगा—"ब्रह्मज्ञानी ब्राह्मणों में विस्तारवाले, लोकों के जयनशील, सुखस्वरूप, अपने करुणाजल से सींचनेवाले प्रभु को मैं धारण करता हूँ। वह ब्रह्म मेरे लिये भी वृद्धिकारक हो। विश्वरूप, तृप्त करनेवाली वेदवाणीरूप धेनु मेरी समस्त कामनाओं को पूर्ण करे।"

हे गप्पियों के शिरोमणि! एक कण को पर्वताकार बनानेवाले! यह वेदबाह्य अर्थ कहाँ से ले आये? जगदीश्वर अपने सृष्टिनियमों के विरुद्ध कुछ नहीं करता। आपकी इस गप्प ने तो नास्तिक जैनियों को भी पीछे छोड़ दिया। ११वीं पंक्ति में 'जन्मवन्तां' यह अपपाठ है।

पृ० १५३९, पं० ४—जो यहाँ पर कलियुगी ब्राह्मणों की प्रशंसा की जा रही है कि—"जिस ब्राह्मण के मुख से देवतागण हव्य और पितृगण कव्य आहुति को ग्रहण करते हैं, उससे बढ़कर कौन प्राणी यहाँ हो सकता है।" इसे आप ब्राह्मणों की प्रशंसा समझ रहे हैं, फिर इससे बढ़कर पेटू बताकर निन्दा क्यों हो सकती है? क्योंकि सच्चे ब्राह्मण तो उदरम्भरि नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्नन्ति हव्यानि त्रिदिवौकसः' देवाः पितरश्च ब्राह्मणमुखेनाश्नन्ति।" इति सर्वं प्रक्षिप्तम्, तृतीयाध्यायगतश्लोकानां च परस्परविरोधात्।

नन्वयं प्रश्नो यदि ब्राह्मणमुखेनैव भक्षयन्ति ते, न तु स्वीयेन, तदा तदन्नमुदरे कस्य गच्छति? ब्राह्मणस्योतान्यस्य देवस्य पितुर्वा? ब्राह्मणोदरस्थमेवेति प्रत्यक्षं तर्कसिद्धं च। तदा तृप्तिरप्यस्यैव ब्राह्मणस्य न त्वन्यस्य।

अपरं च—

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्।
पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि॥ मनु० ३।१२९॥

इत्यनेन वेदविद् विद्वानेव भोजयितव्यः, परं ग्रामेषु ब्राह्मणानां नवनवतिः प्रतिशतमशिक्षितैव, ते चान्धपरम्परया भोज्यन्ते, तन्निष्फलमेव।

अन्यच्चाऽपि—

सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते।
एकस्तान् मन्त्रवित् प्रीतः सर्वानर्हति धर्मतः॥ मनु० ३।१३१॥

यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्टयोगुडान्॥ मनु० ३।१३३॥

होते। उक्त मनुश्लोक (१।९५) प्रक्षिप्त है। तृतीयाध्यायगत अन्य श्लोकों से इसका विरोध है।

प्रश्न यह है कि यदि ये पितर ब्राह्मण के मुख से खाते हैं, अपने मुख से नहीं, तो बताइये, वे भक्षित पदार्थ पेट में किसके जाते हैं? ब्राह्मण के या किसी अन्य देव या पितर के पेट में? वह अन्न तो ब्राह्मण के ही उदर में जाता है, तब तृप्ति भी ब्राह्मण की ही होगी।

दूसरे, देवकर्म और पितृकर्म में एक सुयोग्य विद्वान् को जो जिमाता है, वह बहुत फल को पाता है। लेकिन वेदविहीन बहुत से ब्राह्मणों को भी जिमाने से फल नहीं मिलता (मनु० ३।१२९)।

इससे वेदवेत्ता ब्राह्मण को ही जिमाना चाहिये, परन्तु गाँव या शहर में भी ९९ प्रतिशत ब्राह्मण वेदविहीन होंगे तो अन्धपरम्परा से ही वेदविहीन जिमाये जाते हैं। तथा मनु० ३।१३१ श्लोक में भी यही भाव है।

'यावतो ग्रसते ग्रासान्०' (मनु० ३।१३३) अर्थात् वेद का न जाननेवाला ब्राह्मण हव्य कव्यों में जितने ग्रास खाता है, श्राद्ध जिमानेवाला मरकर तपे हुए दुधारे शस्त्रों और लोहे के गोलों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जीवन्तः पितरस्तैश्च सार्द्धं निमन्त्रिता अतिथयो वेदविद्वांसो ब्राह्मणाः स्वस्वमुखेनैवाश्नन्तीति तर्कसङ्गतम्। कात्यायनश्रौतसूत्रेऽपि अबुद्धिगतानि स्थलानि स्वार्थिभिर्मिश्रितानि।

किञ्च,

पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान्।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्॥ मनु० ३।१२२॥

इति लेखेन प्रतीयते यत् पितृयज्ञाद् भिन्नैव काऽपि श्राद्धक्रिया। पितृयज्ञे हि (मनु० ३।८२) केवलमन्नजलफलमूलैः श्राद्धं क्रियते। यदा चेतरस्मिन् प्रसङ्गे मांसेन श्राद्धमधिकफलदायकं विहितं प्रक्षिप्तम्। यथा हि—

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै॥ मनु० ३।२६८॥
षण्मासांश्छागमांसेन पार्षतेन च सप्त वै।
अष्टावेणस्य मांसेन रौरवेण नवैव तु॥ मनु० ३।२६९॥

यदाहुः केचन 'यन् मनुना मांसेनान्नेन च उभाभ्यामपि श्राद्धं प्रतिपादितम्, शास्त्रस्य सर्वकल्याणकामत्वात्। अतो यत्र मांसाशिन एव ते तत्र मांसेन, यत्रान्नाशिनस्तत्रान्नेन श्राद्ध-

---

को खाता है अर्थात् महान् कष्ट पाता है। जीते हुए पितर उनके साथ निमन्त्रित अतिथि विद्वान् ब्राह्मण अपने-अपने मुख से खाते हैं, यही अर्थ बुद्धिसङ्गत है। कात्यायनश्रौतसूत्र में भी अबुद्धिगत स्थलों को स्वार्थियों ने मिश्रित कर दिया है।

दूसरे, 'पितृयज्ञ को करके.....पिण्ड अन्वाहार्यक श्राद्ध मासानुमासिक करे' इस लेख से प्रतीत होता है कि पितृयज्ञ से भिन्न श्राद्ध क्रिया है। पितृतर्पण केवल अन्न जल फलादि से होता है। जो मांस से कहा गया है, वे श्लोक प्रक्षिप्त हैं। जैसे—

मछली के मांस से दो मास, हरिणमांस से तीन मास, मेढे के मांस से चार मास, पक्षियों के मांस से पाँच मास, बकरे के मांस से छः मास, चितकबरे मृग के मांस से सात मास, काले मृग के मांस से आठ मास, रुरु मृग के मांस से नौ मास तृप्ति होती है (मनु० ३।२६८, २६९)।

कुछ का कहना है कि 'मनु ने मांस तथा अन्न दोनों से ही श्राद्ध का विधान किया है; क्योंकि शास्त्र तो सभी का कल्याण चाहता है। अतः जहाँ मांसाहारी हैं वहाँ मांस से और जहाँ मांसाहारी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विधानम्।' परमिदं सर्वं धूर्तप्रकल्पितम्, वेदे मांसनिषेवणस्य सर्वथा निषिद्धत्वात्। यथा— यजुः० १३।४२,४४,४८,५०; ऋ० १।१६२।३॥

यदाह—

संवत्सरं तु गव्येन पयसा पायसेन च।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी॥ मनु० ३।२७१॥
कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः॥ मनु० ३।२७२॥

इत्यत्रापि अन्नोत्पत्तिप्रधानदेशेषु परिसंख्यया मांसेन श्राद्धविधानं 'पञ्च पञ्चनखा भक्ष्याः' इतिवत् तन्निवृत्तावेव फलितम्, मुन्यन्नैरनन्तकालतृप्तिप्रतिपादनात्। तदपि खलु भ्रमोत्पादनमात्रम्, यतो हि 'संवत्सरं तु गव्येन' इति प्रतिपादनानन्तरं द्वादशवर्षतृप्तिर्वार्ध्रीणसस्य मांसेन विहित्वात्। न च अग्रिमश्लोके मुन्यन्नैरनन्तकालाय तृप्तिरुक्ता, तेन मांसश्राद्धनिवर्तनमेव सिध्यतीति वाच्यम्, अस्मिन्नेव श्लोके खड्गलोहामिषविधानात्।

ननु यत्र नान्नमुत्पद्यते तत्र सर्वथाऽप्यसम्भवं श्राद्धं मांसातिरिक्तेन वस्तुना, तन्नाम मृतानां वा स्याज्जीवितानां वेति चेन्न, तत्राऽपि येषां मृगादीनां मांसेन तृप्तिविधानं ते खलु न

नहीं है वहाँ अन्न से श्राद्ध करे'। पर यह सब मनु के नाम से धूर्तों ने परिकल्पित किया है; क्योंकि वेद में मांस-सेवन का सर्वथा निषेध है। जैसा कि यजुः० १३। ४२,४४,४८,५० और ऋग्वेद १।१६२।३ में निषेध किया है।

'गाय के दूध और दूधनिर्मित खीर आदि से पितरों की वर्ष भर की तृप्ति होती है, परन्तु श्वेत बहुसन्तानवाले बकरे के मांस से १२ वर्ष की तृप्ति बताई है। कालशाक, महाशल्क, गेंडे, लाल बकरे के मांस और मुनि अन्नों से अनन्तकाल के लिये तृप्ति बताई है।' (मनु० ३। २७१, २७२)

इनमें भी अन्नोत्पत्ति-प्रधान देशों में मांस से श्राद्ध का विधान 'पञ्च पञ्चनखा भक्ष्याः' के समान परिसंख्या से मांसनिवृत्ति में ही फलित है; क्योंकि मुनि अन्नों से अनन्तकाल की तृप्ति कही गयी है। उक्त सारा ही कथन भ्रमोत्पादक है; क्योंकि गव्य से संवत्सर भर की तृप्ति कह कर भी बकरे के मांस से १२ वर्षों की तृप्ति कही गयी है। श्राद्ध क्या है, कसाईखाने बनाने की बृहद् योजना है। वास्तविकता में ये सब प्रक्षिप्त श्लोक हैं।

पूर्वपक्ष—जहाँ पर अन्न उत्पन्न नहीं होता, वहाँ तो बिना मांस के श्राद्ध करना सम्भव नहीं है, वह मृतों का हो या जीवितों का ?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मांसानुजीविनः, केवलं तृणशाकादिनः। तदा कथं न ते यदि धार्मिका विवेकशीला वा स्युस्तदा तृणशाकादिभिरपि जीवनं यापयितुमर्हन्ति। अथवा नेदं शास्त्रैरनिवार्यनिवासविधानमादिष्टमेवंविधेषु प्रदेशेषु टुण्ड्राभिधाख्येषु।

ननु यदा हि अथर्ववेदे (१०। १०। १८,१९, २५-३४) स्पष्टं यत् पितरो वशां सेवन्ते। वशा हि 'चर्बी' इति हिन्द्यां प्रसिद्धा। यथा—

वशामेवामृतमाहुर्वशां मृत्युमुपासते।

'वशेदं सर्वमभवद् देवा मनुष्या असुराः पितर ऋषयः॥' अथर्व० १०। १०। २६॥ इति। तदा कथङ्कारं पितॄणामशनं निषिद्धं वेदेनेति प्रतिपाद्यते इति चेत्, अत्र प्रकरणे नैव वशा बन्ध्या गौरिति लोकप्रसिद्धार्थपरा, अपितु भगवत आद्याशक्तिः प्रकृतिरेव। एषु मन्त्रेषु स्पष्टतया महामायावर्णनं तथाऽस्याश्च सृष्टः प्रजापतिः पालको विष्णुरपि वशेति वध्यते। एषैव वशाऽमृतम्, अनादिमृत्युरपि। तस्यामेव लोका उत्पद्यन्ते म्रियन्ते च। सर्वदेवमनुष्यासुरपित्रादीनां शरीराणि चास्या वशाया एव जातानि। अस्याः सत्त्वगुणाद् देवा पितर ऋषयः, रजोगुणान् मनुष्यास्तमोगुणाद् राक्षसाश्च जाताः।

उत्तरपक्ष—यह कथन भी ठीक नहीं। वहाँ पर जिन मृगादि के मांस से तृप्ति कही गयी है, वे मृगादि पशु तो कोई भी मांसजीवी न होकर तृण, काई आदि पर जीवित रहते हैं। तो धर्मशील व विवेकशील व्यक्ति तृणादि पर ही जीवन व्यतीत कर सकते हैं। अथवा शास्त्र में टुण्ड्रा आदि प्रदेशों में रहना अनिवार्य तो बताया नहीं गया, फिर ऐसी स्थितियों का आपद् धर्म भी धर्म कदापि नहीं हो सकता।

पूर्वपक्ष—जब अथर्ववेद (१०। १०। १८,१९,२५-३४) में स्पष्ट लिखा है कि पितर वशा का सेवन करते हैं। वशा अर्थात् चर्बी प्रसिद्ध ही है। जैसे—'वशा को अमृत कहते हैं, वशा को मृत्यु के समान बताते हैं, वशा देव, मनुष्य, बुद्धिमान् पितर और ऋषियों में व्यापक है।' तो पितरों को वशा का भोजन वेद में क्या निषिद्ध होगा?

उत्तरपक्ष—उक्त मन्त्रों में वशा का अर्थ बन्ध्या गौ यह लोकप्रसिद्ध अर्थ नहीं है, अपितु वशा का अर्थ इस प्रकरण में महामाया शक्ति है। इससे सृष्ट प्रजापति, विष्णु आदि भी वशावाच्य हैं। यही वशा कभी न मरनेवाली, अनादि मृत्यु भी है। इसी में लोग उत्पन्न होते तथा इसी में मरते हैं। देव, मनुष्य, असुरादि के शरीर भी इसी महामाया से बनते हैं। इसके सत्त्वगुण से देवता, पितर और ऋषि बनते हैं, रजोगुण से मनुष्य और तमोगुण से राक्षस पैदा हुए।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसिद्धार्थग्रहणनिर्बन्धस्तु सूत्रग्रन्थावधारितविनियोगैरेव कारितः। येन श्रीसायणाचार्य उव्वटो महीधरश्च भ्रमावर्तनिपतिता वेदभाष्यमन्यथा चक्रिरे। यथा सायणोऽथर्ववेदे १०। ९ सूक्ते वक्ति—"अघायताम्' इति सूक्तमाहुत्यर्थं गोवधे विनियुज्यते। साऽत्र बन्ध्या गौः पातौदनेत्युच्यते। तस्या वधेन तस्या मांसाहुत्या च यद् यजनं तदग्निव्योमादपि अतिरात्रादपि श्रेष्ठम्। इत्यादिरूपा प्रशंसा।" इति।

एवं मांसलप्रज्ञनवमीमांसकैस्तामसयज्ञकर्तृभिश्च वेदरहस्येष्वावरणं कृतम्। नहि वेदवाणी साहित्यिकदृष्टिकोणेनाधीता। वेदवाणी हि गभीरविमर्शनपूर्वमधीता सती शतौदना सर्वकामनासेचिका सम्भवति।

गोवधप्रसङ्गेऽस्मिन् वैदिकवाङ्मयविनाशायायोजिता पौराणिकैर्लीला वर्ण्यतेऽत्र। एवंविधपुराणसाहित्यमवलोक्यासत्यकथासम्बलितं विरोधिनः पूर्वजान् निन्दन्ति। परमेभिर्लाञ्छनास्पदं प्रापिता नास्माकं पूर्वजा ईदृक्षा आसन्। अद्य देशस्य समक्षे गोरक्षणाय महान् प्रश्नः, परमेवंविधाः पुराणग्रन्था अत्र महान्तः प्रत्यवायाः। सनातनधर्मिणः पौराणिका अस्माकं भ्रातरोऽनानुमन्यन्ते पुराणानि शोधयितुं विदुषः सदसद्विवेचकान्। एवं स्वगलेष्वेवार्गलां गोवधप्रतिपादकग्रन्थरूपां मण्डयन्ति। निदर्शनं यथा—

प्रसिद्ध अर्थ ग्रहण करने की बेड़ियाँ तो वेदों के पैरों में सूत्रग्रन्थों ने विनियोग की डाल दी हैं। जिससे आचार्य सायण, उव्वट, महीधर भ्रमावर्त में गिर गये और अन्यथा वेदभाष्य कर दिये। जैसा कि सायण ने अथर्ववेद (१०। ९) सूक्त में—"अघायताम्०' इस सूक्त को गोवध में विनियुक्त किया है। वह यहाँ बन्ध्या गौ पातौदना कहलाती है। उसके वध से, उसकी मांसाहुति से किया यज्ञ अग्नि, व्योम और अतिरात्र से भी श्रेष्ठ है।" बताया है।

इस प्रकार मांसलप्रज्ञ नवमीमांसकों ने, तामस यज्ञकर्ताओं ने वेद के रहस्यों पर आवरण डाल दिया। वेदवाणी को साहित्यिक व वैज्ञानिक दृष्टि से गम्भीर विमर्शनपूर्वक नहीं पढ़ा गया। यदि पढ़ी जाती तो शतौदना सर्वकामनाओं की सिञ्चन करनेवाली सिद्ध होती।

इस गोवध-प्रसङ्ग में वैदिक वाङ्मय के विनाश के लिये पौराणिक लीला का यहाँ वर्णन किया जा रहा है। असत्यकथाओं से भरे ऐसे पुराणसाहित्य को देखकर विरोधी लोग पूर्वजों की निन्दा करते हैं। परन्तु उन पौराणिकों ने हमारे पूर्वजों पर लाञ्छन थोप दिये, वे ऐसे कदापि नहीं थे। आज देश के समक्ष गोरक्षा का महान् प्रश्न है, पर इस प्रकार के पुराणग्रन्थ इस गोवध को रोकने में बड़े विघ्न हैं। सनातन पौराणिक हमारे भाई पुराणों में कुछ संशोधन करने की हमें अनुमति भी नहीं देते, जो कि सदसद्विवेकी विद्वान् इस असत्य को निकाल फैंकें। इस प्रकार अपने गलों में गोवधप्रतिपादक ग्रन्थरूपी शृङ्खला डाले हुए हैं। उदाहरण देखिये, यथा—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्राह्मणानां त्रिकोटीश्च भोजयामास नित्यशः ।
पञ्चलक्षगवां मांसैः सुपक्वैर्घृतसंस्कृतैः ॥
(ब्रह्मवै० पु० प्रकृतिखण्डे ३ । ५४ । ४८-४९, वैङ्कटेश्वरप्रेसप्रकाशिते)

कियान् भयङ्करोऽनर्थः? कियद् बृहल्लाञ्छनम्? सम्प्रति कश्चिदेकोऽपि भूतले नृपो यद्राज्ये पञ्चलक्षगावो भोजने हन्यन्ते ?

चन्द्रपौत्रो बुद्धपुत्रः पञ्चकोटिगवां मांसं ब्राह्मणानभोजयत्—

'पञ्चकोटिगवां मांसं सपूपं स्वान्नमेव च ।'
(ब्रह्मवै० पु० प्र० ख० २ । ६१ । ९८, ९६)

कियद्भयङ्करपापस्यारोपः क्षत्रियनृपे । किमेतादृशः कश्चिद् यावन-ईसाई-भूपतिरपि श्रुतिं गतः? स्वशास्त्राणि पश्यन्तु—

प्राणात्यये प्रोक्षिते च श्राद्धे च द्विजकाम्यया ।
पितॄन् देवांश्चार्पयित्वा भुञ्जन् मांसं न दोषभाक् ॥
(भविष्यपु० ब्रह्मपर्वणि १८६ । २९)

महाभारतेऽपि वनपर्वणि—

अत्राऽपि विधिरुक्तश्च मुनिभिर्मांसभक्षणे ।

ब्रह्मवैवर्तपुराण में लिखा है कि 'तीन करोड़ ब्राह्मणों को नित्य पाँच लाख गायों के सुपक्व और सुसंस्कृत मांस से भोजन कराया जाता था ।'

कितना भयङ्कर अनर्थ है ? कितना बड़ा लाञ्छन है ? इस समय भूतल पर कोई भी किसी राज्य में राजा न होगा, जिसके राज्य में पाँच लाख गायों का नित्य वध कर ब्राह्मणों को खिलाया जाता हो ।

'चन्द्र का पौत्र और बुध का पुत्र पाँच करोड़ गायों का मांस ब्राह्मणों को नित्य खिलाता था ।'

भारत की परम्परा पर कैसा भयङ्कर पाप क्षत्रिय राजा के माथे पर मढ़ा गया है । क्या कभी ऐसा गोहत्यारा कोई यवन या ईसाई राजा भी कहीं सुनने मे आया ? अपने शास्त्रों को देखिये—

'प्राणों के सङ्कट आने पर, यज्ञ मे, श्राद्ध में और ब्राह्मणों की इच्छा से पितरों, और देवों को अर्पण करके मांस खानेवाला दोष का भागी नहीं होता ।'

महाभारत के वनपर्व में मुनियों ने मांसभक्षण में उक्त विधि की ही पुष्टि की है । शान्तिपर्व

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

देवतानां पितॄणां च भुङ्क्ते दत्त्वाऽपि यः सदा।
यथाविधि यथाश्राद्धं न प्रदुष्यति भक्षणात्॥ २०७।१५, १४॥

शान्तिपर्वणि चापि—

सांकृते रन्तिदेवस्य यां रात्रिमवसन् गृहे।
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः॥

रन्तिदेवस्य गृहे—

द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा।
अहन्यहनि वध्येते द्वे सहस्रे गवां तदा॥ (वनपर्वणि २०७।८, ९, १०)

यच्चाह—'पिता यस्य निवृत्तः स्याज्जीवेच्चाऽपि पितामहः' (मनु० ३।२२१) तत्तु परस्परविरोधात् प्रक्षिप्तम्।

पृ० १५३९, अनु० २—महर्षिणोक्ताः १-सोमसदः, २-अग्निष्वात्ताः, ३-बर्हिषदः, ४-सोमपाः, ५-हविर्भुजः, ६-आज्यपाः, ७-सुकालिनः, ८-यमराजाः, ९-पितृपितामह-

---

में भी कहा है कि 'रन्तिदेव के घर रात को निवास करने पर बीस हजार गायें मारी गईं'। इस कसाईखाने के दृश्य से दिल दहल उठता है।

यह जो कहा है कि 'पिता यस्य निवृत्तः स्याज्जीवेच्चाऽपि पितामहः' (मनु० ३।२२१) यह श्लोक परस्पर विरोध होने से प्रक्षिप्त है।

पृ० १५३९, अनु० २—महर्षि दयानन्द ने १२ पितर गिनाए हैं। यथा—१. सोमसदः = सोम ईश्वर व सोमयाग में निपुण शान्तिगुणप्रधान 'सोमसद्' कहाते हैं। २. अग्निष्वात्ताः = अग्नि जो परमेश्वर व भौतिक अग्नि, उसके गुण ज्ञात करके जिन्होंने अच्छे प्रकार अग्निविद्या सिद्ध की है। ३. बर्हिषदः = जो सबसे उत्तम परब्रह्म में स्थित होकर शम, दम, सत्य विद्या आदि उत्तम गुणों में वर्तमान है। ४. सोमपाः = जो यज्ञ करके सोमलता आदि उत्तम ओषधियों के रस के पान करने और करानेवाले हैं। ५. हविर्भुजः = जो अग्निहोत्र आदि यज्ञ करके वायु और वृष्टिजल की शुद्धि द्वारा सब जगत् का उपकार करने और जो यज्ञ से अन्न-जलादि की शुद्धिकरके खाने-पीनेवाले हैं, वे 'हविर्भुक्' कहाते हैं। ६. आज्यपाः = घृत, स्निग्ध पदार्थ और विज्ञान को कहते हैं, जो उनके दान से रक्षा करनेवाले हैं, वे 'आज्यप' कहलाते हैं। ७. सुकालिनः = मनुष्यशरीर को प्राप्त होकर ईश्वर और सत्यविद्या के उपदेश में जिनका श्रेष्ठ समय बीतता है, वे 'सुकालिन्' कहलाते हैं। ८. यमराजाः = जो पक्षपात को छोड़कर सदा सत्य न्यायव्यवस्था ही करने में रहते हैं, उन को 'यमराज' कहते हैं। ९. पितृ-पितामह-प्रपितामहाः = जो वीर्य को

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रपितामहाः, १०-मातृपितामहीप्रपितामह्यः, ११-सगोत्राः, १२-आचार्यादिसम्बन्धिनो भवन्ति पितरः। ऋषिणा एतेषां विग्रहनिदर्शनपूर्वकमर्था अपि प्रत्यपाद्यन्त। तत्रायमाक्षिपति—

'इयं स्वामिदयानन्दस्य सत्यार्थप्रकाशे प्रतिपादिता श्राद्धस्य परिभाषा मदुद्धृत-प्रमाणैर्दर्शिता यत् सा श्रुतिविपरीता।'

परमस्माभिर्दयानन्दपरिभाषिता इमे वेदानुकूला दर्शिताः साधिताश्च मन्त्राः।

अत्रायं यदाह—"पाश्चात्याः पदार्थविद्यायां निपुणाः सन्ति। दयानन्दरीत्या तेषां श्राद्धमायाति।" इति, तदपि अज्ञानमेव। यतो हि तत्रर्षिराह—"ये सोमे जगदीश्वरे पदार्थविद्यायां च सीदन्ति ते सोमसदः।" भारतीयान् विहाय नोभयोरन्यदेशीयाः सीदन्ति। पदार्थविद्यायां निपुणास्ते परं न जगदीश्वरे योगाभ्यासेन सीदन्ति, सीदन्तु नाम, तेऽपि तदा श्रद्धया सत्कार्या भविष्यन्ति लोकैः। परं भवान् समादधीत यदा भवतां पिता पितामहो वा मृतः सन्

निषेकादि कर्मों को करके उत्पत्ति और पालन करें और २४ वर्ष ब्रह्मचर्याश्रम से विद्या को पढ़ें, उनका नाम 'पिता' या 'वसु' है। जो पिता का पिता या ४८ वर्ष ब्रह्मचर्य पालन कर विद्याभ्यास कर पक्षपातरहित होकर दुष्टों को रुलानेवाला है, वह 'पितामह' अथवा 'रुद्र' कहलाता है। जो पितामह का पिता आदित्य के समान उत्तम गुणों का प्रकाशक ४८ वर्ष तक ब्रह्मचर्याश्रम से विद्या को पढ़के सब जगत् का उपकार करता है, उसको 'प्रपितामह' अथवा 'आदित्य' कहते हैं। १०. मातृ-पितामही-प्रपितामह्यः = पित्रादिकों के समान विद्याप्रसार-स्वभाववाली स्त्रियों की अत्यन्त सेवा करनी चाहिये। ११. सगोत्राः = समीपवर्ती ज्ञाति के पुरुष भी सेव्य हैं। १२. आचार्यादिसम्बन्धिनः = जो पूर्ण विद्या के पढ़ानेवाले, श्वसुरादिसम्बन्धी तथा उनकी स्त्रियाँ भी सेव्य हैं। ऋषि ने इनके व्युत्पत्तिप्रदर्शनपूर्वक अर्थों का उक्तरूप में प्रतिपादन किया है।

उक्त पर इनका आक्षेप है—

'स्वामी दयानन्द के सत्यार्थप्रकाश में प्रतिपादित श्राद्ध की परिभाषा मेरे उद्धृत प्रमाणों से दिखलाई गयी है कि वह सब श्रुतिविपरीत है।'

पर करपात्रिन् जी हमने तो इन्हें ऊपर वेदानुकूल सिद्ध किया है।

इस प्रकरण में पारिजातकार ने जो लिखा है कि—"पाश्चात्य लोग पदार्थविद्या में निपुण हैं, तो दयानन्द की रीति से उनका श्राद्ध भी करना चाहिये।" वह सब अज्ञानजन्य है। वहाँ पर महर्षि ने लिखा है कि—"जो सोम अर्थात् जगदीश्वर और पदार्थविद्या में निपुण हैं, वे सोमसद् हैं"। भारतीयों को छोड़कर दोनों में तो वे लोग निपुण नहीं होते। वे योगाभ्यास द्वारा परमेश्वर में स्थित नहीं हैं। यदि वे भी उक्तगुण-सम्पन्न हों तो उनका भी सत्कार करना चाहिये। पर आप

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अमेरिकायां पाश्चात्यदेशे वा जनुरधारयत्, पुनरपि मृतिमुपगतः, भवत्कल्पितपितृलोकमेव प्राप्तः। श्राद्धकाले चावाहितस्तदोपस्थितस्य तस्य ब्राह्मणशरीरप्रविष्टस्य अस्पृश्यस्याऽपि भवन्तस्तु स्वास्थया श्राद्धकृत्यं करिष्यन्त्येवेति न संशयः।

पृ० १५४०, पं० १—यदाह—"अग्निविद्यानिपुणास्तद्रीत्या अग्निष्वात्ता भवन्ति। तत्र स्वर्णकारलौहकारादयो भवन्ति।" इत्यपि स्वमन्दमतित्वख्यापनमेव, अग्निष्वात्तशब्दस्याविकलव्युत्पत्तिलभ्यार्थस्यावगमनाक्षमत्वात्। इहापि महर्षिणोक्तम्—"यैरग्नेर्विद्युतो विद्या गृहीतास्ते अग्निष्वात्ताः" इति। तथा पञ्चमहायज्ञविधौ स्वामिनोक्तम्—"अग्निरीश्वरः सुष्ठुतया आत्तो गृहीतो यैस्ते, यद्वा अग्नेर्गुणज्ञानात् पृथिवी-जल-व्योम-यान-यन्त्ररचनादिका पदार्थविद्या सुष्ठुतया आत्ता गृहीता यैस्ते।" इति लेखेन नैव स्वर्णकारादयोऽग्नेर्विद्यायां निपुणा वक्तुं शक्यन्ते। कश्चिदनार्योऽर्य एव तथा प्रलपेत्।

विद्या हि नाम सत्यार्थप्रकाशे यथार्थज्ञानम् (यजुः० ४० । १४) इति मन्त्रे आत्मशुद्धान्तःकरणसंयोगधर्मजनितं पदार्थदर्शनम्। न च स्वर्णकारादयोऽग्नेर्विद्युतः, भौतिकाग्नेः सूर्यस्य परमेश्वरस्य वा विद्यायां निपुणाः। न च सत्कर्तव्याः पञ्चाग्निशोषितदेहा अपि दम्भितपस्विनोऽपि।

बताइये, जब आपके पिता या पितामह ने मरकर अमेरिका आदि पाश्चात्य देश में जन्म धारण कर लिया और फिर मर गये, तो आप के मत से वे पितृलोक को प्राप्त हो गये। श्राद्ध के समय बुलाये गये उपस्थित होकर ब्राह्मण-शरीर में भी प्रविष्ट हो गये, वे चाहे अस्पृश्य ही क्यों न रहे हों, आप लोग आस्थानुरूप उनका श्राद्ध करेंगे ही, इसमें संशय नहीं है।

पृ० १५४०, पं० १—"अग्निविद्या में निपुण लोग समाजियों की आस्था से 'अग्निष्वात्त' होंगे। वे सुनार या लुहार होंगे।" यह कहना भी अपना मन्दमतित्व ही प्रकट करना है; क्योंकि आप अग्निष्वात्त की अविकल व्युत्पत्ति से लभ्य अर्थ ही नहीं समझ पाये। यहाँ पर भी ऋषि ने कहा है कि—"अग्नि परमेश्वर का अच्छे प्रकार जिन्होंने ग्रहण किया है, वे 'अग्निष्वात्त' कहलायेंगे।" ऐसे केवल स्वर्णकार और लुहार होंगे, ऐसी विचारणावाली आपकी बुद्धि बुद्धि नहीं कही जा सकती। ऐसा कोई अनार्य अर्य (स्वामी) कह सकता है।

सत्यार्थप्रकाश में यथार्थ ज्ञान का नाम विद्या (यजुः० ४० ।१४) कहाती है। जबकि आत्मा के शुद्ध अन्तःकरण के संयोगधर्मजनित पदार्थदर्शन हैं। स्वर्णकार को इन सब में निपुणता नहीं होती। यदि कदाचित् जन्मजात स्वर्णकार उक्तगुण से विभूषित हो तो वह भी सत्कर्तव्य होगा। क्या तुलाधार आदि की कथा आपको याद नहीं है? पञ्चाग्नि तप से शरीर सुखानेवाले ढोंगी तपस्वी मिथ्याचारी कभी सत्करणीय नहीं हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्चाह—"बर्हिषदो व्यवहारविदः के भवन्तीति नोक्तम्।" इत्यपि मन्दवचो न पाण्डित्य-द्योतकम्, 'अनुक्तमप्यूहति पण्डितो जनः' इति परिभाषाबहिर्गतत्वात्।

इहाधिकं ज्ञेयं भवता यत् पञ्चमहायज्ञविधौ 'बर्हिषि सर्वोत्कृष्टे ब्रह्मणि शमदमादिषूत्तमेषु गुणेषु वा सीदन्तीति बर्हिषदः' इति। अत्र 'वा' समुच्चयार्थे ज्ञेयः।

यदाह—"ये सोमैश्वर्यमोषधीरसं वा पिबन्ति ते सोमपाः, यज्ञेनोत्तममोषधीरसं पिबन्ति पाययन्ति वा ते सोमपा' इति दयानन्दव्युत्पत्त्या अद्य एलोपैथचिकित्सका भवन्ति।" इति वदतोऽस्य बुद्धिरेव विपरीता, अतोऽस्माकं दयापात्रमयं श्रीकरपात्रः। शिष्टं न विशिष्टं किमपि।

एवमवशिष्टशब्दानामपि ज्ञानमेवम्—आज्यं घृतम्, यद्वा 'अज गतिक्षेपणयोः' धात्वर्थादाज्यं विज्ञानम्, तद्धनेन पान्ति पालयन्ति ये विद्वांसस्ते 'आज्यपाः'। ईश्वरविद्योपदेश-करणस्य ग्रहणस्य च शोभनः कालो येषां ते, यद्वा ईश्वरज्ञानप्राप्त्या सुखरूपः सदैव कालो येषां ते 'सुकालिनः'। ये पक्षपातं विहाय न्यायव्यवस्थाकर्तारः सन्ति ते 'यमराजाः'।

पृ० १५४०, पं० ६—यदुच्यते—"यमाय सोमः पवते यमाय क्रियते हविः०' यमाय देवाय सोमः पवते पूयते अभिषूयते।" इत्यस्य यद् व्याख्यानं तन्न सङ्गतम्। नहि कश्चिद् यमो भव-

---

"स्वामी दयानन्द ने यह नहीं बताया कि 'बर्हिषदः' व्यवहार जाननेवाले कौन होते हैं?" पारिजातकार का यह मन्द वचन पाण्डित्य का द्योतक नहीं है। 'पण्डित जन तो अनुक्त का भी विचार कर लेते हैं' पर ये इस परिभाषा से बाहर हैं।

आपको इस विषय में और भी बताया जा रहा है कि पञ्चमहायज्ञविधि में 'बर्हि अर्थात् ब्रह्म और शम-दमादि उत्तम गुणों में जो स्थिर हों, वे बर्हिषद् कहाते हैं।' कहा है। यहाँ पर 'वा' समुच्चयार्थक जानना चाहिये।

"स्वामी दयानन्द की 'सोमपा' शब्द की व्युत्पत्ति से एलोपैथ चिकित्सकों का ग्रहण होगा" यह कहनेवाले करपात्री जी की बुद्धि ही विपरीत है, अतः दयनीय है; क्योंकि स्वामी जी ने यह भी लिखा है कि "यज्ञ के द्वारा उत्तम ओषधिरस पीने और पिलानेवाले 'सोमपा' होते हैं।"

इसी प्रकार विवेचक लोग अवशिष्ट शब्दों के विषय में भी समझ लें। यथा—आज्य अर्थात् घी व विज्ञान से पालित होने या करनेवाले 'आज्यपा' कहलाते हैं, ईश्वरज्ञान-प्राप्ति से स्वकाल व्यतीत करनेवाले 'सुकाली' कहलाते हैं और जो पक्षपातशून्य हैं, न्यायव्यवस्थापक हैं, वे 'यमराज' हैं।

पृ० १५४०, पं० ६—'यमाय सोमः पवते०' इस मन्त्र का श्री करपात्र ने जो अर्थ किया, वह कदापि सङ्गत नहीं है; क्योंकि आप तो एक विशेष कल्पित यमराज, परमात्मा से भिन्न मृत्यु

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

त्कल्पितो वास्तविकः। यमस्यानेकार्थत्वात्तत्र परमात्मा एव यमः। न च पवते इत्यस्याभिषूयतेऽर्थः सम्भवति, पूञ् धातोः पवनार्थत्वात्, निघं० २।१४ गतिकर्मा, पवस्वेति अध्येषणाकर्माऽपि। अतोऽस्यार्थस्त्वयम्—'यमाय नियन्त्रे परमात्मने सोम ऐश्वर्ययुक्तो जीवात्मा पवते आत्मानं ज्ञानकर्मभ्यां पुनाति। यमाय न्यायकर्त्रे च तस्मै एव अनेन जीवात्मना हविर्भक्तिः क्रियते। तमेव यमं यज्ञः सङ्गन्तुमर्हः सन् गच्छति प्राप्नोति। यथा अरंकृतोऽलङ्कृतोऽग्निरेव इतः सन् हुतं वस्तु प्रापयति।

पृ० १५४१, पं० १—यदाह—'यो ममार प्रथमो मर्त्यानाम्०' (अथर्व० १८।३।१३) इति मन्त्रमाद्धृत्य "यः प्रथमो मृतः स एव अन्यान् मारयित्वा लोकान्तरं प्रापयति" इति, तत्र पृच्छामि यः प्रथमो म्रियते स एव मारयति तर्हि किं सविता उत्पादनं मारणं वा कर्म अत्यजत्? तत्स्थानेऽयमेव प्रभारी अधिकारी जातः? किं प्रमाणमत्र? किमसौ यमोऽपि सर्वव्यापकः सर्वान्तर्यामी सन् सर्वनियन्ता? प्रतिस्पर्धी वाऽपरः परमेश्वरः? नैतत् सम्भवति।

पृ० १५४१, पं० १४—'अङ्गिरोभिर्यज्ञियैरागहीह०' (अथर्व० १८।१।५९) (सङ्केतस्तु भ्रमपूर्णः—१८।१।९ इति), (१८।२।३) इत्यस्मिंश्च यमो राजा कश्चिदैतिहासिको

का देवता मानते हैं, जो अवास्तविक है। यम शब्द के अनेकार्थ हैं। यथा—नियन्ता परमात्मा, न्यायाधीश, वायु आदि। 'पूयते' का 'अभिषूयते' अर्थ करना भी अयुक्त है। 'पूञ्' धातु पवनार्थक, गतिकर्मा और अध्येषणाकर्मा है। अतः इस मन्त्र का ठीक अर्थ यह है—'सर्वनियन्ता परमात्मा के लिये ऐश्वर्यवान् जीवात्मा स्वयं को शुद्ध करता है। इस न्यायकारी के लिये भक्तिरूप हवि की जाती है। उसी को यज्ञ प्राप्त होता तथा अग्नि से तपा हुआ रस ऊपर जाता है।'

पृ० १५४१, पं० १—आपने 'यो ममार प्रथमो मर्त्यानाम्०' का अर्थ किया है कि "वह यमराज ही सबसे पहले मरकर फिर सब को मारकर दूसरे लोक पहुँचाता है।" इस पर आप बताइये कि तो क्या नियन्ता परमात्मा ने जीवनदान और मृत्यु की व्यवस्था का कार्य छोड़कर किसी आपके कल्पित यमराज को प्रभारी अधिकारी अपने स्थान पर बना दिया है? यदि ऐसा है तो इसमें प्रमाण क्या है? क्या वह कल्पित यम भी सर्वव्यापक व सर्वान्तर्यामी और सर्वनियन्ता है? क्या यह प्रतिस्पर्धी अपर परमेश्वर है? यह कदापि सम्भव नहीं। उक्त मन्त्र का तो तात्पर्य यह है कि जो व्यक्ति मनुष्यों में प्रथम श्रेणी का हो, मर गया या इस लोक में प्रगतिशील होकर आगे बढ़ा है, ऐसे मनुष्यों के हितकारी तथा मेल करानेवाले न्यायकारी राजा को तुम भी पूजो।

पृ० १५४१, पं० १४—'अङ्गिरोभिर्यज्ञियैरागहीह०' इस मन्त्र का—"अङ्गिरा नामक पितरों के साथ यमराज आओ, विरूपाख्य महर्षि के गोत्रजों के साथ आओ, कुशाओं पर बैठकर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्याख्यातः, दशमे च मन्त्रेऽपि न तवेष्टो यमः। वस्तुतस्तु प्रथमे मन्त्रे यमशब्देन संयमशीलो जनः, द्वितीये न्यायकारी परमेश्वरः, एकविंशेऽपि न्यायकारी परमात्मा। सम्पूर्णोऽर्थो न विस्तरभिया लिख्यते, विद्वद्भिर्यथास्थाने द्रष्टव्योऽसौ।

यच्च 'ये जीवा येन मृताः०' (अथर्व० १८। ४। ५७) (सङ्केतोऽशुद्धः) अत्र 'येऽग्निदग्धाः०'(अथर्व० १८। २। ३५) (सङ्केतोऽशुद्धः) अत्राऽपि न मृतपितृश्राद्धविधानम्, वास्तविकार्थस्यान्यत्वात्। यथा—'ये जीवा उत्साहवन्तः, मृता अनुत्साहिनः, उत्पन्नाश्च बालकाः, यज्ञियाः पूज्या वृद्धाः सन्ति, तेभ्यो घृतस्योदकस्य रचिताः कुल्या मधुधारापूर्णाः पूरवत्यो भवन्तु।' तथा—'येऽग्निहोत्रं कुर्वाणा गृहस्था अग्निदग्धा आहवनीयादिभौतिक-यज्ञाग्निकर्मत्यागिनः संन्यासिनस्ते दिवो ज्ञानस्य मध्ये स्वधया आत्मधारणशक्त्या आनन्दिता भवन्ति। हे जातवेदो ज्ञानिन् त्वं तान् जानीषे, ते स्वधयाऽन्नेन स्वधारणशक्तिमवन्तं यज्ञं पूजनीयव्यवहारं सेवन्ताम्।'

श्राद्धविचारः

पृ० १५४३—अत्र ब्राह्मणमुद्धृत्य देवपितृतीर्थकल्पनया यत् पिण्डदानं भवता मन्यते

हविः स्वीकार करो।" यह अर्थ किया है। यहाँ बताइये कि विरूप ऋषि के गोत्रज तो मर चुके, जो कि नश्वर थे, तो वेद क्या उनके बाद बने? जो उन नश्वरों का वर्णन आया। तथा मृतों की आत्मा का कुशासन पर बैठना कैसे सम्भव है? इस मन्त्र का स्थान-सङ्केत भी अशुद्ध दिया है। इसी प्रकार अथर्व० १८। २। ३ में विशिष्ट राजा यम तथा इसी के आगे दशम मन्त्र में भी आपका अभिमत यमराज नहीं है।

'ये च जीवा०' (अथर्व० १८। ४। ५७) (इसका भी सङ्केत अशुद्ध है) इस मन्त्र का पिण्डदान में विनियोग आप बता रहे हैं, चलो हम भी मानते हैं, पर वह पिण्ड (भात) दान जीवितों को ही सम्भव है। इस मन्त्र का वास्तविक अर्थ यह है कि—'जो जीव अर्थात् उत्साहसम्पन्न तथा मृत अर्थात् अनुत्साही हैं, जो उत्पन्न हुए बालक हैं, या जो यज्ञिय अर्थात् पूजायोग्य वृद्धजन हैं, उन सब के लिये मधुर जलधाराओंवाली कुल्याएँ उमड़ती हुई बहें।' इसी प्रकार 'येऽग्निदग्धाः०' अर्थात् 'अग्निहोत्र करनेवाले तथा संन्यासी लोग हैं, वे ज्ञान के मध्य में आत्मधारणशक्ति से आनन्दित होते हैं। हे ज्ञानी! तुम उनको जानते हो, वे अन्न के माध्यम से उत्तम व्यवहार को प्राप्त करते हैं।'

श्राद्धविचार

पृ० १५४३—यहाँ पर ब्राह्मणभाग को उद्धृत कर पितृतीर्थ व देवतीर्थ से पितरों और देवताओं को पिण्डदान का विनियोग भी कल्पित है; क्योंकि वह विधि जीवित पितरों और देव

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तदशास्त्रीयम्, मृतानामसान्निध्यात् तत्प्राप्तेरसम्भवात्।

पृ० १५४३, पं० १४—पृ० १५४५, ५ पङ्क्ति यावन् ये मनुस्मृति श्लोका उद्धृतास्ते प्रक्षिप्ता एव। उक्तश्लोकेषु मृतश्राद्धकथनं मनोः ३। ८०-८२ यावज्जीवितपितॄणां श्राद्ध-विधानेन निरस्यते। अग्रेऽप्युक्तानि पुराणप्रमाणानि वेदविरुद्धत्वान्नाधिकं पुनः खण्ड्यन्ते, पूर्व-विवेचितविधिनैव समाहितत्वाच्च। पं० भीमसेनोऽपि मनुस्मृतौ प्रक्षिप्तांशान् समर्थयते।

सत्यं त्विदमेव यन्नवनिर्मितपुराणस्मृत्यादिषु परस्परविरुद्धा उक्तयः श्रुतिविरुद्धा अपि सन्ति। विद्वत्संघेन वेदानुकूलाः सूक्तय इतिवृत्तं च पृथक् संगृह्य प्रकाश्याः, येन सदसद्विवेचने नाधिकसमयव्ययो भवेत्। प्राचीनधर्मशास्त्रविपरीतवचांसि बहिष्करणीयानि। यथा यमस्मृतौ—

गङ्गातोयेषु यस्यास्थि प्लवते शुभकर्मणः।
न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कथञ्चन॥

तद्विपरीतं च शिवस्मृतौ—

अर्थात् विद्वानों के लिये ही सम्भव है। दूर होने से मृतों के लिये अन्नादि-प्राप्ति सर्वथा असम्भव है।

पृ० १५४३, पं० १४ से पृ० १५४५ की पाँचवीं पंक्ति तक आपने जो यहाँ मनुस्मृति के श्लोक उद्धृत किये हैं, वे प्रक्षिप्त हैं। उक्त श्लोकों में मृत श्राद्ध का प्रतिपादन करना ३। ८०-८२ श्लोकों में जीवित पितरों के प्रतिपादित श्राद्ध के विरुद्ध है। आगे भी कथित पुराणों के प्रमाण वेदविरुद्ध हैं, अब पुनः अधिक खण्डन यहाँ नहीं किया जा रहा है, पूर्व विवेचित विधि से ही उनका भी समाधान हो जाता है। श्री पं० भीमसेन शर्मा भी मनुस्मृति के श्लोकों के प्रक्षिप्त होने का खण्डन करते हैं।

सत्य तो यह है कि नवनिर्मित पुराण स्मृति आदि में परस्पर विरुद्ध उक्तियाँ श्रुतिविरुद्ध भी हैं। विद्वानों के द्वारा पुराणों की वेदानुकूल सूक्तियाँ और इतिहास संगृहीत करके पृथक् प्रकाशित करना चाहिये। जिससे सत्य और असत्य को छाँटने में अधिक समय न लगे। उस संग्रह से धर्मशास्त्रविपरीत का बहिष्कार कर दे। यथा यमस्मृति का वचन—

'जिस शुभकर्मी की अस्थि गङ्गा के जलों में तैरती है, उसका ब्रह्मलोक से पुनरागमन नहीं होता।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अस्थिमूत्रपुरीषाणि नखकेशांस्तथैव च।
प्रक्षिपेद् यः सरित्तोये भृशन्ताड्यः स भूभुजा॥

अतो मृतस्य पिपासाशान्तयेऽश्वत्थे जलभृतघटावलम्बनादि बुद्धिशून्यक्रिया।

नन्विदं पितृकर्म तर्पणं श्राद्धं वा न जीवितपितॄणाम्, प्रत्युत मृतानामेव कर्तव्यम्, तच्च प्रात्यहिकं वार्षिकं वाऽऽश्विनमासे येषां पूर्वजा मृताः सन्तीति, तैश्चेन्न, सर्वेषां गृहमेधिनां पञ्चयज्ञानां नित्यकर्तव्यत्वेन विहितत्वात् पितृषु पितामहादिषु जीवत्स्वेव।

न च जीविताः पितरस्तु स्वयमेव भक्षयिष्यन्ति क्षुधिताः, परं ये पितृलोकं दिवं गतास्ते तु अकृते श्राद्धे बुभुक्षया पीडिताः स्थास्यन्ति, पुत्रादिभिश्च दत्तेनान्नादिना क्षुधानिवृत्तिं विधास्यन्तीति वाच्यम्, उदरे क्षुधानुभूतेस्तन्निवृत्तिसाधनकर्मेन्द्रियाप्तिरीश्वरस्यान्याय-दोषाभ्यागमप्रसङ्गात् क्षुधाधारस्य जठरस्य सत्त्वान्न वावयववत्त्वं स्थूलशरीराधिगतिप्रसङ्गाच्च, परं स्थूलशरीरे भस्मीभूते क्षुधाया एव अननुभूतेः।

भला, जब शुभकर्मी है, तो उसकी अस्थि (हड्डी) की गङ्गा-जलों में तैरने की आवश्यकता ही क्या रहेगी। इसके विपरीत शिवस्मृति की यह उक्ति वैज्ञानिक और बुद्धिसङ्गत है—

'अस्थि, मूत्र, पुरीष व नख, केशों को जो व्यक्ति नदीजल में फैंके, वह दण्डनीय है।'

अतः मृतक की पिपासाशान्ति के लिये पीपल के वृक्ष पर जल से भरा हुआ घड़ा टाँगना भी बुद्धिशून्य कार्य है; क्योंकि प्यास शरीर-संयोग पर ही सम्भव है।

शङ्का—यह पितृकर्म तर्पण व श्राद्ध जीवित पितरों के नहीं, प्रत्युत मृतकों के ही करने चाहिये। वह प्रतिदिन वार्षिक क्वार के मास में जिनके पितर मर गये हैं, उन्हें करना चाहिये।

समाधान—यह कथन ठीक नहीं; क्योंकि जीवित पिता-पितामह आदि का ही तर्पण व श्राद्ध गृहस्थियों को करना चाहिये। अत एव पञ्चयज्ञ नैत्यिक विधि में आते हैं, जिसमें पितृयज्ञ सम्मिलित है।

ऐसा नहीं सोचना चाहिये कि भूखे होने पर जीवित पितर तो स्वयं ही खा लेंगे, उनके लिये विधान करने की आवश्यकता ही क्या है? परन्तु जो मरकर पितृलोक को चले गये हैं, वे तो बिना श्राद्ध-विधान के भूख से पीड़ित होंगे, सो विधान की आवश्यकता इनके ही लिये है। पुत्रादि से दिये अन्न से उनकी क्षुधानिवृत्ति हो जायेगी; क्योंकि पेट में क्षुधा लगना और उसकी निवृत्ति का उपाय तो तब ही होगा। जबकि उनके भौतिक उदर और इन्द्रियादि अङ्गों के अभाव में आधार के न होने पर भूख का अस्तित्व मानना अकृताभ्यागम दोष से युक्त ईश्वरसृष्टि होने लगेगी और अवयववत्ता होने से स्थूल शरीर होने का प्रसङ्ग उपस्थित हो जायेगा। पर उनके स्थूलशरीर तो भस्मसात् होने से क्षुधा की अनुभूति का प्रसङ्ग ही नहीं आता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किञ्च, पितृलोकं तमेवैकं पुण्यात्मनां पापिनामपि गतानां व्यवस्थितत्वाच्चापि न्यायकारिण ईश्वरस्यान्यायकरणाध्यापत्तिः स्यात्।

इहेदमपि वक्तव्यं यत् ते पितरः कियन्तं कालावधिं यावदत्र वसन्ति? निश्चितश्चेदवधिर्बोध्यः, अज्ञातश्चेत् कथं बहुमूल्यपायसान्नफलादीनां प्रेषणम्, वैयर्थ्यापातात्। न त्वत्रेदमपि वाच्यं यत् पितृपुत्रादिसम्बन्धो जीवे अस्ति अथवा शरीरे, उताहो जीवयुक्ते शरीरे? शरीरविशिष्टे जीव एव। तदा जीववियुक्ते शरीरेऽपि अन्त्येष्टिं गते न भूयः सम्बन्धोऽसौ, कथं पुनः पितृश्राद्धसङ्गतिः?

ननु देवलस्मृतौ—

देवो यदि पिता जातः शुभकर्मानुयोगतः।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति॥
गन्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत्।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति॥

इति प्रतिपादनमनुकरणीयमिति चेन्न, तत्सर्वस्य मिथ्याभूतत्वात्, ईश्वरानुग्रहेण च पूर्वत एव तत्तद्योनौ अन्नादिद्रव्याणां व्यवस्थितत्वाच्च श्राद्धमकुर्वतामपि पितॄणां यथायोनिगतानां बुभुक्षाप्रशमनव्यवस्थया, श्राद्धे ब्राह्मणभुक्तान्नादिपाचनप्रक्रियया तत्सारेण रसरक्तादि-

---

दूसरे पितृलोक को दोनो ही पितर पहुँचे हैं, चाहे वे पुण्यात्मा हों या पापी। इस प्रकार तो ईश्वर का अन्याय सिद्ध होने लगेगा।

यहाँ यह भी बताना चाहिये कि वे पितर कितने-कितने समय वहाँ बसते हैं। इस अवधि के ज्ञात न होने पर बहुमूल्य खीर आदि का प्रेषण व्यर्थ होने लगेगा। यहाँ यह भी नहीं कह सकते कि पिता-पुत्र का सम्बन्ध उनके आत्मा से है या शरीर से या आत्मयुक्त शरीर से? वस्तुतः तो शरीरविशिष्ट जीव से ही है। मरने पर फिर सम्बन्ध अज्ञात हो जाता है। फिर पितृश्राद्ध की सङ्गति कैसे सिद्ध होगी?

शङ्का—देवलस्मृति में लिखा है कि पिता मरकर शुभ कर्मों के कारण यदि देव बने हैं तो श्रद्धान्न अमृत बनकर उन्हें मिलता है। गन्धर्वयोनि में भोग बनकर, पशुयोनि में तृण बनकर और नाग बनने पर वायु बनकर उन्हें प्राप्त होता है। क्या यह सब ग़लत है।

समाधान—हाँ, मिथ्या व अवैज्ञानिक और बुद्धिबाह्य है। ईश्वर की व्यवस्था से सभी प्राणियों के लिये अन्नादि तत्तद्योनि में पूर्वतः व्यवस्थित है। श्राद्ध न करनेवालों के भी पितर किसी योनि में भूखे नहीं रखे जाते। ब्राह्मणभुक्त अन्न की पाचन के बाद जो प्रक्रिया है, वह प्रत्यक्ष है।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निर्माणात्, निःसारस्य पुरीषत्वात्। नैतेनामृतनिर्माणयन्त्रं कस्यचित् पौराणिकस्य गृहे आविष्कृतम्।

पृ० १५४५, पं० ९—यदत्र मनोरुद्धरणं कृतं यत्—

ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्।
विप्रवद्वापि तं श्राद्धं स्वकं पितरमाशयेत्॥ मनु० ३।२२०॥

इत्येतेनैव जीवितस्य पितुः श्राद्धं त्वयैव साधितम्, अतोऽत्रायं 'प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः' इत्यात्मकप्रतिज्ञाहानिनामकनिग्रहस्थाने निगडितः स्वयम्।

'श्राद्धात् परतरं नान्यच्छ्रेयस्करमुदाहृतम्।
तस्मात् सर्वप्रयत्नेन श्राद्धं कुर्याद्विचक्षणः॥'

इति सुमन्तुवचनेन तु अहमपि सहमतः, श्राद्धस्यावश्यं विधीयमानत्वात्। यतो नात्र मृतानां त्वया तद्वचोभिः श्राद्धं समर्थितम्।

'देवकार्यादपि सदा पितृकार्यं विशिष्यते।
देवताभ्यः पितॄणां हि पूर्वमाप्यायनं शुभम्॥'

एतेनोद्धृतेन ब्रह्मवैवर्तपुराणवचनेन जीवितानां श्राद्धकर्मणोऽखण्डिततया कर्तव्यत्वमनुमन्यते।

पृ० १५४६, पं० ४—आपस्तम्बादिनाम्नोद्धृतं वचनं केनापि कल्पितं कथावाचकेन।

उसका सारांश ही रस-रक्तादि बनता है, निःसार भाग पुरीष बनता है। इससे अमृत बनाने की मशीन किसी पुराणमन्त्री के घर होगी।

पृ० १५४५, पं० ९—जो यहाँ पारिजात में मनु का (३।२२०) उद्धरण दिया है कि 'पिता के जीवित रहने पर भी श्राद्ध में अपने पिता को भी भोजन कराये।' इससे जीवित पितर का श्राद्ध सिद्ध हो जाने से यह लेखक स्वयं ही 'प्रतिज्ञाहानि' नामक निग्रहस्थान में फँस गया।

'श्राद्धात् परतरं नान्यच्छ्रेयस्करमुदाहृतम्' अर्थात् 'श्राद्ध से अन्य कल्याणकर कुछ भी नहीं है, अतः समझदार व्यक्ति को चाहिये कि वह श्राद्ध करने से कभी न चूके।' सुमन्तु के इस वचन से तो हम भी सहमत हैं; क्योंकि उनके वचनों से आपने यहाँ मृतकश्राद्ध तो सिद्ध किया नहीं है। तथा ब्रह्मवैवर्तपुराण के इस उद्धृत वचन से तो जीवितों का श्राद्ध खण्डित नहीं होता, अपितु कर्तव्यता प्रतिपादित है।

पृ० १५४६ पं० ४—यहाँ आपस्तम्बादि के नाम से उद्धृत वचन किसी कथावाचक के द्वारा ही कल्पित प्रतीत हो रहे हैं। मरीचि नाम से उद्धृत वचन में भी 'मेरा अपना प्रिय भोजन'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यन् मरीचिनाम्ना कल्पितं तत्रापि 'मत्प्रियमात्मनः' इति पाठेन तु श्राद्धकर्तुर्मांसमद्यादिसेवकस्य प्रियानुमतभोजने सर्वभक्षिण एव ब्राह्मणा भोजयितव्याः स्युः। तद् भोजनं श्राद्धकर्तुरेव कथं प्रियं स्याद् यदा 'प्रेतान् पितॄनप्युद्दिश्य' इति विधानम्?

पृ० १५४६, पं० ११—यदाह—'मनुष्येभ्यस्तथात्मनः' इत्यनेन श्राद्धभाजनानि के मनुष्यास्तेऽभीष्टा इति नैवोक्तं भवता। किन्तेऽपि मृता एव जीविता वा? यच्चाह—'नरकस्थाश्च तृप्यन्ति पिण्डैर्दत्तैस्त्रिभिर्भुवि' इत्यस्य हिन्दीकारो लिखति—"नरक में स्थित पितरों का उद्धार इन पिण्डों से होता है।" साम्प्रतं ब्रूतां तावद् यत् परमात्मव्यवस्थया स्वकर्मानुसारं ते पितरो नरकं भोक्तुं नियोजिताः, परं पिण्डदापनेन भवता तेषामुद्धारः कारितः। तदा किं तव परमात्मा अदूरदर्शी एवं नाज्ञातवान् यदहं निष्फलं कर्म नरकयोनिप्रेषणरूपं करोमि, यतो हि पिण्डदापनेन करपात्रशिष्यास्तु तत्काले उद्धारं विधास्यन्ति?

पृ० १५४७, पं० १—'नामगोत्रं पितॄणां हि प्रापकं हव्यकव्ययोः' इत्युक्तिस्तु भवतः पूर्ववचसा विरुध्यते यद् 'हव्यं देवेभ्यः कव्यं च पितृभ्यः' इति। अत्र तु पितॄणामेव श्राद्धं क्रियते पुनस्तत् कव्यमेव स्यादेवमेकतरस्यास्य पाठः कर्तव्य आसीत्। अपरं च तृतीयचतुर्थादिजन्मसु

इससे श्राद्धकर्ता यदि मद्यमांसादि पसन्द करता है तो सर्वभक्षी ही ब्राह्मण भोजे जायेंगे। यहाँ यह भी शङ्का है कि वह भोजन श्राद्धकर्ता का प्रिय क्यों हो? जबकि प्रेत पितरों को उद्दिष्ट करके श्राद्ध किया जा रहा है।

पृ० १५४६, पं० ११—'मनुष्यों का हव्य कव्य से श्राद्ध करना चाहिये' इसमें वे श्राद्ध करनेयोग्य कौन से मनुष्य होंगे? क्योंकि आप देव और पितरों को तो मनुष्य मानते ही नहीं। यह भी कहना चाहिये कि क्या वे मनुष्य जीवित हैं या मृत? तथा यह कहना कि—'नरक में स्थित पितर भूमि पर तीन पिण्ड देने से तृप्त हो जाते हैं'। इसका हिन्दीकार लिखता है कि—"नरक में स्थित पितरों का उद्धार इन पिण्डों से होता है।" अब जरा बताइये कि परमात्मा की व्यवस्था से वे पितर कर्मानुसार नरक भोगने के लिये भेजे गये थे, पर पिण्ड दिलवा कर आपने उनका उद्धार करा दिया। तो क्या आपका परमात्मा अदूरदर्शी था या नहीं जानता था कि मैं नरकयोनि-प्रेषणरूप निष्फल कर्म कर रहा हूँ; क्योंकि मध्य में ही पिण्ड दिलवा कर करपात्री जी के शिष्य उद्धार कर देंगे?

पृ० १५४७, पं० १—'नाम-गोत्र का उच्चारण ही पितरों को हव्य-कव्य पहुँचाता है।' आपका यह कथन तो पूर्व वचन से विरुद्ध पड़ रहा है कि—'हव्य देवों के लिये और कव्य पितरों के लिये होता है।' यहाँ इस श्लोक में पितरों का श्राद्ध इङ्गित किया गया है, तो केवल कव्य शब्द का ही पाठ होना चाहिये, दोनों हव्य-कव्य का नहीं। दूसरे यह भी विचारणीय है कि तीसरे चौथे आदि जन्मों में योनि व गोत्र बदलेंगे और अनेक गोत्र होंगे, तो किसका श्राद्ध किस प्रकार ग्राह्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विविधगोत्रयोनित्वात् कतमस्य वा श्राद्धं केन प्रकारेण ग्राह्यं सम्भवेत्? सर्वेषां ग्राह्यत्वे एकतमेनैवोद्धृतत्वान्नरकादन्येषां श्राद्धवैयर्थ्यापत्तेः। वस्वादित्रिवर्गविभक्तपितॄणां देवतात्वेऽपि अव्यवस्थाप्रश्नस्त्ववार्य एव।

पृ० १५४७, पं० ११—मेधातिथिगोविन्दराजयोः 'पितृद्वेषान्नास्तिक्याद्वा यः पितृकर्मणि न प्रवर्तते तं प्रत्येतत् प्रवर्तनार्थं देवातात्वाध्यारोपेण पितॄणां स्तुतिवचनम्' इति वचने ब्रूतां यद् यः कश्चिज्जीवितं पितरं नादृणोत्, परं मृतपित्रे श्राद्धं कुरुते तदाऽपि श्राद्धं कर्तुं किमुत्तमं फलं स्यात्?

पृ० १५४८, पं० ७—वराहादिपुराणोक्तं सृष्टिप्रकरणं सालङ्कारं बुद्ध्वा वैज्ञानिकं दर्शनानुकूलं व्याख्यानं कर्तव्यम्, तद् वरतरं स्यादन्यथा तव रीत्या तु गप्पाष्टकमेव सेत्स्यति। नहि ते सृष्टाः प्रकृते पितृदेवगणा एते मृतास्त्वत्कल्पितपितरः। नाऽस्त्यवकाशः सम्प्रति सृष्ट्यलङ्कृतिबोधनस्य मे। पुराणेषु यत् किमपि सत्यं तद् वैदिकम्, शिष्टमनाप्तमवैदिकं

होगा? सभी गोत्रों का ग्राह्य होगा, तो बताइये कि जब एक गोत्रवाले के तीन पिण्डों से वे पितर नरक से निकल आये, तो अन्यों के पिण्डदान तो निष्फल ही रहे। वसु, रुद्र और आदित्य इन त्रिवर्ण में विभक्त पितरों के देव बन जाने पर भी अव्यवस्था का प्रश्न तो बना ही रहेगा।

पृ० १५४७, पं० ११—मेधातिथि और गोविन्दराज के 'पितृदोष से या नास्तिक्य से जो पितृकर्म में प्रवृत्त नहीं होता, उसके प्रति प्रवर्तन करने के लिये देवतात्व के अध्यारोप के द्वारा पितरों का स्तुतिवचन है।' इस कथन पर आप बताइये कि जो कोई जीवित पितरों का श्राद्ध न करे और उनके मर जाने पर मृतकश्राद्ध करे, तब मृतकश्राद्ध करने पर उत्तम फल क्या मिलेगा?

पृ० १५४८, पं० ७—"वराहपुराण में भी बताया गया है कि वह परमेष्ठी ब्रह्मा जब आत्मयोग में लीन थे तो उनके शरीर से धूम वर्ण की कान्तिवाली तन्मात्रायें निकलीं। इन्होंने उन तपस्वियों का आकार ग्रहण कर लिया, जो कि ऊपर जाकर आकाश में यह कहते हुए विचरण करने लगे कि हम क्या खायें तथा क्या पियें? इन तपस्वियों को एकाएक देखकर सारे ब्रह्माण्ड के पितामह ब्रह्मा ने उनसे कहा कि आप लोग सभी गृहस्थों के पितर होइये। वायुपुराण में बताया गया है, ऋत अग्नि (संवत्सर) से ऋतु पैदा होती हैं, इनसे आर्तव पितर पैदा होते हैं।"

वस्तुतः ये टूटे-फूटे कुछ सृष्टि-प्रक्रिया के रहस्य हैं, इसीलिये कहा है 'ऋतवो वै पितरः'। इन वराहादि पुराणों में जो या जितना भी सृष्टि-प्रकरण अलङ्कार रूप से वर्णित किया गया है, उसका वैज्ञानिक व दर्शनशास्त्रानुसार व्याख्यान करना चाहिये, तब तो अच्छा है, अन्यथा आपकी रीति से तो गप्पों के पुलन्दे ही हैं, अतः यहाँ भी वे तुम्हारे कल्पित मृत पितर ये नहीं हैं। हम पर अभी इतना अवकाश नहीं कि पुराणों में जो कुछ यत्र-तत्र थोड़ा रहस्य है, उसकी व्याख्या करें।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

च यदधिकम् । अग्रे १५५५ पृष्ठं यावदुद्धृतं पुराणादिभ्यस्तत् पिष्टपेषणमात्रं ग्रन्थस्थौल्यापादकं च ।

पितृयज्ञ-शङ्कासमाधानम्

प्रश्नः—

पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥ मनु० ३ । १२२ ॥

इति प्रतिपादितं श्राद्धं मासानुमासिकं तु जीवितानां न सम्भवति, तेषां क्षुत्पिपासाक्षामकण्ठानामेतद्दीर्घकालेन मरणसंभवात् ।

उ०—प्रथमं त्विदं प्रक्षिप्तम्, अपरं दुर्जनतोषन्यायेन अतथात्वेऽपि दूरङ्गतानां परिव्रजितानां पितॄणां नैत्यिकश्राद्धासम्भवान्मासानुमासिकामन्त्रणानुरोध इह । किञ्च 'पितृयज्ञं तु निर्वर्त्य' इति कथनेन काऽपि इयमन्यैव प्रक्रियाऽऽरब्धा श्राद्धस्य ।

प्रश्नः—श्रद्धया यत् क्रियते तच्छ्राद्धमिति व्युत्पत्तिस्तु न सम्यक्, न हि गच्छतीति गोर्लक्षणं सम्भवति । अतिव्याप्तिदोषाद् उष्ट्रमहिषीमनुष्यादयोऽपि सम्भाव्येरन् गाव इति । एवं

पुराणों में जो कुछ भी सत्य है, वह तो वेदशास्त्र से आया है, शेष सब अनाप्त और अवैदिक है, अवैदिक अधिक है । अत एव ऋषि ने कहा है कि—'विषसम्पृक्त अन्नवत् वह त्याज्य है' क्योंकि पहाड़ खोदने पर मूषकप्राप्तिवत् है। आगे १५५५ पृष्ठ तक जो कुछ पुराणों से इन्होंने लिखा है, वह तो केवल ग्रन्थ की स्थूलता बढ़ाने के लिये ही है, उसमें सार कुछ नहीं है ।

पितृयज्ञ-शङ्कासमाधान

प्रश्न—'चन्द्रक्षय पक्ष (अमावस्या) में अग्निहोत्र ब्राह्मण नैत्यिक पितृयज्ञ करके मासानुमासिक ब्राह्मणों को भोजन कराने का (पिण्डान्वाहार्य का) कार्य करे ।' (मनु० ३ । १२२) यह मासानुमासिक श्राद्ध जीवित पितरों का सम्भव नहीं है; क्योंकि इतने दिनों में तो उन जीवित पितरों के प्राण पखेरू ही उड़ जायेंगे ।"

उत्तर—प्रथम तो यह श्लोक कई विद्वानों ने प्रक्षिप्त माना है, यदि दुर्जनतोषन्याय से प्रक्षिप्त न मानें, तो भी 'नैत्यिक पितृयज्ञ करके' से तात्पर्य जो घर में पितर हैं, उनका सत्कार-सेवा कर दूर गये हुए या परिव्रजित पितरों का नैत्यिक श्राद्ध असम्भव होने से उनका मासानुमासिक बुलाने का अनुरोध है ।

प्रश्न—'श्रद्धा से जो किया जाता है' श्राद्ध शब्द की यह व्युत्पत्ति करना ठीक नहीं । 'जाती है, इसलिये गौ है' यह लक्षण कदापि गौ का नहीं हो सकता; क्योंकि इसमें अतिव्याप्ति दोष होगा ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्राद्धशब्दव्युत्पत्तिरपीयमतिव्याप्तिदोषग्रस्ता, विवाहद्विरागमनगुरुजनसेवादिकार्याणां समेषां श्राद्धत्वापत्तेः। नहि कश्चित् पुत्रजन्मादिदिवसं श्राद्धमिति प्रख्यापयति, न वा कस्यचित् कस्यामपि सभायां श्रद्धापूर्वकाभिनन्दनेऽपि श्राद्धमिति भवत इति प्रयुज्यते।

उ०—यदाह भवान् तत्तत्त्वानवलोचनादेव। नहि शब्दानां व्युत्पत्तिरर्थावगमनं लक्षणं दोषत्रयशून्यं हि कथ्यते। डित्थ-डवित्थादिशब्दानां माऽस्तु व्युत्पत्तिः, परं न शास्त्रीयशब्दा अव्युत्पत्तयः। वैदिकानां शब्दानां यौगिकत्वमेव प्रधानम्। कालान्तरप्रयोगेणर्षिभी रूढार्थो मतः। अत्राह विद्वत्प्रवरस्तत्र श्रीमान् वागीश्वरो विद्यालङ्कारो 'वैदिक-साहित्य-सौदामन्याम्'। चतुर्थोन्मेषे तत् प्रपञ्च्यते—

अन्यो व्युत्पत्तिलभ्योऽर्थो निमित्तमपरस्तथा।
प्रवृत्तेरिह शब्दानां सर्वत्र नैकता तयोः॥ ९०॥
अस्ति व्युत्पत्तिलभ्योऽर्थो यो गच्छति स गौरिति।
तथापि सर्वं गच्छन्तमभिधत्ते न गोपदम्॥ ९१॥
पिण्डे सास्नादिमत्येव तत्प्रवृत्तिनिमित्तता।
सीमिता तेन गच्छन्तमश्वं नाभिदधाति तत्॥ ९३॥

ऊँट, भैंस, मनुष्य आदि भी गमन करने से 'गौ' होने लगेंगे। इस प्रकार उक्त श्राद्ध शब्द की व्युत्पत्ति भी अतिव्याप्ति दोष से ग्रस्त ठहरेगी; क्योंकि विवाह, द्विरागमन, गुरुजनों का सेवादि कार्य सभी श्राद्ध कहलाने लगेंगे। कोई व्यक्ति पुत्रजन्मोत्सव मनाने के दिन यह नहीं कहता कि आज श्राद्ध होगा। किसी को किसी सभा में श्रद्धापूर्वक अभिनन्दन करने पर भी 'आप का श्राद्ध है' यह कोई नहीं कहता।

उत्तर—आपका यह कथन श्राद्ध शब्द के तत्त्वार्थ को न समझना प्रकट करता है। शब्दों की व्युत्पत्ति और उस शब्द का लक्षण दोषत्रय से शून्य नहीं होते। डित्थ, डवित्थ शब्दों की कोई व्युत्पत्ति नहीं, अव्युत्पन्न हैं, पर शब्दरूप में प्रयुक्त होते हैं। वैदिक शब्दों में तो यौगिकार्थों की ही प्रधानता होती है। ऋषियों के द्वारा बहुत काल तक प्रयुक्त होने पर वे योगरूढ भी माने गये। इस विषय में विद्वत्प्रवर श्री वागीश्वर विद्यालङ्कार ने निम्न श्लोकों में इसी की पुष्टि की है। देखिये 'वैदिक-साहित्य-सौदामनी' के चतुर्थोन्मेष में श्लोक ९० से ९६ तक—

व्युत्पत्तिलभ्य अर्थ अन्य होता है, शब्दों की प्रवृत्ति का निमित्त अन्य होता है। जैसे व्युत्पत्तिलभ्य अर्थ 'जानेवाली' गौ है, सभी गमन करते हैं पर गौ नहीं कहलाते॥ ९०, ९१॥

उसकी प्रवृत्तिनिमित्तता सास्नादिमान् पिण्ड में ही होती है। वह सीमित प्रवृत्तिनिमित्तता अश्व की वाचिका नहीं॥ ९३॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्यात् प्रवृत्तिनिमित्तस्य बोधेऽर्थस्य लक्षणा।
न तु व्युत्पत्तिलभ्यस्य केवलस्येति सुस्थितम्॥ ९४॥
व्युत्पत्तिलभ्यतार्थस्य प्रवृत्तेश्च निमित्तता।
यौगिकेषु पदेष्वेव द्वयमेकत्र सङ्गतम्॥ ९५॥
पित्रादिकृतसङ्केते रूढे वा व्यवहारतः।
पदे व्युत्पत्तिलभ्योऽर्थो भवन्नप्यविवक्षितः॥ ९६॥

एवं योगरूढपदेष्वपि पङ्कजादिषु बोद्धव्यम्। कुमुदभेकादीनां पङ्कोद्भवत्वात् तत्रापि योगेन प्रसक्तं पङ्कजपदं योगरूढ्या पद्ममात्रे नियन्त्रितमर्थान्तरं नाभिधत्ते। कदाचित् 'दिशि दिशि जलजानि सन्ति कुमुदानि' इत्यादिप्रयोगेषु जलजादिपदैर्जलजन्यरूपयौगिकार्थबोधे तु लक्षणाश्रयणीया, मुख्यस्य रूढार्थस्य बाधात्।

'अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती।' (ऋ० १। १६४। ४०)

अत्र 'अघ्न्या' इति पदं धेन्वर्थे रूढम्। 'अघ्न्याऽहन्तव्या भवति।' यास्को माध्यमिक-वाक्परतया व्याचष्टे। माध्यमिकवाग् विद्युद्रूपा वृष्ट्यां दुर्भिक्षादिरूपमघं हन्तीति। पदमिदमवयवानां शक्त्या सर्वेषामहन्तव्यानां वाचकमपि रूढ्या धेनौ नियन्त्रितम्। एवमघ्न्या-

---

प्रवृत्तिनिमित्त अर्थ के बोध में लक्षणा होती है, परन्तु व्युत्पत्तिलभ्यार्थ के बोध में नहीं होती॥ ९४॥

यौगिक पदों में व्युत्पत्तिलभ्यार्थ तथा प्रवृत्तिनिमित्तता दोनों की एकत्र सङ्गति हो जाती है॥ ९५॥

पितृ आदि सङ्केत पद में व्यवहार से रूढ होने पर व्युत्पत्तिलभ्यार्थ होता हुआ भी विवक्षित नहीं होता॥ ९६॥

इसी प्रकार योगरूढ पङ्कजादि पदों में भी समझना चाहिये। कुमुद, भेक आदि भी पङ्कजन्मा हैं, फिर भी योगरूढि से 'पङ्कज' पदमात्र का बोध होता है, अर्थान्तर का नहीं। 'दिशा दिशा में जलोत्पन्न कुमुद है' इत्यादि प्रयोगों में जलजादि पदों से जलजन्यरूप यौगिकार्थ के बोध में लक्षणा का आश्रय लेना चाहिये; क्योंकि मुख्य रूढार्थ का बाध हो रहा है।

ऋग्वेद (१। १६४। ४०) मन्त्र में 'अघ्न्या' यह पद धेनु अर्थ में रूढ हो गया, वह 'अहन्तव्या' होती है। यास्क महर्षि माध्यमिक वाक्-परता से इसकी व्याख्या करते हैं कि माध्यमिक वाक् विद्युद्रूपा होकर वृष्टि में दुर्भिक्षादिरूप अघ को नष्ट करती है, इसलिये यह 'अघ्न्या' है। यह पद अवयवों की शक्ति से सभी न मारने योग्यों का वाचक होता हुआ भी रूढ होने से

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पदस्य गोवाचकत्वे अवयवशक्तेः रूढेश्चेत्युभयोर्योगः।

अथ च—

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति॥ ऋ० १।१८।७॥

अर्थात्—हे सदसस्पते! यज्ञात्मकसदसः पर्यवेक्षक! यस्मादृते विपश्चितो हि यज्ञे न सिध्यति। धीनां यज्ञेऽनुष्ठेयानां कर्मणां योगे सम्यक् प्रयोगं व्याप्य तिष्ठति। अत्र यज्ञपदमवयवानां शक्त्या देवपूजासत्समागमाद्यनेकार्थवाचकमपि रूढ्या यागमात्रे नियन्त्रितम्। तेन योगरूढम्।

किन्तु—'यज्ञेन वाचः पदवीयमायन्' (ऋ० १०।७१।३) अत्र हि भाषातत्त्ववेत्तारो यज्ञेन विभिन्नभाषाविदिभः सङ्गमेन वाचो वाण्याः समुद्भवस्य प्रसारस्य च सरणिम् आयन् लभन्ते। अस्मिन् मन्त्रे यज्ञपदं न योगरूढम्, किन्तु यौगिकम्। योगरूढार्थस्य यागस्य भाषाविज्ञानेन सम्बन्धाऽभावात्।

तथैव—'अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि' (ऋ० १।१।४) अत्र यज्ञाध्वरपदयोरुभयोर्योगार्थकत्वे पुनरुक्तिः। अभिधयाऽन्यतरस्य यौगिकार्थपरिग्रहे च 'योगाद् रूढिर्बलीयसी' इति सिद्धान्तव्याकोपः। तत्का गतिरिति चेत्—

गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम्॥

इह यथा 'लक्षणाप्रमङ्गीकृतायां योगरूढेन गीष्पतिरिति पदेन (गिरां पतिरिति)

धेनु में नियन्त्रित है। इस प्रकार अघ्न्या पद के गोवाचक होने पर अवयवशक्ति और रूढि दोनों का योग है।

'यस्माद् ऋते न सिध्यति' (ऋ० १।१८।७) इस मन्त्र में यज्ञ पद अवयवों की शक्ति से देवपूजा, सत्समागम आदि अनेक अर्थों का वाचक होता हुआ भी रूढि से केवल याग का वाचक है। इसलिये यह योगरूढ है।

किन्तु 'यज्ञेन वाचः पदवीयमायन्' (ऋ० १०।७१।३) इसमें भाषातत्त्व को जाननेवाले यज्ञ अर्थात् विभिन्न भाषावेत्ताओं के सङ्गम से वाणी के प्रसार मार्ग को प्राप्त करते हैं। यहाँ यज्ञ पद योगरूढ न होकर यौगिक है। योगरूढार्थ यज्ञ का भाषाविज्ञान से कोई सम्बन्ध नहीं ठहरता।

उसी प्रकार 'अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि' (ऋ० १।१।४) यहाँ पर यज्ञ और अध्वर दोनों पदों के यौगिकार्थ में पुनरुक्ति है। अभिधा से एक का ही यौगिकार्थ ग्रहण हो सकता है, ऐसा मानने पर 'योग से रूढि बलीयसी होती है' इस सिद्धान्त का व्याकोप होगा। तो क्या

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

योगार्थमात्रप्रतिपादने न किञ्चिद् बाधकम्।' (इति रसगङ्गाधरे श्रीजगन्नाथपण्डिताः) । तथा योगरूढेनाध्वरपदेनाऽपि हिंसारहित इति योगार्थमात्रपरिग्रहे न काचित् क्षतिः। योगरूढेनाध्वरपदेन प्राग् एकपदवाच्यत्वसम्बन्धाद् हिंसारहितत्वाऽभिन्न यागार्थबोधः। ततश्च तेन सामानाधिकरण्यसम्बन्धाद् एकविभक्त्यन्ताद् यज्ञपदेनाभेदसंसर्गे हिंसारहितयज्ञाऽभिन्नयज्ञ इति बोधः। प्रक्रियायामस्यां वृथागौरवमनुभवविरोधश्च। तस्मादत्र लक्षणामूलस्य अविवक्षितवाच्यध्वनेरर्थान्तरसङ्क्रमितवाच्यो नामभेदोऽभ्युपेयः। इहाध्वरपदं स्वकीय एव नितरां हिंसारहिताध्वररूपेऽर्थे सङ्क्रमितम्।

एवमेव श्राद्धपदं यौगिकं 'श्रद्धया यत् क्रियते' तत् कर्म इत्यर्थे सर्वत्र वेदप्रामाणिकजीवितश्राद्धकर्मणि प्रवर्तते। कालान्तरे रूढिं गतं श्राद्धपदं न विवाहादौ प्रयुज्यते, परं मृतानामपि भवता श्राद्धे कृते यौगिकार्थः सर्वथा त्यक्तुं न शक्यते। तस्माद् ऋषिकृतोऽर्थस्तु सिद्ध एव, भवतो रूढिगतः साध्यः।

प्रश्नः—पतञ्जलिसमयेऽपि अस्मन्मतं श्राद्धमाचरितमासीत्, आम्राश्च सिक्ताः पितरश्च

मार्ग हो ? ऐसी स्थिति में जैसे—'गीष्पति भी तुम्हारे गुणगान में सगर्व नहीं है' यहाँ पर लक्षणा स्वीकृत कर लेने पर योगरूढ 'गीष्पति' इस पद से 'वाणियों के पति' इस योगार्थमात्र के प्रतिपादन करने पर कुछ भी बाधक नहीं है। (इति रसगङ्गाधरे श्रीजगन्नाथपण्डितः) । उसी प्रकार योगरूढ अध्वर पद से भी 'हिंसारहित' इस योगार्थमात्र के ग्रहण करने में कोई क्षति नहीं है। योगरूढ 'अध्वर' पद से प्रथम ही एकपदवाच्यत्व सम्बन्ध से हिंसारहितत्व से अभिन्न याग अर्थ का बोध होता है। तब उस से सामानाधिकरण्य सम्बन्ध एक विभक्त्यन्त होने से यज्ञ पद से अभेद सम्बन्ध होने से 'हिंसारहित यज्ञाऽभिन्न यज्ञ' यह बोध होगा। इस प्रक्रिया में वृथा गौरव और अनुभवविरोध है। इसलिये यहाँ पर लक्षणामूलक अविवक्षित वाच्य ध्वनि का अर्थान्तरसङ्क्रमित वाच्य नामक ध्वनिभेद समझना चाहिये। यहाँ पर अध्वर पद अपने ही हिंसारहित अध्वर में सङ्क्रमित है।

इसी प्रकार श्राद्ध पद भी यौगिक होता हुआ श्रद्धा से किये जानेवाले कर्म में घटित होकर भी वेदों से प्रमाणित जीवित पितरों के श्राद्ध में ही घटित होता है। कालान्तर में व्यवहार से केवल रूढि को प्राप्त होकर श्राद्ध पद का प्रयोग विवाहादि में नहीं करते। वैसे तो आपके द्वारा किये जानेवाले मृतक-श्राद्धों में भी यौगिकार्थ कहीं-कहीं घटित होता है, पर केवल रूढिवादी परम्परामात्र के निर्वाह में दक्ष श्रद्धाविहीन होकर भी करते हैं। अतः जीवितों का श्रद्धापूर्वक भोजन, सत्कार, सेवादि करना ऋषिसमर्थित वेदविधि तो सिद्ध ही है, आपका पक्ष साध्य कोटि में है।

प्रश्न—भगवान् पतञ्जलि के समय में भी हमारा सम्मत मृतक-श्राद्ध चालू था। इस प्रकार का प्रयोग मिलता है। तभी से आम्रवृक्षों में जल देने पर यह कहावत प्रचलित हुई—'आम्र सींचे

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रीणिताः' इति निदर्शनात्। यच्च कांगड़ीगुरुकुलस्नातकः श्रीचन्द्रमणिरपि समुदाहरत्, तेनाऽपि मृतकपितृश्राद्धसिद्धिः।

उ०—श्रीमन्! नास्माभिर्निषिध्यते यत् तस्मिन् काले न श्राद्धं मृतानां प्रचलितमासीत्। प्रचलितमेवाऽसीद् यस्य वर्णनं पतञ्जल्यादिभिरपि कृतम्। अन्येषु वा पश्चान्निर्मितेषु भवदुदाहृतेषु व्यासनाम्ना ख्यापितेषु पुराणेषु वर्ण्यते। वयं त्वेतत् प्रतिपादयामो यन् मृतानां तदवैदिकम्, तद्धि श्रद्धया सेवनाशक्यत्वात् सन्निकर्षाभावात्। मृतकोद्देश्येन कृतस्य प्राप्त्यभावे व्यर्थापत्तेश्च, सेव्यस्य सेवकस्य सान्निकर्ष्यावश्यकत्वात्।

प्रश्नः—भवता मनुस्मृतेः श्राद्धश्लोकाः प्रक्षिप्ता ज्ञाप्यन्ते। परमन्यस्मृतिष्वपि मृतकश्राद्धविधानम्, तत्तु न क्षेपकम्। यथा अत्रिस्मृतौ—

तादृशं भोजयेच्छ्राद्धे पितॄणामक्षयं भवेत्।
यावतो ग्रसते ग्रासान् पितॄणां दीप्ततेजसाम्॥ ३५४॥
पिता पितामहश्चैव तथैव प्रपितामहः।
नरकस्था विमुच्यन्ते ध्रुवं यान्ति त्रिविष्टपम्॥ ३५५॥

और पितर भी तृप्त हो गये'। जैसा कि कांगड़ी गुरुकुल के स्नातक चन्द्रमणि ने भी उदाहरण दिया है, उससे भी मृतक-श्राद्ध की सिद्धि होती है।

उत्तर—श्रीमन्! हम तो यह नहीं कह रहे हैं कि उस समय अवैदिक मृतक-श्राद्ध प्रचलित नहीं था। प्रचलित ही था, तभी तो पतञ्जलि ने उस कहावत का उदाहरण दिया। अन्य भी बाद के निर्मित आपके उदाहृत व्यास के नाम पर रचे गये पुराणों में भी इसका वर्णन किया गया है। हम तो यह कह रहे हैं कि वह अवैदिक प्रथा है; क्योंकि सान्निध्य के अभाव में मृतकों की सेवा की नहीं जा सकती और मृतक के उद्देश्य से किये की प्राप्ति न होने से इस कर्म की व्यर्थता व निष्फलता होगी। वह पतञ्जलि की निजोक्ति नहीं है, अथवा ऐसा समझिये कि आम्रवृक्षों को सन्तान द्वारा सींचते हुए देखकर पितर (जीवित वृद्ध पुरुष) भी प्रसन्न होते हैं। आपकी दृष्टि से भी यही अर्थ अधिक उपयुक्त होगा; क्योंकि पेड़ों में पानी लगाने को आप मृतक पितरों के तृप्त करने की विधि का समर्थन नहीं कर सकते।

प्रश्न—आप द्वारा मनुस्मृति के मृतश्राद्धप्रतिपादक श्लोकों को प्रक्षिप्त कह दिया जाता है, पर अन्य स्मृतियों में प्राप्त मृतक-श्राद्धविधान तो क्षेपक नहीं है। जैसे अत्रिस्मृति में कहा है—

श्राद्ध में वैसा खिलायें जो पितरों को अक्षय हो, दीप्त तेजस्वी पितर जितने ग्रासों को ग्रहण कर सकें॥ ३५४॥

पिता, पितामह और प्रपितामह नरकस्थ भी वह भोजन पाकर स्वर्ग को जाते हैं॥ ३५५॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उ०—श्रीमन्! नहि अविचार्यैव क्षेपकत्वं कथ्यतेऽस्माभिः। तत्र हि प्रसङ्गविरोधाद् विषयविरोधादन्तर्विरोधादवान्तरविरोधात् शैलीविरोधाच्च क्वचित् प्रक्षिप्तत्वं विनिश्चीयते, अथवा अवैदिकत्वाद् बुद्धिविरुद्धत्वादपि। यथाऽत्रापि—भवता प्राक् पितॄणां लोको दिवि प्रतिपादितः। यत्र च स्वर्गलोको द्यौर्लोको मतः, तत्रैव नरकलोकव्यवस्थितिरत्र घोष्यते। नहि क्वाऽपि शास्त्रे एवंविधा व्यवस्थितिः। अपरं च न बुद्धिसङ्गतम्, ग्रासन्यूनाधिकसंख्यासु नरकस्वर्गयोर्न्यूनाधिकप्राप्तेराश्रितत्वात्। यदि ग्राससंख्याधिक्ये समाश्रिता उत्कृष्टतरस्वर्ग-प्राप्तिस्तदा घस्मरतर एवान्वेष्टव्यो भोक्ता भोजयित्रा। एतेनाऽपि जीवितानामेव सिध्यति।

प्रश्नः—ननु योगदर्शने 'भवप्रत्ययो विदेहप्रकृतिलयानाम्' (१। १९) अर्थात् पञ्चमहाभूतजन्यस्थूलशरीररहितदेवानां योगसिद्धिस्तु जन्मना भवति। "यद्यद् रूपं कामयते तत्तद्देवता भवति। 'रूपं रूपं मघवा बोभवीति' इत्यपि निगमो भवति" (निरु० १०। १७) इत्यनेनाऽपि देवता यद्यद् रूपं कामयते तत्तद् धारयते। मनुष्यो यत्नेन तरणं शिक्षते, गोवत्सश्च जन्मत एव। तथैव मानवः काठिन्येन योगसिद्धीः प्राप्नोति, देवयोनिपितॄस्तु सर्वाः सिद्धयो जन्मत

उत्तर—श्रीमन्! हम लोग विना गम्भीर विचार के क्षेपक नहीं बतलाने लगते हैं। जब वहाँ पर प्रसङ्गविरोध, विषयविरोध, अन्तर्विरोध, अवान्तरविरोध तथा शैलीविरोध पाते हैं, तब प्रक्षिप्त होने का निश्चय करते हैं, अथवा वेदविरुद्ध तथा बुद्धिविरुद्ध होने पर भी प्रक्षिप्त बताते हैं। जैसे यहीं पर आपने पितरों का लोक स्वर्गलोक वा द्युलोक माना और वहीं पर आप पितरों का नरकलोक भी मानते हैं, पर शास्त्र में ऐसी कहीं व्यवस्था नहीं है। और ग्रासों की न्यून-अधिक संख्या पर भी नरक और स्वर्ग की प्राप्ति मानना कदापि बुद्धिसङ्गत नहीं। यदि ग्रास-संख्या के आधिक्य पर उत्कृष्टतर स्वर्ग की प्राप्ति मानी जाये, तो जो सबसे बड़ा पेटुआ होगा, उसको श्राद्ध के लिये खोजना पड़ेगा। इससे भी जीवितों का ही श्राद्ध सिद्ध है, जो कि बुद्धिसङ्गत भी है; क्योंकि जीवित पितर लोग कम खायें और भूखे रहें, यह भी ठीक नहीं। अधिक खाकर बीमार पड़ जायें तो भी नरक (दुःख) है। इन दोनों अवस्थाओं में भोजन का क्षय (नाश) ही है। दीप्ततेजस अर्थात् दीप्त जठराग्निवाले जितने ग्रास लें, वे अक्षय अर्थात् पचकर उपयोग में आवें, उतने ग्रास ही ठीक हैं। इसमें भी कोई शब्द नहीं जिससे मृतकश्राद्ध सिद्ध होता हो।

प्रश्न—योगदर्शन में 'भवप्रत्ययो विदेहप्रकृतिलयानाम्' (१। १९) सूत्र का अर्थ यह है कि पञ्चमहाभूतजन्य स्थूलशरीररहित देवों की योगसिद्धि तो जन्म से ही होती है। 'जिस-जिस रूप की कामना करता है, वैसा ही उस देव का रूप हो जाता है' यह भी निगम में कहा है। मनुष्य तो यत्न से तैरना सीखता है; पर गाय का बछड़ा जन्म से ही तैरने में निपुण होता है। उसी प्रकार मनुष्य बड़ी कठिनता से योगसिद्धियाँ प्राप्त करता है, देवयोनि पितरों को सर्व सिद्धियाँ स्वतः ही

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एव प्राप्ताः। तास्वेव सिद्धिष्वन्यतमा सिद्धिर्विविधरूपधारणमस्ति। फलतः पितर एकस्मिन्नेव काले अनेकस्थानक्रियमाणश्राद्धेषु उपतिष्ठन्ति, यत्राहूयन्ते। परं न कदापि जीविताः पितरो युगपदुपस्थातुं क्षमन्ते बहुषु स्थलेषु।

उ०—भवता योगसूत्रस्य न सम्यगर्थोऽवबुद्धः। अर्थस्त्वयम्—संस्कारशेषरूपचित्तस्य निरोधे द्विधा। १. भवप्रत्ययः, २. उपायप्रत्ययश्च। यः पुरुषः परमात्मस्वरूपमविदित्वा पञ्चभूतेन्द्रियेषु परमात्मभावमभिमन्य पञ्चभूतानामिन्द्रियाणां वा उपासनां करोति स शरीर-त्यागानन्तरं तेष्वेव लीनो जायते। अन्ते च तस्य चित्तं संस्काररूपमवशिष्यते। ईदृशो हि पुरुषो विदेहः कथ्यते। यतो हि नैतस्य स्थूलदेहो भवति। यश्च पुरुषः प्रकृतेर्महत्तत्त्वाहङ्कारपञ्च-तन्मात्राणां परमात्मभावेन उपासनां करोति तस्य चित्तवासना तदात्मिका भवति, शरीरान्ते चासौ एतत्प्रकृत्यादिषु लीयते। ईदृक् पुरुषः प्रकृतिलयः कथ्यते। उक्तपुरुषद्वयस्याऽपि लयावस्थायां चित्तवृत्तिनिरोधो भवप्रत्ययः कथ्यते। भवो ह्यज्ञानम् अर्थात् प्रकृत्याद्यनात्म-पदार्थेषु परमात्मबुद्धेर्भवनादयं निरोधो भवप्रत्ययः।

तात्पर्यमिदं यदज्ञानजन्यचित्तवृत्तिनिरोधो हि भवप्रत्ययः। अयं च प्रकृत्याद्यनात्मपदार्थ-लयेन भवति न तु परवैराग्येण। अतोऽयं निरोधो योगाभासः। यतोऽत्र निरुद्धचित्तं न मोक्ष-

---

जन्मतः होती हैं। उन्हीं सिद्धियों में एक सिद्धि विविध रूप धारण करना भी है। फलतः पितर लोग एक ही समय में अनेक स्थानों पर किये जाते हुए श्राद्धों में उपस्थित हो जाते हैं, जहाँ वे बुलाये जाते हैं; परन्तु जीवित पितर कदापि एक समय में अनेक स्थलों पर उपस्थित नहीं हो सकते।

उत्तर—आपने योगसूत्र का अर्थ ठीक नहीं समझा। अर्थ यह है—संस्कार-शेषरूप चित्त का निरोध दो प्रकार से होता है। एक भवप्रत्यय, दूसरा उपायप्रत्यय। जो पुरुष परमात्मा के स्वरूप को न जानकर पञ्चभूतेन्द्रियों में परमात्मभाव का अभिमान करके पञ्चभूत वा इन्द्रियों की उपासना करता है, वह शरीर त्यागने के बाद उनमें ही लीन हो जाता है। अन्त में उसका चित्त संस्काररूप अवशिष्ट रह जाता है। ऐसा पुरुष विदेह कहलाता है; क्योंकि इसका स्थूल देह नहीं होता। और जो पुरुष प्रकृति के महत्तत्त्व-अहंकार पञ्चतन्मात्राओं की परमात्मभाव से उपासना करता है, उसकी चित्तवासना तदात्मिका हो जाती है और शरीरान्त होने पर वह इन प्रकृति आदि में लीन हो जाता है, ऐसा पुरुष प्रकृतिलय कहलाता है। उक्त दोनों पुरुषों की लय-अवस्था में चित्तवृत्ति का निरोध 'भवप्रत्यय' कहा जाता है। भव नाम है अज्ञान का अर्थात् प्रकृति आदि अनात्म पदार्थों में परमात्म-बुद्धि होने से यह 'भवप्रत्यय' निरोध होता है।

तात्पर्य यह है कि अज्ञानजन्य चित्तवृत्ति का निरोध 'भवप्रत्यय' है। यह प्रकृत्यादि अनात्म पदार्थों के लय से होता है, न कि वैराग्य से। अतः यह निरोध योगाभास है; क्योंकि यहाँ निरुद्ध

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

हेतुः । तस्मादयं निरोधो मुमुक्षुभिर्नोपादेयः, तस्मात् तथाकृतोऽर्थोऽशुद्धः ।

निरुक्तस्यार्थोऽशुद्ध एव ते । 'रूपं रूपं मघवा बोभवीति' (ऋ० ३ । ५३ । ८) इति मन्त्रस्य देवता इन्द्रः । इन्द्रो ह्यत्र विद्वान् वायुर्वा । यथा—'यो वै वायुः स इन्द्रो य इन्द्रः स पवते' (शत० ४ । १ । ३ । १९) । अर्थस्त्वयम्—अयं वायुर्देवता यद् यत् पदार्थरूपं कामयते तत्तत्पदार्थे प्रविष्टः सन् तदाकारो जायते, अर्थाद् वायोर्न स्वकीयं किमपि रूपं पृथग् अतः पदार्थानुरूपो जायते । एतत्पुष्ट्यै 'रूपं रूपं मघवा' इति मन्त्रः । व्याख्यानं तु यथास्थाने द्रष्टव्यम् । नहि सर्वा देवताः सूर्यपृथिव्यादयः स्वाकारं विहाय तत्तद् रूपं धारयन्ते ।

न वाऽपि पितरो देवा मृत्वा स्वेच्छया कानिचिदपि शरीराणि रूपाणि वा धर्तुं शक्नुवन्ति, तेषां स्वस्वज्ञानकर्मानुसारं मोक्षस्य विविधयोनिप्रेषणस्य वा व्यवस्थायाः परमात्माधीनत्वात् । मुक्ता अपि न शरीराणि धारयन्ते, परमात्मनि स्थितानां सत्सङ्कल्पेनैव सर्वानन्दानुभूतिसम्भवात्, शरीरधारणे तत्तद्योनिसुलभसुखदुःखानिवार्यतया मोक्षानन्दानुभवानुपपत्त्यापातात् । एवं मृत-पितॄणां स्वेच्छाशरीरधारणाशक्यत्वं शास्त्रानुमोदितम् । जीवितपितॄणामनेकस्थलगमनम-सम्भवमनावश्यकमपि एकत्रैव तृप्तिसम्भवादधस्मरत्वात् ।

चित्त मोक्ष का हेतु नहीं । इसलिये यह निरोध मोक्ष की इच्छा रखनेवालों को उपादेय नहीं है । निष्कर्ष यह है कि आपका उक्तार्थ अशुद्ध है ।

निरुक्त का जो अर्थ आपने किया, वह अशुद्ध है । 'रूपं रूपं०' मन्त्र का देवता इन्द्र है । यहाँ पर इन्द्र का अर्थ विद्वान् या वायु है । यह वायु देवता जिस-जिस पदार्थ में प्रवेश करता है, वैसा ही रूप धारण कर लेता है; क्योंकि उस पदार्थगत आकाश में वह रहता है । अर्थात् वायु का अपना अलग कुछ भी रूप नहीं है, अतः पदार्थानुरूप हो जाता है । मन्त्र की अविकल व्याख्या ऋषिभाष्य में देखिये । अन्य सूर्य पृथिवी आदि देवता अपने आकार को छोड़कर अन्य रूप धारण नहीं करते ।

पितर देव भी मरकर अपनी इच्छा से किन्हीं शरीर और रूपों को धारण नहीं कर सकते; क्योंकि उनके अपने-अपने ज्ञान और कर्मों के अनुसार मोक्ष या विविध योनियों में भेजने की व्यवस्था ईश्वराधीन है । मुक्त भी शरीरों का धारण नहीं करते । वे परमात्मा में स्थित होते हैं, उनके सत्सङ्कल्प से ही सब प्रकार के आनन्द की अनुभूति होती रहती है । शरीर धारण करने पर तो तत्तद्योनियों में सुलभ सुख-दुःख अनिवार्य होने के कारण से मोक्षानन्द के अनुभव की अनुपपत्ति होगी । इस प्रकार मरे हुए पितरों की स्वेच्छा से शरीरधारण कर लेने की अशक्यता है, जो अशक्यता शास्त्रानुमोदित है । जीवित पितरों का अनेक स्थलों पर एक साथ जाना असम्भव है और अनावश्यक भी है; क्योंकि एक ही स्थान पर उनकी तृप्ति सम्भव है और वे पेटू भी नहीं हैं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रश्नः—तदा किम्—

आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥

इत्यादिमन्त्रैः प्रतिपादितानां देवादीनां श्राद्धकरणं भवतां मते व्यर्थमेव ?

उ०—अस्मिन् विषये बहूदीरितम्। ये देवा विद्वांस ऋषयो मन्त्रार्थद्रष्टारः, पित्रादयः पितरो मानवा वा अङ्गधनादिहीना असमर्था वा सहायतार्थभाजनरूपास्तेऽवश्यं जीविता एव सत्कारभाजनानि भवन्ति, ते भोजयितव्याः । परन्नेमे मन्त्राः, प्रत्युताल्पज्ञमानवकल्पोलकल्पिताः श्लोकाः ।

प्रश्नः—अमितप्रमाणैः श्रीकरपात्रिणा महाविदुषा मृतपितॄणां इति श्राद्धं प्रत्यपादि तत्कथं नामाप्रामाणिकं मन्येत ?

उ०—अमितान्यपि प्रमाणानि वेदविरुद्धानि न वेदानुमोदितानि। यद् भवान् महाविद्वानिति विशिनष्टि तदपि विस्मयावहम्। वेदानुमोदितसत्यस्य वेत्तुः प्रचारयितुरेव वा तद्विशेषणं शोभते, न तु कल्पितपुराणान्धानुयायिनो बुद्धिविरुद्धप्रतिपादनपरायणस्य ।

प्रश्न—तो क्या—'ब्रह्मस्तम्बपर्यन्त देव, ऋषि, पितृ और मानव सब मातृ मातामह आदि पितर तृप्त होवें ।' इत्यादि मन्त्रों से प्रतिपादित देवादियों का श्राद्ध करना आपके मत से व्यर्थ ही है ?

उत्तर—इस विषय में तो हमने बहुत कुछ कह दिया कि देवता विद्वान् ऋषि मन्त्रार्थद्रष्टा, जीवित पिता आदि पितर और अङ्ग, धन आदि रहित असमर्थ मनुष्य श्राद्ध के व सहायता के भाजन हैं। वे सब जीवित ही सत्कार के भाजन हो सकते हैं, उन्हें भोजन कराना चाहिये, परन्तु ये मन्त्र नहीं हैं, ये अल्पज्ञ मानव-मन से गढ़े गये हैं ।

प्रश्न—महाविद्वान् श्री करपात्रीजी ने अगणित प्रमाण देकर मृतकश्राद्ध सिद्ध किया है, उसे आप अप्रामाणिक कैसे मानते हैं ?

उत्तर—अगणित भी प्रमाण, हैं तो वेद के विरुद्ध । वेद से उनका अनुमोदन नहीं होता । उन्हें आप महाविद्वान् यह विशेषण दे रहे हैं, यदि विस्मयकारक है । वेदानुमोदित सत्य के वेत्ता वा प्रचार करनेवाले को तो यह विशेषण शोभाकर है । कल्पित पुराणों का अन्धानुकरण करनेवाले बुद्धिविरुद्ध प्रतिपादनपरायण को यह विशेषण नहीं दिया जा सकता ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रागप्युक्तमस्माभिर्यत् मृतानां श्राद्धं साध्यकोटौ, परं जीवितानां सिद्धमेव तत्तस्यापि यथा (पृ० १५४५) विप्रवद्वाऽपि तं श्राद्धंस्वकं पितरमाशयेदिति।

प्रश्नः—ननु पितृलोकोऽन्यस्ततो मन्त्रैरावाहिताः पितरो ब्राह्मणैर्निमन्त्रितैः सह भुञ्जत एव। न चागमने तेषां सन्देहः, संसारेऽनेकविलक्षणशक्तिदृग्गतत्वात्। यथा—

(१) चुम्बकशक्तिर्जडाऽपि लौहमाकर्षति।
(२) स्त्रिया उदरे गर्भसञ्चारेण सह मातुः स्तन्यं जायते।
(३) लज्जावती नाम्नी लता स्पर्शमात्रेण म्लायते।
(४) अभया मुष्टिपिहितैव मलोत्सर्जनं विधत्ते।
(५) एकमौषधं (बूँटी) शिखायां बद्धा ज्वरमपनयति।
(६) गर्भवत्या दर्शनमात्रेण सर्पोऽन्धो जायते।

एवमेव मन्त्राणामद्भुतशक्त्या पितरस्त्वरयोपतिष्ठन्ति। उच्येत चेन्न दृश्यन्ते पितर आगताः, तत् सत्यम्, अतिसूक्ष्मं हि न दृग्विषयं वस्तु भवति, यथा जीव ईश्वरो वाऽपि।

पहले भी हमने कहा है कि मृतकश्राद्ध साध्य कोटि में है, पर जीवितों का तो सिद्ध ही है; क्योंकि वह उभयपक्ष-सम्मत है। जैसा कि १५४५ पृष्ठ पर आपने भी माना है।

प्रश्न—अरे भाई ! पितृलोक तो पृथक् है, वहाँ मन्त्रों द्वारा आवाहित होने पर पितर लोग निमन्त्रित ब्राह्मणों के साथ खाते ही हैं। उनके आने में कोई सन्देह नहीं, संसार में अनेक विलक्षण शक्ति दृग्गत हो रही हैं। जैसे—

(१) चुम्बक शक्ति जड़ होते हुए भी लोहे को खींच लेती है।
(२) स्त्री के उदर में गर्भ-सञ्चार के साथ स्तन्य (दूध) आ जाता है।
(३) छुईमुई स्पर्श करनेमात्र से म्लान हो जाती है।
(४) अभया हरड़ के मुट्ठी में बन्द रखनेमात्र से मलोत्सर्जन हो जाता है।
(५) एक बूँटी है, जिसे शिखा में बाँधनेमात्र से ज्वर उतर जाता है।
(६) गर्भवती के दर्शनमात्र से सर्प अन्धा हो जाता है।

इसी प्रकार मन्त्रों की अद्भुत शक्ति से पितर शीघ्र उपस्थित हो जाते हैं। यदि यह कहा जाये कि वे पितर आये हुए दिखाई नहीं पड़ते, तो यह तो सच है, अति सूक्ष्म वस्तु दृष्टि का विषय नहीं होती, जैसे जीव, ईश्वर और परमाणु भी नहीं दिखाई पड़ते।

©Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उ०—अस्त्विदं विवेच्यम्, यथोक्तेषु षट्स्वपि उदाहरणेषु तादृक्शक्तिवत्पदार्थ-सन्निकर्षात्, ईश्वरेण मातुः स्तन्योत्पादनव्यवस्थितत्वात्, लतास्पर्शे म्लानकरणविद्युत्तरङ्ग-वत्त्वात्, अभयायास्तादृग्गुणाधानात्, ज्वरापनयनेऽपि तथात्वात्, गर्भवत्याश्चाऽपि दर्शनेन सर्पस्य अन्धत्वात्, सर्वत्र प्रत्यक्षप्रमाणमिह नान्यत्, परं पित्रागमने न प्रत्यक्षानुमानोपमानानि। अवशिष्टं तत् सर्वत्र सम्यगालोचितं यथास्थाने।

अत्रोच्यतां ते पितरो मुक्तिं प्राप्ता न वा, चेत् प्राप्ता तदा न श्राद्धं संसारगतं भोक्ष्यन्ते, अलौकिकपरमानन्देन पूर्णतृप्तत्वात्। नो चेन् मुक्तास्तदाऽन्यत् शरीरं कर्मानुसारमपरिहार्यत्वेन ते धरिष्यन्ति। तदा भूतनिर्मितशरीरान्तर्बद्धात्मत्वाद् असान्निध्यान् मन्त्रोच्चारणस्य जपस्य वा तैरश्रुतत्वादननुभूतत्वाच्च नागमसम्भवस्तेषाम्। ईशजीवयोः सत्तायां तु अनुमानशास्त्रगुण-प्रत्यक्षताप्रमाणं यथास्थाने साधितम्।

ननु पुष्पेभ्यो मक्षिकाभिर्मधुग्रहणेऽपि भारादिना पूर्ववदवस्थितत्वात् तद्वद् ब्राह्मणेभ्यः परिवेशितभोजनस्याऽपि रसमेव गृह्णन्ति पितरोऽत एव तैः पितृभिर्भोजनमभक्षितं यथावद्

उत्तर—अब यहाँ यह विवेचनीय है कि जैसे उक्त छहों उदाहरणों में वैसी शक्ति से सम्पन्न पदार्थों के सामीप्य से वैसा सम्भव है, ईश्वर ने माता के स्तन्य (दूध) के उत्पादन की व्यवस्था की हुई है, शरीर या किसी पदार्थ के स्पर्श से उस क्षुप का म्लान हो जाना पदार्थगत विद्युदग्नि के कारण संभव है, मलोत्सर्जन या ज्वर उतरने का जादुई गुण तत्तद् ओषधियों में प्रकृति से उत्पन्न है, गर्भवती के दर्शन से सर्प का अन्धा होना, ये सभी प्रत्यक्ष प्रमाण से सिद्ध हैं, पर मृत पितरों के आगमन में प्रत्यक्ष, अनुमान, उपमान कोई भी प्रमाण नहीं है। अवशिष्ट भाग की आलोचना अन्यत्र की गयी है।

यहाँ आप बताइये कि आपके पितर मुक्ति को प्राप्त हुए हैं या नहीं ? यदि प्राप्त हैं, तो वे संसारगत श्राद्धभोजन करेंगे नहीं; क्योंकि वे अलौकिक परमानन्द से पूर्ण तृप्त हैं। यदि वे मुक्त नहीं हुए हैं, तो अन्य जन्म में अन्य शरीर को अपरिहार्यरूपेण कर्मानुसार धारण करेंगे या कर लिया, तब भूतनिर्मित शरीरान्तर में आत्मा के निबद्ध होने पर दूर होंगे, तो आवाहनार्थ मन्त्रोच्चारण या तप का श्रवण वे न कर सकेंगे। इस कर्मकाण्ड की उन्हें कोई अनुभूति नहीं होगी तो वे आयेंगे भी नहीं। ईश्वर और जीव की सत्ता अनुमान, शास्त्र तथा गुणप्रत्यक्षता प्रमाण से सिद्ध की जा चुकी है।

प्रश्न—फूलों से मधुमक्खियाँ मधु ग्रहण कर लेती हैं, तब भी भार आदि में फूल पूर्व अवस्था में ही रहता है, उसी प्रकार ब्राह्मणों के लिये परोसे भोजन के रस को भी पितर ग्रहण कर लेते हैं, इसीलिये पितरों द्वारा भोजन न खाया हुआ सा यथावत् बना रहता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अवतिष्ठत इति वाच्यम्, तन्न, यन् मक्षिका मध्वपहरन्ति तत् प्रत्यक्षम्। भारादौ पुष्पाणां पूर्ववदवस्थितिरिति तु न तथ्यम्, द्रव्यांशस्य मधुनः कुसुमेभ्यः पृथग्भूतत्वाद् भारे न्यूनताया अवश्यम्भाविता आनुमानिकी सिध्यति। केवलं तादृग्भारमापकतुलायामनाविष्कृतायां न भारक्षतिरिति अप्रमाणम्।

न च पितृभी रसेऽपहृते तादृक्तुलाऽनाविष्करणे तथैव प्रामाण्यं स्यादिति वाच्यम्, पितृभी रसादानस्य प्रत्यक्षादिप्रमाणाभावादप्रामाण्यम्।

प्रश्नः—यथा हि कश्चिद् धनादेशं स्वदेश एव प्रेषयति तदा पत्रागारे दत्ता मुद्रास्तु अत्रैव रक्ष्यन्ते, समाचारेण तारद्वारा विनिमयेऽन्या मुद्राः प्रदीयन्ते दानीयाय जनाय, तथैव परिवेशितमिह भोजनमिहैव तिष्ठति, परं प्रार्थित ईश्वरस्तद्विनिमयेऽभीष्टानुरूपं वस्तु भोजनाय ददाति। यदा हि श्राद्धं भुञ्जाना ब्राह्मणा 'अर्यमा देवम्०' मन्त्रमुच्चारयन्ति तदा ब्राह्मणशरीरेभ्यो विद्युत्तरङ्गाः स्फुरन्ति। ते च सर्वव्यापकपरमात्मना सह सम्बध्नन्ति। परमात्मा च श्राद्धकर्तुर्भावनाज्ञोऽमुक-स्थानगतममुकयोनिस्थितं तत्पितरं श्राद्धफलं प्रापयति।

उत्तर—यह बात नहीं है, मक्षिका प्रत्यक्ष ही मधु का अपहरण करती है, पर भार आदि में द्रव्य उतना ही बना रहता है, यह सच नहीं है। यह तो कहा जा सकता है कि उसके माप सकने की तुला या यन्त्र हमारे पास नहीं। द्रव्यांश मधु के फूल से हटने पर भार कम होने में अनुमान प्रमाण है।

ऐसे ही 'पितृ-भोजन के रस के ले लेने पर भी यही समझना चाहिये कि उसके मापन की तुला का अभी आविष्कार नहीं हो पाया है' यह नहीं कहा जा सकता; क्योंकि पितरों के द्वारा रस लेने में भी कोई प्रमाण नहीं है।

प्रश्न—जैसे कोई व्यक्ति यहाँ लेटर-बॉक्स में पत्र डालता है या धनादेश भेजता है, तो वहाँ के सिक्के में उसका भुगतान हो जाता है। वे मुद्राएँ तो यहीं रखी रह जाती हैं। समाचार तार द्वारा वहाँ पहुँच जाता है। उसी प्रकार यहाँ परोसा हुआ भोजन ब्राह्मणों के समक्ष ही रखा रहता है, मन्त्र द्वारा वहाँ वैसा उस योनि के अनुसार विनिमय में भोजन मिल जाता है। यह ईश्वर द्वारा सम्पन्न होता है। जब श्राद्धभोजी ब्राह्मण 'अर्यमा देवम्०' मन्त्र बोलते हैं, तब ब्राह्मण-शरीरों से विद्युत्तरङ्गें प्रस्फुरित होती हैं और परमात्मा श्राद्धकर्ता की भावना को जानता है, तो वह अमुक योनि या अमुक स्थानगत उसके पितर को श्राद्ध-फल पहुँचा देता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उ०—इदं तावदतत्त्वाभिनिवेशनवचनम्। यदा धनादेशप्रेषकः प्रेषयति धनं तदा प्रापकः प्राप्नोति, न प्रेषयेत् तदा न प्राप्स्यति। न वा तद्देशशासनव्यवस्था प्रदास्यति धनम्। परं परमात्मव्यवस्था न श्राद्धकर्तुरधीना। न कुर्याच्चेदयं श्राद्धं तदा तत्पितरोऽमुकयोनिं गता न भोगं प्राप्स्यन्तीति नैवम्। ते स्वकर्मानुसारमीश्वरव्यवस्थया स्वकीयभोग्यमवश्यं प्राप्स्यन्ति प्राप्नुवन्ति च। न च कर्मफलदानाय कस्यचिदपि प्रार्थनामसौ प्रतीक्षते।

इदं तावद् घोराज्ञानं यदाह तरङ्गविस्फुरणम्, पुनः परमात्मना सर्वव्यापकेन सम्बन्धम्। न चाहायं कीदृक् सम्बन्धः, व्याप्यव्यापकसम्बन्धोऽन्यो वा। किन्तरङ्गसम्बन्धाऽभावे ईश्वरस्य तत्पितृभोजनभोगप्रदानव्यवस्थाऽभावः कल्प्यते भवता?

सिद्धान्ती—इदमपि वक्तव्यं यदिमे भवदभीष्टाः पितरोऽपि यमलोके जीविता मृता वा? जीविता एवेति जीवितश्राद्धं तु सिद्धपक्ष एव, भावत्को यथा साध्यकोटिगतः।

पूर्वपक्षः—साधुतरमुच्यते भवता यदात्मरूपा अस्माकं पितरो जीविता एव, यतो नात्मा म्रियते, एतदभिप्रायकं श्राद्धमस्माकमपि मतं जीवितानामेव। न कश्चिदावयोः सिद्धान्तभेदः।

उत्तर—यह तत्त्व को न समझकर कहा गया है। धनादेश (मनीआर्डर) भेजनेवाला भेजता है तब प्रापक प्राप्त करता है, न भेजे तो प्राप्त न होगा। पर वहाँ की प्रबन्धव्यवस्था श्राद्धकर्ता के अधीन नहीं है। यह व्यक्ति श्राद्ध न करे, तो भी अमुक योनि में गये हुए पितर अपना भोग प्राप्त न करेंगे, यह बात नहीं। वे स्वकर्मानुसार ईश्वर की व्यवस्था से अपने भोग्य को अवश्य प्राप्त करेंगे। वह परमेश्वर कर्मों का फल देने के लिये किसी प्रार्थना की प्रतीक्षा नहीं करता।

यह कथन करना भी घोर अज्ञान है कि तरङ्गविस्फुरण सर्वव्यापक परमात्मा से सम्बन्धित है। इन्होंने यह नहीं बताया कि वह किस प्रकार का सम्बन्ध है, व्याप्य-व्यापक सम्बन्ध है या अन्य? क्या तरङ्ग के सम्बन्धाभाव में उन पितरों के भोगप्रदान की व्यवस्था ईश्वर नहीं करेगा?

सिद्धान्ती—अच्छा, अब आप यह बताइये कि यमलोक में मरकर पहुँचे हुए ये आपके पितर वहाँ जीवित हैं या मरे हुए? यदि वे जीवित हैं तो भी हमारा पक्ष सिद्ध है और आपका पक्ष अब भी साध्यकोटिगत है।

पूर्वपक्ष—आपने यह बहुत ठीक कहा है कि आत्मरूप पितर तो जीवित हैं, जिससे जीवितों का श्राद्ध सिद्ध है और इसी से ऐसा क्यों नहीं मानते कि वे आत्मा स्वर्ग में शरीर छोड़कर गये हैं। आत्मा कभी मरता नहीं, अतः इसी से मृतकों का भी श्राद्ध सिद्ध है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उत्तरपक्षः—न नोऽभिप्रायोऽधिगतो भवता। एष आशयो यद् देवपित्रादिसंज्ञा न केवलमात्मनाम्, किन्तु शरीरसहितानामेव, शरीरस्यैव जीवात्मसहितस्य क्षुत्पिपासानिवृत्तेः सङ्गतत्वात्।

एवम् अथर्ववेदे (१८। ४। ७८) 'स्वधा पितृभ्यः पितृषद्भ्यः' इत्यादिप्रमाणैः पृथिव्यामन्तरिक्षे दिवि वा सर्वत्र वेदविज्ञानाद्याविष्कारवद्भिः पितृभिः स्थीयते जीवितैरेव। अत्र विषये निर्मलभणितितर्क एषः—

गर्भस्थाः पितरो हि मातुरुदरे नागन्तुमत्र क्षमाः,
आगच्छन्ति च चेत् शिशुः किमु तदा निर्जीव एवाभवत्।
मुक्तानां पुनरागमः कथमयं पश्वादियोनिस्थितौ,
भुक्तान्नस्य तृणादिना परिणतिर्जायेत भूयः कथम्॥

ननु मृतश्राद्धकरणेन तु चाण्डालादियोनिगता अपि गतपापा विशुद्धाः सन्तो ब्राह्मण्यमुपयान्ति ते पितरः। यथा च स्कन्दपुराणे—

अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः।
तृप्यन्ति तेन चाण्डालपुल्कसाद्यासु योनिषु॥

उत्तरपक्ष—आपने हमारा अभिप्राय नहीं समझा। हमारा आशय यह है कि देव पितृ आदि संज्ञाएँ आत्मा की तो होती नहीं, किन्तु शरीर (स्थूल) सहित आत्माओं की होती हैं; क्योंकि केवल जीवसहित शरीर में ही भूख और प्यास लगती है, जिसकी निवृत्ति का यत्न श्राद्ध किया जाता है।

इस प्रकार अथर्ववेद (१८।४।७८) के प्रमाणों से पृथिवी, अन्तरिक्ष या द्यौ लोक में वेद के विज्ञान से आविष्कार करके पितृलोग जीवित रहते ही हैं। उक्त विषय पर निर्मलोक्ति तर्कपूर्ण है—

यदि पितर लोग गर्भ में स्थित हैं तो वे श्राद्धस्थल पर नहीं आ सकते; क्योंकि वह शिशु उस समय क्या निर्जीव हो जायेगा? मुक्तों का भी आगमन सम्भव नहीं है तथा पशु आदि योनि में पितरों की स्थिति होने पर ब्राह्मणों द्वारा खाये श्राद्धान्न की तृण आदि के रूप में परिणति भी कैसे हो सकती है?

प्रश्न—मृतश्राद्ध करने से तो चाण्डाल आदि योनि में गये पापरहित विशुद्ध होकर वे पितर ब्राह्मणत्व को प्राप्त कर लेते हैं। जैसा कि स्कन्दपुराण में लिखा है—

अन्यायोपार्जित अर्थों से जो श्राद्ध मनुष्यों द्वारा किया जाता है, उससे चाण्डाल पक्कसादि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गतपापा विशुध्यन्ति ब्राह्मण्यमुपयान्ति वै ॥

इति चेत्, तन्न, इदं निखिलं कपोलकल्पितम्, एतस्य शास्त्रबुद्धिविपरीतत्वात्, अन्यायोपार्जितद्रव्यैस्तु उपार्जकानामपि नीचयोनिगमनसम्भावितत्वात्, तेषां त्वत्कल्पितमृत-पितॄणां स्वकर्मपरिपाके चाण्डालादिषु गतत्वात्, अन्यकृतकर्मणामन्यैर्भोक्तव्यत्वस्यासङ्गत-त्वात्, विना विशुद्धकर्मकरणेन निष्कल्मषत्वाऽसम्भावनया ब्राह्मण्योपयानस्याऽसम्भवाच्च।

न चार्याणां श्राद्धप्रथायास्तु प्रशंसनं यवनैरपि कृतमास्ते। 'वाक़यात आलमगीरी' नामकपुस्तके 'आकिलखाँ' यवनेन शाहजहाँराजपत्रमुद्धृतम्। यथा—

ऐ पिदर तू अजब मुसल्मानी,
ब पिदरे ज़िन्दा आब तरसानी।
आफ़रीं बाद हिन्दवान सद बार,
मैं देहन्द पिदरे मुर्दाराना दायम आब ॥

इत्यपि अनार्यजुष्टम्। मध्यकाले अनधीतसत्यशास्त्रैः श्रद्धातिरेके भावुकैः पुरुषैर्ब्राह्मण-मान्यतावर्धकोदरम्भरिभिरेषा प्रथा तथैव चालिता यथा शास्त्राऽविहिता आपत्तिकाले पत्युरनु-

---

योनियों में पहुँचे हुए फिर ब्राह्मणत्व को प्राप्त कर लेते हैं।

उत्तर—यह कथन कपोलकल्पित है; क्योंकि शास्त्र और बुद्धिसङ्गत नहीं है। अन्यायोपार्जित द्रव्यों से तो उपार्जकों की स्वयं नीच योनि में जाने की सम्भावना है। उन तुम्हारे कल्पित मृत पितरों के अपने कर्मों के परिपाक होने पर चाण्डालादि बने हैं। दूसरे अन्यकृत कर्मों का फल- भोग औरों को मिलना भी असङ्गत है; क्योंकि बिना विशुद्ध कर्म किये निष्कल्मष हो नहीं सकता, तो ब्राह्मणत्व को कैसे प्राप्त हो जायेगा ?

यह कहना भी ठीक नहीं है कि हिन्दुओं की श्राद्धप्रथा की प्रशंसा तो प्रभावित यवनों ने भी की है। जैसे 'वाक़यात आलमगीरी' नामक पुस्तक में 'आक़िल खाँ' यवन ने शाहजहाँ राजा के पत्रोद्धरण में लिखा है—

ऐ पिदर तू अजब मुसल्मानी,
ब पिदरे ज़िन्दा आब तरसानी।
आफ़रीं बाद हिन्दवान सद बार,
मैं देहन्द पिदरे मुर्दाराना दयम आब ॥

यह कथन भी अनार्यप्रतिपादित है। मध्यकाल में शास्त्र को न जाननेवाले भावुक पुरुषों ने श्रद्धातिरेक में वेदज्ञ ब्राह्मण आदि तथा निर्धनों को भोजन देने का उपाय निकाल लिया, या

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गमनविधायिका शरीरस्य अग्निदाहेन सतीत्याख्याप्रथा प्रचालिता। अमरकोशेऽपि 'सुचरित्रा तु सती साध्वी पतिव्रता', क्वचित् सतीति पार्वतीनामाऽपि, परं नाभिव्यज्यत एतेनानुमरणम्।

स्वर्गो मनुष्यलोकाद् भिन्नः

पृ० १५५६ आहायम्—"स्वामिदयानन्दः स्वर्गादिलोकं नोपगच्छति, तदपि वेदविरुद्धम्, निम्नोद्धृतमन्त्रैस्तत्सिद्धेः।

'अनस्थाः पूताः पवनेन शुद्धाः शुचयः शुचिमपि यन्ति लोकम्।
नैषां शिश्नं प्रदहति जातवेदाः स्वर्गे लोके बहुस्त्रैणमेषाम्॥'
(अथर्व० ४। ३४। २)

'घृतह्रदा मधुकूलाः सुरोदकाः क्षीरेण पूर्णा उदकेन दध्ना।
एतास्त्वा धारा उपयन्तु सर्वाः स्वर्गे लोके मधुमत्पिन्वमानाः॥'
(अथर्व० ४। ३४। ६)

न विद्यते अस्थ्युपलक्षितं षाट्कौशिकं शरीरं येषां ते अनस्थाः, दिव्यशरीराः, अत एव पवनेन वायुना पूताः पवित्रीकृताः शुद्धा निर्मलाः शुचयो दीप्यमाना एवंविधाः सवस्य यज्ञस्य कर्तारः शुचिं दीप्यमानं लोकं ज्योतिर्मयं लोकमपियन्ति देहावसाने प्राप्नुवन्ति। एषां स्वर्गे लोके स्थितानां शिश्नं भोगसाधनमिन्द्रियं जातवेदा अग्निर्न दहति निर्वीर्यं न करोति। बहुस्त्रैणत्वेऽपि सुकृतफलभोगस्थाने स्त्रीणां समूहो भोगार्थं विद्यते। एवं स्त्रीसमूहं भुञ्जानानामपि निवीर्यत्वशङ्का न भवतीत्यर्थः।" इति।

पेटपूजकों ने यह प्रथा प्रचलित करा दी। जैसे शास्त्रों से अविहित सती-प्रथा प्रचालित कर दी। अमरकोश में सती के पर्यायों में देखिये, वहाँ सुचरित्रा, साध्वी पतिव्रता को सती कहा है, कहीं पर 'सती' इसी कारण पार्वती का नाम भी पड़ गया, परन्तु इससे पति के पीछे मर जाने की ध्वनि नहीं निकलती।

स्वर्ग मनुष्यलोक से भिन्न है

पृ० १५५६—यह लेख कि—"स्वामी दयानन्द स्वर्ग प्रभृतिलोकों को स्वीकार नहीं करते, उनकी यह बात भी वेदशास्त्र के विरुद्ध है। निम्न मन्त्रों से स्वर्ग की स्थिति स्पष्ट ज्ञात होती है। 'अनस्थाः' इत्यादि अथर्ववेदीय मन्त्र में बताया गया है कि 'षाट्कौशिक' शरीररहित 'अनस्थाः' होते हैं। अर्थात् जो दिव्य शरीरवाले हैं, इसीलिये पवन से जो पवित्र, शुद्ध, निर्मल हो गये हैं, और अत एव देदीप्यमान हैं, इस तरह के यज्ञ का अनुष्ठान करनेवाले लोग मृत्यु के उपरान्त पवित्र तेजोमय लोक को प्राप्त करते हैं। स्वर्ग लोक में स्थित इन दिव्यदेहधारियों की भोग का साधन बननेवाली इन इन्द्रियों को अग्नि जलाता नहीं, वीर्यहीन नहीं करता। उस पुण्य कर्मों के उपभोग-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत् पौर्वापर्यवचनं बुद्धिविरुद्धम्। तपोयोगसाधनमननप्राप्यबोधानधिगमान्न मन्त्रार्थं साध्ववगन्तुं व्याख्यातुं वा पारयतेऽयम्। तत्र पृच्छ्यते—किमसौ तेऽयं स्वर्गलोकोऽपि दिव्य उत पाञ्चभौतिकः? यद्यलौकिको दिव्यः संसारगतत्वान्न सम्भवति, यदि च दिव्योऽर्थाद् ज्ञानप्रकाशमयः, तदाऽपि स्वर्गलोकस्य संसारात् पृथक्कल्पनयाऽलम्। अथवा पाञ्चभौतिक-शरीरेष्वपि सन्तस्ते आत्मज्ञानदिव्यशरीरा ब्रह्मज्ञानेन शरीरस्थितिविस्मरणात्।

यज्ञस्य कर्तारः शुचिलोके यन्ति, यज्ञकरणकाले तु ते एतल्लौकिकशरीरवन्त एव भवन्तीति तव कथनेनाऽपि सिध्यति 'देहावसाने' इति वचनात्। षाट्कौशिकशरीरं विना तु मुक्ता एव सम्भवन्ति। तत्र तव स्वर्गे याः स्त्रियो गतास्ता अपि किं दिव्यशरीरा भवन्ति उताहो भौतिकशरीराः? अथ च भौतिकशरीरास्तदा स्त्रीणां समूहस्य दिव्यशरीरैर्भोगः कथङ्करं

स्थान स्वर्ग में उनके उपभोग के लिये अनेक स्त्रियों के रहने पर भी वह सुकृती इस लोक की भाँति कभी वीर्यहीन नहीं होता।"

इनका यह पूर्वापर वचन बुद्धिविरुद्ध है; क्योंकि तप, योगसाधन, मनन से जो बोध प्राप्त होता, वह आपने प्राप्त ही नहीं किया, इसलिये यह लेख मन्त्रार्थ को सम्यक् समझने या व्याख्यान करने में समर्थ नहीं है। हम पूछते हैं, आप बताइये कि क्या यह आपका स्वर्गलोक भी दिव्य है? फिर दिव्य तो निराकार हुआ या कि पाञ्चभौतिक है? यदि अलौकिक दिव्य है तो क्या संसार से बाहर है? जैसा कि सम्भव नहीं। यदि संसारगत है, तो क्या द्यौलोक में होने के कारण दिव्य है? तो उस दिव्यता के होने अर्थात् सत्ता में ये प्रकृति की उपादानता है या नहीं? जीव और परमात्मा के सिवाय तो सभी का उपादान प्रकृति है। यदि वह केवल ज्ञानमय या ज्ञानप्रकाशमय है, तब भी संसार से पृथक् स्वर्गलोक की कल्पना, केवल कल्पना मात्र ही है। अथवा ऐसा कहिये कि पञ्चभूत के किन्हीं अंशों से बने शरीरों में भी रहते हुए भी वे ज्ञानी पितर आत्मज्ञानरूपी दिव्यशरीरवाले हैं और उन्होंने ब्रह्मज्ञान में लीन रहते हुए शरीरस्थिति का अध्यास ही भुला दिया है।

यज्ञ के कर्ता उस शुचिलोक को प्राप्त करते हैं, यज्ञ करते समय में तो वे इसी लौकिक शरीर को ही धारण करते हैं। इस प्रकार आपके कथन से अर्थात् 'देहावसान में' इससे भी सिद्ध है। और यह दिव्य शरीर तो फिर स्थूल, सूक्ष्म और कारण शरीर से भिन्न हुआ, जो केवल ब्रह्मज्ञाता का ब्रह्मज्ञानमय ही होगा। 'षाट्कौशिक' शरीर मुक्तों पर ही नहीं रहता। आपको यह इस दिव्य शरीर का स्वरूप भी बताना चाहिये था। वहाँ आपने स्वर्गीया स्त्रियाँ भी मानी हैं, वे भी क्या दिव्य शरीर की ही होंगी? या कि भौतिकशरीरवाली? अच्छा, मान लो भौतिकशरीरवाली हैं, तो दिव्यशरीरों का स्थूल पाञ्चभौतिक स्त्रीशरीरों से संयोग कैसे होगा? अच्छा, आपके तोष के लिये हम मान लेते हैं कि वे स्त्रीशरीर भी दिव्य होंगे, तो बताइये, उन दिव्यशरीरों की उत्तेजना किस

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

साध्यः ? दिव्यशरीराणां भोगक्षमत्वात् तव मते उत्तेजना कीदृशी अस्ति, यदि नोत्तेजना तदा भोगः कीदृशः ? भुञ्जानानामपि निर्वीर्यत्वशङ्काभावे पृच्छ्यते यत् ते स्वेच्छया भुञ्जते ? यद्येवं तदा इच्छोत्पत्तौ विकारसम्भव एव तदा पतनमपि। अथ चेद् विकारो मानसिकोऽपि स्त्रीभोगाय तदैवंविधस्वर्गलोको नातिरिच्यते संसारस्त्रीसुखात् संसाराद् वा।

भवता दिव्यशरीरत्वेऽपि भोगसाधनमिन्द्रियं मन्यते तत्राऽपि च वीर्यमपि, परमायुर्वेदशास्त्रानुसारं वीर्यं त्वन्तिमः परिपाकोऽन्नस्य, स तु तत्र न सम्भवति। यदि च सर्वमेव काल्पनिकम्, तदैवं सम्भवत्येतस्य तात्पर्यमदः।

इहैकं कथानकं स्मृतिपथमवतरति यदेको ब्राह्मणस्तेन सह चैको वणिक् तन्मित्रं कुत्रचिद् गतवन्तौ। मार्गे एका नदी आयाता। ब्राह्मणोऽवोचत्—मित्र ! अत्र स्नात्वा नैत्यिकं कृत्यं कर्तव्यम्। एवं द्वावपि स्नातौ। ब्राह्मणस्तु स्वदीर्घसन्ध्यायां मग्नो यदा निवृत्तोऽभवत्

स्वरूप की होगी ? क्योंकि दिव्य शरीर भोग या उपभोग कर नहीं सकते। यदि उत्तेजना होती है तो क्या वह भी दिव्य होगी ? यदि उत्तेजना नहीं होती तो भोग कैसे सम्भव है ? भोग करने पर भी वे निर्वीर्य नहीं होते, तो बताइये कि वे भोग करने की इच्छा स्वयं करते हैं या बिना इच्छा के आपके किसी एजेण्ट के द्वारा बलात् संयुक्त कर भुक्तभोग करा दिये जाते हैं ? यदि अन्यों के द्वारा अनिच्छा होने पर बलात् भोग कराया गया, तो भोग कहाँ रहा ? यदि स्वेच्छा से भोग करते हैं, तो इच्छा में विकार आयेगा और फिर वहाँ से पतन भी सम्भव है। तथा भोग तो दिव्य शरीरधारण करते ही प्रारम्भ हो जायेगा फिर तत्काल ही पतन भी होगा। इससे यज्ञकर्तृत्व निष्फल माना जाने लगेगा। जब मानसिक विकार होगा, तो वह तुम्हारा स्वर्गलोक इस संसार के स्त्री-सुख से पृथक् कहाँ सिद्ध होगा ?

आप तो दिव्य शरीर में भी योग का साधन इन्द्रियाँ ही मान रहे हैं और उन शरीरों में वीर्य भी मानते हैं। उस वीर्य का स्वरूप तो आपने बताया नहीं। इससे सिद्ध है कि यही अभिमत वीर्य है, तो आयुर्वेद में वीर्य तो अन्न का अन्तिम परिपाक है, जो वहाँ सम्भव नहीं है। यदि यह सब काल्पनिक है, तो यहीं पर एक कहानी सुन लीजिये—

एक ब्राह्मण अपने एक बनिये मित्र के साथ कहीं जा रहा था। मार्ग में एक नदी पड़ी। ब्राह्मण बोला—मित्र चलो, इसमें स्नान कर नैत्यिक विधि कर लें। तब दोनों ही नहाये। नहाकर सेठ जी ने थोड़ी सी पूजा की, पर पण्डित जी तो अपनी लम्बी पूजा में मग्न हो गये। जब पण्डित जी सन्ध्या करके निवृत्त हुए तो उन्होंने देखा कि वह सेठ जी अपने गोदी के वस्त्र की झोली से

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तदाऽपश्यद् यत् स वणिक् स्ववस्त्रस्यूतिकातो निःसार्य किञ्चिद् भक्षयन्निवासीत्। ब्राह्मणोऽपृच्छत्—भोः! किं खादसि? असावुदतरत् चणकान्। पुनरपृच्छत्—'सी सी' इति किं करोषि? असावुदतरत्—मरिचेन सह चर्वामि, मरिचं तु तीक्ष्णमस्ति।

तदा ब्राह्मणोऽब्रवीत्—मित्रवर! नैतदुचितं ते कृत्यम्, सार्धं समायातो मह्यं कथं न दत्तवान्? वणिगुवाच—मित्रवर! चणकाः सन्त्येव क्व? अहं तु काल्पनिकान् भक्षयामि। तदा विप्रोऽवादीत्—तदा तु काल्पनिकान् मोदकानेव कथं न खादसि? वणिग् न्यवेदयद् यद् मोदकास्तु अतितरां महार्घाः सन्ति। ब्राह्मण उपहसन् तं नीत्वाऽग्रे प्राचलत्।

इति तु दृष्टान्तमाध्यमेन त्वां ब्रवीमि यत् तव कल्पनयाऽनया न किमपि वस्तुजातं सिध्यति।

क्लेदनार्थकाद् 'उन्दी' धातोरोदनशब्दनिष्पत्तिः, येनार्द्रीं भवति हृदयम्, क्रीडार्थकाद् 'उर्द' धातोर्वा। ब्रह्मौदनम्=ब्रह्मज्ञानमेव मन्त्रस्य देवता। एतत्सूक्तस्य प्रथममन्त्रे अस्य ब्रह्मज्ञानस्य शीर्षं ब्रह्मवेद ईश्वरो वाऽपि, अस्य सामगानं बृहत् तत्पृष्ठं जगद् वा ('साम वै बृहत्'—तां० ७।

निकाल कुछ खा रहे थे। ब्राह्मण ने पूछा कि सेठ जी! क्या खा रहे हो? उन्होंने उत्तर दिया कि गुरु जी! आप तो लम्बी सन्ध्या में थे, हमने सोचा तब तक इस नाश्ते से भी निबट लें, सो चने खाने लगे। पण्डित जी ने फिर पूछा कि फिर 'सी सी' क्यों कर रहे हो? तो लाला ने कहा कि पण्डित जी! चने मिर्च काट-काट कर खा रहे हैं और मिर्च बड़ी तेज चरपरी है।

तब ब्राह्मण बोला—मित्रवर! तुम्हारा यह तो उचित काम नहीं, साथ-साथ आये तो हमारे लिये भी बाँट कर खाना चाहिये। वणिक् बोला—पण्डित जी! सो चने हैं कहाँ? वैसे ही झूठ-मूठ के खा रहे हैं। तो पण्डित जी बोले—जब झूठ-मूठ कल्पना के ही खाने थे तो लड्डू ही खाते, सी-सी भी नहीं करनी पड़ती। तो वणिक् बोला—लड्डू तो आजकल बहुत महँगे हैं, इसलिये चने खाये।

बस यही हाल आपका है। अरे! जब गप्प ही मारना है तो ऐसी तो मारो कि जिससे कुछ सिद्ध हो।

अब आप अथर्ववेद के 'अनस्थाः पूताः पवनेन शुद्धाः' मन्त्र का रहस्यार्थ समझिये। इस मन्त्र का देवता 'ब्रह्मौदन' है। ओदन शब्द क्लेदन अर्थात् आर्द्रीकरण अर्थवाली 'उन्दी' धातु से निष्पन्न होता है। 'उनत्तीति ओदनम्' अर्थात् जिससे क्लेदन हो। क्रीडार्थक 'उर्द' धातु से भी करण में ल्युट् प्रत्यय करने पर 'ओदन' शब्द सिद्ध होता है। इस प्रकार ब्रह्मज्ञान ओदन हुआ हृदय में भक्ति की आर्द्रता लाने के कारण। इस सूक्त के प्रथम मन्त्र में इस ज्ञान का शिर वेद अथवा ईश्वर है, बृहत् सामगान या जगत् इस ज्ञान का पृष्ठ भाग है, वामदेव्यगान इस ज्ञान का उदर-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

६। १७, 'यद् ह्रस्वं तद् रथन्तरं यद् दीर्घं तद् बृहद्'—कौ० ३। ५) , उदरं वामदेव्यगानं भूतपञ्चकं वा, छन्दांसि वेदमन्त्रा आनन्ददायकं पूजनीयं वा कर्म (पक्षौ) पार्श्वभागौ, अस्य सत्यमेव मुखम्। एतस्य मूलं विष्टारी यज्ञस्तपोऽभिजात उत्पन्नः। एतस्य यज्ञस्य ब्रह्मप्राप्तिरेव लक्ष्यम्, सामगानेन हृदयविशालताऽऽनन्दानुभूति रत्राभिप्रेता। एतद्ब्रह्मौदनाधिगमाय वेदनित्यस्वाध्यायः सत्यमननं सत्याचरणं च भवेत्। एवंविधं तपोयुक्तजीवनं ब्रह्मज्ञानेनार्द्रीभावं प्राप्नोति रसमयं वा भवतीति लाक्षणिकभावार्थः।

एवम् अनस्था अप्रक्षेप्या अनुपेक्षणीयाः स्थूलशरीररहिता वा पवनेन शुद्धाचरणेन प्राणायामेन वा शुद्धाः सूक्ष्मशरीरादपि रहिता आत्मस्वरूपाः शुचयः प्रकाशमाना महात्मानः शुचिं देदीप्यमानं लोकं गतिम् उपयन्ति प्राप्नुवन्ति। जातवेदा अग्निः कामाग्निः शिश्नं कामवासनां न दहति यद्यपि बहुस्त्रैणमिह, अर्थात् कामविजयी शङ्कर इवेन्द्रियजयिनो भवन्ति। अथवा एवंविधमहात्मनो बहुस्त्रैणं बहुषु जातवेदा ईश्वरः शिश्नं गतिं सामर्थ्यं वा न दहति।

अथर्ववेदे चतुर्थकाण्डे ३५ तमे सूक्ते द्वितीयमन्त्रे ओदनविषयः स्पष्टीकृतः। यथा—

स्थानीय है तथा भूतपञ्चक भी उदरस्थानीय है। छन्द अर्थात् वेद वा आनन्ददायक पूजनीय कर्म इस ज्ञान के दो पार्श्व भाग (पक्ष) हैं, सत्य इसका मुख है, विष्टारी विस्तार व विकासपूर्ण यज्ञ इस ज्ञान का मूल है, जहाँ यह उत्पन्न होता है। इस यज्ञ या तप का लक्ष्य ब्रह्मप्राप्ति है। सामगान के द्वारा हृदय की विशालता और आनन्दानुभूति यहाँ अभिप्रेत है। इस ब्रह्मौदन की प्राप्ति के लिये वेद का नित्य स्वाध्याय, सत्यमनन तथा सत्याचरण होना चाहिये। ऐसा तपोयुक्त जीवन ब्रह्मज्ञान के द्वारा आर्द्रता (सरसता) को प्राप्त होता है। यह सब मन्त्र का लाक्षणिक अर्थ है।

इस प्रकार 'अनस्थाः' का अर्थ है जो फेंकनेयोग्य या उपेक्षणीय नहीं है, ऐसे स्थूलशरीर से रहित अर्थात् शरीराध्यास से रहित पवन अर्थात् शुद्धाचरण वा प्राणायाम से पवित्र वा सूक्ष्मशरीर से भी रहित होकर आत्मस्वरूप में स्थित देदीप्यमान महात्मा लोग देदीप्यमान लोक अर्थात् गति (मोक्ष) को प्राप्त करते हैं। जातवेद अर्थात् उत्पन्न पदार्थों में विद्यमान अग्नि, यहाँ शिश्न के साहचर्य से कामाग्नि, कामवासना को उत्पन्न कर नहीं जलाती, यद्यपि यह योगी बहुत-सी स्त्रियों के बीच भी क्यों न हो अर्थात् वह कामविजयी शिवस्वरूप हो जाता है, अथवा इस प्रकार के महात्माओं की गति या सामर्थ्य को नहीं जलाता।

अथर्ववेद के चतुर्थ काण्ड के ३५वें सूक्त के द्वितीय मन्त्र में 'ओदन' की विशेषतायें पूर्णतया स्पष्ट की गयी हैं। यथा—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

येनातरन् भूतकृतोऽतिमृत्युं यमन्वविन्दन् तपसा श्रमेण ।
यं पपाच ब्रह्मणे ब्रह्म पूर्वं तेनौदनेनाति तराणि मृत्युम् ।।

तस्मान्नेह स्वर्गलोकोऽन्यः प्रमाणितः। अनुमीयते यवनैरपि एतदालङ्कारिक-लाक्षणिकमर्थमविदतां व्याख्यानमनुसृत्य हूरगिल्मासमन्वितः स्वर्गलोकोऽनुकृतः।

पृ० १५५६, अनु० २—यदाह—'घृतह्रदा मधुकूलाः सुरोदकाः०' इत्यथर्वमन्त्रं प्रमाणीकृत्य "दधिमधुघृतादिलक्षणस्य दिश्यासु कुल्यासु पूर्यमाणस्य रसस्यैताः सर्वा धाराः प्रवाहाः फलभूते स्वर्गे मधुमद् माधुर्येपितं वा पिन्वमानाः सिञ्चन्त्यस्त्वा त्वामुपसञ्छन्तु। तथा समन्ताः पर्यन्तवर्तिन्यः पुष्करिण्यः सरस्यस्त्वामुपतिष्ठन्तु। कीदृश्यस्ताः? घृतह्रदा घृतपूर्ण-ह्रदयुक्ता मधुकूलाः सुरोदकाः सुरा इव उदकं यासां ताः" इत्यादि।

तदप्यज्ञानम्, वास्तविकरहस्यानधिगमात्। ब्रह्मज्ञानपक्षे यथा घृतह्रदाः प्रकाशमानध्वनियुक्ता मधुकूला आत्मप्राणज्ञानरक्षासाधनवत्यः, सुरोदकास्तत्त्वमन्थनस्य ऐश्वर्यस्य सेविकाः क्षीरेण उदकेन दध्ना अर्थाद् भोजनसेचनधारणसाधनेन परिपूर्णा एताः सर्वा

जिसके द्वारा प्राणी मृत्यु को पार कर जाता है, जिसको तप और श्रम से लोग समझते या प्राप्त करते हैं, जिसको ज्ञान के लिये ही वेदाध्ययनपूर्वक आत्मसात् किया जाता है तथा जिस ओदन के द्वारा मैं भी मृत्यु को पार करता हूँ।

इसलिये यहाँ कोई अन्य स्वर्गलोक का वर्णन नहीं है। हमारा अनुमान है कि यवनों के ग्रन्थों में इस लाक्षणिक व आलङ्कारिक अर्थ को न समझनेवालों के व्याख्यान का अनुसरण करके हूर और गिलमा वाली जन्नत (स्वर्ग) का वर्णन कर लिया है।

पृ० १५५६, अनु० २—"घृतह्रदा मधुकूलाः सुरोदकाः क्षीरेण पूर्णा उदकेन दध्ना। एतास्त्वा धारा उपयन्तु सर्वाः स्वर्गे लोके मधुमत्पिन्वमानाः ॥' इस मन्त्र का आश्रय लेकर सारी दिशाओं में दही, मधु, घृत आदि की नहरों के रूप में बहती हुई धाराएँ उस स्वर्ग में अत्यन्त माधुर्य को भरकर तुम्हारे पास आवें। चारों तरफ इनसे भरी बावलियाँ तुम्हारी सेवा करने के लिये उपस्थित रहें। घृत के अथाह सरोवर, जिनके कि किनारे शहत से भरे हैं, जिनका जल सुरा के समान मादक है और जो दूध और दही से लबालब भरे हुए हैं, इनमें से तुम जिनको चाहते हो, वे सब पदार्थ उन नाना प्रकार की बावलियों से तुमको उस स्वर्ग लोक में प्राप्त होते रहें।"

यह सारा कथन अज्ञानपूर्ण है; क्योंकि इस रूपक का रहस्य इनकी समझ से ऊपर है। देखिये, ब्रह्मज्ञानपक्ष में घृत (घृ क्षरणदीप्त्योः) अर्थात् प्रकाशमान ध्वनियुक्त, आत्मा, प्राण और ज्ञान की रक्षा के साधनवाली, सुरोदकाः अर्थात् तत्त्वमन्थन या ऐश्वर्य की सेविका, भोजन, सेचन,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

धारणशक्तयः स्वर्गलोके मधुनामकज्ञानपूर्णतया त्वां सिञ्चन्त्यः (पिन्वमानाः) सादरं प्राप्नुवन्तु सम्पूर्णपुष्करिण्यः पोषणशक्तय उपस्थिता भवन्तु ।

शब्दानां लाक्षणिकव्याख्यैवाश्रयितव्या । सुराव्याख्याने एतस्य हिन्दीकर्त्रा लिखितम्, "जिनका जल सुरा के समान मादक है" । ईदृग्जलवत्यः पुष्करिण्यो नोपलभ्यन्ते क्वाऽप्यतः सुराशब्देनाध्यात्मिकी आनन्दस्थितिरेव ग्राह्या ।

सुरा नात्र लौकिकी, अपितु ईश्वरीयप्रेममयी स्थितिरेव । एतत् स्पष्टीकर्तुं पारस्यभाषाया एकपद्यमनूद्य प्रसङ्गवशादुद्धियते—

हे मद्य-पायिनि मुखादपसारय त्वम्,
वासः क्षणेन सदसोऽपररञ्जनं स्यात् ।
योऽचेतनो मदगतो हि स चेतनः स्यात्,
यो वा पतन्नयमुपैतु च साक्षधान्यम् ॥

किमत्र मद्यपायिन्या स्त्रिया प्रयोजनम्, सुरया सुरापायिभिर्वा ? यद्येवमवबुध्यते तदा

व धारण साधन से परिपूर्ण, ये सभी धारणाशक्तियाँ स्वर्गलोक में मधु नामक ज्ञान की पूर्णता से तुमको सींचती हुई सादर प्राप्त हों तथा सम्पूर्ण पोषक शक्तियाँ उपस्थित हों ।

यहाँ भी शब्दों की लाक्षणिक व्याख्या का ही आश्रय लेना चाहिये । सुरा शब्द का व्याख्यान इनके हिन्दीकार ने किया है—"जिनका जल सुरा के समान मादक है ।" ऐसी जलवाली पुष्करिणी पृथ्वी भर में कहीं उपलब्ध नहीं है । बस, यही भूल लक्षणा करने में कारण भी है । सुरा शब्द से आनन्दस्थिति ही ग्रहण करनी चाहिये ।

सुरा यहाँ पर लौकिकी नहीं है, अपितु ईश्वर की प्रेममयी स्थिति को ही सुरा कहा गया है । इसी आशय को स्पष्ट करने को फारसी भाषा का एक पद्य प्रस्तुत किया जा रहा है—

रुख़ से पर्दा हटा दे ज़रा साक़िया,
रंगे महफिल अभी ही बदल जायेगा ।
जो कि मदहोश है होश में आयेगा,
जो कि गिरता हुआ है, संभल जायेगा ॥

क्या यहाँ पर शराब पिलानेवाली स्त्री, शराब और शराबियों से मतलब है ? अगर ऐसा समझे, तो ख़ाक समझे । तब तो सारा गुड़ गोबर कर दिया । यह सारा शेर कुछ और ही बतला

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बुद्धेर्निष्कोषतैव। समग्रं पद्यं किमप्यन्यदेवाभिव्यञ्जयति। अत्र साक्षी विद्यते भगवान्, असौ मायाजवनिकान्तरितः। तथैवात्राप्याध्यात्मिकरहस्यमवधेयम्।

'स्वर्गे लोके न भयं किञ्चनास्ति' इत्याद्युपनिषद्वाक्येनाऽपि नैव स्वर्गलोकोऽन्यः सिद्धः। अब्रह्मज्ञस्य भयं भवति, तद् भयं जराभावेनाऽपि, परं योगावस्थायां समाधौ अशनायापिपासे तीर्त्वा शोकातिगदशैव स्वर्गलोकोऽस्ति। पौराणिकस्वर्गवर्णनं न वेदशास्त्रसम्मतम्। शास्त्रेषु स्वर्गशब्दप्रयोग ऐहिकसुखार्थे मोक्षस्याक्षयसुखार्थेऽपि प्रयुज्यते। ऐतरेयब्राह्मणस्यैतस्यार्थो यदुत्तमः स्वर्गः (सुखं) तावान् भवति यः सहस्रेन्द्रियैरपि नावाप्तुं शक्यते। इन्द्रियप्रतीकरूपाश्वो मन्तव्यो नान्यः संसारात् स्वर्गलोकः पृथक्। 'नरकं न्यरकं नीचैर्गमनम्' इति निरुक्ते। अतः 'सुखमेव स्वर्गो दुःखमेव नरकः' इति सत्यार्थप्रकाशोक्तिरसंशयं सत्या प्रतिष्ठिता।

रहा है। यह सूफी कवियों की कविता की बोतलों में भरी हुई ईश्वरीय प्रेम की शराब है। पिलानेवाला साक़ी भगवान् है और जीव और भगवान् के बीच माया का पर्दा पड़ा हुआ है, जिसकी ओट में उस साक़ी की मोहिनी छवि दिखायी नहीं पड़ रही है। उसी प्रकार इस मन्त्र का रहस्य भी अध्यात्मवाद की भाषा में ही समझना चाहिये।

'स्वर्गे लोके न भयं' इत्यादि उपनिषद् वाक्य से भी स्वर्गलोक अन्य नहीं है, यही सिद्ध होता है। जो ब्रह्मज्ञ नहीं है, उसे तो भय होता ही है, वह भय बुढ़ापे से भी होता है। पर योग की समाधि की स्थिति में ब्रह्मदर्शन से भूख और प्यास भी नहीं लगती। जैसा कि छान्दोग्य प्रपा० ८, खं० १ में लिखा है—

'एष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः' इति।

वह शोकातिग दशा ही स्वर्गलोक है। तोषन्याय से आपका स्वर्ग लोक मान लिया जाये, फिर वहाँ तो भूख प्यास कुछ लगती नहीं तो श्राद्ध भोजन उन मरे पितरों के लिये भेजने की चेष्टा निष्फल है। शास्त्रों में स्वर्ग शब्द का प्रयोग यहीं संसार में उच्च आत्मस्थिति का सुख कहलायेगा। यह शब्द मोक्ष के अक्षय सुखार्थ में भी प्रयुक्त होता है। ऐतरेय में भी इसका अर्थ उत्तम सुख है। वह स्वर्ग इतना होता है कि सहस्र इन्द्रियों (अश्व) से भी प्राप्त नहीं किया जा सकता। यहाँ अश्व इन्द्रियों का प्रतीक होगा, अतः इस संसार से पृथक् कोई अन्य स्वर्ग नहीं है। नरक नीच गति का नाम है तो स्वर्ग आत्मा मन आदि की उच्च स्थिति कहलायेगी। अतः सत्यार्थप्रकाश का लेख सर्वथा सत्य है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५५७, पं० ४—"बलिवैश्वदेवप्रसङ्गोऽपि दयानन्दस्य प्रमाणशून्यः, तद्बोधकमन्त्रादर्शनात्, अन्येषां ग्रन्थानां प्रामाण्यानभ्युपगमात्। प्रमाण उपस्थापितस्य 'अहरहर्बलिमित्ते०' इति मन्त्रस्य वेदबाह्यं व्याख्यानम्' भौतिकमग्निमतिथींश्चेत्यस्य कपोलकल्पितत्वात्। नहि वेदे भौतिकाग्नये वल्युपहारः क्रियते, किन्तु देवताविशेषस्य तदन्तर्यामिणश्चैव तत्तत्कर्मभिः समर्हणीयत्वात्।"

इति समग्रमविचिन्तनपुरस्सरमखण्डनीयस्यापि खण्डनार्थं कृतप्रतिज्ञानिर्वाहमात्रम्। दुर्जनतोषन्यायेनास्माभिरन्यग्रन्थप्रामाण्यानभ्युपगमेऽपि मनुस्मृत्यादिग्रन्थानां तवापि सम्मतानां वेदमूलकत्वमस्य त्वयैवोपपाद्यम्, तन्मूलकत्वाभावे तत्तद्ग्रन्थसमर्थितबलिवैश्वदेवादिविधीनामप्रामाण्ये सिद्धान्तहानिरापद्येत ते।

अस्मत्पक्षपुष्ट्यै तु महर्षिप्रस्तुतवेदप्रमाणमलम्, तच्च त्वया अन्यथार्थो मन्यते। यद्यपि न भवता अन्योऽर्थो लिखितः। आश्चर्यं यज्जडपूजकोऽपि भौतिकाग्नये बलिहरणं नानुमनुते।

पृ० १५५७, पं० ४—"दयानन्द का बलिवैश्वदेव भी प्रमाणशून्य है; क्योंकि उन्होंने तद्बोधक मन्त्र प्रस्तुत नहीं किया है। ये अन्य ग्रन्थों का प्रमाण मानते नहीं। प्रमाण में उपस्थापित 'अहरहर्बलिम्०' इस मन्त्र का व्याख्यान वेदबाह्य है; क्योंकि भौतिक अग्नि और अतिथि इसके अर्थ में इनके कपोलकल्पित हैं। वेद में भौतिक अग्नि के लिये बलि का उपहरण नहीं किया जाता, किन्तु देवताविशेष और उसके अन्तर्यामी परमात्मा को उन-उन कर्मों से प्रसन्न करने का विधान है।"

उक्त समग्र कथन अविचिन्तनरहित व अखण्डनीय ऋषिभूमिका का भी खण्डन अवश्य करने की प्रतिज्ञा का निर्वाहमात्र किया जा रहा है। दुर्जनतोष न्याय से यह मान भी लें कि ऋषि दयानन्द अन्य ग्रन्थों का प्रमाण मानते हैं, जबकि वे वेदानुकूल होने पर अन्य ग्रन्थों का प्रमाण मानते हैं, तब भी मनुस्मृत्यादि ग्रन्थ, जिन्हें आप भी प्रामाणिक मानते हैं, उनकी वेदमूलकता का तो उपपादन आप को करना चाहिये। उनकी वेदमूलकता के अभाव में उन-उन ग्रन्थों से समर्थित बलिवैश्वदेव आदि की विधियों के अप्रामाण्य में आपके सिद्धान्त की हानि होगी। अतः आपको बलिवैश्वदेव में वेद-प्रमाण उपस्थित करते हुए उक्त मन्त्रार्थ की वेदबाह्यता कहनी चाहिये।

हमारे पक्ष की पुष्टि के लिये महर्षि-प्रस्तुत उक्त वेदप्रमाण पर्याप्त है, जिसका अर्थ आप अन्यथा करते हैं, पर आपने भी वह अन्य अर्थ यहाँ नहीं लिखा। अतः ऋषि का अर्थ ही सर्वथा ठीक है। हमें बड़ा आश्चर्य है जो जड़पूजक बलि आदि का हरण अब तक सर्वत्र भौतिक अग्नि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिस्त्वत्र भौतिकाग्नौ नैत्यिकहोममिहेश्वराज्ञापालनार्थं विदधाति। अग्निमाध्यमेन प्रकृतिगतप्रभुशक्तिभ्यो हव्यार्पणेन यथेष्टलाभो भवति। भौतिकादग्नेः पृथग् अग्निदेवताया कस्याश्चिज्जीवितायाः कल्पनं तु ते कपोलक्रीडा, सर्वत्र परमेश्वरस्यैव प्रसादविधानाद् ऋषिणा बलिवैश्वदेवस्य वेदमूलकत्वे एव मनोरुक्तिः—

वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम्।
आभ्यः कुर्याद् देवताभ्यो ब्राह्मणो होममन्वहम्॥ ३।८४॥

इति सङ्गच्छते महर्षिकथनपुष्ट्यै।

पृं० १५५७, पं० १४—यदुच्यते—"ॐ अग्नये स्वाहा' इत्यादि दशमन्त्रैर्होमा उक्ताः। तदभिमतेषु वेदेषु मन्त्राः क्वोपलभ्यन्ते? मन्त्राणामर्था अपि कपोलकल्पिताः। यदि परमेश्वर एव मन्त्राणामर्थस्तदा 'अग्नये स्वाहा' इत्यनेनैव गतार्थता।" इत्याद्यप्यस्य जल्पाकस्य कपोल-चालनकलाकौशलाऽऽकलनमेव। इमे समेऽपि मन्त्रा वेदमूलकाः, तत्तद्विधिसम्पादनाय ऋषिभिः पृथक्कृत्य पठिताः। नहि सर्वत्र सर्वेषामेक एव परमेश्वरार्थः। परमेश्वरस्यानेके

के लिये मानते थे, वे अब यहाँ मना कर रहे हैं। ऋषि ने तो यहाँ पर भौतिक अग्नि में नैत्यिक होम का तत्तद् मन्त्रों से ईश्वराज्ञापालनार्थ विधान किया है। अग्नि के माध्यम से प्रकृतिगत प्रभु की शक्तियों के लिये हव्य अर्पण करने से यथेष्ट लाभ होता है। भौतिक अग्नि से पृथक् किसी जीवित अग्नि देवता की कल्पना तो आपकी कपोलक्रीडा है, ऋषि ने तो सर्वत्र परमेश्वर की प्रसन्नता का विधान किया है। बलिवैश्वदेव की वेदमूलकता मानकर ही मनु जी लिखते हैं—

'वेदसिद्ध बलिवैश्वदेव का गृह्य अग्नि में ब्राह्मण विधिपूर्वक इन देवताओं के लिये प्रतिदिन होम करे।' (मनु ३।८४)

महर्षि के कथन की पुष्टि में यह वचन सङ्गत है।

पृ० १५५७, पं० १४—यह कहना कि—"ॐ अग्नये स्वाहा' इत्यादि दश मन्त्रों से होम कहे गये हैं। दयानन्द के अभिमत वेदों में ये मन्त्र कहाँ हैं? मन्त्रों के अर्थ भी कल्पित हैं। यदि परमेश्वर ही मन्त्रों का अर्थ है तो एक ही मन्त्र 'अग्नये स्वाहा' से काम चल जायेगा।"

इस लेखक के ये सब आक्षेप कपोलचालनकला-कौशल मात्र हैं। ये सारे ही मन्त्र वेदमूलक हैं। तत्तद्विधियों के सम्पादन के लिये ऋषियों ने वेद से ही उन-उन अंशों का चयन करके पृथक्-पृथक् ओमादि स्वाहान्त पढ़ दिये हैं। सभी मन्त्रों का एक ही परमेश्वर अर्थ है, ऐसा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गुणाः, आनन्दप्रदत्वजगदुत्पादकत्वसर्वरोगनिवारकत्वसर्वोपकारकत्वादिगुणव्याख्यानस्य अग्निसोमविश्वदेवधन्वन्तर्यादिपाठस्य प्रयोजनवत्त्वात्। कुहूशब्देन दर्शेष्टिग्रहणमेव तस्यां तद्विहितत्वात्। शिष्टं समाहितमेव पूर्वम्।

पृ० १५५८, अनु० १—बलिप्रदानमन्त्रागतेन्द्रयमरुणादिशब्दैः परमेश्वरस्य तत्तद्गुणवद्विशेषशक्तिस्मरणेन प्राच्यादिदिक्षु बलिग्रासनिधानं क्रियते। शिष्टं भवदुक्तं भद्रकाल्यादिसविग्रहचेतनदेवतायाः कल्पनमपि अशास्त्रीयम्।

पृ० १५५९, अनु० १—यदुच्यते—"अतिथिविषये 'तद्यस्यैवं विद्वान् व्रात्योऽतिथिर्गृहानागच्छेत्' 'स्वयमेनमभ्युपेत्य०'—इतिमन्त्रयोर्व्रात्यपरत्वेनातिथिसामान्यवर्णनाभावः।" इदमज्ञानफलितम्, रूढिग्रस्तमतित्वेन शास्त्ररहस्यानवगमात्। अयं सर्वत्र प्रसिद्धार्थपुच्छं गृहीत्वा निखिलं वेदानां शिरसि मण्डयते। यथा—लोके शरीरायासजीवी व्याधादिर्व्रातः प्रसिद्धः स इव। एवं व्रातमर्हति 'दण्डादिभ्यो यः' (अष्टा० ५। १। ६६) इति सिध्यति व्रात्यः। परं रूढाः शब्दास्तु चिरकालानन्तरं वेदोत्पत्तेर्जाताः, परं यौगिको व्रतशब्दो 'वृञ्-वृङ्'धातुभ्याम् अतचि प्रत्यये निष्पद्यते—व्रियते इति व्रतम्। अथवा व्रत्यते निगम्यते 'मुण्डमिश्र०' (अष्टा० ३। १।

ऋषि ने कहीं नहीं कहा है। हाँ, भक्तशिरोमणि ऋषि की दृष्टि से परमेश्वर का अत्यन्त त्याग कदापि नहीं होता। परमेश्वर के अनेक गुणों—जैसे आनन्दप्रदता, जगदुत्पादकता, सर्वरोगनिवारकता, सर्वोपकारकता आदि—का व्याख्यान करना 'अग्नि, सोम, विश्वदेव, धन्वन्तरि' आदि शब्दों के पृथक्-पृथक् पढ़ने का प्रयोजन है। कुहू शब्द से दर्शेष्टि का ग्रहण करना अतितराम् उपयुक्त है; क्योंकि उसका विधान कुहू अर्थात् अमावस्या को होता है। शेष पूर्वतः समाहित है।

पृ० १५५८, अनु० १—बलिप्रदान के मन्त्रों में आये इन्द्र, यम, वरुण आदि शब्दों से परमेश्वर की उन-उन गुणवाली शक्तियों के स्मरण करने से पूर्व, दक्षिण, पश्चिम आदि दिशाओं में बलिग्रासों का रखना होता है। शेष आपका भद्रकाली आदि नामों से किसी अन्य चेतन देवता की कल्पना करना शास्त्रविरुद्ध है।

पृ० १५५९, अनु० १—यह कहना भी अज्ञानपूर्ण है कि—"तद्यस्य०' आदि ये दोनों मन्त्र व्रात्यपरक होने से अतिथिसामान्य का वर्णन नहीं करते।" क्योंकि आप की बुद्धि व्रात्यार्थ में रुढ़ि के खूँटे से बँधी है, अतः आप मन्त्रों का रहस्य ही नहीं समझ पा रहे हैं। यह पारिजातकार तो सर्वलोक में प्रसिद्ध और प्रचलित अर्थों की पूँछ पकड़ कर उन अर्थों को वेद के सिर पर मढ़ देता है। जैसे—लोक में तो शरीर-श्रम करके जीवन व्यतीत करनेवाला 'व्रात्य' कहलाता है। इस प्रकार व्रात शब्द से व्रात्य बना है। रूढ़ शब्द तो लोक में कालान्तर तक शब्दों के प्रयोग करने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

२१) इति ण्यन्ताद् व्रतशब्दाद् 'अकर्तरि च कारके संज्ञायाम्' (अष्टा० ३ । ३ । १९) इति घञि 'एरच्' (अष्टा० ३। ३। ५६) इत्यचि वा व्रातशब्दः सिध्यति। एवं व्रातात् समूहाच्च्यवतीति व्रात्यः सावित्रीपतितः। परं वेदे रूढ्यर्थग्रहणस्यानौचित्याद् व्रातात् 'तत्र साधुः' (अष्टा० ४ । ४। ९८) इति यति कृते व्रात्यः ।

अयं यौगिको ह्यर्थोऽत्र महर्षिणा गृहीतस्तेन 'महोत्तमगुणविशिष्टः सेवनीयोऽतिथिः' इत्यर्थः सर्वथा सङ्गच्छते। नहि पतितसावित्रीकस्य विद्वान् इति विशेषणं वेदे सम्भवति। न वा पतितसावित्रीके व्रात्ये घटतेऽयं मन्त्रः। यथा—'स्वयमेनमभ्युपेत्य ब्रूयाद् व्रात्य क्वाऽवात्सीः ? व्रात्योदकं गृहाण' इत्यादि।

नैवोक्तं कारणं भवता यदत्र कथं हीनार्थ एव व्रात्यो ग्राह्यः, न तूपरिदर्शितव्रात्यो बहूत्तमगुणविशिष्टः। अपरशब्देषु भवानेवाह यत्—"व्रात्यकाण्डे पञ्चदशे विशिष्टो व्रात्यः शिवः परमेश्वर एव।" इत्यर्थोऽपि यौगिकार्थग्रहणाभावे भवता कथं ग्रहीतुं शक्यते ? तस्माद् ऋषिप्रतिपादितोऽर्थ एव प्रमाणमसन्दिग्धम्।

पृ० १५६०, पं० १०—यदाह—"दयानन्दोक्तिः परस्परव्याहता, एकत्रोच्यते यस्य

के बाद बने, पर वेद में यौगिकार्थ का ग्रहण होगा। जैसे व्रत शब्द वृङ् और वृञ् धातुओं से अतच् प्रत्यय करने पर बनता है, जो वरण किया जाये वह व्रत होता है। अथवा ण्यन्त व्रत शब्द से घञ् या अच् प्रत्यय करने पर भी 'व्रात' सिद्ध होता है। उस व्रात (समूह) से च्युत का नाम व्रात्य कहलायेगा। वेद में रूढ्यर्थ का ग्रहण उचित नहीं है। अथवा व्रात अर्थात् समूह में जो साधु (उपयुक्त) हो, वह भी व्रात्य कहलायेगा।

यह यौगिकार्थ महर्षि ने ग्रहण किया है। अत एव 'महोत्तमगुणविशिष्ट सेवनीय अतिथि' यह सर्वथा उचित है। मन्त्र में पतितसावित्रीक व्रात्य का विशेषण विद्वान् शब्द कदापि घटित नहीं होता और यह दूसरा मन्त्र भी पतितसावित्रीक व्रात्य में घटित नहीं होगा। यथा—'स्वयम् इसके पास जाकर विनम्र हो बोले कि हे व्रात्य ! आपने रात कहाँ बिताई ? जल ग्रहण कीजिये' आदि।

इसमें आपने कोई कारण प्रस्तुत नहीं किया कि हीन अर्थवाले व्रात्य का क्यों ग्रहण किया जाये ? और बहुत से उत्तमगुणविशिष्ट का ग्रहण न किया जाये। दूसरे शब्दों में उल्टा आप स्वयं कह रहे हैं कि—"१५वें व्रात्यकाण्ड में विशिष्ट व्रात्य शिव अर्थात् परमेश्वर ही है"। फिर बताइये कि विना यौगिक अर्थ ग्रहण किये आपने परमेश्वर अर्थ कैसे ग्रहण कर लिया, परमेश्वर तो पतितसावित्रीक है नहीं। इसलिये ऋषिप्रतिपादित अर्थ ही असन्दिग्धरूप में प्रमाण है।

पृ० १५६०, पं० १०—"दयानन्द के कथन में परस्परव्याघात-दोष है। एक स्थान पर वे कह रहे हैं कि जिसके गमनागमन की तिथि अनिश्चित है, वह अतिथि है, आगे मन्त्र के व्याख्यान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गमनागमनानियता तिथिः सोऽतिथिः। उत्तरत्र मन्त्रव्याख्याने तु सत्योपदेशकर्तृत्वे तस्य मित्रादितर्पकत्वमुच्यते।" इत्यत्रायमुद्धरणेऽपि छलमाचरति नाविकलमवतार्य। उत्तरत्र पाठोऽयम्—'यथा भवन्तः स्वकीयोपदेशेनास्मानस्माकं मित्रादींश्च तर्पयन्ति तथाऽस्मदीया भवन्तं च तर्पयन्तु।' नैवास्त्यत्र कश्चित् परस्परविरोधः।

यच्चाह—"मूले एकवचनान्त एव व्रात्यशब्दः। व्याख्याने यथा भवन्त इति बहुवचनमपि तत्र प्रयुक्तम्।" इति, तदप्यकिञ्चित्करम्, बुद्धेस्तवानूहनशीलत्वात्। श्रीमन्! त्वयाप्युत्तरणीयमस्ति यन् मन्त्रे 'व्रात्य तर्पयन्तु' इति पाठोऽस्ति सम्बोधनमेकवचनं लोटि प्रयोगो बहुवचनान्तः, तत्तूहनेनैव समाधातुं योग्यम्, अत एव महर्षिरत्रैवं व्याचष्टे।

किं बहुना, मन्त्रब्राह्मणश्रौतगृह्यसूत्रस्मृत्यादिभिर्यज्ञोपवीतादिसंस्कारेषु यद्यत् कर्तव्यं तत्तत्र निर्दिष्टम्, परं कालान्तरे वेदविद्याया लुप्तत्वाद् वेदातिरिक्तग्रन्थेषु बहु प्रक्षिप्तं स्वार्थिभिः। तस्माद् विवेचकैर्वेदविपरीतं प्रतिपादितं कृत्यं नानुष्ठेयम्। परीक्ष्यः स्वतः प्रमाणं वेदं प्रमाणीकृत्य तदनुकूलमेवानुष्ठातव्यमिति विवेकः।

में सत्योपदेश करने पर मित्रादि को तृप्त करनेवाला मानते हैं।" इस उद्धरण में प्रथम बात तो यह है कि आपने ऋषिपाठ का अविकल उद्धरण न देकर छल किया, दूसरी बात बताइये कि अनियत तिथि होने पर जब कभी आने पर उस विद्वान् अतिथि के उपदेश से स्वयं या मित्र आदि को तृप्त करने से विरोध कहाँ है? इससे प्रतीत होता है कि आप न्यायदर्शन के वदतोव्याघात दोष के लक्षण से भी अपरिचित हैं। यहाँ कोई भी परस्पर विरोध नहीं है।

"मूल में एकवचनान्त व्रात्य शब्द है, परन्तु व्याख्यान में 'जैसे आप लोग' इस बहुवचन का प्रयोग करना उचित नहीं है।" करपात्री जी का यह कथन भी ठीक नहीं; क्योंकि उनकी बुद्धि ऊहाशक्ति से शून्य है। श्रीमन्! आप ही उत्तर दीजिये कि एकवचन व्रात्य है, तो 'व्रात्य तर्पयन्तु' यहाँ 'तर्पयन्तु' बहुवचन प्रयोग कैसे सङ्गत होगा? इस पर महर्षि के द्वारा ऊहन व विचार कर समाधान किया गया है कि हे व्रात्य! आप हम सब को उपदेश से तृप्त करें और इसी प्रकार भविष्य मे भी आप लोग (भवन्तः) आकर तृप्त करें। वैसे भी लोट् लकार के विधि, निमन्त्रणादि अर्थ भविष्य में ही घटित होते हैं।

अधिक क्या लिखें? मन्त्र, ब्राह्मण, श्रौत, गृह्यसूत्र, स्मृति आदि से यज्ञोपवीत आदि संस्कारों में जो-जो कर्तव्य हैं, उन-उन का निर्देश किया गया है, परन्तु कालान्तर में वेद विद्या के लुप्त होने से वेदातिरिक्त ग्रन्थों में स्वार्थियों ने बहुत सा प्रक्षेप कर दिया। इसलिये विवेचक विद्वानों को वेद के विपरीत प्रतिपादित कृत्य नहीं करना चाहिये, परीक्षा करके स्वतः प्रमाण वेद को प्रमाणित मान कर उसके अनुकूल ही अनुष्ठान करना चाहिये।

अतः "शिखा पद से क्या समझा जाये और वह कहाँ रखी जावे? यज्ञोपवीत का कैसे

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अतः "शिखापदवाच्यं किं क्व च तद्रक्षणीयम्, यज्ञोपवीतस्य कथं निर्माणम्, तच्च क्व कथं च धारणीयमेतत् सर्वं सामाजिकैर्मन्त्रबलेन न साधयितुं शक्यम्" इत्येतत् सर्वं 'यथा सस्यवृक्षादिबीजानि अस्माभिर्नोप्येरन् भूम्यां न वा जलखादादिना वर्ध्येरन् तदा न बीजमात्रेण किमपि साधयितुं शक्यते' इति बालिशकथनस्येवाज्ञानप्रश्रयि वचः। वेदेषु मूलरूपेण सर्वविद्याविधानात् तदनु चर्षीणां बुद्धीनामप्रमादानां सहजतया मूलज्ञानस्य पल्लवितत्वात्। इति न तव चिन्तनं वरम्, ऋषेस्तु श्रेष्ठमेव।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम'नामग्रन्थे
'पञ्चमहायज्ञ-विषयः
॥ सम्पूर्णः ॥

निर्माण किया जावे तथा उसका धारण कैसे किया जावे ? यह सब आर्यसमाजी मन्त्र के बल से सिद्ध नहीं कर सकते ।" करपात्री जी का यह सारा कथन ऐसा ही बेसमझ बालक का सा कथन है, जैसे आप कहें कि 'खेती, वृक्ष आदि के बीज यदि हम न बोयें और जल, खाद आदि से न बढ़ायें तो बीजमात्र होने से कुछ भी नहीं हो सकता' यह अज्ञान ही है । वेदों में तो मूल रूप से सब विद्याएँ हैं, उसके बाद ही अप्रमादी ऋषियों की बुद्धियों ने स्वाभाविक रूप से मूल विद्या-बीज को अपनी बुद्धि-भूमियों में बोकर सत्यशास्त्ररूपी वृक्षों को पुष्पित, पल्लवित और फलित किया । वे आप काहिलों के समान नहीं सोचते थे । आपके शब्दों से तो वेदों की उपेक्षा और बाद के ग्रन्थों की प्रमुखता प्रतिपाद्य हो रही है । फलतः आपका चिन्तनप्रकार ठीक नहीं । ऋषिदयानन्द की व्याख्यानप्रणाली ही तर्कसङ्गत है, अतः श्रेष्ठ है ।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'पञ्चमहायज्ञ-विषय'
॥ सम्पूर्ण हुआ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ ग्रन्थप्रामाण्याप्रामाण्य-विषयः

पृ० १५६१—पू० प०—यदुक्तम्—"ये ईश्वरोक्ता ग्रन्थास्ते स्वतःप्रमाणं कर्तुं योग्याः, ये जीवोक्तास्ते परतःप्रमाणार्हाः। ईश्वरोक्ताश्चत्वारो वेदाः स्वतःप्रमाणम्, कुतस्तदुक्तौ भ्रमादिदोषाभावात्, तस्य सर्वज्ञत्वात्, सर्वविद्यावत्त्वात्, सर्वशक्तित्वात्' इत्यादि तत् तु निर्मूलमेव, वेदानामीश्वरोक्तत्वे प्रमाणाभावात्। न च वेदा एव तत्र प्रमाणम्, अन्योन्याश्रय-प्रसङ्गात्। नहीश्वरोक्तत्वं प्रामाण्यप्रयोजकम्। न चेदमनुमानम्, दृष्टान्ताभावात्। न च व्यतिरेकदृष्टान्तेन तत्सिद्धिः आप्तोक्तानामपि प्रामाण्यदर्शनात्।" इत्यादि।

उ० प०—वस्तुतस्त्वविचारचारु कथनमस्य। सर्गारम्भे चतुर्णामृषीणां हृदयेषु ईश्वरीयज्ञानस्य प्रादुर्भूतत्वात् स्वतःप्रामाण्यम्, ईश्वरातिरिक्तस्यान्यस्य कस्यचिज्ज्ञानदातुर-भावात्, ज्ञानस्य च स्वयमजायमानत्वाच्च। सृष्ट्यादिप्रादुर्भूता जनाश्चात्र प्रमाणम्। तेषामेव साक्षित्वेन शतपथकारो मनुश्च वेदानुकूलसम्भवत्वेनान्यग्रन्थप्रामाण्यं चाऽध्यगाताम्। किञ्चायमेव प्रश्नो भवत्स्वपि सम्भवति, ब्राह्मणोपनिषदादीनामपि भवता वेदत्वेनाभिमन्यमानेन

पृ० १५६१—पूर्वपक्ष—"जो ईश्वर के कहे हुए ग्रन्थ हैं, वे स्वतःप्रमाण करने योग्य हैं। जो जीवों के कहे हुए हैं, वे परतःप्रमाण करने योग्य हैं। ईश्वरोक्त चार वेद स्वतःप्रमाण हैं। ईश्वर के कथन में भ्रमादि दोषों का अभाव है, क्योंकि वह सर्वज्ञ, सर्वविद्यावान् और सर्वशक्तिमान् है।' इत्यादि भूमिकालेख निर्मूल ही है; क्योंकि वेदों के ईश्वरोक्त होने में कोई प्रमाण नहीं है। यह नहीं कहा जा सकता कि वेद ही प्रमाण हैं; क्योंकि ऐसा कहने में अन्योन्याश्रय दोष होगा। ईश्वर का कथन होना कोई प्रामाण्य का प्रयोजक नहीं है। इसमें अनुमान का प्रयोग नहीं हो सकता; क्योंकि इसमें कोई दृष्टान्त नहीं है। व्यतिरेक दृष्टान्त से भी उसकी सिद्धि नहीं हो सकती; क्योंकि आप्त पुरुषों के कथन का भी प्रामाण्य देखा जाता है।" इत्यादि।

उत्तरपक्ष—वस्तुतः इनका कथन जब तक तर्कतुला पर नहीं तोला जाता, तभी तक सुन्दर लगता है। सृष्टि के आरम्भ में चार ऋषियों के हृदयों में ईश्वर का ज्ञान प्रादुर्भूत हुआ था, तब उसका ही प्रामाण्य स्वतःसिद्ध है; क्योंकि ईश्वर के अतिरिक्त अन्य कोई ज्ञानदाता नहीं था तथा स्वयं भी ज्ञान विकसित नहीं हो सकता था। इस विषय पर प्रथम खण्ड में अपेक्षित लिखा जा चुका है। इस ज्ञान के प्रमाण साक्षीभूत सृष्ट्यादि में उत्पन्न मनुष्य रहे। उनके ही साक्ष्य से शतपथकार और मनु ने भी वेदानुकूल सम्भव होने से अन्य ग्रन्थों की भी प्रमाणता कही है। दूसरे जो प्रश्न आपने हमसे किया है, यह तो आप पर भी उतने ही बल से लागू है और आप तो ब्राह्मण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रामाण्यसाधन एष एवाऽभियोगः । अतो नेयं युक्तिः स्वस्थमस्तिष्कप्रसूता ।

ननु भवता नामायं ग्रन्थो व्यलेखि, इह किं प्रमाणम् ? यद्यन्ये जना विद्वांसः प्रमाणम्, तर्हीदं मौलिकं भवद्बुद्धिचिन्तनमेवेत्यत्र किं प्रमाणम्? भवच्चिन्तनं कुतोऽपि पूर्वग्रन्थकृत-प्रश्नेभ्यश्चोरितमुताहो स्वीयं मौलिकमित्यत्र न ते जनाः प्रमाणम्, चिन्तनशीलबुद्धेरगोचरी-कृतत्वात् तेषाम् । चेद् भवान् वक्तीति मृषावादित्वस्याऽपि सम्भवात् । वस्तुतस्त्वयं ग्रन्थस्तव भक्तानां विदुषां कृतिरिति अन्तःसाक्षित्वात् ।

वेदा ईश्वरोक्ता इत्यत्र वेदा एव प्रमाणम्, 'तस्माद् यज्ञात्' इति प्रामाण्यात्, तेनारचने तत्सर्वज्ञत्वादिगुणनैष्फल्यापत्तेः, ईश्वरास्तित्वस्यासन्दिग्धत्वाच्च । न च वेदप्रामाण्येनेश्वरो-क्तत्वं साध्यमीश्वरस्य सर्वज्ञस्य सिद्धत्वात् । अतोऽन्योन्याश्रयदोषोद्भावनाऽयुक्ता । इदमपि अनर्गलं यन्नेश्वरोक्तत्वात् प्रामाण्यं भविष्यति वेदानाम् । मनुष्यस्य दोषरहितस्याप्रामाण्यं त्वत एवाह यत् स दोषग्रस्तोऽपि जायते कदाचित्, परमीश्वरस्तु स्वभावत एव शुद्धो बुद्धो मुक्तश्च,

---

और उपनिषद् आदि को भी वेद मान बैठे हैं, तो इस पर भी प्रामाण्यसाधन में यही अभियोग चल सकता है । अतः आप की यह उक्ति आपकी स्वस्थमस्तिष्कता को नहीं प्रकट कर रही है । अस्तु ।

अच्छा, यह वेदार्थपारिजात ग्रन्थ आपने बनाया है, इसमें क्या प्रमाण है ? यदि कहो कि अन्य साथी विद्वज्जन प्रमाण हैं, तो बताइये कि आपकी ही बुद्धि का यह मौलिक चिन्तन है, इसमें क्या प्रमाण है ? वे मनुष्य आपके भीतर न होने से चिन्तन में साक्षी नहीं हो सकते कि यह प्रश्नावली या आरोप-समूह अन्य (आर्यसमाज की मौत, कालूराम के ग्रन्थ या भूमिका पर अन्य आक्षेपकर्ता घनश्याम आदि के ही घिसे-पिटे प्रश्न आपने चुराए हैं) ग्रन्थों से नहीं लिये गये हैं । अगर यह कहें कि इसकी रचना आपने की है तो आपके भ्रम, पक्षपात, असूया, ईर्ष्या आदि से ग्रस्त होने से भी आपका लिखना मिथ्या है; क्योंकि आपके ग्रन्थ के प्रमाण से ही हमने पूर्व सिद्ध किया है कि यह ग्रन्थ अन्यों ने लिखा है, आपने नहीं ।

वेद ईश्वररचित हैं, इसमें वेद ही प्रमाण है । यथा 'तस्माद् यज्ञात्' यह प्रमाण है । यदि उसके द्वारा न रचे जाते तो उसके सर्वज्ञत्व आदि गुणों की निष्फलता आ पड़ेगी । ईश्वर का अस्तित्व तो असन्दिग्ध है, योगी जनों द्वारा प्रत्यक्ष होने तथा अनुमान से सृष्टि का कर्ता होना आवश्यक होने से । अतः अन्योन्याश्रय दोष की उद्भावना युक्तिसङ्गत नहीं है और यह भी बकवास है कि ईश्वर के कहने से वेदों का प्रामाण्य नहीं हो सकता । भला आप्तोक्त को तो आप प्रमाण मान सकते हैं, पर आप्तों का भी आप्त परमाप्त का प्रामाण्य आपको स्वीकृत नहीं । भला, है न सिरफिरापन । आपने मनुष्य का दोषरहित होने पर प्रामाण्य माना है, जो कि कभी दोषग्रस्त था या होने की सम्भावना रही, पर अब निर्दोष व निर्भ्रान्त है । परन्तु ईश्वर तो स्वभावतः ही

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत ईश्वरोक्तत्वादेव प्रामाण्यमवश्यमवधारयितव्यम्। तत्साधने नानुमानस्यावश्यकता विद्यते। व्यतिरेकदृष्टान्तस्य कथनमेवासङ्गतम्, आप्तवाक्यानां स्वतःप्रामाण्याभावात्। ईश्वरसिद्धावनुमानं प्रत्यक्षमपि वा योगिनां प्रमाणं गुणानामेव प्रत्यक्षीकृतत्वात्।

पृ० १५६१, पं० १२—यदुच्यते—"परसमवेतक्रियाफलशालिनः कर्मत्वेनैकस्मिन्नेव तदसम्भवेन कर्मकर्तृविरोधात्। न च प्रकाशान्तरनिरपेक्षत्वेन स्वप्रकाशत्वम्, सूर्यादीनामपि चक्षुरादिप्रकाशसापेक्षत्वेन तदयोगात्।" इति सर्वमनर्गलमसङ्गतं च, प्रकृतेऽघटितत्वात्। न ह्यत्र स्वामिना कर्मणः कर्तुर्वा एकत्वं प्रतिपाद्यते।

अत्र विपश्चितः श्रीकरपात्रस्य बुद्धिबलिहारितां पश्यन्तु यदयं वक्ति सूर्यादीनां प्रकाशे चक्षुषः प्रकाशापेक्षत्वम्। नहि बुद्धीन्द्रियेषु श्रोत्रादिषु आकाशादीनां गुणाः, प्रत्युत तत्तद्गुण-ग्राहकतैवास्ति। आकाशस्य शब्दो गुणो न च श्रोत्रस्य, श्रोत्रे तु तद्गुणग्राहकता गुणो विद्यते, तद्वन्न चक्षुः सूर्यवत् प्रकाशकरम्, प्रत्युत सूर्यादिप्रकाशे तत्तद्वस्तुदर्शनशक्तिमत्त्वमस्ति अर्थाद् रूपप्रत्यक्षकरणत्वं चक्षुषि वर्तते।

नित्य शुद्ध, बुद्ध और मुक्त है, अतः ईश्वरोक्त होने से ही वेद का स्वतःप्रामाण्य मानना चाहिये। इसके सिद्ध करने में अनुमान की आवश्यकता भी कहाँ है ? व्यतिरेक दृष्टान्त का कथन ही असङ्गत है; क्योंकि आप्त वाक्यों की स्वतःप्रमाणता नहीं कही है, जब कि वेदों की कही है। ईश्वर की सिद्धि में योगियों द्वारा प्रत्यक्ष या उसके गुण प्रत्यक्ष करने पर प्रत्यक्ष प्रमाण भी है। यह पूर्व कह चुके हैं।

पृ० १५६१, पं० १२—यह कहना कि—"स्वामी दयानन्द का कथन ठीक नहीं है; क्योंकि जिस क्रिया का फल दूसरे के साथ जुड़ा है, उसको कर्म कहा जायेगा; अतः कर्म और कर्ता कभी एक नहीं हो सकते। इस तरह की स्वप्रकाशता तो सूर्य दीपक प्रभृति में भी नहीं मिलेगी; क्योंकि वे भी चक्षु प्रभृति प्रकाश की सहायता के बिना किसी वस्तु को अपने आप नहीं प्रकाशित करते।" यह पारिजातकार का कथन अनर्गल और असङ्गत है; क्योंकि यह प्रकृत में घटित नहीं होता। स्वामीजी के द्वारा यहाँ पर कर्म और कर्ता की एकता कहीं नहीं कही गयी है।

यहाँ विद्वान् लोग देखें करपात्रीजी की बुद्धि की बलिहारी है, जो कि यह सूर्यादि के प्रकाश करने में नेत्र के प्रकाश की अपेक्षा करते हैं। श्रोत्र आदि ज्ञानेन्द्रियों में आकाशादि के गुण नहीं रहते, अन्यथा आकाशादि में और इन्द्रियों में भेद क्या रहता, प्रत्युत श्रोत्रादि में तत्तद् गुणों के ग्रहण करने का गुण रहता है अर्थात् चक्षु सूर्य के समान प्रकाश नहीं करता, किन्तु सूर्यादि के प्रकाश में उस-उस वस्तु को देखने की शक्ति है अर्थात् नेत्र रूप प्रत्यक्ष करने का असाधारण कारण है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वस्तुतस्तु प्रकाशान्तरनिरपेक्षत्वमेव स्वप्रकाशत्वमिह वेदाभीष्टम्। सूर्यादयस्तु स्वत एव प्रकाशन्ते, न सूर्यस्य दीपस्य वा दर्शनार्थमन्यस्य सूर्यस्य दीपस्य वाऽवश्यकताऽस्ति।

यच्चोच्यते—"न च सजातीयप्रकाशानपेक्षत्वे नैव स्वप्रकाशत्वम्, इतरग्रन्थानामपि स्वसजातीयग्रन्थानपेक्षत्वेन स्वप्रकाशत्वापत्तेः।" इति, तदप्यविचारचारु, बुद्ध्यसङ्गत-कुतर्कत्वात्। स्वप्रकाशकत्वं हि वेदानामेवेश्वरोपज्ञत्वादुच्यते, कः प्रश्न आदिसर्गे सजातीयग्रन्थानामन्येषां प्रणीतत्वस्य। श्रोत्रादीन्द्रियग्राह्यशब्दादीनामिव आद्यर्षीणां बुद्धीनां ज्ञानरूपवेदानां ग्राह्यत्वेनोपस्थितत्वात्। न वेदेतरग्रन्थानां स्वसजातीयग्रन्थानपेक्षत्वेऽपि स्वप्रकाशत्वं सम्भवति, अन्यग्रन्थगतप्रकाशस्य वेदप्रकाशापेक्षित्वात्, वेदप्रकाशेतरस्य भागस्य भ्रमदोषग्रस्तत्वापत्तेः। सूर्यो न हि स्वप्रकाशाय प्रकाशान्तरमपेक्षते, चक्षुस्तु सूर्यप्रकाशमपेक्षते वस्तुज्ञानाय, जीवात्मा वाऽपि ज्ञानाय चक्षुःसाहाय्यमपेक्षते।

पृ० १५६२, पं० १—यच्चाऽप्याह—"किञ्च, वेदेषु वेदानामेव प्रामाण्ये चार्वाकादी-नामपि तेषां प्रामाण्याभ्युपगमापातात्। सूर्यस्य यथावस्तुप्रकाशकत्वे ते यथा न विवदन्ते, तथैव

वस्तुतः वेदों की प्रकाशता यही है कि वह अपने ज्ञान के प्रकाशनप्रमाण में अन्य ग्रन्थ की प्रामाणिकता की अपेक्षा नहीं रखते, यही कहना अभीष्ट है। सूर्य आदि तो स्वयं ही प्रकाशित होते हैं अर्थात् सूर्य, चन्द्र, तारे, दीपक आदि के देखने के लिये अन्य सूर्यादि की आवश्यकता नहीं है।

यह कहना कि—"समानजातीय प्रकाश की अपेक्षा न रखने को यदि स्वप्रकाशता माना जाये, तब तो अन्य ग्रन्थ भी जब अपने सजातीय ग्रन्थों की अपेक्षा न रखें, तो उनकी भी स्वप्रकाशता मानी जाने लगेगी।" ठीक नहीं; क्योंकि यह कथन बुद्धि से असङ्गत तथा कुतर्क है। वेदों के स्वप्रकाशकत्व का कथन करना तो ईश्वरीय ज्ञान होने के कारण है, फिर सृष्टि के आदि में अन्य सजातीय ग्रन्थ होने का प्रश्न ही नहीं था। जैसे शब्द, स्पर्श, रूप आदि श्रोत्र, त्वक्, चक्षु आदि इन्द्रियों से ग्रहण किये जाते हैं, उसी प्रकार आदिम ऋषियों की विमल बुद्धियों द्वारा ज्ञानरूप वेदों को ग्रहण करने की क्षमता थी। बाद में रचित वेदेतर ग्रन्थों के द्वारा स्व प्रकाश के लिये स्वजातीय ग्रन्थों की अनपेक्षा होने पर भी स्वतःप्रकाशता नहीं कही जा सकती; क्योंकि इन ग्रन्थों के प्रकाश या प्रमाण के लिये वेद ग्रन्थ के प्रकाश की अपेक्षा होगी ही। वेद से इतर ग्रन्थ मनुष्यकृत होने से भ्रम दोष से ग्रस्त होंगे। सूर्य अपने प्रकाश के लिये अन्य प्रकाश की अपेक्षा नहीं रखता। परन्तु वस्तुदर्शन के लिये आँख सूर्य के प्रकाश पर आश्रित है। या ऐसा कहिये कि जीवात्मा ज्ञान के लिये नेत्र की सहायता चाहता है।

पृ० १५६२, पं० १—यह कथन भी बुद्धिशून्यता का सूचक है कि—"वेद का प्रामाण्य यदि वेद से ही सिद्ध है, तो उसमें फिर चार्वाक प्रभृति को भी किसी प्रकार का सन्देह नहीं होना चाहिये। सूर्य के प्रकाश से किसी वस्तु के प्रकाशित होने पर जैसे चार्वाक प्रभृति उस वस्तु के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदानां यथावस्तुप्रकाशकत्वेऽपि ते न विवदेरन्।" इति कथनमपि बुद्धिशून्यतासूचकम्।

ऋषिणा वेदेषु वेदानामेव प्रामाण्ये ईश्वरोक्तत्वमिति हेतुर्गदितः, ईश्वरस्याऽपि विशेषणानि सर्वज्ञत्वादीनि दर्शितानि। अत्र चार्वाकादीनां ग्रन्थानां प्रामाण्याभ्युपगमेऽयं न कमपि हेतुं प्रास्तावीत्। ते चार्वाकादयः प्रत्यक्षप्रमाणमेव मन्तारो रविणा वस्तुप्रकाशने यथा न विवदन्ते यदिदं तद् वस्तु विद्यमानम्, तथैव वेदैर्यत्र ज्ञापितं तत्संज्ञाभिमानेऽपि ते न विवदन्ते। परमेतस्य स्थानस्य एतेषां घृतादिभोज्यवस्तूनां स्वार्थोपयोगोपघाते समापतिते तु विवदन्त एव। तथैव ते वेदसिद्धान् तान् सर्वानविकलानमत्वाऽपि देहादिरचनां पृथिवीजलाग्निवायुभिरप्रत्यक्षगतामपि मन्यन्ते। 'ईशावास्यमिदं सर्वं' 'तेन त्यक्तेन भुञ्जीथाः' आद्युपदेशान् न श्रद्दधते स्वोदरपूर्तिपरायणा विवदन्ते च।

पृ० १५६२, पं० ३—यदाह—"नहि वेदानां स्वप्रकाशत्वं केचिद् दार्शनिका अभ्युपगच्छन्ति, शब्दात्मकानां तेषां श्रोत्रबुद्ध्यादिप्रकाश्यत्वेन स्वप्रकाशत्वाभावात्।

विषय में किसी प्रकार का सन्देह नहीं उठाते, उसी तरह से उनको वेदों से वेदों की प्रामाणिकता सिद्ध हो जाने पर विवाद नहीं उठाना चाहिये।"

समाधान—ऋषि दयानन्द ने वेदों के स्वतःप्रामाण्य में ईश्वरोक्तत्व हेतु दिया है। तथा उसके सर्वज्ञ और सर्वव्यापकत्वादि विशेषण दिये हैं। परन्तु करपात्री जी ने यहाँ पर चार्वाक आदि ग्रन्थों के प्रामाण्य स्वीकार करने में कोई हेतु प्रस्तुत नहीं किया, जब कि पक्ष में साध्यताको सिद्ध करने के लिये हेतु अनिवार्य होता है। दृष्टान्त का स्थान तो बाद में आता है, जैसा कि इन्होंने 'वेदों की तरह' कहकर दृष्टान्त दिया है। वे चार्वाक आदि तो प्रत्यक्ष प्रमाणमात्र को मानते हैं और रविप्रकाश द्वारा देखी वस्तु में विवाद नहीं करते। तो इस तरह तो वेदों के द्वारा सृष्टि के पदार्थों के रखे हुए सूर्य आदि नामों पर भी विवाद नहीं करते हैं, परन्तु इन निर्मित वस्तुओं के स्थान व घृतादि वस्तुओं के उपयोग के लिये तो विवाद करते ही हैं। उसी प्रकार वे वेद होने की सत्ता पर विवाद नहीं करते, प्रत्युत वेदों के सिद्धान्तों को अविकलरूप में न मानकर भी सृष्टि के आदि में हुई देह आदि की रचनाकला, जो पृथिवी-जल-अग्नि-वायु के द्वारा हुई है, अप्रत्यक्ष होते हुए भी मानते हैं। 'ईश्वर से यह विश्व आच्छादित व सञ्चालित है, उसके द्वारा दी हुई वस्तुओं का त्यागभाव से भोग करो' इत्यादि उपदेशों पर श्रद्धा नहीं रखते तथा स्वार्थपरायण होकर विवाद करते हैं।

पृ० १५६२, पं० ३—"कोई भी दार्शनिक वेदों की स्वतःप्रकाशता को स्वीकार नहीं करता; क्योंकि वे तो शब्दात्मक हैं, अतः उनका प्रकाश श्रोत्र, बुद्धि आदि की सहायता से ही हो सकता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ज्ञानजनकत्वेन स्वप्रकाशत्वे तु चक्षुरादीनामपि स्वप्रकाशत्वापत्तिः स्यात्।" इत्यपि नाम शास्त्रानभिज्ञतासाधकम्, शास्त्रेषु सर्वत्र वेदानां स्वप्रकाशताऽङ्गीकृतत्वात्। स्वप्रकाशताया अयमर्थः। वेदस्य ज्ञानस्य प्रकृष्टतया दीपनस्य सत्यत्वसाधनस्य स्वकीयमेव सामर्थ्यं विद्यते, नैतज्ज्ञानस्य सत्यत्वस्य समर्थनायान्यस्य ज्ञानस्यापेक्षा विद्यते, त्रैकालाबाधितर्कसङ्गतत्वात्।

स्वप्रकाशत्वं हि स्वतःप्रमाणत्वम्। नहि सृष्ट्यादौ जिज्ञासोरात्मनो ज्ञानस्य करणानि ज्ञानेन्द्रियाणि वेदज्ञानं प्रकाशयन्ति, रूपादिविषयसाक्षात्कृतत्वात्। ज्ञानमाद्यर्षीणां हृदयेषु तु स्वतः प्रकाशितं भवति। तस्यैव ज्ञानस्य सर्जनक्रमे प्रवहमाने व्यक्तशब्दैरुच्चारितैर्ज्ञानेन्द्रियेण सहकृतेन शब्दवाच्यार्थस्य ज्ञायमानत्वम्।

दार्शनिकैस्तु स्वतःप्रकाशकत्वं प्रामाण्यं वा बहुत्र साधितम्। यथा—'तद्वचनादाम्नायस्य प्रामाण्यम्' (वै० द० १।१।३), 'निजशक्त्यभिव्यक्तेः स्वतःप्रामाण्यम्' (सां० द० ५।५१)। इह सांख्यप्रवचनभाष्यम्—"वेदानां निजी स्वाभाविकी या यथार्थज्ञानजनकशक्ति-

---

है, स्वतः नहीं। स्वप्रकाश का अर्थ यदि ज्ञान का जनक माना जाय, तब तो चक्षु प्रभृति इन्द्रियों को भी स्वप्रकाश मानना पड़ जायेगा; क्योंकि वे भी तो ज्ञान की जनक हैं ही। इस आपत्ति को यदि आप स्वीकार कर लें अर्थात् यदि आप चक्षु प्रभृति इन्द्रियों को भी स्वप्रकाश मानने लगें, तो यह कैसे सम्भव हो सकता है। ये इन्द्रियाँ तो अतीन्द्रिय हैं, इनमें जब प्रकाश ही नहीं है, तब इनकी स्वप्रकाशता कहाँ आवेगी।"

यह पारिजातकथन भी शास्त्रज्ञान न होने से किया गया है। शास्त्रों में तो सर्वत्र वेदों की स्वप्रकाशता ही अङ्गीकृत है। स्वप्रकाशता का अर्थ है कि वेदज्ञान प्रकृष्टतया सत्य के प्रकाशन का साधन है, इस बात के समर्थन के लिये अन्य ज्ञान की अपेक्षा नहीं रहती; क्योंकि यह त्रिकाल में भी अबाधित अर्थात् मिथ्या सिद्ध नहीं हो सकता। यह ज्ञान तर्क की कसौटी पर खरा उतरता है।

स्वप्रकाशत्व ही स्वतःप्रमाण कहलाता है। जिज्ञासु आत्मा के ज्ञान की करण (असाधारण कारण) ये इन्द्रियाँ वेदज्ञान को सृष्टि के आदि में प्रकाशित नहीं कर सकतीं; क्योंकि तब तो आदि ऋषियों के हृदयों में ईश्वरीय ज्ञान वेद प्रकाशित हुए थे। उस ज्ञान का सर्जनक्रम प्रवहमान होने पर उच्चारित व्यक्त शब्दों के द्वारा श्रोत्र-ज्ञानेन्द्रिय के सहयोग से अन्य ऋषियों के द्वारा शब्दवाच्य अर्थ जाना गया।

दार्शनिकों के द्वारा स्वतःप्रकाशकत्व या प्रामाण्य बहुत स्थलों पर सिद्ध किया गया है। जैसे वैशेषिक में—'उसके वचन होने से वेद का प्रामाण्य है'। 'अपनी शक्ति की अभिव्यक्ति से भी स्वतःप्रामाण्य है' इसी पर सांख्यप्रवचन-भाष्य में कहा है—'वेदों की जो अपनी स्वाभाविक

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्तस्या मन्त्रायुर्वेदादावभिव्यक्तेः—उपलम्भादखिलवेदानामेव स्वत एव प्रामाण्यं सिध्यति।" निजाभिव्यक्तिरेव स्वप्रकाशत्वम्। तस्मादेव स्वतःप्रामाण्यनित्यत्वे स्वीकार्ये। मीमांसायामपि—'तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' (१।१।५)। 'चोदना' सूत्रस्य श्लोकवार्तिके कुमारिलः स्वामी आह—"यद् वा वक्तुरभावेन न स्युर्दोषा निराश्रयः।

अपि च— यदा स्वतःप्रमाणत्वं तदाऽन्यन्नैव मृग्यते।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः॥"

पृ० १५६२, पं० ५—"य ईश्वरमेव नाभ्युपगच्छन्ति, तेषां तदुक्तत्वेन वेदप्रामाण्याभ्युपगमाकांक्षा दुराशैव। अत एव वेदानामन्येभ्यो विरोधादप्यप्रामाण्यं न भवतीत्यन्धश्रद्धामात्रम्।" इत्युक्त्याऽपि स्वबुद्धिमेवोपालम्भमानः प्रतीयत इव। यतो हि वेदानां स्वतःप्रामाण्यमाक्षिपन्नेष तदभ्युपगमाकांक्षां दुराशामेव घटयति स्वात्मनि। एवं चार्वाकादीनां नास्तिकानां ग्रन्थानां परप्रकाशाऽपेक्षाणां प्रस्तुतिं कुर्वन् ईश्वरोक्तवेदानां स्वप्रकाशतामन्यमानो नास्तिकतायाः कां कोटिमधिटीकत इति विवेचका एव निर्णयन्ताम्। एवं पक्षप्रति-

---

यथार्थ ज्ञानपरक शक्ति है, उसकी मन्त्र-आयुर्वेद आदि में अभिव्यक्ति के उपलम्भ (प्रकाशन) से सम्पूर्ण वेदों का स्वतःप्रामाण्य सिद्ध होता है। 'निज अभिव्यक्ति ही स्वप्रकाशत्व है। इसी से स्वतःप्रामाण्य और नित्यत्व स्वीकार्य हैं। मीमांसा में भी—'वेद के प्रामाण्य में बादरायण के मत में अन्य की अपेक्षा नहीं है।' 'चोदना' सूत्र के श्लोकवार्तिक में कुमारिल स्वामी ने कहा है—

"किसी पुरुष के वक्ता न होने के कारण दोषों के लिये कोई आश्रय ही नहीं है। और भी—जब स्वतःप्रमाणता है तो अन्य प्रमाण नहीं खोजा जाता है, दोषों के न होने के कारण बिना प्रयास के ही मिथ्यात्व निवृत्त हो जाता है।"

पृ० १५६२, पं० ५—"जो ईश्वर को ही नहीं मानते, उनके मत से उस ईश्वर के द्वारा कहे गये वेदों की प्रामाणिकता की इच्छा रखना दुराशामात्र है। 'इसीलिये वेदों का अन्य ग्रन्थों के साथ विरोध भी हो, तब भी अप्रमाण नहीं हो सकते' यह उक्ति स्वामी दयानन्द की वेदों के प्रति अन्धश्रद्धा को व्यक्त करनेवाली है।"

इस कथन से ऐसा प्रतीत होता है कि मानो करपात्री जी अपनी ही बुद्धिहीनता को उलाहना दे रहे हैं; क्योंकि वेदों के स्वतःप्रामाण्य पर आक्षेप करते हुए ये उस आक्षेप की सफलता की आकांक्षा को अपनी बुद्धि में दुराशामात्र ही समझ रहे हैं। इस प्रकार नास्तिक चार्वाकादिक परतःप्रकाश (प्रामाण्य) की अपेक्षा रखनेवाले ग्रन्थों का प्रस्ताव करता हुआ ईश्वरोक्त वेदों की स्वतःप्रमाणता को न मानता हुआ यह नास्तिकता की किस कोटि में जा रहा है, इसका तो निर्णय विवेचक ही करेंगे। इस प्रकार पक्ष-प्रतिपक्ष का प्रस्ताव करते हुए, भ्रम आदि दोषों से दूषित

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पक्षतर्कप्रस्तुतिपूर्वं भ्रमादिदोषदूषितमस्तिष्कान्यजनरचितग्रन्थविरोधेऽपि वेदानां स्वतःप्रामाण्यं साधयतो महर्षेर्दयानन्दस्य शास्त्रलोचनस्य वेदान् प्रति सदसद्विवेकजन्यश्रद्धामन्धश्रद्धां प्रतिपादयन्नयं शास्त्रदृग्विहीनो न लजत इति विस्मयः।

पृ० १५६२, अनु० १—यदाह—"सिद्धान्ते तु सम्प्रदायावच्छेदे सत्यस्मर्यमाणकर्तृकत्वेनापौरुषेयत्वाद् वेदानामपास्तसमस्तभ्रमप्रमादविप्रलिप्साकरणापाटवादिशङ्काकलङ्कपङ्कत्वेनानपोदितं प्रामाण्यस्वतस्त्वं तिष्ठति।" इत्यादिनाऽपि प्रामाण्यस्वतस्त्वं साधितम्। परमत्रैष भेदोऽवगन्तव्यो विवेकिभिर्यत् सांख्ये पूर्वपक्षे वेदानां कार्यत्वं साधितम्—'न नित्यत्वं वेदानां कार्यत्वश्रुतेः' (५। ४५), तदुत्तरे 'न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात्' इति लिखितम्। पौरुषेयं हि—'यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत् पौरुषेयम्'।

नन्वेवं वेदेऽपि कृतबुद्धिरुपजायते, 'बुद्धिपूर्वा वाक्यकृतिर्हि वेदे' इति प्रमाणात्। तथा पौरुषेयताऽऽपद्यते इति चेन्, जीवात्मकृतिषु हि प्राग्ज्ञानार्थप्रयत्नस्तदा बुद्धिस्तदनु प्रयत्नो भवति। परं वेदरचनायां न प्राक् प्रयत्नो बुद्धेर्ज्ञानात्, अपि तु स्वाभाविकश्वासप्रश्वासवद्

मस्तिष्कवाले अन्य जनों के द्वारा रचित ग्रन्थों के विरोध में भी वेदों का स्वतःप्रामाण्य सिद्ध करनेवाले शास्त्रलोचन महर्षि दयानन्द की वेदों के प्रति सत्-असत्-विवेकजन्य श्रद्धा को अन्धश्रद्धा कहता हुआ यह शास्त्रदृष्टिविहीन जन लज्जित नहीं होता, इस पर हमें विस्मय है।

पृ० १५६२, अनु० १—यह कथन कि—"हमारे मत में तो सम्प्रदाय की अविच्छिन्न परम्परा के रहते भी उसका कोई बनानेवाला उसकी स्मृति में विद्यमान नहीं है, अतः वेदों की अपौरुषेयता सिद्ध होती है, अर्थात् यह मालूम हो जाता है कि उनका कोई बनानेवाला नहीं है। वेदों का कोई बनानेवाला नहीं है, इसलिये वेदों में कर्ता में विद्यमान भ्रम, प्रमाद, वञ्चना, इन्द्रियों की असमर्थता आदि दोषों की भी किसी प्रकार की आशङ्का नहीं उठती।" इत्यादि से प्रामाण्यस्वतस्त्व सिद्ध किया है। परन्तु विवेकी पुरुषों को इस तथा हमारे कथित पक्ष में यह भेद समझना चाहिये कि सांख्य के पूर्वपक्ष में वेदों का कार्यत्व सिद्ध किया गया है कि—'वेद नित्य नहीं हैं; क्योंकि वे कार्य हैं' (सां० ४। ५)। इसके समाधान में कहा है कि—'वेद पौरुषेय नहीं हैं; क्योंकि उसका कर्ता कोई पुरुष या जीवात्मा नहीं है'। पौरुषेय का लक्षण है— जिस वस्तु के रचयिता के आँखों से न देखे जाने पर भी कृतबुद्धि पैदा हो, वह पौरुषेय कहाता है'।

प्रश्न—इस प्रकार तो वेदों को देखकर भी कृतबुद्धि उत्पन्न होती है। जैसा कि प्रमाण है कि 'वेद में वाक्यरचना बुद्धिपूर्वक है'। इस रूप में वे भी पौरुषेय कहे जाने चाहिये।

उत्तर—अन्तर यह है कि जीवात्मा की कृतियों में प्रथम पूर्व के ज्ञान के प्रति प्रयत्न होता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदानामृषिहृदयेषु आविर्भावात्। यतः "लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोग-विशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छा-नुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति।" (प्रशस्तपा० भा०)

पृ० १५६२, पं० ११—यच्चाहायम्—"नैयायिकादिरीत्या त्वीश्वरोक्तानां वेदानां गुणवद्वक्तृकत्वेन प्रामाण्यं न त्वीश्वरोक्तत्वेन, अननुगमाद् गौरवाच्च। गुणवद्वक्तृकत्वं त्वीश्वरानीश्वरसाधारणप्रोक्तवचनेष्वनुगतम्।" इति त्वपरिष्कृतमतिप्रलपितम्, तात्विकान-नुचिन्तनात्, गुणवद्वक्तृकत्वेन तत्र सर्वज्ञत्व-सर्वविद्यावत्त्व-सर्वशक्तिमत्त्वादिगुणविशिष्ट-वक्तृकत्वस्यैवाभीष्टत्वात्। नेमे गुणा अनीश्वरसाधारणे घटन्ते। शाब्दप्रमावेदद्वारा प्रकाशित-

---

है, तब बुद्धि से समझ लेना, फिर तदनुकूल प्रयत्न करना होता है। परन्तु वेदरचना के लिये ईश्वर द्वारा निःश्वासवत् स्वभावतः प्रकटित वेदज्ञान (ऋषिहृदयों में) देने के लिये कोई प्रयास नहीं करना पड़ता।

इस प्रकार अस्मर्यमाणकर्तृकत्वादि हेतु से जीव की कर्तृकता का बाध होता है, ईश्वरकर्तृकता का निषेध नहीं होता; क्योंकि स्मृति का सम्बन्ध तो जीवात्मा से होता है, परमात्मा किसी वस्तु की स्मृति नहीं करता; क्योंकि उसका ज्ञान तो शाश्वत है। क्योंकि—"लिङ्ग (हेतु) के दर्शन एवं इच्छा, स्मृति प्रभृति (उद्बोधकों) से साहाय्य प्राप्त आत्मा और मन के विशेष प्रकार के संयोग और संस्कार इन दोनों से उत्पन्न ज्ञान ही स्मृति है। यह प्रत्यक्ष, अनुमिति और शाब्दबोध के द्वारा ज्ञात विषयों की होती है, अतः स्मृति अतीतविषयक ही होती है। स्मृतिजनक उक्त संस्कार अत्यन्त स्फुट ज्ञान, अभ्यास और आदर से उत्पन्न होता है। वह (स्मृतिरूप ज्ञान) अनुमिति, इच्छा, स्मृति और द्वेष का (उत्पादक) कारण है।" (प्रशस्तपाद-भाष्य)

पृः १५६२, पं० ११—"नैयायिक प्रभृति दार्शनिकों के मत से तो ईश्वरोक्त वेदों का प्रामाण्य इसलिये माना जाता है कि ये गुणवान् वक्ता के द्वारा उपदिष्ट हैं। केवल ईश्वर के द्वारा उपदिष्ट हैं, इतने मात्र से वेदों का प्रामाण्य नहीं माना जा सकता; क्योंकि इसमें कोई अनुकूल तर्क नहीं है, साथ ही ऐसा मानने में गौरव भी है। गुणवान् वक्ता तो ईश्वर भी हो सकता है और ईश्वरभिन्न कोई आप्त पुरुष भी, अतः यह लक्षण सभी प्रामाणिक वाक्यों में अनुगत रहता है।"

यह कथन भी अपरिष्कृत मति का प्रलापमात्र है; क्योंकि उस विषय का तात्त्विकरूप से अनुचिन्तन नहीं किया गया है। वस्तुतः उस स्थल पर गुणवद् वक्ता का अभिप्राय उस ज्ञान गुण के समवाय सम्बन्ध से होना माना गया है, अतः सर्वज्ञता, सर्वविद्यावत्ता और सर्वशक्तिमत्ता आदि गुणविशिष्ट वक्तृकत्व ही अभीष्ट है। सर्वज्ञत्वादि गुण अनीश्वर साधारण में घटित नहीं होते।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ज्ञानस्य पारतन्त्र्याद् वेदानां परमेश्वरकर्तृकत्वमवश्यं स्वीकार्यम्, 'मुक्ताऽमुक्तयोरयोग्यत्वात्' (सां० ५ । ४७) सूत्रेण मदुक्तभावस्य सम्पोषितत्वात् ।

पृ० १५६३, अनु० १—अत्र चतुर्णां वेदानामिव यद् ब्राह्मणादिग्रन्थानां वेदत्वमाहायं तद् वेदार्थकल्पद्रुमस्य द्वितीयखण्डे वेदसंज्ञाप्रकरणे 'भाग' शब्दस्याऽपि विषये कथितं तद् द्रष्टव्यं जिज्ञासुभिः । श्रीकरपात्रवन्नास्माभिः पिष्टपेषणं विधास्यते ।

पृ० १५६३, अनु० २—यदप्याह—"सत्यधर्मप्रियाचरणैरिति पाठस्य नार्थसङ्गतिः, तदनिरूपणात् । न धर्मस्यासत्यत्वं सम्भवति, येन तद्व्यावृत्तये सत्यमिति विशेषणसार्थक्यं स्यात् ।" इत्यप्यविचारितफलम्, धर्मस्य सत्यस्यैव ग्रहणे तात्पर्यात् । भूतप्रेतपूजा-मृतकश्राद्धादिविषयको यो धर्माभासो भवादृग्भिर्धर्मत्वेन स्वीक्रियते तद्व्यावृत्त्यर्थमेव सत्यविशेषणं सार्थकम्, यथा च 'सत्यधर्माय दृष्टये' इत्याद्यपि सङ्गच्छते ।

शाब्दप्रमा (शब्दाश्रित ज्ञान) वेद द्वारा प्रकाशित ज्ञान जीवात्मा के अधीन न होने से वेदों का परमेश्वरकर्तृत्व ही अभीष्ट है । सांख्य के ५ । ४७ सूत्र के अनुसार मुक्त पुरुष मुक्ति की अवस्था में ब्रह्मानन्द को भोगता है आर बद्ध सर्वज्ञ नहीं है, इसलिये दोनों ही वेदों के कर्ता नहीं हो सकते । सर्वज्ञ होने से ईश्वर ही वेदों का कर्ता है ।

पृ० १५६३, अनु० १—यहाँ पर चारों वेदों के समान ब्राह्मणों के वेद होने का राग इन्होंने फिर अलापा है, सो वेदार्थकल्पद्रुम के द्वितीय खण्ड में 'वेदसंज्ञा' प्रकरण में इसका तथा 'भाग' शब्द ग्रहण करने का तात्पर्य बता दिया गया है, जिज्ञासु जन वहीं देख लें । श्री करपात्री जी के समान पिसे हुए को पुनः पीसना हम बुद्धिसङ्गत नहीं समझते ।

पृ० १५६३, अनु० २—"भूमिका में स्वामी दयानन्द ने इस नये प्रकरण का आरम्भ 'सत्यधर्मप्रियाचरणैः (प्रियाचरणै)' इस वाक्य से किया है, जिसका कि कुछ अर्थ नहीं निकलता । लगता है इसीलिये बाद में पाठ बदल दिया गया, तब भी इसकी सङ्गति नहीं बैठती; क्योंकि इसके लिये उन्होंने कुछ प्रयत्न नहीं किया । धर्म कभी असत्य नहीं होता, अतः उसकी व्यावृत्ति के लिये भी 'सत्य' विशेषण देने की कोई सार्थकता नहीं ।"

वेदार्थपारिजात का यह कथन विचारशून्य है । यहाँ पर सत्य विशेषण देने का तात्पर्य यह है कि सत्य धर्म का ही ग्रहण किया जाये, असत्य धर्माभास का नहीं । भूत-प्रेत-पूजा, मृतकश्राद्धादिविषयक धर्माभासों, जिनको कि धर्म के रूप में आपसदृश मानते हैं, की व्यावृत्ति के लिये 'सत्य' विशेषण देना सर्वथा सार्थक है । अत एव 'सत्यधर्माय दृष्टये', 'सत्यमन्त्रः' (ऋ० १ । २० । ४), 'सत्यधर्मा' (यजु:० १२ । ६६), 'सत्यधर्माणम्' (ऋ० १ । १२ । ६०) आदि प्रयोगों की साधुप्रयोगसार्थकता सिद्ध है । यह इनका बुद्धिबाह्य दुःसाहसमात्र है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५६४—"य ईश्वरोक्ता ग्रन्थास्ते स्वतःप्रमाणं कर्तुं योग्याः सन्ति' इत्यस्य कोऽभिप्रायः ? ग्रन्थाः स्वतःप्रमाणं केन कथं कर्तुं शक्यन्त इति तु सामाजिका एव जानन्तु। प्रामाणिकैस्तु स्वतःप्रमाणं प्रामाण्यस्वतस्त्वादेव न क्रियते।" इत्यादि बालबुद्धिसमीरितम्, वाक्याभिप्रायाऽमननात्। अत्रायमाशयो यद् ईश्वरेणोक्ता वेदग्रन्थाः सर्वैर्विद्वद्भिः स्वतः-प्रमाणकोटौ मन्तव्याः। अथवा 'कृञ्' धातुः 'आदाने करोतिशब्दः' (मीमां० ४। २। ६) यथा काष्ठानि करोति, गोमयानि करोति—आदाने करोतिशब्दो भवति, एवमिहापि द्रष्टव्यम्(शाबर-भाष्ये) । तद्ग्रन्थास्ते ग्रहीतुं योग्याः स्वतःप्रमाणमिति कृत्वा न काऽपि विप्रतिपत्तिः ।

सर्वज्ञानमयवेदादिसच्छास्त्रेषु कृताक्षेपाणां समाधानाय तु संविदाकाराः सामाजिका एवेति भवतां लेखः प्रमोदावहो गर्वगौरवहेतुश्चास्माकम्। अत्र प्रामाण्यस्वतस्त्वान्न प्रमाणं क्रियते परमीश्वरोक्तत्वात् क्रियते इति न निमीलितलोचनेन भवता दृष्टम्।

पृ० १५६४, पं० ६—यदुच्यते—"वेदार्थव्याख्यानाः' इत्यत्र समानवाचकयोरर्थ-व्याख्यानपदयोरन्यतरस्योपन्यासो व्यर्थ एव, एकेनैव गतार्थत्वात्।" इत्यपि तयोरर्थभेदा-नाकलनव्यामोहः। अर्थशब्देन सामान्यार्थः शब्दानामभीष्टः, व्याख्यानं नाम विशेषरूपेण

पृ० १५६४—"जो ईश्वरोक्त ग्रन्थ हैं, उनको स्वतःप्रमाण करना चाहिये' इसका अभिप्राय भूमिकाकार बताएँ। ग्रन्थों को स्वतःप्रमाण कौन किस तरह से करेगा, इस बात को आर्यसमाजी ही जान सकते हैं। प्रामाणिक जन तो प्रामाण्य के स्वतस्त्व के आधार पर शब्दों को स्वतःप्रमाण नहीं मानते।" इनका यह कथन बालबुद्धिप्रेरित है; क्योंकि इन्होंने ऋषि के वाक्य का मनन नहीं किया। यहाँ पर ऋषि के वाक्य का आशय यह है कि ईश्वरोक्त वेद सब विद्वानों के द्वारा स्वतःप्रमाण कोटि में मानने चाहिये अथवा 'कृञ्'धातु का आदान अर्थ में भी प्रयोग होता है। इसी प्रकार यहाँ पर भी स्वतःप्रमाण रूप में ग्रहण करने योग्य हैं, यह अर्थ होगा। इसमें कोई विप्रतिपत्ति नहीं है। वेदग्रन्थों का स्वतःप्रामाण्य सभी विद्वान् पुरुष करेंगे।

सर्वज्ञानमय वेद पर किये आक्षेपों के निराकरण करने के तो ठेकेदार आर्यसमाजी ही हैं, अतः आपका ऐसा सोचना हमारे लिये प्रमोदकारक है तथा हमारे लिये गर्व और गौरव का हेतु है। यहाँ पर प्रामाण्यस्वतस्त्व के कारण वेदों का प्रामाण्य नहीं किया जा रहा है, प्रत्युत ईश्वरोक्त होने से स्वतःप्रमाणत्व माना जा रहा है, इस वस्तुस्थिति को देखने के लिये आपने आँखें बन्द कर ली हैं।

पृ० १५६४, पं० ६—यह कहना कि—"वेदार्थव्याख्यानाः' इस भूमिका-वचन में अर्थ और व्याख्यान एकार्थवाचक है। इन दोनों में किसी एक का ही प्रयोग पर्याप्त है, दूसरे का उपन्यास व्यर्थ है; क्योंकि अर्थ की प्रतीति किसी एक से ही हो जायेगी।" ठीक नहीं है; क्योंकि आप को अर्थ और व्याख्यान दोनों में भेद देखने की योग्यता नहीं है। अर्थ शब्द से तो शब्दों का सामान्यार्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शब्दस्य निर्वचनपूर्वकं धात्वाद्यर्थनिदर्शनमुच्यते। अर्थस्याऽपि सम्प्रबोधने किमपि विशिष्टमाख्यानं भवति तत्।

धन्यवादार्हा भवन्तो यद् '(व्याख्यानभूता) ब्राह्मणग्रन्था वेदानुकूलतया प्रमाणमर्हन्ति, इति वाक्यं न मनोज्ञम्, प्रामाण्यमर्हन्तीत्यस्यैव युक्तत्वात्' इति प्रास्तावीत्। अस्तु तवाऽपि मनोज्ञमस्माकमपि वा सामाजिकानामतितरां मनोज्ञं यद् 'ब्राह्मणग्रन्था वेदानुकूलतया प्रामाण्यमर्हन्ति' इति भवान् स्वीचकार सिद्धान्तत्वेन इत्यभिव्यक्तम्। यावद् वैयक्तिकस्वैर-मनोज्ञतायाः प्रश्नस्तावन्मेऽपि प्रस्तावो मनोज्ञो भाति। वस्तुतस्तु स्वतःप्रमाणभूता वेदास्तद्-भिन्नास्तद्व्याख्यानभूता ब्राह्मणग्रन्था वेदानुकूलतया अर्थाद् वेदानुवर्तनमाचरन्तस्तेषां वेदाना-मेव प्रमाणं प्रमाणभूततामर्हन्ति पूजयन्ति। यथा कश्चिद् राजसेवकः आज्ञामनुपालयन् उद्दिष्टराजप्रतिष्ठामेव वर्धयन्नात्मप्रतिष्ठामपि रक्षयति। अतः 'प्रमाणमर्हन्ति' इत्येष एव पाठो मनोज्ञतर इति दिङ्मात्रम्।

पृ० १५६४, पं० ८—यत्तु—"सर्वपदार्थानां श्रवणमननेनानुमानिकज्ञानतया निश्चयो भवति' इति वाक्यस्य कोऽर्थः? कथञ्चात्र समन्वयः? न चानुमानिकं ज्ञानं श्रवणेन शक्यं

ही अभीष्ट है, पर व्याख्यान में विशेषरूप से शब्दों का निर्वचन, धातु प्रत्ययादि का निदर्शन आदि किया जाता है। वास्तविकता यह है कि अर्थ को भी विशेषरूप से समझाना व्याख्यान होता है।

यहाँ हम आपका धन्यवाद कर रहे हैं, जो कि आपने लिखा है कि 'ब्राह्मणग्रन्थ वेद के अनुकूल होने से प्रमाण के योग्य हैं'। यहाँ 'प्रमाणमर्हन्ति' यह वाक्य आपको मनोज्ञ नहीं लगता, उसके स्थान पर 'प्रामाण्यमर्हन्ति' होना मनोज्ञ है। हम भी आपकी इस मनोज्ञता को मनोज्ञ मान रहे हैं, संशोधन शब्द-परिवर्तन स्वीकार है। हमें इससे अति प्रसन्नता है। इस प्रकार संस्कृत-वाक्य बना—'वेदग्रन्था वेदानुकूलतया प्रामाण्यमर्हन्ति'। अब चलो, सायं का भूला रात भर अन्धकार में भटकता सबेरे तो घर आ गया, जो आपने ब्राह्मणग्रन्थों की वेदानुकूलता में उन्हें प्रामाण्य माना। महाशय! इस रूप में आपने सिद्धान्त तो स्वीकृत कर लिया। जहाँ तक स्वच्छन्द मनोज्ञता का प्रश्न है, मुझे भी अच्छा लगा। वस्तुतः तो स्वतःप्रमाणभूत वेद और उनसे भिन्न व्याख्यानभूत ब्राह्मणग्रन्थ वेद के अनुवर्तन करने से वेदों के ही प्रामाण्य की पूजा करते हैं। जैसे कोई राजसेवक राजाज्ञा का अनुपालन करता हुआ उद्दिष्ट राजप्रतिष्ठा को ही बढ़ाता हुआ अपनी प्रतिष्ठा रक्षा करता है। इसलिये 'प्रमाणमर्हन्ति' यही पाठ मनोज्ञतर सिद्ध होता है।

पृ० १५६४, पं० ८—"सभी पदार्थों के श्रवण और मनन से आनुमानिक ज्ञान के रूप में निश्चय होता है' इसका बोधक वाक्य भी अस्तव्यस्त है। इससे आप क्या कहना चाहते हैं, स्पष्ट प्रतीत नहीं होता। इसमें आये पदों का परस्पर अन्वय कैसे होगा? आनुमानिक ज्ञान कभी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भवितुम्, नाऽपि सर्वपदार्थानां ज्ञानतया निश्चयो भवितुं शक्यः, भ्रमाऽभावप्रसङ्गात्। नाऽपि श्रवणस्य मननं क्रियते, श्रुतार्थस्यैव मन्तव्यत्वविधानात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० उ० ४।५।६) इति श्रुतेः।" आह, तदप्यज्ञानफलम्, दर्शनशास्त्रस्यापरिशीलनत्वात्।

तदेवमवगन्तव्यं यद् यथा दर्शनेन यत्र यत्र धूमस्तत्र तत्र वह्निरिति व्याप्तिमसकृद् दृष्ट्वा आनुमानिकं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं भवति, तथैव लिङ्गदर्शनात् सञ्जायमानं ज्ञानं लैङ्गिकम्। अत्र दर्शनशब्द उपलब्धिवचनो न चाक्षुषप्रतीतिवचनः, अनुमितानुमानस्यापि सम्भवात्।

एवमिह 'त्रिभिर्मीमांसावैशेषिकन्यायशास्त्रैः सर्वपदार्थानां श्रवणमननेनाऽनुमानिक-ज्ञानतया निश्चयो जायते'। इदं न्यायदृशाऽवगन्तव्यं यद्—धर्मधर्मिव्याख्यानधर्मधर्मिविधान-सर्वविद्याविधानव्याप्यसर्वपदार्थ (बोध) वन्ति मीमांसादिशास्त्राणीति पक्षः। यत्र यत्र सर्व-पदार्थ-बोधस्तत्र तत्र धर्मधर्मिविधानादीनीति श्रवणेनानुमानिकज्ञानमुपपद्यते तेन च निश्चयो भवति, इत्यर्थः। सम्यक् परामर्शाऽभाव एव भ्रमसम्भवः, यथा भवत इह।

श्रवणेन्द्रिय की सहायता से नहीं होता और न सभी पदार्थों का ज्ञान के रूप में निश्चय ही होता है; क्योंकि ऐसा मानने पर फिर किसी को भ्रम होना ही नहीं चाहिये। श्रवण का मनन न होकर श्रुत अर्थ का मनन किया जाता है। 'श्रोतव्यः' इत्यादि श्रुति का यही अभिप्राय है।" यह पारिजातकार का कथन भी अज्ञान का फलित है; क्योंकि इन्होंने दर्शनों का परिशीलन नहीं किया है।

इसे इस प्रकार समझना चाहिये कि जैसे दर्शन से 'जहाँ-जहाँ धुआँ है, वहाँ-वहाँ अग्नि है' इस व्याप्ति को बार-बार देखकर जैसे 'यह पर्वत वह्निमान् है' यह आनुमानिक ज्ञान होता है, इसी प्रकार लिङ्गदर्शन से जायमान ज्ञान लैङ्गिक कहलाता है। यहाँ पर दर्शन शब्द सभी उपलब्धि का वाचक है, केवल चाक्षुष प्रतीति का वाचक नहीं है; क्योंकि अनुमान के द्वारा ज्ञात हेतु से भी अनुमान होता है।

इसी प्रकार यहाँ 'तीन मीमांसा, वैशेषिक और न्यायशास्त्र से सब पदार्थों का श्रवण मनन के द्वारा आनुमानिक ज्ञान से निश्चय होता है' इसे न्याय की दृष्टि से समझिये कि धर्म और धर्मिव्याख्यान, धर्म और धर्मिविधान तथा सर्वविद्याविधान से व्याप्य सब पदार्थ बोधवाले मीमांसादि शास्त्र हैं, यह पक्ष हुआ। जहाँ-जहाँ सब पदार्थों का बोध है वहाँ-वहाँ धर्मधर्मिविधान आदि होते हैं, इस प्रकार श्रवण के द्वारा आनुमानिक ज्ञान उत्पन्न होता है और उससे निश्चय होता है। सम्यक् परामर्श के अभाव में ही भ्रम का सम्भव है, जैसा कि आपको यहाँ हो रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न श्रवणस्य मननं क्रियते इति तु बालालाप एव, श्रवणस्य परिणामे श्रुतरूपत्वात्। न चैकस्याः सिद्धेरभावे एवापरानुमितिर्विधातुं शक्यते अर्थात् श्रवणे सत्यानुमानिकज्ञाने मननं कर्तव्यमिति, कदाचिदेकस्यां सिद्धौ सत्यामपि विषयस्य विशेषप्रकारेणावजिगमिषया द्वितीयानुमितेस्त्वरितोपपादनस्य युक्तत्वात्। यथा आत्मनो विशेषरूपेण जिज्ञासितव्यत्वात् श्रवणरूपसिद्धौ सत्यामपि मननानुमितेर्विधेः श्रुत्या प्रतिपादनं भवति। यथा—'आत्माऽरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति, अन्यथा श्रुतेरसङ्गत्वापत्तेः।

इत्येवं वाक्यार्थः, समन्वयः, श्रवणो नानुमानिकज्ञानस्य भवितव्यतादिकं सर्वमल्पज्ञता-समुद्भाविशङ्कनं समाहितम्।

(मीमांसकटिप्पणीमभिलक्ष्य) —"एवं चत्वारो वेदाः सशाखाव्याख्यानसहिताः, चत्वार उपवेदाः, षड् वेदाङ्गानि षट् च वेदोपाङ्गानि मिलित्वा चतुर्दश भवन्ति। एतैरेव चतुर्दश विद्या मनुष्यैर्ग्राह्या भवन्तीति वेद्यम्" इत्यस्य व्याख्यानानि विद्वद्भिर्विविधान्यापादितानि। तत्राहं महर्षिमन्तव्यं यथाऽध्यगां तत् प्रकाशयामि—

श्रवण का मनन नहीं किया जाता—इस उलटे रूप में आपके सोचने और कहने का बाल-स्वभाव है। श्रवण तो श्रुतार्थ का साधन है, श्रवण किया हुआ ही श्रुत बनता है। श्रवण यदि नहीं करे तो श्रुत के अभाव में मनन भी नहीं हो सकता। अतः जो सुना जाता है, उसी का मनन किया जाता है (यच् श्रूयते तच् श्रवणं तस्यैव च मननमित्यर्थः) एक सिद्धि के अभाव में ही अपर अनुमिति नहीं की जा सकती। अर्थात् श्रवण होने पर ही आनुमानिक ज्ञान होने पर मनन करना चाहिये, ऐसा भी नहीं कहा जा सकता; क्योंकि कभी-कभी एक सिद्धि होने पर भी विषय की विशेष प्रकार से जानने की इच्छा से दूसरी अनुमिति का त्वरित उपपन्न होना भी ठीक होता है। जैसे आत्मा के विशेषरूप से जिज्ञासितव्य होने से श्रवणरूप सिद्धि होने पर भी मननानुमिति का श्रुति के द्वारा प्रतिपादन होता है। जैसे—'आत्मा सुनने योग्य, मनन करने योग्य तथा निदिध्यासन के योग्य है' यह कथन उपपन्न होता है, अन्यथा श्रुतिवाक्य की असङ्गति होने लग जायेगी।

इस प्रकार 'वाक्य का क्या अर्थ होगा? कैसे अन्वय होगा? तथा श्रवण के द्वारा आनुमानिक ज्ञान कैसे होगा?' ऐसे प्रश्न उठाना अल्पज्ञान, अल्पश्रवण और अल्पमनन के ही फल हैं।

इस प्रकार यहाँ पर शाखाव्याख्यानसहित चार वेद, चार उपवेद, छः वेदाङ्ग और छः वेदाङ्ग के उपाङ्ग मिलकर १४ होते हैं, ऐसा ऋषि ने हिन्दी में भी लिखा है। इस संख्यायोग को कतिपय विद्वान् अशुद्ध बताकर ४ + ४ + ६(+ ६) = २० बताते हैं। परन्तु यहाँ ऋषि ने स्पष्ट लिखा है कि १४ विद्याओं को इन मनुष्यों को ग्रहण करना चाहिये। इस विषय में प्रसङ्गवश मैं स्वचिन्तन प्रस्तुत कर रहा हूँ—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

महर्षिणा स्वकीययजुर्वेदभाष्ये (९ । ३४) स्पष्टमेष पाठो विहितः—"पञ्चदशम्' चत्वारो वेदाश्चत्वार उपवेदाः षडङ्गानि च मिलित्वा चतुर्दश विद्यास्तासां संख्यापूरकं क्रियाकौशलम्" इति । एतेन सुस्पष्टं यन्न उपाङ्गानि पृथक्त्वेन विद्या भवन्ति, परं वेदाङ्गानि तु ऋषिमते विद्या एव । एवमभिप्रायेण 'षड् वेदाङ्गानि षट् च वेदोपाङ्गानि मिलित्वा षड् भवन्ति' । तथैव हिन्द्याम्—"शाखासहित चार वेद, चार उपवेद, छः अङ्ग और उपाङ्ग हैं, ये सब मिल के चौदह विद्या के ग्रन्थ हैं" लिखति ।

अत्र षडुपाङ्गानि—सर्वविद्यानां कर्मकाण्ड-धर्मधर्मिपदार्थविद्या-सर्वपदार्थानुमानिक-ज्ञान-उपासनातत्त्वपरिगणनविधायकमुपाङ्गपञ्चकं वेदान्तशास्त्रं च दशोपनिषदश्चोपाङ्गानि ग्राह्याणि भवन्ति । इमानि हि न विद्या तथापि विद्यानां विधायकानि ज्ञापनसहायकानि सन्ति । यथाऽत्रोपनिषदामुपाङ्गेष्वन्तर्भावस्तथैवोपाङ्गानां वेदाङ्गेष्वन्तर्भावः प्रतीयते संख्यानदृष्ट्या । यतो हि वेदाङ्गानि तु शरीराङ्गानीव वेदोपकारकाणि साहाय्यभूतानि न तथोपाङ्गानि । न च 'संख्यायोजनेऽशुद्धित्वाद् विंशतिरित्येव षट्स्थाने लेख्या' इति वाच्यम्, षट्शब्दपठनस्य उपाङ्गानां वेदाङ्गेष्वन्तर्भावसूचनाशयत्वात् । एवम् ऋषिभाषायां शाखानां वेदेषु उपनिषदामुपाङ्गेषु उपाङ्गानामङ्गेष्वन्तर्भावः सुस्पष्टो व्यञ्ज्यते । वायुपुराणादिप्रतिपादिता संख्या नेहाऽभीष्टा ।

महर्षि दयानन्द ने अपने यजुर्वेदभाष्य (९ । ३४) में स्पष्टरूप से यह पाठ दिया है—"पञ्चदशम्'—चार वेद, चार उपवेद और छः वेदाङ्ग ये मिलकर १४ विद्याएँ हुई, उनमें १५वीं संख्या की पूर्ति क्रियाकौशल से हो जाती है ।" इस से स्पष्ट है कि ऋषि उपाङ्गों को पृथक् से विद्या नही मानते । वेदाङ्ग तो ऋषि के मत में विद्याएँ ही हैं । हिन्दी में स्पष्टरूप से भूमिका में लिखते हैं—"शाखासहित ४ वेद, ४ उपवेद, ६ अङ्ग और उपाङ्ग हैं, ये सब मिल के १४ विद्या के ग्रन्थ हैं ।"

यहाँ ६ उपाङ्ग—सब विद्याओं के कर्मकाण्ड, धर्मधर्मि-पदार्थविद्या, सर्वपदार्थानुमानिक ज्ञान, उपासनातत्त्वपरिगणनविधायक उपाङ्गपञ्चक तथा वेदान्तशास्त्र और दश उपनिषद्—ये ६ उपाङ्गों में ग्रहण करने योग्य हैं । ये उपाङ्ग विद्याओं की गणना में पृथक् से नहीं है । जैसे यहाँ उपनिषदों का उपाङ्गों में अन्तर्भाव है, उसी प्रकार उपाङ्गों का अन्तर्भाव वेदाङ्गों में है; क्योंकि जैसे वेदाङ्ग शरीर के प्रधान अङ्गों के समान सहायक हैं, उतने सीधे सहायक उपाङ्ग नहीं हैं । यह कहना उचित नहीं है कि संख्याओं के जोड़ने में भूल हुई है, अतः छः के स्थान पर २० लिखना चाहिये । जानबूझकर वेदाङ्ग और उपाङ्ग दोनों को मिलाकर ६ लिखना, १२ न लिखना, यह सूचित करता है कि वेदाङ्गों मे उपाङ्गों का अन्तर्भाव स्पष्ट ही ध्वनित होता है । वायुपुराणादिप्रतिपादित संख्या यहाँ अभीष्ट नहीं है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५६४, पं० १२—यच्चाह—"तर्कसंग्रह-चिन्तामणि-जागदीश्यादिग्रन्थानां विद्वन्मान्यानां न्यायाभासत्वं न्यायवैशिषिकमतविरुद्धत्वं च कोऽनुन्मत्तो वक्तुं शक्नुयात्? 'अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते' सत्यमिदमाभाणकमनुसरति दयानन्दः। सांख्यतत्त्वकौमुद्याश्च सांख्यशास्त्रविरुद्धत्वं तेन जन्मसहस्रैरपि न दर्शयितुं शक्यम्। वेदान्तसारपञ्चदशीप्रभृतिग्रन्थानामपि वेदान्तविरुद्धत्वकथनं दुःसाहसमात्रमेव। शाङ्कर(शारीरक) भाष्यभामतीपञ्चपादिकाविवरणखण्डखाद्यचित्सुख्यद्वैतसिद्धिप्रभृतिग्रन्थानां वेदान्तविरुद्धत्वं नोक्तमित्येव बहु मन्तव्यम्, अन्यथा कीदृशी शृङ्खलोच्छृङ्खलानाम्। वस्तुतस्तु यान् ग्रन्थानधीत्य लोकोत्तरं वैदुष्यमासाद्यते, तानेवायमप्रमाणयितुं प्रयतितवान्, इत्याश्चर्यम्। एतावतैवास्य पाण्डित्यमपि विद्वद्भिरेयैरवगन्तुं शक्यते।"

इति निखिलमार्षग्रन्थविद्वेषणबद्धपरिकरस्य करपात्रिणो महामूढतैव, यन्महर्षिमुन्मत्तं कथयति। तर्कसंग्रहादीनामार्षग्रन्थापेक्षयोत्तमतां सिषाधयिषोर्महोन्मादः प्रकाशितीभविष्यति निम्नलेखेन, निष्पक्षकोविदाः प्रणिभालयन्तु—

(१) वेदविरोधिमतानि समुच्छेत्तुं तर्कप्रधाने गौतमकणाददर्शने विरचिते। तत्तर्कस्य

पृ० १५६४, पं० १२—"तर्कसंग्रह, चिन्तामणि, जागदीशीप्रभृति विद्वानों में समादृत ग्रन्थों को मिथ्या, न्यायशास्त्र के प्रवर्तक और न्याय-वैशेषिक शास्त्र के विपरीत पागल के सिवाय कौन बतायेगा? इन शास्त्रों को समझ न पाने के कारण दयानन्द की यह उक्ति 'अंगूर खट्टे हैं' इस लोकोक्ति को चरितार्थ करती है। सांख्यतत्त्वकौमुदी को वे हज़ारों जन्म लेकर के भी सांख्यशास्त्र के विपरीत नहीं सिद्ध कर सकते। वेदान्तसार, पञ्चदशी प्रभृति ग्रन्थों को वेदान्तशास्त्र के विपरीत कहना दुःसाहसमात्र है। वेदान्त के शाङ्करभाष्य, भामती, पञ्चपादिकाविवरण, खण्डनखण्डखाद्य, चित्सुखी, अद्वैतसिद्धि आदि ग्रन्थों को इन्होंने वेदान्तशास्त्र के विपरीत घोषित नहीं किया, हमें इसी को बहुत कुशल मानना चाहिये। अन्यथा उच्छृङ्खल (बेलगाम) व्यक्ति को कुछ भी कहने में कौन रोक सकता है? वास्तव में देखा जाय तो जिन ग्रन्थों को पढ़कर धीरे-धीरे व्यक्ति लोकोत्तर विद्वान् बनता है, उन्हीं को अप्रामाणिक घोषित करने के लिये स्वामी दयानन्द ने बड़ा प्रयत्न किया है, यह एक आश्चर्य की ही बात है।"

उक्त कथन आर्षग्रन्थों से विद्वेष करने को बद्धपरिकर करपात्री जी की महामूढता ही है, जो वे महर्षि को उन्मत्त कह रहे हैं। तर्कसंग्रहादि ग्रन्थों को आर्ष न्याय-वैशेषिकादि ग्रन्थों की अपेक्षा उत्तम सिद्ध करने का प्रयास महोन्माद ही है। यह निष्पक्ष विद्वान् लोग निम्न लेख से निश्चय करेंगे—

(१) वेदविरोधी मतों के उच्छेदन के लिये महर्षि गोतम और कणाद ने तर्कप्रधान न्याय और वैशेषिक की रचना की। उनके तर्क की सामान्य रीति का स्वरूप यह है कि 'यदि पर्वत में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सामान्यरीत्या स्वरूपमिदं 'यदि पर्वते वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्' इत्येवोहा वेदवादिनां परमावश्यकी। एतस्या ऊहाया महत्त्वं न्यायदर्शन एव प्रत्यपादि, नान्याधुनिकजालग्रन्थेषु तर्कसंग्रहादिषु। इमे जालग्रन्थपरिष्कारास्तु घटपटादिभ्यो भिन्नेषु नान्येषु विषयेषु ऊहां प्रयुञ्जते आधुनिकाः। इदमेव कारणं यत् पण्डितमण्डल्यामपि प्राय ईदृशाः प्रश्ना उद्भाव्यन्ते यत् 'ईश्वरसद्भावे किं प्रमाणम्?' परं न गौतमानुगो मुख्येश्वरविषयमेव सन्देहास्पदं मन्येत। यदा हि महर्षिः सिद्धान्तसूत्रेणैव जगाद—'ईश्वरः कारणं पुरुषकर्माऽफल्यदर्शनात्'। एतेन प्रतीयत आधुनिकनव्यन्यायवित्सु न्यायसूत्राणामल्पमात्रमपि नानुसरण-प्रवृत्तिः।

(२) सर्वेषां मूलदर्शनानां तात्पर्यमासीद् वेदेश्वरास्थास्थापनेन मोक्षसाधनम्, परमाधुनिकानां शब्दाडम्बरसंग्रहमात्रमुद्दिष्टम्, यत्प्रभावेण नास्तिकमतप्रभावप्रवर्धनमभवत्। शुष्कतर्कप्रभावेण व्याप्तिवादोऽवच्छेदकावच्छिन्नबहुलभ्रामकदुरूहजालच्छादितोऽभूत्, यत्परिणामोऽजायत सहस्रजन्मान्यपि नव्यन्यायाध्ययनायापर्याप्तानि सन्ति। धर्मज्ञानं हि दर्शनानामभीप्सितमस्ति, तथा मनुरप्यब्रवीत्—

> आर्षं धर्मोपदेशं च वेदशास्त्राऽविरोधिना।
> यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥ १२।१०६॥

वह्नि नहीं हो तो धूम भी नहीं होगा'। यह ऊहा वेदवादियों के लिये परमावश्यक है। इस ऊहा का महत्त्व न्यायदर्शन में ही प्रतिपादित किया है, अन्य आधुनिक जालग्रन्थ तर्कसंग्रहादि में वैसा नहीं दिखाया है। ये जालग्रन्थों के परिष्कार तो घट-पटादि से भिन्न अन्य विषयों में ऊहा का प्रयोग ही नहीं करते। यही कारण है कि पण्डितमण्डली में भी प्रायः ऐसे प्रश्न उठाये जाते हैं कि 'ईश्वरसद्भावे किं प्रमाणम्?'। परन्तु गोतमशास्त्र का अध्येता मुख्य ईश्वर-विषय को कदापि सन्देह के घेरे में नहीं देखता। जब कि महर्षि गोतम ने स्पष्टरूप से सिद्धान्तसूत्र में कहा है कि 'पुरुष कृतकर्म-फलोत्पत्ति में स्वतन्त्र न होने से ईश्वर जगत् का निमित्त कारण है।' इससे ज्ञात है कि नव्यन्यायवालों की न्यायसूत्रों का अनुसरण करने की अल्पमात्र भी प्रवृत्ति नहीं है।

(२) सभी मूल दर्शनों का तात्पर्य था कि वेद और ईश्वर में आस्था स्थापित होने से मोक्ष का साधन करना, परन्तु आधुनिकों को शब्दाडम्बरमात्र लक्षित है, जिससे नास्तिक-मत का प्रभाव बढ़ा। शुष्क तर्क के प्रभाव से अवच्छेदकावच्छिन्नबहुल भ्रामक दुरूह शब्दजाल से आच्छादित व्याप्तिवाद बढ़ गये। जिसका परिणाम हुआ कि सहस्र जन्म भी नव्यन्याय के पार जाने में अपर्याप्त हो गये। दर्शनों का अभीप्सित तो धर्म का ज्ञान कराना है, जैसा कि मनुमहाराज कहते हैं—

'जो मनुष्य वेद और ऋषिविहित धर्मशास्त्र का वेदशास्त्र के अनुकूल तर्क के द्वारा अनुसन्धान करता है, वही धर्म के तत्त्व को समझता है, अन्य नहीं।'(१२।१०६)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थविरोधितर्कनिरसनौपायिकं वैदिकसिद्धान्तरक्षणोपयोगि प्रमाणादिप्रतिपादनमेव न्यायशास्त्रस्य प्रयोजनम्। इदं प्रमाणशास्त्रं तर्कशास्त्रं चाप्युच्यते। तर्क्यन्ते प्रतिपाद्यन्ते यथार्थज्ञानविषयीक्रियन्तेऽर्था यैस्ते तर्कास्तेषां शास्त्रं तर्कशास्त्रम्।

(३) नव्यन्यायग्रन्थैस्तु शब्दाडम्बरजटिलतर्कतमसि निगूढान् पदार्थान् अमिताभयाऽप्रतिमप्रभया महर्षिदयानन्द उद्धिधीर्षुरिदं निरदिशत्। भगवद्गोतममुनिपादैर्विरचितं सूत्रात्मकं न्यायशास्त्रं बालानां कण्ठस्थीकरणे सुगममपेक्ष्य प्रवृत्तानि वात्स्यायनवृत्तिपराणि च व्याख्यानानि खलु नव्यन्यायग्रन्थैरर्धचन्द्रमधिग्रीवं दत्त्वा पाठ्यप्रकरणप्राङ्गणाद् बहिष्कृतानि।

(४) किञ्च नव्यन्यायप्रियैर्नास्तिकमर्मच्छेदिविषयेषु नाल्पमात्रमपि दृष्टिपातो विहितो यथा सर्वानित्यत्ववादिना प्रस्तुते 'सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्' (न्या० ४।१।१२५) इति सूत्रे दोषमुद्भाव्य मुनिना व्यरचि सूत्रम्—'नानित्यतासिद्धेर्नित्यत्वात्' (न्या० ४।१।२६), तथा 'अन्तवत्त्वमसर्वज्ञता वा' (वेदान्त० २।२।४३) इत्यादिभिः सूत्रैर्नास्तिकमतेतर्करूपखड्गैः प्रहाराः कृता यथा तथा नाधुनातनेन केनाऽपि नव्यन्यायविदा प्रहतं नास्तिकेषु, उदयनाचार्यादीन् कतिचनातिरिच्य।

अतः वेदार्थविरोधी तर्क के निरसन का उपायवाला वैदिकसिद्धान्त-रक्षण में उपयोगी प्रमाण आदि का प्रतिपादन करना न्यायशास्त्र का प्रयोजन है। इसे तर्कशास्त्र भी कहते हैं। जिनके द्वारा अर्थ यथार्थज्ञान के विषय बनाये जावें, वे तर्क व उनका शास्त्र तर्कशास्त्र कहाता है।

(३) नव्यन्याय के ग्रन्थों से शब्दाडम्बरजटिल तर्क के अन्धकार में पदार्थ निगूढ हो गये थे, उन्हें अपरिमित दीप्तिवाली अनुपम बौद्धिक प्रतिभा से महर्षि ने बाहर निकाला और ये निर्देश दिये। गोतम मुनिवर द्वारा विरचित सूत्रात्मक न्यायशास्त्र को बालकों द्वारा कण्ठस्थ करने में सुगम समझ कर वात्स्यायनवृत्तिपरक व्याख्यात सूत्रों को नव्यन्याय के ग्रन्थों ने पाठ्यक्रम से अर्धचन्द्र देकर बहिष्कृत करा दिया।

(४) तथा चार्वाक की वकालत करनेवाले नव्यन्याय से प्यार करनेवालों ने नास्तिकों के मर्मच्छेद करनेवाले विषयों पर थोड़ा सा भी दृष्टिपात नहीं किया। जैसे मुनिवर ने सर्वानित्यत्ववादी के द्वारा प्रस्तुत 'उत्पत्ति व विनाश धर्म होने से सर्व अनित्य है' इस सूत्र पर दोष का उद्भावन कर 'पदार्थमात्र को अनित्य मानने पर प्रतिज्ञा व हेतु का विरोध होने से यह कथन ठीक नहीं' सूत्र बनाया। इसी प्रकार और भी सूत्र बनाकर नास्तिकमत पर तर्क रूप तलवारों से जैसे प्रहार किये, वैसे नव्यन्यायवेत्ताओं ने नहीं किये, उदयनाचार्यादि कुछ को छोड़कर।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उक्तसूत्रभावोऽयम्—सर्वभावानित्यवादी एवं प्रष्टव्यो यत् पदार्थमात्रस्यानित्यता नित्याऽस्ति किं वाऽनित्या? आद्ये प्रतिज्ञाहेतुविरोधे सर्वानित्यकथनमसङ्गतम्, द्वितीये पक्षे पदार्थमात्रे नित्यताऽऽपत्तिः स्यात्। अत आत्मादिपदार्था नित्या बुद्ध्यादयोऽनित्या एवेति। तथैव वेदान्तसूत्रस्यायं भावो यत् केनचित् पृष्टे यदीश्वरः सर्वज्ञः स्वकीयाद्यन्तेयत्ताज्ञानं रक्षति न वा? यदि जानाति तदा नासौ नित्यः, उत्पत्ति-विनाश-मध्यमपरिमाणवत्त्वात्। उक्तप्रश्नस्य समीचीनमुत्तरं त्वेतद् यदीश्वरस्य नादित्वं नान्तत्वं वा, न वेयत्ता, तदा कथमेतस्य ज्ञानं सम्भवति, यतो ज्ञानं भावपदार्थस्य भवति। शशशृङ्गमजानन्नहि कश्चिदज्ञानी भवितुमर्हति। नोक्तमिथ्या-भावानामज्ञानादीश्वरे काचिन्न्यूनताऽऽयाति।

३३७ तमे पृष्ठे वेदार्थकल्पद्रुमस्य प्रथमखण्डे मया नव्यन्यायकृतप्रत्यक्षस्य दूषितलक्षणं प्रदर्श्य मुनिकृतलक्षणस्य साधुत्वमेव साधितम्, तत्तत्र द्रष्टव्यम्।

अग्रे वैशेषिकशास्त्रविरुद्धत्वं वीक्षन्तां विवेचकाः। वैशेषिकशास्त्रे 'क्रियागुणवत् समवायिकारणम् इति द्रव्यलक्षणम्' इति त्रितयवद् द्रव्यलक्षणं कृतम्, किन्तु मायावादिभिः 'क्रियावत्-समवायिकारणम्' इति अंशद्वयं परित्यज्य 'गुणवद् द्रव्यम्' इत्येव लक्षणं कृत्वा

उक्त सूत्रों का भाव यह है कि सब भाव पदार्थों को अनित्य बतानेवाले से यह पूछना चाहिये कि पदार्थमात्र की नित्यता नित्य है या अनित्य? प्रथम पक्ष में प्रतिज्ञा और हेतु का विरोध होने पर सब का अनित्य बताना असङ्गत है, द्वितीय पक्ष में यदि अनित्य मानें तो अनित्यत्व का साधक हेतु नित्य न होने से सब अनित्य नहीं ठहर सकते। वेदान्त के सूत्र का भाव यह है कि ईश्वर अपने आदि अन्त और इयत्ता (कि मैं इतना हूँ), यह जानता है कि नहीं? यदि अपने आदि अन्त को जानता है तो नित्य नहीं रह सकता अर्थात् उत्पत्ति और विनाश तथा मध्यम परिमाणवाला होकर विनाशी ठहरता है। इसका समाधान यह है कि जब ईश्वर में आदि अन्त और इयत्ता = सीमा है ही नहीं, तो फिर इसका ज्ञान ही कैसे हो सकता है? क्या शशशृङ्गों को न जाननेवाला कभी अज्ञानी कहला सकता है? कदापि नहीं। इसलिये उक्त दोष ईश्वर पर नहीं आता अर्थात् उक्त मिथ्या भावों के न जानने से ईश्वर में किसी प्रकार की न्यूनता नहीं आती।

'वेदार्थकल्पद्रुम' के प्रथमखण्ड (पृ० ३३७) में हमने नव्यन्यायवेत्ताओं द्वारा प्रत्यक्ष का किया हुआ दूषित लक्षण दिखला कर गोतम मुनि के किये लक्षण को ही उत्तम सिद्ध किया है। विशेष जिज्ञासुओं को वहाँ देखना चाहिये।

आगे विवेचक लोग वैशेषिकशास्त्र के विरुद्ध नव्यग्रन्थ-प्रणेताओं द्वारा लिखे को देखें—वैशेषिकशास्त्र में द्रव्य का लक्षण 'क्रियागुणवत् समवायिकारण' किया है। इन तीनों से युक्त लक्षण माना है, परन्तु मायावादियों ने 'क्रियावत्' और 'समवायिकारण' इन अंशों को

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अनेके दोषा उद्भाविताः, ये समग्रलक्षणेनापनीता एव स्वभावतः। वैशेषिकोक्तद्रव्यलक्षणम-सङ्गतं ख्यापयित्री कारिका 'चित्सुखी' इत्यभिधग्रन्थद्वितीयपरिच्छेदे लिखितैवम्—

अव्याप्तेरतिव्याप्तेर्द्रव्यं चैव गुणाश्रयः।
आद्ये क्षणे गुणाभावाद् गुणादपि च वीक्षणात्॥

ये दोषा अत्रोद्भावितास्ते वैशेषिकलक्षणसत्तायां सर्वे समाहिता भवन्ति। वस्तुतो नव्यन्यायादिग्रन्थाः शब्दजालपोटलिका एव। कियदनल्पं लिख्येत, श्रीकरपात्रिसदृक्षैर्माया-वादिभिर्नवीनैर्वैशेषिकशास्त्रे मिथ्यारोपा अक्रियन्त यद् नेदं शास्त्रं मूलप्रकृतिं मनुते, मनोऽणु जीवात्मानं च विभुं मनुते। नैतावदेव प्रत्युत जीवात्मानं जडं मत्वा तत्र मनःसम्बन्धेन ज्ञानगुणोत्पत्तिराख्यातः। मुक्तावेकविंशतिदुःखध्वंसे आत्मा पाषाणवत् सर्वदा तिष्ठति। इदं सर्वं निर्मूलम्, अशास्त्रीयत्वात्।

यदा च तत्र 'सदकारणवन्नित्यम्', 'तस्य कार्यं लिङ्गम्' (४। १। १-२) इत्यादिभिः सूत्रैः प्रकृतेः सत्ता, मनसो मध्यमपरिमाणत्वमात्मनोऽणुत्वं दुःखात्यन्तनिवृत्तिपूर्वकपरमानन्द-प्राप्तिरूपा मुक्तिः स्वीकृताऽस्ति।

छोड़कर 'गुणवद् द्रव्यम्' जो गुणवाला है वह द्रव्य है, इतना मात्र ग्रहण कर द्रव्यलक्षण माना है। फिर अन्यथासिद्ध अनेक दोष उद्भावित किये हैं, जैसा करना सर्वथा अनुचित है, जबकि लक्षण के तीन अंश हैं। इसका खण्डन करनेवाली 'चित्सुखी' की कारिका में लिखा है कि—

"जो गुणाश्रय है, उसे द्रव्य कहते हैं, यह लक्षण अशुद्ध है; क्योंकि आद्यक्षण में उत्पन्न होने के कारण कार्यद्रव्य में अव्याप्ति होगी तथा २४ गुण हैं। इस प्रकार संख्यावाला होने के कारण पदार्थ में 'अतिव्याप्ति' दोष है।"

मायावादियों ने जो उक्त कारिका द्वारा द्रव्य के लक्षण में 'अव्याप्ति' और 'अतिव्याप्ति' दोष दिये हैं, वे सूत्र के अन्य त्यक्त अंश को मिलाने से दूर हो जाते हैं। वास्तव में नव्यन्यायादि ग्रन्थ शब्दजालों की पोटली हैं। कितना बहुत लिखें, श्री करपात्री जी के सदृश मायावादी नवीनों ने वैशेषिकशास्त्र पर अनेक मिथ्या आरोप लगाये हैं कि यह शास्त्र मूल प्रकृति को नहीं मानता, मन को अणु और जीवात्मा को विभु मानता है। इतना ही नहीं, प्रत्युत जीवात्मा को जड़ मानकर इसमें मन के सम्बन्ध से ज्ञान गुण की उत्पत्ति का कथन किया गया है। तथा मुक्ति में २१ दुःखों के नाश होने पर आत्मा सदा पाषाणवत् बना रहता है। पर यह सब निर्मूल व निराधार है।

जबकि 'भावरूप कारण से रहित जो नित्य पदार्थ है, वही जगत् का मूल कारण है' तथा 'मूल कारण प्रकृति की सिद्धि में जगत् रूप कार्य लिङ्ग है' (४। १। १-२) इत्यादि सूत्रों से प्रकृति की सत्ता, मन का मध्यम परमाणुत्व और आत्मा का अणुत्व, दुःखात्यन्तनिवृत्तिपूर्वक परमानन्दप्राप्तिरूप मुक्ति स्वीकृत की गयी है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सांख्यतत्त्वकौमुद्याश्च सांख्यशास्त्रविरुद्धत्वं प्रथमन्तावदेतदेव यन्महापण्डितोऽपि श्रीवाचस्पतिमिश्रः सांख्यशास्त्रस्य टीकामकृत्वा गड्डलिकाप्रवाहपतितः तत्काले प्रसिद्धेश्वर-कृष्णविरचितसांख्यकारिकायाष्टीकामकरोन्न पुनः परमर्षिकपिलप्रणीतसांख्यशास्त्रस्य। एवं सांख्यशास्त्रस्य अध्ययनाध्यापनप्रणाली शैथिल्यमापन्ना। अतः 'कालार्कभक्षितम्' इति संज्ञया सांख्यं व्यपदिश्यते स्म। सांख्यशास्त्रे पाण्डित्यपूर्णं भाष्यं विधातुं श्रीविज्ञानभिक्षोः सत्साहसं वयं प्रशंसामो यो दर्शनमिदं स्वभाष्येणाद्भुतेन पुनरुज्जीवयामास।

यदयं वक्ति—"शाङ्करभाष्यादीनां वेदविरुद्धत्वं नोक्तमिति बहु मन्तव्यम्" परं महोदय! त्वदनुभूयमानमहोत्सवप्रमोदसंसारस्य आवाभ्यामिह सुतीक्ष्णसमालोचनादम्भोलिनिपातेन विध्वंसः क्रियते। धारयतु आत्मानम्, परं कियन्तं कालम्?

तावत्त्वं करपात्र मत्तगजराड् व्यूहेन साकं मुदा,
निःशङ्कं विहरस्व गर्वमतुलं बिभ्राण एवाभितः।
शास्त्रारण्यविहारिवन्दितपदाम्भोजर्षिशिष्यो बुधः,
नायात्येष दृशं तु मत्तगजराट्कुम्भाद्रिभेदोद्धुरः॥

सांख्यतत्त्वकौमुदी की सांख्यशास्त्रविरोधिता प्रथम तो इसी से सिद्ध है कि महापण्डित वाचस्पतिमिश्र ने मुनिप्रणीत सांख्यशास्त्र की टीका न करके गड्डलिकाप्रवाह में गिरकर उस समय पर प्रसिद्ध ईश्वरकृष्णरचित सांख्यकारिका की टीका करना पसन्द किया। इन्हीं करतूतों से ऋषिप्रणीत सांख्यशास्त्र आदि के पठन-पाठन की प्रणाली शिथिल ही नहीं, प्रत्युत लुप्त ही हो गयी। अतः 'कालार्कभक्षितम्' इस संज्ञा से सांख्यशास्त्र का व्यपदेश होने लगा। सांख्यशास्त्र पर पाण्डित्यपूर्ण भाष्य करनेवाले श्री विज्ञानभिक्षु के सत्साहस की हम प्रशंसा करेंगे, जिन्होंने अद्भुत भाष्य करके इस शास्त्र को पुनरुज्जीवित कर दिया।

पारिजातकार यह कहकर फूला नहीं समा रहा है कि—"स्वामी दयानन्द ने वेदान्त के शाङ्करभाष्य, भामती, पञ्चपादिकाविवरण, खण्डनखण्डखाद्य, चित्सुखी, अद्वैतसिद्धि आदि ग्रन्थों को वेदान्तशास्त्र के विपरीत घोषित नहीं किया, इसी को बहुत कुशल मानना चाहिये।" पर कब तक—जब तक कि तुम्हारे इस अनुभूयमान महोत्सव प्रमोद के संसार का हम लोगों के द्वारा यहाँ तीक्ष्ण समालोचनारूपी वज्र के निपात से विध्वंस नहीं कर दिया जाता। स्वयं को बचाओ, पर कितने काल तक?

तब तक हे करपात्र मत्तगजराट्! अपने व्यूह के साथ अतुल गर्व को धारण करके निःशङ्क सब ओर विहार कर लो, जब तक शास्त्र-अरण्य में विहरण करनेवाले विद्वानों के द्वारा वन्दितचरणकमलवाले महर्षि दयानन्द का, मदोन्मत्त गजराजों के गण्डस्थल पर्वत को तोड़ने में निपुण शिष्य तुम्हारे दृग्गोचर नहीं हो पाता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(क) स्वामिशङ्कराचार्यः 'स्वपक्षदोषाच्च' (वे० सू० २। १। १९) सूत्रेऽलेखीत् स्वभाष्ये, तद्भावार्थ इह लिख्यते—

"यदि परमाणवः सर्वदेशसंयुक्ता मन्येरन् तदा कार्ये स्थौल्याभावापत्तिः स्यात्। अव्याप्यवृत्तिसंयोगे एकदेशसंयुक्तघटपटादिवत् परमाणूनां सावयवत्वं सिध्यति। एवं द्वाभ्यामपि प्रकाराभ्यां न परमाणुवादसिद्धिः।"

शाङ्करभाष्येऽस्मिन् मायावादिनोऽभ्यमन्यन्त यन्न मायाभिन्नमुपादानकारणमितरन्निर्दुष्टम्। यथा वाचस्पतिमिश्रोऽप्यलेखीत्—"एष दुर्वारो दोषो न पुनरस्माकं मायावादिनामित्याह परिहृतस्त्विति।" अपरोऽपि शङ्करशिष्यो लिखति रत्नप्रभाकारः—"मायावादे सर्वं समञ्जसम्।"

परं तदुत्तरमेतत्—मायामात्रे उपादानत्वमेव कथं घटेत? यतो मायार्थः—मोहः, अविद्या अज्ञानं वा। नाज्ञानं जगत उपादानं भवितुमर्हति, यतोऽज्ञाने सति जीवसत्तासम्भवः, जीवसत्तायां चाज्ञानसम्भूतिरित्यन्योन्याश्रयदोषापत्तेः।

(क) और भी सुनिये, शङ्कराचार्य ने 'स्वपक्षदोषाच्च' (वे० २। १। १९) सूत्र पर अपने भाष्य में जो लिखा है, उसका भावार्थ यहाँ प्रस्तुत किया जा रहा है—

"यदि परमाणुओं को सब देश से संयुक्त माना जाये तो कार्य में स्थूलता नहीं होनी चाहिये; क्योंकि जब दो परमाणु सर्व देश से जुड़ गये तो उनका परिमाण द्व्यणुकमात्र ही रहेगा, अधिक नहीं अर्थात् व्याप्यवृत्तिसंयोग से कार्य में स्थूलता नहीं आ सकती। यदि अव्याप्यवृत्तिसंयोग माना जाये, तो एकदेश से संयुक्त घटपट की भाँति परमाणु सावयव ठहरते हैं। इस प्रकार दोनों रीति से परमाणुवाद सिद्ध नहीं हो सकता।"

शङ्कराचार्य के इस भाष्य पर मायावादियों ने अपना यहाँ तक गौरव दिखलाया है कि माया से भिन्न कोई उपादानकारण निर्दोष नहीं है। वाचस्पति मिश्र लिखते हैं कि—"प्रकृति तथा परमाणुओं को जगत् का उपादानकारण माननेवालों के मत में उक्त दोष दुर्वार है और हमारे मायावादियों के मत में नहीं।" तथा शङ्कर के अन्य शिष्य 'रत्नप्रभाकार' यह लिखते हैं कि—"स्वप्नसृष्टि की भाँति मायावाद में कोई दोष नहीं आता अर्थात् जैसे स्वप्न के पदार्थों का मायामात्र ही कारण है, वैसे ही जाग्रत् के पदार्थों का उपादानकारण एकमात्र माया ही है, अन्य नहीं।"

इसका उत्तर यह है कि जब उनके मत में माया मायामात्र ही है, तो फिर उसका उपादान (= ग्रहण करनेयोग्य) ही क्या? क्योंकि मायावाद में माया के अर्थ मोह, अविद्या और अज्ञान हैं और यह अज्ञान जगत् का उपादान नहीं हो सकता और न उसकी सिद्धि हो सकती है; क्योंकि जब जीव से प्रथम अज्ञान हो, जो उससे जीव बने और जब जीव बने तब उसके सहारे अज्ञान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तथा च 'स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः' (न्या० ४। २। ३१) तथा 'मायागन्धर्वनगरमृगतृष्णिकावद् वा' (न्या० ४। २। ३२) इत्यादिसूत्रैः पूर्वपक्षं विधाय माया-वादस्य खण्डितत्वात्। तदेतन्महर्षिगोतमकणादयोर्गौरवं यत् तत्समर्थितपरमाणुवादसिद्धान्ते नाणुमात्रमपि संशोधनं परिवर्तनं वा कर्तुं कश्चिदक्षमिष्ट। इत्थं ग्रन्थकलेवरवर्धनभिया नाधिकं प्रपञ्च्यते।

त्वय्येवेदमाभाणकं घटते यत्—

महाप्रज्ञस्य सत्यं हि महर्षेस्तत्त्वचिन्तनम्।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते॥

यदभणत्—"जन्मसहस्रैरपि (दयानन्देन) तर्कसंग्रहादिग्रन्थानां न्यायादिशास्त्रविरुद्धत्वं दर्शयितुं न शक्यम्" तदुत्तरे निर्मलोक्तिरेषा विभाव्या—

सद्योग्रन्थप्रणेत्राऽत्र, विरुद्धत्वं निदर्शितम्।
इदं खण्डयितुं त्वादृग्, आकल्पान्तं न शक्ष्यते॥

रहे। इस प्रकार अन्योन्याश्रय दोष उपस्थित हो जायेगा तथा जाग्रत् पदार्थों का अज्ञान उपादानकारण न बन सकने से मायावाद ठीक नहीं ठहरता।

न्यायदर्शन में मायावादी की ओर से पूर्वपक्ष में दो सूत्र लिखे हैं। 'प्रत्यक्षसिद्ध प्रमाण-प्रमेयव्यवहार स्वप्न-पदार्थों की भाँति मिथ्या है' (न्या० ४। २। ३१), 'जिस प्रकार स्वप्नावस्था के स्वरूप अविद्यमान विषयों की प्रतीति होती है, किंवा माया (इन्द्रजाल) के बने हुए तथा गन्धर्वनगर आदि पदार्थों की प्रतीति मिथ्या पायी जाती है, इसीप्रकार प्रत्यक्षादि प्रमाण और घटपटादि विषयों के न होने पर भी रज्जु-सर्प के समान प्रमाण-प्रमेयव्यवहार की प्रतीति भ्रममात्र होने से बाह्यार्थ की साधक नहीं'। इन सूत्रों से पूर्वपक्ष करके महर्षि गोतम ने मायावाद का प्रबल खण्डन किया है, जो वहीं पर देखने से स्पष्ट करने योग्य है। यह महत्त्व महर्षि गोतम और कणाद का ही है कि परमाणुवाद के सिद्धान्त को आज तक कोई अणुमात्र भी न हिला सका। इस प्रकार ग्रन्थ-कलेवर बढ़ने के डर से अधिक नहीं लिख रहे हैं।

यह आभाणक तो आप पर ही उपयुक्त फबता है कि—

'महाप्रज्ञ महर्षि के सत्यार्थपूर्ण तत्त्वचिन्तन की स्थिति को आप नहीं पहुँच सकते, अतः निन्दा करने में प्रवृत्त हो रहे हैं।'

यह कहना कि—"जन्मसहस्रों में भी दयानन्द तर्कसंग्रहादि ग्रन्थों को न्यायादिविरुद्ध सिद्ध नहीं कर सकते"। उसके उत्तर में कहना है कि यह कार्य तो उनके छोटे शिष्यों का है। यहाँ यह निर्मलोक्ति घटित है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'महान् महत्स्वेव करोति विक्रमम्' एतदुक्तिमनुरुध्य महर्षिणा तु स्वकीयतपःपूतापूर्व-प्रतिभावैभवेन वेदादिशास्त्राणामुपरि कुत्सित-भाष्य-टीकादि-धूलिमपसार्य तद्विनिवेशित-सत्यविद्या विशदं व्याख्याय विवेकिनां समक्षे प्रस्तोतव्या आसन्। यथा कश्चिद् अग्नेरुपरिष्टाद् भस्मचयमपसार्याग्निप्रयोगेण विविधशिल्पविद्यानां सम्पादनं कुरुते। भस्मैव चालन्या निष्पूय इदं भस्म गोमयस्य, काष्ठस्याथवाऽन्यवस्तुनो विद्यते, एतत्परीक्षण एवामूल्यजीवनं न गमयति। तथैव सत्यरत्नपरीक्षणस्य तर्कनिकषो दयालुमहर्षिणाऽस्मभ्यमर्पितः।

(ख) वेदान्तसारादिग्रन्थेषु अध्यासस्य, ब्रह्मणो जगतोऽभिन्ननिमित्तोपादान-प्रतिपादनत्वम्, जगतश्च पारमार्थिकसत्ताया अवास्तवम्, ब्रह्मणोऽविद्योपहितत्वम्, वेद-प्रतिपादितेश्वरजीवप्रकृतीनां वास्तविकसत्ताऽपलापश्चेत्यादिवेदान्तसारादिग्रन्थानां वेदान्त-शास्त्रप्रतिकूलमेव निखिलमायावादिनां कथनं वेदविरुद्धत्वात् प्रलापमात्रमेव।

अयं वराकः श्रीकरपात्री महाऽभाग्य एवं प्रलपन्नुत्सवं मनुते यत् 'शाङ्कर-भाष्यभामत्यादयो ग्रन्था वेदान्तशास्त्रविरुद्धा न घोषिताः' इति कथनं विमृश्य बालोऽप्यवगन्तुं पारयते यत् स्वामिदयानन्देन 'वसिष्ठादि' इत्यत्र आदिशब्देन तेऽपि समावेष्टिताः। एवं कुण्ठित-मतीनेव निर्मलोक्तिर्धिक्करोति—

भूमिकाग्रन्थ के प्रणेता ने इनका विरुद्धत्व निदर्शनमात्र दिखाया है, जिसका खण्डन आप कल्पपर्यन्त नहीं कर सकते।

दूसरे 'महान् महत्स्वेव करोति विक्रमम्' महर्षि को तो अपनी तपःपूत अपूर्व प्रतिभा वैभव द्वारा वेदादि शास्त्रों के ऊपर पड़ी हुई कुत्सित भाष्य टीकादि की धूल को हटाकर उन्हें सर्वसत्य विद्याओं को खोलकर विवेकियों के सामने रखना था। जैसे कोई व्यक्ति आग के ऊपर से राख हटा कर अग्नि-प्रयोग से विविध शिल्पविद्याओं का सम्पादन करता है (राख को ही छान-छान कर कि यह राख गोबर की है या लकड़ी की या अन्य गलित वस्तु की है, इस परीक्षण में अमूल्य जीवन को नहीं गँवाता), उसी प्रकार महर्षि ने हमको भी कसौटी दे दी।

(ख) वेदान्तसार आदि ग्रन्थों में अध्यास, ब्रह्म को जगत् का अभिन्ननिमित्तोपादानकारण प्रतिपादन करना, वेदप्रतिपादित ईश्वर-जीव-प्रकृति की वास्तविक सत्ता का अपलाप करना इत्यादि वेदान्तसारादि ग्रन्थों की वेदान्तशास्त्र से प्रतिकूलता ही है। निखिल मायावादियों का कथन वेदविरुद्ध होने से प्रलापमात्र ही है।

यह बेचारे करपात्री तो महा अभागे हैं, जो इस प्रकार प्रलाप करते हुए उत्सव मना रहे हैं कि 'शाङ्करभाष्य, भामती आदि ग्रन्थ वेदान्तशास्त्रविरुद्ध घोषित नहीं हैं।' इस कथन को विचार कर बालक भी समझ सकता है कि स्वामी दयानन्द ने 'वासिष्ठादि' यहाँ पर पठित आदि शब्द से वे ग्रन्थ भी समाविष्ट कर लिये। ऐसे कुण्ठितमतियों को निर्मलोक्ति धिक्कृत करती है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यान् ग्रन्थान् समधीत्य वेदविमुखं वैदुष्यमासाद्यते,
तानेवायमृषिः प्रमाणयितुमारान्नोद्यतो जायते।
तान्स्तोतुं निरतं भवन्तमपि वा त्वादृङ्मतीन् पण्डितान्,
धिक्त्वां धिक् तव पण्डितान् समधिकं धिग् वेदविद्वेषिणः ॥

पृ० १५६५, पं० ३—"यत्तु व्यासजैमिन्यादिदर्शनानामुपाङ्गत्वमुक्तम्, तदपि चिन्त्यम्। यदपि—'तत्राद्यं कर्मकाण्डविधायकं धर्मधर्मिव्याख्यामयं व्यासमुन्यादिकृतभाष्यसहितं जैमिनिकृतसूत्रं पूर्वमीमांसाशास्त्राख्यं ग्राह्यम्' इति, तदपि चिन्त्यम्, जैमिनिसूत्रेषु व्यासभाष्यस्याऽप्रामाणिकत्वात्। पूर्वमीमांसासूत्रं न कर्मकाण्डविधायकम्, ब्राह्मणविधीनामेव तत्र विधायकत्वप्रसिद्धेः। धर्मधर्मिव्याख्यापि तत्र नास्ति।"

इत्यपि सर्वं ताल्वादिस्थानेषु जिह्वाघर्षणमात्राभ्यासः, आक्षेपस्यार्थहीनत्वात्, भूमिकोत्तरस्य च सार्थकत्वात्।

व्यासजैमिन्यादिदर्शनानि तूपाङ्गानि, शिक्षाकल्पादीनि साक्षादुपकारकत्वाद् वेदानां

जिन ग्रन्थों को पढ़कर वेदों से पराङ्मुख विद्वत्ता प्राप्त होती है, उन्हीं को ये ऋषिवर प्रमाणित मानने के लिये उद्यत नहीं हो रहे हैं। उन वेदविरुद्ध ग्रन्थों की प्रशंसा करने में लगे हुए आपसदृशमतिवाले पण्डितों को, तुमको और तुम्हारे अनुयायी वेद से विद्वेष करनेवाले पण्डितों को धिक्कार है।

पृ० १५६५, पं० ३—"उपाङ्ग ग्रन्थों को गिनाते समय इन्होंने व्यास, जैमिनि आदि के दर्शनग्रन्थों का भी उसमें समावेश किया है, जो कि ग़लत है। वे कहते हैं—'ऐसे ही वेदों के छः उपाङ्ग अर्थात् जिनका नाम षट्शास्त्र है, उनमें से एक व्यास मुनि आदि कृत भाष्यसहित जैमिनिमुनिकृत पूर्वमीमांसा है, जिसमें कर्मकाण्ड का विधान और धर्म-धर्मी दो पदार्थों से सब पदार्थों की व्याख्या की है', किन्तु जैमिनिसूत्र पर व्यासमुनि का कोई प्रामाणिक भाष्य न तो उपलब्ध है और न सुना ही गया है। पूर्वमीमांसा-सूत्र कर्मकाण्ड का विधान नहीं करते, किन्तु वे ब्राह्मणग्रन्थों में प्रतिपादित विधियों की व्याख्या और व्यवस्था करते हैं।"

यह सारा कथन तालु आदि स्थानों पर जिह्वा-घर्षण का अभ्यास ही मात्र है; क्योंकि ये आक्षेप लचर और अर्थहीन हैं और भूमिका के उत्तर सभी गम्भीरार्थयुक्त हैं।

व्यास जैमिनि आदि के दर्शन तो उपाङ्ग हैं और शिक्षा, कल्प आदि वेदों के साक्षात्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदाङ्गानि भवन्ति। अतस्तव कथनं प्रमत्तगीतम्। जैमिनिसूत्रेषु व्यासमुनिना यद् भाष्यं कृतम्, तत्तवानवाप्तम्।

तथ्यमिदं यन्मुनिप्रणीतभाष्यं तु सर्वथा प्रामाणिकमेव स्यात्। अतः प्रामाणिकेति विशेषणोल्लेखनं न बुद्धिवैशिष्ट्यसूचकन्ते। किञ्च, इदमपि ध्वन्यत एतेन यद् व्यासमुनिनाम्ना कृतं किमप्यप्रामाणिकं भाष्यं भवतोपलब्धम्, तस्य तु प्रामाण्यसाध्यता शिष्यते सम्प्रत्यपि यत्तद् व्यासलिखितमुत वा न।

मीमांसाशास्त्रे वेदवाक्यानां विवेचनं कृत्वा 'किमर्थवादवाक्यं किञ्च विधिवाक्यम्' अर्थवादाधिकरणेऽत्र सिद्धवाक्यानि विधिवाक्यैः सङ्गमय्यार्थकरणं वर्णयति, अतः कर्मकाण्डस्य मार्गं योजनां वा परिष्करोति। साधारणतया कर्मकाण्डविधायकत्वमस्य कथितम्। वेदाः खलु ज्ञान-कर्मोपासना-विज्ञानकाण्डभेदेन चतुर्धा विभक्ताः, तत्र कर्मकाण्डस्य सविशेषं मीमांसनार्थमेवास्य दर्शनस्य प्रवृत्तिः। अत एव कर्ममीमांसानामापीदमभिलप्यते। वस्तुतस्तु चोदना हि विधिवचनमभिधत्ते। विधिर्हि वेदः। वेदविधेरेव क्रियाप्रवर्तकत्वम्, ब्राह्मणानामेव विधायकत्वकथनस्य वेदापेक्षयाऽप्रधानत्वम्। साधर्म्यं साधारणधर्मः, वैधर्म्यं

उपकारक होने से वेदों के अङ्ग हैं, अतः तुम्हारा कथन उन्मत्तगीत है। जैमिनि के सूत्रों पर व्यास मुनि ने भाष्य किया, वह तुम्हें उपलब्ध नहीं हुआ।

आपने यहाँ व्यास मुनि के भाष्य से पूर्व 'प्रामाणिक' विशेषण दिया है, इसमें प्रथम बात तो यह है कि मुनिप्रणीत यह भाष्य तो सर्वथा प्रामाणिक ही होगा, अतः प्रामाणिक विशेषण विशिष्ट बुद्धि का सूचक नहीं है। दूसरे इससे यह भी ध्वनित हो रहा है कि आपको व्यासमुनिकृत कोई 'अप्रामाणिक भाष्य' उपलब्ध हो गया है, जिसकी अभी यह साध्यता शेष है कि वह व्यास द्वारा लिखित है या नहीं।

मीमांसाशास्त्र में वेदवाक्यों का विवेचन करके 'अर्थवाद वाक्य कौन सा है तथा विधिवाक्य क्या है ?' यहाँ 'अर्थवादाधिकरण' में सिद्ध वाक्यों को विधिवाक्यों के साथ सङ्गमन करके अर्थकरण वर्णित है। इसलिये मीमांसाशास्त्र कर्मकाण्ड के मार्ग और योजना का परिष्कार करता है, अतः इस शास्त्र का साधारणतया कर्मकाण्डविधायकत्व कहा गया है। वेद ज्ञान, कर्म, उपासना और विज्ञानकाण्ड भेद से चतुर्धा विभक्त हैं। कर्मकाण्ड के सविशेष मीमांसन के लिये इस शास्त्र की प्रवृत्ति है। इसीलिये इसे कर्ममीमांसा के नाम से भी कहा जाता है। वास्तव में तो चोदना का अर्थ ही विधिकथन है। विधि वेद है। वेदविधि ही क्रियाप्रवर्तक है और ब्राह्मणों का विधायकत्व-कथन वेद की अपेक्षा अप्रधान है। साधर्म्य अर्थात् साधारण धर्म और वैधर्म्य अर्थात्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विशेषधर्मो हि। यस्मिन्नसौ धर्मस्तिष्ठति स धर्मी। वैशेषिके तद्विवेचनमस्ति, अतो धर्मधर्मिविधायकत्वकथनं सर्वथा सङ्गतम्। त्वयाऽपि निगदेनात्र पदार्थ-साधर्म्यवैधर्म्यपरत्वं स्वीक्रियत एव।

पृ० १५६५, पं० १०—"विद्या च ज्ञानं तच्च न विधातुं शक्यम्" इत्यादिकथनमनर्गलम्, अप्रमाणितत्वस्यास्योपरि निदर्शनात्। विपूर्वकाद् 'धा'धातोः करणं सम्पादनं विशिष्टधारणं वार्थः। विद्याविधानं भवत्येव। 'ज्ञानं न पुरुषाधीनं किन्तु क्रियैव पुरुषाऽधीना' इत्यपि बालालापः, तस्याप्यधीनत्वात्।

यत्तु—"एवमेव पतञ्जलिमुनिकृतं योगशास्त्रमपि चित्तवृत्तिनिरोधतदुपायबोधकम्, नोपासनाविधायकम्, ब्राह्मोपनिषद्रूपवेदभागेनैवोपासनाविधानात्। 'तज्जलानिति शान्त उपासीत' इत्यादिश्रुतिभ्यः।" इत्यपि योगदर्शनस्य गभीरानध्ययनफलितम्, 'युजिर् योगे' 'युज समाधौ' इत्याभ्यां धातुभ्यां निष्पन्नयोगशब्दस्य समाधिसिद्धत्वात्, समाधौ चेश्वरात्मोपलम्भात्,

---

विशेष धर्म होता है। जिसमें वह धर्म स्थित हो, उसे धर्मी कहते हैं। वैशिषिक में उसका विवेचन है, अतः इसका धर्मधर्मिविधायकत्व कहना सर्वथा सङ्गत है। आपने भी कण्ठ से यहाँ पर साधर्म्य और वैधर्म्यपरता स्वीकृत ही की है।

पृ० १५६५, पं० १०—"विद्या ज्ञान को कहते हैं, इसका विधान नहीं किया जा सकता" यह कथन भी अनर्गल और अप्रामाणिक है; क्योंकि हमने इसके विधान का ऊपर निदर्शन दिया है। विपूर्वक 'धा' धातु से करण व सम्पादन अर्थात् विशेषरूप से धारण करना अर्थ है, अतः विद्या का विधान करना सिद्ध है। यह कहना कि 'पुरुष के अधीन तो क्रिया है, ज्ञान पुरुष के अधीन नहीं है' भी बालालाप है। भला, ज्ञान अर्जित कर लेने पर वह ज्ञान पुरुष के अधीन क्योंकर नहीं होगा? तभी तो उस ज्ञान के अनुसार मनुष्य क्रिया भी करेगा।

"इसी प्रकार पतञ्जलि मुनि का बनाया योगशास्त्र भी चित्त की वृत्ति का निरोध और उसके उपायों के बतानेवाला शास्त्र है, यह उपासना का विधान नहीं करता; क्योंकि उपासना का विधान ब्राह्मण और उपनिषद्रूप वेद के विभाग में ही किया गया है। 'आत्मानमेव०' इत्यादि श्रुतियाँ इसमें प्रमाण हैं।"

यह कथन भी योगदर्शन का गम्भीर अध्ययन न करने का फल है। 'युजिर् योगे' व 'युज समाधौ' धातुओं से 'योग' शब्द निष्पन्न होता है। तो क्या इस से परमात्मा से समाधि में मिलन सिद्ध नहीं होता और समाधि में क्या ईश्वर के पास बैठकर उसकी उपलब्धि नहीं होती?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

योगशास्त्रस्य नियमेष्वेवेश्वरप्रणिधानविधानात्, हिरण्यगर्भादिभिः समुपदिष्टस्य योगशास्त्रस्य मुमुक्षूणां कल्याणाय सौकर्येणावबोधनार्थत्वाच्च । 'तदा द्रष्टुः स्वरूपेऽवस्थानम्' (यो० द० १ । ३) इति सूत्रेण साक्षात् परमात्मनः स्वरूपावस्थितिबोधनेनोपासनाया विधानोपपत्तेः, उपासनां विना मुक्तेरसम्भवात्, तज्जलानिति लक्ष्यसाधनार्थस्य योगस्य पूर्णत्वात् ।

वस्तुतस्तु योगदर्शनं सम्पूर्णमेवेश्वरोपासनाया विधायकम्, तत्स्वरूपस्य च बोधकम् । 'ईश्वरप्रणिधानाद्वा' (१ । २३) —"प्रणिधानाद् भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण। तदभिध्यानमात्रादपि योगिन आसन्नतरः समाधिलाभः समाधिफलं च भवतीति।" (व्या० भा०) , तथा 'तज्जपस्तदर्थभावनम्' (१ । २८) —"प्रणवाभिधेयस्य चेश्वरस्य भावनम्, प्रणवार्थं च भावयतश्चित्तमेकाग्रं सम्पद्यते। तथा चोक्तम्—

स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमासते ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥" (व्या० भा०)

"स्वाध्यायः प्रणवादिपवित्राणां जपो मोक्षशास्त्राध्ययनं वा। ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा।" (यो० द० व्या० भा० २ । १)

हिरण्यगर्भ आदि के द्वारा समुपदिष्ट योगशास्त्र मुमुक्षुओं के कल्याण के लिये बड़ी सरलता से अवबोधनार्थ वर्णित है। एवं 'द्रष्टा के स्वरूप में अवस्थान होने से साक्षात् परमात्मा की स्वरूपस्थिति-बोधन' से उपासना का विधान प्राप्त है। उपासना के बिना भला मुक्ति कैसे सम्भव हो सकती है ? और यह तो योग का प्रारम्भिक अभ्यासी भी जान जाता है कि योग मुक्ति-उपलब्धि का परम साधन है। 'तज्जलानिति शान्त उपासीत' इस लक्ष्य के साधनार्थ योगदर्शन की पूर्णता है।

वास्तव में सम्पूर्ण ही योगदर्शन ईश्वर की उपासना का विधायक है और इसके स्वरूप का भी बोधक है। "ईश्वर के प्रणिधान से (भक्तिविशेष से) आकृष्ट ईश्वर उस भक्त पर अनुग्रह करता है, उस अभिध्यान के द्वारा योगी को आसन्नतर समाधिलाभ प्राप्त होता है।" (व्यासभाष्य १ । २३) । तथा ओंकार का जप और ईश्वर के गुणों का विचार करना एवम् इससे योगी का चित्त एकाग्र हो जाता है। इसीलिये कहा है—

"स्वाध्याय अर्थात् प्रणवादि पवित्रकारक मन्त्रों का जप तथा मोक्षविधायक शास्त्रों के अध्ययन से 'योगमासीत' (उपासीत) उपासना करे और चित्तवृत्ति के निरोध से 'ओ३म्' जप का अभ्यास करे। इस स्वाध्याय और योग की सम्पत्ति (सिद्धि) से अन्तरात्मा में परमात्मा का प्रकाश हो जाता है। इस प्रकार परमात्मा का उपासक पर अनुग्रह होता है।"

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतदात्मकबहूपन्यास उपासनायाः। योगशास्त्रे उपासनाऽविधायकत्वारोपो बुद्धिवञ्चनैवास्य।

पृ० १५६५, पं० १४—यदपि च—"एवं कपिलमुनिकृतं सांख्यशास्त्रमपि न विश्वसनीयम्, शङ्करभगवत्पादादिभिरपि सांख्यकारिकाया एव समुद्धरणात्। एवं वेदान्तशास्त्रमपि न ब्रह्मसूत्रम्, वेदान्तशब्दस्य उपनिषत्स्वेव प्रसिद्धेः। मौक्तिकोपनिषदि वेदान्ताः के रघुश्रेष्ठेति हनुमत्प्रश्ने—यच्चोपनिषदश्चोपाङ्गानीति, तत्तुच्छम्, उपनिषदां वेदत्वस्योक्तत्वात्।" इति वचनमपर्यालोचितसमस्तशास्त्रत्वान् महापराधः खल्वाचरितोऽनेन। अस्माकं प्रातःस्मरणीयपरमपूजास्थानाद्यशङ्कराचार्यवर्यैस्तु बौद्धोन्मूलनकृतदृढप्रतिज्ञैस्तदर्थमङ्गीकृताः, स्वलक्ष्यसाधकसांख्यकारिकादिग्रन्थाः।

एकः खल्वनुग्रहोऽपि तेषामयं यत् त्रैतवादपरकवेदमन्त्रास्तैर्न क्वाऽपि निदर्शिताः 'ब्रह्म सत्यं जगन्मिथ्या' साधकप्रमाणरूपेण, येन वैदिकत्रैतवादोऽखण्डस्तिष्ठेत्।

"साधक या उपासक द्वारा अपनी सारी क्रियाओं को उस गुरु परमेश्वर में समर्पित करना तथा इन क्रियाओं के फल का परित्याग करना" (योग व्यासभाष्य २। १) इस प्रकार की उपासना का योगदर्शन में बहुत सा उपन्यास है। इनके द्वारा योगदर्शन शास्त्र पर उपासना के अविधायक होने का आरोप अति घृणित एवं बुद्धि की वञ्चना ही है।

पृ० १५६५, पं० १४—"इसी तरह से कपिलमुनिकृत सांख्यशास्त्र आज उतना विश्वसनीय नहीं उपलब्ध होता, शङ्करभगवत्पाद प्रभृति आचार्यों ने सांख्यकारिका को ही अपने ग्रन्थों में प्रमाण के रूप में उद्धृत किया है, सांख्यसूत्र को नहीं। इसी तरह से ब्रह्मसूत्र भी वेदान्तशास्त्र नहीं है, किन्तु वेदान्तशास्त्र पर विचार प्रस्तुत करनेवाला ग्रन्थ है। वेदान्त शब्द की प्रसिद्धि उपनिषद् ग्रन्थों के लिये ही है। मौक्तिक उपनिषद् में 'हे रघुश्रेष्ठ! वेदान्त शब्द से किसका बोध होता है?' हनुमान् के इस प्रश्न के उत्तर में उपनिषदों को ही वेदान्त कहा गया है। यहाँ स्वामी दयानन्द ने उपनिषदों का परिगणन उपाङ्गों में किया है।"

यह वचन कहना भी सूचित करता है कि इन्होंने समस्त शास्त्रों का पर्यालोचन नहीं किया है। यह इनका महा अपराध है। हमारे प्रातःस्मरणीय परमपूजास्थान आद्य शङ्कराचार्यवर्य बौद्धों के उन्मूलन के लिये दृढप्रतिज्ञ ने अपने लक्ष्य के साधक सांख्यकारिकादि ग्रन्थों को अङ्गीकृत किया।

एक यह उनका अनुग्रह वा दूरदर्शिता भी है कि उन्होंने त्रैतवादप्रतिपादक वेदमन्त्रों का उद्धरण बौद्धोन्मूलन में 'सब ब्रह्म ही ब्रह्म है, जीव, प्रकृति कुछ नहीं' इस बात के साधक प्रमाण उपनिषदादि के ही दिये, जिससे वेद की त्रैतवादिता अछूती व अखण्ड बनी रहे। वेद की महिमा को दाँव पर नहीं लगाया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वामिशङ्कराचार्यैरेतस्य सांख्यस्योपेक्षाऽवमानना वा कृता, अत्रास्ति हेतुर्यत् सांख्यं तु स्पष्टरूपेण 'पुरुषबहुत्वं व्यवस्थातः' (६। ४५) साधयति। एतद्धेतुनैवाचार्योऽयं कपिलमनीश्वरवादिनमपि मत्वा सांख्यशास्त्रं वेदविरुद्धं गदितवान्। यथा—"अतश्चात्मभेद-कल्पनयाऽपि कापिलस्य तन्त्रस्य वेदविरुद्धत्वं वेदानुसारिमनुवचनविरुद्धत्वं च" (ब्रह्मसू० २। १। १ शां० भा०)। वस्तुतः पुरुषबहुलादेव पापपुण्यव्यवस्थाऽपि भवितुमर्हति नान्यथा। महा-मुनेर्भगवतः कपिलस्य नास्तिकत्वप्रख्यापने 'ईश्वरासिद्धेः' इति सूत्रपौर्वापर्यप्रसङ्गादर्शनमेव।

स्वामी शङ्करः सांख्यं प्रकृतेरुपादानकारणतया जीवानां नानाभूतत्वादेव वेदविरुद्धं कथयति। यतो हि उक्तसत्तायां मायावादस्य सर्वथा खण्डनं जायते। रामानुजाचार्योऽपि त्रित्वमपास्य 'प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधात्' (ब्र० सू० १। ४। २३) भाष्ये शाङ्करमनु-सृतवान् विशिष्टाद्वैतप्रतिपादने। प्रसङ्गत एतदवगन्तव्यं यत् पाश्चात्या दार्शनिका हर्बर्टस्पेंसर-महोदयदर्शनेन सांख्यं सङ्गमयन्तीति तेषां महान् भ्रमः, तत्सिद्धान्ते आत्मनोऽस्तित्वाऽमननात्।

भारतीया अपि केचन श्रीधर्मेन्द्रनाथप्राध्यापकसदृशाः सांख्यकारिकामेव सांख्यशास्त्रापेक्षा प्राचीनतरां मन्यन्ते, सा तु भ्रान्तिरेव। वात्स्यायनेन सांख्यकारिकाया नोद्धरणं

स्वामी शङ्कराचार्य द्वारा इस सांख्यशास्त्र की उपेक्षा या अवमानना जो की गयी है, उसमें हेतु है; क्योंकि सांख्य तो स्पष्टरूप से ही 'पुरुषों (जीवों) की अनेकता' (सां० ६। ४५) सिद्ध कर रहा है। इसी कारण इन्होंने महर्षि कपिल को अनीश्वरवादी मानकर सांख्यशास्त्र को वेदविरुद्ध कहा। जैसे—"इसलिये आत्मा के भेद की कल्पना से भी कपिल के तन्त्र का वेदविरुद्धत्व और वेदानुसारी मनु के वचन के विरुद्धत्व है।" वास्तव में तो पुरुषबहुत्व से ही पाप-पुण्य की व्यवस्था हो सकती है। महामुनि कपिल के 'ईश्वरासिद्धेः' सूत्र से नास्तिकता सिद्ध की है और पौर्वापर्य प्रासङ्गिक सूत्रों का भी परिशीलन नहीं किया है।

स्वामी शङ्कर सांख्य को प्रकृति के उपादानकारणत्व-प्रतिपादन हेतु से और जीवों के नाना होने से वेदविरुद्ध कहते हैं; क्योंकि उक्त की सत्ता में मायावाद का सर्वथा खण्डन हो जाता है। रामानुजाचार्य ने भी त्रित्व को छोड़कर ब्रह्मसूत्र १।४। २३ के भाष्य में विशिष्टाद्वैत के प्रतिपादन में शङ्कर का ही अनुसरण किया है। प्रसङ्गतः यह भी समझ लेना चाहिये कि पाश्चात्य दार्शनिक हर्बर्ट स्पेंसर महोदय के दर्शन के साथ सांख्यशास्त्र को सङ्गत करना चाहते हैं, यह उनका महान् भ्रम है; क्योंकि हर्बर्ट स्पेंसर के सिद्धान्त में आत्मा की सत्ता का कहीं मनन नहीं किया गया है।

प्राध्यापक श्री धर्मेन्द्रनाथजी जैसे कतिपय भारतीय भी सांख्यकारिका को ही सांख्यशास्त्र की अपेक्षा प्राचीनतर मानते हैं, परन्तु यह भ्रान्ति ही है। वात्स्यायन ने सांख्यकारिका का उद्धरण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कृतम्, प्रत्युत वार्षगण्यमुद्धृतम्। यथा—"सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात्। अपेतोऽप्यस्ति विनाशप्रतिषेधात्।" (न्या० द० १। २। ६)। एतेन सूच्यते यत् सांख्यकारिका तस्मिन् समये नास्तित्वमाजगाम।

ननु एतेनैव हेतुना सांख्यस्याऽप्यनुद्धरणात् तस्याप्यस्तित्वे मानाभाव इति चेन्न, वार्षगण्यस्य वाक्येऽग्रे 'सौक्ष्म्यात्तदनुपलब्धिः' इति वाक्याप्तेः सांख्यसूत्रस्य वार्षगण्यापेक्षयाऽपि प्राक्तरत्वसिद्धेः।

अपरं चान्यत्र वात्स्यायनः १। १। २९; ४। १। ४८-४९ सूत्रेषु सांख्यप्रसङ्गमुपादाय 'उपाददानियमात्' इत्यपि उद्दीधरत्। योगदर्शनभाष्ये च महर्षिव्यासः कपिलमादिविद्वान् इति लिलेख। यथा—"आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति।" (यो० द० भा० १। २५)।

ईश्वरकृष्णोऽपि सांख्यकारिकाकर्ता स्वीचकार—

"एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्॥" ७०॥

नहीं दिया, प्रत्युत वार्षगण्य को उद्धृत किया है, जैसे— न्या० द० १। २। ६। इससे प्रतीत होता है कि वात्स्यायन के समय सांख्यकारिका अस्तित्व व प्रसिद्धि में नहीं आ पायी थी।

प्रश्न—इसी हेतु से सांख्य के अस्तित्व पर भी प्रश्नचिह्न लग सकता है; क्योंकि सांख्य का भी तो उद्धरण नहीं दिया है।

उत्तर—वार्षगण्य के वाक्य में आगे "सौक्ष्म्यात्तदनुपलब्धिः' यह वाक्य मिलता है, जो कि सांख्य का सूत्र है, जिससे वार्षगण्य की अपेक्षा सांख्य का प्राक्तर होना सिद्ध है।

दूसरे वात्स्यायन १। १। २९; ४। १। ४८-४९ सूत्रों पर सांख्यप्रसङ्ग को उठाकर 'उपाददानियमात्' यह उद्धृत करते हैं और योगदर्शनभाष्य में महर्षि व्यास ने कपिल को 'आदि विद्वान्' लिखा है, इसका श्लिष्ट अर्थ भी है कि परम ऋषि आदि विद्वान् परमेश्वर ने वेदनिर्माण के लिये चित्त को अधिष्ठित कर कृपा करके जिज्ञासमान जीवात्मा (असुरस्यापत्यमासुरिः जीवात्मा) के लिये तन्त्र (वेद) कहा (यो० द० १। २५)।

सांख्यकारिका के कर्ता ईश्वरकृष्ण ने भी स्वीकार किया है कि—"मुनिवर कपिल ने इस प्रधान सांख्य को आसुरि (शिष्य) को कृपाकर दिया। आसुरि ने पञ्चशिख को और उन्होंने इसका बहुत व्याख्यान किया।" (७०)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तन्त्रमिति पदेन ग्रन्थरूपप्रणयनमभिव्यज्यते। तच्च सांख्यशास्त्रमिदं प्राचीनतममेव सिद्ध्यति। अतः 'सांख्यशास्त्रमपि न विश्वसनीयम्' इति कथनं दुःसाहसम्।

वेदान्त(ब्रह्म)– सूत्रविषयेऽप्ययं भ्रान्तः। वेदस्यान्तः सिद्धान्त एव वेदान्तः। नवीना ये श्रीकरपात्रस्थूलदृशा उपनिषदमेव गृह्णन्ति, तदलीकं त्रुटिपूर्णं च। नोपनिषदः क्वाऽपि वेदान्तत्वेन निरूपिताः। वेदान्तशब्देनात्र बादरायणव्यासप्रणीत एवायं ग्रन्थो गृह्यते। सम्प्रति उपलभ्यमानभाष्याणि वेदान्तस्य शाङ्कर-रामानुज-माध्व-नैम्बार्क-वाल्लभानि, तैः खलु वेदान्तस्य वास्तविकस्वरूपमेव तिरोहितम्। सर्वतन्त्रस्वतन्त्रश्रीवाचस्पतिमिश्रस्याऽपि भामतीटीकाऽपि शाङ्करमेव प्रायः प्रश्रयते।

यदयं वक्ति—"वेदस्वरूपविप्रतिपत्तौ तदपि विप्रतिग्रस्तम्" इति दुराग्रहग्रस्तमतित्वम्, निर्भ्रान्तरूपेण वेदचतुष्टयस्यैव वेदत्वप्रतिपादनस्यौचित्यमन्यत्र बहु पल्लवितम्।

पृ० १५६६, अनु० १—"यत्तु रुद्रयामलादयस्तन्त्रग्रन्था ब्रह्मवैवर्तादिपुराणानि प्रक्षिप्त-श्लोकत्यागाया मनुस्मृतेर्व्यतिरिक्तायाः स्मृतयः सारस्वतचन्द्रिकाकौमुद्यादयो व्याकरणाभास-

---

तन्त्र इस पद से ग्रन्थरूप में प्रणयन करना अभिव्यक्त होता है। वह यह सांख्यशास्त्र प्राचीनतम सिद्ध होता है। इसलिये 'सांख्यशास्त्र भी विश्वसनीय नहीं है' पारिजातकार का यह कथन दुःसाहसमात्र है।

वेदान्तसूत्र के विषय में भी यह भ्रान्त है। वेद का अन्त अर्थात् सिद्धान्त ही वेदान्त कहाता है। नवीन जो करपात्रीजी के सदृश स्थूलदृष्टि हैं, वे उपनिषद् को ही वेदान्तरूप में निरूपित करते हैं, यह भी मिथ्या और त्रुटिपूर्ण है। वेदान्त के रूप में उपनिषदों का कहीं प्रतिपादन नहीं है। वेदान्त शब्द से यहाँ बादरायण व्यास-प्रणीत यही ग्रन्थ गृहीत होता है। इस समय वेदान्त के उपलभ्यमान भाष्य शङ्कर, रामानुज, मध्व, निम्बार्क और वल्लभ के हैं। इनके द्वारा तो वेदान्त का वास्तविक स्वरूप ही तिरोहित हो गया। सर्वतन्त्रस्वतन्त्र श्री वाचस्पति मिश्र की भामती टीका भी प्रायः शाङ्करभाष्य का ही आश्रय लेती है।

यह जो कह रहे हैं कि—"वेदों के स्वरूप में ही जब आप (भूमिकाकार) सन्देह पैदा कर देते हैं, तो यह अपने आप संशय में पड़ जाता है कि वेदविरोधी ग्रन्थ कौन हैं ? अर्थात् वेद का एक निश्चित स्वरूप मानकर ही निश्चित किया जा सकता है कि अमुक ग्रन्थ वेदसमर्थित और अमुक ग्रन्थ वेदविरोधी है।" इसके उत्तर में इतना कथन पर्याप्त है कि 'ऋगादि चार का ही वेदत्व है'। इस विषय में पूर्व में पर्याप्त कहा जा चुका है।

पृ० १५६६, अनु० १—"रुद्र यामल आदि तन्त्रग्रन्थ, ब्रह्मवैवर्त, श्रीमद्भागवत आदि पुराण, मनुस्मृति के प्रक्षिप्त श्लोक और उससे पृथक् सब स्मृतिग्रन्थ, व्याकरणविरुद्ध सारस्वत-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ग्रन्था मीमांसादिशास्त्रविरुद्धनिर्णयसिन्ध्वादयो ग्रन्था वैशेषिकन्यायशास्त्रविरुद्धास्तर्क-संग्रहमारभ्य जागदीश्यन्ता न्यायभासग्रन्था योगशास्त्रविरुद्धहठदीपिकादयो ग्रन्थाः सांख्यशास्त्रविरुद्धाः सांख्यतत्त्वकौमुद्यादयो वेदादिशास्त्रविरुद्धा वेदान्तसारपञ्चदशीयोग-वाशिष्ठादयो ग्रन्था ज्योतिषशास्त्रविरुद्धा मुहूर्तचिन्तामण्यादयो मुहूर्तजन्मपत्रफलादेशविषयका ग्रन्थाः कलिहतकेन दयानन्देनाप्रमाणभूता उक्ताः ।"

इदं सर्वं लिखन्नयं करपात्रोऽनुच्छेदान्ते लिखति—"वस्तुतस्तु स्वामिदयानन्दस्यैव ऋग्वेदादिभाष्यभूमिकासत्यार्थप्रकाशसंस्कारविधितदीयवेदभाष्यादयो ग्रन्था नास्तिक्यावहा वेदविरुद्धा युक्तितर्कविरुद्धाः प्रमाणाभासमूलकाः, त एव शिष्टैः सर्वतोभावेन त्याज्याः ।"

अत्र पूर्वोक्तेनैव बुधा समाधानमवभोत्स्यन्ते, अत्र तु केवलमिदमेवाप्रन्यस्यते—

कुमतिरयमतत्त्वे तत्त्ववादं ब्रुवाणः,
कलिमलहतबुद्धिः पाणिपात्रोऽप्यपात्रः ।
मुखकृतविषवमनः सृष्टपीयूषधाराम्,
धरति सुमतिपात्रे नार्षवाक्याम्बुदेभ्यः ॥

चन्द्रिका, कौमुदी आदि ग्रन्थ धर्मशास्त्रविरुद्ध निर्णयसिन्धु आदि तथा वैशेषिक-न्यायशास्त्रविरुद्ध तर्कसंग्रह, मुक्तावली आदि ग्रन्थ, हठप्रदीपिका आदि ग्रन्थ, जो कि योगशास्त्र के विरुद्ध हैं, सांख्यशास्त्र के विरुद्ध सांख्यतत्त्वकौमुदी आदि ग्रन्थ, वेदान्तशास्त्र के विरुद्ध वेदान्तसार, पञ्चदशी, योगवासिष्ठ आदि ग्रन्थ, ज्योतिषशास्त्र के विरुद्ध मुहूर्तचिन्तामणि आदि मुहूर्त, जन्मपत्र, फलादेश का विधान करनेवाले ग्रन्थ, यह कलिकाल का ही प्रभाव माना जायेगा कि ऐसे ग्रन्थों को स्वामी दयानन्द ने अप्रामाणिक मान लिया है ।"

यह सब लिखते हुए अनुच्छेद के अन्त में श्रीकरपात्रीजी लिखते हैं—"वास्तव में तो स्वामी दयानन्द के ही ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाश, संस्कारविधि आदि ग्रन्थ तथा उनके किये गये वेदों के भाष्य नास्तिकता का प्रचार करनेवाले हैं, इन्हीं का परित्याग कर देना चाहिये ।"

हम पूर्व में बहुत कुछ लिख आये हैं, उससे ही पण्डित लोग समाधान ऊहित कर लेंगे । यहाँ केवल इतना कहना चाहेंगे—

शास्त्रज्ञान का अपात्र यह करपात्र निःसार ग्रन्थों में सार का आरोप अपनी कुमति से कर रहा है । ज्ञात होता है कि कलिमल से इसकी बुद्धि नष्ट हो गयी है । इसके मुख से निरन्तर विष का वमन हो रहा है, अतः यह आर्षवाणीरूप अम्बुदों से बरसी हुई पीयूष (अमृत)धारा को अपने सुमति-पात्र में नहीं भर पा रहा है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५६७, पं० १—यदाह—"मद्यमांसादिसेवनविधायकानि तन्त्राणि प्रदर्शितानि, तानि कुत्रत्यानि किमभिप्रायकाणीति तु नोक्तम्, तन्त्राणां गूढाभिप्रायस्य पामरैर्ज्ञातुमशक्यत्वात्।" तदपि न गूढाभिप्रायकमपि तु मूढाभिप्रायकमेव।

अल्पबुद्धिप्रमूढैश्च, अधर्मरतदुष्कृतैः।
अनार्यैः पामरैर्नूनम्, मद्यादि प्रचारितम्॥
मद्यमांसादिशब्दान् हि, गूढाभिप्रायबोधकान्।
प्रत्यक्षस्यापलापं च, पामरा हि प्रकुर्वते॥

अयमत्रपः करपात्रमहोदयः प्रत्यक्षमाचरन् लोके मद्यमांसमीनमुद्रामैथुनानि दृष्ट्वाऽपि व्यभिचारपरकाणि गूढाभिप्रायकाणि प्रलप्य पोषयतीति लज्जास्पदम्। अयं व्याचष्टे—चण्डालीगमनं काशीयात्रा कथ्यते, अयोध्यायात्रा रजकीगमनं प्रयागस्थानं च चर्मकारीगमनमिति।

किमयमथवैतस्य कश्चिदनुयायी मञ्चे चाण्डालरजकचर्मकारसभायामेवं व्याख्यां श्रावयितुं साहसं करिष्यति? अनुमन्ये तस्य विनैव क्षुरेण मुण्डनमेव न भविष्यति, अपितु

पृ० १५६७, अनु० १—"इसी तरह स्वामी दयानन्द ने मद्य, मांस आदि के सेवन की अनुमति देनेवाले तन्त्रशास्त्रों का उल्लेख किया है, किन्तु उन्होंने यह नहीं बताया कि वे वचन कहाँ के हैं और इनका अभिप्राय क्या है। तन्त्रों के गूढ अभिप्राय को पामर लोग नहीं समझते।" यह इनका कथन गूढाभिप्रायवाला नहीं, मूढाभिप्रायवाला अवश्य है और यह भी निश्चित है कि—

अल्पबुद्धि महामूढ, अधर्मरत, कुकर्मी, अनार्य, पामरों ने मद्यादि का प्रचार किया है। मद्य, मांस आदि शब्दों को गूढ अभिप्राय बोधक बतला कर मूढ लोग प्रत्यक्षसिद्ध का अपलाप करते हैं।

ये त्रपारहित करपात्रीजी लोकप्रत्यक्ष मद्य, मांस, मछली, मुद्रा, मैथुन को देखकर भी, व्यभिचारपरक इनको 'गूढ अभिप्रायवाले हैं' ऐसा प्रलाप करके पोषित कर रहे हैं, यह अति लज्जास्पद है। ये कहते हैं कि चण्डाली के साथ गमन करना मानो काशी की यात्रा का पुण्य कमाना है, रजकी (धोबिन) से समागम करना मानो, अयोध्या की पुण्ययात्रा है, चमारिन के साथ मुँह काला करना मानो, प्रयागराज के त्रिवेणी सङ्गम का स्थान है।

हम पूछते हैं कि क्या ये अथवा इनका कोई अनुयायी मञ्च पर पहुँचकर चाण्डाल, धोबी और चर्मकारों की सभा में उक्त व्याख्या सुनाने का साहस कर सकता है? हमें अनुमान है कि उसका विना क्षुरा के ही पादत्राणों से मुण्डन ही नहीं होजायेगा, प्रत्युत श्मशान के प्रति महायात्रा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्मशानं प्रति महायात्रापि निःसरिष्यति।

धूर्तैर्वञ्चकैरेवमशास्त्रीयाः शब्दाः प्रच्छन्नसरण्या व्यभिचारप्रचाराय प्रचारिताः। सच्छास्त्राणां विलोपे सत्येव तेषां दुष्टमनोरथाः सेत्स्यन्तीत्यवधार्य वेदादीनां विरोधोऽपि कृतः। कल्पितदेवतायै समर्प्य मद्यं मांसं वा सेवितं दासीप्रथाऽपि व्यभिचारिभिर्देवादिभ्यो बालिकानां समर्पणेन प्रसारिता। आर्यराज्यमभविष्यच्चेद् दुष्टा दण्ड्या अप्यभविष्यन्।

पृ० १५६७, पं० २—यदुच्यते—"किञ्च, यथा प्रजापतिः स्वां दुहितरमभ्यध्यायत्। दिवमित्यन्य आहुरुषसमित्यन्ये। तामृश्यो भूत्वा रोहितं भूतामभ्यैत्। तस्य यद् रेतसः प्रथममुददीप्यत तदसावादित्योऽभवत्' (ऐ० ब्रा० ३।३३-३४), 'प्रजापतिर्वै सुपर्णो गरुत्मानेष सविता' (शत० १।२।२।४), 'तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः' (नि० ४।२१) इत्यादिभिः प्रजापतिकर्तृकस्य दुहितृगमनस्य गूढोऽर्थोऽन्यो ग्राह्य इति त्वयाऽभ्युपगम्यते, तथैव तन्त्रेऽपि मद्यादीनामन्यार्थत्वोक्तेः।" इत्यपि शास्त्रीयरूपकालङ्कारेण धूर्तप्रवर्तित-व्यभिचारस्य साम्यं ब्रुवाणो गङ्गूतैलिकेन भोजराजमहाराजमुपमातुं यतमानो न लज्जते।

अत्रैकमुदाहरणं स्मृतिपथमवतरति यत् स्वामिदर्शनानन्दवीतरागस्थापितबदायूंगुरुकुले अहमधीयान आसम्। एकदा द्वयोर्बालकयोर्मिथः कलहः समजनि। अकस्मादहमप्युपेतस्तत्र।

भी निकाली जा सकती है।

धूर्त और ठगों ने ऐसे अशास्त्रीय शब्द प्रच्छन्न गली में व्यभिचार के प्रचार के लिये प्रचारित किये हैं। उत्तम शास्त्रों के लोप हो जाने पर ही उनके दुष्ट मनोरथ सिद्ध होंगे, ऐसा निश्चय करके सत्यार्थप्रकाशादि के पढ़ने का विरोध भी करते हैं। कल्पित देवता के लिये सेवित मद्य-मांसादि का समर्पण कर व्यभिचारियों ने देवादि के नाम पर अबोध बालिकाओं का समर्पण करके दासीप्रथा भी प्रसारित कर दी। आर्यों का राज्य यदि होता तो ये दुष्ट दण्डित होते।

पृ० १५६७, पं० २—"यथा प्रजापतिः' प्रभृति ऐतरेय, शतपथ और निरुक्त में उद्धृत प्रजापति के द्वारा अपनी पुत्री के अभिसरण का वर्णन करनेवाली श्रुतियों का एक दूसरा ही गूढ अभिप्राय आप भी स्वीकार करते हैं, उसी प्रकार तन्त्र में भी गूढाभिप्राय है।" इस कथन के द्वारा शास्त्रीय रूपक अलङ्कार और मद्यादि सेवनवाला लोक में आज भी आचरित है (जयपुर जिले में अब भी बहुत स्थानों पर भैरवीचक्रोत्सव आयोजित होकर व्यभिचार होता है)। धूर्तप्रवर्तित व्यभिचार की शास्त्रीय रूपकालंकारों के साथ समानता कहते हुए आपको लज्जा नहीं आती जो मूढ गङ्गू तेली और संस्कृत-विद्वान् महाराज भोज की तुलना करने लगे।

यहाँ पर एक उदाहरण स्मृतिपथ पर आ रहा है। जब मैं वीतराग स्वामी दर्शनानन्द जी महाराज स्थापित 'गुरुकुल महाविद्यालय सूर्यकुण्ड, बदायूँ' में पढ़ रहा था, एक बार दो ब्रह्मचारी आपस में लड़ पड़े। अकस्मात् मैं वहाँ पहुँच गया। मैंने पूछा कि किस बात पर आप दोनों लड़

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अपृच्छमहं यत् किमर्थं कलहायेते भवन्तौ ? तयोरेकतोऽवोचत्—'अयं गालीदानं करोति, यदा गुरुकुले गालीनामुच्चारणं सर्वथा निषिद्धं विद्यते। अपृच्छमहं किमकथयदयम् ? उवाचासौ—'ससुर' इत्यकथयत्। मया कथितं यन्नेयं गाली, एतस्य शब्दस्य तु अतितरां शोभनोऽर्थः। यथा—'सुरैर्देवैः सहितः ससुरः' इति। वस्तुत इयं शास्त्रीया व्युत्पत्तिः,नोपयुक्ताऽऽसील्लोके।

अस्य तु पौराणिकशिरोमणेर्वेदभाष्यं चिकीर्षोर्विचित्रा मतिर्यदयं सर्वत्र वेदव्याख्यावसरे प्रसिद्धार्थग्रहणस्याग्रहं कुरुते, परं चाण्डालीगमनचर्मकारीगमनादिशब्दानामिह शास्त्रीयां व्युत्पत्तिं निरुक्तिं वा श्रेयस्करीं प्रतिपादयते। कीदृशो मतिविभ्रमोऽयम् ?

यच्च प्रलपति यत् 'परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः' इत्युक्त्या शास्त्रसम्पुष्टिमलब्ध्वा धात्वाद्यनिर्मिते एकान्तरचिते ग्रन्थे ऋष्याचार्यनाम्ना प्रख्यापिते स्वकपोलकल्पिता अर्था ये लोके शास्त्रे वाऽप्रसिद्धास्त एव मनोमानिता ग्रहीष्यन्ते विदुषां परोक्षत्वादिति त्वयुक्तम्।

अस्याः सूक्तेरयमर्थः—'परोक्षेण प्रलयकालेऽपि वर्तमानेन परमदृग्गोचरत्वेऽपि परोक्ष-

---

रहे हैं ? उनमें से एक बोला—यह गाली दे रहा है, जब कि गुरुकुल में गाली देना वर्जित है। मैंने पूछा—इसने क्या गाली दी ? वह बोला—इसने हमें 'ससुर' कहकर गाली दी। मैंने कहा—यह तो गाली नहीं है, इस शब्द का तो अत्यन्त सुन्दर अर्थ है। यथा—'सुरैर्देवैः सहितः ससुरः' देवताओं के सहित रहनेवाला ससुर कहलाता है। पर वास्तव में यह शास्त्रीय व्युत्पत्ति लोक में चरितार्थ नहीं हो सकती।

वेदभाष्य करने के इच्छुक, इस पौराणिकशिरोमणि की तो बुद्धि ही विचित्र है, जो यह सर्वत्र वेदों के व्याख्यान के अवसर पर प्रसिद्धार्थ ग्रहण करने का आग्रह करता है, परन्तु चाण्डाली, चर्मकारी, रजकी गमन आदि शब्दों के लोकप्रसिद्ध अर्थों को छोड़कर शास्त्रीय व्युत्पत्ति और निरुक्ति को श्रेयस्करी प्रतिपादित कर रहा है। इसका यह कैसा मतिभ्रम है ?

यह जो कह रहा है कि 'देवता वे होते हैं, जो परोक्ष से प्यार करते हैं और प्रत्यक्ष से द्वेष करते हैं' इस उक्ति से शास्त्रसम्पुष्टि की दुहाई देकर वास्तविक शास्त्रसमर्थन न देखकर धातु प्रत्ययादि से अनिष्पन्न छिपकर रचे ग्रन्थ में ऋषि और आचार्यों के नामों से प्रख्यापित, अपने कपोलकल्पित अर्थ जो लोक और शास्त्र दोनों में अप्रसिद्ध हैं, वे ही मनमाने ढंग से ग्रहण किये जायेंगे; क्योंकि वे अर्थ विद्वानों के भी परोक्ष हैं, ऐसा कथन उन्मत्तालाप ही है।

'परोक्षप्रिया हि देवाः' इस सूक्ति का अर्थ तो यह है कि 'प्रलयकाल में भी वर्तमान रहनेवाले,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रिया भविष्यत्प्रेमाणः प्रत्यक्षद्विषोऽर्थात् क्षणभङ्गुरां वर्तमानावस्थां न प्रीणन्ति', यदभिलक्ष्योक्तं योगे—'हेयं दुःखमनागतम्' इति। वस्तुतस्त्वत्रायमर्थो घटते—

इमे देवतास्वपि प्रशस्यतरा देवता मन्येरन्, मद्यमांसादिशब्दानां च झटिति पृथग् लिखितरक्षिता अर्थाः प्रकाश्येरन्, सार्थं व्यभिचारेऽपि स्वैरिता रक्ष्येत।

यदप्याह—"गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम्' इति श्रुत्या भ्रान्तिर्जायते। 'गो-शब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि। गोमांसभक्षणं प्रोक्तं महापातकनाशनम्।" इत्यादिवचनमश्रेयः, वेदविद्याविमुखैरल्पविद्भिश्चमत्कारदर्शनप्रलोभैः कल्पितत्वात्, समाज-विध्वंसनपरायणैश्च मद्यमांसादिसेवनरतैर्दिवान्धवृत्त्यवलम्बनत्वाच्च, पक्षिषु पक्षप्रदर्शनाद् दन्तवत्सु च दन्तदर्शनेनोभयजातीयत्वसाधनाभीष्टत्वादिव। एवं तु भवदभिमतानुसारं मदीयमपि श्लोकमिदं प्रामाण्यमर्हति—

'नरस्तु नरकं याति करपात्रस्य दर्शने।'

परन्तु दृग्गोचर न होने पर भी परोक्षप्रिय अर्थात् भविष्यत् से प्रेम करनेवाले, प्रत्यक्ष अर्थात् क्षणभङ्गुर वस्तुओं व अवस्था में प्रीति न करनेवाले देवता होते हैं"। इसी अभिप्राय को मन में रखकर 'हेयं दुःखमनागतम्' यह कहा गया है। वास्तव में तो इन पर यह अर्थ घटित होता है—

ये देवताओं के देवता समझे जायें और मद्यमांसादि के झट से एकान्त में लिखकर रखे हुए दूसरे अर्थ बता दें और व्यभिचार भी करते रहें।

यह कहना कि "गोमांस नित्य खाना चाहिये और अमर वारुणी (शराब) भी नित्य पिये' इसे सुनकर भ्रान्ति होती है, परन्तु यहाँ पर 'गो शब्द जिह्वावाचक है, इस का तालु में प्रवेश करना महापातक को नष्ट करनेवाला गोमांसभक्षण है।" इत्यादि अश्रेयस्कर हैं; क्योंकि वेदविद्याविमुख, अल्पज्ञ, शब्दार्थ-चमत्कार दर्शन के प्रलोभियों ने ऐसे वचन कल्पित किये हैं, जो समाज के विनाश में परायण और मद्यमांसादि सेवन में रत तथा दिवान्ध (उल्लू) की वृत्ति का अवलम्बन कर रहे हैं। ऐसे लोग चमगादड़-वृत्ति के हैं। पक्षियों की गणना में पंख दिखलाते और दन्तवालों में दाँत दिखलाकर दोनों जातियों का लाभ उठाते हैं। इस प्रकार आपके मतानुसार हमारा भी यह श्लोक गूढार्थक होने से प्रामाणिक मानना पड़ेगा। यथा—

'नरस्तु नरकं याति करपात्रस्य दर्शने।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इह— 'ककारे कुत्सिताचारः, रेफे रागपरायणः ।
पकारे पापवान् प्रोक्तः, त्रेण त्रासप्रदायकः ।।' इति ।

तस्माद् विरमतु अनर्थजगड्ड्वालकल्पनया। कथङ्कारमादर्तव्या द्राविडप्राणायाम-प्रणाली अनार्षा, यदा योगप्रभृतिदर्शनैः सरल एव मोक्षस्य राजपथः प्रदर्शितः । एवं महानिर्वाण-तन्त्र-जालग्रन्थप्रपञ्चो व्यर्थ एव । तस्माद् आगमसारनाम्ना निःसारः, मेरुतन्त्रादिप्रोक्ता मद्यमांस-मैथुनादिशब्दानां कल्पिताः परिभाषाः सर्वथा परित्याज्याः, सत्यशास्त्रेषु सरलसरणेरुपलम्भात् ।

कौतूहलमुपशमयितुमनेनोद्धृतानि श्लोकानि पश्यन्तु भवन्तः, कीदृशाः श्लोकाः शास्त्रतत्त्वमजानद्भिर्विरचिताः । यथा मैथुनपरिभाषा—

"कूलं कुण्डलिनीशक्तिर्देहिनां देहधारिणी ।
तयोः शिवस्य संयोगो मैथुनं परिकीर्तितम् ।।

सहस्रारोपरि बिन्दौ कुण्डल्या मैथुनं शिवे ।
मैथुनं शयनं दिव्यं यतीनां परिकीर्तितम् ।।

मनुष्य करपात्र जी के दर्शन करने पर नरक को जाता है । यह गूढार्थक 'करपात्र' शब्द इस प्रकार है—'क' से कुत्सित आचार, 'र' से राग में आसक्त, 'पा' से पापवान् और 'त्र' से त्रास देनेवाला है ।

इसलिये श्रीमन् ! इस पाशविक खुरापात से और अनर्थक जगड्वाल से विराम ले लीजिये । यह अनार्ष द्राविड प्राणायाम-प्रणाली क्यों अपनायी जावे ? जबकि योग प्रभृति दर्शनों के द्वारा मोक्षदायक सरल और सीधा राजपथ दिखाया गया है । इस प्रकार महानिर्वाणतन्त्रादि जालग्रन्थों का प्रपञ्च व्यर्थ ही है । अतः 'आगमसार' नाम से निःसार, मेरुतन्त्रादिप्रोक्त मद्य-मांसादि शब्दों की कल्पित परिभाषाएँ सर्वथा परित्याज्य हैं; क्योंकि सत्यशास्त्रों का सुगम सरल मार्ग उपलब्ध है ।

अपने सहज कौतूहल का उपशमन करने के लिये इन्होंने श्लोक उद्धृत किये हैं, उन्हें आप देखिये कि शास्त्रतत्त्ववञ्चित लोगों ने कैसे श्लोक बनाये हैं । जैसे मैथुन की परिभाषा—

"कुल का अर्थ कुण्डलिनी शक्ति है, जो कि सभी प्राणियों के शरीर को धारण करनेवाली है । इस कुल नामक कुण्डलिनी के साथ अकुल शिव का संयोग होता है, जो मैथुन कहा जाता है ।।

सहस्रदल कमल में स्थित बिन्दुस्थान में कुण्डलिनी शक्ति का शिव के साथ समागम ही मैथुन कहा जाता है । यह मैथुन एक प्रकार की योगियों के शयन की स्थिति है ।।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वीर्यपातस्य समये सुषुम्णासन्नमारुते।
उत्पद्यते च यत् सौख्यं शतकोटिगुणं तु तत्॥

एतदेव रतं प्रोक्तमन्यत् स्याद् रासभं रतम्।
गङ्गायमुनयोर्मध्ये बालरण्डां तपस्विनीम्।
बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम्॥

तत्स्वरूपं च तत्रैवोक्तम्—

इडा भागीरथी गङ्गा पिङ्गला यमुना नदी।
तयोर्मध्यगता रण्डा सुषुम्नैव सरस्वती॥"

अत्राऽहं पृच्छामि काऽवश्यकताऽऽसीत् समाजे दूषितार्थैशब्दानां मद्यादीनामेव प्रयोगस्य ? ये लोके भोगिसंसारे प्रयुज्यन्ते तानङ्गीकृत्य योगशास्त्रे शास्त्रचिन्तनमपि दूषितम्। एतद्योग्यपेक्षया तु भोगिन एव श्रेष्ठाः, यैर्योगिका यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाध्यादयः शब्दा न भोगक्षेत्रे प्रयोजिताः, परमेतैर्महात्मयोगिनामधारिभिः शब्दैः सहैव व्यभिचरितमित्यक्षम्योऽपराधः।

वीर्य का पात होते समय सुषुम्णा नाड़ी में स्थित पवन में जिस सुख की अनुभूति होती है, उसके करोड़ोंगुना आनन्द की अनुभूति जिस योगदशा में होती है, वही वास्तविक रत्यवस्था है। इसके अतिरिक्त सब गधारति ही कही जायेगी।

गङ्गा और यमुना के मध्य में स्थित तपस्विनी बाल विधवा को बलपूर्वक पकड़ना चाहिये। वास्तव में विष्णु का परम पद वही है॥

इस श्लोक के कुछ पदों का निगूढ अर्थ वहीं पर स्पष्ट किया गया है—

इडा नाड़ी ही यहाँ भागीरथी गङ्गा है और पिङ्गला नाड़ी यमुना है। इन दोनों के बीच में स्थित सुषुम्णा नाड़ी रण्डा व सरस्वती के नाम से प्रसिद्ध है।" इति।

यहाँ पर आप बताइये कि क्या आवश्यकता पड़ी थी समाज में दूषित अर्थों में प्रयुक्त मद्यादि शब्दों के यहाँ प्रयोग करने की ? जो लोक में या भोगी-संसार में प्रयुक्त होते हैं, उनको योग के पावनतम क्षेत्र में लाकर शास्त्रचिन्तन को भी दूषित कर दिया। ऐसे योगियों से तो वे भोगी ही श्रेष्ठ हैं, जिन्होंने योग के पवित्रतम यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधि शब्दों को खींचकर भोग के आधार पर अन्यथा नामकरण नहीं किये। परन्तु इन महात्मा योगी आदि नामधारकों ने शब्दों के साथ बलात्कार और व्यभिचार किया है, उनका यह अक्षम्य अपराध है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इह— 'ककारे कुत्सिताचारः, रेफे रागपरायणः ।
पकारे पापवान् प्रोक्तः, त्रेण त्रासप्रदायकः ।।' इति ।

तस्माद् विरमतु अनर्थजगड्डवालकल्पनया । कथङ्कारमादर्तव्या द्राविडप्राणायाम-प्रणाली अनार्षा, यदा योगप्रभृतिदर्शनैः सरल एव मोक्षस्य राजपथः प्रदर्शितः । एवं महानिर्वाण-तन्त्र-जालग्रन्थप्रपञ्चो व्यर्थ एव । तस्माद् आगमसारनाम्ना निःसारः, मेरुतन्त्रादिप्रोक्ता मद्यमांस-मैथुनादिशब्दानां कल्पिताः परिभाषाः सर्वथा परित्याज्याः, सत्यशास्त्रेषु सरलसरणेरुपलम्भात् ।

कौतूहलमुपशमयितुमनेनोद्धृतानि श्लोकानि पश्यन्तु भवन्तः, कीदृशाः श्लोकाः शास्त्रतत्त्वमजानद्भिर्विरचिताः । यथा मैथुनपरिभाषा—

"कूलं कुण्डलिनीशक्तिर्देहिनां देहधारिणी ।
तयोः शिवस्य संयोगो मैथुनं परिकीर्तितम् ।।

सहस्रारोपरि बिन्दौ कुण्डल्या मैथुनं शिवे ।
मैथुनं शयनं दिव्यं यतीनां परिकीर्तितम् ।।

मनुष्य करपात्र जी के दर्शन करने पर नरक को जाता है । यह गूढार्थक 'करपात्र' शब्द इस प्रकार है—'क' से कुत्सित आचार, 'र' से राग में आसक्त, 'पा' से पापवान् और 'त्र' से त्रास देनेवाला है ।

इसलिये श्रीमन् ! इस पाशविक खुरापात से और अनर्थक जगड्वाल से विराम ले लीजिये । यह अनार्ष द्राविड प्राणायाम-प्रणाली क्यों अपनायी जावे ? जबकि योग प्रभृति दर्शनों के द्वारा मोक्षदायक सरल और सीधा राजपथ दिखाया गया है । इस प्रकार महानिर्वाणतन्त्रादि जालग्रन्थों का प्रपञ्च व्यर्थ ही है । अतः 'आगमसार' नाम से निःसार, मेरुतन्त्रादिप्रोक्त मद्य-मांसादि शब्दों की कल्पित परिभाषाएँ सर्वथा परित्याज्य हैं; क्योंकि सत्यशास्त्रों का सुगम सरल मार्ग उपलब्ध है ।

अपने सहज कौतूहल का उपशमन करने के लिये इन्होंने श्लोक उद्धृत किये हैं, उन्हें आप देखिये कि शास्त्रतत्त्ववञ्चित लोगों ने कैसे श्लोक बनाये हैं । जैसे मैथुन की परिभाषा—

"कुल का अर्थ कुण्डलिनी शक्ति है, जो कि सभी प्राणियों के शरीर को धारण करनेवाली है । इस कुल नामक कुण्डलिनी के साथ अकुल शिव का संयोग होता है, जो मैथुन कहा जाता है ॥

सहस्रदल कमल में स्थित बिन्दुस्थान में कुण्डलिनी शक्ति का शिव के साथ समागम ही मैथुन कहा जाता है । यह मैथुन एक प्रकार की योगियों के शयन की स्थिति है ।।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वीर्यपातस्य समये सुषुम्णासन्नमारुते।
उत्पद्यते च यत् सौख्यं शतकोटिगुणं तु तत्॥

एतदेव रतं प्रोक्तमन्यत् स्याद् रासभं रतम्।
गङ्गायमुनयोर्मध्ये बालरण्डां तपस्विनीम्।
बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम्॥

तत्स्वरूपं च तत्रैवोक्तम्—

इडा भागीरथी गङ्गा पिङ्गला यमुना नदी।
तयोर्मध्यगता रण्डा सुषुम्नैव सरस्वती॥"

अत्राऽहं पृच्छामि काऽवश्यकताऽऽसीत् समाजे दूषितार्थशब्दानां मद्यादीनामेव प्रयोगस्य ? ये लोके भोगिसंसारे प्रयुज्यन्ते तानङ्गीकृत्य योगशास्त्रे शास्त्रचिन्तनमपि दूषितम्। एतद्योग्यपेक्षया तु भोगिन एव श्रेष्ठाः, यैर्यौगिका यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाध्यादयः शब्दा न भोगक्षेत्रे प्रयोजिताः, परमेतैर्महात्मयोगिनामधारिभिः शब्दैः सहैव व्यभिचरितमित्यक्षम्योऽपराधः।

वीर्य का पात होते समय सुषुम्णा नाड़ी में स्थित पवन में जिस सुख की अनुभूति होती है, उसके करोड़ोंगुना आनन्द की अनुभूति जिस योगदशा में होती है, वही वास्तविक रत्यवस्था है। इसके अतिरिक्त सब गधारति ही कही जायेगी।

गङ्गा और यमुना के मध्य में स्थित तपस्विनी बाल विधवा को बलपूर्वक पकड़ना चाहिये। वास्तव में विष्णु का परम पद वही है॥

इस श्लोक के कुछ पदों का निगूढ अर्थ वहीं पर स्पष्ट किया गया है—

इडा नाड़ी ही यहाँ भागीरथी गङ्गा है और पिङ्गला नाड़ी यमुना है। इन दोनों के बीच में स्थित सुषुम्णा नाड़ी रण्डा व सरस्वती के नाम से प्रसिद्ध है।" इति।

यहाँ पर आप बताइये कि क्या आवश्यकता पड़ी थी समाज में दूषित अर्थों में प्रयुक्त मद्यादि शब्दों के यहाँ प्रयोग करने की ? जो लोक में या भोगी-संसार में प्रयुक्त होते हैं, उनको योग के पावनतम क्षेत्र में लाकर शास्त्रचिन्तन को भी दूषित कर दिया। ऐसे योगियों से तो वे भोगी ही श्रेष्ठ हैं, जिन्होंने योग के पवित्रतम यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधि शब्दों को खींचकर भोग के आधार पर अन्यथा नामकरण नहीं किये। परन्तु इन महात्मा योगी आदि नामधारकों ने शब्दों के साथ बलात्कार और व्यभिचार किया है, उनका यह अक्षम्य अपराध है।

©Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कावश्यकता पूर्वं भोजनं दूषितार्थैः शब्दैरभिदध्यात् तदनु च सद्व्याख्यानं कुर्यात्। यथा—

'पुरीषं भुक्त्वा प्रातः पीत्वा मूत्रोदकं तथा।
पथिकश्चादिनं तावद् अनश्नन् शक्तिमान् भवेत्॥'

साम्प्रतं विशिष्टार्थं बोधयेत्—

'संयावस्तु पुरीषं स्यान्निम्बूकं मूत्रमुच्यते।'

अतः—'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्।'

इत्येवानुसर्तव्यमिति।

पृ० १५६९, पं० ५—'पिता दुहितुर्गर्भमाधात्' (ऋ० १। १६४। ३३), 'जार आ भगम्' (अथर्व० १०। ११। ८), 'वीर्यं मयि धेहि। वृषा वाजी रेतोधा रेतो दधातु' (वाज० २३। २०), 'सुयभ्या कन्या कल्याणी' (अथर्व० २०। १२८। १), 'यदा स्थूलेन पयसाऽणौ मुष्कौ उपावधीत्' (अथर्व० २०। १३६। २) एषु वेदस्थलेष्वयं शिश्नदेवः सर्वत्राश्लीलत्वमेव पश्यति। यदा च न क्वाऽप्यश्लीलता। तदिह प्रस्तूयते संक्षेपेण—

क्या आवश्यकता है कि पहले भोजन को दूषित शब्दों से कहा जाये, फिर उनका सद्व्याख्यान किया जाये। जैसे मेरा यह श्लोक ऐसा ही गढ़ा गया है—

प्रथम विष्ठा को खाकर फिर बार-बार मूत्र पीकर यात्री दिन भर अन्य कुछ न खाकर भी शक्तिसम्पन्न रहता है।

इसका निगूढार्थ यह है—निगूढ भाषा में पुरीष को संयाव (हलुवा) कहते हैं और निम्बूक को मूत्र कहते हैं। अब कहिये आप श्री करपात्रदेवजी! इसी निगूढार्थ को 'परोक्षप्रिया देवाः' की व्याख्या में रख रहे हैं? धन्य है, आपकी बुद्धि तो पक्षाघात (फालिस) से ग्रस्त है।

पृ० १५६९, पं० ५—"इसी तरह से मन्त्रभाग में भी ऊपर मूल में उद्धृत अनेक स्थलों में सभी जगह परोक्षवृत्ति के सहारे दूसरा निगूढ अभिप्राय स्वीकार करना पड़ता है। तलवार की धार पर चलने के समान तन्त्रशास्त्र के नामाचार का यह उपदेश जितेन्द्रिय व्यक्ति के लिये ही लाभदायक हो सकता है।" यहाँ करपात्र द्वारा वेद के सन्दर्भित स्थलों में यह शिव शिश्नदेव सर्वत्र अश्लीलता ही देखता है। जब कि यहाँ अश्लीलता है ही नहीं। देखिये, इस विषय को हम संक्षेप में प्रस्तुत करेंगे—

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पितुर्दुहितरि गर्भाधानं लोकेऽश्लीलत्वमेव, परं वेदभाष्ये एतद्वर्णने व्यञ्जना अस्ति यत् पिता सूर्यो जड उषसि जडायां गर्भाधानेन जडमेव दिनपुत्रमुत्पादयते। दुहितरि स्वसरि वा जरयिताऽदित्योऽपि तथाऽऽचरति एव जडाचरणं चेतने नादर्तव्यम्। एतद्व्यञ्जनायाः कृतेऽवकाशोऽयं लक्षणाया वा शिक्षणमिह, यद् यः पिता भवति नासौ जनिता जनयिता वा भवति। वेदे तु 'द्यौर्मे पिता जनिता नाभिरत्र' इत्यसङ्गतवर्णनेन ध्वन्यते यत् पुत्री स्वसा कदापि न भवितुमर्हति। इह वर्णनं तु अयथार्थस्वसुर्वर्णनेनालङ्कारिकं न वास्तवमिति।

अत्र पिता पर्जन्यो दुहिता पृथिवी गर्भो जलसमूहः। अतोऽत्रोक्तप्रकारेण चेतनैस्तथा करणोपदेश एव। वीर्यं हि नाम पराक्रमस्तमाधातुं प्रार्थयते भक्तः। अयमिहापि गर्भाधान-बीजमेवाकलयते।

वस्तुत इदं 'पित्रा दुहितरि गर्भाधानचर्चा' एकगूढव्यंग्यत्वेनोत्तमं काव्यम्। तथा

पिता का कन्या में गर्भाधान लोक में अश्लील ही होता है, परन्तु वेद में इस के वर्णन में व्यञ्जना है कि पिता सूर्य जड़ है, उषा जड़ में जड़ के द्वारा यदि गर्भाधान हुआ तो पुत्र (दिन) भी जड़ ही होगा। दूसरी व्यञ्जना यह है कि पुत्री या बहिन में यह कार्य जड़ ही कर सकता है; क्योंकि वह ज्ञानशून्य है। कोई ज्ञानवान् चेतन ऐसा नहीं करता और न उसे करना चाहिये। ऐसी व्यञ्जना और लक्षणाओं का प्रयोग वेद में शिक्षणार्थ ही होता है।

तीसरे यह भी समझना चाहिये कि पिता और जनिता दोनों पृथक् शब्द हैं। यौगिकार्थ में (रूढि में नहीं) पिता का अन्यार्थ पति भी है, पालनकर्ता होने से। इसी द्वितीयार्थ में पूर्वदोष की व्यावृत्ति हो जायेगी। वेद में 'द्यौर्मे पिता जनिता नाभिरत्र' इस असङ्गत या विरोधी वर्णन से ध्वनित होता है कि जो पुत्री है वह स्वसा नहीं हो सकती। वेद में वस्तुतः कोई सम्बन्ध निश्चित नहीं है; क्योंकि जो परमेश्वर पिता है, वही बन्धु, वही माता आदि बताया गया है। अतः यही निष्कर्ष निकला कि यह कोरा आलङ्कारिक वर्णन है, लोक जैसा कोई वास्तविक स्थिर सम्बन्ध ही नहीं।

कहीं पर पिता पर्जन्य है, दुहिता पृथिवी है, गर्भ जलरूप है; अथवा पिता पर्जन्य, माता पृथिवी भी वर्णित है। अतः उक्त प्रकार से चेतनों को वैसा करने (जहाँ उचित अलङ्कार घटित है) तथा न करने (जहाँ लोक से अलङ्कार का सामञ्जस्य नहीं) का उपदेश दिया है। 'वीर्य'का अर्थ पराक्रम भी होता है, उसके आधान के लिये भक्त प्रार्थना करता है। पुरुष प्रार्थना करता है तो वीर्य का अर्थ पराक्रम ही लगाना होगा। यह कोई पौराणिक संसार तो है नहीं, जिसमें सृष्टिक्रम के विरुद्ध भी पुरुषों में गर्भाधान हो जावे।

वस्तुतः 'पिता दुहितरि० 'इस मन्त्र में गर्भाधान की चर्चा में गूढ व्यङ्ग्यता के कारण उत्तम

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वयमृषिशब्दान् यथार्थान् मन्यमाना उपमेयं निगीर्णं मत्वा 'द्यौः' शब्दं सूर्यपरकं जानन्तो निरुक्तप्रक्रियया च गर्भशब्दं वर्णशः खण्डयित्वा 'ग' इति गमनम्, 'र' इति रमणम्, 'भ' इति भरणम्, कर्तारः किरण इत्यर्थं मन्यामहे, तदा शोभना रूपकालङ्कारस्य व्याख्या भवति। अश्लीलास्तावत् प्रतिपदमश्लीलतामेव वीक्षन्ते, इमे खलु अचिकित्स्या एव।

'वृषा वाजी०' इति मन्त्रस्य महर्षिदयानन्दकृतोऽर्थो ग्राह्यो यश्च वास्तविको यत् "प्रजाराजानौ धर्मार्थकाममोक्षान् प्राप्तव्यान् प्राप्नुयाथाम्, एवमेवावाम् अध्यापकोपदेशकौ धर्मादीन् विस्तारयाव लोके।" इत्यादि, नात्राश्लीलतादुर्गन्धः। परमेष वाममार्गिमहीधरानुचरस्तु राज्ञ्या सह वाजिनोऽश्लीलार्थमेव विधास्यति। नैवंविधमितिवृत्तमुपलभ्यते।

'सुयभ्या कन्या कल्याणी' इत्यनेनाऽपि कन्याया विवाहकर्म समर्थायामेव कार्यमित्युपदिश्यते, न तु बालविवाहः करणीय इति।

'यदा स्थूलेन०' इत्यस्याप्यर्थो यद् 'यदा स्थूलेन राज्यप्रबन्धकेन सह अणौ अर्थात् सूक्ष्मन्यायमध्ये मुष्कौ अर्थात् चौरौ (स्त्रीपुरुषौ) राजा मारयति' इति।

काव्यत्व है। उसी रूप में हम भी ऋषि के शब्दों को यथार्थ मानते हुए और यहाँ उपमेय को निगीर्ण मानकर तथा 'द्यौः' शब्द को सूर्यवाचक समझकर निरुक्तप्रक्रिया के द्वारा 'गर्भ' शब्द के वर्णशः खण्ड करके 'ग' का अर्थ 'गमन', 'र' का अर्थ रमण तथा 'भ' का अर्थ 'भरण करनेवाली सूर्य की किरणें' यह अर्थ मानते हैं। तब इस रूपकालङ्कार की श्रेष्ठ व्याख्या हो जाती है। अश्लीलप्रकृतिवाले जन तो प्रतिपद अश्लीलता के ही दर्शन करते हैं, उनकी यह मानसिकता दुश्चिकित्स्य है।

'वृषा वाजी०' इस मन्त्र का महर्षि दयानन्द द्वारा किया अर्थ ही ठीक है, वही ग्राह्य है। जो कि वास्तविक है कि—"प्रजा और राजा धर्मार्थ, काम, मोक्ष प्राप्तव्यों को प्राप्त करें, इसी प्रकार हम लोग अध्यापक और उपदेशक धर्मादिकों को संसार में फैलावें।" इत्यादि अर्थ में कहीं अश्लीलता नहीं। परन्तु यह वाममार्गी महीधर तो अश्वमेध में रानी की अश्लीलता का ही वर्णन करेगा। महीधर या करपात्री जी से पूछना चाहिये कि क्या कोई ऐतिहासिक उदाहरण आप प्रस्तुत कर सकेंगे कि किस राजा ने ऐसा अश्वमेध कराया था? तथा ऐसे अश्वमेध का कौन सा विद्वान् पुरोहित था?

'सुयभ्या कन्या कल्याणी' इस मन्त्र से भी 'कन्या का विवाह समर्थ होने पर ही करना चाहिये' यह उपदेश है, न कि बालविवाह का विधान।

'यदा स्थूलेन०' इस का भी अर्थ यह है कि 'जब राज्यप्रबन्ध के साथ सूक्ष्म न्याय के मध्य में चौर स्त्री-पुरुष राजा के द्वारा मारे जाते हैं।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५६९, पं० ९—यदाह—

"परद्रव्येषु योऽन्धश्च परस्त्रीषु नपुंसकः।
परापवादे यो मूकः सर्वदा विजितेन्द्रियः॥
तस्यैव ब्राह्मणस्यात्र वामे स्यादधिकारिता॥"

इदमपि बुद्धिबाह्यत्वादग्राह्यम्। यतोऽयमृषिदयानन्दस्यापवादं कुर्वाणोऽस्ति। योगादि-शास्त्राणां तूपेक्षा कृता तान्त्रिकैः, यमादिभिर्विजितेन्द्रियत्वं स्यात् तानि निरादृतानि, तदभावे कदापि वाममार्गस्य सर्वथाऽदीक्षैव। वस्तुतस्तु उक्ततन्त्रग्रन्थैरिन्द्रियाराधनैव प्रारम्भतो मै-थुनादिशब्दैः शिक्ष्यते।

एतस्य मतिस्तु अद्भुतालये न्यसनीया, या 'विहरेत्, विवहेत्' इत्यनयोरन्तरं न विचिनोति, येनायं वक्ति—'मातृयोनिं परित्यज्य विहरेत् सर्वयोनिषु' इति। 'मातृवंशीयां कन्यां परित्यज्यान्याभिः सर्वाभिः सार्धमेव विवाहः कर्तव्यः' किमियं व्याख्या वाममार्गतन्त्रप्रणेतुर-नुमत्या कृता? वस्तुतो नैव। शिष्टं सुधीभिरेतस्यानर्गलमेवोन्नेयम्।

पृ० १५६९, पं० ९—"दूसरे के धन के प्रति जिसकी दृष्टि अन्धी है, पर स्त्री में जो नपुंसक के समान है, दूसरे की निन्दा करने में जिसकी वाणी चुप रहती है, ऐसा इन्द्रियजयी ब्राह्मण ही वाममार्ग का अधिकारी हो सकता है।"

यह भी बुद्धिबाह्य होने से त्याज्य है; क्योंकि यह वेदप्रचारक ऋषि दयानन्द का अपवाद कर रहा है। तान्त्रिकों ने योगादि शास्त्रों की तो उपेक्षा व निन्दा की है, परन्तु विजितेन्द्रियत्व तो योगप्रतिपादित यम, नियम, प्राणायाम आदि के द्वारा होता है। जब उन शास्त्रों का निरादर कर दिया तो जितेन्द्रियता किस शिक्षा से होगी? जितेन्द्रियता के अभाव में ब्राह्मण वाममार्ग में दीक्षित भी नहीं हो सकेगा। यदि कहो कि वाममार्ग से जितेन्द्रियता आ जायेगी, तो कदापि सम्भव नहीं; क्योंकि सांसारिक मनुष्य के सामने सर्वप्रथम सांसारिक आकर्षण मद्य, मांस, मैथुन आदि शब्द ही तो आवेंगे, तब उसमें भोगों के प्रति आसक्ति बढ़ना स्वाभाविक होगी।

करपात्रीजी की बुद्धि तो अद्भुतालय में ही रखने योग्य थी, जो कि 'मातृयोनिं परित्यज्य विहरेत् सर्वयोनिषु' यहाँ पर 'विहरेत्' और 'विवहेत्' में अन्तर नहीं समझ रही है। 'माता के वंश की कन्या को छोड़कर अन्य कन्याओं के साथ विवाह करना चाहिये' वह व्याख्या पारिजातकार ने की है? मैं पूछता हूँ कि क्या आपने वाममार्गियों से पूछकर यह व्याख्या की है? जब कि जयपुर के निकटवर्ती स्थानों में आज भी भैरवी चक्र का व्यभिचार चलता है। अस्तु, पर यहाँ सगोत्र कन्या के निषेध का तो कोई आधार वाममार्ग में आपको नहीं मिलेगा, तो क्या आपकी मति से विवाह कर ले? इनकी शेष बकवास का भी उक्त से समाधान हो जायेगा।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यद्यसम्भवा तव व्याख्या गृह्येत तदा तत्र 'जपेन् मन्त्रमतन्द्रितः' इत्यस्य का व्याख्या करणीया त्वया मन्त्रश्चाप्युदाहार्यः । नैवंविधं व्याख्यानं तव पूर्वजेन पौराणिकेन विदुषा कृतम्, मूर्खत्वाध्यारोपसम्भाव्यमानत्वात् । परं तदपि नामैतेनोपेक्षितं दुःसाहसेन ।

वस्तुतोऽयं वाममार्गादिदुर्मतानां कालो भारतवर्षस्यातितरां महापतनकाल आसीत् । परमयं तमेव कालं पुनरावाहयितुं बद्धपरिकरः । 'इमं ते०' मन्त्रमपि आर्यसामाजिकस्त्रीणां विषये मृषैवारोपयते कौटिल्येन ।

पृ० १५७१, पं० १—यदुच्यते—"यत्तु प्रकाशः पिता जनिता सर्वव्यवहाराणामुत्पादकः' इति, तन्न सङ्गतम्, अत्र नाभिरित्यस्यासङ्गतेः । इयं पृथिवी माता मानकर्त्रीत्यपि न सङ्गतम्, मानार्थतायाः प्रकृतेऽनपेक्षणात् । यदुक्तम्—'द्वयोश्चम्वोः पर्जन्यपृथिव्योः सेनावदुत्तानयोः उत्तानस्थितयोः' इति, तदप्यसङ्गतम्, सेनयोर्गर्भाधानेऽनुदाहरणात्" इति सकलं तथ्योक्ति-विकलम्, सूक्ष्मबुद्धिपरिधिबहिर्गतावाप्तेः ।

इह तु प्रासङ्गिकमात्रं दर्शितम्, भाष्यं तु ऋग्वेद एव कृतमृषिणा । तत्र नाभिशब्दार्थो

'जपेन् मन्त्रमतन्द्रितः' की क्या व्याख्या होगी ? तुम्हें इस जपनीय मन्त्र का उदाहरण भी देना चाहिये । इन वाममार्गियों का पक्ष लेकर इनके किसी पूर्वज पौराणिक ने ऐसी व्याख्या नहीं की; क्योंकि वे समझते थे कि लोक मे उन्हें मूढ समझा जायेगा । परन्तु आपने तो उसकी भी उपेक्षा कर दुःसाहस किया है ।

वास्तव में वाममार्ग आदि दुष्ट मतों के फैलने का समय भारत के महापतन का ही काल था, परन्तु इन्होंने उसी काल के पुनः आवाहन करने में कमर कस ली है । 'इमं ते०' मन्त्र को भी आर्यसामाजिक स्त्रियों के विषय में निराधार आरोपित कर रहे हैं, यह इनकी कुटिलता है ।

पृ० १५७१, पं० १—"द्यौ' जो सूर्य का प्रकाश है, वह सभी लौकिक व्यवहारों का कारण होने से मेरे पिता के समान है' यह अर्थ सङ्गत नहीं; क्योंकि इसमें 'नाभि' पद की सङ्गति नहीं बैठती । 'पृथिवी माता सम्मान करनेवाली है' यह अर्थ भी सही नहीं है; क्योंकि प्रकृत स्थल में सम्मान का कोई प्रसङ्ग नही है । 'आमने-सामने दो सेनाएँ होती हैं, उसी प्रकार सूर्य और पृथिवी अर्थात् ऊपर की चाँदनी के समान सूर्य और नीचे के बिछौने के समान पृथिवी है' यह अर्थ भी सही नहीं है; क्योंकि दो सेनाओं को गर्भाधान के उदाहरण के रूप में कहीं नहीं दिखाया गया है ।" यह सारा कथन तथ्योक्ति से रहित है, सूक्ष्म बुद्धि की परिधि से बहिर्गत प्राप्त होने से ।

यहाँ तो प्रासङ्गिकमात्र दिखाया है । इस मन्त्र का भाष्य तो ऋषि ने ऋग्वेद में ही किया है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नह्यन्ते बध्यन्तेऽनयेति नाभिः । तस्माद् यथाप्रसङ्गं बन्धनार्थे प्राणः शरीरमध्यभागः, "नाभ्या सन्नद्धा गर्भा जायन्ते इत्याहुः । एतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते" (निरु० ४ । २१) ।

मन्त्रस्य बह्वर्थकत्वादिहाऽपि 'द्यौः' सूर्यप्रकाशः, 'पिता' पालयिता जनयिता चाऽपि 'पृथ्वी' च जीवानां माता मानकर्त्री अर्थाद् मापनकर्त्री अपि पुत्रस्य भवति गर्भे दशमासान् यावत् संस्कारभोजनाभ्यां निर्माणकर्तृत्वात्। इह जीवानां नाभिः प्राणस्तेनैव कर्मकरणक्षमत्वात्। श्लिष्टार्थत्वेन चम्वोः सेनयोरप्यर्थवत्त्वात् रूपकालङ्कारस्याऽपि सम्भवादनेकार्थत्वे काव्यस्योत्तमाभिव्यञ्जनाद् महर्षिकृतार्थस्यैव सर्वथा सङ्गतत्वात् समीचीनता। जिज्ञासुभिर्भाष्यं समालोचनीयमधिकम्।

पृ० १५७१, पं० १५—"अयमपि मन्त्रोऽस्यैवालङ्कारस्य विधायकोऽस्ति। वह्निशब्देन सूर्यो दुहिताऽस्य पूर्वोक्तैव स पिता स्वस्या उषसो दुहितुः सेकं किरणाख्यवीर्यस्य स्थापनेन गर्भाधानं कृत्वा दिवसं पुत्रमजनयत्' इति, तत्तु सर्वथा वेदार्थानभिज्ञानमूलकम्, पदवाक्यार्था-

---

वहाँ पर 'नाभि' शब्द का अर्थ भी है, अर्थात् जिसके द्वारा शरीर के नाडीजाल का बन्धन हो, उसे नाभि कहते हैं। अतः यथाप्रसङ्ग बन्धनार्थ में शरीरमध्यगत प्राण लिये गये हैं। "नाभि से सन्नद्ध गर्भ होते हैं, ऐसा कहते हैं। इसी से कुटुम्बियों को 'सनाभि' कहते हैं" (निरु० ४ । २१)।

मन्त्र के बह्वर्थक होने से यहाँ भी द्यौ का अर्थ सूर्यप्रकाश, पिता का अर्थ पालक और उत्पन्न करनेवाला, यह पृथिवी जीवों की मानकर्त्री अर्थात् मापन करनेवाली भी है। जैसे माँ गर्भ में दश मासों तक पुत्र का संस्कार और विविध भोजनों द्वारा उसके अङ्गों का यथायथ वाञ्छित मापन करती है, निर्माण करती है। यहाँ पर जीवों की नाभि अर्थात् प्राणों के द्वारा ही कर्म करने की क्षमता प्राप्त होती है, अतः समस्त क्रियाएँ नाभि में ही बद्ध होती हैं। श्लिष्ट अर्थ के द्वारा 'चम्वोः' का दोनों सेनाओं का भी अर्थ होने से रूपित के आरोप करने पर रूपकालङ्कार भी सम्भव है तथा अनेकार्थत्व में काव्य के उत्तमार्थ का व्यञ्जन करने के कारण महर्षिकृत अर्थ के सर्वथा सङ्गत होने से समीचीनता है। अधिक जिज्ञासुओं को भाष्य देखना अभीष्ट है।

पृ० १५७१, पं० १५—"स्वामी दयानन्द ने यहाँ कहा है—'सबका वहन अर्थात् प्राप्ति करनेवाले परमेश्वर ने मनुष्यों की ज्ञानवृद्धि के लिये रूपकालङ्कार कथाओं का उपदेश किया है, वही जल का धारण करनेवाला है, जगत् में पुत्र-पौत्र आदि का पालन और उपदेश करता है। जिस सुखस्वरूप व्यवहार में स्थित होकर पिता (सूर्य) दुहिता (उषा) में वीर्य स्थापित करता है, जैसा पूर्व लिख आये हैं, उसी प्रकार यहाँ भी जान लेना।' ये सारी बातें वेदों के अर्थ को ठीक तरह से न समझ पाने के कारण हैं; क्योंकि इसमें मन्त्रगत पदों का वाक्य से ठीक सम्बन्ध नहीं बैठता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सम्बन्धात्।" इति कथनं रूढिग्रस्तमतेरस्य कूपमण्डूकवृत्तिमण्डितत्वाद् उत्कृष्टतमवेदकाव्यस्य रसालङ्कारव्यङ्ग्यार्थस्य परिशीलनानर्हत्वाद् अज्ञानमेव।

निरुक्ते एतदुल्लिखितं यद् 'अथैनां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके।' अत्र विकल्पप्रस्तुतेरन्यत्राऽप्यर्थसम्भावनाया अनिषेध एव। अतो महर्षिणाधिदैविकोऽप्यर्थः प्रकटीकृतः। यथा पिता उत्पादयति पतिर्वा पत्न्यां सन्ततिं कन्यामुत्पादयति, तथा सूर्यः प्रभातवेलायामुषसि दिवसमुत्पादयति। अत्र रूपकालङ्कारो दृष्टान्तालङ्कारो वाऽपि प्रकाश्यते। अस्यामृचि 'वह्निः, दुहितः, सेकम्' इत्यादयः शब्दाः श्लिष्टार्थवाचकाः।

एवं वह्निरित्यस्य विद्युदादि, ज्ञानवोढा, मरुद्, विद्वान्, अपत्यादयोऽर्थाः, दुहितुरित्यस्य कन्याः, किरणाः, उष आदयोऽर्था दोग्धृत्वाद् यथायथं योजनीयाः। निरुक्तेन तु यौगिकत्वे धातुजत्वान्निर्वचनस्य सरणिर्दर्शिता, न तु इयत्तार्थावधारणं विहितम्।

वस्तुतो वेदः सर्वश्रेष्ठकाव्यमस्ति, तच्च ध्वन्यात्मकं भवति, श्रोतॄणां रसास्वाद्यत्वात्। यथा कबीरस्य 'पुत्र विहाइल माता' जीवप्रकृत्योः सङ्गमं दर्शयति।

ऊपर उद्धृत निरुक्तवाक्य से सायण द्वारा किये गये अर्थ को ही समर्थन मिलता है।"

पारिजातकार का उक्त कथन कूपवृत्तिमण्डूक होने से रूढिग्रस्त है, काव्यगत रस, अलङ्कार और व्यङ्ग्यार्थों के परिशीलन में अयोग्य होने के कारण अज्ञानमात्र है। निरुक्त में यह लिखा है कि 'इस ऋचा को पुत्री के दायाद्य में उदाहृत करते हैं और कोई पुत्र के दायाद्य में।' यहाँ पर विकल्प प्रस्तुत करने से अन्यत्र अर्थ की सम्भावना का निषेध नहीं, अपितु विधान ध्वनित है। अतः महर्षि ने आधिदैविक अर्थ भी प्रकट कर दिया। जैसे पिता उत्पन्न करता है या पति पत्नी में पुत्र या कन्या को उत्पन्न करता है, उसी प्रकार सूर्य प्रभातवेला में उषा में दिवसरूप पुत्र को उत्पन्न करता है। यहाँ पर रूपकालङ्कार वा दृष्टान्तालङ्कार प्रकाशित है। इस ऋचा में 'वह्निः, दुहितः, सेकम्' इत्यादि शब्द श्लिष्टार्थक हैं।

इसी प्रकार 'वह्नि' इसका विद्युदादि, ज्ञानवोढा, मरुत्, विद्वान् आदि अर्थ हैं, 'दुहितृ' इसके भी कन्या, किरण, उषा आदि अर्थ 'दुह्' धातु से निष्पन्न व यौगिक होने से ठीक-ठीक लगा लेने चाहिये। निरुक्त ने तो धातुज होने से यौगिक निर्वचन का मार्ग दिखाया है, अर्थ में इयत्ता का अवधारण नहीं किया है।

वास्तव में वेद एक सर्वोत्तम काव्य है। सर्वोत्तम काव्य ध्वन्यात्मक होता है, इसी से श्रोता या पाठकों का रसास्वादन होता है। वेद में योग के रहस्य भी वर्णित हैं। कबीर के 'पुत्र विहाइल माता' का संकेत इसी वैदिक अंश की ओर है अर्थात् जीवात्मा पुत्र ने प्रकृति माता से विवाह कर लिया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वस्तुतस्तु सूर्यकिरणानां प्रतिरूपकावुषादिवसौ, न पृथगिमौ जीवात्मानौ। यत्रापीदृक् सम्बन्धस्तत्र वैधता जडत्वात्। परं पितृकन्यापुत्रभगिनीपतिपत्न्यादिषु तु भिन्ना आत्मानः सन्ति।

पृ० १५७२, पं० ५—यदाह—"पुराणप्रतिपादितायाः कथाया अप्यलङ्काराभिप्रायत्वेऽप्रामाण्यासम्भवात्।" सत्यं चमत्कार एव स यः शिर आरुह्य घोषयेत्। पृच्छामि किमयं प्रभावो नास्ति महर्षेर्भाष्यलेखनस्य ? किं कदापि महर्षेः प्रागपि पौराणिककथानामवास्तविकतां मत्वाऽलङ्काराऽभिप्रायत्वमङ्गीचकार भवादृशः पौराणिकः ? धन्यवादार्होऽसि यत्त्वं कथानां पुराणप्रतिपादितरूपेऽसत्यतां घोषयसे। अस्माकं महर्षेस्त्वभीप्सितमासीदिदमेव। साम्प्रतं वेदे इतिहासाऽभाव एवासेत्सीत्।

पं० ९—यच्चाह—"प्रजापतिर्वै स्वाम्' इत्यारभ्योक्तम्, तदपि तुच्छम्, विकल्पानुपपत्तेः। तथा हि सविता सूर्यो वा सूर्यलोको वा ?" इति तु अल्पज्ञत्वादेव। सवितेति शब्दः शतपथादिषु सूर्यवाचकः। य एव सूर्यः स सूर्यलोकः, सूर्यसाम्राज्यपरिधेर्बहिस्तल्लोकस्याभाव्यत्वात्। प्राक् प्रत्यपादि सूर्यादीनां पृथक्चेतनाधिष्ठातृविषये यन्नाऽस्ति अधिष्ठातृदेवता परमेश्वरादन्य-

---

वास्तव में तो सूर्य की किरणों का रूपान्तर उषा और दिवस है, पृथक् कोई आत्मा (जीव) नहीं है। जहाँ पर भी ऐसा हो वहाँ सम्बन्ध वैध है, पर पिता, बहिन, कन्या, पुत्र, पति पत्नी आदि सभी में भिन्न आत्माएँ हैं।

पृ० १५७२—पं० ५—"ब्रह्मवैवर्त आदि पुराणों की कथा का मिथ्यात्व न मानकर उसके भी आलङ्कारिक न होने में प्रमाण का अभाव है।" ठीक कहा आपने; क्योंकि वह चमत्कार या जादू ही क्या, जो सिर पर चढ़कर न बोले। बताइये, पुराण की कथाओं में अब अलङ्कार ऋषि के लेख के बाद ढूँढकर लाने में क्या महर्षि का चमत्कार नहीं है ? क्या आप जैसे किसी ने कभी महर्षि के जन्म से पूर्व पुराणों की कथाओं की अवास्तविकता घोषित करके अलङ्कार के अभिप्राय को स्वीकृत किया है ? आपको धन्यवाद है जो आप केवल अलङ्कार मानकर कथाओं की ऐतिहासिक अवास्तविकता को घोषित कर रहे हैं। इससे वेदों में तो इतिहास का अभाव ही सिद्ध हो गया।

पं० ९—"प्रजापतिर्वै०' इस मन्त्र की व्याख्या करते हुए जो कुछ आपने (दयानन्द ने) लिखा है, वह भी असङ्गत है; क्योंकि आपके पास इस विकल्प का कोई उत्तर नहीं है कि सविता का अर्थ सूर्य है या सूर्यलोक ?" यह पारिजातकार का लेख अल्पज्ञताप्रसूत है। सविता शब्द शतपथादि में सूर्यवाचक है, जो सूर्य है वही तात्स्थ्य होने से सूर्यलोक है। सूर्य के साम्राज्य की परिधि से बाहर सूर्यलोक की सम्भावना का अभाव है। सूर्य आदि की पृथक् चेतना के अधिष्ठातृ-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्तेषामचेतनानां देवानाम्। यथा भूलोको न भुवः पृथक्, अन्तरिक्षलोको नान्तरिक्षात् पृथक्, न वा द्युलोको दिवः पृथगस्ति।

पं० १४—"किञ्च, 'तस्य सवितुर्दुहिता कन्यावद् द्यौरुषा चास्ति' इति यदुक्तम्, तदपि न क्षोदक्षमम्, दुहितृपदस्य कन्यावदित्यर्थत्वे मानाऽभावात्, शक्यार्थत्वसम्भवे लक्ष्यार्थताया अन्याय्यत्वात्। अत एव 'यस्माद् यदुत्पद्यते ततस्यापत्यवत् स तस्य पितृवत्' इत्युक्तिरसङ्गतैव, यस्माद् यदुत्पद्यते तत्र तन्निरूपितजन्यत्वस्यैव, यस्माच्चोत्पद्यते तत्र जनकत्वस्यैव च प्रसिद्धेः।"

इत्यपि पण्डितम्मन्यस्य स्थूलदृष्टेरस्यानर्गलमेव, साहित्यशास्त्रस्य तत्त्वानवगाहनात्। 'प्रजापतिर्वै स्वाम्' इत्यत्र प्रजापतिः सूर्यः पिता दुहिता हि उषा, परं लोके पितृदुहितृव्यवहारो दृश्यते प्रकृत्यां यदा तद्व्यवहारस्यारोपः क्रियते तदा पितृवद् दुहितृवदित्येव वर्ण्यते। तथा चोक्तं रूपकालङ्कारलक्षणं साहित्यदर्पणे—

'रूपकं रूपितारोपाद् विषये निरपह्नवे' अर्थाद् निषेधरहितविषये उपमेयेऽपह्नवभेदोप-

---

देव के विषय में पूर्व ही पर्याप्त कहा जा चुका है कि उन अचेतनों का परमेश्वर के अतिरिक्त अन्य कोई चेतन अधिष्ठातृदेव नहीं है, ईश्वर ही है। जैसे भूलोक भूपरिधि से पृथक् नहीं, अन्तरिक्षलोक अन्तरिक्ष की परिधि से पृथक् नहीं, उसी प्रकार समझना चाहिये।

पं० १४—"उस सविता प्रजापति सूर्य की प्रकाश और उषा ये दो कन्याओं की तरह हैं" दयानन्द का यह कथन भी परीक्षा में खरा नहीं उतरता; क्योंकि दुहिता पद का अर्थ 'कन्या की तरह' कभी नहीं हो सकता। जब कि किसी पद का मुख्य अर्थ जब हो सकता है, तो बिना किसी अभिप्राय के लक्षण करना ठीक नहीं माना जाता। इसीलिये 'जो जिससे उत्पन्न होता है, वह उसकी सन्तान की तरह होता है' यह व्याख्या भी असङ्गत है; क्योंकि जो जिससे उत्पन्न होता है, वह उससे जन्य और उसको उत्पन्न करनेवाला जनक के रूप में प्रसिद्ध ही है।"

यह पारिजातकार का समस्त लेख साहित्यशास्त्र के मर्म को न समझने के कारण है। 'प्रजापतिर्वै स्वाम्' यहाँ पर प्रजापति सूर्य पिता और उषा दुहिता है, परन्तु लोक में इस प्रकार देखे गये व्यवहार का आरोप प्रकृति में किया गया, उसी व्यवहार से पितृवत् व दुहितृवत् कहा गया। वस्तुतस्तु दुहिता नहीं है, यह भी ध्वनित होता है। यह कल्पित है, झूठमूठ का है। इस तरह लोक में वस्तुतः बहिन नहीं है और कल्पित या व्यवहार में वैवाहिक आयुपर्यन्त मानी गयी है तो दोष नहीं होगा, यह भी ध्वनित है। रूपकालङ्कार का लक्षण साहित्यदर्पण में इस प्रकार है—

'निरपह्नव अर्थात् निषेधरहित विषय (उपमेय) में रूपित (अपह्नवभेद) उपमान के आरोप

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मानस्य आरोपो रूपकालङ्कारो भवति। रूपकादिषु साम्यस्य व्यङ्ग्यत्वं भवति न वाच्यत्वम्। आदिशब्देनाऽत्र दीपकतुल्ययोगितादयोऽलङ्कारा ग्राह्याः। व्यतिरेकालङ्कारे तु वैधर्म्यमपि वाच्यं भवति। यत्र च भेदरहितोपमानस्योपमेये आरोपो भवेत् परन्तूपमेयस्य स्वरूपस्य निषेधकः कश्चित् शब्दो न स्यात् तत्र रूपकम्। अतोऽत्र रूपकालङ्कारः। अत्रादित्यस्य पितृत्वमुषसो दुहितृत्वं रेतस्त्वं किरणस्य दिवसस्य च पुत्रत्वमिति साङ्गरूपकम्।

नैवं चापि वक्तव्यं यथा वेददोषा निराकृतास्तथैव च तन्त्राश्लीलताऽपि निराकार्या, गोसेवामपहाय शूकरीसेव्यत्वस्यानौचित्यात् श्रमस्य नैष्फल्याच्च।

'मुख्यार्थत्वसम्भवे लक्ष्यार्थताया अन्याय्यत्वात्' इत्युक्तिरपि साहित्यशास्त्रानभिज्ञान-द्योतिका, एकस्यार्थभेदसम्भवात्। यथा वैदिकसाहित्यसौदामन्यामप्रतिमप्रतिभः श्रीवागीश्वर-विद्यालङ्कार आह—

सोऽर्थो वाच्यस्तथा लक्ष्यो व्यङ्ग्यश्चेति त्रिधामतः।
गङ्गानीरं च तत्तीरं शैत्योत्कर्षादयो यथा॥

एकस्यैव गङ्गापदस्य वाच्योऽर्थस्तज्जलरूपः, लक्ष्यस्तत्तीररूपो व्यङ्ग्यं च तदीयं

को रूपकालङ्कार कहते हैं। जहाँ भेदरहित उपमान का उपमेय में आरोप हो, परन्तु उपमेय के स्वरूप का निषेधक कोई शब्द न हो। रूपकादि में साम्य व्यङ्ग्य होता है, वाच्य नहीं। आदि शब्द से दीपक, तुल्ययोगिता आदि अलङ्कार ग्राह्य हैं। व्यतिरेक अलङ्कार में तो वैधर्म्य भी वाच्य होता है। जहाँ पर भेदरहित उपमान का उपमेय में आरोप हो, परन्तु उपमेय के स्वरूप का निषेधक कोई शब्द न हो, वहाँ रूपक होता है। इसलिये यहाँ रूपकालङ्कार है। यहाँ पर आदित्य का पितृत्व, उषा का दुहितृत्व, किरण का रेतस्त्व और दिवस का पुत्रत्व होने से साङ्गरूपक है।

यहाँ यह न कहिये कि जैसे आपने वेदों की अश्लीलता का समाधान कर दिया तो तन्त्रग्रन्थों की अश्लीलता का भी समाधान कर दीजिये। गौ की सेवा करना तो उचित है, पर शूकरी की सेवा क्यों की जावे; क्योंकि शूकरी में किया श्रम निष्फल है।

'मुख्यार्थ के होने पर लक्षणा नहीं करनी चाहिये' इसका भी तात्पर्य आप नहीं समझ सके। जब शब्द अनेकार्थक है, तो लक्ष्यार्थ मुख्यार्थ हो सकता है। इस विषय में अप्रतिम-प्रतिभ श्री वागीश्वर विद्यालङ्कार वैदिकसाहित्यसौदामनी में लिखते हैं—

अर्थ वाच्य, लक्ष्य और व्यङ्ग्य तीन प्रकार का है। जैसे गङ्गा नीर और तीर पदों से शीत की उत्कर्षता द्योतित होती है।

एक ही गङ्गा पद का वाच्यार्थ जलरूप, लक्ष्यार्थ तीररूप और व्यङ्ग्यार्थ शैत्य पावनत्वादि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शीतत्वपावनादिकं तदतिशयो वा। एकस्याऽपि पदस्यार्थभेदे व्यापारभेद एवाऽस्य हेतुः। तथाहि—

वक्तृबोद्धव्यशब्दानामभेदेऽप्यर्थभिन्नता ।
व्यापारापेक्षिणी नूनं न कार्यं कारणं विना ॥

तत्कारणं च शब्दस्य व्यापारा अभिधादयः।
वाच्यलक्ष्यत्वरूपादिभेदोऽर्थे तन्निमित्तकः ॥

एवं सम्भाविन्या लक्ष्यार्थताया नान्याय्यत्वम्। अत उपरिप्रदर्शितसरण्या रूपकालङ्कारः सिद्धः। शिष्टमनेन ग्रन्थकलेवरवर्धनायोद्धृतम्।

पृ० १५७३, पं० १४—"यदुक्तम्—'यस्मिन् भूप्रदेशे प्रातः पञ्चघटिकायां रात्रौ स्थितायां किञ्चित्सूर्य-प्रकाशेन रक्तता भवति तस्योषा इति संज्ञा' इति, तदप्ययुक्तम्, निरुक्तरक्तताया भूप्रदेशेऽसत्त्वात्। तदतिरिक्ते गगनस्थाने रक्ततायाः सर्वानुभवसिद्धत्वात्।" इत्यपि पूर्णतया दर्शनशास्त्रज्ञाने शून्यतासाधकमस्य, गगनस्य रूपगुणत्वाभावे चक्षुरगोचरत्वात्।

ननु यदा पृथिव्यां दृश्यते तदा आकाशेऽपि प्रत्यक्षं दृश्यते, कथं प्रत्यक्षापलापः क्रियते इति चेन्न, बालसूर्यकिरणानां पातेन भूप्रदेशादुत्थितवाष्पकणानां चयेन अथवाऽऽकाशस्थित-वाष्पसंघातभूतेषु मेघखण्डेषु रक्ततादर्शनसम्भवात्। भूप्रदेशे रक्तता न हि भवतीति लेखनं

होते हैं। एक ही पद के त्रिधा अर्थ होने में व्यापारभेद ही हेतु होता है। जैसे—

वक्ता और बोद्धव्य शब्दों के अभेद होने में भी अर्थ की भिन्नता हो जाती है। यह भिन्नता व्यापारापेक्षिणी होती है, क्योंकि कारण के बिना कार्य नहीं होता है।

अतः सम्भाविनी लक्ष्यार्थता होना भी न्यायसङ्गत है। इसलिये उक्त पद्धति से रूपकालङ्कार सिद्ध है। इन्होंने शेष तो ग्रन्थ की स्थूलता बढ़ाने के लिये लिखा है।

पृ० १५७३, पं० १४—"स्वामी दयानन्द लिखते हैं—'इसलिये उषा जो कि पाँच घड़ी रात्रि शेष रहने पर पूर्व दिशा में जिस भूप्रदेश पर रक्तता दीख पड़ती है, वह सूर्य के किरण से उत्पन्न होने के कारण उसकी कन्या कहलाती है' किन्तु यह व्याख्या भी ठीक नहीं है; क्योंकि आपके द्वारा वर्णित यह रक्तता भूप्रदेश में न रहकर उससे भिन्न आकाश में ही दिखायी पड़ती है, यह बात जनसाधारण के अनुभव से ज्ञात है।"

इससे भी इनकी दर्शनशास्त्र मे गतिशून्यता का ही प्रकाशन हो रहा है; क्योंकि आकाश में रूप गुण का अभाव है, अतः आकाश चक्षुगोचर नहीं हो सकता।

प्रश्न—जब पृथिवी पर रक्तता दिखायी देती है, तभी आकाश में दिखायी तो देती है, यह सच है, फिर प्रत्यक्ष का अपलाप कैसे हो सकता है ?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सर्वथाऽलीकम्, निरभ्राकाशस्थितबालसूर्यकिरणानामथवा रक्ताभ्राणां प्रतिबिम्बेन भूप्रदेशे रक्तताऽवश्यम्भावितत्वात्।

पृ० १५७४, अनु० १—यदुक्तम्—"प्रजापतिर्वै स्वां दुहितरम्' इत्यादि समग्रं पाठं नैवोद्धृतवान् भूमिकाकारः। एवमेव 'पर्जन्यपृथिव्योः पितादुहितृवत्' इत्यत्र कस्यापदेशः क्रियते।" इत्यपि निष्प्रयोजनमेव, भूमिकोक्तादधिकसारस्य वक्तुमशक्यत्वात्। तत्रैव मन्त्रेऽपरं रूपकं निरुक्ते उक्तम्—'पालयिता पिता पर्जन्यो दुहिता पृथिवी' इति सम्यगेव व्याख्यातम्। भवता नावबुध्यते तत्र न स्थाणोरपराधो यन्न पश्यसि।

पं० १३—यच्चाह—"द्यौर्मे पिता जनिता नाभिरत्र' इत्यादिना मन्त्रं निर्दिश्य यदुक्तं निरुक्तकृता—'तत्र पिता दुहितुर्गर्भं दधाति' इति, तस्याभिप्रायस्तु न ज्ञायते। 'यतोऽयं पर्जन्याददभ्यः पृथिव्या उत्पत्तेः, अतः पृथिवी तस्य दुहितृवदस्ति' अत्राप्यत इति व्यर्थमेव, पञ्चम्यैव गतार्थत्वात्। 'स पर्जन्यो वृष्टिद्वारा तस्यां वीर्यवज्जलप्रक्षेपणेन गर्भं दधाति। तस्माद्

उत्तर—बालसूर्य की किरणों के भूप्रदेश पर पड़ने पर ऊष्मा से उत्थित वाष्पकणों के समूह से अथवा आकाशस्थित वाष्प के सङ्घातभूत मेघखण्डों में रक्तता के दर्शन भी सम्भव हैं। भूप्रदेश पर इस व्यक्ति को रक्तता नहीं दिखायी देती, यह भी मिथ्या कथन है। निरभ्र आकाश में बाल-सूर्य की किरणों से अथवा लाल मेघों के प्रतिबिम्बित होने से भूप्रदेश पर रक्तता अवश्य होती है।

पृ० १५७४, अनु० १—यह कहना निराधार है कि—"स्वामी दयानन्द ने सम्पूर्ण उद्धरण इसलिये नहीं दिया कि उससे इनका प्रयोजन सिद्ध नहीं होता। इसी प्रकार 'पर्जन्य पृथिवी में पितादुहितृभाव' में किसका अपदेश किया जा रहा है?" यह सारा कथन पारिजातकार का निष्प्रयोजन ही है, क्योंकि भूमिका में उद्धृत भाग के साराधिक्य से कोई अधिक बात नहीं निकलती। वहीं पर निरुक्त में 'पालयिता पिता पर्जन्यः' की भी रूपक में सम्यक् व्याख्या की गयी है। आपकी समझ में नहीं आया तो यह स्थाणु का अपराध नहीं है कि इसे अन्धा नहीं देखता।

पं० १३—"द्यौर्मे पिता' इत्यादि मन्त्र का निर्देश कर 'तस्य पिता दुहितुर्गर्भं दधाति' इस निरुक्तवाक्य को इस प्रसङ्ग में स्वामी दयानन्द ने उद्धृत किया है, उस का अभिप्राय क्या है? यह ज्ञात नहीं हो पाया। 'क्योंकि पृथिवी की उत्पत्ति जल से ही हुई है, अतः पृथिवी उसकी पुत्री की तरह है' इस अर्थ के प्रतिपादक 'यतोऽयं' इत्यादि वाक्य में 'अतः' पद व्यर्थ ही है; क्योंकि पञ्चमी से ही यह अर्थ प्राप्त हो जायेगा, इसके लिये अलग से 'अतः' के प्रयोग की कोई आवश्यकता नहीं है। 'जब वह पर्जन्य उस कन्या में वृष्टि के द्वारा जलरूप वीर्य को धारण करता है, तब उससे गर्भ रहकर ओषधि आदि अनेक पुत्र उत्पन्न होते हैं' यह कथन भी सर्वथा असङ्गत है और निरुक्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गर्भादोषध्यादयोऽपत्यानि जायन्ते' इति तु सर्वथाऽसङ्गतम्, निरुक्तविपरीतं च। पृथिव्या यथाश्रुतं वस्तुभूतं कन्यात्वं प्रकल्प्य तत्रैव तदुत्पादकस्य पर्जन्यस्य वीर्यप्रसेकं च निर्दिश्य गर्भधारणपूर्वकं सोऽपत्यं जनयतीत्यश्लीलताव्यञ्जकमर्थं स्वयमेव व्याख्याय परेषां सूक्तमपि दुरुक्तं मन्यमानोऽर्थमप्यनर्थं बुद्ध्यमानो गुणानपि दोषपक्षे निक्षिपन् न मनागपि जिह्रेति। निरुक्तदृष्ट्या मन्त्रार्थस्तु—पितृपदं 'पाता वा पालयिता वा' इत्यनया योगवृत्त्या यतो द्युदकं द्युलोकात् पतितं पार्थिवेन धातुना सम्पृक्तमोषधिभावमापद्य शरीरभावेनावतिष्ठत इत्येतदपेक्ष्य पर्जन्ये दिवि शक्तम्। तथा दुहितृपदेन पृथिव्येवोच्यते। सा हि द्युलोकाद् दूरे हिता निहिता भवति, द्युलोकं दोग्धीति वा। अतस्तयोरत्र न लोकप्रसिद्धः पितृदुहितृसम्बन्धो ज्ञायते, पितृदुहितृपदयोर्निरुक्तवृत्त्या द्युपृथिवीपरत्वात्। अत एव द्यावापृथिव्योः सर्वभूतानां मातापितृत्वं प्रसिद्धमिति नात्राश्लीलत्वादिकम्, द्यौरेव चात्र पर्जन्यशब्देनोक्तेत्यप्युक्तम्।" इत्यखिलमपि भ्रान्तिजनकम्, अयथार्थत्वात्।

इह पृच्छामि भवन्तं यद् दुहितृशब्दस्य क्वाऽपि मातेत्यर्थः स्वीकृतो भाष्यकारेण, किं

के विपरीत भी है। स्वामी दयानन्द प्रस्तुत स्थान में जैसा कि मन्त्र में पढ़ा गया है, उसी रूप में पृथिवी की कन्या के रूप में कल्पना करके उसी में उस पृथिवी के उत्पादक पर्जन्य के वीर्य के आधान की बात लिखकर यह बताते हैं कि इस तरह से वह पृथिवी अपने पिता के वीर्य से गर्भवाली हो जाती है और पुत्र को उत्पन्न करती है। इस तरह से वे स्वयं ही इस मन्त्र की अश्लीलता भरी व्याख्या करते हैं और दूसरे आचार्यों के किये गये भले अर्थ को भी गलत मान उस पर दोषारोपण करते हैं। इस तरह से वे सही बात को भी गलत समझकर, गुणपक्ष को भी दोषपक्ष में ही डालकर, कुछ भी लज्जित नहीं होते। निरुक्त की दृष्टि से तो मन्त्र का अर्थ इस तरह से होगा—पिता पद का अर्थ यौगिक वृत्ति के आधार पर रक्षा करनेवाला अथवा पालन करनेवाला होगा। पर्जन्य भी सारे लोक की रक्षा करनेवाला अथवा पालन करनेवाला होने से पिता कहलाता है; क्योंकि आकाश से जब जल बरसता है, तो वह पृथिवी के साथ मिलकर ओषधि के रूप में परिणत होकर सभी प्राणियों के शरीर की रक्षा और पालन करने में समर्थ होता है। इसी आधार पर यहाँ पिता शब्द आकाशस्थित जल के अर्थ (पर्जन्य) का बोधक है। दुहिता पद से यहाँ पृथिवी का बोध होता है; क्योंकि वह आकाश बहुत दूर विद्यमान है, अथवा वह आकाश का दोहन करती है। इस तरह से निरुक्त के अनुसार पिता पर्जन्य और दुहिता पृथिवी का लोक में प्रसिद्ध पिता-पुत्री वाला सम्बन्ध न रखकर निरुक्त में प्रदर्शित निर्वचन के अनुसार द्युलोक और पृथिवीलोक अर्थ है। इसलिये आकाश और पृथिवी को सभी प्राणियों का माता-पिता सर्वत्र कहा जाता है। इसमें अश्लीलता का थोड़ा सा भी प्रसङ्ग नहीं है। इस मन्त्र में द्युलोक को ही पर्जन्य शब्द से अभिहित किया गया है, यह बात पहले भी कही जा चुकी है।"

पारिजातकार का उक्त कथन अयथार्थ होने से भ्रम में डालनेवाला है। यहाँ हम पूछते हैं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दुहितृशब्दो न कन्यार्थवाची, तथा सत्त्वे कः परिहारः ? अत्र पर्जन्यशब्देन भवता द्यौरुपलक्षिता एवं पर्जन्यः पिता, दूरे निहितेति निरुक्त्या दुहितृशब्देन स्वैरवृत्त्या माता मता। तयोर्न सम्बन्धोऽश्लीलः। परमिहैव ऐतरेयेण प्रजापतिः सविता जनकः सावित्री ह्युषा पुत्री तत्र किरणरूपबीजेन दिवसोत्पत्तौ मतं समाधानमभीष्टम्, बहुत्राप्येवम्। वस्तुत एतेषाममैथुन-जन्यत्वानाश्लीलत्वं मैथुनजन्यत्वे तु स्यादित्यभिव्यज्यते। अतो मैथुनसम्बन्धाः परित्याज्याः।

यच्चाह—"अतः' इति निष्कर्षार्थसूचकं वाक्यं व्यर्थं पञ्चम्यैव गतार्थत्वात्' तत्तु वाक्यरचनाविज्ञानस्याकौशलादेव। पञ्चम्यास्तु हेत्वाद्यर्थेष्वपि सम्भवात्, नहि जन्यजनकभाव एव तस्या विधानम्।

पृ० १५७५, ५मपंक्तौ 'पर्जन्ये' इति चिन्त्यम्। वस्तुतस्त्वत्र प्राकृतपदार्थेषु जन्यजनकभावः कार्यकारणभाव एव।

अन्यथा सूर्यः पितामहो मह्याः सिध्यति, यतः सूर्यात् पर्जन्यजलं जलाच्च पृथिवी उत्पन्ना, पृथिव्या अन्नमन्नाद् रेतो रेतसः पुरुषः। एवं पुरुषस्य पिता रेतः, अन्नं च पितामहः, पृथिवी च

कि दुहितृ शब्द का लोक या वेद में कहीं पर माता अर्थ अभिहित हुआ है किसी भाष्यकार के द्वारा ? क्या दुहितृ शब्द का कन्या अर्थ नहीं है ? है ही। तो इस दशा में आप क्या परिहार करेंगे ? यहाँ पर पर्जन्य शब्द से द्यौ उपलक्षित किया है। इस प्रकार पर्जन्य पिता माना। दूर निहित होने की निरुक्ति से दुहितृ शब्द से स्वच्छन्द वृत्ति से माता अर्थ (पृथिवी का) मान लिया और कह दिया कि उनका सम्बन्ध अश्लील नहीं हुआ। पर यहीं पर ऐतरेयब्राह्मण ने प्रजापति सविता को जनक और सावित्री उषा को पुत्री, किरण को वीर्य, दिवस को पुत्र मानकर समाधान अभीष्ट माना है। वस्तुतः इन प्राकृतिक वस्तुओं की अमैथुनी सृष्टि है, अतः अश्लीलता है ही नहीं। मैथुनजन्य सम्बन्ध जो उपमान माने गये हैं, उनमें ही अश्लीलता है, अतः वे सम्बन्ध परित्याज्य हैं।

यह कहना कि "पञ्चमीविधान से ही काम चल जायेगा, 'अतः' निष्कर्षार्थसूचक वाक्य की व्यर्थता है" वस्तुतः इनका (करपात्रीजी का) व्यर्थ कथन ही व्यर्थ है; क्योंकि वाक्यरचनाकौशल-विज्ञान से ये अपरिचित हैं। पञ्चमी जन्यजनकभाव मात्र की ही तो द्योतिका नहीं होती, अपितु हेतु अर्थ में भी होती है। अतः भ्रम के अपसारणार्थ भी निष्कर्षवाक्यरचना परमावश्यकी है।

आपके पृ० १५७५, पं० ५ में 'पर्जन्ये' यह प्रयोग चिन्त्य है। वास्तव में प्राकृत पदार्थों में जन्यजनकभाव (मैथुनजन्य न होने से) कार्यकारणभाव ही है।

अन्यथा सूर्य तो पृथिवी का पिता यहाँ आपके कथन से ही ठहरा; क्योंकि सूर्य से पर्जन्य (बादलजल), जल से पृथिवी उत्पन्न हुई, पृथिवी से अन्न, अन्न से वीर्य और वीर्य से पुरुष। इस प्रकार आपकी (पुरुष की) पृथिवी प्रपितामही ठहरी, न कि माता; क्योंकि पुरुष का पिता वीर्य, वीर्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रपितामही सिध्यति न तु माता। परमन्यत्रोक्तं 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति, एवं सर्ववैदिकवाक्यानि सङ्गमयितव्यानि बुद्ध्या।

पृ० १५७५, पं० ९—यदुक्तम्—"अयमपि मन्त्रोऽस्यैवालङ्कारस्य विधायकोऽस्ति' इति, तदपि यत्किञ्चित्, तथात्वेऽलङ्कारविधायकत्वेऽलङ्कारदैवत्यमेवास्य मन्त्रस्य स्यात्। न च तत् सङ्गतम्, अत एव निरुक्तब्राह्मणादिषु न क्वाऽपि रूपकालङ्कारविधायिनी कथाऽऽख्याता। एवमेव—'सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति। सोऽपि गौरुच्यते' (निरु० २।६) इति निरुक्तोल्लेखोऽप्यनुपयोगी प्रकरणार्थेऽसम्बद्धत्वात्।" इत्यपि उन्मत्तप्रलपितमिव, एवमेव सूर्यरश्मिः' इत्यादेरत्रालिखितस्योद्धरणात्।

विमृशन्तु विपश्चितो यद् 'यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति' इति निरुक्तवचनेन आर्थपत्यस्य प्राधान्यमुक्तं देवतात्वनिर्धारणे। रूपकालङ्कार-स्यार्थालङ्कारत्वेन प्रागर्थनिष्पत्तिर्भवेन्मन्त्रस्य तदालङ्कारनिर्धारणं भवतीत्यभिप्रेतम्। अयमज्ञो मन्त्रस्यार्थं रूपकालङ्कारमवधारयतीति साहित्यमर्मज्ञानां पुर आयन् जिह्रेति जिह्यः। भो भ्रामक-

---

का पिता अन्न और अन्न की माँ पृथिवी और पृथिवी का पिता पर्जन्य ठहरता है। परन्तु अन्यत्र 'माता भूमिः पुत्रोऽहं पृथिव्याः' स्पष्ट कहा गया है। अतः मतिकौटिल्य छोड़कर ऋषिवर की दिशा से चिन्तन कर समस्त वेदवाक्यों का यथायथ सङ्गमन सद्बुद्धि से करना चाहिये।

पृ० १५७५, पं० ९—"शासद् वह्निः०' यह मन्त्र भी इसी रूपकालङ्कार का विधायक है' भूमिका का यह कथन भी असङ्गत है। यदि यह मन्त्र अलङ्कार का विधायक होता, तो इस मन्त्र का देवता अलङ्कार को ही होना चाहिये था। यह तो ठीक बैठता नहीं। इसलिये निरुक्त, ब्राह्मण प्रभृति ग्रन्थों में कहीं भी रूपकालङ्कार का विधान करनेवाली कोई कथा नहीं मिलती। इसी तरह से 'सूर्यरश्मि०' इत्यादि निरुक्त के वचन का उल्लेख भी इस प्रकरण से सम्बद्ध नहीं है; क्योंकि प्रस्तुत प्रकरण में गौ (पृथिवी) के पर्याय के रूप में सूर्यरश्मि, चन्द्रमा अथवा गन्धर्व का उल्लेख करने से कोई बात नहीं बनती।"

यह भी उन्मत्तप्रलपित सा है। 'सूर्यरश्मि' जो यहाँ अलिखित है, उसका उद्धरण करना निष्प्रयोजन है। विवेचक विचार करें कि 'जिस देवता को अर्थपति बनाने की इच्छा से स्तुति की जाये, तो उस मन्त्र का वह देवता होता है' इस निरुक्तवचन में 'आर्थपत्य' शब्द का महत्त्व देवतानिर्धारण में मन्तव्य है। श्रीमन्! रूपकालङ्कार अर्थालङ्कार है तो अर्थ निकलने से पूर्व कैसे निश्चित किया जा सकता है, वह तो अर्थाश्रित है। मन्त्र का अर्थ ज्ञात होने पर अलङ्कार का निर्धारण होता है। यह साहित्यशास्त्रमर्मानभिज्ञ अर्थ से पूर्व रूपकालङ्कार का अवधारण कर रहा है, भला

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मतिशिरोमणे ! (मतिकटाओं के अग्रगण्य) निरुक्तब्राह्मणादिषु याः कथा वर्णिताः सन्ति ता रूपकालङ्कारमय्यः सन्तीत्युच्यते महर्षिणा। वक्तुरभिप्रायमदन्यत्रार्थकर्षणाच्छलात् साम्प्रतं विरम।

अनवरतं मासेभ्यः पारिजाताक्षेपाणां समाधाने लेखनपरावावां स्वपितरौ संवीक्ष्य मम पुत्रो डा० मेधाव्रतोऽगादीद् यदस्माकं पित्रोस्तु रात्रिन्दिवा लेखनीघर्षणादन्यत् किं कार्यमस्ति ? मयोक्तं पुत्र ! मम व्यापारं पृच्छसि तदा शृणु—

किं पृच्छसि स्थितिं मदीयकार्यव्यापृतेः।
विक्रीणे दर्पणानहम् अन्धानां नगर्याम्॥

१५७५ पृष्ठस्य त्रयोदशपङ्क्तेः १५७६ पृष्ठस्य ७ मपङ्क्तिं यावत् सायणस्य पिष्टपेषणं व्यधाय्यनेन, तथापि चतुर्थपङ्क्त्याम् 'अत्रोर्द्यावापृथिव्योः' इत्यपपाठ एव कृतः। नहि परगुणानपि दोषानिव मन्यमाना ईर्ष्यालू श्रीकरपात्रादितुन्दपरिमृजानां सेनाऽपि क्वचिदपाठमपपाठं वा विलोकितवतीत्याश्चर्यावहम्।

कैसी विडम्बना है—

रसालङ्काररीतीनां शक्तिभावविदां पुरः।
आयन् जिह्रेति नो जिह्रो विस्मयो जायते हि नः॥

निरुक्त, ब्राह्मणादि में जो ऐसी कथाएँ वर्णित हैं, वे प्रायः रूपकालङ्कारमयी हैं, यही महर्षि का अभिप्राय है। इससे अन्यत्र कर्षण कर आशय निकालना छल है।

कई मासों से पारिजात के आक्षेपों का समाधान करने में निरत हम दोनों को देखकर हमारे पुत्र आचार्य मेधाव्रत पूछने लगे कि क्या पिता जी ! आप दोनों का रात-दिन यही व्यापार और कारोबार है, इस लेखन का इन दुराग्रही पौराणिक पण्डितों पर क्या प्रभाव पड़ेगा ? तो मैंने उत्तर दिया, बेटे—

क्या हाल पूछते हो मेरे कारोबार का।
आईना बेचते हैं अन्धों के शहर में॥

पृ० १५७५ की १३वीं पंक्ति से लेकर १५७६ पृष्ठ की ७वीं पंक्ति तक सायण के लेख का पिष्टपेषणमात्र किया है। उसमें भी १५७६ पृष्ठ की चतुर्थ पंक्ति में 'अत्रोर्द्यावा' यह अपपाठ किया है। पराये गुणों को भी दोषरूप में ख्यापन करनेवाले ईर्ष्यालु श्री करपात्र आदि के आलसियों की बटालियन कहीं पर अपाठ और कहीं अपपाठ को भी न देख सकी, आश्चर्य है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्च—"एवं सद्विद्योपदेशार्थालङ्कारायां भूषणरूपायां सच्छास्त्रेषु प्रणीतायां कथायां सत्यां या नवीनग्रन्थेषु पूर्वोक्ता मिथ्याकथा लिखिताऽस्ति सा केनचित् कदापि नैव मन्तव्या हि एतादृश्योऽन्याश्चापि।' इति दयानन्दोक्तौ सद्विद्योपदेश एवालङ्कारत्वेन विवक्षितः, न चालङ्कारग्रन्थेषु तादृशालङ्कारो वर्ण्यते।" इत्यपि महर्षिलेखावगमनप्रज्ञाऽभावादेवोट्टङ्कितमनेन अथवा स्वभावकुटिलोऽयं छलेन वक्त्येवम्। प्राज्ञैर्यथायथमवगन्तव्यम्, तद्यथा—'सद्विद्याया उपदेशार्थमलङ्काराः (प्रयुक्ताः) सन्ति यस्यां तस्यां भूषणभूतायां सच्छास्त्रेषु प्रणीतायां कथायां सत्यां नवीनपुराणग्रन्थकथा न मन्तव्याः।'

पृ० १५७६, पं० ११—"यदप्युक्तम्—'कश्चिद्देहधारीन्द्रो देवराज आसीत्। स गोतमस्त्रियां जारकर्म कृतवान्। तस्मै गोतमेन शापो दत्तस्त्वं सहस्रभगो भवेति। तस्यै अहल्यायै शापो दत्तस्त्वं पाषाणशिला भवेति। तस्या रामपादरजःस्पर्शेन शापस्य मोक्षणं जातमिति। तत्रेदृश्यो मिथ्यैव कथाः सन्ति। कुतः? आसामप्यलङ्कारसार्थत्वात्। तद्यथा—इन्द्रागच्छेति।

यह कथन कि—"इस उत्तम रूपकालङ्कार विद्या को अल्पबुद्धि पुरुषों ने बिगाड़ के सब मनुष्यों में हानिकारक फल भर दिया है। इसलिये सब सज्जन लोग पुराणोक्त मिथ्या कथाओं को मूल से ही त्याग कर दें।' दयानन्द ने इस जगह सद्विद्या के उपदेश को ही अलङ्कार मान लिया है, किन्तु किसी भी अलङ्कारग्रन्थ में इस नाम का अर्थालङ्कार दृष्टिगोचर नहीं होता।" करपात्री जी का यह कथन ठीक नहीं है; क्योंकि इनमें महर्षि के लेख को समझने की प्रज्ञा का अभाव है। इसीलिये इन्होंने ऐसा लिखा है अथवा स्वभाव की कुटिलता से ये ऐसा लिख रहे हैं। यहाँ कोई थोड़ा संस्कृतज्ञ भी समझ लेगा कि सद्विद्या के उपदेश के लिये अलङ्कारभूत ये सत्य कथाएँ जो उत्तम शास्त्रों में प्रणीत हैं, उनके होते हुए पुराणकथाएँ बिगड़ी हुई नहीं माननी चाहिये।

पृ० १५७६, पं० ११—"प्रजापति और उसकी पुत्री की कथा पर विचार समाप्त कर स्वामी दयानन्द ने इन्द्र और अहल्या की कथा की चर्चा उठायी है। इस प्रसङ्ग में वे कहते हैं—'अब जो दूसरी कथा इन्द्र और अहल्या की है, जिसको कि मूढ लोगों ने अनेक प्रकार से बिगाड़ कर लिखा है। इस कथा को उन्होंने ऐसा मान रखा है कि—'देवों का राजा इन्द्र देवलोक में देहधारी देव है। वह गौतम ऋषि की स्त्री अहल्या के साथ जारकर्म किया करता था। एक दिन जब उन दोनों को गौतम ने देख लिया, तब इस प्रकार शाप दिया कि हे इन्द्र! तू हज़ार भगवाला होजा। तथ अहल्या को शाप दिया कि तू पाषाण रूप हो जा। परन्तु जब उन्होंने गौतम से प्रार्थना की कि हमारे शाप का छुटकारा कैसे और कब होगा? तब इन्द्र से तो कहा कि तुम्हारे हज़ारों भग के स्थान पर नेत्र हो जायें और अहल्या को वचन दिया कि जिस समय रामचन्द्र अवतार लेकर तेरे पर अपना चरण लगावेंगे, उस समय तू फिर अपने स्वरूप में आ जावेगी।' इस प्रकार पुराणों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

गौरावस्कन्दिन्नहल्यायै जारेति। तद्यान्येवास्य चरणानि तैरेवैनमेतत् प्रमुमोदयिषति' (शत० ३। ३। २। १८), 'रेतः सोमः' (शत० ३। ३। २। १), 'रात्रिरादित्यस्यादित्योदयेऽन्तर्धीयते' (निरु० १२।११), 'जार आभगम्' जार इव भगम्। 'आदित्योऽत्र जार उच्यते, रात्रेर्जरयिता' (निरु० ३। १६), 'एष एवेन्द्रो य एष तपति' (शत० १। ६। ४। १८) इन्द्रः सूर्यो य एष तपति, भूमिस्थान् पदार्थांश्च प्रकाशयति अस्येन्द्रेति नाम, परमैश्वर्यप्राप्तेर्हेतुत्वात्। स अहल्याया जारोऽस्ति। सा सोमस्य स्त्री तस्य गोतम इति नाम। गच्छतीति गौरतिशयेन गौरिति गोतमश्चन्द्रः। तयोः स्त्रीपुरुषवत् सम्बन्धोऽस्ति। रात्रिरहल्या। कस्मात्? अहर्दिनं लीयतेऽस्यां तस्माद्रात्रिरहल्योच्यते। स चन्द्रमाः सर्वाणि भूतानि प्रमोदयति, स्वस्त्रियाऽहल्यया सुखयति। अत्र स सूर्य इन्द्रो रात्रेरहल्याया गोतमस्य चन्द्रस्य स्त्रिया जार उच्यते। कुतः? अयं रात्रेर्जरयिता। 'जृष् वयोहानौ' इति धात्वर्थोऽभिप्रेतोऽस्ति। रात्रेरायुषो विनाशक इन्द्रः सूर्य एवेति मन्तव्यम्।

इति महता प्रघट्टकेन, तदपि नास्तिक्यमूलकम्, रूपकालङ्कारस्यापि निराधारत्वायोगात्। सति कुड्ये चित्रोल्लेखः। केनचिद् रूपेण विद्यमानायामेव कथायां रूपकालङ्कारेणार्थान्तरवर्णनं युज्यते नासत्याम्। यथा रामरावणकथायां रामायणे प्रसिद्धायामेव राम आत्मा विज्ञानं वा, रावणोऽहङ्कारः, शरीरं लङ्का, शुद्धमनो हनुमान् इत्यादिकल्पना भवति। एवमेव कौरवपाण्डवसंग्रामे सत्येव तत्र देवासुरसंग्रामकल्पना जायते। राजसतामसवृत्तिषु सात्त्विक-

---

में यह कथा बिगाड़ कर लिखी है। सत्य ग्रन्थों में ऐसा नहीं है; क्योंकि ये भी रूपकालङ्कारों में वहाँ किसी दूसरे ही अभिप्राय को प्रकट करती हैं। अर्थात् उनमें इस रीति से कथा वर्णित है—'सूर्य का नाम इन्द्र, रात्रि का नाम अहल्या और चन्द्रमा का नाम गौतम है। यहाँ रात्रि और चन्द्रमा का स्त्री और पुरुष के समान अलङ्कार है। चन्द्रमा अपनी स्त्री रात्री से सब प्राणियों को आनन्द कराता है और उस रात्रि का जार आदित्य है अर्थात् उसके उदय होने से रात्रि अन्तर्धान हो जाती है। जार अर्थात् यह सूर्य ही रात्रि के वर्तमान रूप शृङ्गार को बिगाड़नेवाला है।'

यह सारा प्रघट्टक दयानन्द के नास्तिक स्वभाव को ही प्रकट करता है। रूपक अलङ्कार भी निराधार नहीं रह सकता। दीवाल, कपड़े आदि आधार के रहने पर ही उस पर चित्र बनाया जा सकता है। किसी न किसी रूप में कथा के रहने पर ही उसके आधार पर रूपक अलङ्कार के सहारे अन्य कल्पनाएँ की जा सकती हैं, निराधार कल्पना नहीं की जा सकती। जैसे राम और रावण की कथा के रामायण में प्रसिद्ध रहने पर ही राम की आत्मा अथवा विज्ञान के रूप में, रावण को अहङ्कार के रूप में, शरीर को लङ्का के रूप में और शुद्ध मन को हनुमान् के रूप में कल्पना हो सकती है। इसी प्रकार कौरव-पाण्डव संग्राम होने पर ही इस युद्ध में देवासुर संग्राम की कल्पना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वृत्तिषु च देवासुरसंग्रामस्यापि कल्पनाऽभिप्रेयते। किञ्चानेकैराचार्यैर्वेदमन्त्राणामाध्यात्मिकाधिदैविकाधिभौतिकभेदेनानेकेऽर्था वर्ण्यन्ते। निरुक्तकारोऽपि पौराणिकपक्षमुपस्थापयति।"

इत्यविकलं सत्यविद्वेषदूषितप्रवृत्तिपरायणतामेवास्य प्रकटयति। कलिकल्मषग्रस्तमानसाखेटितस्वस्वभावजनास्तिक्यं योगध्यानविधौतकल्मषे परमास्तिके आरोपयन् न जिह्रेति करपात्री। रूपकालङ्कारस्यैव निराधारत्वं कथमनेन ख्याप्यते? यदा नैकोऽप्यलङ्कारो निराधारस्तिष्ठति। पश्य—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारा अङ्गदादिवत्॥

महती खलु बुद्धिविडम्बना विद्यते यदयमितिहासं तु कल्प्यतेऽलङ्काररूपत्वेन, आलङ्कारिकं च वास्तविकेतिवृत्ते।

आधुनिकैतादृशचिन्तकानां कल्पनाशीलतैवाभिशप्तास्ति। रामायणस्य सत्यैतिहासि-

---

कल्पित की जाती है। राजस और तामस वृत्तियों के साथ सात्त्विक वृत्ति के युद्ध के लिये भी देवासुरसंग्राम की कल्पना की जा सकती है। अनेक आचार्यों ने बौद्धिक मन्त्रों के आध्यात्मिक, आधिभौतिक और आधिदैविक के भेद से अनेक अर्थ किये हैं। निरुक्तकार यास्क ने भी पौराणिक पक्ष को उपस्थापित किया है।"

करपात्रीजी का उक्त समस्त कथन सत्य के विद्वेष से दूषित प्रवृत्तिपरायणता को ही प्रकट कर रहा है। कलियुगी पाप से ग्रस्त मानसता के शिकार इन्हें अपने स्वभावज नास्तिक्य को योगध्यान के द्वारा विगतकल्मष परम आस्तिक दयानन्द पर (रूपक प्रकरण में) आरोपित करते हुए लज्जा नहीं आ रही है। रूपकालङ्कार का ही क्योंकर ये आधार ढूँढ रहे हैं? सभी अलङ्कारों को शब्द या अर्थ का आधार चाहिये। वस्तुतः आप अलङ्कारविद्या से शून्य प्रतीत होते हैं। देखिये—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारा अङ्गदादिवत्॥

अर्थात् ये अलङ्कार शब्द और अर्थ के अस्थिर धर्म हैं।

बड़ी भारी बुद्धिविडम्बना है जो ये इतिहास को अलङ्कार के रूप में बदलना चाहते हैं और अलङ्कारमात्र अर्थात् जिनकी ऐतिहासिकरूप से जन्मादि स्थिति नहीं है, उन्हें ऐतिहासिकरूप में मान्यता देना चाहते हैं।

ऐसे आधुनिक चिन्तकों की कल्पनाशीलता ही अभिशप्त हो चुकी है। कुछ ऐतिहासिक

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कपात्राणि रामादीनयमाध्यात्मिकालङ्कारे घटयति। एवञ्चिन्तनस्यैवायं दुष्प्रभावोऽभूद् यत् पाश्चात्यप्रभाविता भारतीया अपि इतिवृत्तविदो रामादीनां वास्तविकीं सत्तां खण्डयन्ति कथयन्ति च दुःसाहसेन यन्न कश्चिद् रामोऽभून्न वा रावणः, बाल्मीकिनैव कल्पितेयं कथा तदाऽऽध्यात्मिकतालाभो भवेत्तावान् ग्राह्यो न तु वास्तवेन मन्तव्या स्थितिः। विद्यासीतावियोगक्षुभितादिपद्यमिदं वास्तविकेतिहासास्तित्वपादपच्छेदनाय रूपकरूपे तीक्ष्ण-कुठारप्रहार एव, तेषां रामायणपात्रास्तित्वखण्डकानां दुःसाहसवर्धकं च।

कालान्तरे दूरं भविष्यति चास्माकं रामायणीयचारित्रिक-शिक्षासम्पदोन्मूलनाय क्षमं भवितुमर्हत्येषामान्दोलनम्। एवंविधानां रूपकालङ्कारविधातृकवीनां संस्कृतिरक्षकैः प्रतिरोधः कार्य इति मे मतिः।

पुरुष रामायण के सत्य ऐतिहासिक पात्रों राम, रावण, सीता, हनुमान् आदि को अध्यात्मपरक बनाकर अलङ्कार में घटित कर रहे हैं। इसी चिन्तन का यह दुष्प्रभाव हुआ है कि पाश्चात्यों से प्रभावित भारतीय इतिहासकार भी, राम आदि कभी हुए थे, इस वास्तविक इतिहास का खण्डन कर रहे हैं और दुःसाहसपूर्वक कहते हैं कि कोई न राम हुए और न रावण, बाल्मीकि ने आध्यात्मिक तत्त्वों को जो मोक्षसाधक हैं, उहे समझाने के लिये रामायण की कथा गढ़ ली। अतः इससे जितना आध्यात्मिक लाभ हो उतना ग्रहण कर लो, कथा की वास्तविकता है ही नहीं। पर इन पोंगे पण्डितों को होश ही नहीं है, पाण्डित्य का चमत्कार प्रकट करने के नशे में—

'विद्यासीतावियोगक्षुभितनिजसुखः शोकमोहाभिपन्नः,
मैत्रः सौमित्रिमित्रो भवभवनगतः शास्त्रसुग्रीवसख्यः।
हत्वास्तेदन्यबालिं मदनजलनिधौ धैर्यसेतुं प्रबध्य,
प्रध्वस्ताबोधरक्षः पतिरधिगतचिज्जानकिः स्वात्मरामः॥'

यदि ऐसी शाब्दिक आध्यात्मिकता में रमने लगे तो रामायण की कथा की ऐतिहासिकता समाप्त हो जायेगी। यदि कोई जैनी नास्तिक यह श्लोक लिखता या पसन्द करता तो उसका उद्देश्य पूर्ण हो जाता, पर वह व्यक्ति जो राम को अवतार के रूप में मानता है, उस वास्तविक कथाचर्चा के सौन्दर्य की अपेक्षा इस आलङ्कारिक हवाई पुलाव को क्यों पकाने लगा?

कालान्तर में दूर भविष्यत् में हमारी रामायणीय चारित्रिक शिक्षा सम्पदा के उन्मूलन के लिये इन लोगों का आन्दोलन समर्थ हो सकता है। वास्तविक कथाओं को रूपकालङ्कार में प्रस्तुत करनेवाले ऐसे कवियों का प्रतिरोध करना चाहिये, यह मेरा परामर्श है और रामायण के चरित्र बालकों को पढ़ाना चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किमध्यात्मप्रिया योगाभ्यासनिरता एतद्रूपकेण कामपि प्रेरणामभिनवां प्रणिधास्यन्ति स्वहृदये ? रूपकालङ्कारोऽयं नहि वस्तुतोऽलङ्कारो रामस्य आत्मत्वेन सीताया वा विद्यारूपत्वेन काञ्चिदपि शोभामतिशाययति, प्रत्युत रामस्य समग्रं चरितं मातुः सीतायाश्चापि पतितपावनचारित्रमेव आत्मनो विद्यायाश्च शोभामतिशाययतः। केवलं रूपकरूपप्रस्तावे कवेर्बुद्धिचमत्कार एव प्रतीयते, न तु कश्चिदध्यात्मक्षेत्रे लाभो भवति।

"एवमेव कौरवपाण्डवसंग्रामे सत्येव तत्र देवासुरसंग्रामकल्पना जायते" इति सिद्धान्त-स्थापना त्वेतस्य वैदिकवाङ्मयातिप्राचीनतामनङ्गीकुर्वतो बौद्धिककुण्ठैव, पाण्डवस्थितेः प्रागेव देवासुरसंग्रामस्यास्तित्वात्।

इदं तु सर्वथा मृषा वेदानामपौरुषेयताविघातोद्दिष्टत्वाद् यत् "निरुक्तकारोऽपि पौराणिकपक्षमुपस्थापयति। तेन विशिष्टेषु राजादिमनुष्येषु.....आध्यात्मिकाधिदैविकाधि-भौतिकार्थकल्पनं न विरुध्यते।" इति। न वेदेषु नश्वरराजादीनामितिहासो विद्यते। शङ्कराचार्योऽपि वेदान्तस्य १।३।२८ सूत्रभाष्येऽलेखीत्—

नामरूपे च भूतानां कर्मणां च प्रवर्तनम्।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः॥

मैं पूछता हूँ कि अध्यात्मप्रिय योगाभ्यासनिरत लोगों को रचनात्मक रूप में सीतादि को विद्यादि रूपकालङ्कार से कोई लाभ हो सकेगा ? कदापि नहीं। राम को आत्मा तथा सीता को विद्या मानकर यह अलङ्कार कोई अतिशय शोभा कर नहीं है, प्रत्युत राम का चरित्र आत्मा और माता सीता का पवित्रतम चरित्र आत्मा और विद्या में अतिशय शोभाकर है। केवल रूपक रूप प्रस्ताव में कवि की बुद्धि का चमत्कारमात्र प्रकट होता है, अध्यात्म क्षेत्र में इससे कोई लाभ नहीं।

कौरव-पाण्डवों के इतिहास में देवासुर संग्राम की रूपकता के सिद्धान्त की स्थापना इनके द्वारा करने से तो इनकी मतिकुण्ठा ही प्रतीत हो रही है, जो कि देवासुर संग्राम सृष्टिरचना की प्रक्रिया में आदिम रूप से ही प्रकट हुआ, फिर साथ ही आध्यात्मिक पक्ष में भी बराबर घटित हो रहा है।

यह तो सर्वथा मिथ्या तथा वेदों की अपौरुषेयता का विघातक है कि "निरुक्तकार यास्क भी पौराणिक पक्ष को उपस्थित करते हैं।" वेदों में नश्वर राजा आदि उत्पन्न हुओं का इतिहास कदापि नहीं है, यह हमने अन्यत्र बहुत लिखा है, उसे देखें। शङ्कराचार्य भी वेदान्त के १।३।२८ सूत्र पर लिखते हैं कि 'समस्त पदार्थ और प्राणियों के नामरूप व कर्म का प्रवर्तन वेदशब्दों से ही महेश्वर ने निर्मित किया।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पुनस्त्रिंशसूत्रभाष्ये—

ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः ।
शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः ॥

समस्ताचार्याणामस्मिन् विषये एषैव सम्मतिः । तदा केवलनामदर्शनेन यत् तानि वसिष्ठादीनामेषामेव देहधारिणां नामानीति कथं सम्भाव्यते ? रामलक्ष्मणादिनामानि दृष्ट्वा कश्चिदेवं कथयितुं प्रभवति कोविदो यदिमानि रामायणादिवर्णितानामेव रामादीनां नामानि ?

निरुक्तकारेण—'ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता' (१० । १०, ४६) तथा 'तत्रेतिहासमाचक्षते' (निरु० १० । २६) लिखितम्, तत्र दुर्गाचार्यो व्याचष्टे—'इतिवृत्तं परकृत्यर्थवादरूपेण यः कश्चिद् आध्यात्मिक आधिभौतिक आधिदैविको वार्थ आख्यायते दिष्ट्युदितावभासनार्थं स इतिहास उच्यते' (निरु० १० । २६) । न च लौकिक इतिहासः । तथा—

'एवमाख्यानस्वरूपाणां मन्त्राणां यजमाने नित्येषु च पदार्थेषु योजना कर्तव्या । एष शास्त्रे सिद्धान्तः । औपचारिकोऽयं मन्त्रेष्वाख्यानसमयः परमार्थतु नित्यपक्ष इति सिद्धम्' (स्कन्दस्वामी निरु० २ । १२) ।

यास्काचार्यः स्वयमेव निराचकारैतिहासिकदृष्टिवर्णनं निरु० २ । १६ उद्धृते मन्त्रे

इसी प्रकार तीसवें सूत्र के भाष्य में भी लिखा है—'अजन्मा परमेश्वर ने ऋषियों के नाम प्रलय के अन्त में प्रसूतों के भी दिये ।'

समस्त आचार्यों की इस विषय में यही सम्मति है । तब नाम देखनेमात्र से वेदों में इन शरीरधारियों के नाम कैसे सम्भव हैं ? राम आदि नामों को देखकर क्या कोई सदसद्विवेकी कह सकता है कि इन शरीरधारी राम आदि के ही नाम हैं ?

निरुक्तकार ने जो यह लिखा है कि—'वेदार्थद्रष्टा ऋषि की आख्यानसंयुक्त दृष्टार्थ में प्रीति होती है' और 'तत्रेतिहासमाचक्षते' इस पर दुर्गाचार्य लिखते हैं कि—'इतिवृत्त परकृति और अर्थवाद के रूप में जो कोई आध्यात्मिक, आधिदैविक और आधिभौतिक अर्थ कहा जाता है, वह इतिहास है ।' वहाँ लौकिक इतिहास नहीं है । तथा—'इस प्रकार आख्यानस्वरूपवाले मन्त्रों की यजमानपरक अथवा नित्य पदार्थों में योजना कर लेनी चाहिये । यह निरुक्तशास्त्र का सिद्धान्त है । मन्त्रो में आख्यानसिद्धान्त गौण है । वास्तव में तो नित्यपक्ष ही मन्त्रों का विषय है ।' (स्कन्दस्वामी, निरु० २ । १ २) ।

यास्काचार्य ने निरु० २ । १६ पर उद्धृत 'अतिष्ठन्तीनामनिवेशनानाम्' मन्त्र में इसकी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'अतिष्ठन्तीनामनिवेशनानाम्' इत्यस्मिन् व्याख्यां कुर्वाणः—'अपां च ज्योतिषश्च मिश्रीभाव-कर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति।' अर्थात् तत्र इन्द्रनाम विद्युद् वृत्रनाम मेघ इति।

एतदग्रे लिखति—'अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च। विवृद्ध्या शरीरस्य स्रोतांसि निवारयाञ्चकार। तस्मिन् हते प्रसस्यन्दिर आपः। तदभिवादिन्येषर्ग् भवति। दासपत्नी-रहिगोपा.....इति।' एतेन सिध्यति यद् यास्कमते 'इन्द्रशत्रुयुद्धम्' ऐतिहासिकघटनासूचकं नैव।

पृ० १५७८, पं० १—"घटनासु ऐतिहासिकासु सत्यास्वपि आध्यात्मिकार्थकल्पनं न विरुद्ध्यते" इत्यविचारचारु, तासु विद्यमानासु मतासु वेदानामपौरुषेयत्वासिद्धेः। अत एव शतपथेऽप्याह—'तस्मादाहुर्नैतदस्ति यद् दैवासुरं यदिदमन्वाख्याने त्वदुक्तं इति हरसे त्वत्' (११।१।६।९)। एतस्मिन् काले तदनन्तरं वापि वेदार्थरहस्यं दुरूहं प्ररोचनैतिहासिक-शैल्या सायणादयोऽपि व्याख्यातुं प्रचक्रमिरे। यथा—

उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन्॥
(ऋ० ५।३३।१०)

व्याख्या करते हुए लिखा है कि—'अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते।' यहाँ पर 'उपमार्थ से युद्धों का वर्णन होता है' अर्थात् वहाँ पर इन्द्र = विद्युत् वृत्र = मेघ—यह कहकर उन्होंने इतिहास का निराकरण कर दिया।

आगे भी यास्काचार्य लिखते हैं कि—'अहिवत्तु खलु मन्त्रवर्णा भवन्ति ब्राह्मणवादाश्च' अर्थात् मेघ (अहि) के समान मन्त्रवर्ण व ब्राह्मणवाद होते हैं। इत्यादि से यास्क के मत में 'इन्द्रशत्रु' युद्ध ऐतिहासिक घटना कदापि सिद्ध नहीं होती।

पृ० १५७८, पं० १—यह कहना कि—"इन सत्य घटनाओं के होने पर वेदार्थ में कोई विरोध नहीं होगा।' ठीक नहीं; क्योंकि उनके होने पर वेदों की अपौरुषेयता और नित्यता कैसे सिद्ध होगी? इसलिये शतपथब्राह्मण में भी कहा है—'तस्मादाहुर्नैतदस्ति०' (११।१।६।९)।

इस काल में या इस के अनन्तर दुरूह वेदार्थरहस्य को प्रकट करने के लिये प्ररोचक ऐतिहासिक शैली से ही सायण आदि ने भी व्याख्या करना प्रारम्भ कर दिया। जैसे—'उत त्ये मा ध्वन्यस्य०' (ऋ० ५।३३।१०) इस मन्त्र का हिन्दी में अनुवाद श्री रामगोविन्द त्रिवेदी ने किया है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्र सायणभाष्यम्—'अपि च वक्ष्यमाणा रायो ध्वन्यनामकस्य लक्ष्मणपुत्रस्य राज्ञः सम्बन्धिनोऽश्वा मां प्राप्ताः शोभनदीप्तयो वहनाय यतमानाः, महत्त्वेन युक्ता रायो दत्ताः सत्यः संवरणस्य ऋषेरपि प्राप्ता मद्गृहमिति शेषः । गोष्ठं गाव इव। यद् वा नेति चार्थे। गावश्च मम व्रजमपि ग्मन् ।'

अत्रैन्द्रे सूक्ते 'प्रायेणैन्द्रे मरुतो राज्ञां च दानस्तुतयः' (अनु० २, २२) इत्युक्तत्वाद् राज्ञां दानस्तुतिरविरुद्धा। रामगोविन्दत्रिवेदी उक्तस्यैवानुवादं हिन्द्यामकरोद् यथा—

'लक्ष्मण के पुत्र ध्वन्य ने जो दीप्तिमान् और कर्मक्षम अश्व प्रदान किया था, वह हमें वहन करे। गौवें जैसे गोचरण स्थान को प्राप्त करती हैं, उसी तरह से उनके (ध्वन्य के) द्वारा प्रदत्त महान् धन संवरण ऋषि के गृह में उपस्थित हो ।'

अत्र प्रश्नोऽयं यदिदमितिवृत्तं कस्य युगस्य वर्तते ? लक्ष्मणश्च क आसीत् ? किमयं रामभ्राता ? कीदृशोऽयमपौरुषेयो वेदः ? यस्मिन्नीदृग्बुद्धिबाह्या गाथाः सन्ति।

परम् ऋषिदयानन्दकृतार्थेन न कश्चित्तादृशः प्रश्नः उद्भवति, गौरवं चाऽपि वेदस्य महत्त्वोच्छ्रायशिखरं श्रयते—

'ये मनुष्या ध्वनिषु कुशलस्य श्रेष्ठलक्षणयुतस्य मन्त्रार्थस्य ज्ञानार्थं प्रयत्नवन्तः सन्ति, ते यथा गावो गोष्ठं गच्छन्ति तथा ते मामपि प्राप्नुवन्ति।'

एवं कल्पितगाथाविश्वासी सायणाचार्यः स्वबुद्धेः समक्षे कामपि शरण्यां सरणिं नोपलेभे, यदि सोऽद्रक्ष्यद् दयानन्दकृतार्थं तदेमं स्वीकृत्यावश्यं कृतार्थमात्मानममंस्यत। पश्यन्तु

'लक्ष्मण के पुत्र ध्वन्य ने जो दीप्तिमान् और कर्मक्षम अश्व प्रदान किया था, वह हमें वहन करे। गौवें जैसे गोचरणस्थान (गोष्ठ) को प्राप्त करती हैं, उसी तरह से उनके (ध्वन्य) द्वारा प्रदत्त महान् धन संवरण ऋषि के गृह में उपस्थित हो ।'

यहाँ प्रश्न यह है कि यह इतिहास किस युग का है ? लक्ष्मण कौन थे ? क्या ये राम के भाई थे ? यह कैसा अपौरुषेय वेद है ? जिसमें ऐसी अनिश्चित और भौंडी गाथाएँ हैं।

परन्तु महर्षि दयानन्द द्वारा किये अर्थ में वैसे कोई प्रश्न ही नहीं उठते । गौरव भी वेद के महत्त्व के ऊँचे शिखर पर जा बैठता है । यथा—'जो मनुष्य ध्वनियों में कुशल, श्रेष्ठ लक्षणायुक्त वेदार्थ का ज्ञान करने के लिये प्रयत्नशील हैं, वे जैसे गायें गोष्ठ की ओर दौड़ती अर्थात् अपने बछड़ों को प्यार करती हैं, उसी प्रकार उत्तम रुचिपूर्ण मुझे प्राप्त होवें ।'

ऋषि के इस अर्थ से कल्पितगाथाविश्वासी सायणाचार्य अपनी बुद्धि के सामने किस अभीष्ट मार्ग को प्राप्त नहीं कर सकते थे। यदि सायण ने ऋषिदयानन्द द्वारा कृत अर्थ को कदाचित्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एकामन्यामृचामपि—

यत् संवत्समृभवो गामरक्षन् यत् संवत्समृभवो मा अपिंशन्।
यत् संवत्समभरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः॥
(ऋ० ४। ३३। ४)

अस्याः सायणभाष्यसारोऽयं यद् ऋभवः संवत्सरं यावन् मृतां गामरक्षन्। तस्या मांसस्य खण्डान्यकुर्वन्। वर्षं यावद् मांसखण्डानां दीप्तिमरक्षन्, एतत्सुकर्मभिर्ऋभवो देवत्वमधिजग्मुः। निष्कर्षोऽयं यद् गोकर्तनं देवत्वप्राप्तिसाधनमस्ति। परं महर्षिर्दयानन्दो 'गाः' इति पदस्य मांसार्थमकृत्वा 'मातृः' अकरोत्। तथा भावार्थोऽयं निष्कृष्टः—'ये बुद्धिमन्तो जना विद्याप्रचारं कृत्वा स्वसन्तानं सुशिक्षितं कुर्वन्ति, ते मातृणां श्रमं सफलं विदधति। समस्तसमाजश्चैवं सुखं प्राप्नोति।'

साम्प्रतं पुराणवर्णितकथानामालङ्कारिकदृशा विवेचनं कर्तुम् ऋषिपरिष्कृतां पद्धतिमन्वेतुमभिलषसीति ते भाग्यधन्यता, परं कः खलु कियता वा श्रमेण विकृतकथारूपे लोके प्रचारितां धारणामुन्मूलयितुं सद्यः सफलः प्रभवेत्? विकृतिपराकाष्ठां गतायां कथायां कः सुधारः सम्भाव्यः? अतो भवानेव बोधयेत्। यथा ब्रह्मवैवर्तपुराणे—

देखा होता, तब वे इसे स्वीकृत कर स्वयं को अवश्य कृतार्थ समझते। एक अन्य ऋचा को भी देखिये—

'यत् संवत्समृभवो०' (ऋ० ४। ३३। ४) इस ऋचा के सायण-भाष्य का सार यह है कि 'ऋभुओं ने संवत्सरपर्यन्त मरी हुई गाय की रखवाली की है। उस गाय के मांस के टुकड़े किये। वर्ष भर मांस-खण्डों की चमक की रक्षा की। इन सुकर्मों से ऋभु देवत्व को प्राप्त हुए।' निष्कर्ष यह निकला कि गाय का काटना देवत्व की प्राप्ति का साधन है; परन्तु महर्षि दयानन्द ने 'गाः' का अर्थ मांसार्थ न करके 'माता' किया है। तब भावार्थ यह निकला—'जो बुद्धिमान् जन विद्याप्रचार को करके अपनी सन्तान को सुशिक्षित बनाते हैं, वे माताओं का श्रम सफल करते हैं और सारा समाज सुख को प्राप्त होता है।

अब पुराणों में वर्णित कथाओं का आलङ्कारिक दृष्टि से विवेचन करने के लिये ऋषियों से परिष्कृत पद्धति का अनुगमन करना चाहते हो तो आप के धन्य भाग होंगे। परन्तु कौन और कितने श्रम से विकृत कथा के रूप में लोक में प्रचारित धारणा का उन्मूलन करने में शीघ्र सफल हो सकता है; क्योंकि वे कथाएँ तो बिगाड़ की चरम सीमा पर पहुँची हैं, तो कैसे सुधार सम्भव है? यह आपको ही बताना होगा। जबकि ब्रह्मवैवर्तपुराण (५४। ४८, ४९) में कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्राह्मणानां त्रिकोटिञ्च भोजयामास नित्यशः ।
पञ्चलक्षगवां मांसैः सुपक्वैर्घृतसंस्कृतैः ॥ ५४ । ४८, ४९ ॥

अत एवर्षिदयानन्द आह—'अतः सर्वे सज्जनाः पुराणोक्तकथा मूलत एव त्यजेयुः ।'

भवन्त इदमपि वदितुमर्हा यद् वयं तु विकृतिसंविदाकाराः, तत्सुधारणं विधर्मैर्वा धर्मे कृताक्षेपाणां समाधानमार्यसामाजिकानां दायित्वमस्ति, एवं स्थितौ वयमपि समाधातुं सर्वदा सन्नद्धाः स्मः। किन्त्वेककथानकमाध्यमेनास्माकमपि कादाचित्कविवशतां सदया भूत्वा विमृशन्तु—

एको विवायक आसीत्, य और्णसौत्रवस्त्राणां भृङ्गारादिकीटकर्तितानां विवयनं कुरुते स्म। एकाहे कश्चिज्जनो बहुमूल्यं कौशेयप्रावारमानयत्। तत्र न छिद्राणि, परं महाश्वभ्राणि संवीक्ष्य स विवायको विवयनसम्भावनां न्यषेधत्। शालवस्त्रधारकोऽवोचद् बन्धो ! इदं त्वस्माकं पूर्वजानां बहुमूल्यं शालमस्ति । भवत्कार्यं विवयनमस्ति, विवयतु तावत्। विवायकः प्रत्युदतरत्—श्रीमन्नहं तु छिद्राणामल्पकर्तितस्फटितानां विवयनं कुर्वे, न त्वीदृशां श्वभ्राणाम्। यावान् श्रमः पारिश्रमिको वाऽस्मिन् लगिष्यति तावता तूत्तमनूलशालमायास्यति, इदन्तु

'तीन करोड़ ब्राह्मणों को नित्य पाँच लाख गायों के घी में संस्कृत सुपक्व मांस से भोजन कराया जाता था ।'

इसीलिये महर्षि दयानन्द ने कहा—'इसलिये सब सज्जनलोग पुराणोक्त कथाओं को मूल से ही त्याग दें ।'

आप यह भी कह सकते हैं कि हम तो बिगाड़ के ठेकेदार हैं, उसको सुधारना वा विधर्मियों के द्वारा धर्म पर किये गये आक्षेपों का उत्तर देना तो आर्यसमाजियों का दायित्व है, इस पर हम भी उत्तर देने को सर्वदा सन्नद्ध हैं । किन्तु एक कहानी के द्वारा आप हमारी स्थिति की विवशता को भी दयाभरी दृष्टि से देखें—

एक रफूगर था, जो ऊनी या सूती कपड़ों के झींगुर आदि से खाये स्थानों (छेदों) की मरम्मत करता था । एक दिन एक व्यक्ति कीमती रेशमी शाल लाया, परन्तु उसमें छेद न होकर भैवकले देखकर उसने रफू करने से मना कर दिया । शालवाले ने कहा—भैया ! यह तो हमारे पूर्वजों का (बेशकीमती) बहुमूल्य शाल है, आपका काम मरम्मत करना है, रफू कर दीजिये । रफूगर ने उत्तर दिया कि श्रीमन् ! मैं छेदों और छोटे कटे-फटे की मरम्मत करता हूँ, ऐसे भैवकलों की नहीं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एकामन्यामृचामपि—

यत् संवत्समृभवो गामरक्षन् यत् संवत्समृभवो मा अपिंशन् ।
यत् संवत्समभरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥
(ऋ० ४ । ३३ । ४)

अस्याः सायणभाष्यसारोऽयं यद् ऋभवः संवत्सरं यावन् मृतां गामरक्षन् । तस्या मांसस्य खण्डान्यकुर्वन् । वर्षं यावद् मांसखण्डानां दीप्तिमरक्षन्, एतत्सुकर्मभिर्ऋभवो देवत्वमधिजग्मुः । निष्कर्षोऽयं यद् गोकर्तनं देवत्वप्राप्तिसाधनमस्ति । परं महर्षिर्दयानन्दो 'गाः' इति पदस्य मांसार्थमकृत्वा 'मातृः' अकरोत् । तथा भावार्थोऽयं निष्कृष्टः—'ये बुद्धिमन्तो जना विद्याप्रचारं कृत्वा स्वसन्तानं सुशिक्षितं कुर्वन्ति, ते मातृणां श्रमं सफलं विदधति । समस्तसमाजश्चैवं सुखं प्राप्नोति ।'

साम्प्रतं पुराणवर्णितकथानामालङ्कारिकदृशा विवेचनं कर्तुम् ऋषिपरिष्कृतां पद्धतिमन्वेतुमभिलषसीति ते भाग्यधन्यता, परं कः खलु कियता वा श्रमेण विकृतकथारूपे लोके प्रचारितां धारणामुन्मूलयितुं सद्यः सफलः प्रभवेत् ? विकृतिपराकाष्ठां गतायां कथायां कः सुधारः सम्भाव्यः ? अतो भवानेव बोधयेत् । यथा ब्रह्मवैवर्तपुराणे—

देखा होता, तब वे इसे स्वीकृत कर स्वयं को अवश्य कृतार्थ समझते। एक अन्य ऋचा को भी देखिये—

'यत् संवत्समृभवो०' (ऋ० ४ । ३३ । ४) इस ऋचा के सायण-भाष्य का सार यह है कि 'ऋभुओं ने संवत्सरपर्यन्त मरी हुई गाय की रखवाली की है । उस गाय के मांस के टुकड़े किये । वर्ष भर मांस-खण्डों की चमक की रक्षा की । इन सुकर्मों से ऋभु देवत्व को प्राप्त हुए ।' निष्कर्ष यह निकला कि गाय का काटना देवत्व की प्राप्ति का साधन है; परन्तु महर्षि दयानन्द ने 'गाः' का अर्थ मांसार्थ न करके 'माता' किया है । तब भावार्थ यह निकला—'जो बुद्धिमान् जन विद्याप्रचार को करके अपनी सन्तान को सुशिक्षित बनाते हैं, वे माताओं का श्रम सफल करते हैं और सारा समाज सुख को प्राप्त होता है ।

अब पुराणों में वर्णित कथाओं का आलङ्कारिक दृष्टि से विवेचन करने के लिये ऋषियों से परिष्कृत पद्धति का अनुगमन करना चाहते हो तो आप के धन्य भाग होंगे । परन्तु कौन और कितने श्रम से विकृत कथा के रूप में लोक में प्रचारित धारणा का उन्मूलन करने में शीघ्र सफल हो सकता है; क्योंकि वे कथाएँ तो बिगाड़ की चरम सीमा पर पहुँची हैं, तो कैसे सुधार सम्भव है ? यह आपको ही बताना होगा । जबकि ब्रह्मवैवर्तपुराण (५४ । ४८, ४९) में कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्राह्मणानां त्रिकोटिञ्च भोजयामास नित्यशः ।
पञ्चलक्षगवां मांसैः सुपक्वैर्घृतसंस्कृतैः ॥ ५४ । ४८, ४९ ॥

अत एवर्षिदयानन्द आह—'अतः सर्वे सज्जनाः पुराणोक्तकथा मूलत एव त्यजेयुः ।'

भवन्त इदमपि वदितुमर्हा यद् वयं तु विकृतिसंविदाकाराः, तत्सुधारणं विधर्मैर्वा धर्मे कृताक्षेपाणां समाधानमार्यसामाजिकानां दायित्वमस्ति, एवं स्थितौ वयमपि समाधातुं सर्वदा सन्नद्धाः स्मः । किन्त्वेककथानकमाध्यमेनास्माकमपि कादाचित्कविवशतां सदया भूत्वा विमृशन्तु—

एको विवायक आसीत्, य और्णसौत्रवस्त्राणां भृङ्गारादिकीटकर्तितानां विवयनं कुरुते स्म । एकाहे कश्चिज्जनो बहुमूल्यं कौशेयप्रावारमानयत् । तत्र न छिद्राणि, परं महाश्वभ्राणि संवीक्ष्य स विवायको विवयनसम्भावनां न्यषेधत् । शालवस्त्रधारकोऽवोचद् बन्धो ! इदं त्वस्माकं पूर्वजानां बहुमूल्यं शालमस्ति । भवत्कार्यं विवयनमस्ति, विवयतु तावत् । विवायकः प्रत्युदतरत्—श्रीमन्नहं तु छिद्राणामल्पकर्तितस्फटितानां विवयनं कुर्वे, न त्वीदृशां श्वभ्राणाम् । यावान् श्रमः पारिश्रमिको वाऽस्मिन् लगिष्यति तावता तूत्तमनूत्नशालमायास्यति, इदन्तु

'तीन करोड़ ब्राह्मणों को नित्य पाँच लाख गायों के घी में संस्कृत सुपक्व मांस से भोजन कराया जाता था ।'

इसीलिये महर्षि दयानन्द ने कहा—'इसलिये सब सज्जनलोग पुराणोक्त कथाओं को मूल से ही त्याग दें ।'

आप यह भी कह सकते हैं कि हम तो बिगाड़ के ठेकेदार हैं, उसको सुधारना वा विधर्मियों के द्वारा धर्म पर किये गये आक्षेपों का उत्तर देना तो आर्यसमाजियों का दायित्व है, इस पर हम भी उत्तर देने को सर्वदा सन्नद्ध हैं । किन्तु एक कहानी के द्वारा आप हमारी स्थिति की विवशता को भी दयाभरी दृष्टि से देखें—

एक रफूगर था, जो ऊनी या सूती कपड़ों के झींगुर आदि से खाये स्थानों (छेदों) की मरम्मत करता था । एक दिन एक व्यक्ति कीमती रेशमी शाल लाया, परन्तु उसमें छेद न होकर भैवकले देखकर उसने रफू करने से मना कर दिया । शालवाले ने कहा—भैया ! यह तो हमारे पूर्वजों का (बेशकीमती) बहुमूल्य शाल है, आपका काम मरम्मत करना है, रफू कर दीजिये । रफूगर ने उत्तर दिया कि श्रीमन् ! मैं छेदों और छोटे कटे-फटे की मरम्मत करता हूँ, ऐसे भैवकलों की नहीं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अवकरगृह एव क्षेपणीयं विद्यते । एवमेव भवद्विकारितेऽस्माभिः सुधारोऽसम्भाव्योऽस्मिन् पौराणिकविचारजाले ।

पृ० १५७८, पं० १०—यदाह—"अहल्या रात्रिरित्यादिरूपकं न सिद्धान्तबाधकम्, पुराणप्रतिपादितकथाया अपि तदभिप्रायत्वाभ्युपगमात् ।" इति मृषावादित्वम् । पौराणिकैः पुराणकथानां प्रचारकैर्ऋषेः प्राक् कदाप्यालङ्करिता स्वीकृताऽऽसीत् चेन्निदर्शनीयम् । सम्प्रति रामचन्द्ररूपिचन्द्रकिरणपादस्पर्शेन जीवनमहल्यायाः समर्थ्यते । तत्र पृच्छामि त्वां किं वस्तुतो रामस्य सत्ताम् अथवा तत्पादस्पर्शनजीवितामहल्यां न मनुषे ? इयं किं लोकप्रसिद्धिर्मिथ्यैव ? किं गोतमस्याप्यस्तित्वमहल्याया अपि वास्तविकं न मनुषे ? द्वयोरपि वास्तविकास्तित्वे तदाचरितचेष्टायाश्चाप्यस्तित्वे इन्द्रस्य स्वदेवस्य शरीरधारिणो जारत्वं मन्यसे न वा ? सम्प्रति सहस्रक्षीणि स्वीकुरुषे न वा ?

जितना श्रम और पारिश्रमिक इसमें लगेगा, उतने में तो उत्तम सेया शाल आ जायेगा । अब यह तो कूड़ाघर में फेंकने के योग्य ही है । इसी प्रकार आपके इस बिगाड़े को हम नहीं सुधार पायेंगे ।

पृ० १५७८, पं० १०—यह कथन कि "अहल्या रात्रि है' इत्यादि रूपक सिद्धान्तबाधक नहीं है, यह बात तो पुराणप्रतिपादित कथा में भी स्वीकृत की जा सकती है ।" ठीक नहीं है; क्योंकि क्या कोई बता सकता है कि ऋषि से पहले किसी ने भी इन पौराणिक कथाओं में रूपक होने की बात स्वीकार की थी, हाँ, तो उदाहरण देना चाहिये । इस समय रामचन्द्ररूप चन्द्रमा के पाद(किरण) के स्पर्श से अहल्या के पत्थररूप से बदलकर जीवित स्त्री हो जाने की बात कही गयी ।

हम पूछते हैं कि राम की वास्तविक सत्ता और उनके चरण-रज लगने से अहल्या का जीवित स्त्री रूप सच्चा है या कल्पित केवल रूपक ? क्या यह लोकप्रसिद्धि मिथ्या है ? क्या अहल्या और गोतम ऋषि को वास्तविक शरीरधारी मानते हो या नहीं ? गोतम ऋषि का चन्द्ररूप और वास्तविक अहल्या स्त्री शरीरधारी होने पर रात्रि का रूपक यहाँ पर कैसे सही बैठेगा ? दोनों रूपों में वास्तविकता और उनके उस रूप के चरित्र में वास्तविकता और इन्द्र को सूर्य न मानकर क्या शरीरधारी देव इन्द्र व्यभिचार करनेवाला कोई था, ऐसा मानते हो या नहीं ? आप कहोगे दोनों ही थे । रूपक में सूर्य, चन्द्र, रात्रि = इन्द्र, गोतम और अहल्या भी थे तो उनका व्यभिचार करना भी सिद्ध हो गया । इन्द्र की हज़ार आँखें मानना भी महा गपोड़ा है, यदि आँखें किरण हैं तो इन्द्र भी सूर्य ही हुआ । अब बताइये, इस बिगाड़ में कैसे सुधार किया जा सकता है । अब वे हजार आँखें किरणें ही हैं या अन्य कुछ ? वस्तुतः इस कुबुद्धि का पौराणिकों पर कोई उत्तर नहीं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५७९, पं० १६—"एवमेवेन्द्रः कश्चिद् देहधारी देवराज आसीत्। तस्य त्वष्टुरपत्येन वृत्रासुरेण सह युद्धमभूत्। वृत्रासुरेणेन्द्रो निगलितोऽतो देवानां महद्भयमभूत्। ते विष्णुशरणं गताः। विष्णुरुपायं वर्णितवान्। मया प्रविष्टेन समुद्रफेनेनायं हतो भविष्यतीति। ईदृश्यः प्रमत्तगीतवत् प्रलपिताः कथाः पुराणाभासादिषु नवीनेषु ग्रन्थेषु मिथ्यैव सन्तीति भद्रैर्विद्वद्भिर्मन्तव्यम्। कुतः ? एतासामप्यलङ्कारवत्त्वात्' इति, तदपि तुच्छम्, अलङ्कारवत्त्वस्य मिथ्यात्वाऽप्रयोजकत्वात्।"

इत्यपि सर्वमल्पबुद्धिभ्रामकत्वादप्रशस्तम्, वाक्यस्य याथार्थ्यानवबोधनात्। मिथ्यात्वे प्रयोजकत्वे प्रमत्तगीतवत् कथानां प्रलपितत्वम्। या याः कथाः प्रमत्तगीतवत् प्रलपितास्तास्ता मिथ्यैव। तदैवं भद्रैर्विद्वद्भिर्मन्तव्यत्वे अलङ्कारवत्त्वं हेतुः। अलङ्कारवत्त्वात् तत्र कथासु न वास्तविकता, अपितु आलङ्कारिकतैव, कथाया वास्तविकत्वे वेदे नश्वरेतिहासमान्यतायाम-पौरुषेयत्वासिद्धेः। अथवा नायमलङ्कारशब्दो मतुबन्तः। किं तर्हि ? वत्यन्तः। तथा सति शब्दार्थ-

---

पृ० १५७९, पं० १६—"इसी प्रकार—'इन्द्र कोई देहधारी देवराज था। उसका त्वष्टा के अपत्य वृत्रासुर से युद्ध हुआ। वृत्रासुरने इन्द्र को ऐरावत हाथी सहित निगल लिया। इसलिये देवताओं को महाभय उत्पन्न हुआ। वे विष्णु की शरण में गये। विष्णु ने उसके मारने का उपाय बताया कि मैं समुद्र के फेन में प्रविष्ट होऊँगा, फिर उस फेन से मारने पर वृत्रासुर मर जायेगा।' ये ऐसी पागलों की सी बतायी हुई पुराणग्रन्थों की कथा सब मिथ्या हैं। श्रेष्ठ लोगों को उचित है कि इनको कभी न मानें; क्योंकि इनमें तो आलङ्कारिक वर्णन है।" पारिजातकार का कथन है कि—"यह भूमिकालेख निराधार है; क्योंकि आलङ्कारिकता के होते हुए कोई बात मिथ्या नहीं हो जाती।"

परन्तु करपात्रीजी का यह कथन भी भ्रामक होने से ठीक नहीं है; क्योंकि ऋषि के वाक्य को इन्होंने न समझकर या छल से उल्टे रूप में प्रस्तुत किया है। मिथ्या होने का प्रयोजक यहाँ कथाओं का पागलों की भाँति प्रलाप है। जो-जो कथाएँ पागलों के समान प्रलपित होंगी, वे सभी मिथ्या होंगी। इस प्रकार यहाँ पर व्याप्ति का साहचर्य नियम सुघटित है। ऐसा भद्र विद्वानों को मानने में अलङ्कारवाली होना कारण है।

ये कथाएँ अलङ्काररूप में प्रस्तुत की गयी हैं, अतः बिगाड़भरी कथाओं का सत्यांश ढककर गल्प की प्रधानता पर लोगों का विश्वास जम गया। कथाओं और उनके पात्र शरीरधारी यदि उत्पन्न हुए वास्तविक शरीरधारी मान लिये गये और उनका विवरण वेदों में वर्णित मान लिया गया तो नश्वर इतिहास के होने से वेदों की अपौरुषेयता सिद्ध नहीं हो सकेगी। 'अलङ्कारवत्त्वात्' इसे मतुबन्त न मानकर वतिप्रत्ययान्त माना जाये तो यह अर्थ हुआ कि ये कथायें रसशैली को

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

योरस्थिरा भावा इमे रसशैल्यादीनुपकुर्वन्तोऽङ्गदादिवद् धर्माः शोभातिशायिनः प्रयुज्यन्ते ।

पृ० १५८०, पं० ३—"मन्त्रेषु ब्राह्मणेषु च बहुत्र त्वयाऽलङ्कारा अभ्युपगताः । न तावताऽपि तेषां तत्प्रतिपाद्यार्थानां वाऽलङ्कारवत्त्वेऽपि त्वया मिथ्यात्वमवगम्यते । किञ्च, कतमः कीदृशश्चालङ्कारः ? इत्यपि वक्तव्यम् । तदवचनं त्वदुक्तेरेवाऽप्रामाण्यमावेदयति ।" इत्यपि यत्किञ्चिदेव, मन्त्रेषु ब्राह्मणेषु वा यत्राऽप्यलङ्काराः स्वीकृताः, तत्र त्वलङ्कारमात्रं न च नश्वरेतिहासवर्णनम् । न तावान् महति कार्ये व्यापृतत्वाद् भाष्यकारस्यावकाश आसीद् येन सर्वं सलक्षणविवरणं व्याख्यानं सम्भवति स्म । नैवानपेक्षितकथनेन किमप्यप्रामाण्यमुपयाति । अत एतस्य वचनस्य नौचित्यम् ।

पृ० १५८०, पं० ७—"इन्द्रस्य सूर्यस्य परमेश्वरस्य वा' इत्युक्तम्, तदपि न युक्तम्, असामञ्जस्यात् । यद्यत्र परमेश्वरपदं शक्तिविधया परमात्मनि शक्तम्, तदा वक्ष्यमाणग्रन्थस्य

सजानेवाली अलङ्कारमात्र हैं, घटित घटनाएँ नहीं हैं । इस प्रकार समझना चाहिये कि वेद और ब्राह्मणग्रन्थों में निर्दिष्ट आलङ्कारिक वर्णन के अतिरिक्त जितना अधिक अंश पुराणों के द्वारा कल्पित गढ़ा गया है, वह सब मिथ्या है । जितने में अलङ्कार घटित होता है, वह ठीक है । शेष शरीरधारी इन्द्र, वज्र और अहल्या की कथा कल्पित है ।

पृ० १५८०, पं० ३—"मन्त्रों और ब्राह्मणों में अनेक स्थानों पर आपने अलङ्कार माने हैं, किन्तु इतने से आपने उनको कहीं भी मिथ्या नहीं माना है । किसी बात को आलङ्कारिकता से बताने से पहले आपको उस अलङ्कार का परिचय बताना चाहिये कि यह कौनसा अलङ्कार है ? ऐसा न करने से तो आपकी बात ही मिथ्या सिद्ध हो जाती है ।"

श्री करपात्रीजी का यह कथन तुच्छ और अविचारित है; क्योंकि वहाँ आलङ्कारिक रूप में वर्णन है । वहाँ नश्वर इतिहास का वर्णन नहीं है । भाष्यकार महर्षि दयानन्द को पाँच सहस्र वर्षों से फैले अन्धविश्वासों को दूर करना, वेद-भाष्य करना आदि महान् कार्यों की व्यस्तता थी । उन्हें इतना अवकाश कहाँ था कि वे अज्ञानी या नये विद्यार्थियों के लिये सम्पूर्ण व्याकरण, साहित्य आदि का उल्लेख करने के साथ-साथ अलङ्कारों के लक्षण और विवरण भी प्रस्तुत करते । जब कि नियम यह है कि वेदों या उनकी भूमिका के अध्ययन के लिए जिज्ञासु को साङ्गोपाङ्ग आदि समस्त वाङ्मय पढ़कर परिपक्व होना चाहिये । आप यूँ ही आक्षेप करने को उतावले हो गये ।

पृ० १५८०, पं० ७—"अपि च स्वामी दयानन्द ने इन्द्र का अर्थ सूर्य या परमात्मा किया है, यह भी उचित नहीं; क्योंकि इसकी प्रस्तुत मन्त्र में कोई सङ्गति नहीं बैठती । यदि दयानन्द प्रदर्शित परमेश्वर पद शक्ति वृत्ति से परमात्मा अर्थ का बोधक है, तो आगे के मन्त्रों से प्रस्तुत

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मन्त्रार्थस्यासङ्गतिरेव स्यात्। तत्र सर्वत्रापि प्रकरणे दृश्यसूर्यस्यैवाभिहितत्वात्।" इत्याद्यपि न बुद्धिं सङ्गच्छते, इन्द्रशब्दस्य सूर्याद्यर्थवत्त्वात्, निरुक्तेऽनेकनिर्वचनत्त्वात्। यथा—

"इरां दृणातीति वा, इरां ददातीति वा, इरां दधातीति वा, इरां दारयत इति वा, इरां धारयत इति वा, इन्दवे द्रवतीति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा, इन्दतेर्वैश्वर्यकर्मणः।" (१०।८)

अध्यात्मपक्षार्थेऽभीष्टे परमेश्वरस्य इत्यर्थस्यापि सम्भवः, सर्वस्य मन्त्रस्याऽपि तथा व्याख्यानसम्भवात्। नहि किमप्यसामञ्जस्यम्। आधिदैविके भौतिके वा पक्षेऽग्रिममन्त्राणामर्थ-विधाने इन्द्रशब्देन सूर्योऽर्थो गृह्यते, तत्र न काऽपि विप्रतिपत्तिः। सूर्यादीनामधिष्ठातृचेतनदेव-कल्पने न मानम्।

मन्त्र के अर्थ की कोई सङ्गति नहीं बैठेगी; क्योंकि उन मन्त्रों में सब जगह दिखाई पड़नेवाले सूर्य का ही उल्लेख मिलता है।"

यह सारा कथन भी बुद्धिसङ्गत नहीं है। इन्द्र शब्द सूर्य, वायु, परमेश्वरादि अर्थवाला है। श्रीमन्! वेद को, जिसने निरुक्तादि शास्त्र नहीं पढ़े हैं, ऐसा अल्पबुद्धि तो समझ ही नहीं सकता। निरुक्त में देखिये, इतने निर्वचन दिये हैं, जो अर्थ अभीष्ट मुख्यरूप से होगा, तद्वाचक निर्वचन से वह वाच्यार्थ मुख्याभिधा शक्ति से अभिहित होगा। जैसे—

'इरां दृणाति' इस निर्वचन से अन्न को क्षेत्र में बोई हुई अवस्था में वृष्टि निपात से उद्भिन्न करने के कारण मुख्यतया अन्न का निमित्तीभूत मेघ अर्थ का ग्रहण होगा। जैसाकि 'अददुरुत्सम्०' मन्त्र में गृहीत है। 'इन्धे भूतानि' इस निर्वचन से जीवात्मा को प्राणों से दीप्त करनेवाला परमात्मा का ग्रहण होगा अथवा ऐश्वर्य कर्म करने से भी परमात्मा का ग्रहण होगा। यह संक्षेप से निदर्शित किया गया है।

अध्यात्मपक्षार्थ के अभीष्ट होने से परमेश्वर इस अर्थ का भी ग्रहण हो जायेगा और समस्त मन्त्रार्थ भी अध्यात्म में घटित हो जायेगा। यहाँ वह अर्थ भी दिखला पाना अल्प समय होने से अनपेक्षित है। अतः अर्थ में कोई असामञ्जस्य नहीं है, असामञ्जस्य (असन्तुलन) केवल करपात्रीजी के मस्तिष्क में है। आधिदैविक या भौतिक पक्ष में अग्रिम मन्त्रों का अर्थ करने में निर्वचनों के आधार पर सूर्यार्थ ग्रहण करने में कोई विप्रतिपत्ति नहीं है। सूर्यादि के कोई चेतन अधिष्ठातृ देव की कल्पना करने में कोई शास्त्रीय प्रमाण नहीं है, वे देव जडात्मक हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिदयानन्देन 'इन्द्रस्य नु वीर्याणि०' इति मन्त्रस्य भाष्ये 'इन्द्रेण सूर्येण अहेर्मेघस्य हिंसनं भूमिनिपातनम्' इत्यर्थः कृतः। 'पर्वतानां मेघानामेव सकाशान्नद्यः प्रवाहिता भवन्ति' इत्यात्मकार्थेऽयमाक्षिपति पारिजातकारः—

पृ० १५८१, पं० ९—"इति च व्याख्याय देवानामसुराणां चापलापाय यतितम्, तदप्यविचारितरमणीयम्, तादृशस्य भौतिकस्यार्थस्यैव बुबोधयिषितत्वे वृत्रासुरादिप्रयोगस्य नैरर्थक्यापातात्। पर्वतशब्दस्य मुख्यार्थबाधं एव मेघार्थता युक्ता। किञ्च, दयानन्दो मन्त्रं मेघमहिमत्वेन वर्णितवान् तमेव च पर्वते मेघे श्रितमित्युक्तवानिति कथं न पूर्वापरविरोधः ? हिन्दीव्याख्यानेऽपि स एव मेघ आकाशादधः निपत्य पर्वते पर्वतमर्थान्मेघमण्डलं पुनराश्रयते। नहि मेघ एव मेघमण्डलमाश्रयत इति युक्तम्। शब्दार्थस्तु प्रायः सायणभाष्यादेव चोरितः।"

एष लेखो भ्रान्तिपूर्णः, अर्थाभिप्रायं स्वैरितया आमोट्य अन्यथा प्रस्तावनात्। इह च नहि पुराणकल्पितस्वरूपा देवा असुरा वा मन्यन्ते, न वा तेषां निवासः, प्रदर्शितयुद्धस्वरूपमपि

ऋषि दयानन्द ने 'इन्द्रस्य नु०' मन्त्र के भाष्य में 'इन्द्र अर्थात् सूर्य के द्वारा मेघ का हिंसन कर भूमि पर गिरा दिया गया' यह अर्थ किया है और 'पर्वत अर्थात् मेघों से नदियाँ प्रवाहित हुईं' इस अर्थ पर पारिजातकार का आक्षेप है—

पृ० १५८१, पं० ९—"ऐसी व्याख्या करके वे देवता और असुरों की सत्ता को अस्वीकार कर देते हैं, किन्तु उनका यह सारा मन्तव्य ढकोसलामात्र है। यदि इसी तरह का भौतिक अर्थ ही मन्त्र का प्रतिपाद्य विषय माना जाय, तो उसके लिये वृत्र, असुर प्रभृति पदों के प्रयोग की आवश्यकता नहीं रहेगी। पर्वत शब्द के मुख्यार्थ का बाध मानने के बाद ही उसका अर्थ लक्षणा के द्वारा मेघ किया जा सकता है। इस प्रसङ्ग में यह भी विचारणीय प्रश्न है कि दयानन्द पहले तो मन्त्र में मेघ की महिमा का वर्णन करते हैं और फिर उसी मेघ को पर्वत पर आश्रित मानते हैं। इसमें क्या स्पष्ट ही पूर्वापर विरोध नहीं है ? हिन्दी-व्याख्या में भी बताया गया है कि 'वही मेघ आकाश से गिरकर पहाड़ पर पुनः मेघमण्डल का आश्रय लेता है।' इस स्थल में विचारणीय बात है कि मेघ ही मेघमण्डल का आश्रय कैसे लेगा ? इसके अतिरिक्त इन मन्त्रों का अर्थ तो प्रायः सायणभाष्य से ही चुराया गया है।"

श्री करपात्र का यह सारा लेख भ्रान्तिपूर्ण व भ्रामक है; क्योंकि अर्थ के अभिप्राय को मनमाने ढंग से मोड़कर प्रस्तुत किया गया है। यहाँ मन्त्र में पुराणकल्पित स्वरूपवाले देवता या असुर नहीं माने गये हैं और न उस प्रकार का उनका लोहा, चाँदी और सोने के भवन और प्रदर्शित युद्धों का ही वर्णन है, यह तो अलङ्कारमात्र है, शरीरधारी असुर व देव नामवाले हम सब के समान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वास्तविकं सम्भवति। वस्तुतो देवास्तु इन्द्रादयः। सूर्यादिवाचकाः, असुरशब्दोऽपि मेघप्राणादि-वाचकः। त एव प्रजापतेः परमेश्वरस्य प्रजाः। तथाविधदेहधारितया एषां च वेदेषु वर्णनोपलब्ध्याऽनित्यत्वमापतेत् पौरुषेयत्वं वाऽपि, एतदुत्पत्त्यनन्तरं वेदोत्पत्त्यापातात्, एवं-विधभौतिकार्थेऽपि वृत्रासुरादिशब्दैर्मेघार्थवाच्यत्वे धात्वाधारे आच्छादनाद्यर्थाभीष्टत्वाद् वृत्रादीनां प्रयोगस्यावश्यकप्रयोजनवत्त्वात्।

महोदय ! पर्वतशब्दस्य पूरणार्थक 'पर्व' धातोः पृणातेः प्रीणातेर्वा निष्पन्नत्वादेव मुख्यार्थ इह मेघ एव भविष्यति। नहि पूर्वम् अहिपर्वतशब्दयो रूढार्थे शैले सूर्ये वा गृहीते सति पश्चाल्लक्षणया मेघार्थः कर्तव्यः। अथवा रूढिगताविह अहिपर्वतौ शब्दौ स्तः, तयोर्मुख्यार्थ-बाधे उपस्थिते लक्षणया सर्वार्थस्यासङ्गततया मेघार्थः क्रियते। तथापि न काचिद् विप्रतिपत्तिः।

अस्मिन् प्रसङ्गे यदयं पूर्वापरविरोधं दर्शयितुमुद्यतस्तत्त्वेतस्य दुःसाहसमात्रम्, 'अहन्नहिं पर्वते शिश्रियाणम्०' इति मन्त्रस्य यथार्थदर्शनात्। तत्रावबोधनीयोऽभिप्रायः प्रकटितो यत् पूर्वमाकाशस्थितमेघहननेन जलं पृथिव्याः समुद्रे प्रवहदेकत्र जायते, ततो वाष्पप्रक्रियया जलं

कोई युद्ध करनेवाले नही हैं। वास्तव में इन्द्र आदि शब्द सूर्यादि के वाचक हैं, असुर शब्द भी मेघ-प्राण आदि का वाचक है। वे ही प्रजापति परमेश्वर की प्रजा हैं। मनुष्यवत् शरीरधारी होने से और उनका वेदों में वर्णन उपलब्ध होने पर वेदों की अनित्यता और पौरुषेयता होने लगेगी; क्योंकि फिर तो इनकी उत्पत्ति के अनन्तर वेदों की उत्पत्ति मानी जायेगी। इस प्रकार के भौतिकादि अर्थों में वृत्रासुर आदि शब्द मेघ आदि के वाचक हैं, उनके धात्वाधार होने के कारण आच्छादन आदि अर्थ अभीष्ट होने के कारण वृत्रादि शब्दों का प्रयोग करना सप्रयोजन है।

यह कहना कि 'ऊपर मेघों की महिमा का वर्णन किया गया है, उन्हीं का मेघों पर आश्रित होना कहना ठीक नहीं' भी बुद्धि और तर्क से शून्य है; क्योंकि यह किस शास्त्र का नियम है कि जिसका महिमा का वर्णन हो, वह कहीं आश्रित नहीं हो सकता ? महोदय ! पर्वत शब्द की निष्पत्ति पूरणार्थक 'पर्व', पालनपूरणार्थक 'पृ' तथा तर्पणार्थक 'प्रीञ्' धातु से ही होने से यहाँ मुख्यार्थ मेघ है। "पहले अहि या पर्वत शब्द से सर्प और शैल अर्थ उपस्थित होने व बाध होने पर लक्षणा से मेघ अर्थ लिया जायेगा" यह कथन ठीक नहीं; क्योंकि अहि का वाच्य सर्प और मेघ दोनों हैं, अथवा लक्षणा से भी मेघ अर्थ लेने में कोई दोष नहीं है।

इस प्रसङ्ग में ये जो पूर्वापरविरोध दिखाने को उद्यत हो रहे हैं, वह इनका दुःसाहसमात्र है। 'अहन्नहिं पर्वते शिश्रियाणम्०' इस मन्त्र से यथार्थ स्पष्ट है। यहाँ यह आशय समझने योग्य है कि पहले आकाशस्थित मेघ के हनन से बरसा जल समुद्र में एकत्र होता है, फिर वाष्प-प्रक्रिया के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पुनः पर्वतं मेघमण्डलमाश्रयते। अत्र नास्ति कश्चिद् विरोधः। एषा तु महती प्रतारकता यदयं भाषामपि परिवर्त्य प्रस्तौति। भूमिकाऽर्थभाषावाक्यस्थितिरेवम्—"फिर वही मेघ आकाश में से नीचे गिरके पर्वत अर्थात् मेघमण्डल का पुनः आश्रय लेता है।" अत्रानेन 'पर्वत अर्थात्' इदं परिवर्त्य 'पहाड़ पर' इति योजितम्।

यच्चाह—"मेघ ही मेघमण्डल का आश्रय कैसे लेगा" श्रीमन्! कदापि तु बुद्धेः प्रयोगो विधेयः। यदा मेघा नीचैर्निपतन्ति जलप्रवाहरूपे तदा तदेव जलं वाष्पीभूतं मेघमण्डलमाश्रित्य मेघरूपे तिष्ठति।

हे चोरशिरोमणे! भवता वेदार्थपारिजातस्य प्रारम्भे न्यायादिशास्त्रेभ्यो यत् सर्वं स्वकीयं मत्वाऽलेखि, तच्चौर्यम्। भवता वेदार्थपारिजाते घनश्यामादिना तव पूर्वजैर्नोत्थापिताः प्रश्ना एवेह चोरयित्वा विनिवेशिताः, नास्ति बह्वत्र त्वन्मतिमौलिकमधिकम्। केवलं जनसामान्य-मिथ्याप्रभावजनकत्वमुद्दिष्टम्।

भूमिकायां सायणस्यानुकृतिर्नेह विद्यते। भवतारोप्यते यत् शब्दार्थश्चोरितः, तवानुवादकोऽन्यथा ब्रुवन्नास्ते यन्मन्त्रार्थश्चोरितः। अतो भिन्नारोपे न सिध्यति वादस्ते मिथो

द्वारा वह जल पर्वत अर्थात् मेघमण्डल के आश्रयस्थान को प्राप्त होता है। भूमिका की आर्य भाषा में पाठ इस प्रकार है—"फिर वही मेघ आकाश में से नीचे गिरके पर्वत अर्थात् मेघमण्डल का पुनः आश्रय लेता है।" इस वाक्य में जो 'पर्वत अर्थात्' यह भाग है, उस के स्थान पर इन्होंने 'पहाड़ पर' जोड़कर बेजोड़ छल किया है।

यह कहना कि—"मेघ ही मेघमण्डल का आश्रय कैसे लेगा" ठीक नहीं। श्रीमान् जी! कभी तो बुद्धि से काम लिया करो। जब मेघ जलप्रवाह के रूप में नीचे पृथ्वी पर गिरते हैं, तब वही जल सूर्य के ताप से वाष्प बनकर मेघमण्डल के स्थान का आश्रय मेघ बनकर लेते हैं।

हे चौरशिरोमणे! आपने वेदार्थपारिजात के प्रारम्भ में वात्स्यायन आदि भाष्यों से समग्र नकल कर स्व रचना के रूप में प्रस्तुत किया है, अतः चौर्य तो आपने किया है और घनश्यामादि के उद्भावित प्रश्नों को इस ग्रन्थ में उतार लिया तथा उनका नाम भी कहीं नहीं लिया, क्या यह चोरी नहीं है? इसमें आपकी गाँठ का मूल धन कुछ नहीं है, केवल जन सामान्य पर झूठी धाक जमाना है।

यह कहना मिथ्या है कि सायण का स्वामी दयानन्द ने अनुकरण किया है। क्या आप यह मानने को सन्नद्ध हैं कि यह खण्डन आप सायण का कर रहे हैं? इससे सिद्ध है कि महर्षि दयानन्द सायण से भिन्न अर्थ कर रहे हैं। आप कहते हैं कि स्वामी जी ने शब्दार्थ चुराया और आपका अनुवादक कहता है कि मन्त्रार्थ चुराया। अतः दोनों के बयान भिन्न होने पर यह आरोप सिद्ध

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वर्णनविरोधात्। अविरोध आशयश्चेत् सायणानुसारित्वे खण्डनं सायणस्य। सायणभिन्ने तु मन्त्रार्थे सर्वथा समाहित एवास्माभिर्ऋषिपक्षः।

पृ० १५८१, पं० १७—"त्वद्रीत्या जडस्य सूर्यस्येन्द्रत्वे कथं प्रशंसनमुपपद्यते?" इति वचनं बुद्धिविरुद्धम्, स्तुतिर्हि नाम गुणानां प्रकाशनं प्रशंसनं वा। आयुर्वेदस्य निघण्टुः समस्तौषधीनां हरीतक्यादीनां रत्नमण्यादीनां च गुणानेव शंसति। तदपि समग्रमुपपन्नम्। नहि स्तुतिर्हि चेतनस्य गुणानामेव भवति।

पृ० १५८२, पं० १४—"अहन् वृत्रं वृत्रतरं०' 'अपादहस्तो अपृतन्यदिन्द्र०'—'इन्द्रशत्रुरिन्द्रोऽस्य शमयिता शातयिता वा, तस्मादिन्द्रशत्रुः। तत्कः? वृत्रो मेघ इति नैरुक्ताः। त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। वृत्रं जघ्निवान् अपववार तत्। वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा। यदवृणोत् तद् वृत्रस्य वृत्रत्वम्। यदवर्तत यदवर्धत तद्वा वृत्रस्य वृत्रत्वम्। यथा कस्यचिन् मनुष्यादेरसिना छिन्नं सदङ्गं पृथिव्यां पतति, तथैव स मेघोऽपशयत। पृथिव्यां शयान इवेन्द्रेण सूर्येणापादहस्तो व्यस्तो भिन्नाङ्गकृतो वृत्रो मेघो भूमावशयत्। (निघण्टौ १। १० वृत्र इति मेघस्य नाम)। त्वष्टा सूर्यस्तस्यापत्यमासुरो मेघः। कुतः? सूर्यकिरणद्वारैव रसजलसमुदाय-भेदेन यत्कणीभूतं जलमुपरि गच्छति, तत्पुनर्मिलित्वा मेघरूपं भवति, तस्यैवासुरसंज्ञत्वात्।'

नहीं होता। यदि आप कहो कि दोनों में कोई विरोध नहीं है, तो सायणानुसारी होने पर सायण का खण्डन हुआ। यदि सायण से अर्थ भिन्न है, तो हमने ऋषिपक्ष का समाधान कर दिया।

पृ० १५८१, पं० १७—"आपकी रीति से जब जड़ सूर्य ही इन्द्र है, तो उसकी क्या प्रशंसा हो सकती है?" आपका यह वचन बुद्धिविरुद्ध है; क्योंकि स्तुति से तो गुणों का प्रकाशन या प्रशंसन होता है। आयुर्वेद का निघण्टु समस्त हरीतकी आदि और रत्न मणियों आदि का गुणप्रशंसन करता ही है। अतः सब ऋषिकथन उपपन्न है। केवल चेतन के गुणों का कथन ही स्तुति नहीं होती।

पृ० १५८२, पं० १४—"अहन् वृत्रं वृत्रतरं०' इन मन्त्रों को और निरुक्तवचनों को स्वामी दयानन्द ने उद्धृत करते हुए जो व्याख्या की है कि—'जब सूर्य उस अत्यन्त गर्वित मेघ को छिन्न-भिन्न करके पृथिवी पर ऐसे गिरा देता है, जैसे कि कोई मनुष्य आदि के शरीर को काट-काटकर गिराता है, तब वह वृत्रासुर भी पृथ्वी पर गिरा हुआ मृतक के समान शयन करनेवाला हो जाता है। निघण्टु में मेघ का नाम वृत्र है। वृत्र का शत्रु अर्थात् निवारक सूर्य है। सूर्य का नाम त्वष्टा है। उसकी सन्तान मेघ है; क्योंकि सूर्य की किरणों के द्वारा जल कण-कण होकर ऊपर को जाकर वहाँ मिलकर मेघरूप हो जाता है। मेघ का नाम वृत्र इसलिये है कि वह स्वीकार करने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादि व्याख्यानं नोचितम्, भौतिकस्यार्थस्य तथाभूतस्य गौणस्यार्थस्य सत्त्वेऽपि यथा-श्रुतार्थस्येतिहासपुराणादिवर्णितस्यार्थस्य बाधे मानाभावात्। नहि यस्य हस्तपादादीन्यङ्गानि सन्ति, तस्य भिन्नाङ्गता अपादहस्तता च सम्भवति।"

इत्यप्यकिञ्चित्करम्, बुद्ध्यसङ्गतत्वात्, इतिहासपुराणादिवर्णितस्य लोकप्रसिद्धस्यार्थस्य वेदोत्पत्तेः प्रागसत्त्वात्, तदसत्त्वे च वेदार्थेनानुगमनस्यासम्भवादनौचित्याच्च।

अहन्निति मन्त्रार्थकरणे अहिशब्दस्यानेकार्थत्वे, यथा—'अहिर्वृत्रासुरे सर्प पुंसीहोद्यमवाञ्छयोः' इति मेदिनी, वृत्रासुरादन्यार्थे नोपपद्यते। बाधे सति लक्षणया मेघार्थ एव ग्रहीष्यते। तथा सत्येवमर्थो विशिष्टः—

योग्य है, उसको असुर इसलिये कहते हैं कि वह प्रकाश का आवरण करने वाला है।' यह भूमिका का सारा कथन सही नहीं है, भौतिक दृष्टि से यदि अर्थ किया जाये तो गौणी वृत्ति के सहारे ऐसा अर्थ भी किया जा सकता है, किन्तु इससे इतिहासपुराण आदि में वर्णित तथा लोक में प्रसिद्ध मुख्य अर्थ का अपलाप नहीं किया जा सकता। फिर जिसके हाथ-पैर आदि अङ्ग हैं ही नहीं, उसके सम्बन्ध में यह वर्णन कहाँ तक उचित हो सकता है कि उसके अङ्ग काट लिये गये और वह बिना हाथ-पैर का हो गया।"

पारिजात का यह सारा कथन तुच्छ है; क्योंकि बुद्धि से असङ्गत है। पाठकगण स्वयं देख लेंगे कि स्वामी जी ने ऐसा नहीं लिखा कि 'वह बिना हाथ-पैर का हो गया'। वरन् मनुष्यादि के शरीर की उपमा, जो कि मन्त्र में है, से समझाया गया कि जैसे मनुष्यादि बिना हाथ-पैरों के अकर्मण्य व गतिहीन हो जाता है, उसी प्रकार मेघ भी गतिशून्य हो गया और कण-कण होकर गिर पड़ा। इतिहास-पुराणादि में वर्णित व लोक में प्रसिद्ध अर्थ का वर्णन वेदों की उत्पत्ति से पूर्व था ही नहीं, उसके न होने पर वेदार्थ के द्वारा पुराणादि व लोकप्रसिद्धि का अनुगमन या वर्णन करना असम्मत व अनुचित ही है।

'अहन्०' इन मन्त्रों के अर्थ करने में अहि आदि शब्दों के अनेक अर्थ होते हैं। अतः ये मुख्यार्थ ही हैं। अहि, वृत्र, असुर आदि शब्द पर्यायवाचक होते हुए भी अपना-अपना विशिष्टार्थ भी रखते हैं, जैसाकि वृत्र व असुर शब्दों के स्वामी जी ने अर्थ व प्रयोग स्पष्ट किये हैं, वृत्रासुर से अन्यार्थ में यह अहि का प्रयोग उपपन्न नहीं है। कदाचित् मुख्यार्थ का बाध भी माना जाये तो लक्षणा से मेघ अर्थ का ग्रहण हो जायेगा। इस प्रकार मन्त्र का अर्थ इस रूप में भी किया जा सकेगा—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'अयमिन्द्रो मध्यस्थानी देवताविशेषः' (इति यास्कः) , महता वधेन वधसाधकेन अशनि-रूपेण वज्रेण। वृत्रतरं वृत्रम् = अतिशयेनावरकं मेघं व्यंसम् = विगतांसं कृत्वा = प्रत्यङ्गं छित्त्वा भित्त्वेत्यर्थः। अहन् हन्ति ताडयति। तत्रोपमा, केनाऽपि परशुपाणिना पुरुषेण कुलिशेन कुठारेण विवृक्णा छिन्नानि वृक्षस्य स्कन्धांसीव स्कन्धा इव सोऽहिः स मेघः पृथिव्याः पृष्ठे। उपपृक् सम्पृक्तः। शयते इव। विपूर्वकस्य 'ओव्रश्चू छेदने' धातोर्निष्ठायां रूपम्। अत्र वधसाधनभूतोऽशनिर्वध एवोक्त इति सप्रयोजना लक्षणा। अत्र अहिपदमनेकार्थम्। तथाऽपि इन्द्रवृत्रयोः प्रसिद्धेन वैरसम्बन्धेनाऽपि वृत्रार्थकम्। वृत्रासुरश्च वेदे बहुत्र मेघ एव। 'वृत्रो मेघे रिपौ ध्वान्ते दानवे वासवे गिरौ' इति हेमचन्द्रः।

अग्रेऽपि एतस्मिन् विषये चर्वितचर्वणं कुर्वाणोऽयं श्रीमद्भागवतं सन्दृभ्णाति—"वृत्रो महागजेन्द्रैरावतसहितमिन्द्रं व्यात्तेन मुखेन जग्राह।" इह पूर्वोक्तं समाधानं सङ्गच्छते, वेदात् प्राक् शरीरधारीन्द्रवृत्रैरावतानां नश्वराणां कल्पितोत्पन्नानां वेदेष्वसम्भवात् तेषां पौरुषेयत्वापत्तेः।

पृ० १५८३, पं० ५—एतावताऽपि यच्चाह—"हस्तपादादियुत एव वृत्रासुर आसीत्" इति, तद् दुर्निबन्धव्यामोहग्रस्तमतित्वमेव, नश्वरस्य कस्यचिदपि इतिहासस्य वेदे वर्णनासम्भवात्, ततः प्राग् वेदानामाविर्भूतत्वाच्च।

'यह इन्द्र मध्यस्थानी देवताविशेष है' (निरुक्त), बड़े भारी वध-साधन अशनिरूप वज्र के द्वारा अतिशयेन आच्छादक मेघ को प्रत्यङ्ग काटकर इन्द्र ताडन करता है। वहाँ उपमा है कि जैसे कुठार से वृक्ष के स्कन्ध काट दिये जाते हैं, उस प्रकार कटा हुआ वह मेघ पृथिवी की पीठ पर मानो सो जाता है। यहाँ वध के साधन अशनि (विद्युत्) को वध नाम से कहा गया है, अतः यहाँ प्रयोजनवती लक्षणा है। यहाँ अहि पद वृत्रार्थक है। वेद में बहुत स्थानों पर वृत्रासुर शब्द से मेघ ही लिया गया है।

आगे भी इस विषय में परिजातकार चर्वित-चर्वण करते हुए 'श्रीमद्भागवत' का सन्दर्भ प्रस्तुत कर रहे हैं कि वृत्रासुर ने ऐरावत हाथी समेत इन्द्र को अपने फैलाए मुख में ग्रहण कर लिया। इसमें भी वही पूर्व कहा हुआ समाधान सङ्गत होगा कि किसी नश्वर शरीरधारी वृत्रासुर और हाथी की वेद से प्रथम उत्पत्ति न थी, अतः वेद में नश्वर का वर्णन नहीं हो सकता।

पृ० १५८३, पं० ५—इतने पर भी श्री करपात्रीजी 'वृत्रासुर हाथ-पैरवाला ही था' दुराग्रह व्यामोह की मति से ग्रस्त हैं। जबकि वेद सृष्टि के आदि में ही आविर्भूत हुए थे, उनसे पूर्व कोई मनुष्यवत् शरीरधारी नहीं हुए, जिनका इतिहास वेद में सम्भव माना जाता। नश्वर इतिहास घटित घटनाओं का वर्णन मानने पर वेद पौरुषेय होने लगेंगे।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"यत्तु—"व्यस्तो भिन्नाङ्गकृतो वृत्रः' इति, तन्न शोभनम्, कृतभिन्नाङ्गो वृत्र इत्यस्यैव युक्तत्वात्। श्रीमद्भागवतादिषु वृत्रासुरस्य कथोपवर्णिताऽस्ति। इन्द्रेण वज्रेण कृत्तहस्तपादोऽपि वृत्रो महागजेन्द्रैरावतसहितमिन्द्रं व्यात्तेन मुखेन जग्राह।" इत्याद्यपि कपोलकल्पिताऽसम्भवा कथा।

१५८९ पृष्ठं यावन्न विशिष्टं किमपि शङ्कितवान्, सत्यार्थस्यानपोह्यत्वात्। केवलं सायणभाष्यलेखेन ग्रन्थकलेवरमवर्धयदयम्।

यदाह—"नासुरा अविद्वांसः" इत्यपि तर्कशून्यम्। यदा देवा विद्वांसः, तदा अविद्वांसोऽसुरा एव। 'देवा हि परोपकारनिरता विद्यादिदानात् स्वेष्वेवास्येषु जुह्वतश्चेरुः' (शत० ११। १।८।१) इति वचनेन स्वार्थसाधनतत्परा असुरा एव।

पृ० १५९०, पं० ३—"अनृतबाहुल्येनासुरत्वम्, सत्यबाहुल्येन देवत्वमित्यपि न सम्भवति, तथात्वे देवासुरत्वयोर्विरोधासम्भवादेवासुरसंग्रामासम्भवात्।" इत्यप्यस्य बुद्धिशून्यत्वम्, तदाधिक्य एव संग्रामसम्भवः।

यदाह—"प्राणबलेन मनसो निग्रह इत्यप्यसङ्गतम्" एतदसङ्गतकथनमेवासङ्गतम्, प्राणानां निरोधेन प्राणबलप्राप्तिस्ततश्च मनोनिरोधः, त्वयाऽपि प्राणनिरोधेन मनोनिग्रहस्वीकृतत्वात्।

पारिजात में पृ० १५८९ तक कोई नवीन कथन नहीं किया है, अतः उसका समाधान भी अपेक्षित नहीं है। सत्यार्थ का इनके (श्री करपात्रीजी) द्वारा कदापि खण्डन नहीं किया जा सका है। केवल सायण-भाष्य उतारकर ग्रन्थ की स्थूलता बढ़ायी गयी है।

'असुर अविद्वान् नहीं होते' इनके इस कथन से यही प्रतीत होता है कि यथावत् तत्त्व जाने या न जाने, केवल पुस्तकें पढ़ रखी हों, वह विद्वान् बन जाता है। पर जो स्वार्थी स्वोदरपूर्तिपरक हैं, वे तो असुर ही होते हैं।

पृ० १५९०, पं० ३—"असत्य का बाहुल्य होने पर असुरभाव और सत्य का बाहुल्य होने पर देवभाव हो, ऐसा भी नहीं होता; क्योंकि ऐसा होने पर देवत्व और असुरत्व में कोई विरोध न होने से देवासुर-युद्ध की कोई स्थिति नहीं बनेगी।" पारिजातकार का यह कथन बुद्धिशून्य है; क्योंकि असत्याचरणवाला ईर्ष्या, द्वेष, लोभादि अवगुणों से भरपूर होकर आक्रामक होगा।

"प्राणों के बल से मन का निग्रह करना भी असङ्गत है" वस्तुतः यह पारिजात का असङ्गत कथन ही असङ्गत है; क्योंकि प्राणों के निग्रह अर्थात् प्राणायाम द्वारा प्राण सबल होंगे, तब श्वास-प्रश्वास के गति-निरोध से मन का भी निरोध होना प्रत्यक्ष है। प्राणों के निरोध से मनोनिरोध को आप भी स्वीकार करते हैं और प्राणों के निरोध से प्राणों का बलवान् होना भी निश्चित है। इस प्रकार प्राणबल से मन का निरोध होना ठीक ही कहा गया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५९०, पं० ७—"यच्च—'प्रकाशाख्यात् सोर्देवान् मनः-षष्ठानीन्द्रियाणि ईश्वरोऽसृजत। अतस्ते प्रकाशकारकाः। असोरन्धकाराख्यात् पृथिव्यादेरसुरान् पञ्च-कर्मेन्द्रियाणि प्राणांश्चासृजत। एतयोरपि प्रकाशाप्रकाशसाधकतमत्वानुरोधेन संग्रामवत्' इत्यादि, तदपि तुच्छम्, निर्मूलत्वात्, निरुक्तवचनाननुसारित्वाच्च।"

इति सर्वमस्य निराधारम्, ब्राह्मणादिभिस्तस्य प्रमाणितत्वात्। 'अहर्वै देवा अश्रयन्त रात्रिमसुराः' इत्यादिभिः 'असु' शब्दस्यान्धकारोऽर्थः, 'सु' इत्यस्य च प्रकाशवाचकत्वम्। नात्र केवलं निरुक्तमेव प्रमाणमपि त्वन्यग्रन्थेभ्योऽप्युद्धृतानि प्रमाणानि सन्ति।

पृ० १५९१, अनु० १—देवासुराः संयत्ता आसन्' (शत० १३। ३। ४। १), 'असुरानभिभवेम देवाः। असुरा असुरताः। स्थानेष्वस्ताः। स्थानेभ्य इति वा। अपि वा सुरिति प्राणनाम। अस्तः शरीरे भवति, तेन तद्वन्तः। सोर्देवानसृजत तत्सुराणां सुरत्वम्। असोरसु-रानसृजत तदसुराणामसुरत्वमिति विज्ञायते।' (निरु० ३। ८), 'देवानामसुरत्वमेकत्वं प्रज्ञावत्त्वं वाऽनवत्त्वं वा। अपि वासुरिति प्रज्ञानाम। अस्यत्यनर्थान्, अस्ताश्चास्यामर्थाः। असुरत्व-मादिलुप्तम्' (निरु० १०। ३४) इत्यादि निरुक्तोद्धरणस्याव्याख्यानात् प्रमादग्रस्तमाहायम्। महर्षिः सरलं मत्वा न व्याख्यातवान्। तेन न ज्ञातमासीद् यद् भवादृशो नावगन्तुं शक्ष्यते।

पृ० १५९०, पं० ७—"सु अर्थात् प्रकाश के परमाणुओं से मन और पाँच ज्ञानेन्द्रिय, उनके परस्पर संयोग और सूर्य आदि को ईश्वर रचता है और अन्धकाररूप परमाणुओं से पाँच कर्मेन्द्रियाँ, दश प्राण और पृथिवी आदि को रचता है, जो कि प्रकाशरहित होने से असुर कहलाते हैं। प्रकाश और अप्रकाश के विरुद्ध होने से इनकी भी संग्राम संज्ञा मानी जाती है।' स्वामी जी की यह व्याख्या भी निःसार है; क्योंकि न तो इसमें प्रमाण दिया है और निरुक्त के वचन से भी इसका कोई सीधा सम्बन्ध नहीं है।"

पारिजातकार का उक्त कथन निराधार है; क्योंकि ब्राह्मणग्रन्थों में इसका प्रमाण है कि—'देवताओं ने दिन (प्रकाश) का आश्रय लिया और असुरों ने रात्रि का' (ऐत० ब्रा० ४। ५; गो० उ० ५। १)। इत्यादि से सु का अर्थ प्रकाश और असु से अन्धकार अर्थ लेना ठीक है। अकेला निरुक्त ही प्रमाण नहीं, अन्य ग्रन्थ भी प्रमाण में हैं।

पृ० १५९१, अनु० १—इस विषय में स्वामी दयानन्द ने शतपथब्राह्मण और निरुक्त के वचनों को उद्धृत किया है। इन उद्धरणों को ये प्रमादग्रस्त कह रहे हैं। उद्धरण देने पर व्याख्या न करना प्रमादग्रस्तता नहीं, प्रत्युत इन उद्धरणों की भाषा और भावों की सरलता है। ऋषिवर को यह ज्ञात नहीं था कि आप जैसे अपनी योग्यता और विद्वत्ता का ढोल बजानेवाले इतने अयोग्य हैं कि वे सरल संस्कृत को भी नहीं समझ सकते।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वकीयमज्ञानमन्यत्र प्रमादत्वेनारोपयन् न लजतेऽयम्। अत्रायमुद्धरति दुर्गाचार्यं स्वग्रन्थदेहवर्धनाय, तदत्र पृच्छाम्युद्धरणप्रयोजनम्—किं वा वैपरीत्यं तन्निर्देष्टव्यमासीदनेन। महर्षिदयानन्दस्य प्रज्ञा तु ऋतम्भराऽऽसीत्, नहि दुर्गाचार्योऽपेक्षित आसीद् व्याख्यानाय।

मुखमस्ति विधातृनिर्मितं तत आख्याहि किमप्यनर्गलम्।
भजतां च पृथक् सृतिं निजां नहि देवैर्ऋषिभिः समर्थिताम्॥

इति निर्मलोक्तिमनुसरन्नयं भूमिकोद्धरणव्याख्यानं चोद्धृत्येदमेव लेखितुमभ्यासी यदनर्गलमविचारचार्वादि निर्मूलं वा। परमिह देवासुराणां सृष्टिप्रकरणे चक्षुष्मतां तूपलब्धिर्भवत्येव 'पुण्यात्मदेवत्वस्य, पापात्मासुरत्वस्य' इति। 'पाप्मानं वा असृक्षि' इत्यनेनासुराणां पापात्मत्वम्, देवानां देवत्वमिति पाठेन पुण्यात्मत्वम्।

पृ० १५९२, पं० १५—यच्चाह—"सूर्यादीनां देवत्वे कथं विदुषां मनुष्याणामेव देवत्वमिति पक्षः स्थास्यति?" अयमुल्लेखस्तु छलेनाभ्युपेतः। न क्वाऽप्युक्तं मनुष्याणामेव देवत्वम्। वयं तु ब्रूमः सूर्यादीनां जडानामपि चेतनानां विदुषामपि देवत्वम्।

'अनुक्तमप्यूहति पण्डितो जनः' इत्यनुरुध्यार्यसामाजिका विद्वांसः सर्वे विदन्ति। भवतो बुद्धौ यदि श्लेष्मप्रलेपः स्थूलस्तदा मतिं निशितीकर्तुमार्यविदुषः कस्यचिच्छिष्यतां व्रजेत्।

वाह खूब! अपने अज्ञान को दूसरे का प्रमाद बताते हुए इन्हें लज्जा भी नहीं आती। यहाँ पर ये अपने ग्रन्थ की मोटाई को बढ़ाने के लिये दुर्गाचार्य का उद्धरण दे रहे हैं। आपको यहाँ यह भी बताना चाहिये था कि वैपरीत्य क्या है? व्याख्यान के लिये दुर्गाचार्य की टीका अनपेक्षित थी। ठीक ही है—

'विधाता का दिया हुआ मुख है, जो चाहो अनाप-शनाप बकवास करो और अपना पृथक् मार्ग बनाते रहो, जिसका देवों (विद्वानों) ने समर्थन भी नहीं किया है।'

इस निर्मलोक्ति का अनुसरण करता हुआ यह लेखक भूमिका के उद्धरण व व्याख्यान लिखकर कहीं पर निर्मूल, कहीं पर अविचारित और कहीं पर अनर्गल लिखने का अभ्यासी है। परन्तु यहाँ पर देव और असुरों के सृष्टिप्रकरण में आँखवाले तो यह देख ही लेते हैं कि पापात्मा असुर और पुण्यात्मा देव होता है।

पृ० १५९२, पं० १५—यह कहना कि—"सूर्य आदि के देवत्व में विद्वान् मनुष्यों का ही देवत्व कैसे है?" छल से पूर्ण है। हमने कहीं भी केवल उक्त मनुष्यों का ही देवत्व नहीं कहा है, हम तो सूर्यादि जड़ों का और विद्वान् चेतनों का देवत्व स्वीकार करते हैं।

आर्यसामाजिक विद्वान् तो अनुक्त बात का भी ऊहन कर लेते हैं। आपकी बुद्धि में यदि श्लेष्मा का मोटा प्रलेप चढ़ा है तो बुद्धि को तीक्ष्ण बनाने के लिये किसी आर्य विद्वान् की शरण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५९४, पं० १०—'देवाश्च वा असुराश्च' इत्याद्युद्धरणान्तेऽयं वक्ति यत्—'देवा असुराश्च मनुष्येभ्यो भिन्ना उक्ताः' इत्यपि बुद्धिमान्द्यवचः, मनुष्येभ्यो अहोरात्रादिवर्णनेन भिन्ना अपि भवन्तीति सुवचत्वात्।

अनेन १५९५-९६ तमयोः पृष्ठयोर्भूमिकायास्ततः शाङ्करसायणादिभाष्यमवतारितं ग्रन्थ-स्थौल्यापादनाय, न वयं तदवतारयामोऽनुपयुक्तत्वाद् ऋषिभाष्यानाक्षिप्तत्वाच्च।

पृ० १५९७, पं० १—"ऊर्गिति देवाः.....' इत्यत्र यदुक्तम्—'ये प्राणपोषकाः स्वार्थ-तत्परा मायाविनः कपटिनो मनुष्यास्ते असुराः।" इत्यर्थायाऽपि भवान् द्रुह्यति यतोऽयमिमां परिभाषां स्वस्मिन् घटितामाकलयते, अन्यथा एतस्य गुरुणा सायणेनाऽपि एतादृश एवार्थः कृतः। यथा—ऋ० १।५४।३ मन्त्रे 'असुः प्राणो बलं वा तद्वान्।' एतेनाभिव्यज्यते स एवार्थः।

में रहकर शिष्यता प्राप्त करो।

मूल में तो 'व्यवहारानसृज्यन्त' है, आप 'असृज्यत' पाठ करके कह रहे हैं कि यह व्याकरण से कैसे बनेगा? स्यात्, आपके संस्करण में 'न्' न छप सका हो। आपके पृ० १५९३, पं० ८ में 'दिववास' तथा १५९५ पृष्ठ, पं० ३ में 'कृतस्यायैः' अशुद्ध छपा है। इतने मात्र से 'व्याकरण से कैसे बन गया' पूछना बालिशत्व है। तथापि समझिये, दिवादिगण की 'सृज्'धातु से 'असृज्यत' बना है।

पृ० १५९४, पं० १० के उद्धरण के अन्त में लिखा है कि—"देव और असुर मनुष्यों से भिन्न होते हैं" यह कथन बुद्धिमान्द्य का द्योतक है; क्योंकि प्रकाश और अन्धकार दिन और रात रूपी आदि देव और असुर मनुष्यों से भिन्न होते हैं, परन्तु शरीरधारी मनुष्यों की उत्तम गुणों से देव और अवगुणों से असुर संज्ञायें हो जाती हैं।

१५९५ से ९६ पृष्ठ तक भूमिका से तथा शाङ्कर-सायण आदि भाष्य को उतार कर पुस्तक का कलेवर बढ़ा दिया है, यह सब उतारना निष्प्रयोजन है। हम उसे नहीं उतार रहे हैं; क्योंकि उससे ऋषिभाष्य परकोई आक्षेप नहीं है।

पृ० १५९७, पं० १—"ऊर्गिति देवाः.....' इसमें जो कहा है कि—'इनमें जो-जो मनुष्य स्वार्थी और अपने प्राण को पुष्ट करनेवाले तथा छल-कपट आदि दोषों से युक्त हैं, वे असुर हैं और जो लोग परोपकारी परदुःखभञ्जक तथा धर्मात्मा हैं, वे देव कहलाते हैं।" भला ऋषि के इस अर्थ के लिये भी आपके हृदय में द्रोह है; क्योंकि यहाँ की 'असुर' परिभाषा को आप अपने में घटित देख रहे हैं। इनके गुरु सायण ने भी तो यही अर्थ किया है। यथा—ऋ० १।५४।३ मन्त्र में 'असु प्राणबल, उससे युक्त'। इससे भी वही अर्थ ध्वनित होता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१५९८ पृष्ठे द्वितीयपंक्तौ—"अत्राऽपि प्राणानामसुरत्वमुक्तं नासुरत्वम्" इत्युक्ति-वैशिष्ट्यमसावेव जानीयात्।

पृ० १५९८, पं० १४—यदयमाह—"परमेश्वरस्यामनस्कस्याशरीरस्य सतः साक्षात् कर्तृत्वाऽनुपपत्त्यातत्तद्द्वारैव सृष्टिकर्तृत्वोपपत्तेः।" इत्यपि सकलमज्ञानविजृम्भितम्, तन्निराकारस्यैव सर्वव्यापकत्वे सति परमाणुष्वपि व्यापकत्वात् क्रियादातृत्वेन सृष्टिनिर्माण-प्रक्रियारम्भकत्वात् साक्षात् कर्तृत्वमेवोपपद्यते। विचार्यमेतद् यदाह यत् 'कूर्मादिना सृष्टिं कारयति', तत्र पृच्छामि कूर्मादि किं सावयवं निरवयवं वा? सावयवत्वे परमात्मनः साक्षात् कर्तृत्वमुपपन्नं निरवयवत्वे कूर्मस्याऽपि कथमन्यवस्तुनः साक्षात् कर्तृत्वं सिध्येत्? तस्माद् युक्तितर्कप्रमाणरहितमेतेनावल्गमुच्यते। अन्यदखिलमप्रासङ्गिकम्।

१५९८ पृष्ठ की द्वितीय पंक्ति में "प्राणों की असुरता कही गयी है, 'असुरता' नहीं" इस पुनरुक्ति का भला क्या आशय है? इनके अनुवादक ने फिर भी यहाँ बुद्धि से कुछ काम किया और प्रथम में असुमात्र अर्थ लिया है।

पृ० १५९८, पं० १४—यहाँ पर भूमिका में 'पश्यतीति कश्यपः' से 'सर्वद्रष्टा परमेश्वर' यह अर्थ लिया गया है। उस पर इनकी विचित्र पुमार्यशी बुद्धि का उदाहरण देखिये। ये कहते हैं कि—"भूमिका का कथन सारहीन है; क्योंकि परमेश्वर प्राण, मन और शरीर से रहित है, उसका कैसे साक्षात्कार हो सकता है? अतः यह परमात्मा कूर्म (कश्यप) आदि बनकर ही सृष्टि को फैलाता है।"

विवेचकगण विचार करें कि यह कथन कितना बुद्धि वा तर्क से बाहर है। यह लेखक साक्षात्कार का अर्थ केवल स्थूल बाह्य आँखों से देखना अर्थ समझता है। अब इनसे पूछिये कि आँख बन्द किये अन्तर में ध्यान करते योगी परमात्मा का समाधि में कैसे साक्षात्कार कर लेते हैं? 'साक्षात्कृतधर्मा' भी क्या धर्म को आँखों से देखने पर कहलायेगा? वस्तुतः सर्वव्यापक प्रभु के दर्शन तो अन्दर की आँख से ही सम्भव हैं, बाहर की आँखों से उसके रचनादि गुणनिर्मित सृष्टि ही दिखायी देती है।

यहाँ पर आपको बताना होगा कि जो प्राणों का प्राण है, वह निष्प्राण कैसे होगा? वह साक्षात् प्राण और प्राणमय है। श्वास-प्रश्वास से प्राणवान् होना तो जीवात्मा की स्थिति में अपेक्षित है। जब वह कूर्मादि का रूप धारण कर सृष्टि का विस्तार करता है, तो शरीर के बिना तो वह कूर्मादि रूप भी कैसे बना सकता है? वह जब निरवयव है, तो कूर्मादि का भी साक्षात्कर्तृत्व कैसे सिद्ध होगा? इसलिये युक्ति, तर्क, प्रमाणरहित आपके जो मन में आ जाये, उसे बेलगाम बोलने लगते हैं। शेष सब अप्रासङ्गिक व अनपेक्षित लिखा गया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तीर्थ-विषयः

पृ० १५९८, अनु० २—"यदप्युक्तम्—'कश्यपगयादितीर्थकथा अपि ब्रह्मवैवर्तादिषु ग्रन्थेषु वेदादिसत्यशास्त्रेभ्यो विरुद्धा उक्ताः सन्ति। तद्यथा—मरीचिपुत्रः कश्यप ऋषिरासीत्। तस्मै त्रयोदश कन्या दक्षप्रजापतिना विवाहविधानेन दत्ताः। तत्सङ्गमे दितेर्दैत्याः, अदितेरादित्याः, दनोर्दानवाः। एवमेव कद्रवाः सर्पाः, विनतायाः पक्षिणः, तथान्यासां सकाशाद् वानर-वृक्षघासादय उत्पन्नाः। इत्याद्या अन्धकारमय्यः प्रमाणयुक्तिविद्याविरुद्धा असम्भवदोषग्रस्ताः कथा उक्ताः, ता अपि मिथ्या एव सन्तीति विज्ञेयम्। तद्यथा—स यत् कूर्मो नाम। प्रजापतिः प्रजा असृजत। यदसृजताकरोत् तद्यदकरोत् तस्मात् कूर्मः। कश्यपो वै कूर्मः। तस्मादाहुः सर्वाः प्रजाः काश्यप्य इति (शत० ७।५।१।५)। परमेश्वरेण सर्वमिदं जगत् क्रियते, तस्मात् तस्य कूर्म इति संज्ञा।' इत्यादि, तदप्यविचारितरमणीयम्, परमेश्वरस्यामनस्कस्याशरीरस्य सतः साक्षात्कर्तृत्वानुपपत्त्या तद्द्वारैव स्रष्टृत्वोपपत्तेः। यथा—'आकाशाद् वायुः, वायोरग्निः, अग्नेरापः' इत्याकाशादिजन्यानामपि परमात्मजन्यत्वमेव, तथैव कश्यपादिजनितानामपि परमात्मजन्यत्वमेव।"

इति निखिलमपि तर्कासहम्, हेत्वाभासग्रस्तत्वाद् वेदासम्मतत्वाच्च। स हि परमात्मा

तीर्थ-विषयः

पृ० १५९८, अनु० २—पूर्वपक्ष—"कश्यप गया आदि तीर्थ-कथाएँ भी ब्रह्मवैवर्त आदि ग्रन्थों में वेदादि सत्यशास्त्रों के विरुद्ध कही गयी हैं, वे इस प्रकार हैं—मरीचि के पुत्र कश्यप ऋषि थे। उनके लिये दक्ष प्रजापति ने १३ कन्यायें विवाह करके दीं। उसके सङ्गम से दिति से दैत्य, अदिति से आदित्य, दनु के दानव उत्पन्न हुए। इसी प्रकार कद्रू से सर्प, विनता से पक्षी तथा औरों से वानर, रीछ, वृक्ष, घास आदि उत्पन्न हुए। इत्यादि अज्ञान से पूर्ण; प्रमाण, युक्ति, विद्या से रहित असम्भव कथायें कही गयी हैं। वे भी मिथ्या ही हैं, ऐसा समझना चाहिये। वह इस प्रकार—उस कूर्म नामवाले प्रजापति ने प्रजा का उत्पादन किया। उत्पन्न करने के कारण ही उसका नाम कूर्म है। उसी को कश्यप कहते हैं। इसीलिये सारी प्रजायें काश्यपी कहलाती हैं। ऐसा शतपथब्राह्मण में कहा है। परमेश्वर ने सारा जगत् बनाया है, इसलिये उसका नाम कूर्म है। यह दयानन्द का लेख तभी तक सुन्दर है, जब तक इस पर विचार नहीं किया जाता है; क्योंकि परमेश्वर तो अमनस्क और अशरीर है, उसका साक्षात् कर्ता होना अनुपपन्न है, इसलिये 'कूर्म' अवतार के द्वारा सृष्टिरचना उपपन्न है। जैसे 'आकाश से वायु, वायु से अग्नि, अग्नि से जल' इत्यादि आकाश से जन्य होने पर भी पृथिवीजन्य हैं।"

उत्तरपक्ष—उक्त समस्त कथन तर्क के प्रहार को नहीं सह सकता; क्योंकि यह हेत्वाभास

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्राणानामपि प्राणः, प्राणमनोदाता। न ह्यसौ भौतिकेन चक्षुषा प्रत्यक्षीकर्तुं शक्यते। अत एव गीतायामपि योगिराजकृष्णेनोक्तम्—

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ११।८॥

यच्चात्र साक्षात्कारकरणाय सृष्टिरचनायै च तस्य कूर्मावतारं समर्थयतेऽयम्, तदसङ्गतम्, कूर्मशरीरनिर्माणाय तव तर्केणेश्वरस्य शरीरधारणस्याप्याऽवश्यकत्वात्। पुराणाधारं भवन्मतं वेदासम्मतम्। यथा च भागवतेऽपि—

जगृहे पौरुषं रूपं भगवान् महदादिभिः।
सम्भृतं षोडशकलमादौ लोकसिसृक्षया॥ १।३।१॥

यच्च प्रतिपाद्यते केनाऽपि 'उभयं वा एतत् प्रजापतिर्निरुक्तश्चानिरुक्तश्च' (शत० का० १४, अ० १, ब्रा० २, श्रुति १८) इत्येतेन प्रजापतेरीश्वरस्य रूपवत्वम् (साकारत्वम्) अरूपत्वं

से ग्रस्त व वेद से असम्मत है। वह परमात्मा प्राणों का भी प्राण, प्राण और मन का देनेवाला है। वह भौतिक नेत्रों से नहीं देखा जा सकता। इसीलिये गीता में भी कहा है कि—

'हे अर्जुन! तुम मुझे अर्थात् मेरे ऐश्वर्य को इन चर्म चक्षुओं से नहीं देख सकते, अतः तुम्हें मैं दिव्यदर्शन-शक्ति देता हूँ, तुम मेरे ऐश्वर्ययुक्त योग को देखो।'

ये जो साक्षात् करने तथा सृष्टि की रचना करने के लिये कूर्मावतार धारण करने की आवश्यकता का समर्थन कर रहे हैं, वह असङ्गत है। तुम्हारे ही तर्क से कूर्मावतार शरीर की रचना के लिये भी एक पूर्व शरीर की आवश्यकता होगी फिर उसके लिये भी एक पूर्व शरीर की—इस प्रकार अनवस्था दोष आयेगा। दूसरा दोष होगा—स्थूल शरीर सूक्ष्म परमाणुओं के भीतर प्रविष्ट न होने से उनमें गति नहीं दे सकता और बाहर से स्थूल हाथ से अग्राह्य है, तो कभी भी सृष्टि का होना ही असम्भव हो जायेगा। पुराणों पर आधारित आपका मत वेदविरुद्ध है, जैसाकि आपके भागवत में कहा है कि—

'भगवान् ने महदादि से बना हुआ आदि में लोक-रचना की इच्छा से षोडशकलापूर्ण पौरुष रूप ग्रहण किया।'

कोई-कोई कहते हैं कि प्रजापति का स्वरूप तो निरुक्त और अनिरुक्त दोनों ही प्रकार का है, ऐसा शतपथब्राह्मण में लिखा है। इससे प्रजापति ईश्वर का रूपवत्त्व अर्थात् साकारता और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(निराकारत्वं) वा, तदसत्। नेह शतपथे ईश्वरप्रकरणमपि तु यज्ञप्रकरणमेव। समग्रश्च पाठ एवम्—

'प्रजापतिर्वा एष यज्ञो भवति। उभयं वा एतत् प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद् यद् यजुषा करोति यदेवास्य निरुक्तं परिमितं रूपं तदस्यैतेन संस्करोत्यथ यत् तूष्णीं यदेवास्यानिरुक्तमपरिमितं रूपं तदस्यैतेन संस्करोति स ह वा एतं सर्वं कृत्स्नं प्रजापतिं संस्करोति य एवं विद्वानेतदेवं करोत्यथोपशयायै पिण्डं परिशिनष्टि प्रायश्चित्तिभ्यः।' अतो निराकारतैवेश्वरस्य वेदमता।

'एतावानस्य महिमातो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥'

इति मन्त्रे पादशब्देन व्याख्यातेन जगता न तदनन्ताविघातः, जगदपेक्षया तन्महत्त्वप्रतिपादनात्। महीधरोऽप्येतत् कथनं पुष्णाति—

"यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य परब्रह्मण इयत्ताया अभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः।" (यजुः० ३१। ३)

अरूपत्व अर्थात् निराकारता दोनों ही सिद्ध हैं। यह मिथ्या है। यहाँ पर शतपथब्राह्मण में ईश्वर का प्रकरण नहीं है, अपितु यज्ञ का प्रकरण ही है। इस बात को समग्र पाठ से समझिये—

'यह यज्ञ प्रजापति है। और यह यज्ञ निरुक्त व अनिरुक्त तथा परिमित और अपरिमित दोनों ही प्रकार का है। जो यह यजुर्मन्त्रों से करता है, वह निरुक्त परिमित और जो तूष्णीं (मन्त्रानुच्चारण से) करता है, वह अनिरुक्त है, यही अपरिमित है।' इत्यादि। अतः वेद के द्वारा तो ईश्वर की निराकारता ही प्रतिपादित है।

'इतनी इसकी महिमा है' इत्यादि मन्त्र में इस संसार को पाद (चतुर्थांशमात्र) कहकर उसकी अनन्तता का विघात नहीं है, जगत् की अपेक्षा उसकी महत्ता का ही प्रतिपादन है। महीधर ने इसी की पुष्टि की है। यथा—

"यद्यपि 'सत्यं ज्ञानम् अनन्तं ब्रह्म' इस प्रकार कहे हुए ब्रह्म की इयत्ता का अभाव होने से चार पैर कहना अशक्य है, तथापि यह जगत् ब्रह्मरूप की अपेक्षा अल्प है, ऐसा कहने की इच्छा से 'पाद' शब्द से कथन किया गया है।" (यजुः० ३१। ३)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसङ्गापातेऽवगन्तव्यमिह एतदपि यदीश्वरस्य साकारता तन्मन्तृभिस्त्रिधा मन्यते। व्याप्यव्यापकत्वेन, सर्वस्वरूपत्वेन अवतारत्वेन च। परं व्याप्यस्य साकारत्वे न व्यापकस्य साकारताऽनिवार्या, तस्य निमित्तकारणत्वात्, व्याप्यप्रकृतेश्चोपादानकारणत्वाच्च। सर्वस्वरूपाणां च प्रकृतिनिर्मितत्वाद् या चोपादानम्, ब्रह्मणश्चेदुपादानत्वे 'कारणगुणपूर्वकः कार्यगुणो दृष्टः' इति नियमात् पृथिव्यादिसमस्तपदार्थेषु चैतन्यसर्वज्ञत्वादिगुणापत्तेः। अवतारत्वसाकारतायां 'स पर्यगात्' इत्यत्र 'अकायमस्नाविरम्' इति बाधकम्। नैव वेदे एकमपि वाक्यं तज्जन्मधारणसमर्थकम्, प्रत्युत निषेधं प्रतिपादयति—

अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः॥ ऋ० १।६७।३॥

बोध्यमेतत् प्राग् यत् तस्य जन्मधारणस्य काऽवश्यकता? किं च भवन्मते न समस्तरूपधारिपदार्था ब्रह्मैव? तदावतारस्य किं वैशिष्ट्यम्? यदा न ब्रह्मभिन्नं किमपि वस्तु संसारे तदा कः कस्य गर्भे प्रविश्य जन्म च धारयित्वा कं रक्षति कं वा हन्ति? एवं सति तु कथ्यं यद् ब्रह्म

यहाँ प्रसङ्गोपात्त यह बात भी समझ लेनी चाहिये कि ईश्वर की साकारता माननेवाले उसका प्रतिपादन तीन प्रकार से करते हैं। (१) व्याप्य व्यापक होने से, (२) सर्वस्वरूपत्वेन अर्थात् यह सब दृश्य अदृश्य ब्रह्मरूप है, (३) अवतार धारण के द्वारा। परन्तु व्याप्य के साकार होने पर भी व्यापक ब्रह्म की साकारता नहीं हो सकती; क्योंकि वह इस दृश्य या अदृश्य सृष्टि का निमित्तकारण है और व्याप्य प्रकृति उपादानकारण है। सारे स्वरूप प्रकृति से निर्मित हैं, जो कि उपादानकारण है। यदि ब्रह्म को उपादानकारण मानेंगे तो 'कारण के गुण कार्य में आने के' नियम के कारण पृथिवी आदि सभी पदार्थों में चैतन्य, सर्वज्ञत्व आदि गुणों का होना मानना पड़ेगा। तीसरी अवतार की साकारता में 'स पर्यगात्०' आदि मन्त्र के 'अकायम्, अस्नाविरम्' आदि पद बाधक हैं। वेद में एक भी वाक्य उस ब्रह्म के जन्म-धारण का समर्थन नहीं करता, प्रत्युत निषेध करता है। जैसे ऋ० १।६७।३ में कहा है—

'जैसे परमेश्वर वा जीव कभी उत्पन्न वा नष्ट नहीं होता, वैसे कारण भी विनाश में नहीं आता'—इत्यादि।

करपात्री जी! प्रथम तो यही बताइये कि उसके जन्मधारण की आवश्यकता क्यों आ पड़ी? क्या समस्त रूपधारी पदार्थ भी आपके मत से ब्रह्म नहीं हैं? फिर उसके अन्यावतार में उस ब्रह्म से क्या विशेषता या भेद है? जब ब्रह्म से भिन्न कुछ भी संसार में है ही नहीं, तब कौन, किसके गर्भ में प्रविष्ट होकर जन्म धारण करके ब्रह्म से भिन्न किसकी रक्षा करता व किसे मारता है?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्रह्मणोब्रह्मणि प्रविश्य जन्म च गृहीत्वा ब्रह्म मारयित्वा ब्रह्म रक्षति, इति कीदृग् गोरख-जालम् ?

इदं चाऽपि बोधनीयं यद् भवत्सम्मतरामकृष्णावतारे तस्य तस्य वा शरीरे जीवात्माप्यासीद् अथवा परमात्मैवासीत् ? अथ चेज्जीवात्मा तदा को भेदोऽन्यजनेभ्यः ? यदि च परमात्मैव तदा ब्रूतां किं कर्माधिकृत्य रामादिशरीरधारणं जातम् ? यथा हि रामः कथयति—

किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ।
येन मे धार्मिको भ्राता निहतश्चाग्रतो मम ।। वाल्मी० युद्ध० १०१ ।।

अपरं च 'क्लेशकर्मविपाकाशयैरपरामृष्ट पुरुषविशेष ईश्वरः' (योग० १ । २४) इति योगदर्शनसूत्रे अविद्यादिक्लेश-शुभाशुभकर्म-तच्छुभाशुभफल-तत्संस्कारै रहित एव जीवाद् भिन्न ईश्वरो मतः । महर्षिव्यासेन एतद्भाष्ये लिखितम्—"कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः । ते हित्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः । ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी । यथा मुक्तस्य पूर्वा बन्धकोटिः प्रजायते नैवमीश्वरस्य । यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते नैवमीश्वरस्य । स तु सदैव मुक्तः सदैवेश्वर इति ।" परन्तु पुराणोक्ता रामकृष्णावतारा अविद्यादिक्लेशकर्मविपाकाशयैर्युक्ता एव ।

ऐसे में यह कहना चाहिये कि ब्रह्म ब्रह्म के ब्रह्मरूप गर्भ में जन्म लेकर ब्रह्म को मारकर ब्रह्म की रक्षा करता है । यह कैसा गोरखधन्धा है ?

आपको यह भी बताना होगा कि आपके सम्मत राम और कृष्ण के अवतार में उन-उन के शरीर में जीवात्मा भी था या परमात्मा ही परमात्मा था ? यदि जीवात्मा था तो अन्य मनुष्यों से क्या भिन्नता हुई ? यदि परमात्मा ही था, तो बताइये कि किन कर्मों के आधार पर राम आदि के शरीर धारण हुए ? जैसा कि कर्म के अस्तित्व के विषय में राम स्वयं ही कहते हैं—

'मैंने न जाने पूर्व जन्म में क्या दुष्कर्म किया था, जिसके कारण मेरा धर्मशील भाई मेरे आगे ही मर रहा है । (बाल्मीकि, युद्धकाण्ड १०१)

दूसरे 'क्लेश, कर्म और उनके विपाकाशयों से अपरामृष्ट पुरुषविशेष ईश्वर है' इस योगदर्शन के सूत्र में अविद्यादि क्लेश, शुभाशुभ कर्मफल और उनके संस्कारों से रहित जीव से भिन्न ईश्वर माना है । महर्षि व्यास ने इसके भाष्य में लिखा है—

"कैवल्य व उसका सम्बन्ध ईश्वर का न भूत है और न भावी है । जैसे मुक्त के पूर्व बन्धकोटि होती है, वैसी ईश्वर की नहीं । या जैसे प्रकृतिलीन की उत्तरा (बाद की) बन्धकोटि होती है, वैसी ईश्वर की नहीं । वह तो सदैव मुक्त व सदैव सर्वैश्वर्यशाली है ।" परन्तु पुराणोक्त राम, कृष्ण के अवतार अविद्यादि क्लेश-कर्म-विपाकाशयों से युक्त ही हैं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किञ्च श्रीरामचन्द्रोऽपि 'यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते' इति रामायणोक्त्या राज्याभिषेकमपहाय वनगमनं स्वभाग्यफलमेव मनुते। नेदमेव, किन्तु--

पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत् कृतानि।
तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि॥

आरण्यककाण्डे स्पष्टं दुःखं कर्मफलमात्रमेवेत्याह। अद्यत्वे तु पुनः 'अवतारा ह्यसंख्येया हरेः' (स्कं० १, अ० ३) इति श्लोकमनुध्याय यः कश्चिदप्यात्मानं ब्रह्मावतारत्वेन घोषयते इति महती अनवस्था।

पृ० १५९८, पं० १४—यच्चोक्तम्—"अमनस्कस्याशरीरस्य सतः साक्षात्कर्तृत्वानुपपत्त्या तद्द्वारैव स्रष्टृत्वोपपत्तेः।" हिन्दीकारस्तु "प्राण, मन और शरीर से रहित है, उसका कैसे साक्षात्कार हो सकता है।" इत्यशुद्धमनुवादं चक्रे। श्रीकरपात्रकथनं दर्शनशास्त्रविरुद्धमेव, शरीरादिमतस्त्वदभिमतकूर्मादेः सृष्टिकर्तृत्वानुपपत्तेः, सूक्ष्मपरमाण्वाद्यनन्तर्गतत्वे स्थूलत्वमापन्नस्य तद्गतिदानाऽसम्भवात्।

तथा च श्रीरामचन्द्र भी कह रहे हैं कि 'दैव अचिन्त्य है, जो प्राणियों द्वारा भोग कर ही पूरा होता है'। इस रामायणोक्ति के अनुसार राज्याभिषेक को छोड़कर वन-गमन को अपने भाग्य का ही फल मानते हैं। इतना ही नहीं, किन्तु वे आगे कहते हैं कि—

'मैंने पूर्व जन्म में अभीप्सित पाप कर्म अनेक बार किये हैं, उसी का परिपाक आज आ गया, जो मैं एक दुःख के बाद दूसरा दुःख पा रहा हूँ।'

आरण्यककाण्ड में तो स्पष्ट ही दुःखों को कर्म का फल कहा गया है। आज तो फिर 'हरि के असंख्य अवतार हैं' (स्कन्दपुराण १। ३) के अनुसार जो कोई भी स्वयं को अवतार घोषित करने लगता है। यह कितनी बड़ी अव्यवस्था हो गई ?

पृ० १५९८, पं० १४—यह कथन भी ठीक नहीं कि—"जब तक विचार की कसौटी पर न कसा जाये तभी तक अच्छा लगता है। मन और शरीररहित ईश्वर का साक्षात् कर्तृत्व हो ही नहीं सकता।" हिन्दीकार ने अनुवाद में 'प्राण' और डाल दिये। श्री करपात्रीजी का कथन तो दर्शनशास्त्र के विरुद्ध ही है। शरीरादियुक्त, आपके माने कूर्मादि की ही प्रथम रचना अनुपपन्न है; क्योंकि आपके मतानुसार शरीर और मनवाला पहले ईश्वर का होना आवश्यक है तथा वह कूर्मादि की सृष्टि करेगा, यह मत दूषित रहेगा।

वस्तुतः निराकार, अशरीर, सर्वव्यापक ईश्वर ही अति सूक्ष्म होने से परमाण्वादि में व्यापक है अतः वह गति देता है, स्थूल होने पर परमाणु में न रहने से गति नहीं दे सकता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १५९८, पं० १६—यच्चाह—"वैज्ञानिकादिनिर्मितयन्त्राणामपि परमात्मनिर्मितत्वमेव, वैज्ञानिकानामपि परमात्मनिर्मितत्वाविशेषात्। अत एव साक्षात् पारम्पर्येण वा सर्वमीशजन्यमित्येव मन्तव्यम्। यथा वृक्षघासादीनां मनुष्यजन्यत्वं नोपपद्यते, तथैव निराकारेशजन्यत्वमपि घासादीनां न सम्भवति, पृथिवीजन्यत्वदर्शनविरोधात्। कश्यपश्च प्रजापतिरभिप्रेतो न मनुष्यसामान्यः। हिरण्यगर्भो विराट् च समष्टिसूक्ष्मस्थूलप्रपञ्चाभिमानिनौ तदन्तर्यामिणौ ईश्वरावेव।"

इत्याद्यपि बालभाषितम्, पारम्पर्यावगमे कर्तृत्वे सर्वभूतानामकर्तृत्वेऽभोक्तृत्वे परमात्मनः सर्वकर्तृत्वे समापन्ने सर्वकर्मभोक्तृत्वापत्तेर्जीवात्मनः कर्मकर्तृत्वस्वातन्त्र्यस्यानुपलम्भे 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्' इति न्यायदर्शनस्य विरोधापत्तेर्वेदविरोधाच्च। जीवानां शरीरेन्द्रियगोलकानामीश्वरनिर्मितत्वेऽपि तदुपयोगो जीवाधीन एव, स्वमनोवचनादिभिर्जीवेनैव पापपुण्यफलाधिगन्तव्यत्वात्। नहि प्राण्यादिविध्वंसकविस्फोटकबमादीनामीश्वरकर्तव्यत्वमामन्यते बुद्धिमद्भिः पारम्पर्येण। न वाऽपि पुरुषात्मनिर्मितकरपात्रादिभी रचित-

---

पृ० १५९८, पं० १६—"वैज्ञानिकों के द्वारा आविष्कृत यन्त्र भी परमात्मा के ही बनाये हुए हैं; क्योंकि ये वैज्ञानिक भी तो परमात्मा की सृष्टि के अङ्ग हैं। इसीलिये साक्षात् अथवा परम्परा से सब कुछ भगवान् की ही कृति मानी जाती है। जैसे वृक्ष, घास आदि को मनुष्यों की रचना नहीं माना जाता, उसी तरह से निराकार ईश्वर भी इनका स्रष्टा नहीं हो सकता। कश्यप सामान्य मनुष्य न होकर प्रजापति माने जाते हैं। हिरण्य गर्भ और विराट् ये सूक्ष्म और स्थूल समष्टि प्रपञ्च के अभिमानी और इनमें अन्तर्यामीरूप से विद्यमान ईश्वर के ही रूप हैं।"

इत्यादि कथन का सम्बन्ध इनकी बुद्धि से विच्छिन्न तथा अनर्गल है। करपात्री जी ! आपके इस मतिहीन तर्काभास पर तो बालक भी हसेंगे। परम्परा से कर्ता मानने पर तो आपका वेदार्थपारिजात भी परमेश्वर की कृति ठहरेगा। इसमें विस्तारित छल, प्रपञ्च, हेत्वाभास भी सब परमात्मा की ही बुद्धि के प्रसव समझे जायेंगे।

महाशय ! कभी तो सद्बुद्धि से काम लिया करो। आपके इस तर्क से ही सारे जीव अकर्ता हो जायेंगे और फलों का भोक्तृत्व भी जीवों को नहीं करना पड़ेगा। ईश्वर ही भोक्ता होगा। जीवात्मा की कर्म करने की स्वतन्त्रता न मानने पर 'इच्छा, द्वेष, प्रयत्न, सुख, दुःख और ज्ञान' जीवात्मा के न्यायदर्शनोक्त लक्षण का विरोध होने लगेगा। इस प्रकार वेदविरोध भी होगा। जीवों के शरीर-इन्द्रियगोलकों के ईश्वर द्वारा निर्मित होने पर भी उनका उपयोग तो जीवों के ही अधीन है। अपने मन, वचन आदि से जीव द्वारा ही पाप-पुण्यों के फल प्राप्त किये जाते हैं। प्राणी आदि के विध्वंसक विस्फोटक बम आदियों का कर्ता परम्परा से भी बुद्धिमानों द्वारा ईश्वर नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थपारिजातस्य ईश्वरेण कर्तृत्वं वेदवत् सङ्घटते। न वाऽपि जीवमनोवृत्तिकल्पिता नास्तिकता ईश्वरकल्पितैव पारम्पर्येण। अत एव पारम्पर्येणास्मदादिकृतीनां परमेश्वरजन्यत्वकथनमज्ञानस्य पराकाष्ठा।

अयन्तु तर्को विचित्र एव संस्तौति भवतो विनिवेशनमद्भुतालये। यद् यथा घासादीनां न मनुष्यजन्यत्वं तथैव न परमेश्वरजन्यत्वम्। यथाहि कश्चिद् ब्रूयाद् यद् 'यथा भवादृशोऽसत्यापशब्दप्रयोगान्न विरमति तथा न कपिलादयोऽप्याप्ताः सत्यं प्रतिपादयितुमर्हन्ति।' इति तु निखिलमपि तर्कानभ्यूढम्। एवं नात्र कश्चिदन्यः शरीरधारी कश्यपोऽभिप्रेतः।

पृ० १५९९, पं० १२—यदुच्यते—"एवमेवाध्यात्मक्षेत्रे प्राणानां गयपदवाच्यत्वेऽपि गयादितीर्थानां न निषेधः शक्यसमर्थनः। यत्तु—'प्राणे वै बलं तत्प्राणे प्रतिष्ठितम्, तस्मादाहुर्बलं सत्यादोजीयः। इत्येवं वेषा गायत्र्यध्यात्मं प्रतिष्ठिता। सा हैषा गयांस्तत्रे। प्राणा वै गयास्तत्प्राणांस्तत्रे। तद्यद्गयांस्तत्रे तस्माद् गायत्री नाम।' (शत० १४। ८। १५। ६-७) इति ब्राह्मणमुद्धृत्य गयपदेन प्राणानां ग्रहणेन गयादितीर्थखण्डनं लिखितम्, तदपि न न्याय्यम्, उपर्युक्तब्राह्मणे गयपदेन प्राणार्थविवक्षायामपि तेनैव प्रसिद्धगयातीर्थखण्डनेऽप्यर्थद्वयपर्य-

---

माना जा सकता और परमात्मा से निर्मित कर और पात्रों के द्वारा रचित पारिजात आदि वस्तुएँ भी वेद के समान ईश्वर द्वारा निर्मित नहीं मानी जाती हैं। और जीव की मनोवृत्ति से कल्पित नास्तिकता भी ईश्वर द्वारा निर्मित नहीं मानी जा सकती। इसलिये हम लोगों की कृतियों का निर्माता परमेश्वर को मानना अज्ञान की पराकाष्ठा है।

यह तर्क तो आपको किसी अद्भुत संग्रहालय (अजायबघर) में रखने की संस्तुति कर रहा है कि 'जैसे घास आदि मनुष्यजन्य नहीं है, उसी प्रकार परमेश्वर से भी जन्य नहीं हैं।' जैसे कोई कहे कि जैसे करपात्रीजी आदि असत्य भाषण के प्रयोग करने से विरत नहीं होते, उसी प्रकार आप्त कपिल महर्षि आदि भी सत्य का प्रतिपादन नहीं कर सकते।' यह सब कुछ तर्क की कसौटी पर खरा नहीं उतरता। इस प्रकार परमात्मा के अवतार रूप में यहाँ कोई शरीरधारी कश्यप (कूर्म) अभिप्रेत नहीं है।

पृ० १५९९, पं० १२—"इसी पद्धति से आध्यात्मिक पक्ष में यद्यपि 'गय' शब्द प्राण का वाचक है, तो भी इससे इस बात को समर्थन नहीं मिल सकता कि यह शब्द गया तीर्थ का बोधक नहीं हो सकता। इस प्रसङ्ग में 'प्राणो वै बलम्' (शत० १४। ८। १५। ६-७) इस ब्राह्मणवाक्य को उद्धृत कर दयानन्द ने 'गया' पद को प्राणों का ही वाचक मानकर गया प्रभृति तीर्थस्थानों की पवित्रता का निषेध किया है, किन्तु उनका यह कथन उचित नहीं है। इस ब्राह्मणवाक्य में 'गया'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वसानेन वाक्यभेदाऽऽपत्तेः !" इति तु भ्रान्तिजनकं ते वचः । गयशब्देनात्र विहितप्राणानां ग्रहणं कर्तव्यम्, न तु गयास्थानस्य, अविहितत्वात्। गयास्थाने पिण्डदानेन पितॄणां पापमोचनस्यासम्भवात्। गयाख्येषु प्राणेषु श्रद्धया समाधिविधानेन परमेश्वरप्राप्तावत्यन्तं श्रद्दधाना जीवा पापाचरणात्तु विमुच्यन्त इति नास्ति काचिद् विप्रतिपत्तिः ।

प्रतिपाद्यप्रकरणस्यार्थबोधने तद्व्यतिरिक्तोऽर्थः स्वत एव वार्यते, न प्रसङ्गो वाक्यभेदापत्तेः । एतत्पारिजातग्रन्थस्य श्रीकरपात्रो लेखको न देवदत्त इत्यर्थापत्त्यैव ज्ञायते। पापमोचनप्रकरणेऽपि न स्थानविशेषगयायात्रा तत्साधिका, अतो गयादिस्थानेषु तीर्थसंज्ञा न चरितार्था। गयशब्देन प्राणापत्याद्यर्था व्युत्पत्तिलभ्या इह, पाखण्डिभिस्तु गयास्थानं तीर्थत्वेन ख्यापितम्, न तु तत्र तदर्थो घटते ।

पृ० १६००, पं० १—यत्तु—"तीर्थमेव प्रायणीयोऽतिरात्रः" इत्यादिकं बालविलसितं कथयन् तात्पर्यानवबोधं वक्ति, तदनर्गलमेव, तात्पर्यानवबोधस्यानुदाहृतत्वात्, एतद्बुद्धिस्तरबाह्यत्वाच्च ।

पद प्राण का वाचक अवश्य है, किन्तु इसी वाक्य से आप यह भी सिद्ध करें कि यहाँ का गया पद प्रसिद्ध तीर्थस्थानों का निषेधक है, तो इसमें वाक्यभेद दोष लग जायेगा; क्योंकि एक ही वाक्य को आप दो भिन्न अर्थों का प्रतिपाक मान रहे हैं । दयानन्द के कथन में वाक्यभेद दोष है ।"

करपात्री जी का यह कथन भ्रान्तिजनक है । गया या गय शब्द से उक्त स्थल में गायत्री, प्राण, अपत्यादि का ही ग्रहण होगा । अर्थापत्ति से यह भी सिद्ध हुआ कि मगध देश के गया का यहाँ ग्रहण नहीं है । गया स्थान में पिण्डदान से पितरों का पापमोचन असम्भव है । गया संज्ञक प्राणों में श्रद्धापूर्वक समाधि द्वारा परमेश्वर-प्राप्ति में अत्यन्त श्रद्धा करते हुए जीव पापाचरण से अवश्य मुक्त हो जाते हैं, इसमें कोई सन्देह नहीं ।

प्रतिपाद्य प्रकरण में अर्थबोधन अभीष्ट होने पर तद्व्यतिरिक्त अर्थ स्वतः ही बाधित हो जाता है । इसमें वाक्यभेदापत्ति का कोई प्रसङ्ग ही सङ्गत नहीं होता । जैसे इस पारिजात ग्रन्थ के लेखक करपात्रीजी हैं, तो देवदत्त नहीं है, यह अर्थ स्वतः उपलब्ध होता है । पापमोचन प्रकरण में गया-यात्रा साधिका नहीं है । इसलिये गया आदि स्थानो में 'तीर्थ' संज्ञा घटित नहीं होती । गय से प्राणादि अर्थ व्युत्पत्तिलभ्य है । पाखण्डियों ने गया स्थान का नाम तीर्थ रख दिया, जो ठीक नहीं ।

पृ० १६००, पं० १—"तीर्थमेव प्रायणीयोऽतिरात्रः' इत्यादि वचनों को उद्धृत कर स्वामी दयानन्द ने गया प्रभृति तीर्थों की सत्ता न मानने के लिये बड़ा जोर लगाया है, किन्तु यह सब बच्चों का खिलवाड़ है । वे इन सब ग्रन्थों का अभिप्राय नहीं समझ पाये ।" इत्यादि इनका कथन प्रलाप ही है । न समझने की बात का आपने कोई उदाहरण तो दिया नहीं । सच तो यह है कि उक्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६००, अनु० २—आ०—यदाह—"प्राण एव बलमिति विज्ञायते, बलमोजीयः। तत्रैव सत्यं प्राणेऽध्यात्मं प्रतिष्ठितम्। तत्र च परमेश्वरः प्रतिष्ठितस्तद्वाचकत्वात्।' इति न विचारसहम्, असामञ्जस्यात्। तथा हि—'प्राण एव बलम्, बलमोजीयः' इत्येव सङ्गतिः, मूले तु बलहेतुत्वात् प्राणे बलत्वव्यवहारः। तच्च प्राणे प्रतिष्ठितम्। तत्र सत्याद् बलमोजीय इत्युक्तम्। त्वया तु सत्यपदेन परमेश्वर उक्तः। न च परमेश्वरात् कस्याप्योजीयस्त्वं सम्भवति। न च तत्प्राणे प्रतिष्ठितमित्यत्र तत्पदेन सत्यं ग्रहीतुं शक्यम्, तस्याऽप्रकृतत्वात्, सर्वनामां च प्रकृतपरामर्शित्वात्।" इत्यादि।

समा०—महर्षेस्तावदार्षप्रातिभं चक्षुरुन्मीलितमासीत्, अतो यथार्थमद्राक्षीत्, तदार्षद्रोहमतिमवता भवताऽशक्यम्। तन्निभालनीयम्—यदेह 'प्राण एव बलमुक्तं बलमोजीयः' चोक्तम्। तत्रैव प्राणे च सत्यं प्रतिष्ठितं सत्यं च परमेश्वरः। इदं हि सत्यं 'तनोति सर्वं जगद् वा तत् तदुच्यते'। प्राणेभ्यो जगतश्च पूर्वं त्रैकालाबाधितत्वेन पूर्वं सत्त्वात् सत् परमेश्वरः, अत

वाक्यों का अर्थ आप के बुद्धि-स्तर से ऊँचा था।

पृ० १६००, अनु० २—आक्षेप—"प्राण में बल और सत्य प्रतिष्ठित है; क्योंकि परमेश्वर प्राण का भी प्राण है और उसका प्रतिपादन करनेवाला, रक्षा करनेवाला गायत्री मन्त्र है, जिसको कि गया कहते हैं। यह इसलिये है कि उसका अर्थ जानकर श्रद्धासहित परमेश्वर की भक्ति करने से जीव सब दुःखों से छूटकर मुक्ति को प्राप्त हो जाता है। प्राण का भी नाम गया है। उसको प्राणायाम की विधि से रोककर परमेश्वर की भक्ति के प्रताप से पितर अर्थात् ज्ञानी लोग सब दुःखों से रहित होकर मुक्त हो जाते हैं; क्योंकि परमेश्वर प्राणों की रक्षा करनेवाला है। इसलिये ईश्वर का नाम गायत्री और गायत्री का नाम गया है।' किन्तु यह व्याख्या भी विचार करने पर सही नहीं टिकती; क्योंकि इनकी परस्पर सङ्गति नहीं बैठती। पहले वाक्य की सङ्गति तभी बन पाती है, जब कि प्राण ही बल है और बल ही ओज का सम्पादक है, यह अर्थ किया जाये। मन्त्र में बल का सम्पादक होने से प्राण को बल बताया गया है। यह बल प्राण में ही प्रतिष्ठित है। मन्त्र में सत्य से बल को अधिक तेजस्वी माना गया है। आप जब सत्य पद का अर्थ परमेश्वर करते हैं, तो उस परमात्मा से अधिक तेजस्वी तो दूसरा कोई हो नहीं सकता। इस वाक्य में आये 'तत्' पद से सत्य का ग्रहण नहीं हो सकता; क्योंकि उसका यहाँ कोई प्रसङ्ग नहीं है और सर्वनाम पद प्रकृत को ही पकड़ सकते हैं।"

समाधान—महर्षि का आर्षप्रतिभासम्पन्न नेत्र खुला हुआ था, अत एव उन्होंने 'तनोति सर्वं जगत् प्राणं वा विस्तारयति' इस अर्थ में 'तत्' शब्द से सत्य या परमेश्वर का ग्रहण किया

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एव 'तत्' सदित्यस्य परामर्शकम् ।

यच्चाह यदि सत् सत्यं परेश्वरस्तर्हि सत्यात् परमेश्वराद् बलं कथमोजीय ईश्वरापेक्षया न कस्याप्योजीयस्त्वं भवितुं शक्यत इति सत्यम् । परमत्र भवानेव 'सत्यात्' इत्यस्यैव तात्पर्यं नावबोद्धुं शक्नोति । सत्यात् परमेश्वरान्निमित्तान्निमित्तकारणभूताद्धि तद्बलमोजीयो जायते । 'स उ प्राणस्य प्राणः' इति श्रुतिप्रमाणात् परमेश्वरः प्राणस्यापि प्राणः । किमेतेनैवाल्पविचारेण वेदभाष्यं चिकीर्षति ? एवंविधेन त्वल्पदुर्बलविचारेण महर्षिप्रतिष्ठितप्रज्ञावगम्यं भाष्यं कथङ्कारं सह्यं स्यात् ? अतः सत्योक्तं भवता—'तदपि न विचारसहम्' इति ।

पृ० १६००, पं० १६—यच्चाऽप्याह—"गायत्री ब्रह्मविद्यायामध्यात्मं प्रतिष्ठितेत्यपि निर्मूलम्, प्रमाणानुदाहरणात् । ब्रह्मविद्यायामित्यस्य केन कथं सम्बन्धः ? किं ब्रह्मविद्यायां जातायां साध्यात्मं प्रतितिष्ठति ? तां गायत्रीं गयामाह' इत्यपि मिथ्यैव, मूले प्राणानामेव गयेति नामनिर्देशात् । तत्र गय इति पुंलिङ्गस्य निर्देशो न गयेति स्त्रीलिङ्गस्य । तत्र गयायां श्राद्धं कर्तव्य-

---

है । इसीलिये आर्य भाषा में ऋषि ने परमेश्वर को प्राणों का प्राण कहा; क्योंकि प्राण भी इसी से प्रतिष्ठित है ।

यह कहना कि 'सत्यादोजीयो बलम्' अर्थात् सत्य अर्थात् परमात्मा से तो अधिक बल कोई नहीं है । महोदय ! यहाँ पर बताया गया है कि प्राण बल हैं, जो प्राणों में प्रतिष्ठित हैं, परन्तु परमेश्वर से या उसके सान्निध्य से जो बल होता है, वह उस प्राणबल से भी अधिक ओजोमय है । प्राणों और जगत् से पूर्व परमेश्वर की सत्ता है, अतः 'यत्' शब्द त्रैकालाऽबाधित सत् का परामर्शक भी है । 'सत्यात्' में पञ्चमी निमित्तार्थक है, जिसे आप समझ ही नहीं सके । क्या आप इसी बालबुद्धि का आश्रय लेकर वेद का भाष्य करना चाहते हैं ? ऐसी दुर्बल और अल्प समझ के द्वारा महर्षि की प्रतिष्ठित प्रज्ञा से जानने योग्य भाष्य कैसे समझा जा सकता है ? अतः आपने ठीक ही कहा है कि ऋषि का यह कथन भी आपकी दुर्बल विचारशक्ति को सह्य नहीं है ।

पृ० १६००, पं० १६—आक्षेप—यह कहना कि—"गायत्री ब्रह्मविद्या की आत्मा के रूप में प्रतिष्ठित है, यह कथन भी निर्मूल है; क्योंकि इसमें कोई प्रमाण नहीं दिया गया है । 'ब्रह्मविद्या' पद का किस पद के साथ कैसा सम्बन्ध आप मानते हैं ? क्या गायत्री ब्रह्मविद्या के उत्पन्न होने पर उसमें प्रतिष्ठित होती है ? यदि आप इस बात को स्वीकार करें तो यह प्रतिष्ठा भी कृतिसाध्य मानी जायेगी; क्योंकि कारण से उत्पन्न होने से यह कार्यरूप ही सिद्ध हो पाती है । उस गायत्री को गया मानना भी गलत है; क्योंकि मूल वाक्य में तो प्राणों को ही गया माना गया है । इस वाक्य में पुंलिङ्ग गय शब्द आया है, स्त्रीलिङ्ग गया शब्द नहीं । गया में श्राद्ध करना चाहिये, यह वचन आप कहाँ का उद्धृत कर रहे हैं ? इस प्रकार दयानन्द की सारी व्याख्या पागलों के प्रलाप सी लगती है ।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मिति क्वत्यं वचनम्? तस्मादुन्मत्तप्रलपितमिव दयानन्दीयं व्याख्यानम्।" इत्याद्यात्मकं तदपि विवेचनप्रतिभाऽभावादज्ञानमेव भवतः सूच्यते। यतो हि उक्तं 'गायत्र्याध्यात्मं प्रतिष्ठिता'। ब्रह्मविद्याविषय एवाध्यात्मम्। तस्माद् गयत्रात्री गायत्री प्रतिष्ठितैव भवति, या चाऽध्यात्मशब्देन ऊहिता भवति, ब्रह्मविद्याया अध्यात्मातिरिक्तविषयाद्यप्रतिष्ठितत्वात्। गया हि प्राणरूपास्तानेषा त्रायते, अतस्तात्स्थ्याद् गयाः सन्ति अत्रेति व्युत्पत्त्या गायत्री अपि गया भवति। एवं महर्षिव्याख्यानमक्षरशः सूपपद्यते।

यदाह—'निघण्टौ पुंल्लिङ्गपाठो गय इति कथं स्त्रीत्वम्' इति नैव कश्चिद् व्याकरणनियम उद्धृतो यत् स्त्रीत्वविवक्षायामपि पुंलिङ्गशब्दाट्टापोऽविधानम्, यदा अजआदिभ्यो भवत्येव। नैव 'अजो नित्यः शाश्वतोऽयं पुराणः' इत्यादिपाठेन वारयितुं स्त्रीत्वं शक्यते। अत एतदुक्तमेव सर्वमुन्मत्तप्रलपितमनर्गलत्वात्, महर्षिभणितं सकलं परमोत्कृष्टमतिप्रतिपन्नम्।

पृ० १६०१, अनु० १—यच्चोच्यते—"एवं गृहस्यापत्यस्य प्रजायाश्च गयेति नामास्ति' इति यदुक्तम्, तदप्यसङ्गतम्, मूले गृहस्येति पदाभावात्। 'अत्राऽपि सर्वैः श्रद्धातव्यम्' इत्यपि

समाधान—यह कथन ठीक नहीं है। गायत्री सर्वश्रेष्ठ मन्त्र होने से सर्वश्रेष्ठ ब्रह्मविद्या का अधिकारी बनाती है, अत एव उसका गुरु द्वारा उपदेश दिया जाता है। 'गय' नाम प्राणों का है। 'अर्शआदिभ्योऽच्' (अष्टा० ५।२।१२७) से 'अच्' तथा स्त्रीत्व-विवक्षा में 'टाप्' करने पर गया शब्द बन जायेगा। तथा गय नाम प्राण का है, गयों का समूह या गय ही गाय हुए। उनका त्राण करनेवाली गायत्री है। अध्यात्म अर्थात् ब्रह्मविद्या, उसमें गायत्री प्रतिष्ठित रहती है। अध्यात्म शब्द से ब्रह्मविद्या अर्थ ऊहित है। अथवा गय प्राणों का वाचक है, प्राणों की रक्षिका होने से गायत्री कहलाती है। गय जिसमें रहे, उसे 'गया' कह सकते हैं। इस प्रकार महर्षि का व्याख्यान सम्यक् उपपन्न होता है। 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' के अनुसार स्त्रीत्व-विवक्षा में 'गया' शब्द भी बन जायेगा।

यह कहना भी ठीक नहीं है कि "निघण्टु में 'गय' शब्द पुंल्लिङ्ग पढ़ा गया है, अतः 'गया' प्रयोग स्त्रीलिङ्ग में नहीं हो सकता" क्योंकि ऐसा कोई व्याकरण का नियम नहीं है कि किसी पुंल्लिङ्ग शब्द से स्त्रीत्वविवक्षा में 'टाप्' न हो। जब कि 'अज' आदि शब्दों से 'अजा' आदि शब्द टाबन्त बनते ही हैं। 'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' यहाँ पर 'अजः' पुंल्लिङ्ग पढ़ने पर भी स्त्रीलिङ्ग में 'अजा' बनाने में कोई प्रतिबन्ध नहीं हुआ। अतः श्री करपात्री जी का कथन अनर्गल होने से उन्मत्तप्रलपित है और महर्षि दयानन्द का कथन समस्त ही परमोत्कृष्ट मतिवालों से स्वीकार्य है।

पृ० १६०१, अनु० १—"निघण्टु में घर, सन्तान और प्रजा का नाम भी गया बताया गया है' भूमिका का यह कथन भी असङ्गत है; क्योंकि मूल में गृह पद का उल्लेख नहीं है। 'मनुष्यों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बालविलसितम्, असामञ्जस्यात्।" इत्याद्यवल्गमुच्यते सर्वं भवता। एषा हि शैली आर्षी यत् प्रसङ्गोपात्तविषयेऽधिकमपेक्षितं ब्रुवते ऋषयः। यथा निरुक्तेऽपि। निघण्टौ हि २। २, २। १०, ३। ४ स्थलेषु उक्तार्था दर्शितास्तेऽपि।

यच्चोच्यते उपहासात्मकं वैवाहिकमपि कृत्यं श्राद्धम्, तद्रूढबुद्धिपरिपुष्टा कूपमण्डूकतैव। ऋषिणा 'श्रद्धातव्यम्' इति क्रियाप्रयोगेणैव यौगिकार्थग्रहणाय प्रेरणा क्रियते। शिष्टं प्रागपि सुसमाहितम्। शास्त्रवचनान्यथा प्रयुज्य ये 'विष्णुपद' नाम्ना कस्यचिन्मनुष्यस्य पदाङ्कनं मोक्षप्रदं मन्यन्ते, ते मूढा एवेति ध्वनितम्।

पृ० १६०२, पं० ३—यदुक्तम्—"शक्तिग्राहकेषु लोकव्यवहारस्यैव मूर्धन्यत्वात्" इत्यपि अबुद्धिरचितपुराणरूढमतिप्रेरितमेव। लोकव्यवहारप्रयुक्तशब्दानां शक्तिग्रहणे लोकव्यवहारस्य मूर्धन्यता, न तु शास्त्रीयशब्दानां लोकव्यवहारप्रयुक्तसामान्यविकृतार्थेषु लोकव्यवहारेण यौगिकयोगरूढार्थग्रहणाय प्रतिबन्धः स्यात्।

को इनमें अत्यन्त श्रद्धा रखनी चाहिये' यह भी बच्चों की सी बात है; क्योंकि इन वाक्यों का परस्पर कोई सामञ्जस्य नहीं बैठता।" यह सब पारिजातकार द्वारा बेलगाम बोला जा रहा है। यह तो आर्ष शैली है कि गय शब्द के वाच्यार्थ जो निघण्टु में कहे गये हैं, वे यहाँ बता दिये गये। उस मगध देशस्थ 'गया' में श्राद्ध न करके इन गृह आदि में श्रद्धा से अपने कर्तव्य का पालन सब मनुष्यों को करना चाहिये।

आपकी बुद्धि अतिसीमित है, जो बड़ों के प्रति ही केवल श्रद्धा का अर्थ लगा रही है। श्रद्धा का अर्थ है सत्य के आचरण में प्रीति। 'श्रद्धा श्रद्धानात्' अर्थात् सत्य के धारण से ही श्रद्धा कहलाती है। अतः गय-वाच्य सभी अर्थों में सत्यता से आचरण करने का नाम श्रद्धा है, जो सन्तान के प्रति भी हो सकती है। रूढमस्तिष्क श्राद्ध शब्द से मध्यकाल में प्रचलित रूढार्थ को ही ग्रहण करेगा, पर इस श्राद्ध के प्रचलन से पूर्व बने शास्त्रों का अर्थ रूढिपरक नहीं हो सकता। ऋषि के 'श्रद्धातव्यम्' प्रयोग से रूढिग्रहण की अग्राह्यता स्पष्ट है। शेष कथन विवाहादि में श्रद्धा शब्द के प्रयोग-विषय में पूर्व ही लिखा जा चुका है। 'विष्णु' पद का शास्त्रीय अर्थ ग्रहण न कर मगधस्थ गया में किसी मनुष्य के पद-चिह्न को मोक्षदायक समझना मूढता है।

पृ० १६०२, पं० ३—"शब्द की शक्ति के ग्राहक प्रमाणों में लोकव्यवहार को सबसे ऊपर माना जाता है।" यह बात भी बुद्धिबाह्य कल्पनाप्रसूत पुराणों से रूढ बुद्धि से ही प्रेरित है। लोकव्यवहार में प्रयुक्त शब्दों की शक्ति के ग्रहण में लोकव्यवहार की प्रधानता होगी, परन्तु शास्त्रीय शब्दों का लोकव्यवहार में प्रयुक्त सामान्य विकृत अर्थों में लोकव्यवहार के द्वारा यौगिक तथा योगरूढ अर्थों के ग्रहण करने में प्रतिबन्ध कैसे हो सकेगा?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६०२, पं० ७—अत्र—'स यत् कूर्मो नाम' इत्यादि पूर्वमृषिणा व्याख्यातम्, तदतितरां प्रशस्तम्। अयं वराकः शास्त्रशेमुष्यै द्रुह्यन् कूर्मोपधाननिर्माणप्रशंसां गायतीति किमपि ब्रवीतु न मुखे वल्गा यदा।

पृ० १६०३, अनु० १—यदुक्तम्—"भ्रान्त्या विष्णुगयेति पदयोर्द्वयोरर्थविज्ञानाभावान् मगधदेशैकदेशे पाषाणोपरि शिल्पिद्वारा मनुष्यपादचिह्नं कारयित्वा तस्यैव कैश्चित् स्वार्थ-साधनतत्परैरुदरम्भरैर्विष्णुपदमिति नाम रक्षितम्।' इत्याद्यशुद्धम्। गया-विष्णुपदादिस्थानानां भ्रान्त्या तत्तन्नामत्वे भारतवर्षादिनाम्नामपि तथात्वापत्त्या सर्वत्रानाश्वासप्रसङ्गः। विकृत-मस्तिष्कैस्तु वेदादिसम्बन्धेऽप्यजाविपालगीतेष्वेव भ्रान्त्याऽनादित्वापौरुषेयत्वादिव्यवहारो-ऽभ्युपेयते।" इत्यपि श्रीकरपात्रोक्तमबुद्धिजल्पनमेव।

भारतवर्षादिनामानि तु न भ्रान्त्या कृतानि, तत्र नाम्नां सार्थकत्वात्। परं विष्णुपदं

पृ० १६०२, पं० ७—"स यत् कूर्मो नाम' इस शतपथ-वाक्य की व्याख्या करते हुए दयानन्द ने कहा है कि परमेश्वर ही इस सारे जगत् को बनाता है, किन्तु यह सारी व्याख्या भी ऊल-जलूल है।" वस्तुतः पारिजातकार का यह कथन उच्छृङ्खल है। ये कहते हैं कि प्रजापति (परमेश्वर) ने कूर्म रूप धारण कर प्रजा की सृष्टि की। आपने यहाँ कूर्म के उपधान रूप का कथन किया है, पर इस सारे घुमाव-फिराव की वाक्य-रचना करके भी क्या आप यह मानने से मना कर सकते हैं कि आप कूर्मावतार परमेश्वर को नहीं मानते ? ऋषि का मुख्य कथन तो यह है कि ईश्वर कूर्म आदि का अवतार नहीं लेता। यह बेचारा तो अतिप्रशस्त ऋषि की व्याख्या का खण्डन जो कुछ बकवास करके करेगा ही।

पृ० १६०३, अनु० १—"भ्रमवश विष्णु और गया इन दोनों पदों के अर्थ का ठीक से ज्ञान न होने के कारण मगध देश के एक स्थान पर पत्थर के ऊपर किसी शिल्पी से मनुष्य के पैर का चिह्न बनवाकर अपने स्वार्थ की सिद्धि के लिये, अपना पेट भरने के लिये, कुछ लोगों ने इसे 'विष्णुपद' नाम दे दिया।' यह कथन अशुद्ध व बकवास है। गया आदि नामों की प्रवृत्ति को यदि भ्रम के कारण मानने लगे, तो 'भारतवर्ष' प्रभृति नामों की भी ऐसी ही स्थिति मानने पर किसी को कहीं भी विश्वास ही नहीं रह जायेगा। जिनका दिमाग विकृत हो गया है, ऐसे बहुत से आधुनिक विचारक तो वेद आदि के सम्बन्ध में भी यही कहते हैं कि ये तो बकरी और भेड़ चरानेवालों के गीत हैं। इन्हीं को भारतीय जन भ्रमवश अनादि और अपौरुषेय मान लेते हैं। इस तरह से ये लोग दयानन्द से चार हाथ आगे हैं।"

यह सारा भी श्री करपात्रीजी का दुर्बुद्धिजन्य प्रलाप है। भारतवर्ष आदि नाम के उदाहरण को साथ लेकर आप गया की भी सत्यता का समापन करना चाहते हैं। भारतवर्ष नाम की यथार्थता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मोक्षदायकं गयेति प्रदेशे पिण्डदानेन पूर्वजानां मोक्षप्राप्तिरिति तु अयथार्थत्वेन पाखण्डिनां भ्रान्तिरेव सामान्यजनप्रतारणानिपुणानां भवादृशाम्।

यच्च पदद्वयोरित्यशुद्धं मुद्रितं तन्मन्ये। एवं भवताऽपि उक्तवाक्योद्धरण एव छलपूर्वकमशुद्धमवतारितम्—'उदरम्भरैः' इत्यस्य स्थाने 'उदरभरैः' इति। अग्रे १६०५ पृष्ठे अष्टमपंक्तौ 'नैयायिकाभिः' इत्यशुद्धम्।

यत्तु—'इदं विष्णुर्विचक्रमे' इत्यत्र शङ्कनं विस्तरेण प्रथमखण्डे समाहितम्, नातोऽत्र पिष्टपेषणं विधीयते।

पृ० १६०४, पं० १४ आ०—"यत्तु—'पादैः प्रकृतिपरमाण्वादिभिः स्वसामर्थ्यांशैर्जगदिदं पदं प्राप्तव्यं सर्वं वस्तुजातं त्रिषु स्थानेषु स्थापितवान्' इत्युक्तम्, तदपि तुच्छम्, शक्त्योपस्थितं

और सत्यता तो प्रामाणिक है, पर आप यह बताइये कि जो मोक्ष के शास्त्रीय साधन बताये हैं, उनमें कहीं गया के मानवीय पदचिह्नों के दर्शन से मोक्ष सम्भव हो सकता है ? कदापि नहीं। और न आटे के पिण्डदान से मोटुओं की तृप्ति या मोक्षप्राप्ति हो सकती है। गया से मोक्षप्राप्ति की यथार्थता कदापि सिद्ध नहीं होती। पाखण्डी और स्वार्थी पेटुओं द्वारा भ्रान्तियाँ फैलायी गयी हैं। वे पाखण्डी आप जैसे साधारण जनों के ठगने में कुशल होते हैं। वेद में मृतकश्राद्ध, गोवध, अश्लील अश्वमेध आदि मूर्खतापूर्ण बातें तो आप जैसे रूढिवादी ही मानते हैं। आप लोगों की वेद की ऐसी कुव्याख्याओं से तो लोगों में वेदों के प्रति अनास्था उत्पन्न करने का जघन्य पाप तो आप जैसे टीका और व्याख्याकारों ने ही किया है।

'पदद्वयोः' यह 'पदयोर्द्वयोः' के स्थान पर छप गया है। 'योः' छूट गया है। परन्तु आपने भी यहाँ पर उद्धरण को छल से 'उदरम्भरैः' के स्थान पर 'उदरभरैः' उद्धृत किया है, तथा १६०५ पृष्ठ की अष्टम पङ्क्ति में 'नैयायिकाभिः' यह अशुद्ध पद प्रयुक्त किया है। यहाँ तो कोई अक्षर छूटने की बात नहीं, प्रत्युत स्त्रीलिङ्ग का बिना कारण प्रयोग किया है। यह दुष्प्रयोग आपकी समस्त अनुगामिनी १४ की पण्डितमण्डली को भी न सूझा।

'इदं विष्णुर्विचक्रमे' इसकी व्याख्या यथायथ प्रथमखण्ड में प्रसङ्गतः की गयी है, अतः यहाँ पिष्टपेषण नहीं किया जा रहा है।

पृ० १६०४, पं० १४—"इस आक्षेप से बचने के लिये आपने 'पाद' शब्द का अर्थ पैर न करके प्रकृति, परमाणु आदि अपनी समार्थ्य के अंशों से इस प्राप्तव्य जगत् की सारी वस्तुओं को तीन-तीन स्थानों पर स्थापित कर दिया, ऐसा अर्थ किया है, किन्तु आपकी यह पद्धति

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मुख्यार्थं परित्यज्यानुपस्थितस्य लाक्षणिकार्थस्य कल्पने मानाऽभावात्। अप्राप्तं हि प्राप्तव्यं भवति, न नित्यप्राप्तम्। नहि मृत्तिकाया घटः प्राप्यते, तद्रूपत्वात्। सर्वस्य प्रपञ्चस्येश्वरसामर्थ्येन जातत्वान्न तस्य प्राप्तव्यत्वं सम्भवति। न चेश्वरसामर्थ्येऽशांशिभावकल्पना युक्ता, तस्य दुर्भेद्यत्वात्। यत्तु—'प्रकृतिपरमाण्वादय ईश्वरसामर्थ्यस्यांशाः' इति हिन्दीव्याख्यान उक्तम्, तत्सर्वथाऽसङ्गतम्, सामर्थ्यस्य परमेश्वरशक्तिरूपत्वेन बाह्यपरमाण्वादिरूपत्वासम्भवात्। अत एव न तेषां पादत्वमपि। त्रेधेति त्रिप्रकारमुच्यते, न त्रिषु स्थानेषु। अत एव यावद् गुरुत्वादिकं प्रकाशरहितं तत्पृथिव्यां यल्लघुत्वादियुक्तं वायुपरमाण्वादिकं तदन्तरिक्षे, यच्च प्रकाशमयं सूर्यादिकं तद्दिवि द्योतनात्मकेऽग्नौ वा' इत्यपि निरर्थकम्, योग्यतानुसारेण यत्र यानि वस्तूनि

प्रमाणविरुद्ध है। शब्द की साक्षात् शक्ति से उपस्थित मुख्य अर्थ को छोड़कर अनुपस्थित लाक्षणिक अर्थ को स्वीकार करने में कोई प्रमाण नहीं है।"

यह कथन तुच्छ है; क्योंकि बुद्धि तो प्रभु ने इसी कारण दी है कि पौर्वापर्य को देखकर ही असम्भवार्थ के कारण हो सकनेवाले आक्षेप के दूषणों से वेदों को बचाना ही चाहिये और जिस फूहड़ बुद्धि से ईश्वर का अशास्त्रीय स्वरूप व सृष्टिक्रमविरुद्ध वेदार्थ के द्वारा अपना भी हुलिया बिगड़ जाये, ऐसी बुद्धि का क्या करें, जैसी कि आपको मिली है।

आप कहते हैं कि मुख्यार्थ को छोड़ कर लक्षणार्थ का आश्रय न लेना चाहिये। पर श्रीमन्! वेद के यौगिक अर्थों में जो अभीष्टार्थ होगा, वह निर्वचन और प्रकरण के अनुसार मुख्यार्थ कहलायेगा। पर आप तो वेद की रेढ़ लगाने पर उतारू हैं, अतः यहाँ पर मनुष्य की आकृति में विष्णु को मानकर उनके पैर का ही अर्थ करेंगे। आप की दृष्टि में यह वैज्ञानिक तर्कसङ्गत अर्थ आने की आशा करना रेत से तेल निकालना ही होगा।

पृ० १६०४, पं० १५—आक्षेप—"अप्राप्त वस्तु ही प्राप्त हो सकती है, नित्य प्राप्त वस्तु की प्राप्ति कैसी? क्या मृत्तिका से घट की प्राप्ति होती है? घट तो मृत्तिका ही है। इसी तरह से सारा प्रपञ्च परमेश्वर की सामर्थ्य से ही पैदा होता है, तो परमेश्वर को उसके प्राप्त करने का प्रसङ्ग ही कहाँ उठता है। परमेश्वर के सामर्थ्य को टुकड़ों में नहीं बाँटा जा सकता; क्योंकि वह तो दुर्भेद्य है, दुर्ज्ञेय है। हिन्दी व्याख्या में प्रकृति, परमाणु आदि को ईश्वर का सामर्थ्य बताया है, यह भी सर्वथा असङ्गत है; क्योंकि सामर्थ्य तो परमेश्वर की शक्ति है, वह बाहर प्रकृति, परमाणु आदि के रूप में कैसे रह सकती है? इसीलिये प्रकृति, परमाणु आदि के रूप में स्थित यह सामर्थ्य निराकार होने से पैर के रूप में भी नहीं देखी जा सकती। त्रेधा पद से तीन प्रकारों का बोध होता है, तीन स्थानों का नहीं। इसीलिये भारसहित और प्रकाशरहित जगत् को पृथिवी में, परमाणु आदि सूक्ष्म द्रव्यों को अन्तरिक्ष में तथा प्रकाशमान सूर्य और ज्ञानेन्द्रिय आदि को प्रकाश में स्थापित किया, यह कथन भी निरर्थक है; क्योंकि योग्यता के अनुसार जो वस्तु जहाँ सृष्ट हुई, वह वहाँ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सृष्टानि तानि तत्रैव सन्त्येवेति, तेषां पृथिव्यादिषु स्थापनोक्तेर्नैरर्थक्यात्। 'यन्मोहेन सहितं ज्ञानवर्जितं तत्पांसुरेऽन्तरिक्षे परमाणुमयं रचितवान्। सर्वे लोका अन्तरिक्षस्थाः सन्ति' इत्यपि पूर्वापरविरुद्धमेव। पूर्वं पृथिव्यादित्रिषु स्थापितवानित्युक्तम्, इदानीं पृथिव्यामेवेति। जीवानपहाय सर्वमपि ज्ञानवर्जितमेव तत्सर्वमन्तरिक्षे रचितम्। तत्रैवास्ति चेन्मुधैव त्रिषु स्थानेषु स्थापनोक्तिः। किञ्चान्तरिक्षोऽपि लोकः। तस्य कथमन्तरिक्षस्थत्वम्, आत्माश्रयत्वापातात्।" इत्यादि।

समा०—अयं प्रवदति यदस्मिन् मन्त्रे 'विचक्रमे' इत्यत्र 'क्रमु पादविक्षेपे' इति धातुप्रयोगोऽस्ति। निराकारस्य पादाऽभावे कथमर्थसङ्गतिर्जायेत? इत्याक्षेपनिराकरणार्थं पाद-शब्दस्य प्रकृतिपरमाण्वादयः सामर्थ्यांशा इत्यर्थो विहितः। परमयमर्थो न सूपपद्यते, गौणत्वात्। तत्र प्रधानार्थस्तु पाद एव ग्राह्यः, स तु साकार एव घटते। इति सर्वं शङ्कनमशास्त्रीयम्, निराकारपक्षस्य तु साकारवादिनामपि मते सिद्धत्वात्। अवतारवादिपक्षस्तु साध्यः। तदा सिद्धपक्षे तु ब्रह्मपरकश्रुतीनां सुघटता तु भवताऽपि मान्यैव। यश्च ते साध्यः पक्षः स तु वेद-

---

रहेगी ही। इसके लिये पृथिवी प्रभृति में उनकी स्थापना की बात करना व्यर्थ है। मोहसहित (मूढ) और ज्ञानरहित जो जड़ जगत् है, वह अन्तरिक्ष अर्थात् पोल के बीच में स्थित है, वह परमाणुमय है, सारे लोक इस अन्तरिक्ष में विद्यमान हैं, यह कथन भी अपने पहले के कथन से विपरीत है। पहले पृथिवी प्रभृति लोकों में तीन स्थानों पर सब लोकों की स्थापना की बात आपने मानी है और अब केवल पृथिवी में सबकी स्थापना की बात करते हैं। जीवों को छोड़ कर सब कुछ ज्ञान से शून्य ही है। उन सबकी अन्तरिक्ष में रचना की बात आप करते हैं। यदि वहीं सब कुछ है, तो फिर पहले आपने तीन स्थानों में सबको स्थापित करने की जो बात की, वह व्यर्थ हो जायेगी। फिर अन्तरिक्ष भी तो एक लोक ही है, वह अपने में ही, अन्तरिक्ष में ही कैसे रहेगा? इस तरह से तो आत्माश्रयता दोष उठ खड़ा होगा; क्योंकि कोई वस्तु अपने ही अपना आश्रय नहीं होती।"

समाधान—यहाँ इनका यह कहना कि 'इदं विष्णुर्विचक्रमे' इस मन्त्र में 'विचक्रमे' यह पादविक्षेपार्थक 'क्रमु' धातु से बना है, जबकि ईश्वर निराकार है तो पाद शब्द और उसका अर्थ कैसे घटित होगा? यही मुख्यार्थ ग्रहण में बाध होने से पाद के लाक्षणिक अर्थ प्रकृति के अंश परमाणु आदि लिये जायेंगे। वैसे पाद शब्द का पैर अर्थ ही केवल मानना भी अज्ञान है; क्योंकि 'प्रतिष्ठा वै पादः' (शत० १३।८।३।८) शतपथब्राह्मण में पाद का अर्थ प्रतिष्ठा भी है, तथा करपात्रीजी के आराध्य वाममार्गी महीधर ने भी यजु:० ३१।३,४ में पाद का अर्थ लेश (अंश) किया है। परमेश्वर के अंश सम्भव नहीं, अतः उसकी सामर्थ्य अर्थात् प्रकृति के अंश परमाण्वादि का ही ग्रहण है, जो सृष्टि के उपादनकारण हैं। ईश्वर को साकार बनाने में आपके ही कथना-नुसार साकार (शरीरधारी) ही ईश्वर होना चाहिये, अतः अन्योन्याश्रय दोष होने से यह कल्पना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विरुद्धत्वात् सर्वथाऽपसिद्धान्त इति बहुत्र पल्लवितम्। अतो नायमृषेः पक्षो गौणोऽपितु एष एव मुख्यार्थः। पदं प्राप्तव्यमर्थादवगन्तव्यं यदिदं जगद् अतीन्द्रियपरमाण्वादिनिर्मितं सत् स्थूलत्वमापद्यते इति यावत्। अत एव सर्वोऽपि प्रपञ्चो जिज्ञासुभिर्विद्वद्भिः प्राप्तव्योऽवगन्तव्य इत्यर्थः।

ईश्वरस्य सामर्थ्यमिह प्रकृतिः, सा हि सावयवा तत्रांशांशिभावकल्पना कर्तुं शक्यत एव। सामर्थ्यं प्रकृतिरपि प्रभोर्जगद्रचनाया मायैव। एषा न गुणः प्रत्युत द्रव्यभूता। यथा सत्त्वरजस्तमांसि द्रव्यत्वेऽपि गुणाः कथ्यन्ते समालापे। अत्र तु प्रकृतेः परमाणवोऽनेके भेदवन्त एव, तदा पादत्वकथनव्यवस्था समीचीनैव।

ईश्वरसामर्थ्ये गुणे एव किम्, ईश्वरे एव भवद्ग्रन्थेषु अंशांशिभावकल्पनैव न कृता-

---

अशास्त्रीय है। निराकार पक्ष साध्य नहीं; क्योंकि यह आपको भी स्वीकृत है, पर साकार पक्ष साध्यकोटि में है। जो 'स पर्यगात्०' आदि वेद के विरुद्ध है, अतः अपसिद्धान्त है। ऐसा पूर्व में बहुत सिद्ध किया जा चुका है।

शब्दों के यौगिक पक्ष में अभीष्टार्थ यही है, अतः यह गौण न होकर मुख्यार्थ ही है। पद का अर्थ पदनीय या प्राप्तव्य अर्थात् जानने योग्य होता है। यह जगत् अतीन्द्रिय परमाण्वादि से निर्मित हो स्थूलता को प्राप्त होता है, जैसा विद्वानों को ज्ञातव्य है।

आपकी बुद्धि कैसी विचित्र है जो आप परमेश्वर के द्वारा सृष्टि की प्राप्तव्यता को पक्ष बनाकर मिट्टी और घड़े की बात कहने लगे कि 'क्या मृत्तिका से घट की प्राप्ति होती है ? घट तो मृत्तिका ही है।' आप इससे परमेश्वर को मृत्तिका और जगत् को घट कह रहे हैं, परन्तु श्रीमन् ! घट और मृत्तिका को कार्य-कारण सम्बन्ध है और यह कारण उपादान है। पर घट और मिट्टी के सम्बन्ध के साथ कुम्भकार की जो स्थिति है, वही जगत् और प्रकृति (उपादान) के साथ निमित्तकारण परमेश्वर की है। ईश्वर को उपादानकारण मानने पर अनेक उद्भूत दोषों को हम पूर्व में लिख चुके हैं। अतः परमेश्वर की सामर्थ्य, शक्ति, माया, प्रकृति आदि समानार्थक शब्द हैं। प्रकृति निराकार होकर भी सावयव है, अतः परमाणु प्रकृति के अंश हैं।

ईश्वर की सामर्थ्य प्रकृति के सावयव होने से अंशांशिभाव मानने में कोई दोष नहीं है। यह सामर्थ्य परमात्मा का गुण नहीं है, प्रत्युत यह द्रव्यभूत प्रकृति ही है। जैसे सत्त्व, रजस् और तम द्रव्य होने पर भी गुण कहे जाते हैं। यहाँ पर प्रकृति के परमाणु अनेक भेदवाले हैं, तो पादत्व कहने की व्यवस्था बन ही जायेगी।

ईश्वर के सामर्थ्य को गुण मानकर ईश्वर में ही आपके ग्रन्थों में अंशांशिभाव की कल्पना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽपितु अंशावतार एव गृहीतः। यथा—

मया निष्पादितं ह्यत्र देवकार्यमशेषतः।
यदर्थमवतीर्णोऽहमंशेन ब्रह्मणाऽर्थितः॥ भागव० ११।७।२॥

अत्रावतारपक्षोऽपि पुराणकारेणैव निराकृतो यथा—

रूपं रूपविवर्जितस्य भवतो ध्यानेन यत् कल्पितम्,
स्तुत्याऽनिर्वचनीयताऽखिलगुरो! दूरीकृता यन्मया।
व्यापित्वं च निराकृतं भगवतो यत्तीर्थयात्रादिना,
क्षन्तव्यं जगदीश! तद् विकलता-दोषत्रयं मत्कृतम्॥

महोदय! भूमिकार्थमधिक्षिपता भवता स्वकीयमहीधरार्थोऽपि दृङ्मार्गमागमयितव्य आसीत्। यथाऽऽहासौ—

"अतीतानागतवर्तमानकालसम्बद्धं जगद् यावदस्ति एतावान् सर्वोऽपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषो न तु वास्तवं स्वरूपम्। अस्य पुरुषस्य पादश्चतुर्थांशः।" (यजुः० ३१।३)

अत्र मिथ्यैवांशांशिभावः कल्पितः। जगतो ब्रह्मस्वरूपत्वे कः खलु कल्पयिता? किं

ही नहीं की, अपितु अंश से अंशावतार का ग्रहण किया है। जैसे—

'ब्रह्मा के द्वारा प्रार्थित मैं देवताओं के सम्पूर्ण कार्य के निष्पादन के लिये अंश से अवतीर्ण हुआ हूँ, वे देवकार्य मैंने निष्पन्न कर दिये।' (श्रीमद्भागवत ११।७।२)

पुराणकार ने ही इस अंशावतार का निराकरण भी कर दिया, अर्थात् आर्यसमाज ने निराकार पक्ष की पुष्टि की है। देखिये—

'मैंने रूपविवर्जित आपके ध्यान के द्वारा रूप की कल्पना कर ली और स्तुति करके आपकी अनिर्वचनीयता भी दूर कर दी। तीर्थों में जा-जाकर आपकी व्यापकता का निराकरण कर आपको सीमित कर दिया। हे जगत् के स्वामिन्! मेरे इन तीनों दोषों को क्षमा कर दीजिये।'

महोदय! भूमिका पर आक्षेप करते हुए आपको अपने पूजनीय महीधर के भी अर्थ को दृष्टिगोचर करना चाहिये था। वे यजुः० ३१।३ में लिखते हैं—

"अतीत, अनागत और वर्तमानकाल से सम्बद्ध जगत् जितना भी है, यह सब इस पुरुष की महिमा है, अपना सामर्थ्यविशेष है, यह जगत् इसका स्वरूप नहीं है। यह जगत् इस पुरुष का पाद अर्थात् चतुर्थांश है।"

आप बताइये, इस को ब्रह्मस्वरूप में कल्पना करनेवाला कौन है? क्या स्वयं ब्रह्म ही है?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वयं ब्रह्मैव ? तथा सति ब्रह्मणि मिथ्याकल्पनारोपाद् ब्रह्मैव मिथ्या ते ।

यदाह—'त्रेधा त्रिप्रकारमुच्यते न त्रिषु स्थानेषु' इति, तद् ब्रूतामेष प्रश्नः किं यास्काचार्य-माक्राम्यति ? यतस्तेनैव त्रेधा इतिपदस्यार्थस्त्रेधाभावाय त्रिप्रकारकं पदमेकं पृथिव्यामग्न्यात्मना, अन्तरिक्षे विद्युदात्मना, दिव्यादित्यात्मना कृतः ।

यदाह—"तत्रैवास्ति चेन् मुधैव त्रिषु स्थानेषु स्थापनोक्तिः' इति तु मुग्धमनो-मोदाधानायैव, विचारणाशक्तेः कुण्ठाकरणस्य प्रस्तावनात् । नह्यत्र भूमिकाकारेण लोकानां स्थापनं क्रियते, प्रभुविभक्तस्थापनं नाम सुविशदं व्याख्यायते । किं नास्ति गुरुत्वादियुक्तं प्रकाशरहितं जगत् पृथिव्याम्, लघुत्वादियुक्तं वायुपरमाण्वादिकमन्तरिक्षे, प्रकाशमयं सूर्यादिकं दिवि ? अस्त्येवेति ।

'यन्मोहेन सहितं ज्ञानवर्जितं तत्पांसुरेऽन्तरिक्षे परमणुमयं रचितवान्' इत्यपि व्याख्यानं रहस्यपूर्णम् । तथाहि—'प्रशस्ताः पांसवो रेणवो वर्तन्ते अस्मिन् अन्तरिक्षे ।' 'नगपांसुपाण्डुभ्य-

---

क्योंकि आप ब्रह्मातिरिक्त जीवादि की पृथक् सत्ता तो मानते नहीं । ऐसा होने पर ब्रह्म में मिथ्या कल्पना होने से ब्रह्म ही मिथ्या होने लगेगा ।

'तीन स्थानों में कहा है' यह व्याख्या तो निरुक्त की है । निरुक्त में शाकपूणि आचार्य का मत देते हुए 'त्रेधा' का अर्थ लिखा—'पृथिवी, अन्तरिक्ष और द्युलोक में यह जगत् है । और्णनाभ के मत में प्राणों के शिरोभूत विष्णुपद (मोक्ष) के समारोहण में ।' जिसकी ऋषि ने गुरुत्वादिवाला, लघुत्वादिवाला तथा प्रकाशवाला जगत् यह स्पष्ट व्याख्या कर दी है । अब आप बताइये, आपका यह आक्षेप क्या निरुक्तकार पर है ? तो अति गर्हित है । वहाँ पर पृथिवी में अग्नि (भौतिक) रूप में, अन्तरिक्ष में विद्युद् रूप तथा द्युलोक में सूर्य रूप से यह अग्नि व्याख्यात है ।

भूमिकाकार ने लोकों की स्थापना तो नहीं की है, प्रत्युत उस कथित स्थापना का विशद व्याख्यान किया है । स्थापना तो प्रभु द्वारा ही की गयी है ।

आपने कहा है कि 'स्वामी दयानन्द ने व्यर्थ स्थापना की है' । इस कथन से ये बस अपने मनोमोदक का स्वाद भले लेलें; क्योंकि इसमें स्पष्ट ही विचारणा शक्ति के कुण्ठित हो जाने की भूमिका अवश्य स्पष्ट हो गयी ।

फिर इन्हीं उक्त तीन भेदों में से एक मूढ अर्थात् ज्ञानरहित जो जड़ जगत् है, वह अन्तरिक्ष के बीच में स्थित है । महर्षि के द्वारा यह व्याख्यान रहस्यपूर्ण है । यथा—'प्रशस्त पांसु अर्थात्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्चेति वक्तव्यम्' (५ । २ । १०७) इत्यनेन वार्तिकेन प्रशंसार्थे रः प्रत्ययः । अथवा 'पांसवो रेणवो रजांसि रमन्ते यस्मिन्नन्तरिक्षे तस्मिन् ।' कारणभूतैः परमाणुभिः पांसुभिः कार्यजगद् रच्यत इत्यपि ध्वनितम् ।

ननु सर्वे लोका अन्तरिक्षस्थाः, अन्तरिक्षोऽपि नाम लोकः, तदा कथं स्वलोकस्थत्वं स्वस्मिन्निति ? कथमाधाराधेयभावस्तस्य द्वित्वनिष्ठत्वादिति चेन्न, लोकयते पदार्थान् लोकान् यः स लोकः, यश्च लोक्यते सर्वैः सोऽपि लोकः । प्रथमव्युत्पत्तौ अन्तरिक्षमाधारो द्वितीयायां चाऽधेयत्वं बोध्यते लोकानाम्, परं लोक्यते दृश्यतेऽनुमीयते आधारत्वादिदमन्तरिक्षम्, परं न स्वयमाधेयत्वमस्य, 'शरीरेष्वन्तः अक्षयम्' इति नित्यत्वान्निरवयवत्वाच्च । तस्मादनर्गलं प्रलपनमस्य मुण्डिनोऽनर्गलप्रलपनशीलतुण्डिनः ।

इदमविचारितं चारु यत्—"एवमेव त्रिप्रकारस्य जगतो भवनमित्यप्यसङ्गतम्, जगतस्त्रिप्रकारत्वासिद्धेः । साधर्म्यवैधर्म्याभ्यामपि नैयायिकाभिरनेकधा वर्णितत्वात् ।" यतो हि

रेणु जिसमें है, ऐसा पांसुर अर्थात् अन्तरिक्ष है । पांसुर शब्द की रचना 'नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्' (५ । २ । १०७) वार्तिक से 'र' प्रत्यय करने पर हुई है । ये पांसु ही रेणु या रज कहलाते हैं, जो कार्य जगत् के कारणरूप हैं, यह अर्थ भी ध्वनित होता है ।

प्रश्न—सारे लोक तो अन्तरिक्ष में स्थित हैं और अन्तरिक्ष भी एक लोक है, वह किसमें स्थित है ? क्योंकि अन्तरिक्ष में ही अन्तरिक्ष लोक माना जायेगा, तो आत्माश्रय दोष आयेगा तथा आधार और आधेय भाव भी सङ्गत नहीं हो सकेगा ।

उत्तर—जो पदार्थों या लोकों को दिखाता है अथवा जो देखा जाता है, वह भी लोक कहा जाता है । प्रथम व्युत्पत्ति में अन्तरिक्ष आधार है और द्वितीय व्युत्पत्ति में आधेय है । यह अन्तरिक्ष अनुमान किया जाता व दिखायी पड़ता है कि सब लोक अन्तरिक्ष में वर्तमान हैं । इस प्रकार यह आधार प्रतीत होता है । परन्तु वस्तुतः इस अन्तरिक्ष की आधेयता नहीं मानी जा सकती । 'शरीरों में अर्थात् समस्त पदार्थों में यह अक्षय है, अतः यह नित्य और निरवयव है । इसलिये इनका यह अनर्गल प्रलापमात्र है ।

यह कथन तो बिना विचारे ही किया है कि—"इस प्रकार तीन प्रकार की सृष्टि की बात ही असङ्गत है; क्योंकि जगत् के तीन भेद किसी शास्त्र में प्रसिद्ध नहीं हैं । साधर्म्य और वैधर्म्य के आधार पर तो इसके अनन्त भेदों का वर्णन नैयायिकों ने किया है ।" क्योंकि इनकी लेखनी के साथ इनकी बुद्धि का सहयोग नहीं है । कदाचित् बुद्धि का सहयोग मिल भी जाये तो उसमें भूमिका

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नैतस्य लेखन्या सह बुद्धियोगः। योगे सत्यपि वा न ऋषिवाक्यसूक्ष्माभिप्रायमाकलयितुं शक्नोति। ऋषिरत्र त्रिप्रकारस्य जगतो भवनं रचनां व्याचष्टेऽथवा रचनं त्रिप्रकारकं वर्णयति। साधर्म्यवैधर्म्याभ्यां तु रचितस्य त्रिप्रकारस्य जगतः पदार्थानां पारस्परिकी समानधर्मता विधर्मता वाऽऽख्यायते। एतदन्तरज्ञानमन्तरा दोषान्वेषणरोपणधियाऽऽलोचना तु अन्तर्लोचनविहीनानां प्रतारणैव। तत्स्वरूपं च यथा—'साध्यसाधनयोरनुगमो निदर्श्यते येन वचनेन तद्वचनं साधर्म्यनिदर्शनम्, साध्यवृत्त्या साधनव्यावृत्तिर्येन वचनेन निदर्श्यते तद्वैधर्म्यनिदर्शनम्'।

पृ० १६०५, अनु० १—यदुच्यते—"मोक्षाख्यं विष्णुपदं न समारोढुमर्हम्, तस्य ब्रह्मरूपत्वेन सर्वत्रैवावस्थितत्वात्। प्राणानामङ्गाभावात् सुतरामुत्तमाङ्गाऽभावः। प्रजानामुत्तमाङ्गं तु शिर एव प्रकृत्यात्मकम्। ईश्वरस्य सामर्थ्यमीश्वर एव भवति।" तदज्ञानम्, निरुक्तादि-ग्रन्थानध्ययनात् तात्पर्यानवबोधात्। निरुक्तं च—"यद् विषितो भवति तद्विष्णुर्भवति। विष्णुर्विशतेर्वा व्यश्नोतेर्वा। तस्यैषा भवति।" (१२। १८)

अध्यात्मपक्षे विष्णुर्व्यापक ईश्वर एव। स एव सर्वं व्याप्नोति। यच्च दुर्गाचार्यादिभिः सूर्यपक्षमाश्रित्य व्याख्या कृता तत्र—'समारोहणम्, उदयगिरावुद्यन् पदमेकं निधत्ते, विष्णुपदे

का आशय समझने की क्षमता का अभाव है। ऋषि दयानन्द ने यहाँ पर तीन प्रकार के जगत् की रचना का वर्णन किया है या उसकी रचना तीन प्रकार की है। साधर्म्य और वैधर्म्य के द्वारा तो रचे हुए तीन प्रकार के जगत् के पदार्थों की पारस्परिक समानधर्मता व विधर्मता कही जाती है। इन दोनों के अन्तर-ज्ञान के बिना दोषारोपणमात्र करना अन्तर्लोचनविहीनों के द्वारा प्रवञ्चना ही है। साधर्म्य और वैधर्म्य के निर्दिशित स्वरूप को इस रूप में समझिये कि—'साध्य और हेतु का एक स्थान पर रहना' जिस वाक्य से निर्दिशित हो, उसे 'साधर्म्यनिदर्शन' कहते हैं, एवं जिस वाक्य से साध्य के अभाव के द्वारा हेतु का अभाव निर्दिष्ट हो, उसे 'वैधर्म्यनिदर्शन' कहते हैं।

पृ० १६०५, अनु० १—यह कथन—"मोक्षनामक विष्णुपद पर चढ़ने का कोई प्रसङ्ग आ ही नहीं सकता; क्योंकि मोक्ष पद तो ब्रह्मरूप है और वह सर्वत्र विद्यमान है। प्राण का जब कोई अङ्ग ही नहीं है, तब उत्तमाङ्ग की स्थिति कैसे बनेगी। प्रजा का उत्तमाङ्ग तो सिर माना जाता है, वह प्रकृतिस्वरूप कैसे माना जायेगा? ईश्वर की सामर्थ्य ईश्वर से अभिन्न ही है।" अज्ञानप्रेरित है; क्योंकि इन्होंने विधिवत् निरुक्त आदि ग्रन्थों का अध्ययन ही नहीं किया और न उनके तात्पर्य को ये समझ सके हैं। निरुक्त में स्पष्ट लिखा है कि—'विष्णु समस्त पदार्थों में प्रविष्ट होकर सर्वत्र व्यापक है'।

अध्यात्म पक्ष में विष्णु का अर्थ सूर्य न होकर ईश्वर होगा। दुर्गाचार्य आदि ने विष्णु का सूर्य अर्थ मानकर व्याख्या की है। वहाँ पर 'समारोहण' का अर्थ किया है कि—"सूर्य उदयगिरि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मध्यन्दिनेऽन्तरिक्षे, गयशिरसि अस्तङ्गिरौ,इत्यौर्णवाभ आचार्यो मन्यत एवम्' इति व्याख्यातम्।

नाऽत्राऽपि वस्तुतः सूर्य उदयगिरिमस्तङ्गिरिं वा समारोहति, पृथिवीभ्रमणेनास्मत्प्रतीतिमाधायैव तद्व्याख्यानम्। अतः समारोहणमित्यस्यार्थः सम्प्राप्तिरेव। एवं मोक्षस्य ब्रह्मरूपत्वेऽप्यज्ञानकृतदविष्ठता ज्ञानेनापाक्रियते, तदैव तत्प्राप्तिर्जायत इति महर्षिभाष्यं सुविशदं गम्भीरभावमयं प्रशस्यमेव। सर्वत्र विद्यमानमपि ब्रह्म जीवात्माऽज्ञानान्नाप्नोति।

स्थूलबुद्धिरयमस्मदादिदृश्यमानशरीराङ्गवत् प्राणानामप्युत्तमाङ्गं गवेषयते। अत एव महर्षिः स्ववेदभाष्ये विशिष्टं व्याचष्टे—"प्रजायाः शिर उत्तमभागो यत्कारणं तद्विष्णुपदं गयानां विद्यादिधनानां यच्छिरः फलमानन्दः सोऽपि विष्णुपदाख्यः। गयानां प्राणानां शिरः प्रीतिजनकं सुखं तदपि विष्णुपदमित्यौर्णवाभाचार्यस्य मतम्।" इति। एतेन एतद्ग्रे शङ्कनं सुसमाहितम्।

पर उदय होता हुआ एक पैर रखता है, मध्याह्न में विष्णुपद अर्थात् अन्तरिक्ष में द्वितीय पैर और 'गयशिरसि' अर्थात् अस्त होते समय अस्तंगिरि पर तीसरा पैर रखता है, ऐसा और्णवाभ आचार्य मानते हैं।" यह व्याख्या की है।

यह आलङ्कारिक ढंग से वर्णित है, वास्तव में तो उदयगिरि और अस्तंगिरि पर सूर्य का चढ़ना नहीं होता। पृथिवी के भ्रमण से हम लोगों को ऐसा प्रतीत होता है, इस प्रतीति को लेकर ही वह व्याख्यान किया गया है। अतः 'समारोहण' का अर्थ 'सम्प्राप्ति' है। मनुष्य को शारीरिक या मानसिक श्रम अपनी स्थिति से ऊपर उठने के लिये करना होता है, वह 'समारोहण' है। इस प्रकार मोक्ष के ब्रह्मरूप की प्राप्ति में जीवात्मा से जो अज्ञानकृत दूरी है, वह दूरी उत्तरोत्तर ज्ञानार्जन के द्वारा दूर की जाती है, तभी उसकी प्राप्ति होती है। इस गम्भीर भाव से भूषित महर्षि का भाष्य सर्वथा प्रशंसनीय है। सर्वत्र विद्यमान ब्रह्म को भी जीवात्मा अज्ञान के कारण प्राप्त नहीं कर पाता।

स्थूलबुद्धि यह पारिजात लेखक हम लोगों के दृश्यमान शरीर के अङ्गों की भाँति प्राणों के भी उत्तमाङ्ग (सिर) की खोज कर रहा है, जबकि ऋषि दयानन्द लिखते हैं कि—

"सो विष्णु पद गयशिर अर्थात् प्राणों से परे है, उसको मनुष्य लोग प्राण में स्थिर होके प्राण से प्रिय अन्तर्यामी परमेश्वर को प्राप्त होते हैं, अन्य मार्ग से नहीं।" महर्षि ने अपने वेदभाष्य में विशिष्ट व्याख्या की है कि—"प्रजा का शिर उत्तम भाग जिसका कारण वह विष्णुपद है और (गय) विद्यादि धनों का जो शिर फल या आनन्द है, वह भी विष्णुपद कहलाता है। गय अर्थात् प्राणों का शिर यानी प्रीतिजनक सुख है, वह भी विष्णुपद है, यह और्णवाभ आचार्य का मत है।" इससे आगे की शङ्काओं का भी समाधान हो गया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदत्रोच्यते—"यदीश्वरस्यानन्तं सामर्थ्यं वर्तते, तस्मिन् गयशिरसि विष्णुपदे हीश्वरसामर्थ्येऽस्तीति" तदपि प्रमत्तप्रलपितमेव। अत्र तु स्मरामि निर्मलोक्तिम्—

उन्मत्तस्तु धियं श्रेष्ठां विपरीतां हि मन्यते।
तत्त्वज्ञं मन्यते मूर्खं मूढं स्वं तत्त्ववेदिनम्॥

पौर्वापर्यमनाध्यायन् नाक्षमिष्टायं तात्पर्यमवचेतुम्। तत् प्रणिध्यायन्तु विवेचकाः। भूमिकायाम्—"तथैवेश्वरस्याऽपि सामर्थ्यं गयशिरः प्रजाप्राणयोरुपरि भागे वर्तते। यद् ईश्वरस्यानन्तं सामर्थ्यमस्ति।" इत्ययमस्ति विशदीकृतोऽर्थः। "यन्मोक्षाख्यं प्राप्तव्यं गयशिरो विष्णुपदमस्ति, यत् प्राणानां प्रजानां च उत्तमाङ्गं प्रकृत्यात्मकं कारणमस्ति, तत् कारणं हि ईश्वरसामर्थ्यं गयशिरः अस्ति, यच्च सामर्थ्यमनन्तमस्ति तस्मिन्नेव सामर्थ्ये यदिदं किञ्च स्थूलं सूक्ष्मं वा जगत् तदस्ति। यतो व्याप्यस्य सर्वस्य जगतो व्यापके परमेश्वरे वर्तमानत्वात्।" इति।

अत्र 'यदीश्वरस्य' इत्यत्र सन्धिविच्छेदे 'यदि + ईश्वरस्य' इति पाठस्तु छलाभ्युपेतो वक्तुरभिप्रायादन्यत्र कर्षणात्। वाक्यरचनाया अन्यथाऽन्वयोऽनेनाऽपण्डितेन योज्यते।

"यदीश्वरस्यानन्तं सामर्थ्यं वर्तते, तस्मिन् गयशिरसि विष्णुपदे हीश्वरसामर्थ्ये (सर्वं जगद्) अस्तीति" भूमिका के इस उत्तम कथन को कोई उन्मत्त ही प्रमादकथन कह सकता है। यह निर्मलोक्ति आप पर सत्य घटित है—

'उन्मत्त व्यक्ति तो श्रेष्ठ बुद्धि को भी विपरीत ही मानता है, इसीलिये वह तत्त्वज्ञ को मूर्ख और मूर्ख स्वयं को तत्त्ववित् समझता है।'

पौर्वापर्य का चिन्तन न करनेवाला यह पारिजातकार तात्पर्य का अनुशीलन करने में असमर्थ रहा, इस बात का विवेचक लोग ध्यान करें। भूमिका में—"इसी प्रकार ईश्वर का भी सामर्थ्य गयशिर अर्थात् प्रजा और प्राण के ऊपर भाग में है, जो ईश्वर का अनन्त सामर्थ्य है।" यह विशदीकृत अर्थ है, और—"जो मोक्षाख्य प्राप्तव्य गयशिर है, उसे ही विष्णुपद कहते हैं। जो प्राणों और प्रजाओं का उत्तमाङ्ग प्रकृतिरूप कारण है, वह कारण ही ईश्वर का सामर्थ्य गयशिर है, जो सामर्थ्य अनन्त है, उसमें यह स्थूल और सूक्ष्म दो प्रकार का जगत् है; क्योंकि व्याप्य सब जगत् में व्यापक ईश्वर वर्तमान है।"

पारिजातकार द्वारा यहाँ पर 'यदीश्वरस्य' में सन्धिविच्छेद 'यद् + ईश्वरस्य' न करके 'यदि + ईश्वरस्य' करना छल है; क्योंकि वक्ता के अभिप्राय से अन्य अर्थ निकालना ही तो छल होता है। यह अपण्डित वाक्य-रचना को अन्यथा करके प्रस्तुत कर रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६०६, पं० १—यत् पृच्छ्यते—"यथा विष्णुपदे प्राणानां प्रजानां प्रकृत्यात्मकं शिरो भवति, तथैवेश्वरस्य सामर्थ्यरूपं गयशिरः प्रजाप्राणयोरुपरि वर्तते इत्यपि कथमुपपद्यते ?" इति समादधमः। प्राणाः प्रजा वा प्रकृतेः सामर्थ्यस्य कार्यं कारणं हि प्रकृतिः, यच्चोत्तमाङ्गं कार्यापेक्षयाऽस्त्येव। प्रकृतिरेव सामर्थ्यमीश्वरस्य यच्च गयशिर इति नाम्ना प्रसिद्धं तद्धि प्रजाप्राणयोरुपरि वर्तत एव। व्याप्यं हि जगद् व्यापके ईश्वरे वर्तते, जगत आधारभूतत्वादीश्वरस्य।

यदयमाह—"व्याप्यस्य जगतो व्यापके परमेश्वरे वर्तमानत्वादिति हेतुरपि हेत्वाभास एव, व्यापके वह्नौ वर्तमानस्य दाहकत्वप्रकाशकत्वादेर्व्याप्ये धूमेऽसत्त्वात्।" इत्यपि दर्शनशास्त्रज्ञानाऽभावमेव सूचयति। अत्र भूमिकाकारस्याशयोऽस्ति यद् व्याप्याल्पस्य सर्वस्य जगतो व्यापके ईश्वरे वर्तमानत्वं तदाधारत्वं तदपेक्षयाल्पतरत्वमस्तीति व्याप्यस्याल्पदेशवृत्तित्वात्। वर्तमानत्वादिति कथमसद्धेतुरिति न दर्शितमनेन। अयं हेत्वाभासत्वे हेतुमाह यद् व्यापकस्य वह्नेर्दाहकत्वप्रकाशकत्वादेर्व्याप्ये धूमेऽसत्त्वात्। यदि वह्नेर्न गुणाः सन्ति व्याप्ये धूमे तदा कथङ्कारं

पृ० १६०६, पं० १—"जैसे विष्णुपद में प्राणरूपी प्रजा का प्रकृत्यात्मक शिर होता है, उसी तरह से ईश्वर का सामर्थ्यरूप गयशिर भी प्रजा और प्राण के ऊपर रहता है, यह कैसे बनेगा ?" इस वाक्य द्वारा आप ऋषि के अर्थ की सङ्गति पूछ रहे हैं। वैसे तो भूमिका में सब स्पष्ट है, फिर भी और विशदरूप से इसे समझिये। प्राण और प्रजा में प्रकृतिरूप सामर्थ्य कारण (उपादान) के कार्य हैं। तो कार्य की अपेक्षा कारण का उत्तमाङ्गत्व सिद्ध ही है। ईश्वर की सामर्थ्य प्रकृति ही गयशिर है,जो प्राण और प्रजा के ऊपर है। जगत् का आधार ईश्वर है, अतः यह व्याप्य जगत् व्यापक ईश्वर के भीतर ही है।

व्यापक ईश्वर में जगत् के वर्तमान होने को ये हेत्वाभास बता रहे हैं; क्योंकि 'व्यापक अग्नि में वर्तमान दाहकत्व और प्रकाशकत्व व्याप्य धुएँ में नहीं होते' इस कथन से भी करपात्रीजी का दर्शनशास्त्र का अज्ञान प्रकट हो रहा है। यहाँ पर भूमिकाकार का आशय है कि यह सारा जगत् जो व्याप्य है, वह अल्प है, तो व्यापक परमेश्वर की अपेक्षा अल्पतर हुआ। व्यापक की अपेक्षा व्याप्य अल्पदेशवृत्तिक होता है, तो परमेश्वर आधार बड़ा है और आधेय जगत् अल्प है। 'वर्तमानत्वात्' यह असद् हेतु कैसे है, यह इन्हें बताना चाहिये था। पक्ष रखने मात्र से तो सिद्ध नहीं हो जाता। सिद्ध करने से पूर्व वह पक्ष साध्य ही बना रहेगा। इन्होंने हेतु के स्थान पर हेत्वाभास प्रस्तुत किया है, उसमें भी ये हेतु कह रहे हैं कि व्यापक वह्नि के दाहकत्व और प्रकाशकत्व व्याप्य धुएँ में नहीं होते। अगर अग्नि के ये गुण व्याप्य धुएँ में नहीं आते तो परमेश्वर में जगत् की

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जगतो वर्तमानता परमेश्वरे न सिध्यति ? परमेश्वरस्य जगतः सदाधारत्वमव्यभिचारित्वादयन्तव हेतुरेवासद्धेतुः । यतो हि यत्र यत्र च जगद्वर्तते तत्र तत्रावश्यं परमेश्वरवर्तमानता ।

किञ्च दाहकत्वप्रकाशकत्वादेरभावे न व्याप्ये धूमे चेष्टतेऽयं भूमिकां रचियतुं यद् धूमो वह्नेरजायत वह्निरत्र धूमस्योपादानम्, यदा नोपादानगुणाः समायाताः कार्यधूमे एवमेव ब्रह्मण उपादानत्वेऽपि चेतनत्वादिगुणा न व्याप्ये जगति सम्भवन्तीति, परमिदं चिन्तनमज्ञानाधारकम्, यतो हि धूमस्य वह्नेरुद्भव आर्द्रेन्धनसंयोगोपाधिकृतः । अग्निसंयोगस्तु आर्द्रेन्धनाद् धूमोत्पादने निमित्तम् । अतो न निमित्तगुणाः कार्ये जायन्ते, प्रत्युतोपादानगुणा एव समाविशन्ति ।

अस्मिन् विषये विशिष्टमेवावगन्तव्यं यत् स्वभावेन हि कस्यचित् केनचित् सह सम्बन्धो नियतो निरुपाधिकत्वात् । उपाधिकृतो हि सम्बन्धस्तदपगमे निवर्तते न स्वाभाविकः ।

प्र०—ननु यदि धूमस्योपाधिकृतः सम्बन्धः, उपाधय उपलब्धाः स्युः, शिष्याचार्ययोरिव प्रत्यासत्तावध्ययनम् ।

उ०—नहि वह्निधूमयोरसकृदुपलभ्यमानयोस्तदुपाधीनामनुपलम्भे बीजमस्ति। न

वर्तमानता कैसे सिद्ध होगी ? परन्तु परमेश्वर के 'स दाधार' इत्यादि प्रमाणों से भी जगत् का आधार होने से पारिजातकार का यह हेतु असद् हेतु ही है; क्योंकि जहाँ-जहाँ जगत् है, वहाँ-वहाँ परमेश्वर अवश्य वर्तमान है । यह अन्वय संगत है ।

यह लिखने से भी कि 'जब अग्नि के दाहकतादि गुण व्याप्य धुएँ में नहीं हैं, तो ब्रह्म से उत्पन्न जगत् में भी चेतनत्वादि गुण ब्रह्म के उपादान होने पर भी होना आवश्यक नहीं है ।' बात नहीं बनती । परञ्च दर्शनशास्त्र के ज्ञान की इनकी पोल खुल जाती है; क्योंकि धुआँ जो वह्नि से उत्पन्न होता है, उसमें गीला ईंधन उपाधि है, अग्नि तो आर्द्र (गीले) ईंधन से धुआँ के उत्पादन में निमित्तमात्र है । इसलिए निमित्त के गुण कार्य में आना अनिवार्य नहीं, उपादान के गुण कार्य में होना अनिवार्य है । फलतः ईश्वर जगत् का उपादान कारण न होकर निमित्तकारण है ।

इस विषय में विशेष अवगन्तव्य है कि किसी का किसी के साथ स्वाभाविक सम्बन्ध निरुपाधिक होने से नियत होता है । उपाधिकृत सम्बन्ध उपाधि के हट जाने पर निवृत्त हो जाता है, पर स्वाभाविक सम्बन्ध निवृत्त नहीं होता ।

प्रश्न—यदि धुएँ का उपाधिकृत सम्बन्ध है, तो जब आग और धुआँ दोनों उपलब्ध हैं, उसी प्रकार उपाधि उपलब्ध होनी चाहिये, जैसे शिष्य और आचार्य के पास होने पर अध्ययन की उपलब्धि होती है ।

उत्तर—वह्नि और धुआँ के बार-बार उपलब्ध होने पर उपाधि के अनुपलम्भ (अप्राप्ति) में कोई कारण नहीं है । उपलभ्यमान वस्तु के नियम से उपाधि भी अनुपलब्ध नहीं है । अर्थात्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

चोपलभ्यमानस्य नियमेनाऽनुपलभ्या भवन्त्युपाधयः, ते हि यदि स्वरूपमात्रानुबन्धिनस्तथाप्यव्यभिचारसिद्धिः, तत्कृतस्याऽपि सम्बन्धस्य यावद्द्रव्यभावित्वात्। अथागन्तवः? तत्कारणान्यपि प्रतीयेरन्। उपाधयस्तत्कारणानि च सर्वाण्यतीन्द्रियाणीति गुर्वीयं कल्पना।

यस्य चोपाधयो न सन्ति स धूमः कदाचित् स्वतन्त्रोऽप्युपलभ्येत, यथेन्धनोपाधिकृतधूमसम्बन्धो वह्निः शुष्केन्धनकृताधिपत्यो विधूमः प्रत्यवमृश्यते, न च तथा संविदन्तरे धूमः कदाचिन्निरग्निराभाति। तस्माद् उपलब्धिलक्षणप्राप्तानामुपाधीनामनुपलम्भादभावप्रतीतौ उपलब्धानां शेषकालेन्धनावस्थाविशेषाणां पुनः पुनर्दर्शनेषु व्यभिचारादहेतुत्वनिश्चये सति निखिलदेशकालादिविशेषाध्याहारेण न उपाध्यभावोपलब्धिदोषः। एवं महर्षिदयानन्दलेखो दोषशून्यो निर्भ्रान्तदार्शनिकसम्पत्तिसमृद्धश्चेति तत्त्वविदामतिरोहितम्।

ननु इहापि खलु व्याप्यस्य जगत उपादानमपि परमेश्वर एव मन्यताम्। सर्वशक्तिमतो ब्रह्मणोऽन्यसाहाय्यमनपेक्ष्यैव सर्वजगतो निर्मितिर्मन्तव्येति चेन्न, 'कृत्स्नप्रसक्तिर्निरवयवत्त्व-

---

इसमें कोई हेतु नहीं है कि उपलब्ध होनेवाली वस्तुओं के सम्बन्ध की उपाधियाँ नियमतः अनुपलब्ध ही हों। ये उपाधियाँ अगर अपनी स्वरूप सत्ता के कारण ही अपने उपधेयों (साध्य और हेतुओं) के सम्बन्ध के कारण हैं, फलतः नित्य हैं। तो भी व्याप्ति की सिद्धि हो ही जाती है; क्योंकि वह औपाधिक सम्बन्ध अपने उपधेयरूप सम्बन्धियों की सत्ता तक विद्यमान ही रहता है। अगर ये आगन्तुक हैं, तो उनके भी कारण प्रतीत होने चाहिये। यह कल्पना तो और भी गौरवपूर्ण होगी कि उपाधियाँ और उनके कारण सभी अतीन्द्रिय हैं।

. जिन हेतुओं के उपाधि नहीं होते, वे कदाचित् स्वतन्त्ररूप से (साध्यसम्बन्ध के बिना) भी उपलब्ध होते हैं। किन्तु उपाधि से रहित धूम कभी भी स्वतन्त्ररूप से (वह्नि को छोड़कर) उपलब्ध नहीं होता है। जैसे कि उपाधिमूल के सम्बन्ध के योग्य वह्नि भी जब सूखी हुई लकड़ियों से उत्पन्न होती है, तो बिना धूमसम्बन्ध के भी देखी जाती है। वह्नि ही जब गीली लकड़ियों से उत्पन्न होती है, तब उसमें धूम के उपाधिमूल के सम्बन्ध की भी योग्यता है, किन्तु धूम की कोई भी प्रतीति वह्नि को छोड़कर नहीं होगी। इसलिये जिन उपाधियों में उपलब्ध होने की योग्यता है, उनकी अनुपलब्धि से ही उपाधि के अभाव की सिद्धि होती है। इस प्रकार उपाधि के अभाव की प्रतीति हो जाने पर आर्द्रेन्धनसंयोगरूप उपाधि से युक्त वह्नि हेतु में बार-बार धूम का व्यभिचार देखे जाने पर वह्नि हेतु में अहेतुत्व (हेत्वाभास) का निश्चय हो जाता है। इस प्रकार महर्षि दयानन्द का लेख दोषशून्य, निर्भ्रान्त व दार्शनिक सम्पत्ति से समृद्ध है, यह बात तत्त्ववेत्ताओं को प्रकाशित है।

प्रश्न—फिर भी व्याप्य जगत् का उपादानकारण ब्रह्म को ही मान लें, ब्रह्म तो सर्वथा सर्वशक्तिसम्पन्न है ही, उसे जगत् के निर्माण के लिये अन्य साधन प्रकृति की भी क्या आवश्यकता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शब्दकोपो वा' (वे० २ । १ । २६) अर्थाद् यदि ब्रह्मण एव जगदुत्पत्तिर्मन्येत समस्तब्रह्मणः परिणामित्वापत्तिः स्यान्निरवयवत्वात् । 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः' (मु० २ । १ । २) इत्यादिश्रुतिभिरनादित्वमजत्वं प्रतिपादितं निष्फलं स्यात् । ब्रह्मणो हि सत्, चित्, आनन्दः, स्वातन्त्र्यमिति पादचतुष्टयकल्पना कृताऽऽस्ते । सद्रूपप्रकृतेरुपादानकारणाज्जगदुत्पत्तेस्त्रैतवादसिद्धान्त एव निर्भ्रमः ?

पृ० १६०६, पं० ४—आ०—यदुक्तम्—"पांसुरेऽप्यायनेऽन्तरिक्षे पदं पदनीयं परमाण्वाख्यं यज्जगच्चक्षुषा न दृश्यते' इत्यपि विशृङ्खलमेव । पांसवः परमाणुसंघाताः पादैस्तद्द्रव्यांशैः सूयन्त इत्यपि न सङ्गतम्, परमाणुभिर्द्व्यणुकादिक्रमेणावयविन उत्पद्यन्ते, न संघाताः । तथाख्ये बौद्धवादापत्तेः । न चोत्पन्ना दृश्या भूत्वा सर्वे पदार्थाः परमेश्वरे शेरते, किन्तु तन्मूलभूताः परमाणवोऽपि तत्रैव शेरते । वस्तुतस्तु स्वयमेव दयानन्दो मन्त्रार्थं निरुक्तार्थं चाऽविज्ञाय यत् किञ्चित् प्रलपति । अत एव संस्कृतव्याख्याने किमपि वक्ति हिन्दीव्याख्याने किमप्यन्यदेव ।" इति ।

है ? इसमें ब्रह्म का क्या बिगड़ता है ?

उत्तर—इस विषय में वेदान्तसूत्र (२ । १ । २६) को प्रस्तुत करेंगे, यदि ब्रह्म से ही जगत् की उत्पत्ति अर्थात् जगत् का उपादानकारण भी मान लिया जाये, तो ब्रह्म के निरवयव होने से कुछ अंश में असम्भव होने से समस्त ब्रह्म में ही पारिणामिता माननी पड़ेगी । जबकि 'वह दिव्य, अमूर्त और बाहर- भीतर पूर्ण और अजन्मा है ।' इत्यादि श्रुतियों से ईश्वर का अनादित्व, अमूर्तत्व और अजत्व प्रतिपादित है, वह भी उपादान कारण मानने पर निष्फल हो जायेगा । ब्रह्म की सत्, चित्, आनन्द और स्वतन्त्र—यह पादचतुष्टय कल्पना की गयी है । अतः सद्रूप प्रकृति के उपादानकारण मानने पर ही जगत् की उत्पत्ति में त्रैतवाद का सिद्धान्त ही निर्भ्रान्त सिद्ध होता है । अन्यथा ब्रह्म का तो हुलिया ही बिगड़ जायेगा ।

पृ० १६०६, पं० ४—आक्षेप—"स्वामी दयानन्द का यह कथन भी कि—'अन्तरिक्ष में प्रापणीय परमाणुनामक जगत् दृष्टि से नहीं दीखता' निराधार है । परमाणुसंघात उसके द्रव्यांशों से निकलते हैं, अर्थात् 'जब कोई पदार्थ परमाणुओं के संयोग से स्थूल हो जाता है, तभी वह नेत्रों से देखने में आता है' यह कथन भी सही नहीं है; क्योंकि परमाणुओं से द्व्यणुक प्रभृति के क्रम से अवयवी उत्पन्न होते हैं, संघात नहीं । संघात की उत्पत्ति मानने पर तो बौद्धसिद्धान्त को मानना पड़ जायेगा । परमाणुओं से उत्पन्न संघातात्मक सभी पदार्थ दृश्य होकर परमेश्वर में विश्राम लेते हों, ऐसी बात भी नहीं है । इनके मूलभूत परमाणु ही उस परमेश्वर में ही विश्राम ग्रहण करते हैं । वास्तव में दयानन्द को न तो मन्त्र का ही और न निरुक्त का ही सही अर्थ ज्ञात है । इसीलिये वे सब जगह मनमानी करते रहते हैं । वे संस्कृत में कुछ और हिन्दी में कुछ लिखते हैं ।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—वस्तुतो न कश्चिदेतस्य मान्य आचार्यः पूर्णां व्याख्यां चक्रे, अत एव महर्षिः स्पष्टं व्याख्यानमकार्षीत्। तद्गाम्भीर्यं भवन्मतिस्तराद् बहिरेव। अवबुध्यताम्—'अस्य त्रिप्रकारकजगतो यच्च त्रिप्रकारकमपि द्विविधं प्रत्यक्षं चक्षुर्दृश्यमप्रत्यक्षं चक्षुषाऽदृश्यं तस्य पांसुरे आकाशे (पांसवो रेणवः सन्त्यस्मिन्) यन्निरवयवं परमाणुरूपं पदं पदनीयं प्रापणीयं वर्तते तच्चक्षुषा न दृश्यते, केवलं समूढं तर्केण ऊहनीयमस्ति' इति सकलं सुसम्बद्धमिति प्रतिभावान् जानीतेऽनूहनो नाम विशृङ्खलं कथयितुं दुःसाहसं कर्तुं शक्नोति।

अपि वोपमार्थे स्यात् 'समूढमिव पांसुले पदं न दृश्यते' अर्थाद् यथा पांसुले प्रदेशे पदं न्यस्तमुत्क्षेपणसमनन्तरमेव पांसुभिराकीर्णत्वान्न दृश्यते, एवमस्य जगतः परमाणवोऽन्तरिक्षे न दृश्यन्ते। 'पांसवः कस्मात्? ते हि पादैः सूयन्ते जन्यन्त इत्यर्थः' इति दुर्गः। पादैः अंशैः परमाणुभिः सूयन्ते जन्यन्ते ते हि पांसवः कथ्यन्ते ते च परमाणुसमूहा एव। अमरकोशेऽपि समूहपर्यायएव संघातशब्दः। द्व्यणुका अवयवा अपि परमाणूनां संघाता एव। बौद्धवादापत्तिवचनेन तत्सिद्धान्ताबोध एव सूच्यतेऽन्यथा नामग्राहं लेख्यमासीत्। वस्तुस्तु सायणाचार्यादिभिर्विलसनाख्येन चास्य मन्त्रस्य अर्थस्य वामनाभिप्रायेण वर्णितत्वात् स पूर्वपश्चिमपर्वतस्थो

समाधान—वास्तव में इनके किसी मान्य आचार्य ने पूर्ण व्याख्या नहीं की है, अत एव ऋषि ने उत्तम बुद्धि-तर्क-सङ्गत व्याख्या सप्रमाण की है, जिसकी गम्भीरता को समझना करपात्री जी के बुद्धिस्तर से बाहर की बात है। आप समझिये इसे—'इस तीन प्रकार के जगत् का तीन प्रकार का गुरुत्व, लघुत्व, प्रकाशकादि रूप से तथा सूक्ष्मस्थूल के भेद से दो प्रकार का भी जगत् है, जो चक्षुओं से दृष्ट और नेत्रों से अगोचर भी है। उसके आकाश में पांसु अर्थात् परमाणु हैं, जो निरवयव है, परमाणुरूप प्राप्त करने योग्य है। केवल समूढ अर्थात् तर्क के द्वारा ऊहनीय है।' इस प्रकार ऋषि का व्याख्यान सुस्पष्ट और तर्कसङ्गत है। इसको ऊहनशील प्रतिभावान् समझ लेता है और आप सदृश ऊहाशक्ति-वञ्चित विच्छृङ्खल कहने का दुःसाहस कर सकता है।

अथवा उपमार्थ के रूप में इसकी व्याख्या की जा सकती है कि पांसुल (धूलि भरे स्थान) पर रखा हुआ पैर का चिह्न धूल से तत्काल पुनः आवृत होने से नहीं दीखता। इसी प्रकार जगत् के परमाणु आकाश में दिखायी नहीं देते। 'ये पांसु क्यों कहलाते हैं? पैरों के रखने से पैदा होते हैं।' यह दुर्गाचार्य का कथन है। तथा पाद अर्थात् अंशभूत परमाणुओं से उत्पन्न होते हैं, वे परमाणुओं के समूह होते हैं। समूह का पर्यायवाची ही संघात शब्द है। द्व्यणुक आदि भी तो परमाणुओं के संघात ही तो हैं। बौद्धवाद के सिद्धान्त के आने की चर्चा मात्र कर इसे प्रस्तुत न करने से स्पष्ट है कि इन्हें बौद्धों के मत का भी ज्ञान नहीं है। अन्यथा लिखना 'नाम' से चाहिये था। वास्तव में सायणाचार्यादि और विलसन के द्वारा इस मन्त्र का अर्थ वामनावतार के रूप में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विष्णुरस्तीति मिथ्यार्थो विहितः। तत्संस्कारग्रस्ता अन्येऽपि भ्रान्ता विद्वांसः, पुनः का कथाऽस्य वराकस्य मुण्डिनः।

हिन्दीभाषायां यन्नाम महर्षिणा लेखितोऽर्थः स तु न प्रायशः संस्कृतभाष्यस्याक्षरानुवादः, अपितु विशिष्टार्थोऽपि सङ्क्षेपतः पल्लवितः क्रियते। ऊहनशीलप्रतिभाशालिभ्यः संस्कृतमार्यभाषा चेतरेभ्योऽपि।

त्रिविक्रमावतारकथायाः कपोलकल्पना त्ववैज्ञानिकी, अदार्शनिकी, वेदविरुद्धा तथाऽसम्भवात्। तस्मात् पुराणकल्पितानि तीर्थानि अवतारादिवादाश्च मिथ्याकथाः प्रकल्प्य पण्डिताभासैः प्रचारिता इति बोद्धव्यम्।

पृ० १६०९, पं० ८—यदुक्तम्—"अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' तीर्थेभ्यः शास्त्रानुज्ञाविषयेभ्यो यज्ञादिभ्योऽन्यत्र सर्वाणि भूतान्यहिंसन् इत्यर्थः।'तीर्थं शास्त्रानुज्ञाविषयः' इति शाङ्करभाष्यम्। यज्ञादिषु विहितानि हिंसनान्यहिंसैवेति मन्तव्यम्। अपराधिनामुपरि हिंसनमिति उपरिपदप्रयोगो व्यर्थ एव।" इति घोराज्ञानप्रणष्टमतिना करपात्रिणा शास्त्रविरुद्धमेव प्रत्यपादि। यज्ञविषये वाममार्गानुचरितं चरितम्।

वर्णित किया गया है। पूर्व और पश्चिम के पर्वतों पर स्थित विष्णु की कल्पना करना मिथ्यार्थ है। सायण के संस्कारों से ग्रस्त अन्य विद्वान् भी भ्रान्त हो गये। इस बेचारे मुण्डी की भला क्या बात कही जाये ?

हिन्दी भाषा में जो महर्षि ने अर्थ लिखा है, वह प्रायः संस्कृत भाषा का अक्षरानुवाद नहीं किया है। उनके पास अल्प समय था, अतः महर्षि प्रायः हिन्दी में कुछ विशिष्ट बातें कहकर भी संस्कृतलेख का स्पष्टीकरण भी कर देते हैं। संस्कृत ऊहनशील प्रतिभावालों के लिये तथा आर्यभाषा सामान्य आप सदृश लोगों के लिये भी है।

त्रिविक्रमावतार की कथा की कपोलकल्पना तो अवैज्ञानिक, अदार्शनिक और वेदविरुद्ध है; क्योंकि वह कथा असम्भव दोष से ग्रस्त है। इसलिये पुराण कल्पित तीर्थ, अवतारवाद, मिथ्या कथाएँ पण्डिताभासों ने कल्पित कर प्रचारित कर दीं, ऐसा मानना चाहिये।

पृ० १६०९, पं० ८—"अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' इस छान्दोग्य-वाक्य में तीर्थ शब्द का अर्थ वेदशास्त्र से अनुज्ञात यज्ञ आदि है। इन यज्ञ आदि कर्मों के अतिरिक्त कहीं भी प्राणियों की हिंसा नहीं करनी चाहिये, यह उस श्रुति का अर्थ होता है। शाङ्करभाष्य में भी यही अर्थ किया गया है। यज्ञ प्रभृति में की गयी हिंसा हिंसा नहीं मानी जाती। इसी तरह से अपराधियों की हिंसा करने में भी इस शब्द का प्रयोग उचित नहीं है, अर्थात् उनकी हिंसा भी हिंसा न कहलाकर यज्ञीय हिंसा के समान एक पुण्य कार्य ही है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवंविधधूर्तव्याख्यानैरेव करुणापराणां सहृदयानां बुद्धादिमहाभागानां सर्वप्राणिरक्षाव्रतानामहिंसकवृत्तीनामरुचिं वेदेषूदपद्यत। अयं हि यज्ञमाध्यमेन मांसाशिनां पण्डिताभासानां पौरोहित्यकर्मपरायणानां दुराचारिणां याज्ञिकानां कालोऽस्मदुत्तमं वाङ्मयं कलङ्कयितुं निकृष्टतमकरालः काल आसीद् दुर्भाग्यावहः। एवंविधानामधमानां परमोद्धारकोऽस्मात् कलङ्कपङ्कान्महर्षिरभूत् सहस्रवर्षानन्तरम्। अत्र विमर्शनीय एष विषयो विशेषेण। ये चाऽऽधुनिकमीमांसकास्ते कथयन्ति—

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
यज्ञश्च भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः॥

ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः॥

यह कथन घोर अज्ञान से प्रणष्ट मतिवाले करपात्री जी ने सब शास्त्रों के विरुद्ध ही किया है। यज्ञविषय में यह कथन वाममार्गी से प्रेरित है। ऐसे धूर्तता भरे हुए व्याख्यानों से करुणाशील सहृदय बुद्ध आदि महात्माओं की, जो सब प्राणियों की अहिंसा के व्रतवाले थे, उनकी भी वेदों के प्रति अरुचि और अश्रद्धा उत्पन्न कर दी गयी। यह यज्ञ के माध्यम से मांसाहारी, पाण्डिताभास, पौरोहित्यकर्म-परायण, दुराचारी याज्ञिक पेटुओं का समय था, जो हमारे उत्तम वाङ्मय को कलङ्कित करने के लिये निकृष्टतम कराल काल ही था, जो आर्य जाति पर दुर्भाग्य के दिन लाया। ऐसे क्रूर अधमों को भी उद्धारक दयानिधि दयानन्द इस कलङ्क की कीचड़ से उबारने के लिये सहस्रों वर्षों के अनन्तर अवतीर्ण हुए। यहाँ हमें इस विषय पर विशेषरूप से विचार करना है।

आधुनिक मीमांसक कहते हैं कि—

'स्वयम्भू भगवान् ने यज्ञ के लिये पशु बनाये हैं। यज्ञ सब के कल्याण के लिये है, अतः यज्ञ में वध करना अहिंसा ही है॥'

'ओषधियाँ, पशु, वृक्ष, तिर्यग्योनि और पक्षी—ये यज्ञ में मारे हुए उत्तम गति प्राप्त करते हैं॥'

'मधुपर्क, यज्ञ और पितृदैवत कर्म में पशु मारे जाने चाहिये, अन्यत्र नहीं, ऐसा मनु महाराज कहते हैं॥'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतेष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद् द्विजः ।
आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ।।

गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः ।
नावेदविहितां हिंसामापद्यपि समाचरेत् ।।

या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद् वेदाद्धर्मो हि निर्बभौ ।। मनु० ५ । ३९-४४ ।।

इदं हि चित्रं पशुवधशालाया धार्मिकाभासैश्चित्रितं प्रक्षिप्य श्लोकान् निर्माय नूतनान् मनुशास्त्रे । 'वैदिकी हिंसा हिंसा न भवति' इति मन्वानैस्त्वसंख्यगवां वध एवादिष्टः । वाममार्गदीक्षितमहीधरादेरेषोऽप्रशस्तः पन्थाः प्रसारितः । नहि यजुर्वेदीये चतुर्विंशाध्याये यज्ञोपयोगिपशूनां वर्णनप्रकरणे भक्षणादिविधायकः कश्चिच्छब्द आयातः । प्रत्युत 'यथा मांसं यथासुरा यथाक्षा अधिदेवने' (अ० ६ ।७। १) इत्यादिषु 'मुग्धा देवा उत शुना यजन्त' (अथर्व० ७ ।५ । ५) इत्यादिषु मन्त्रेषु हवने यज्ञहिंसनं निषिद्धमेव । मीमांसायामपि—'अपि वादानमात्रं स्याद् भक्षशब्दानभिसम्बन्धात्' (१० ।७। १५) इत्यादिसूत्रेषु पशूनां दानमात्रं विधीयते, न तु

'वेदतत्त्व को जाननेवाला द्विज उक्त प्रयोजनों में वध करता हुआ अपने को तथा पशु को उत्तम गति में पहुँचाता है ।।'

'गृहस्थाश्रम, ब्रह्मचर्याश्रम या वानप्रस्थाश्रम में रहता हुआ जितेन्द्रिय द्विज वेद से अविहित हिंसा को आपत्ति में भी न करे ।।'

'जो हिंसा वेद से विहित है और इस चराचर जगत् में नियत है, उसे अहिंसा ही समझे । इस प्रकार वेद से धर्म शोभा पाता है ।।' (मनु० ५ ।३९-४४)

यह पशुवधशाला का विचित्र चित्र है, जो कि नये श्लोक गढ़कर मनुस्मृति में मिला दिये हैं । इन धूर्तों ने 'वैदिकी हिंसा हिंसा न भवति' ऐसे वाक्य गढ़कर असंख्य गौवों के वध भी श्रद्धामूढ यजमानों द्वारा कराए । फिर भी ये कसाई निर्लज्जतापूर्वक अपनी धूर्तता का जाल मूर्ख जनता में फैला रहे हैं । वाममार्गदीक्षित महीधरादि का यह दानवी लीला का कुमार्ग है । यजुर्वेद के चौबीसवें अध्याय में यज्ञों में घृत दुग्ध आदि के द्वारा काम में आनेवाले पशुओं के वर्णन में कहीं भी वध या भक्षण का कोई शब्द नहीं है, प्रत्युत 'यथा मांसं यथा सुरा०' (ऋग्वेद ६ ।७। १),'मुग्धा देवाः०' (अथर्व० ७ । ५ । ५) मन्त्रों में हवन करते समय यज्ञ-हिंसन का निषेध किया है । मीमांसा (१० ।७। १५) में भी लिखा है कि 'भक्ष शब्द का कोई सम्बन्ध न होने से पशुओं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

हिंसनम्। अपि च 'अध्वरो वै यज्ञो यज्ञकृतम्' (शत० १ । २ । ४ । ५) , 'ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधः'(निरु० १ ।७) अध्वरशब्दः ।ऋग्वेदे १ ।२३ ।१७, १ । १३५ ।७ इत्यादिस्थलेषु, यजुर्वेदे चापि ३७ ।१९, ३ । ११, २१ । २७ आदिस्थलेषु आयातो यज्ञार्थे । एतेन यज्ञेषु हिंसनं प्रतिषिद्धं प्रमाणितं भवति । यज्ञनाम्ना स्वार्थिभिरुदरपूर्तये कल्पनाऽप्रशस्तैव ।

(क) किमधिकं कर्मकाण्डस्य यजुषि वेदे प्रथममन्त्र एव 'यजमानस्य पशून् पाहि' इति स्पष्टमेव पशूनामहिंसनं रक्षणं प्रतिपाद्यते । (ख) मांसाहारिणां च यज्ञेऽनधिकार एव। यथा—'ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम्' (ऋ० १० । ५३ । ४) । अर्थात् केवलमन्नाशिन एव पञ्च जना यज्ञसम्पादनं विदध्युः । निरुक्ते—'ऊर्गिति अन्ननाम, ऊर्जयतीति सतः' (निरु० ३ । २ । ७) । मनुना यज्ञोद्देश्यमेव हिंसानिवृत्तिपरकं प्रतिनिर्दिष्टम्—

> पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
> कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥ ३ । ६८ ॥

किं बहुना, मनुना तु 'प्रतोदेनातुदन् भृशम्' (४ । ६८) इति ब्रुवता युग्यप्रासङ्ग्यान् पशून् प्रतोदेनाऽपि न ताडयेदिति निर्दिष्टम् ।

यज्ञेषु पशुहिंसाप्रवर्तनं भ्रान्त्या अज्ञैरक्रियत 'आलभ-आलम्भ' क्रिययोरर्थसाङ्कर्येण ।

का दानमात्र करे, न कि हिंसा' । शतपथ (१ । २ । ४ । ५) तथा निरुक्त (१ । ७) में यज्ञ को अध्वर कहकर हिंसा कर्म का प्रतिषेध किया गया है । ऋग्वेद और यजुर्वेद में अनेक स्थलों पर अध्वर शब्द का प्रयोग यज्ञार्थ में किया गया है । इससे यज्ञों में अहिंसन प्रमाणित और हिंसन प्रतिषिद्ध सिद्ध है । यज्ञ का नाम लेकर अनाचारी लोगों की उदरपूर्ति की कल्पना भी ठीक नहीं है ।

और अधिक क्या कहें यजुर्वेद जो कर्मकाण्ड का वेद है, उसे प्रथम मन्त्र में ही 'यजमानस्य पशून् पाहि' अर्थात् 'यजमान के पशुओं की रक्षा करो' का आदेश है । मांसाहार करनेवाले का तो यज्ञ करने का अधिकार भी नहीं है । 'ऊर्जाद्उत यज्ञियासः०' (ऋ० १० । ५३ । ४) मन्त्र में केवल अन्न खानेवाले को यज्ञाधिकार दिया है । निरुक्त में 'ऊर्गिति अन्ननाम' (३ । २ । ७) कहा है । मनु ने यज्ञ का उद्देश्य हिंसा की निवृत्तिपरक बताया है । देखिये—'पञ्च सूना गृहस्थस्य' (३ । ६८) । अनजाने में हुई हिंसा का प्रायश्चित्त यज्ञ भी निर्दिष्ट है ।

इससे अधिक महाराज मनु क्या लिखते ? उन्होंने तो जुए में जुते पशुओं को पैना से मारने तक का निषेध किया है (४ । ६८) ।

यज्ञों में पशुहिंसा का प्रवर्तन अज्ञ और धूर्तों ने (अज्ञों ने भ्रान्ति से धूर्तों ने धूर्तता से) किया है । आङ् पूर्वक 'लभ' या 'लम्भ' क्रियाओं के अर्थ में सङ्करता भर कर इनको हिंसा अर्थ में कर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तैरालभस्थाने आलम्भनं हिंसनं प्रचारितम्। तच्च वैशम्पायनचरकप्रतिसंस्कृतचरकसंहितायामतिसारप्रकरणे स्पष्टम्—

"आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुः, नालम्भाय प्रक्रियन्ते स्म। ततो दक्षयज्ञप्रत्यवरकालं मनोः पुत्राणां नरिष्यन्नाभागेक्ष्वाकुनृगशर्यात्यादीनां च क्रतुषु 'पशूनामेवाभ्यनुज्ञानात्' पशवः प्रोक्षणमापुः। अतश्च प्रत्यवरकालं पृषध्रेण दीर्घसत्रेण यजता पशूनामभावाद् गवालम्भः प्रवर्तितः.....अतीसारः पूर्वमुत्पन्नः पृषध्रयज्ञे।"

(चिकित्सास्थाने १९।४)

एवमेव संस्कृतशब्दानामनेकार्थानां भ्रान्त्या जिह्वालौल्यवृत्तामिषाशिभिर्ज्ञात्वैव अनर्थप्रचालनेन अजादिशब्दैश्छागादयोऽपि यज्ञे गृहीताः। अत्र धान्यं हि अप्ररोहि त्रिवर्षपुरातनं यज्ञार्थं ग्राह्यमासीत्। यथोक्तं महाभारते देवानामृषीणां च संवादे (शा० प० ३३७) —

बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः।
अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ॥
नैष धर्मः सतां देवा यत्र वै वध्यते पशुः॥

दिया। उन्होंने आलभ (स्पर्श) के स्थान पर आलम्भन (मारना) प्रचारित कर दिया। यह बात वैशम्पायन, चरक प्रतिसंस्कृत चरकसंहिता में अतिसार-प्रकरण में लिखी है—

"आदिकाल में यज्ञ में पशु को केवल स्पर्श कर मन्त्र पढ़कर छोड़ देने के लिये ही लाया करते थे, उनका वध नहीं किया जाता था। दक्षयज्ञ के बाद के काल में मनु के पुत्र नरिष्यन्, नाभाग, इक्ष्वाकु आदि के यज्ञों में पशुओं का ही आदेश होने से उनका हिंसन प्रारम्भ हुआ। तदनंतर पृषध्र ने दीर्घसत्र में पशु न मिलने से गायों का वध प्रारम्भ किया। .....पृषध्र राजा के यज्ञ में ही सर्वप्रथम अतीसार उत्पन्न हुआ।"

इसी प्रकार अनेकार्थक संस्कृत-शब्दों के भ्रान्ति से या जिह्वालौल्य के कारण प्रवृत्त मांसाहारियों ने जान बूझकर ही अनर्थ चालन के द्वारा अजादि शब्दों से छाग (बकरे) आदि अर्थ ग्रहण कर लिये। यहाँ पर तीन वर्ष पुराना धान्य ग्रहण करना योग्य था। जैसाकि महाभारत के शान्तिपर्व (अ० ३३७) में लिखा है—

'यज्ञों में बीजों से हवन करना चाहिये, यह वैदिकी श्रुति है। यज्ञ नाम बीजों का है, इसमें छाग मारने योग्य नहीं है। पशुओं का जहाँ वध हो, वह सज्जनों का धर्म नहीं है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अलमतिविस्तरेण। महाशय! यज्ञे पशुवधो न सतां धर्मः। अतो महर्षिणा छान्दोग्यस्यानुवेदविधानं प्रशस्ततरं व्याख्यानं कृतम्। हिन्दीकारोऽस्यानुवदति—"इसी तरह से अपराधियों की हिंसा करने में भी इस शब्द का प्रयोग उचित नहीं है।" अर्थात् 'उनकी हिंसा भी हिंसा न कहलाकर यज्ञीय हिंसा के समान एक पुण्य कार्य ही है।' कि ब्रूमोऽत्र तु कूपे एव भङ्गमेलनं जातम्, तन्मिश्रं नीरमास्वाद्य समेऽप्युन्मत्तप्रलपनं विदधति। अयमपि तत् पुण्यकृत्यं विनिर्दिशति।

स तु पारिजातलेखकः "अपराधिनामुपरि हिंसनमिति उपरिपदप्रयोगो व्यर्थ एव" इति कथयति, परमनुवादकः 'आम्रान् पृष्टः कोविदानाचष्टे'। अस्तु,

अथवा 'अरसिकेषु कवित्वनिवेदनं विफलितं विधिना कृतमस्ति। अयं वक्ति यद् 'अपराधिनां हिंसनं विहितम्' इत्येव लेखनीयमासीद् ऋषिणा, 'उपरि' शब्दप्रयोगो व्यर्थ एव कृतः। तच्छ्रूयताम्—रघ्वा राज्ञश्च कालिदासेन 'परस्परस्य प्रेम पर्यचीयत' इति वर्णितव्यमासीत्, परं तत्र कविः 'परस्परस्योपरि पर्यचीयत' इति 'उपरि' शब्दं विशिष्टं कवयति।

अब अधिक विस्तार न करेंगे। महाशय! सुना आपने, यज्ञ में पशुवध करना सत्पुरुषों का धर्म नहीं है। इसलिये महर्षि ने छान्दोग्य के वाक्य की व्याख्या भी वेद के अनुरूप कर दी। करपात्रीजी का अनुवादक तो मूल के विरुद्ध अनुवाद करके अपराध कर रहा है। वह लिखता है—"इसी तरह से अपराधियों की हिंसा करने में भी इस शब्द का प्रयोग उचित नहीं है।" अर्थात् 'हिंसा भी हिंसा न कहलाकर यज्ञीय हिंसा के समान एक पुण्य कार्य है'। कहिये—मूलार्थ के विपरीत लिखने वाला यह अपराधी अनुवादक क्या अपने वचन से ही वध्य नहीं है? और अधिक क्या कहें? यहाँ तो कुएँ में ही भाँग पड़ी है, सो उस जल को पीकर यह भी उसे यज्ञ के समान पुण्य कार्य कह रहा है।

ये करपात्रीजी तो कहते हैं कि—"अपराधिनामुपरि हिंसनम्', इसमें 'उपरि' शब्द का प्रयोग व्यर्थ है।" और अनुवादक 'पूछा आम्रों के विषय में, कचनार का वर्णन करने लगे।' अस्तु, सच है—

'अरसिक लोगों में कवित्व का प्रसङ्ग छेड़ना तो ब्रह्मा ने विपरीत बताया है।'

पारिजातकार कह रहे हैं कि 'अपराधिनां हिंसनम्' इतना ही वाक्य लिखना चाहिये, 'उपरि' प्रयोग व्यर्थ है, पर आप यहाँ 'उपरि' शब्द प्रयोग के रहस्य को कविकुलशिरोमणि कालिदास से पूछिये। कवि ने रघुवंश में रघु की उत्पत्ति पर सुदक्षिणा और दिलीप के प्रेम को पुत्र के हो जाने तथा उस पर बँट जाने पर भी लिखा कि—'परस्परस्योपरि पर्यचीयत' अर्थात् 'उन दोनों का प्रेम एक दूसरे के ऊपर और बढ़ गया।' जबकि नीरसहृदय मुण्डी श्री करपात्रीजी की दृष्टि से इतना पर्याप्त है—'परस्परस्य पर्यचीयत'। 'उपरि' शब्द का उसी प्रकार यहाँ पर भी वैशिष्ट्य है। जैसे

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्र न केवलमनुप्राससौन्दर्यमस्ति, प्रत्युत भावसौष्ठवमपि विद्यते। एवमेव 'अपराधिनां हिंसनम्' इत्यनुक्त्वा 'उपरि' पाठविशेषेण अपराधिविषये तदपराधो गवेषणयाऽपि निश्चेतव्य इति सङ्केतयति। विशेषाशयगर्भिता हि शैली भवति ऋषीणाम्। यथा च सुश्रुते—'सर्पिः पीत्वोपरि पयः पिबेत्' इत्यत्र 'उपरि' विनाऽपि अर्थो भवति, परमुपरिप्रयोगाऽभिप्रायं तु सहृदयो विज्ञभिषगेवोररीकरोति। सम्प्रति तु मस्तिष्कपिधानमुद्घाटय महोदय!

१६०९ पृष्ठतः १६११ पृष्ठं यावन्न किमपि तत्त्वं निगदितम्, व्यर्थमेव भौमजलतीर्थानां प्रशंसां कुर्वाणोऽन्ते प्राह—"जलस्थलरूपाणि तीर्थान्यपि मनुष्यान् तारयन्त्येव।" परन्न तानि तीर्थानि, करणव्युत्पत्तेरसामञ्जस्यात्।

पृ० १६१२, पं० २—"यज्ञाचार्यशास्त्रेषु त्वदभिमततीर्थेष्वपि तारकसामर्थ्याभावेना-तीर्थत्वप्रसङ्गः।" इति त्वेतस्य दृढाज्ञानविजृम्भितम्, यज्जलेषु तारकत्वं स्वीकरोति परं यज्ञाचार्यशास्त्रेषु ज्ञानमूलेषु तारकत्वं खण्डयति। यदाहि ज्ञानादेव मुक्तिर्मताऽसंशयम्। त्वत्कथनं तु नास्तिकतामेव साधयति।

कालिदास के प्रयोग में अनुप्रास से शोभा ही नहीं बढ़ी, बल्कि भावसौष्ठव भी बढ़ गया। उसी प्रकार ऋषिप्रयोग 'उपरि' के द्वारा गवेषणा से अपराध निश्चेतव्य है, यह भी अर्थ ध्वनित होता है। ऋषियों की शैली विशेष गम्भीराशय को रखनेवाली होती है। जैसा महर्षि सुश्रुत का भी प्रयोग देखिये—'सर्पिः पीत्वोपरि पयः पिबेत्' अर्थात् 'घी पीने के ऊपर दूध पिये'। यहाँ 'उपरि' शब्द के प्रयोग में वैशिष्ट्य है, जबकि 'घी पीकर दूध पिये' इतने से ही काम चल सकता था, परन्तु 'उपरि' शब्द के वैशिष्ट्य को विज्ञ वैद्य ही जान सकता है। अतः 'उपरि' शब्द का विशेष अभिप्राय है कि तत्काल पिये, अन्यथा वह लाभ नहीं होगा। अरे भाई! अब तो मस्तिष्क के ढक्कन को खोलिये और इसमें ऋष्यर्थरूपी, पावन पवन का प्रवेश होने दीजिये।

१६०९ पृष्ठ से १६११ पृष्ठ तक निःसार भौम तीर्थजलों की प्रशंसा ग्रन्थों से उद्धृत कर दी है। फिर अन्त में कहते है—"जल-स्थल रूप तीर्थ भी मनुष्यों को तार देते हैं" पर यह ठीक नहीं; क्योंकि जल किसी को नहीं तारते, 'जिससे तरते हैं' इस करण में की गयी व्युत्पत्ति का जल आदि में सामञ्जस्य नहीं बैठता। इस तरह नौका आदि तो तीर्थ हो सकते हैं, पर जल नहीं हो सकते।

पृ० १६१२, पं० २ पर पारिजातकार कहते हैं कि—"काशी, प्रयाग आदि को तीर्थ न मानना घोर अज्ञान है; क्योंकि स्वामी जी के माने यज्ञादि भी तो पार नहीं पहुँचाते, अतः ये भी तीर्थ नहीं हो सकते।" यह कथन करपात्रीजी का घोरातिघोर अन्धाज्ञान है। क्या ज्ञान से मुक्ति आप भी स्वीकार करते हैं कि नहीं? यदि करते हैं तो यज्ञ में उच्चारित मन्त्रों का ज्ञान अन्तःकरण को

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पश्यतु— "न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।"
"यस्तीर्थबुद्धिं सलिलेषु कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः।"

इत्याद्युक्तिभिर्भागवतकारेणैव तव भ्रान्त्याशालतासु तुषारपातः कृतः।

पृ० १६१२, अनु० १—'आपः पुनन्तु०' इति जलपावनत्वं गाङ्गजलस्य रोगसंहारकत्वं यत् प्रतिपाद्यते, तच्छरीरशोधनायास्माभिरपि मन्यते, परं मानसपापनाशकत्वं नाम कथङ्कारं सम्भाव्यते? नहि कथमपि ज्ञानसम्पाद्या मुक्तिर्गाङ्गादिजलसाध्या सम्भवति, 'ऋते ज्ञानान्न मुक्तिः' इत्यादिविधानात्।

पृ० १६१३, पं० १२—यदुच्यते—"इडा-पिङ्गला-सुषुम्णा-कूर्मनाड्यादीनां गङ्गादिसंज्ञास्तीति। तासां योगसमाधौ परमेश्वरस्य ग्रहणात्' इति तुच्छम्, प्रसिद्धार्थपरित्यागेऽप्रसिद्धार्थग्रहणे च मानाभावात्।" इति सर्वमज्ञानसुलभम्, वेदे लोकप्रसिद्धशब्दार्थग्रहणस्यैवाविधेयत्वात् तच्छब्दानां यौगिकानां तथार्थग्राह्यत्वात्। 'इह करपात्रोपस्थितिः' इति वाक्ये नहि करस्य पात्रस्य वा प्रसिद्धस्य ग्रहणं कार्यम्, भवदर्थग्रहणस्याभीष्टत्वात्, अन्यथा करमेव पात्रं मत्वा कथं न व्यवाहरत्?

पवित्र कर भवसागर से पार करने का साधन बनती है। तुम्हारे पुराणादि के भी प्रमाण हैं कि जल तीर्थ नहीं होते।

देखिये—'जलमय तीर्थ नहीं होते और न मिट्टी तथा पाषाणमय देव होते हैं।

'जो जलों में तीर्थबुद्धि रखता है, वह अभिज्ञजनों में बैल और गधा है'। इत्यादि कथनों से भागवतकार के ही द्वारा आपकी भ्रान्तिपूर्ण आशालताओं पर तुषारपात कर दिया गया।

पृ० १६१२, अनु० १—'आपः पुनन्तु०' इत्यादि कथन द्वारा गङ्गाजल की पवित्रता और शारीरिक रोगों की संहारकता आप बता रहे हैं, उसे तो हम भी मानते हैं, पर मानस के पापों का गङ्गाजल से क्षालन कैसे होगा? ज्ञान के द्वारा सम्पाद्य मुक्ति कभी भी गङ्गाजल के द्वारा साध्य नहीं हो सकती; क्योंकि शास्त्र में विधान है कि 'विना ज्ञान के मुक्ति नहीं हो सकती'।

पृ० १६१३, पं० १२—"स्वामी दयानन्द आगे कहते हैं कि 'इमं मे गङ्गे०' प्रभृति मन्त्र में गङ्गा प्रभृति पद इडा, पिङ्गला, सुषुम्णा, कूर्म और जठराग्नि की नाड़ियों के हैं। इनमें योगाभ्यास से परमेश्वर की उपासना करने से मनुष्य सब दुःखों से तर जाते हैं।' किन्तु यह कथन एकदम निराधार है; क्योंकि इस तरह से गङ्गा प्रभृति का प्रसिद्ध अर्थ छोड़कर अप्रसिद्ध अर्थ करने में कोई प्रमाण आपके पास नहीं है।"

यह कथन सारा ही अज्ञान से सुलभ है। वेद में लोकप्रसिद्ध शब्दार्थ के ग्रहण की ही विधेयता नहीं कही गयी है। वैदिक शब्दों का यौगिक अर्थ ग्राह्य है, वेद से ही कालान्तर में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न च वेदे रुढिः सम्भवति, वेदशब्देभ्य एव पश्चात् सर्वपदार्थानां नामकरणात्। नैव गङ्गायां नद्यामाप्लुत्य दिवं द्योतनात्मकं परमेश्वरं प्राप्नुवन्ति, परं कूर्मादिनाडीषु धारणादिसिद्धौ चित्तस्थिरीकरणं भवत्येवेत्यसन्दिग्धं योगप्रामाण्यात्।

नहि सितासितयोः प्रकाशान्धकारयोः कदापि समागमो भवितुमर्हति अन्योन्यविरोधादिति वाच्यम्, तत्र सितशब्देन प्रकाशमल्लोकग्रहणमसितान्धकारेण च प्रकाशरहितलोकग्रहणमेव। सूर्यादिपृथिव्यादिपदार्थयोरीश्वरसामर्थ्येऽस्ति समागमः। तत्र कृतस्नाना विज्ञानवन्तो दिवं गच्छन्त्येवेति दिङ्मात्रम्।

भवन्मतब्रह्मपुराणे स्पष्टं मनस एव पवित्रताऽऽपादनीयेति प्रत्यपादि—

मनो विशुद्धं पुरुषस्य तीर्थं वाचां तथा चेन्द्रियनिग्रहश्च।
एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति॥

चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति।
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाऽशुचि॥

शब्द लोक में प्रयुक्त होते-होते योगरूढ हो गये। जैसे 'यहाँ पर करपात्र की उपस्थिति है' इस वाक्य में सब में प्रसिद्ध कर और पात्र का ग्रहण न होकर आपकी उपस्थिति समझी जाती है। अन्यथा कर और पात्र को लेकर ही व्यवहार होना चाहिये।

वेद में रूढि का शासन नहीं चल सकता, प्रत्युत वेद के शब्दों का ही लोक और लोकार्थ पर शासन रहेगा; क्योंकि कोई इस गङ्गा में नहाकर द्योतनात्मक परमेश्वर को प्राप्त नहीं कर सकता, परन्तु कूर्म आदि नाड़ियों में धारणा आदि की सिद्धि होने पर चित्त का स्थिरीकरण होता है। इसमें योगदर्शन का प्रमाण है।

'कभी सित और असित, प्रकाश और अन्धकार का समागम नहीं हो सकता; क्योंकि वे एक-दूसरे के विरुद्ध हैं।' ऐसा कहने पर उत्तर है कि सित शब्द से प्रकाशमान लोक और असित शब्द से प्रकाशरहित लोक का ग्रहण है। सूर्यादि प्रकाशमान और पृथिव्यादि अन्धकारमय लोकों का परमेश्वर की सामर्थ्य में समागम होता है। उस प्रभु की ध्यानधारा में स्नान करके विज्ञानवान् द्युलोक को प्राप्त करते हैं।

आपका माना हुआ ब्रह्मपुराण स्पष्ट ही 'मन की ही पवित्रता होनी चाहिये' यह कहता है—

'पुरुष का विशुद्ध मन तीर्थ है, वाणी और इन्द्रियों का निग्रह ये भी तीर्थ हैं। ये शारीरिक हैं, जो स्वर्ग के मार्ग का प्रतिबोधन करते हैं। अन्तर्गत दुष्ट चित्त भौम याने भूमि के तीर्थस्नान से शुद्ध नहीं होता, जैसे शराब का अपवित्र बर्तन जलों से शतशः धोने पर भी शुद्ध नहीं होता।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६१३, पं० १४—यदुच्यते—"किञ्च, कुत्र नाड्यां गङ्गापदप्रयोगः, क्व यमुना, क्व वा सरस्वती। क्व वा शुतुद्रिरिति वक्तव्यम्, यथेच्छप्रयोगेऽव्यवस्थायाति। तस्मात् प्रसिद्धनदीषु गङ्गादिपदानि।" इति कथनं प्रमादजन्यम्, आसां पृथिवीस्थानानां गङ्गादिनदीनां पापनाशकत्वस्य दुःखात् तारकत्वस्य चाऽभावात्।

इह मीमांसकमहाभागैर्यद्यपि पादटिप्पण्यामभीष्टमुट्टङ्कितं यत्—"इह सूक्तोपक्रमे प्रथममन्त्रे 'प्र सप्त सप्त त्रेधा हि चक्रमुः' इति पाठो महत्साहाय्यं विदधाति। एतेन विस्पष्टं ज्ञाप्यते यदस्मिन् सूक्ते यासां गङ्गादीनां नदीनां वर्णनं विद्यते न ता भूमिस्था जलधारा एव, अपि त्विमाः सूक्तोक्ता गङ्गाद्या नद्यो दिवि अन्तरिक्षे पृथिव्यां च त्रिष्वपि स्थानेषु वर्तन्त इति। ताश्च दिवि सप्तविधाः किरणाः, अन्तरिक्षे परिवहभेदेन वर्तमानाः सप्तविधा मेघाः, पृथिव्यां च सप्तविधजलवत्यो जलधारा गृह्यन्ते। अत एवेह ग्रन्थकारोऽध्यात्मपक्षमाश्रित्य गङ्गादिपदैरिडादीनां नाडीनां ग्रहणं करोति।" इति।

वैदिकसाहित्यसौदामन्यां विद्यालङ्कारो गङ्गादीनां नाडीनामान्याह निरुक्त (९। २५) वचनमनुरुध्य (पृ० ९३) —

पृ० १६१३, पं० १४—"किस नाड़ी के लिये गङ्गा पद का, किसके लिये यमुना पद का और किस के लिये सरस्वती और शुतुद्रि पद का प्रयोग किया गया है। मनमाना प्रयोग करने पर तो अव्यवस्था हो जायेगी। इससे तो मानना होगा कि प्रसिद्ध गङ्गादि नदियों में ही इनका प्रयोग है।" यह कथन प्रमादजन्य है, क्योंकि गङ्गा आदि नदियाँ न पापनाशक और न दुःख से तारनेवाली हैं।

इस स्थल पर सम्मान्य श्री मीमांसक जी ने पादटिप्पणी में अभीष्ट उट्टङ्कित कर दिया है कि—"यहाँ पर नदी पद भूमिस्थ जलधारा का वाचक नहीं है।" इसके रहस्य को खोलते हुए उन्होंने लिखा है कि—"प्र सप्त सप्त त्रेधा हि चक्रमुः'। यह पाठ इस अर्थ में महासहायक है। ये नदियाँ शरीर में नाड़ियों के रूप में सात हैं। इस प्रकार महर्षि का अध्यात्मपक्षीय अर्थ ही मुक्तिसाधक है। द्युलोक में वे सात किरणें हैं, अन्तरिक्ष में सात प्रकार के मेघ हैं और पृथिवी में ये सात नदियाँ हैं। इसीलिये अध्यात्मपक्ष में गङ्गा आदि पद से इडादि नाडियों का ग्रहण करना ठीक है।"

'वैदिक-साहित्य-सौदामनी' ग्रन्थ में श्री वागीश विद्यालङ्कार जी ने गङ्गाद से इडादि का ग्रहण किया है। गङ्गा आदि पदों से शैली और वाणी के भेदों का भी कथन किया गया है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नदनाद्वा नदी भाषा, शैल्यो भेदाश्च तद्गताः ।
हृदन्तर्गमनाद् गङ्गा या शैली प्रौढनिर्मला ॥ १२५ ॥

परुष्णी परुषैर्वर्णैर्मधुरा वाक् सरस्वती ।
मिश्रिता तु गुणैरेभिर्यमुना वाक् सुसंयता ॥ १२६ ॥

मरुतां वर्धनाच्छक्तेरुत्साहस्य मरुद्वृधा ।
ऋजुमार्गार्जिकीया च वितस्ता विस्तरान्विता ॥ १२७ ॥

द्रावयत्याशु चेतांसि शुतुद्री या तु शृण्वताम् ।
नाडीनामानि गङ्गादिपदानि हठयोगिनाम् ॥ १२८ ॥

अथवा— ज्ञानं पञ्चेन्द्रियोपात्तं मस्तिष्कं प्रापयन्ति याः ।
नाड्यस्ताः पञ्च नद्यो हि ग्रथिता ज्ञानतन्तुभिः ॥ १३० ॥

आत्तं पृथक् पृथग् ज्ञानजलं मानससञ्चितम् ।
प्रकाशयति या लोके सा वागेव सरस्वती ॥ १३१ ॥

यथा चाह भारविरपि—

विविक्तवर्णाभरणा सुखश्रुतिः,
प्रसादयन्ती हृदयान्यपि द्विषाम् ।

नदन (शब्द) करने से भाषा तथा उसके शैली-भेद भी नदी कहलाते हैं, हृदय के अन्तर में गमन करने से प्रौढ़ निर्मल शैली को गङ्गा कहते हैं ॥१२५ ॥

कठोर वर्णों से युक्त शैली परुष्णी, मधुरवाक् सरस्वती, इन गुणों से मिश्रित सुसंयत शैली यमुना कहाती है ॥१२६ ॥

वायु से शक्ति और उत्साह के वर्धन के कारण मरुद्वृधा, ऋतुमार्गगामी होने से आर्जिकीया, विस्तारवाली होने से वितस्ता होती है ॥ १२७ ॥

जिस शैली को सुनकर चित्त द्रवीभूत हो जाये, उसे शुतुद्री कहते हैं। इस प्रकार हठयोगियों के मत में गंगादि पदों से नदियों के नाम रखे गये हैं ॥ १२८ ॥

अथवा पाँच इन्द्रियों से प्राप्त ज्ञान है, उसको जो नाड़ियाँ मस्तिष्क को पहुँचाती हैं, वे ज्ञानतन्तुओं से ग्रथित हैं ॥ १३० ॥

पृथक्-पृथक् जो मानस में ज्ञान-जल सञ्चित होता है, उसे जो लोक में प्रकाशित करती है, उसे भी सरस्वती कहते हैं ॥ १३१ ॥

जैसा कि महाकवि भारवि ने भी कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रवर्तते नाऽकृतपुण्यकर्मणाम्,
प्रसन्नगम्भीरपदा सरस्वती ॥ (किराता० १४ । ३)

ननु वेदशब्दानां सर्वत्र भवता यौगिकत्वं प्रतिपाद्यते, तदा कथङ्कारं निघण्टौ 'गौः, ग्मा, ज्मा, क्ष्मा' इत्यादिशब्दाः पृथिवीवाचकाः सङ्गृहीताः ? एतेन तु रूढित्वमेव सिध्यतीति चेन्न, उक्तरीत्या वर्गीकृत्य पुनस्तान् वर्गान् पञ्चस्वध्यायेषु विभजमानो यास्काचार्यो वेदोद्याने विहर्तुकामानां हर्तुकामानां मानसग्रन्थीस्तर्तुकामानां च संसारवारान्निधेर्जिज्ञासूनां सौकर्य्यार्थत्वेन पथप्रदर्शनं कृतवान्! तेषु तेषु चार्थेषु मुहुरावर्तनादेव ते शब्दसमुदायाः समाम्नायनाम्ना निरदिश्यन्त। समाम्नायो नाम सम्यगासमन्तादभ्यास आवृत्तिरेव। तथा हि—

"अग्निपदमग्निसूक्तेषु प्रयुक्तं सत् स्वयौगिकमर्थम्—"अग्निः कस्मादग्रणीर्भवति, अग्रे यज्ञेषु प्रणीयते, अङ्गं नयति सन्नममानः (अन्तः प्रविशन्) , अक्तोपनो भवति" इत्यादि रूपमजहदेव क्वचित् परमात्मानम्, अन्यत्र जननायकं राजानं सेनापतिं वा, परत्र भौतिकमग्निम्, क्वचित् पुनराध्यात्मिकम् आत्मप्रकाशमुत्साहम्, आत्ममानससङ्कल्पं वा यथाप्रकरणमभिदधाति।

स्पष्ट वाणों से विभूषित, श्रवण में सुखकर, द्वेषियों के भी हृदयों को प्रसन्न करती हुई, प्रसन्न गम्भीर पदवाली सरस्वती पुण्यात्माओं द्वारा प्रवर्तित होती है। (किरात० १४ । ३)

प्रश्न—आप वेदशब्दों की तो सर्वत्र यौगिकता का प्रतिपादन करते हैं तो निघण्टु में गौः, ग्मा, ज्मा, क्ष्मा आदि शब्द पृथिवीवाचक रूप में क्योंकर संगृहीत किये हैं ? इससे तो वैदिक शब्दों का भी रूढत्व ही सिद्ध है।

उत्तर—उक्त रीति से वर्गीकरण निघण्टु में किया तो गया है, पर फिर उन वर्गों को पाँचों अध्यायों में विभक्त करते हुए यास्काचार्य ने वेदों के रमणीय उद्यान में विहार करने के इच्छुक, तथा जो मनोग्रन्थियों को खोलना चाहते हैं एवं संसार-जलनिधि से पार उतरना चाहते हैं, ऐसे जिज्ञासुओं की सुविधा के लिये यह पथ-प्रदर्शन मात्र है। उन-उन अर्थों में बार-बार आवर्तन करने के कारण से वे शब्द-समुदाय समाम्नाय नाम से निर्दिष्ट किये गये हैं। समाम्नाय का अर्थ ही है, सम्यग् अभ्यास या आवृत्ति।

जैसे अग्नि पद अग्निसूक्तों में प्रयुक्त होता हुआ अपना यौगिक अर्थ—"अग्नि क्यों कहा जाता है, अग्रणी होता है, आगे यज्ञों में प्रणीत होता है, अङ्गों को नमन करते हुए ले चलता है, गीला नहीं होता" आदि रूप को न छोड़ता हुआ कहीं पर परमात्मपरक, अन्यत्र नेता, राजा, सेनापति, सूर्य, विद्युत्, कहीं पर भौतिक अग्नि, कहीं पर आध्यात्मिक आत्मप्रकाश उत्साह, आत्ममानससङ्कल्प आदि को यथाप्रकरण कहता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्थमवयवानां शक्त्याऽनेकार्थवाचकमपि किञ्चित् पदं मन्त्रेषु यस्मिन्नर्थे मुहुरावृत्तं निघण्ट्वादिकोशेषु च यदर्थकेषु पदेषु पठितम्, पाठकचेतसि तस्य प्रथमोपस्थितत्वात् तस्मिन् रूढमिवाभाति । इदमेव वैदिकशब्दानां रूढत्वं नान्यत् । यथा—'उद्बुध्यस्वाग्ने०' (यजुः० १५ । ५४) इति नित्यमुभयसन्ध्ययोर्दैविकाग्निं प्रज्वालयतस्तदैव च मन्त्रमिमं पठतो जनस्य मानसमयं भौतिकोऽग्निरेव प्रथममधिरोहति, साहचर्यात्। परतस्तु कालान्तरे 'अस्मिन् सधस्थे अध्युत्तरस्मिन्' इत्यादिपदानां सान्निध्यात् तदग्निपदं साधकचेतसि समुद्बुद्धस्याऽभौतिकस्याग्नेरपि व्यञ्जकम्, उत्तरलोके न भौतिकाग्नेरसम्बन्धात् सततसाधनयाऽन्तरात्मन्येव अग्निभावं प्राप्ते साधको बाह्यमग्निं परित्यजति । तदुक्तं मनुना—

'आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।' (मनु० ६ । ३८)

एवं यदा तु कस्यचित् पदस्य लोकप्रसिद्धोऽत एव रूढायमानोऽर्थस्तत्र वर्णितैः कार्यकलापैर्विशेषणैश्च सामञ्जस्यं नावहति, तदा तत्र तस्य प्रकृतिप्रत्ययोपसर्गादिरूपावयवानां शक्त्यां समुद्भासमानो योऽर्थस्तत्र सङ्गच्छते, स यौगिकः। इत्थं वेदे योगो रूढिमपहरति। यथा—

'दिव्यं सुपर्णं वायसम्' (ऋ० १ । १६४ । ५२)

इस प्रकार अवयवों की शक्ति से अनेकार्थवाचक भी कोई पद मन्त्रों में जिस अर्थ में निघण्टु आदि कोषों में बार-बार आवर्तमान होता है, उस अर्थवाले पदों में पढ़ा हुआ पाठक के चित्त में उस पदार्थ के प्रथम उपस्थित होने से रूढ सा प्रतीत होता है । बस इतनी भर वैदिक शब्दों की रूढता समझिये। जैसे—'उद्बुध्यस्वाग्ने' (यजुः० १५ । ५४) इससे दोनों सन्ध्यायों में नित्य देवयज्ञ की अग्नि प्रज्वलित करनेवाले को इस मन्त्र को पढ़ते ही भौतिक अग्नि ही प्रथम उपस्थित होता है, साहचर्य के कारण । फिर कालान्तर में 'इस घर या उत्तर घर अर्थात् परलोक में' इत्यादि पदों के सान्निध्य से वही अग्नि पद साधक के चित्त में समुद्बुद्ध अभौतिक अग्नि का व्यञ्जक होता है; क्योंकि उत्तर लोक में भौतिक अग्नि का कोई सम्बन्ध नहीं है । सतत साधना से साधक बाह्य अग्नि को छोड़ देता है, जैसा कि मनु ने कहा है—

'ब्राह्मण आत्मा में अग्नि का समारोपण करके घर से प्रव्रजन करे ।' (६ । ३८)

इस प्रकार जब किसी पद का लोकप्रसिद्ध अर्थ इसीलिये रूढ होता हुआ वहाँ वर्णित कार्यकलापों के द्वारा और विशेषणों से सामञ्जस्य नहीं करता, तब वहाँ उस पद के प्रकृति, प्रत्यय, उपसर्ग आदि रूप अवयवों की शक्ति में समुद्भासमान अर्थ सङ्ग होता है, वह यौगिकार्थ होता है । इस प्रकार वेद में योग रूढि का अपहरण करता है । जैसे—'दिव्यं सुपर्णं वायसम्' (ऋ० १ ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादिमन्त्रेषु समालोचनीयम्। इह न वायसपदं काकवाचकम्, अपितु वर्ण्यमानव्यापाराणां काकेऽनुपपद्यमानत्वात् सततगमनशीलः सूर्यपरकः पर्यवसानेऽथवाऽध्यात्मसम्बन्धी अपरोऽर्थ उपस्थितो भवति।

एतेन टिप्पण्याम्—'वैदिकपदानां यौगिकत्वात्' इति कथनं तुच्छं मन्यमानस्य पारिजातकर्तुः—'तस्मादकामेनाऽपि योगरूढत्वमेवाभ्युपेतव्यम्' इत्यादि (पृ० १६१४) कथनमपास्तम्। एवमगतिकः सायणाचार्योऽपि (ऋ० ३। २६। ७) 'अग्नेः परब्रह्मत्वम्' इत्युक्त्वाऽनेकशब्दानामर्थयोजनाय यौगिकार्थप्रक्रियामुररीचकार।

पृ० १६१४, पं० ६—यदुच्यते—"नैव तत्राप्लुत्य स्नानं कृत्वा दिवं द्योतनात्मकं परमेश्वरं सूर्यलोकं वोत्पतन्ति गच्छन्ति, किन्तु पुनः स्वकीयं स्वकीयं गृहमागच्छन्ति' इति, तत्तुच्छम्, 'वारिदस्तृप्तिमाप्नोति' इतिवत् कार्यकारणभावबोधने वाक्यस्य तात्पर्यात्। यथा नहि वारिदस्तत्कालमेव तृप्तिमाप्नोति, 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्युक्त्याऽग्निहोत्रहोमानन्तरमेव स्वर्गमवाप्नोति, किन्तु यथा देहपातानन्तरमेव स्वर्गादिप्राप्तिस्तत्रेष्यते, तथैव प्रकृतेऽपि बोध्यम्।"

१६४।५२) इत्यादि मन्त्र में देखना चाहिये—यहाँ 'वायस' पद कौवे का वाचक नहीं है, अपितु वर्णनीय व्यापारण काक में घटित नहीं है, वह सतत गमनशील सूर्यपरक है, अथवा अध्यात्मसम्बन्धी दूसरा अर्थ उपस्थित होता है।

इससे सिद्ध है कि टिप्पणी में लिखे हुए 'वैदिक पदों की योग्यता से' इस कथन को तुच्छ माननेवाले पारिजातकार का 'इसलिये अकाम को भी योगरूढत्व ही स्वीकार करना चाहिये' इत्यादि १६१४ पृष्ठ पर लिखा हुआ यह कथन अनर्गल है। इसीलिये अगतिक सायणाचार्य ने भी 'अग्नेः परब्रह्मत्वम्' (ऋ० ३। २६। ७) यह कहकर ही अनेक शब्दों की अर्थयोजना को यौगिक प्रक्रिया में स्वीकार किया है।

पृ० १६१४, पं० ६—"गङ्गा और यमुना के सङ्गम में स्नान करके परमेश्वर या सूर्यलोक को तो जाते नहीं, अपने-अपने घर लौटकर आ जाते हैं' यह कथन तुच्छ है। (पितरों को) 'जल देनेवाला बादल तृप्ति प्राप्त करता है' इस वाक्य में कार्य-कारणभाव को बताना वाक्य का प्रयोजन है, इसके समान ही समझना है। जैसे जल देनेवाला तत्काल तृप्त नहीं होता, अग्निहोत्र के तुरन्त बाद स्वर्ग नहीं मिल पाता, किन्तु देहपात के बाद ही स्वर्ग में जाता है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति पारिजातवचनं बुद्धिबाह्यम्, वारिदाता ययाऽपि भावनया जलं ददाति तद्भावना-पूरणात् तत्काल एव तस्य तृप्यत्वात्, तत्काल एव अग्निहोत्रकरणकाल एव स्वर्गस्य सुखस्याधिगतत्वात्, यद्यत्र परलोकः स्वर्गो मन्येत तदाऽपि हवनस्य सत्कर्मत्वात् तत्काल एव पुण्यसञ्चयनात् तत्कार्यस्य साधनत्वात्। गङ्गास्नानेन शरीरमात्रस्य स्वच्छताऽपादनान्न देहपातानन्तरमपि परलोकस्वर्गाऽवाप्तिर्भवितुमर्हति, स्वर्गस्य मोक्षस्य गङ्गास्नानस्याहेतुत्वात्।

पृ० १६१४, अनु० २—"सितासिते सरिते यत्र सङ्गथे' इत्यत्र नहि सितासितशब्दाभ्यामिडापिङ्गलयोर्ग्रहणमर्हति, मानाऽभावात्।" इत्यप्यविचारचारु, उपरि सितासितशब्दाभ्यां गङ्गायमुनयोर्ग्रहणस्य सयुक्तिप्रमाणमुक्तत्वात्, परम्परयाऽनयोर्नाड्योरपि ग्रहणौचित्यात्, यतो ह्यत्र 'दिवमुत्पतन्ति अर्थादीश्वरं प्राप्नुवन्ति' इत्यर्थस्याध्यात्मपक्ष-गतस्योपलब्धिर्लक्षणया एव जनिष्यते वाच्यस्य मुख्यार्थस्य दिवो गमनस्य बाधे गङ्गायमुनाभ्यां तत्प्राप्तियोग्यता-विरहान्मुख्यार्थबाधेऽन्वयानुपपत्तौ लक्षणयाऽर्थः सङ्गस्यते।

पृ० १६१४, पं० १४—"नहि ते नाड्यौ सितासिते स्त इत्यत्र मानमस्ति" इति कथनं

पारिजातकार का उक्त कथन बुद्धिबाह्य है। किसी को उपकार की भावना से जल पिलानेवाला उस भावना के पूर्ण होते ही तृप्त हो जाता है। अग्निहोत्र को करने के काल में भी कर्मयोगी को स्वर्ग अर्थात् सुख मिलता है। यदि यहाँ परलोक अर्थ में स्वर्ग माना जाये, तो भी हवन के सत्कर्म होने से तत्काल में ही पुण्य के सञ्चयन होने से हवन उस कार्य का साधन तो है ही। गङ्गास्नान से शरीर की स्वच्छतामात्र होती है। देहपात के बाद भी गङ्गास्नान से मोक्ष की प्राप्ति सम्भव नहीं है; क्योंकि मुक्ति का शास्त्रीय कारण तो ज्ञान ही है।

पृ० १६१४, अनु० २—"सित शब्द इडा और असित शब्द पिङ्गला का वाचक है, ये दोनों नाड़ियाँ जहाँ सुषुम्णा में मिली हैं, उसमें परम योगी लोग योगाभ्यास से स्नान करके शुद्ध हो जाते हैं। इसमें सितासित से उक्त दोनों नाड़ियों का ग्रहण नहीं हो सकता; क्योंकि इसमें कोई प्रमाण नहीं है।" पारिजातकार का यह कथन युक्ति व विचार से शून्य है। ऊपर सित और असित शब्दों से गङ्गा और यमुना का ग्रहण युक्ति और प्रमाण से कहा गया है। परम्परा से तथा साधनाप्रकरण में दोनों नाड़ियों का ग्रहण होगा; क्योंकि यहाँ 'द्युलोक को जाते हैं, अर्थात् ईश्वर को प्राप्त करते हैं' इस अध्यात्मपक्षगत अर्थ की उपलब्धि के लिये लक्षणा माननी होगी। स्वर्ग जाने का मुख्यार्थ बाधित हो रहा है; क्योंकि गङ्गा और यमुना के स्नान से स्वर्ग की प्राप्ति की योग्यता का विरह है। मुख्यार्थ के बाध होने पर अन्वय की अनुपत्ति होने से लक्षणा से अर्थ-सङ्गति की जायेगी।

पृ० १६१४, पं० १४—"सित और असित, इडा और पिङ्गला नाड़ियों का ग्रहण प्रमाणाभाव से नहीं होगा" यह कथन तुम्हारे द्वारा तो उचित ही नहीं है; क्योंकि तुम्हारे मान्य ग्रन्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न ते शोभते, तव मान्यग्रन्थ'शिवस्वरोदय'प्रमाणादन्यथा। यथा—

इडायां स्थितश्चन्द्रः पिङ्गलायां च भास्करः।
सुषुम्णा शम्भुरूपेण शुम्भुर्हंसस्वरूपतः॥ ५०॥
आदौ चन्द्रः सिते पक्षे भास्करो हि सितेतरे।

इति वचनेन सितासिते इडापिङ्गले नाड्यौ प्रमाणिते। इडापिङ्गलासुषुम्णानां सङ्गमत्वात् साम्येन लोकेऽपि गङ्गायमुनासरस्वतीनां सङ्गमस्य प्रयागस्य 'त्रयमेकत्र संयमः' इत्यनेन धारणाध्यानसमाधीनामिव तथा ग्रहणात्। तन्त्रान्तरिकस्नानविधिस्तु योगशास्त्रादधिगन्तव्योऽथवा योगिभिः सह। 'तत्र कृतस्नानाः परमयोगिनः परमेश्वरं प्रकाशमयं मोक्षाख्यं सत्यविज्ञानं चोत्पतन्ति प्राप्नुवन्ति' इति पाठात्।

पृ० १६१५, अनु० १—यच्चाह—"सितासितयोः प्रकाशान्धकारयोः सूर्यादिपृथिव्यादिपदार्थयोर्यत्रेश्वरसामर्थ्ये समागमो भवति।" इति तुच्छकथनमेव पारिजातकारस्य तुच्छबुद्धिचिन्तनफलम्। अध्यात्मपक्षे यदा योगिन एवमधिगच्छन्ति यत् प्रकाशवदप्रकाशवदुभयविधपदार्थयोरपि स्थितिरीश्वरसामर्थ्य एवास्ति तदैवं दृढास्थया सततमभ्यासवन्तो विज्ञानवन्तो

'शिवस्वरोदय' का प्रमाण है। यथा—

'इडा में चन्द्र और पिङ्गला में भास्कर स्थित है। सुषुम्णा शम्भुरूप से तथा शम्भु हंसरूप से, आदि में चन्द्र सितपक्ष में तथा पिङ्गला कृष्णपक्ष में.....।'

इस वचन से सित और असित से इडा (चन्द्र) पिङ्गला (सूर्य) प्रमाणित हैं। इडा, पिङ्गला और सुषुम्णा के सङ्गम से (धारणा, ध्यान, समाधि) 'त्रयमेकत्र संयमः' की समानता में लोक में भी गङ्गा, यमुना और सरस्वती नदियों के सङ्गम प्रयाग का भी ग्रहण हो जाता है। आन्तरिक स्नानविधि योगशास्त्र अथवा योगियों से सीखना चाहिये। 'उसमें स्नान करके परमयोगी प्रकाशमय मोक्षाख्य और सत्यविज्ञान को उठकर प्राप्त करते हैं' यह भूमिका में कहा गया है।

पृ० १६१५, अनु० १—"आगे स्वामी दयानन्द लिखते हैं—'सित और असित, प्रकाश और अन्धकार स्वरूप सूर्य और पृथिवी प्रभृति पदार्थों का जब ईश्वर की सामर्थ्य से सम्पर्क होता है, तो इस अवस्था में प्रविष्ट व्यक्ति परमेश्वर का साक्षात्कार पाकर आनन्दलोक में प्रविष्ट हो जाते हैं'। किन्तु यह कथन भी तुच्छ है।"

पारिजातकार द्वारा भूमिका के इस कथन को तुच्छ कहना ही तुच्छ है; क्योंकि ये तुच्छ अर्थात् लघु बुद्धि से सोचते हैं। अध्यात्मपक्ष में जब योगी ऐसा अनुभव करते हैं कि प्रकाशवाले और अप्रकाशवाले पदार्थों की भी स्थिति ईश्वर के सामर्थ्य में ही है, तब इस प्रकार हठ आस्था से निरन्तर अभ्यासवाले और विज्ञानवाले हो जाते हैं। इस प्रकार ऋषि का अर्थ पूर्ण सङ्गत है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भवन्तीति न काचिद् विप्रतिपत्तिः। अमूर्तरूपे निराकार एव अमूर्तभावं प्राप्तानां सर्वपदार्थानां समागमः, 'तस्मिन्निदं सं च विचैति सर्वम्' इति श्रुतिप्रतिपादनात्। शिष्टं यदुच्यतेऽनेन तत्समाधानं बहुशोऽन्यत्रास्मिन्नेव वा ग्रन्थे कृतमस्ति। एवं महर्षिदयानन्दप्रतिपादितसिद्धान्तं न संशीतिलेशोऽपि स्पृशतीति दिक्।

पृ० १६१५, पं० १३—यच्चाह—"न च तज्ज्ञानेऽपि परमात्मप्राप्तिः सम्भवति, ब्रह्मात्मयाथात्म्यज्ञानादेव तत्प्राप्तिश्रवणात्।" इत्यपि स्वकल्पितमस्य। न चोच्यतेऽत्र सामर्थ्यज्ञानेन परमात्मज्ञानम्। परमात्मनः सामर्थ्याविकलज्ञानमास्थां विश्वासं वा दृढं परमात्मानं प्रत्यवश्यं जनयिष्यति यत् संहारे सूर्यादयः समेऽपि परमात्मसामर्थ्य एव स्थितिं लप्स्यन्त इति।

मूर्तिपूजा-समर्थन-खण्डनम्

कालीभैरववैङ्कटेशहनुमद्दुर्गादिमूर्त्यर्चकाः,
स्वेष्टाराधितदेवमूर्तिरचनापूजाविधेः सम्मतिम्।
वेदे साधयितुं क्षमन्त इह नो नूनं समे दम्भिनः,
तस्मादार्यसमाजसाधितदिशा कुर्वन्तु वो मङ्गलम्॥ १॥

अमूर्तरूप निराकार ईश्वर में अमूर्तभाव को प्राप्त हुए सारे पदार्थों का समागम होता है। जैसा कि वेद में कहा है—'तस्मिन्निदं सं च विचैति सर्वम्' (यजु० ३२। ८)। शिष्ट कहे हुए का अन्यत्र भी समाधान कर दिया गया है।

पृ० १६१५, पं० १३—"ईश्वर के सामर्थ्य के ज्ञान से परमात्मा की प्राप्ति नहीं हो जाती; क्योंकि उसकी प्राप्ति तो ब्रह्मात्मतत्त्व के यथावत् ज्ञान से ही होती है।" यह भी कथन इनका निजकल्पित है। वैसे भूमिका में यह शब्दावली नहीं है। परमात्मा की सामर्थ्य का अविकल ज्ञान परमात्मा के प्रति दृढ आशा और विश्वास को अवश्य उत्पन्न करता है कि संहार के समय सूर्यादि सारे पदार्थ परमात्मा में ही स्थिति को प्राप्त करते हैं। इति।

मूर्तिपूजा-समर्थन-खण्डनम्

काली, भैरव, वैङ्कटेश, हनुमान्, दुर्गा आदि की मूर्तियों के पूजक आप लोग अपनी आराधित देवमूर्तियों की रचना और इनकी पूजाविधि के विचार को वेदोक्त सिद्ध करने में समर्थ नहीं हैं। आपका यह स्वकल्पित ढोंग है। अतः आर्यसमाज द्वारा सिद्ध वेदसम्मत मार्ग पर चलकर अपना कल्याण करो॥ १॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मितचितः ! प्रतिमा न महीयसो-
ऽपरिमितस्य मतिश्रुतिसम्मता ।
त्यजत यूयमतो जडपूजनम्,
भजत चेतनमेव परमेश्वरम् ॥ २ ॥

पृ० १६१६—यदुच्यते—"तन्त्रपुराणादिग्रन्थोक्तस्य नामस्मरणस्य मूर्तिपूजादीनां च मिथ्यात्वम्, वेदादिसत्यग्रन्थे तस्य विधानाऽभावात्' इति भूमिकोक्तं तुच्छम्, शास्त्रानवबोधात् । 'एह्यश्मानमातिष्ठ अश्मा भवतु ते तनूः' 'विष्णोर्नाम चिद्विवक्तन' (ऋ० १ । १५६ । ३) इत्यादिवैदिकवाक्येषु मूर्तिपूजादिविधानदर्शनात् ।" इति तु पारिजातकृतो वेदशास्त्रानधीतजन्यं दारुणाज्ञानम्, उत्तरार्धमन्त्रेण सर्वसमाधानोपपत्तेः ।

अथर्ववेदे तदुत्तरार्धं एषः—'कृण्वन्तो विश्वे देवा आयुषे शरदः शतम् ।' नैतद्धि कपटाचार्यस्यास्य दृक्पथमवतीर्णं वाक्यं निखिलरहस्यापवारकम् । यथा—'सर्वं देवास्तवायुः शरदः शतं कुर्युः' ।

ब्रूतां साम्प्रतम्, किमेष देवानामाशीर्वादो भगवते सङ्गतोऽस्ति ? किं देवा भगवन्तं

हे सीमितमते ! महतो महीयान्, अपरिमित व्यापक प्रभु की प्रतिमा (मूर्ति) तर्क और वेद से सम्मत नहीं है; क्योंकि मूर्ति मूर्तिमान् की ही बन सकती है, अमूर्त = निराकार ईश्वर की नहीं । इसलिये तुम लोग जड़पूजा छोड़कर चेतनस्वरूप परमेश्वर का भजन करो ॥ २ ॥

पृ० १६१६—"अब इसके आगे जो नवीन कल्पित तन्त्र और पुराणग्रन्थ हैं, उनमें पत्थर आदि की पूजा तथा नाना प्रकार के नामस्मरण अर्थात् राम-राम, कृष्ण-कृष्ण, काष्ठ आदि की माला, तिलक आदि का विधान करके उनको अत्यन्त प्रीति के साथ जो मुक्ति पाने के साधन मान रखे हैं, ये सब बातें भी मिथ्या ही जाननी चाहिये; क्योंकि वेद आदि सत्यग्रन्थों में इन बातों का कहीं चिह्न भी नहीं पाया जाता है ।"

यह भूमिका-कथन तुच्छ है, ऐसा आप कह रहे हैं । आपके इस कथन में शास्त्र का बोध न होना ही कारण है । आपने यहाँ पर मूर्तिपूजा सिद्ध करने के लिये 'एह्यश्मानमातिष्ठ अश्मा भवतु ते तनूः' 'विष्णोर्नाम चिद्विवक्तन' वाक्य बिना पते के उद्धृत कर इनसे मूर्तिपूजा को वैदिक सिद्ध करने का असफल प्रयास किया है, पर यह इनका श्रम वेद-शास्त्र का अध्ययनाभाव प्रकट करनेवाला भयङ्कर अज्ञान है । यह अथर्ववेद का मन्त्र है, इसका अर्थ इन्होंने माना है कि—"हे ईश्वर ! आओ और इस पत्थर में ठहरो, यह पत्थर तुम्हारा शरीर है' । पर इन कपटाचार्यों को यह नहीं सूझा कि मन्त्र का उत्तरार्ध है—'कृण्वन्तो विश्वे देवा आयुषे शरदः शतम्' अर्थात् 'सब देवता तुम्हारी आयु सौ वर्ष करें' ।

अब बताइये कि क्या यह देवताओं का आशीर्वाद भगवान् के लिये सुसङ्गत है ? क्या

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शतायुषं कर्तुमर्हाः ? अर्हा एव स्युरन्यथा भगवतो मरणं सम्भाव्येत। महाशयस्य भवत एष आशयो यन्मूर्तिमत्पाषाणशरीरेऽसौ चिरञ्जीव्यात्, तच्च देवतानां कृपयैव सम्भाव्येत। विवेचका विजानन्ति यन्नायं मन्त्रो मूर्तिपूजाविधाने सङ्घटते कथमपि। सायणाचार्यभाष्यमपि नयनवानयं नैक्षत। स लिखति यत् पुरोहितो राजानं कथयति, तदाशयोऽयम्—

"राजन्नायाहि, एतत्पाषाणपीठिकायां स्नानाय तिष्ठ। तव शरीरं पाषाणवद् दृढं भवेत्, सर्वे देवास्तव शतायुष्यं कुर्वन्तु।"

इह हि पूर्णं सूक्तं राजतिलकसमारोहे सुसङ्गतम्। गुरुकुलगताधीतविद्यस्य स्नातकस्याऽपि समावर्तनसंस्कारस्य स्नानसमये च सङ्घटते। विष्णुशब्देन तु सर्वव्यापक-परमेश्वर एवाभिप्रेयते। तदेवं नास्तीह मूर्तिपूजाविधानं क्वापि।

एतादृशैरेवाल्पधीभिरथर्ववेदस्य 'ऋषीणां प्रस्तरोऽसि' इति मन्त्रस्याप्यनर्थ एवमेव कृतो यत् 'त्वम् ऋषीणां प्रस्तरो मूर्तिरसि'। अत्र सायणाचार्यानुसारं गुरोः प्रशंसाऽस्ति। एवमेव 'कृष्णं

देवता भगवान् को सौ वर्ष की आयुवाला बना सकते हैं ? बना ही सकते होंगे, अन्यथा भगवान् शीघ्र मर जायेंगे। आप महाशय का आशय यह होगा कि पाषाणमूर्ति शरीर में चिरजीवी होकर रहे और उसकी चिरञ्जीविता देवताओं के इस आशीर्वाद से ही सम्भव है। विवेचक विचार करें कि मूर्ति पत्थर की ही तो नहीं होती, सोना, चाँदी और पीतल की भी होती है, फिर पत्थर का ही प्रयोग क्यों किया गया ? इससे स्पष्ट है कि यह मन्त्र मूर्तिपूजा पर नहीं लगता। सायणाचार्य का भाष्य भी इन आँखवालों ने नहीं देखा। सायण लिखते हैं—

"पुरोहित राजा से कहता है—राजन् ! आओ, इस पत्थर की चौकी पर स्नान के लिये बैठो। तुम्हारा शरीर पत्थर के समान दृढ रहे और सब देवता आपकी सौ वर्ष की आयु करें।"

यह पूरा सूक्त राजतिलक करने का है। सभी मन्त्रों का अर्थ राजतिलक में सुसङ्गत बैठ जाता है। तथा गुरुकुल से स्नातक बनकर निकलनेवाले ब्रह्मचारी पर भी समावर्तन के समय ठीक घटित होता है। उस समय भी स्नान कराया जाता है। 'विष्णु' शब्द से भी यहाँ सर्वव्यापक आदि अर्थ घटित होता है। तो यहाँ किसी प्रकार भी मूर्तिपूजा का कोई प्रसङ्ग ही नहीं है।

ऐसे ही एक बुद्धूराम ने तो अथर्ववेद के एक मन्त्र का घोर अनर्थ किया है। 'ऋषीणां प्रस्तरोऽसि' इसका वास्तविक अर्थ तो है—'आप ऋषियों में ऊँचे स्तर के हैं। यह बात शिष्य गुरु से कहता है। पर इन पण्डितजी ने तो मन्त्र पर ही पत्थर दे मारा कि—'तू ऋषियों का पत्थर है, अर्थात् मूर्ति'। कहावत सच है—'कहीं की ईंट कहीं का रोड़ा, भानमती ने कुनबा जोड़ा'।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ते' (ऋ० ४ ।७ । ९) एतन्मन्त्रेण कृष्णावतारं साधयन्ति । एतद्बुद्धिभ्यो दया क्रोधो वाऽभ्युदयेते, यदेते मतवादिनो मत्ता मतमूलं वेदैरेव सिषाधयिषवोऽतो दया, स्वार्थसाधनायेमे वेदनाम्ना अन्यश्रद्धालून् जनान् स्ववागुरिकायां पाशयन्तो वेदानामनर्थं विदधतीति रोषः ।

एतन्मूर्तिपूजकसम्प्रदायैर्भारतं भ्रान्तं सत् स्वरक्षायामप्यसमर्थमभूत् । श्री के० एम० मुंशी स्वलिखितसोमनाथोपन्यासेऽवर्णयद् यत् सोमनाथस्यैव पार्श्वे तत्पत्न्यास्त्रिपुरसुन्दरी-नामिकाया मन्दिरमासीत् । यत्र देवीत्रिपुरसुन्दरीसमक्षे नवदुर्गावसरे बालिकानां बलिर्दीयते स्म । इमाश्च बालिका अत्रत्याः साधुवेशधारिणो देशस्य विभिन्नभागेभ्यश्चोरयित्वा आनयन्ते स्म । इमानि मन्दिराणि नकुलीशसम्प्रदायिनामासन् । ते च घोरवाममार्गिणोऽभूवन् शतशो देवदास्योऽत्राऽवात्सुर्वेश्या इव । अलाउद्दीनखिलजीनृपतिना मलिककाफूरः स्वकीयः सेनापतिः कृतः । अयं पूर्वं कपूरियानामा तैलिको मन्दिरदीपकेषु तैलपूरक आसीत् । पश्चादयं यवनो जातः । अयं देवगिरिविध्वंसको हिन्दूनां घोरविरोधी अभवत् । एवं मूर्तिपूजापरिणामस्वरूपं हिन्दूराष्ट्रं नष्टभ्रष्टं जातम् ।

इसी प्रकार 'कृष्णं ते०' (ऋ० ४ । ७ । ९) मन्त्र से श्रीकृष्णावतार का वर्णन वेद में ढूँढ निकाला है । इन पण्डितों की बुद्धि पर दया भी आती है और क्रोध भी । दया तो इनकी इस दशा पर आती है कि ये मतवाले अपने मतों की सिद्धि वेद से करना चाहते हैं और सिर-पाँव एक कर रहे हैं, पर इनका प्रयास खरगोश के सिर पर सींग टटोलना ही है । क्रोध इसलिये आता है कि ये अपने स्वार्थ के लिये वेद-श्रद्धालु जनता को अज्ञान में फँसा रहे हैं । जान-बूझकर झूठे अर्थ करते हैं ।

इन मूर्तिपूजक सम्प्रदायों से भारत भ्रान्त होकर अपनी रक्षा में असमर्थ हो गया । श्री के० एम० मुंशी ने अपने लिखे 'सोमनाथ' नामक उपन्यास में वर्णन किया है कि सोमनाथ मन्दिर के पास ही उनकी पत्नी त्रिपुरसुन्दरी का मन्दिर था, जिसमें देवी त्रिपुरसुन्दरी के सामने नवदुर्गाओं के अवसर पर बालिकाओं की बलि दी जाती थी और ये बालिकाएँ यहाँ के साधु लोग ही देशभर से चुरा कर लाते थे । ये मन्दिर नकुलीश सम्प्रदायवालों के थे । ये लोग घोर वाममार्गी थे । सैकड़ों देवदासियाँ वेश्याएँ बनकर यहाँ रहती थीं । मलिक काफूर,जो तेली का लड़का था, जिसका नाम कपूरिया था, मुसलमान बन गया । अलाउद्दीन ने अपना सेनापति इसे बना दिया । यह कपूरिया कभी मन्दिर के दीपकों में तेल डाला करता था । यह मुसलमान बनकर बड़ा भयङ्कर सिद्ध हुआ । इसने देवगिरि के मन्दिर को कई बार विध्वंस किया । यह हिन्दुओं का घोर विरोधी था । इस प्रकार मूर्तिपूजा के परिणामस्वरूप हिन्दू राष्ट्र नष्ट-भ्रष्ट हो गया ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६१६, अनु० २—आ०—यदाह चात्रैव—"मूर्तिपूजाया अनङ्गीकारोऽथवा वेदे प्रतिमाशब्दस्य सत्ताया अमान्यता' दयानन्दस्य स्वशब्दानां विरोधः" इति तु हिन्दीकारः ।

"प्रश्नः—वेदेषु प्रतिमाशब्दोऽस्ति न वा? उत्तरम्—अस्ति । प्र०—पुनः किमर्थो निषेधः ? उ०—नैव प्रतिमार्थेन मूर्तयो गृह्यन्ते । किं तर्हि? परिमाणार्था गृह्यन्ते ।' इति स्वोक्तिविरोधस्य स्पष्टमुदीयमानत्वात् । प्रतिपादेन मूर्तिग्रहणं न सम्भवति, परिमाणं तु बोध्यत इत्यस्यैवार्थस्यास्माद् वाक्यात् प्रतीयमानत्वात् । अतो 'न तस्य प्रतिमा अस्ति' इति मन्त्रे प्रतिमाशब्देन मूर्तिग्रहणं कुर्वाणस्य तस्य कथन्न स्वोक्तिविरोधः ? मूर्तिपूजानिषेधकवाक्यानुपलम्भाच्च मूर्तिपूजानिषेधोऽप्रामाणिक एव ।" इति ।

समा०—तदपि भूमिकालेखानवबोधात्, छलेन वा प्रस्तूयमानत्वाद् जनप्रतारणपाटवमेवास्य । यतो हि न ऋषिणा वेदे प्रतिमाशब्दसत्ताया अनङ्गीकारः कृतः, किञ्च, यजुरथर्वशतपथमन्त्रेषु प्रतिमाशब्दसत्ता प्रदर्शिता । 'पुनः किमर्थो निषेधः' इति वाक्यं तु यत्र

पृ० १६१६, अनु० २—आक्षेप—"मूर्तिपूजा का स्वीकार न करना और वेद में प्रतिमा शब्द की सत्ता को न मानना' दयानन्द का अपने शब्दों से ही विरोध है ।" ऐसा हिन्दीकार ने लिखा है ।

"प्र०—वेदों में प्रतिमा शब्द है या नहीं ? उ०—है । प्र०—फिर किसलिये निषेध (मूर्ति पूजा का) करते हैं ? उ०—प्रतिमा शब्द से मूर्तियों का ग्रहण नहीं होता । तो किसका ग्रहण होता है ? परिमाणार्थ ग्रहण किये जाते हैं ।' उनके इस कथन से यह स्पष्ट प्रतीत होता है कि 'न तस्य प्रतिमा' इस मन्त्र में प्रतिमा शब्द मूर्ति का वाचक न होकर परिमाण का बोधक है । वही व्यक्ति यदि यह कहे 'न तस्य प्रतिमा अस्ति' इस मन्त्र में प्रतिमा शब्द से मूर्ति का निषेध किया है, तो क्या ये उनकी दोनों बातें परस्पर विरुद्ध नहीं पड़ेंगी ? मूर्तिपूजा का निषेध करनेवाला कोई भी वाक्य वेद में उपलब्ध नहीं है, अतः मूर्तिपूजा का खण्डन करना सर्वथा अप्रामाणिक है ।"

समाधान—उक्त कथन भूमिका-लेख को न समझने या उलट कर प्रस्तुत करने के कारण है । या छल से प्रस्तुत करने के कारण सामान्यजनों को धोखा देने में आपका कौशल है; क्योंकि ऋषि ने 'वेद में प्रतिमा शब्द की सत्ता नहीं है' ऐसा कहीं नहीं कहा । आप ने स्वयं स्वामी जी वाला वेदमन्त्र प्रस्तुत किया है, जिसमें 'प्रतिमा' शब्द है । आपका हिन्दीकार तो सिरफिरा है ।

श्रीमन् ! कभी-कभी बुद्धि से भी काम ले लिया करो । समझदार तो एकदम समझ लेंगे

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वाक्ये निषेधः कृतस्तदेवानुबध्नाति। तच्चेदं न तस्य प्रतिमेति भाष्ये—'परमेश्वरस्यानुपमेयत्वादमूर्तत्वादपरिमेयत्वान्निराकारत्वात् सर्वत्राभिव्याप्तत्वाच्च' इत्यनेन प्रमाणेन मूर्तिपूजानिषेधो जायते, तदा नाऽस्ति कश्चित् स्वामिदयानन्दस्य स्वोक्तिविरोधः, प्रत्युत तवैव स्वबुद्धिविरोधः प्रकाशीक्रियते।

मूर्तिपूजानिषेधे तु भाष्यमवलोकनीयं न तस्य प्रतिमेत्यस्य—'नैव तस्य प्रतिमाऽर्थात् प्रतिनिधिः, प्रतिकृतिः, प्रतिमानम्, तोलनसाधनम्, परिमाणम्, मूर्त्यादिकल्पनं किञ्चिदप्यस्ति' इति। अत्र प्रतिमार्था हि षण् निदर्शिताः—(१) प्रतिनिधिः प्रतिनिधीयते सदृशीक्रियते; (२) प्रतिकृतिः—प्रकृष्टा कृतिः, प्रतिनिधेः कृतिर्वा; (३) प्रतिमानम्—प्रतिकृत्य मीयतेऽनेन तत्; (४) तोलनसाधनम्?(५) परिमाणम्-परितो मानं मापनं वा, (६) मूर्त्यादिकल्पनम्, मूर्तिर्हि 'मूर्तिस्तनुस्तनूरिति शरीरपर्यायः', आदिशब्देन मूर्तेरभावेन अकायत्वेन प्रतिच्छायादिव्यावृत्तिः।

कि आप छल से धोखा देना चाहते हो; क्योंकि 'तर्हि किमर्थो निषेधः' इसका अनुबन्धन (सङ्गति) अपने सन्दर्भ में लगेगा अर्थात् जिसका निषेध किया है। और निषेध किया गया है मूर्तिपूजा का। जैसा कि 'न तस्य प्रतिमा अस्ति' के भाष्य में देखिये—'परमेश्वर अनुपमेय है, अमूर्त है, अपरिमेय अर्थात् नापने में नहीं आ सकता, निराकार तथा सर्वत्र अभिव्याप्त है।' इन कारणों से मूर्तिपूजा, जो अविद्वानों ने स्वार्थसाधनार्थ प्रचलित कर रखी है, का निषेध है। तब स्पष्ट है कि स्वामी दयानन्द के कथन में कदापि स्वोक्ति-विरोध नहीं है, प्रत्युत आपके कथन में स्वबुद्धिविरोध प्रकट हो रहा है।

मूर्तिपूजा के निषेध में ऋषि का भाष्य देखिये—'उस ईश्वर की कोई प्रतिमा अर्थात् प्रतिमान, प्रतिनिधि (स्थानापन्न) प्रतिकृति (निज छाया-छवि) या तोलनसाधन, परिमाण या मूर्ति आदि की जो कल्पना कर रखी है, वह भी नहीं है।' यहाँ पर प्रतिमा के ६ अर्थ ऋषि ने प्रस्तुत किये, जो रहस्यमय हैं। जैसे—(१) प्रतिनिधि अर्थात् किसी का सदृश होना। (२) कोई उसकी रचना या प्रतिनिधि की कृति भी नहीं। (३) कोई प्रति (मुकाबले में) मान तुलनावाला भी नहीं, अर्थात् उससे कम तो हो सकते हैं। (४) तोल सकने का साधन। (५) जिसका चारों ओर से भी मापन नहीं किया जा सकता अर्थात् उसके चारों ओर भी कोई अन्य नहीं, अपितु वही स्वयं है; क्योंकि वह अपरिमित व अनन्त है। (६) फिर मूर्ति की उसकी कल्पना सर्वथा मिथ्या है। कोश में मूर्ति शब्द का अर्थ शरीर या तनू है। मूर्त्यादि में 'आदि' शब्द से उसकी प्रतिच्छाया होने की भी व्यावृत्ति कर दी गयी।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इह षण्णामपि हेतुमतां षडेव हेतव ऋषिणा प्रदर्शिताः। तत्रैवं मन्तव्यः सम्बन्धः—परमेश्वरस्यानुपमेयत्वात् प्रतिनिधिर्नास्ति, अमूर्तत्वात् प्रतिकृतिर्नास्ति, अपरिमेयत्वात् प्रतिमानं नास्ति, अनुपमत्वात् तोलनं नास्ति, निराकारत्वान् मूर्त्यादिकल्पनं नास्ति, सर्वत्राभिव्याप्तत्वाच्च परिमाणं नास्तीति।

यदा 'स पर्यगात्' इति प्रमाणेन तद्विग्रहाभावस्य स्पष्टोक्तिरेव, तदा कः प्रश्नो मूर्तेस्तदभावे पूजाविधेश्च, 'छिन्ने मूले नैव शाखा न पत्रम्' इति सूक्तेः।

श्रीमन्! क्व विचरसि लोकैषणायै लक्ष्म्याराधनकुण्ठितप्रज्ञेषु अज्ञेषु? पाषाणपूजकान् तन्मान्यग्रन्था एव धिक्कुर्वते—

शिवमात्मनि पश्यन्ति, प्रतिमासु न योगिनः।
अज्ञानां भावनार्थाय, प्रतिमाः परिकल्पिताः॥

पृ० १६१६, अनु० ३—पू० प०—"संवत्सरस्य प्रतिमां याम्०' इति मन्त्रस्यैव मूर्तिपूजाप्रतिपादनार्थत्वात्। दयानन्देनैवास्य मन्त्रस्य मूर्तिपूजार्थत्वप्रतिपादनात्। तथाहि मन्त्रस्यास्य

यहाँ पर छः हेतुवाले परमेश्वरस्वरूप को स्पष्ट करने के लिये छः ही हेतु कहे हैं, उनका सम्बन्धविवरण इस रूप में समझना चाहिये। परमेश्वर अनुपमेय है अतः उसका कोई प्रतिनिधि नहीं हो सकता, अमूर्त होने से उसकी प्रतिकृति (चित्र) नहीं है, अपरिमेय होने से प्रतिमान (माप) नहीं है, अनुपम होने से तो तोल या तुलना नहीं है, निराकार होने से मूर्त्यादि आकारकल्पना नहीं, सर्वत्र अभिव्याप्त होने से परिमाण नहीं हो सकता है।

जब 'स पर्यगात्' इस प्रमाण से उस ईश्वर के विग्रह (शरीर) का अभाव स्पष्ट कहा गया है, तो मूर्ति के होने का प्रश्न ही नहीं उठता, फिर उसके अभाव में पूजाविधि कैसे होगी; क्योंकि मूल कट जाने पर शाखा और पत्रादि की आशा करना मृगमरीचिका है।

श्रीमन्! लोकैषणा और वित्तैषणा के लिये लक्ष्मी के निरन्तर आराधन से कुण्ठित विचारशक्तिवाले अज्ञानियों में कहाँ भटक रहे हो? पत्थर-पूजकों को तो उनके ही मान्य ग्रन्थ धिक्कार रहे हैं। यथा—

'योगी लोग शिव का दर्शन आत्मा में करते हैं, इन पाषाणादि मूर्तियों में नहीं, यह तो अज्ञानियों की भावना या मनस्तोष के लिये प्रतिमाओं की परिकल्पना कर ली गयी है।'

पृ० १६१६, अनु० ३—पूर्वपक्ष—"संवत्सरस्य प्रतिमां याम्०' इस मन्त्र से ही मूर्तिपूजा का प्रतिपादन हो रहा है। दयानन्द ने स्वयं ही इसकी व्याख्या इस तरह से की है कि उससे यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दयानन्दीयोऽर्थः—'विद्वांसः संवत्सरस्य यां प्रतिमां परिमाणमुपासते वयमपि त्वा तामेवोपास्महे' इति। अयमभिप्रायः—मूर्तिपूजाऽचेतनत्वादेव मूर्तेर्नाङ्गीक्रियते सामाजिकैः। नित्यचैतन्यस्य विभोः परमात्मन एवोपासनं तैरङ्गीक्रियते। परमस्मिन् मन्त्रे संवत्सरस्य प्रतिमोपासनमङ्गीकृतम्।"

समा०—अयं वार्यमाणोऽपि स्वशिरसैव पाषाणं प्राहरत्। अद्भुतालये न्यासयोग्या इयं मतिर्मूर्तेरर्थमेव नाकलयते यदेतदर्थः कलेवरः शरीरं वेति। परमत्र संवत्सरस्य न कलेवरोऽस्ति, किन्तु क्षणघटिकामुहूर्तादिकालरूपस्य परिमाणं प्रतिपाद्यते। अत्र त्रीणि शतानि षष्टिश्च रात्रयः प्रतिमासंज्ञाः, न तु काचिदिह मूर्तिर्विग्रहो न वाऽपि तत्पूजाप्रतिपादनम्। श्रावणान्धस्येव समन्तान्मूर्तिहरितिमैव दरीदृश्यते।

यत् कल्प्यते स्वकपोलाभ्यां यत्—'न सामाजिकैरचेतनत्वादेव मूर्तिपूजा स्वीक्रियते' तदलीकम्। सामाजिकास्तु उपास्यत्वेन केवलं सर्वव्यापकं निराकारं मन्यन्ते। चेतना ये जीवाः

मन्त्र मूर्तिपूजा का समर्थक हो जाता है। मन्त्र का दयानन्द ने यह अर्थ किया है—'विद्वान् लोग संवत्सर की जिस क्षण आदि काल के विभाग करनेवाली रात्रि की उपासना करते हैं, हम लोग भी उसी का सेवन करें।' इस पर हमारा कहना है कि आर्यसमाजी मूर्तिपूजा को इसलिये नहीं मानते कि पत्थर की मूर्ति अचेतन है। सदा चैतन्यगुणविशिष्ट सर्वत्र व्यापक परमात्मा की ही उपासना का वे विधान करते हैं। परन्तु इस मन्त्र में संवत्सर की प्रतिमा की उपासना विहित है। यह भी अचेतन की ही उपासना हुई।"

समाधान—आपको इतना समझा चुके, फिर भी आपने अपना सिर पत्थर में ही दे मारा। यह तो अजायबघर में रखने योग्य आपकी मति है, जो मूर्ति शब्द का अब तक अर्थ नहीं समझ पायी। मूर्ति का अर्थ कलेवर या शरीर होता है, जो कि प्रकृति के परमाणुओं से बनता है। किन्तु यहाँ पर क्षण, घड़ी, मुहूर्त आदि में कल्पित संवत्सर का ऐसा कोई शरीर या मूर्ति नहीं, यह तो कालमापन की एक कल्पना है। यहाँ पर ३६० दिन और रात की प्रतिमा संज्ञा है। किसी मूर्ति की चर्चा नहीं है और न यहाँ मूर्तिपूजा का प्रतिपादन है। यहाँ उपासना शब्द से आपको भ्रान्ति है। पर महोदय! संस्कृत का सीधा अर्थ है कि विद्वान् मानते हैं। यहाँ पर कहीं भी ऐसा नहीं है कि संवत्सर ईश्वर की प्रतिमा है। आप तो मूर्ति को ईश्वर का विग्रह मानकर उपासना करते हैं। श्रावण के अन्धे को सर्वत्र मूर्ति की ही हरियाली दिखायी पड़ रही है।

जो कि आप कह रहे हैं कि—'आर्यसमाजी को मूर्तिपूजा अचेतन (मूर्ति) होने के कारण स्वीकार्य नहीं है, सो यह संवत्सर भी तो अचेतन है।' यह आपका कल्पित कथन सफेद झूठ है।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शरीरधारिणस्ते तु नोपास्यास्तेषामस्थिरत्वादसर्वशक्तिमत्त्वात्, जडानामपि वेदाऽप्रतिपाद्यत्वात्, उपासनया चोपास्यगुणसंक्रम्यमाणत्वात्, भवादृग्बुद्धेर्जडत्वादिगुणाधानभीतेर्वा। अत्र प्रतिमायाः परिमाणमिति स्पष्टमाचष्टे। संवत्सरं सर्वे विद्वांसो यथा उपासते तथा वयमपि सेवामहे, न कश्चिदपि अकाले किमपि कर्तुं पारयते तस्मात्। कालस्य मूर्तिशब्देनाऽभिधानं भवन्मतेर्निष्कोषतैव।

पृ० १६१७, अनु० १—यदप्युच्यते—"संस्कारविधौ 'ओषधे त्रायस्व' 'मैनं हिंसीः, इति प्रार्थ्यते। तृणस्य कुशस्याचेतनत्वात् तत्प्रार्थनं मूर्तिपूजनमेव। 'ऊँ विष्णोर्दंष्ट्रोऽसि' अत्र क्षुरस्य विष्णुदंष्ट्रात्वमुक्तम्। किं निराकारस्याऽपि दंष्ट्रादिकं भवति?"

इत्यत्रोच्यते। पुराकाले नापिता अपि संस्कृतज्ञा मन्त्रार्थज्ञाश्च अभूवन्। भवादृग्रूढोपासना-सङ्कीर्णमतिभिश्च दुष्प्रचारे कालेन ते तदध्ययनादपि वञ्चिता जाताः।

हमारी उपास्यता में चेतन या अचेतन का कोई प्रश्न नहीं है। अरे चेतन तो भेड़िया, भैंस और आप भी हैं, इतने भर से सब उपास्य ईश्वर का स्थान नहीं ले सकते।

सीधी सी बात है, यह जीवात्मा उसी की उपासना करेगा, जो इसके पास, इसमें व्याप्त और सर्वज्ञ है। अन्य भौतिक पदार्थ तो जड़ और अस्थिर हैं। इनके ईश्वरत्वेन उपास्यत्व का वेद में प्रतिपादन नहीं है; क्योंकि उपासना से उपास्य के गुण आते हैं या जड़ोपासना से आपसदृश बुद्धि की जड़ता आने का भय है। यहाँ पर प्रतिमा का अर्थ परिमाण स्पष्टरूप से कथित है। संवत्सर की जैसे अन्य विद्वान् लोग उपासना या मान्यता करते हैं, उसी प्रकार हम भी सेवन करते हैं; क्योंकि अकाल अर्थात् समय के बिना तो कोई कुछ भी नहीं कर सकता। काल की मूर्ति संज्ञा देना तो आपकी बुद्धि का दिवालियापन ही है।

पृ० १६१७, अनु० १—यह कहना कि—"ओषधे त्रायस्व' हे औषध! तुम इस बालक की रक्षा करो, इसको कुछ भी नुकसान न पहुँचाओ। यह प्रार्थना कुशा से की जाती है। अचेतन तृण की प्रार्थना करना मूर्तिपूजा ही तो है। 'ऊँ विष्णोर्दंष्ट्रोऽसि' इस मन्त्र में क्षुर (छुरा) को विष्णु की दाढ़ बताया गया है। क्या निराकार की भी दाढ़ हो सकती है?"

इस विषय में हमारा कहना है कि प्राचीनकाल में नाई लोग भी संस्कृतज्ञ होने से वेदादिशास्त्रों के वाक्यों के अर्थों को समझते थे। आप जैसे रूढि के पुजारी सङ्कीर्ण-विचारकों द्वारा दुष्प्रचार करके कि 'स्त्री और शूद्र न पढ़ें' विद्या से वञ्चित कर डाला। भारत का दुर्भाग्य था कि पौंगा-पन्थियों ने संस्कृत का सफाया कर दिया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मुण्डनसंस्कारविधौ परेशं ध्यात्वा 'ओ३म् आयमगन्त्सविता०' इति मन्त्रं पठति बालकपिता नापितं दृष्ट्वा तं प्रबोधयति यत्त्वया क्षुरेण तीक्ष्णेन सावधानतया मुण्डयितव्योऽयं बालो न कथमपि छेदनं त्वचाया भवेदिति। 'स्वधिते ! मैनं हिंसीः' इत्यत्रानेन क्षुरधारी नापित एव सम्बोध्यते। यथा महीधरः 'क्षत्रस्य योनिरसि' (यजुः० २०। १) मन्त्रे—'हे आसन्दि ! त्वं क्षत्रस्य योनिरुत्पत्तिस्थानमसि। आसन्द्यभिषिक्तो गुणधर्मानर्हति राजेति भावः' इति लक्षणयाऽर्थं कृतवान् तथैवाऽत्र।

'ओषधे त्रायस्व' इत्यस्यात्र संस्कारे विनियोगो गृह्यसूत्रेण कृत आदृतश्च स्वामिना। कुशास्तु ओषधिरेव शोधयित्री। तत्प्रयोगे प्रयोजनद्वयम्—(१) कर्तरी या निशिता सती कुशकर्तने समर्था साऽसन्दिग्धं प्रयोज्या केशकर्तने, (२) केशाश्च कर्तनानन्तरं निखातव्याः कुशैः साकं गलनाय। तत्र भ्रान्त्याऽपि कश्चित् पश्वादिको जन्तू रोगकरिकान् केशान् न भक्षयेदतः सार्धं कुशतृणान्यपि निखन्यन्ते।

मूर्तिपूजायां तु न गृह्येष्वपि कश्चिद् विनियोग एतस्य। अत्र 'विष्णोर्दंष्ट्रोऽसि' एतेन किं भवान् स्वमतचतुर्भुजविष्णोर्दंष्ट्रां क्षुरं मनुते ? कदाचिन्नैव। तदा तव साकारं विष्णुं तु नेह

मुण्डन-संस्कार में परमेश्वर का ध्यान करके बालक का पिता 'ओ३म् आयमगन्०' इस मन्त्र को पढ़ता है और मानो नाई को भी प्रबोधित करता है कि तुम सावधानी से इस तेज क्षुरा से इसका मुण्डन करना, कदाचित् त्वचा का छेदन न हो जाये। यहाँ पर बालों को एक बार नहीं, दो बार नहीं, बल्कि तीन बार उक्त मन्त्रों से बालक का पिता भिगोता है। 'स्वधिते मैनं हिंसीः' इस मन्त्र से क्षुरधारी नाई ही सम्बोधित किया जाता है। जैसा कि महीधर ने 'क्षत्रस्य योनिरसि' (यजुः० २०। १) मन्त्र के भाष्य में कहा है कि—'हे आसन्दि ! तू क्षत्र की योनि अर्थात् उत्पत्तिस्थान है। आसन्दी पर अभिषिक्त राजा गुण-धर्मों के योग्य है।' इस प्रकार लक्षणा से अर्थ किया है, वैसा ही यहाँ भी लक्षणा से नाई अभिप्रेत है।

'औषध ! तुम रक्षा करो इस बालक की' इनका गृह्यसूत्रों द्वारा विनियोग किया गया, स्वामी जी ने उसी को मान्यता दी है। कुश तो शोधन करनेवाली ओषधी है। इसके प्रयोग के दो प्रयोजन हैं। एक यह कि जो कैंची इतनी तेज है कि कुश को काट सकती है, उससे बाल काटने में कुछ सन्देह ही नहीं। दूसरा है कि केश काटने के अनन्तर कुशों के साथ गलने के लिये भूमि में गाढ़ दिये जायेंगे, यदि भ्रान्ति से कोई पशु आदि जन्तु प्रथम केश खा लेवे तो वे रोगकारक हो सकते हैं, पर कुशों के साथ होने से उन्हें पशु नहीं खायेगा।

विचारणीय है कि किसी गृह्यसूत्र में 'विष्णोर्दंष्ट्रोऽसि' का विनियोग मूर्तिपूजा में नहीं किया गया है, फिर आप क्या इससे अपने चतुर्भुज विष्णु की दाढ़ को क्षुरा सिद्ध करना चाहते हो ?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सम्बोधयतीति निश्चितम्। तदा किं निराकारस्य विष्णोः सर्वव्यापकस्य क्षुरो दंष्ट्रा आख्यातुमर्हति? तदपि नैवासम्भवात्। पुनरत्र सङ्गतिरन्वेष्टव्या। इह विष्णुशब्देन यज्ञो मुण्डनसंस्कारगतस्तत्र क्षुरस्य दंष्ट्रात्वमुपमितम्।

इदं कथनं 'कुशाचेतनत्वं तत् प्रार्थनैव मूर्तिपूजाऽस्ति। इति न युक्तम्। यथा भवान् वक्ति न तादृङ्मनुते। पृच्छामि यत् 'लाठी में गुण बहुत हैं सदा राखिये संग। सदा राखिये संग झपटि कुत्ता को मारै।' अत्र यष्टिगुणवर्णनं किं मूर्तिपूजाऽस्ति, किञ्चेयं हस्तमुक्ता प्रधाव्य च स्वयं सारमेयं ताडयितुं प्रवर्तते? महाराज! यष्टिस्तु साधनमात्रमस्ति, साधकहस्तशक्त्यभावे निष्प्रयोजनैव। पुनर्भवांस्तु तामेव मूर्तिं मनुते यत्रेश्वरस्य प्राणान् प्रतिष्ठापयति। किमेवं भवन्मते क्षुरकुशयोस्तादृक् पूज्यमूर्तिमत्त्वम्? अत्र निरुक्तं प्रमाणम्—

(क) "चेतनावद्धि स्तुतयो भवन्ति। अचेतनान्यप्येवं स्तूयन्ते।"

(ख) "अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते—'अभिक्रन्दन्ति हरितेभिरासभिः।'"

(निरु० ७। ७)

कदाचित् नहीं। तो यह भी निश्चित है कि इसमें तुम्हारे साकार विष्णु को तो सम्बोधित किया नहीं गया है। तो फिर क्या सर्वव्यापक निराकार विष्णु की दाढ़ क्षुरा आपके द्वारा सिद्ध किया जा सकेगा? यह भी असम्भव है। फिर यहाँ सङ्गति ही खोजना बुद्धिसङ्गत होगा। यहाँ विष्णु शब्द से यह यज्ञ (मुण्डनसम्बन्धी) लिया जायेगा, वहाँ क्षुर दाढ़ से उपमित है।

यह कहना कि 'कुश अचेतन (जड़) है, उसकी प्रार्थना की गयी, यही मूर्तिपूजा है।' ठीक नहीं, जैसा यह आप कह रहे हैं वैसा मानते आप भी नहीं हैं। मैं पूछता हूँ कि 'लाठी में गुन बहुत हैं सदा राखिये संग। सदा राखिये संग झपटि कुत्ता को मारै॥' ये लाठी के गुणवर्णन क्या मूर्तिपूजा है और क्या वह हाथ से छूटकर दौड़कर स्वयं कुत्ते को मारने पहुँच जाती है? महाराज! लाठी तो साधन है, साधक हाथ में शक्ति न हो तो बेकार है। फिर आप तो मूर्ति उसे मानते हैं, जिसमें ईश्वर की प्राणप्रतिष्ठा कर लेते हैं। क्या क्षुर और कुश आपके मत से भी मूर्ति माने जा सकेंगे?

ऐसे विषयों को समझने के लिये कदाचित् आपने निरुक्त पढ़ा होता, तो सिरफिरों जैसी ऊलजलूल बातें नहीं करते, देखिये निरुक्त—

(क) शतपथ ९। ४-२२ में 'वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा' आदि वर्णन चेतनावानों की तरह है।

(ख) अचेतनों की भी चेतनावत् स्तुतियाँ पायी जाती हैं। जैसे—'अभिक्रन्दन्ति हरितेभिरासभिः' (ऋ० १०। ९४। २)। हरे सोमादि पदार्थों के पीसने से शिला-पृष्ठ हरिद् वर्ण का हो जाता है, उस पर कविहृदय कहता है कि मानो ये शिलायें अपने उन हरे मुखों से सोम

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादि परिप्रेक्षायां यज्ञदेवताकेऽस्मिन् संस्कारे दंष्ट्रेति अङ्गत्वेन प्रतिपाद्यते। अत्र हि रूपकालङ्कारो वा क्षुरे दंष्ट्रात्वारोपेण। नहि त्वत्कल्पितचतुर्भुजविष्णोः क्षुरदंष्ट्रा क्वचिद् भवादृग्भिरप्यवालोकि। एवमेव 'स्वधिते मैनं हिंसीः' इत्यत्राऽपि अलङ्कारविधानमवगन्तव्यम्।

आश्चर्यं यन्न वेदान्तदर्शनमप्यधीतं भवता, तद्धि एवम्—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (वे० द० २। १। ५) अर्थात् किमपि विशिष्टं बोधयितुमनुमातुं वा अभिमानिव्यपदेशो जडेषु चेतनवज् जायते। यथा—'मञ्चाः क्रोशन्ति'। यथा चान्योक्तयः—

भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि।
रे राजहंस वद तस्य सरोवरस्य,
कृत्येन केन भवितासि कृतोपकारः॥

इह राजहंसमिषेण मातृभूमिभक्त आत्मानं कश्चित् सम्बोधयति। नहि च राजहंसो वदितुं समर्थः।

पीनेवालों को सोमपान के लिये बुला रही हों। यहाँ पुरुषविध अङ्गों से स्तुति है। स्तुति करनेमात्र से मूर्तिपूजा कैसे सिद्ध हो सकेगी ?

इस प्रकार यहाँ संस्कार में दंष्ट्रा अङ्गरूप में वर्णित है। यहाँ पर क्षुर में दंष्ट्रत्व के आरोप से रूपकालङ्कार है। आप या आपके समर्थकों ने आज तक तो चतुर्भुज विष्णु की क्षुर दाढ़ देखी ही नहीं है। इसी प्रकार 'स्वधिते मैनं हिंसीः' आदि में भी अलङ्कार-विधान से समझ लेना चाहिये।

आश्चर्य है कि आप वाक्यशैली को भी नहीं समझे। यदि आपने वेदान्त का यह सूत्र भी देखा होता तो आप कुछ तो समझते। यथा—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (वे० द० २। १। ५) अर्थात् किसी विशेष तात्पर्य को जताने या अनुमित करने के कारण अभिमानी व्यपदेश जड़ों में चेतनवत् किया जाता है। जैसे—'मञ्च पुकारते हैं।' श्रीमन्! अन्योक्तियाँ कुछ विशेष ही ध्वनि रखती हैं। जैसे—

'हे राजहंस! तुमने इस तालाब में मृणालदण्ड खाये, जल पिये, कमलों में विहरे। तो क्या कभी तुमने सोचा कि इस सरोवर के ऋण से उऋण कैसे हो सकोगे—बताओ।'

यह मातृभूमि का कोई भक्त अत्यन्त उपकृत होकर राजहंस के व्याज से स्वयं को ही सम्बोधित कर रहा है कि बोलो, इस आनन्द देनेवाले मातृभूमिरूपी सरोवर के अनन्त उपकारों का बदला कैसे चुकाओगे ? यहाँ जिस राजहंस को सम्बोधित किया और कहा गया कि 'त्वं' तुम बोलो, पर वह तो बोल नहीं सकता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६१७, अनु० २—यच्च—"वेदेषु तु—'नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे' इत्यादिभिर्बहुभिर्मन्त्रैर्विद्युदादीनां तदधिष्ठात्रीणां देवतानां नमस्कारादिकं दृश्यते। दयानन्देनाऽपि—'प्रतिपदे स्वाहा' इत्याद्या आहुतयो नामकरण उक्ताः। 'सानुगायेन्द्राय नमः' एताभ्यो देवताभ्य एकैकग्रासो देय इत्युक्तम्। नहि सानुगस्य मनुष्यस्यैकग्रासेन तृप्तिः सम्भवति, तस्मान्मनुष्यभिन्ना एव देवाः।" इति।

तदप्यनर्गलं सङ्कलनमसङ्गतं च प्रकृते। नहि शास्त्रेषु तत्तदधिष्ठात्री देवता कापीश्वरादन्या मन्यते। विद्युदादिभ्यो नमस्कृतौ तु यास्को महर्षिः प्रमाणम्। यथाऽनेकेऽर्था नमःशब्दस्य। यथा-अन्नम्(निघं० २।७), वज्रम्(निघं० २।२०), नमस्यति परिचरणे(निघं० ३।५)। अतोऽत्र नमःशब्दार्थो यथायोग्यसेवनम्। नाऽत्र कस्याश्चिन्मूर्ते रचना पूजनं वा, अपितु विद्युदादिपदार्थानामुपयोग एव।

'प्रतिपत्तद्देवतादिभ्यः' तत्तिथिनक्षत्रादिना जन्मतिथ्यादिस्मृतिरायुष आकलनार्थमपि।

पृ० १६१७, अनु० २—"वेदों में 'नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे' इत्यादि बहुत से मन्त्रों से विद्युद् आदि और उनके अधिष्ठात्री देवताओं के लिये नमस्कार आदि देखा जाता है। स्वयं स्वामी दयानन्द ने भी 'प्रतिपदे स्वाहा' इत्यादि आहुतियाँ नामकरण संस्कार में कही हैं। 'सानुगायेन्द्राय नमः' इत्यादि देवताओं के लिये एक-एक ग्रास देना चाहिये, ऐसा कहा है। अनुचरसहित मनुष्य की तो एक ग्रास से तृप्ति हो नहीं सकती, अतः मनुष्य से भिन्न ये देवता ही हैं।"

यह सारा ही अनर्गल सङ्कलन कर लिया, प्रकृत से कोई प्रयोजन नहीं है। शास्त्रों में उन-उन पदार्थों के अधिष्ठात्री देवता की कोई मान्यता नहीं है, विद्युद् आदि के लिये नमस्कार कर्म आदि के लिये उक्त निरुक्त-प्रमाण पर्याप्त है। नमः शब्द के अन्न, वज्र, सेवनादि अनेक अर्थ हैं, जैसा कि निघण्टु में लिखा है। अतः यहाँ पर नमः शब्द का यथायोग्य सेवन व उपयोग करना अर्थ सङ्गत है। 'नमो विद्युते०' मन्त्र में किसी मूर्ति की न तो रचना बतायी है और न पूजा, अपितु विद्युत्, विद्युद्भर्जन आदि का सदुपयोग करने का कथन है।

'प्रतिपदे स्वाहा' आदि आहुतियों का यही प्रयोजन है कि जन्म के समय क्या तिथि थी, व कौनसा नक्षत्र था। यजमान आदि को इनके निश्चित किये जड़ देव नामों का तथा प्रतिपद् आदि से उनके वैज्ञानिक सम्बन्ध का ध्यान व ज्ञान बना रहे, जिससे उत्पन्न बालक की आयु की भी गणना स्मृति में रहे, जिससे गृह्यादि की विधि निष्क्रमण, अन्नप्राशन आदि संस्कार भी समय पर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'सानुगायेन्द्राय नमः' आदीनामपि अनेकार्थाः, नमस्कारार्थे इन्द्र एतद्विशेषणयुक्ताय परमेश्वरायेत्यर्थः । इन्द्रशब्देन सूर्यविद्युदादिभ्यो नमः । सूर्यादिः सपरिवारस्तस्य नम उपयोगः । इत्यादीनां नामकीर्तनव्याजेन एतदेवाभिव्यज्यते यदिदमन्नं परेशकृपया सूर्यादीनामुष्णता-प्रकाशवर्षादिभिः प्राप्तं तदतिथ्यादीनां प्राणिनां पालने समर्थ्यते । तदनुपस्थितावग्नौ वाय्वादीनां शोधनाय रोगादिनिवारणाय चार्प्यते इति तात्पर्यम्। न तु भवादृशो यथा जडपाषाणादिभ्यो भोजनान्यर्पयन्ति । प्राणिनां शरीररचनां पुष्णन्ति ये जडा देवास्तान् स्मृत्वा प्राणरक्षार्थमिदमन्नं दीयते प्राणिभ्यः । इमे एव च स्वस्वविशिष्टगुणवन्तः शरीराङ्गेषु विराजन्ते । एष भावः प्रश्नोपनिषदि दर्शितः । यथा—

"अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन्! कत्येव देवाः प्रजां विधारयन्ते, कतर एतत् प्रकाशयन्ते, कः पुनरेषां वरिष्ठः ? ॥ २ । १ ॥ तस्मै स होवाचाकाशो ह वा एष देवो

किये जा सकें । जैसी कि विधि है—'चतुर्थे मासि निष्क्रमणम् । जन्माद्यस्तृतीयो ज्यौत्स्नस्तस्य तृतीयायाम् । षष्ठे मास्यन्नप्राशनम्' आदि ।

'सानुगायेन्द्राय नमः' आदि में पठित इन्द्र, वरुण, यम आदि शब्द भी अनेकार्थक हैं । जब नमः का अर्थ नमस्कार लगायेंगे तो इन्द्र का अर्थ परमेश्वर है, जिसके संसार के समस्त चर अचर अनुग अर्थात् आज्ञानुवर्ती हैं । जब नमः का अर्थ सेवन या उपयोग होगा, तो इन्द्रादि का अर्थ जगतीगत विद्युदादि दिव्य पदार्थ होगा और सूर्य, वरुण आदि के परिवार के या उसके साथ इस सृष्टि में उपयोग में आनेवाले पदार्थ भी । इन्द्रादि नामों के उच्चारण के बहाने से यही अभिव्यञ्जित होता है कि परमेश्वर की कृपा और सूर्य आदि की ऊष्मा, प्रकाश, वृष्टि आदि के द्वारा प्राप्त जो अतिथि आदि प्राणियों की शरीररचना को जो जड़ देव सूर्य, वायु आदि पुष्ट करते हैं, उनका स्मरण करके प्राणरक्षार्थ ये अन्न के ग्रास उन-उनका नाम लेकर रखे जाते हैं और फिर अतिथि आदि को दे दिये जाते या अग्नि में रख दिये जाते हैं । ये सूर्य, चन्द्र, वायु, अग्नि, आकाश आदि अपने-अपने विशिष्ट गुणों से युक्त होकर शरीर के अङ्गों में विराजते हैं । जैसे सूर्य आँख से सम्बन्ध रखता है, वायु त्वचा से, चन्द्र मन से इत्यादि । इसी भाव को प्रश्नोपनिषद् (२ । १-४) में दर्शाया गया है—

प्रथम प्रश्न का उत्तर सुनने के अनन्तर प्रसिद्ध है कि पिप्पलाद ऋषि से भृगुकुलोत्पन्न वैदर्भि ने पूछा—हे ऐश्वर्यसम्पन्न ! कितने देव इस शरीररूपी प्रजा को धारण करते हैं और कितने इसको प्रकाशित करते हैं, फिर इनमें कौन श्रेष्ठ हैं ? ॥ १ ॥ वैदर्भि के प्रश्न का उत्तर देने के लिये वह पिप्पलाद स्पष्टतया बोले—प्रसिद्ध है कि आकाश, वायु, अग्नि, जल और पृथिवी—ये पाँच

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वायुरग्निराप: पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च। ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥ २ । २ ॥"

अत्र प्रकरणे आकाशवाय्वग्निजलादीनां जडानामपि चेतनानामिव वादः प्रतिवादो वा प्रदर्शितः। एवमेव 'सानुगायेन्द्राय नमः' आदिभिराध्यात्मिकाधिदैविकाधिभौतिकार्थानां विज्ञानमपि ध्वनितम्। किं भवान् विश्वसिति यत् ते ऋषय उलूखलमुसलादीन् ईश्वरस्थाने मत्वाऽपूजयन्? अत्र 'वनस्पतिभ्यो नमः' इत्यनेन उलूखलमुसलपार्श्वे ग्रासनिधानस्याप्येतत् तात्पर्यं यदेतदन्नं वनस्पतिनिर्मितोलूखलमुसलोपयोगेन पाकयोग्यमजायत। गृहस्थोऽन्नोपयोजनात् प्राक् सर्वोपयोगि पदार्थस्मरणं विधाय 'बलिवैश्वदेवविधिं' बलिना विश्वदेवहितसाधकविधिं कुरुते एतदाशयेन यद् विश्वदेवशक्तयो ममान्ने स्वभागभाजिन्यः सन्ति। का नामास्मादुदारभावना श्रेयसी गृहमेधिनाम्?

तिथिनक्षत्राणां च ये देवा आख्याता अत्र ते तत्तद्द्योतकत्वादेव सन्ति। वस्तुतस्तु इमे देवास्तिथिनक्षत्राणां द्वितीयनामानि सन्ति कर्मकाण्डे साङ्केतिकानि। यथा च गोभिलगृह्यसूत्रे (प्रपा० २, कां० ८, सू० १२) तैत्तिरीयसंहितायां वाऽपि नक्षत्रदेवतानामपि वर्णनमस्ति। यथा—'कृत्तिकानक्षत्रमग्निर्देवता.....रोहिणीनक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रं

भूत वाणी, मन, नेत्र और श्रोत्र ये सब देव हैं। वे इस शरीर को प्रकाशित करके कहने लगे कि हम सब इस शरीर को आश्रय करके धारण करते हैं ॥ २ ॥

इस प्रकरण में आकाश, वायु आदि जड़ हैं, पर इनका वाद-प्रतिवाद चेतनों के सदृश प्रदर्शित किया गया है। इसी प्रकार अनुगामियों सहित इन्द्र आदि के लिये नमः कहने पर आध्यात्मिक, आधिदैविक तथा आधिभौतिक अर्थों का विज्ञान भी यहाँ ध्वनित है।

यहाँ पर क्या आप यह प्रकट करना चाहते हैं कि हमारे गृह्यसूत्रकारादि ऋषि ऊखल और मूसल को ईश्वर या चेतन देव समझकर उसे ग्रासार्पण कर भोजन देकर तृप्त करते थे? यहाँपर 'वनस्पतिभ्यो नमः' कहकर ऊखल और मूसल जो गृहस्थों के बड़े काम का साधन है, उसके पास अन्नग्रास रखने का भी यही तात्पर्य है कि यह अन्न वनस्पतिनिर्मित ऊखल और मूसल के उपयोग से पाकयोग्य बना है। गृहस्थी अन्न के प्रयोग करने से पूर्व समस्त उपयोगी पदार्थों का स्मरण कर 'बलिवैश्वदेवविधि' करता है अर्थात् बलि (अन्न) के द्वारा विश्व भर की देवशक्तियाँ मेरे अन्न में अपना-अपना भाग रखती हैं। गृहस्थी के लिये सर्वात्मभाव व सर्वोपकार की इस से बढ़कर उदार भावना और क्या हो सकती है?

संस्कारविधि में तिथि नक्षत्रों के जो देवता कहे हैं, वे देवता इनके द्योतक होने के कारण हैं। वस्तुतः ये इनके द्वितीय साङ्केतिक नाम हैं। स्वामी जी महाराज ने गोभिलगृह्यसूत्र से ही लिये

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सोमो देवता' इत्यादि। (तैत्तिरीयसंहिताभाष्ये वेदार्थप्रकाशे कां० ४, प्र० ४, अ० १०, कलकत्तासंस्करणे १८८१)

पृ० १६१८, पं० ४—यत्त्वाह—"यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥' इति मन्त्रमुद्धृत्य व्याख्यातम्—'यदसंस्कृतवाण्या अविषयम्, येन वाणी विदितास्ति तद् ब्रह्म, हे मनुष्य, त्वं विद्धि। यत इदं प्रत्यक्षं जगदस्ति नैवैतद् ब्रह्मास्ति। किन्तु विद्वांसो यन्निराकारं सर्वव्यापकमजं सर्वनियन्तृ सच्चिदानन्दलक्षणं ब्रह्मोपासते, त्वयाऽपि तदेवोपासनीयम्, नेतरदिति' इति, तदपि तुच्छम्, तात्पर्यानवबोधात्। तथाहि—इद्न्तास्पदत्वेन ब्रह्मण उपास्यत्वनिषेधापत्तेः।.....न च तत्र शब्दप्रवृत्तिः। 'यतो वाचो निवर्तन्ते' इत्यादि-श्रुतिभिर्वाचोऽविषयत्वात्।"

पृ० १६१९, अनु० १—"ननु कथं तर्हि—'वेदैश्च सर्वैरहमेव वेद्यः' (गी० १५।१५), 'सर्वे वेदा यत्पदमामनन्ति' (कठो० २।१५), 'तन्त्वौपनिषदं पुरुषं पृच्छामि' (बृ० उ० ३।९।२६) इत्यादिभिर्वाचोविषयत्वं ब्रह्मणः प्रतिपाद्यते। उपर्युक्तरीत्या सर्वथा वाचोऽविषयत्वेन

हैं। तैत्तिरीयसंहिता में भी नक्षत्र और उनके देवताओं का वर्णन है, जो कृत्तिका नक्षत्र से साभिप्राय प्रारम्भ किया गया है। जैसे कृत्तिका नक्षत्र का देवता अग्नि आदि।

पृ० १६१८, पं० ४—"स्वामी दयानन्द ने 'यद् वाचाऽनभ्युदितं येन वागभ्युद्यते' इस मन्त्र को उद्धृत कर जो व्याख्या की है कि—'वह परमात्मा असंस्कृत वाणी का विषय नहीं है, परन्तु जिस से वाणी विदित होती है, हे मनुष्यो! तुम लोग उसी को परमेश्वर जानो; क्योंकि यह प्रत्यक्ष जगत् ब्रह्म नहीं है। किन्तु विद्वान् लोग निराकार, सर्वव्यापक, अज और सब पदार्थों का नियमित करनेवाला, सत्, चित्, आनन्द आदि लक्षणों से युक्त जो ब्रह्म है, उसी की उपासना तुम लोग करो। यह उपनिषत्कार ऋषियों का मत है।' यह सब कथन तुच्छ है, स्वामी जी ने मन्त्र का अभिप्राय ही ठीक से नहीं समझा। यदि आपके मत के अनुसार इस मन्त्र का अर्थ किया जाय तो ब्रह्म का इदन्ता पद से बोध होने के कारण ब्रह्म की उपासना निषिद्ध हो जायेगी।....ब्रह्म में कोई शब्दप्रवृत्ति नहीं हो सकती। क्योंकि 'यतो वाचो निवर्तन्ते' इत्यादि श्रुतियों से वह वाणी का विषय नहीं है।"

पृ० १६१९, अनु० १—"इस पर प्रश्न होता है कि 'वेदैश्च सर्वैरहमेव वेद्यः', 'सर्वे वेदा यत्पदमामनन्ति', 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादि गीता और उपनिषदों के वचनों से ब्रह्म के वाणी का विषय होने की बात सिद्ध होती है। उक्त रीति से ब्रह्म को सब तरह की वाणी का अविषय माना जाये तो वेद भी तो वाणीमय है, तब ब्रह्म को वेदों से भी अवेद्य मानना पड़ेगा और इन श्रुतियों को अप्रमाण मानना पड़ जायेगा। किन्तु इसका सीधा सा समाधान यह है कि ब्रह्म को वाणी का अविषय बतानेवाली श्रुतियों का तात्पर्य इतना ही है कि लौकिक अध्यारोपित और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदानामपि वाग्रूपत्वात् कथं तद्विषयत्वोक्तिः सङ्गच्छते, इति चेन्न, लोकाध्यारोपापोहार्थत्वात् शास्त्रस्योक्तशङ्कानवकाशात्। .....मूर्तिपूजानिषेधगन्धोऽपीह वचनेषु नास्ति। वाणी येन विदिता तद् ब्रह्मेत्यपि न सङ्गतम्, वाणीविज्ञानस्य प्रत्यगात्मनिष्ठत्वात्। किं प्रत्यगात्मनो ब्रह्मत्वमभ्युपेयते युष्माभिः? तथाभ्युपगमे सिद्धान्तहानिः। विद्वांसो यन्निराकारमित्यादिकं तत्कपोलकल्पितम्, श्रुत्यक्षरासम्बन्धात्।".

इति सर्वं भ्रमग्रस्तम्, तत्त्वानवबोधात्। नह्यत्र इदन्तयाऽखिलं बोध्यते। 'यदिदं प्रत्यक्षं जगदस्ति नैवैतद् ब्रह्मास्तीति' स्पष्टोदीरितत्वात्। अपि नामेदं बोध्यमासीत् कथङ्कारमिदन्तास्पदत्वेन ब्रह्मण उपास्यनिषेधापत्तिः स्यादिति। यदाह—'न तत्र शब्दप्रवृत्तिः अतः संस्कृताया असंस्कृताया वा वाण्याः सर्वथाऽविषयत्वमेव' इत्यपि 'यद् वाचा०' इत्यस्याभिप्रायानवगमादेव। तत्राऽस्ति शब्दोऽनभ्युदितम् इति, तेन न ब्रह्म अभिलक्ष्य वक्तुं पार्यते। लक्ष्यं ब्रह्म यावन्न प्रवर्तेत वाक् परं तत् प्राप्तव्यमार्गं बोधयितुं तु शब्दाः प्रवर्तन्त एव, सर्वशास्त्राणां तल्लक्षितत्वात्।

कल्पित धर्मों का ब्रह्म में अभाव है। यहाँ मूर्तिपूजा के निषेध का गन्ध भी नहीं है। 'वाणी जिससे ज्ञात होती है, वह ब्रह्म है' यह व्याख्या भी गलत है; क्योंकि वाणी को जानने का काम जीवात्मा का है। क्या आप प्रत्यगात्मा (जीव) को ब्रह्म मानते हैं? यदि ऐसा मानेंगे, तो यह बात आपके निराकार ब्रह्मवाद के विपरीत पड़ेगी। 'विद्वान् जिसको निराकार मानते हैं' इस तरह की व्याख्या केवल दयानन्द की अनोखी कल्पना की ही सूझबूझ है; क्योंकि इसका श्रुति के अक्षरों से कोई किसी प्रकार का सम्बन्ध नहीं है।"

पारिजातकार का उक्त कथन सर्वथा भ्रान्त है; क्योंकि उन्होंने तत्तत्स्थलों को समझा ही नहीं। यहाँ पर 'इदन्ता' और 'यह' कहकर समस्त प्रतिपादन नहीं किया जा रहा है; क्योंकि यह प्रत्यक्ष जगत् ब्रह्म नहीं है, जिसे नवीन वेदान्ती ब्रह्म मानते हैं। यह बिल्कुल स्पष्ट कहा जा रहा है। आपको यहाँ यह भी कहना चाहिये था कि 'इदन्ता' पद से ब्रह्म की उपासना के मार्ग की ओर सङ्केत कैसे नहीं किया जा सकता है; क्योंकि वेद और उपनिषदों के प्रवचनों से ब्रह्म का उपदेश किया ही गया है। यह कहना कि 'वहाँ शब्द की प्रवृत्ति नहीं हो सकती, अतः संस्कृत और असंस्कृत वाणी का यह सर्वथा अविषय ही है' यह कथन भी 'यतो वाचो निवर्तन्ते' का अभिप्राय न समझने के कारण है। 'यद् वाचाऽनभ्युदितम्०' यहाँ पर शब्द है, 'अनभ्युदितम्', इसका अभिप्राय है कि ब्रह्म अभिलक्षित करके व्यक्त वाणी का समुच्चारण नहीं किया जा सकता। 'वेद व्यक्तायां वाचि' धातु से 'उदित' शब्द बना है। सर्व शास्त्र तो शब्दमय (वाङ्मय) हैं, वे उसके सम्पूर्ण स्वरूप का व्याख्यान तो नहीं कर सकते, पर क्योंकि वह रस तो आत्मानुभूति या आस्वादन का ही है। वे शास्त्र मार्ग का निर्देश तो करते ही हैं; क्योंकि सर्ववेदवेद्य वही है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वागपि नाम चतुर्विधा, तत्र या ज्ञानेन्द्रियसहकृता नाम ततो निवर्तते, परं चतुर्थी पराविद्यारूपिणी वाक् तु तदक्षरं गमयत्येव। यथा च स्वयमपि—'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादि पूर्वपक्षं व्यर्थं विधाय 'लौकिकाध्यारोपापोहार्थत्वात्' इति समाधाय मुधैव च परिश्रान्तः।

यदाह—'नाऽत्र मूर्तिपूजानिषेधगन्धोऽपीति', तन्महाशय! प्राप्तौ सत्यामेव निषेधापत्तिः। यदा च अशास्त्रीयमूर्तिपूजायाः सर्वथाऽसम्भावनैव, तदा निषेधस्यावश्यकतैव क्व? परं ये साहित्यस्य व्यञ्जनां ध्वननशक्तिं चाऽभिजानते, तेऽवगन्तुमर्हन्ति यद् यदा तद् ब्रह्म अरूपमस्ति तर्हि तस्य मूर्तेः कल्पनं सिकतायास्तैलनिष्कासनमिवैव।

यदाह—'वाणी ज्ञानस्य कार्यं जीवात्मनः' तदसङ्गतम्। नह्यत्र ब्रह्मणा वाणी अधीयते, अपि तु ब्रह्मद्वाराऽऽदौ वेदरूपा वाणी विदिताऽऽसीत्, सर्वविद्यत्वात् तस्य। तत्तु सर्वज्ञं ब्रह्मातः सर्वेषां वाण्यादिकं सर्वं जानीते स्वभावतः, यदर्थं जीवात्मा प्रयासं कुरुते। प्रत्यगात्मनस्तु ब्रह्मत्वाभ्युपपत्तिस्तु प्रागेव खण्डिता।

आप 'वाचा' का अर्थ केवल ताल्वाद्यभिघातजन्य ही समझ रहे हैं। पर आपको जानना चाहिये कि 'अप्राप्य मनसा सह' के ऊपर भी विज्ञान बनी परावाणी उसके समीप तक पहुँचाती ही है। 'योऽयं वृणुते तेन लभ्यः' इस वरण करने की स्थिति तक परा विद्या पहुँचाती है। स्वयं 'सब वेदों से मैं वेद्य हूँ' इत्यादि को पूर्वपक्ष बनाकर लौकिक अध्यारोप और अपोहार्थ मानकर समाधान करने में व्यर्थ परिश्रम किया। दैवी या दिव्य सम्पत्ति प्राप्त हो जाती है, जो कि अलौकिक है, वह गुरूपदिष्ट मार्ग पर सतत अभ्यास से मिल ही जाती है।

यह कहना कि यहाँ पर मूर्तिपूजा-निषेध का गन्ध भी नहीं है, सो महाशय! जब मूर्ति उस ईश्वर की है ही नहीं, तो उसकी पूजा ही कहाँ और फिर उसके निषेध की बात भी सत्यग्रन्थों में क्योंकर हो सकती है? पर जो साहित्य की व्यञ्जना या ध्वनन शक्ति से अभिज्ञ हैं, वे समझ सकते हैं कि जब वह ब्रह्म अरूप है, तो उसकी मूर्ति की कल्पना करना बालू से तेल निकालना है।

यह कहना कि 'वाणी जानने का काम तो जीवात्मा का है' यह कथन भी असङ्गत है; क्योंकि यहाँ पर ऋषि दयानन्द जीवात्मा द्वारा वाणी जानने या सीखने का निषेध नहीं कर रहे हैं, प्रत्युत ऋषि का अभिप्राय यह है कि वह सर्वज्ञ 'वयुनानि विद्वान्' अर्थात् हमारे शारीरिक, वाचिक और मानसिक कर्मों को जानता है। अल्पज्ञ जीवात्मा जानने के लिये प्रयास करता है, पर स्वभावतः नहीं जानता। जीव के ब्रह्म होनेवाली बात तो पूर्व ही खण्डित की जा चुकी है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिणेह 'नेदं यदिदमुपासते' तदा उपासकाः किमुपासते, इति निःसर्गोद्भूतप्रश्नस्य समाधानं श्रुतिमूलकमेव प्रस्तुतम्। यथा—'किन्तु विद्वांसो निराकारम्, सर्वव्यापकम्, अजम्, सर्वनियन्तृ, सच्चिदानन्दादिलक्षणं ब्रह्मोपासते।' तत्र च प्रत्येकस्य प्रमाणम्—'ततु समन्वयात्' (वेदा० १। १। ४) इत्यत्र तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यम्। न चात्यन्तविरुद्धधर्मौ साकारनिराकारौ एकत्र स्थातुमर्हतः। यथा रात्रिर्दिवं च। (शाङ्करम्) । 'स ओतः प्रोतश्च विभुः प्रजासु' (यजुः० ३२। ८) इत्यनेन सर्वव्यापकम्, 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः' इति अजम्, 'तस्मिन् ह तस्थुर्भुवनानि विश्वा' (यजुः० ३१। १९) इति सर्वनियन्तृ, सच्चिदानन्दादिलक्षणं चापि ब्रह्मेति निखिलं प्रशस्तम्।

इदं कथनं यत्—"यद् वाचाऽनभ्युदितम्' इत्यादौ मूर्तिपूजानिषेधगन्धोऽपि नास्ति।" अत्रोच्यते—वेदेषु रोज़ा-नमाज़-वपतिस्मादीनां निषेधस्य गन्धोऽपि नास्ति, परं न कश्चित् पौराणिको रोज़ां रक्षति, न नमाज़ं कुरुते, न वपतिस्मां गृह्णाति नाभिनन्दति च, अवैदिक-

---

'यद् वाचा०' में कहा गया है कि 'इस प्रत्यक्ष मूर्तिमान् जगत् को लोग ब्रह्म मानकर उपासना करते हैं, वह ब्रह्म नहीं है।' तो स्वभावतः प्रश्न उठता है कि फिर ब्रह्म क्या है ? इस का उत्तर जो ध्वनितार्थ होता है, उसको महर्षि स्पष्ट करते हैं कि 'ब्रह्म निराकार, सर्वव्यापक, अज, सर्वनियन्ता, सच्चिदानन्द आदि लक्षणों से युक्त है, वह उपास्य है, जिसकी विद्वान् लोग उपासना करते हैं।' आप कहते हैं कि निराकार आदि कहने में श्रुतिमूलकता नहीं है, यह कथन अभिधाधी का ही हो सकता है। इस श्रुति का ध्वनित भावार्थ अतापस को प्रत्यक्ष नहीं होता। इस ध्वनन की सम्पुष्टि में प्रमाण लीजिये—'ततु समन्वयात्' (वेदा० १।१।४)। इस सूत्र की शङ्कराचार्य व्याख्या करते हैं कि 'इसलिये एवंजातीयक वाक्यों में निराकार ब्रह्म का ही निश्चय करना चाहिये। अत्यन्त विरुद्ध धर्म कभी एक स्थान पर नहीं रह सकते। अतः ईश्वर साकार और निराकार दोनों नहीं हो सकता। जैसे रात और दिन या अन्धकार और प्रकाश।' 'वह विभु (सर्वव्यापक) समस्त प्रजाओं में ओतप्रोत है' (यजुः० ३२।८), 'वह दिव्य अमूर्त पुरुष बाहर भीतर सर्वत्र वर्तमान होते हुए अज (अजन्मा) है', 'उसी में सारे लोकलोकान्तर स्थित हैं' (यजुः० ३१।१९) अर्थात् वह सबका नियन्ता है और सच्चिदानन्दलक्षणस्वरूप 'आनन्दमयोऽभ्यासात्' आदि से सिद्ध है। अतः ऋषि का समस्त कथन अतितराम् प्रशस्त है।

यह कहना कि "यद् वाचाऽनभ्युदितम्' आदि में कहीं मूर्तिपूजा के निषेध की गन्ध भी नहीं है" इस पर हमारा कहना है कि वेदों में रोज़ा, नमाज़, वपतिस्मा आदि का भी कहीं निषेध नहीं है, किन्तु कोई भी पौराणिक रोज़ा रखना, नमाज़ पढ़ना या वपतिस्मा लेना पसन्द न करेगा; क्योंकि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

त्वान्म्लेच्छानार्याचरितत्वाच्च। एवमेव मूर्तिपूजाया वेदाऽविहितत्वान्नार्याणां धर्मः, प्रत्युत अकार्यं तथा व्यर्थम्। यथा कश्चिज्जनः स्ववस्त्राण्यास्फाट्य पौनःपुन्येन सीव्येत्, अथवा स्वश्मश्रुबालमुत्पाट्य सहस्रखण्डानि विदधीत। ईदृगाचरणं नापराधस्तथाऽपि समयस्य दुरुपयोगस्त्वस्त्येव। तथैव मूर्तिपूजायां समयसम्पदोश्च दुरुपयोगः।

भवान् ऋषिदयानन्दन्त्वाक्षिपति 'इदन्ता' वर्णनेनानन्तस्य, यावत् स्वयं हि मूर्तिमादाय वक्ति—'अयं हि भगवान्', एवं तदनन्तताया अपरिमितताश्च न्यक्कारं कुरुते। मूर्तिः सृष्टेर्भवितुमर्हति न तु स्रष्टुः। मूर्तिर्नाम भवता पूज्यते, परमीश्वरस्य पूजा नैव, प्रत्युत ज्ञानं क्रियते।

. पृ० १६१९, पं० ११—यदत्राह—"प्रतिमानां च भेदकः' इत्यादिमनुवचनानुसारं देवतानां मन्दिराणि देवतानां पूजनं च सिद्ध्यन्ति।" इति ब्रुवतो ब्रुडतोऽस्य शैवालावलम्बनम्। महर्षिप्रस्तुतस्य 'प्रतिमा' शब्देन रक्तिकामापसेटकादीनि तोलनसाधनानि गृह्यन्ते, इत्याद्यात्मकस्य समाधानस्य खण्डनं कर्तुं नाक्षमिष्ट। देवता मनुष्यजातिभिन्ना जडाः सूर्यादयोऽपि भवन्तीति विद्वद्भिरार्यैरपि स्वीक्रियते।

ये अवैदिक कृत्य हैं, म्लेच्छ तथा अनार्यों के आचरण हैं। ठीक इसी प्रकार मूर्तिपूजा भी वैदिक विधि न होने से आर्यों का धर्म नहीं है। पर यह अकार्य है अर्थात् एक ऐसा ही व्यर्थ कार्य है जैसे कोई मनुष्य अपने कपड़े फाड़-फाड़ कर फिर-फिर सिलता रहे, या अपनी मूछ के बाल उखाड़े और उसके हज़ार टुकड़े करता रहे। ऐसा करना कोई जुर्म या अपराध नहीं है, मगर समय की बर्बादी है। इसी प्रकार मूर्तिपूजा में समय और धन की बर्बादी है।

आप ऋषि दयानन्द पर 'इदन्ता' कहने का आरोप लगा रहे हैं, जबकि स्वयं ही उसकी मूर्ति बनाकर 'यह भगवान् रहा' ऐसा कहकर उसकी अनन्तता और अपरिमितता का अपमान कर रहे हैं। मूर्ति सृष्टि की बन सकती है, स्रष्टा की नहीं। आप मूर्तिपूजा करते हैं, पर ईश्वर की पूजा नहीं होती, उसका ज्ञान होता है।

पृ० १६१९, पं० ११—"प्रतिमानां च भेदकः' आदि इन उद्धृत मनु के वचनों से देवताओं के मन्दिरों और उनकी पूजाविधि की सत्ता सिद्ध हो जाती है।" यह कहना तो अथाह जल में डूबते हुए का शैवाल (सिवार, जलकाई) पकड़ना ही समझिये। महर्षि ने यह कहा है कि 'प्रतिमा शब्द से रत्ती, सेर आदि तोलने के साधन गृहीत होते हैं' इस समाधान का काट करने में तो यह सर्वथा असमर्थ है। जब तक प्रतिमा शब्द मूर्तिवाचक सिद्ध नहीं होता, तब तक मूर्तिपूजा की जल्पना वन्ध्यापुत्र का राजतिलक करना है। यह हम पूर्व ही सप्रमाण सिद्ध कर चुके हैं कि विद्वान् चेतन देव हैं और जड़ सूर्यादि हैं, जैसाकि आर्य विद्वान् स्वीकार करते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ननु केवलनिराकारस्येश्वरस्य कस्यचिदपि रूपस्याकल्पितत्वाद् ध्यानमेव न सम्भवतीति चेन्न, तस्य चित्तवृत्तिनिरोधे सति योगिनां प्रत्यक्षत्वात्। यथा हि नाड्या रोग-परीक्षको भिषग् यत्र 'करो वक्ता करः श्रोता मुखं च श्रवणं विना' शरीरमनसोर्गुप्तरोगं वेत्ति।

न च इदन्ताविषयमनापन्नस्य सर्वज्ञसर्वव्यापकसच्चिदानन्दादिलक्षणं सन्देहजनकत्वात् खण्डनीयमेव स्यादिति वाच्यम्, यतः—

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्,
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्,
दिष्टं कर्मविपाकमन्दमतितां को वापनेतुं क्षमः॥

प्रश्न—केवल निराकार मानकर किसी रूप की कल्पना न करने से उसका ध्यान करना ही सम्भव नहीं हो सकता, अतः मूर्ति की कल्पना की गयी है।

उत्तर—चित्तवृत्ति के निरोध होने पर ही योगी लोग उस ईश्वर का साक्षात्कार करते हैं। मूर्ति आदि में चित्त का लगाना चित्त की वृत्तियों का कार्य करते रहना हुआ। मूर्ति तो विषय है, जबकि ध्यान की परिभाषा है—'ध्यानं निर्विषयं मनः' मन को बाह्य विषयों से निरुद्ध कर लेना। योगी को उसके देखने के लिये इन्द्रियों की आवश्यकता नहीं रहती। जैसे नाड़ी के द्वारा रोगों की परीक्षा करनेवाला वैद्य, रोगी के हाथ के कथन को अपने हाथ से सुनता और समझ लेता है। वहाँ बाह्य मुख और कान की आवश्यकता ही नहीं पड़ती, शरीर और मन के रोगों को समझ लेता है।

प्रश्न—जब ब्रह्म 'इदन्ताविषय' नहीं है, तो सर्वज्ञ, सर्वव्यापक, सच्चिदानन्द आदि लक्षण भी सन्देहजनक होने से खण्डनीय ही हैं।

उत्तर—यह कहना उचित व युक्तियुक्त नहीं; क्योंकि 'वह ब्रह्म सर्वज्ञादि कुछ नहीं है' यह कथन तो बुद्धिबाह्य तथा अशास्त्रीय होगा। सच है—

'वसन्त आने पर भी अन्य लहलहाते वृक्षों की भाँति यदि करीर पर पत्ते नहीं हुए, तो इसमें वसन्त का क्या दोष है? उलूक को यदि दिन में नहीं दीखता, तो इसमें सूर्य का क्या अपराध है? वर्षा ऋतु में भी यदि चातक के मुख में मेघ द्वारा जलधाराएँ नहीं पहुँच पातीं, तो इसमें मेघ का कोई दोष नहीं। भाग्य तथा पूर्व कर्मविपाक से प्राप्त मन्दमति को कौन दूर कर सकता है?'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अतारतारलब्धव्योदन्तप्रक्रियां तु तद्विद्याविदुर एव वेदयितुं समर्थो यत् कथङ्कारमकूपारपारादधिगम्यन्ते वृत्तानि। योगसाधनाप्राप्यपरमात्मस्वरूपम् 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसम्' (कठ० ३। १५) इति प्रतिपाद्यं समाधिनिर्धूतमलचेतसः सचेतसो योगिन एव विदन्ति। नास्तिकताकलुषात्मानस्तु सर्वदा संशीत्यामेवोपशेरते।

न चाऽपि 'आत्मैवेदमग्र आसीत् पुरुषविधः' इत्युक्तिमनुसन्धाय एतदुद्भूतजगदुत्पत्तेः प्रागात्मैवासीन्मनुष्यविधाकारे इति साकारत्वमुपनतं तदेव च ज्ञातुं शक्यतेऽतस्तन्मूर्तिभावे का विप्रतिपत्तिरिति वाच्यम्, तत्र 'प्रकृतिः स्त्रीरूपा' अतोऽलङ्काररूपेण परमात्मनः पुरुषत्वेन निरूपणमस्ति। पुरुषः परमात्मा तु सृष्टेः पूर्वमपि एकरसो व्यापकश्चासीत्, विकृतिस्तु प्रकृतावेव। तत्साधकानि तु 'आत्मैवेदम्०' इत्यात्मकान्येव वाक्यानि प्रमाणानि। शङ्कराचार्यो भाष्ये तथैव प्रत्यपादयत्—

"इतराणि तु आकारवद् ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि उपासनाविधिप्रधानानि तानि। तेष्वसति विरोधे यथाश्रुतमवनमयितव्यम्। उभयीष्वपि श्रुतिषु अनाकारमेव ब्रह्मावधार्यते" इति।

बेतार के तार से आनेवाले समाचार की प्रक्रिया को तारविद्या के जाननेवाले ही बताने में समर्थ हैं कि समुद्र के पार से समाचार कैसे आते हैं। इसी प्रकार योग की साधना से प्राप्त करनेयोग्य परमात्मा के स्वरूप को, जैसाकि कठोपनिषद् में प्रतिपादित है कि 'वह अशब्द, अस्पर्श, अरूप, अव्यय तथा अरस है', उसे तो समाधि में प्राप्त निर्मल चित्त से ही ज्ञानी योगी लोग ही जानते हैं। नास्तिकता से कलुषित आत्मावाले तो सदा संशय में ही रहते हैं।

शङ्का—'आत्मैवेदमग्र आसीत् पुरुषविधः' इस उक्ति के अनुसार इस उद्भूत जगत् की उत्पत्ति से पूर्व वह पुरुषविध आकार में आत्मा ही था। इससे साकारता सिद्ध हो गयी और उस साकार को जान भी सकता है, अतः उस ब्रह्म की मूर्ति होने में कोई सन्देह नहीं रहा।

समाधान—शास्त्र में प्रकृति को स्त्रीरूप और ब्रह्म को पुरुषरूप में वर्णित करना आलङ्कारिक है। पुरुष परमात्मा सृष्टि बनाने से पूर्व भी एकरस और व्यापक था। विकार तो प्रकृति में ही होता है परमात्मा में नहीं। इसके साधक 'आत्मैवासीत्०' आदि वाक्य ही हैं। शङ्कराचार्य जी ने अपने भाष्य में ऐसा ही प्रतिपादन किया है—

"इतर तो आकारप्रतिपादक ब्रह्मविषयक वाक्य हैं, वे उपासनाविधिप्रधान ही हैं। उन वाक्यों को श्रुतिविरोध का परिहार करते हुए घटा लेना चाहिये। दोनों ही प्रकार की इन श्रुतियों से निराकार ही ब्रह्म का निश्चय होता है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्यप्येतस्मिन् साकाररागालापनं दुराग्रह एव। देवीभागवतेऽपि ते पुराणे (स्कं० ४, अ० १३१, श्लो० १५) प्रत्यक्षमाक्षेपः साकारतायाम्—

किं विष्णुः किं शिवो ब्रह्मा, मघवा किं बृहस्पतिः।
देहवान् प्रभवत्येव, विकारैः संयुतस्तदा॥

इदमेव च ऋषिर्दयानन्दः प्रवक्ति सत्यार्थप्रकाशे—'साकारः शीतोष्णक्षुधा-तृषारोगदोषछेदनभेदनादिभी रहितो भवितुं नार्हति।' एवं शङ्करो मूलशङ्कर उभावपि निश्चितरूपेण निराकारमेव ब्रह्म मन्वाते।

ननूपर्येव विभुकालस्य पलघटिकादिखण्डेषु सत्स्वपि निराकारत्वमखण्डितमेव, एवमेव व्यापकस्येश्वरस्यावतारे सत्यपि विभिन्नमूर्तिषु पूजितस्य कथङ्कारं खण्डानि प्रसज्यन्ते? इति चेन्न, यथा हि कालस्य कल्पितखण्डेषु तन्निराकारत्वं न विहन्यते न वाऽपि कल्पनया मूर्तिमत्ता साकारताऽऽपाद्यते, तथैव निराकारस्य परमात्मनो विभिन्नखण्डकल्पनायामपि कथमपि न मूर्तिमत्ता भवितुं शक्यते।

इसके होते हुए आपका साकार-साकार ब्रह्म की रट लगाना दुराग्रहमात्र है। आपके देवीभागवतपुराण (स्कं० ४, अ० १३१, श्लो० १५) में साकारता पर प्रत्यक्ष आक्षेप किया है—

'क्या विष्णु, शिव, ब्रह्म, मघवा, बृहस्पति ये देहधारी हो सकते हैं, कदापि नहीं। यदि ये देहधारी माने जायें तो विकारों से युक्त मानना पड़ेगा।'

बस यही बात ऋषि दयानन्द अपने सत्यार्थप्रकाश में कहते हैं कि—'साकार शीत, उष्ण, भूख, प्यास, रोग, दोष, छेदन, भेदन आदि से रहित नहीं हो सकता।' इस प्रकार शङ्कर और मूलशङ्कर दोनों ही निश्चितरूप से ब्रह्म को निराकार ही मानते हैं।

शङ्का—अभी ऊपर ही व्यापक काल के पल, घड़ी, मुहूर्त आदि खण्ड होने पर भी काल का निराकारत्व अखण्डित ही रहा, इसी प्रकार व्यापक ईश्वर के अवतार लेने पर भी विभिन्न मूर्तियों में पूजित होने पर भी उसके भी खण्ड क्योंकर माने जायेंगे?

समाधान—भाई! जैसे आपने इष्ट काल के कल्पित खण्ड कर लिये और काल की अखण्डता और निराकारता में कोई अन्तर नहीं आया, परन्तु उस प्रकार ब्रह्म की मूर्तिमत्ता और साकारता कल्पना से नहीं बनती; क्योंकि आप मान नहीं सकते कि हमने साकार होने की काल के समान कार्य चलाने के लिये कल्पना कर ली है, वस्तुतः तो वह निराकार ही है। यदि ऐसा मानने लगोगे तो निराकार परमात्मा की विभिन्न खण्डकल्पना कर लेने पर भी मूर्तिमत्ता की वास्तविकता तो समाप्त हो जायेगी।

©Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ननु परमात्मा यदा सर्वव्यापकस्तदा व्याप्यां मूर्तिं व्यापक ईश्वरो न क्षणमपि त्यक्ष्यति, अतो मूर्तिपूजा सिद्धेति चेन्न, तत्र पृच्छामि भवन्तं यद् भवान् व्याप्यां मूर्तिं पूजयितुकामो व्यापकं वा परेशम्? अथ च परेशं तदा कथं मूर्तिपूजा? अपरं च य आत्मा परेशं साक्षात्कर्तुं कामयते नाऽसौ मूर्तौ विद्यते। यत्र हृदये व्यापको व्याप्यश्च जीवात्मा उभावपि स्तः, तत्रैवोपास्योऽसौ।

न च अखण्डविभुकालस्य संवत्सरायनमासादिखण्डत्वे दिनरात्रिविभागपरिज्ञानायानेककालमूर्तयो घटिकारूपे आविष्कृताः, किं घटिकामूर्तिभिः कालज्ञानं न भवति यदेतन्नादकाल एषः? तथा परमात्मनोऽपि मूर्तयः कल्प्यन्तामिति वाच्यम्, परमात्मना स्वयमेव सूर्यचन्द्रादिसमयचक्राणि स्वमहिमाऽऽख्यापकानि यन्त्राणि विरचितानि, तानि समवलोक्यैव ईश्वरस्य जगत्कर्तुर्महाशक्तिशालिता विशालब्रह्माण्डान्तर्बहिर्व्यापकता चावगम्यते। कुशलकारुविरचितपाषाणमूर्तिभिस्तु तन्निर्मातॄणामेव नैपुण्यं प्रकाशितं भवति न तु प्रभोरेकतमस्य गुणस्य प्रद्योतनं जायते।

प्रश्न—जब परमात्मा व्यापक है तो व्याप्य मूर्ति से क्षणभर को भी वह पृथक् नहीं हो सकता, अतः मूर्तिपूजा है।

उत्तर—इस पर मैं आप से पूछता हूँ कि आप व्याप्य की पूजा करना चाहते हैं या व्यापक की? निश्चय ही व्यापक प्रभु की पूजा करना चाहेंगे। दूसरे जो आत्मा प्रभु की साक्षात्कार करना चाहता है, वह मूर्ति में तो विद्यमान है नहीं। पर हृदय में व्याप्य जीवात्मा और व्यापक परमात्मा दोनों ही विद्यमान हैं, अतः उसकी उपासना हृदय में ही करनी चाहिये, वहीं साक्षात्कार हो सकता है।

शङ्का—वाह! यह भी आपने खूब कहा! अखण्ड व्यापक काल के संवत्सर, अयन, ऋतु, मास, दिन आदि खण्ड कर लेने पर भी दिन-रात के विभाग-परिज्ञान के लिये अनेक कालमूर्तियाँ घड़ीरूप में आविष्कृत कर ली हैं, क्या इन घड़ी की मूर्तियों से कालज्ञान नहीं होता है, कि इस समय इतने बजे हैं? उसी प्रकार परमात्मा की भी मूर्तियाँ मान लीजिये।

समाधान—महोदय परमात्मा ने तो स्वयं ही समय की सत्ता व ज्ञानबोधक घड़ियों के समान अपनी महिमा का बखान करनेवाले सूर्य चन्द्रमा आदि समयचक्र-यन्त्र बना दिये हैं। उनको ही देखकर जगत्कर्ता ईश्वर की महती शक्तिशालिता और विशाल ब्रह्माण्ड के अन्दर और बाहर व्यापकता का बोधन होता है। रचित वस्तु अपने रचयिता की याद दिलाती है। इसी प्रकार कुशल मूर्तिकार शिल्पी द्वारा निर्मित पत्थर की मूर्तियों से भी उन मूर्ति-निर्माताओं के ही नैपुण्य का प्रकाशन होगा, न कि प्रभु के किसी गुण का प्रख्यापन होगा।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यथाऽऽकाशव्यापकनिराकारशब्दज्ञानाय वर्णपदवाक्यादिकल्पना शास्त्रीया कृता, तथैवेश्वरप्राप्त्यर्थं योगिभिर्यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिविधानमाकल्पितम्।

यद्युच्येत यथा न वर्णादिकल्पनया शब्दस्वरूपे काऽपि विकृतिरुपगता, तथैवावतारादिसाकारकल्पनायां परमात्मव्यापकस्य रूपेऽपि न काचिद् हानिः, एवमावयोर्मान्यतासामञ्जस्यमपि। तदुच्यते, नहि कश्चिदपि वर्णसमाम्नायवानभिमन्यते यत् समस्तो हि शब्द एतेष्वक्षरेषु समाविष्टः, परं भवद्भिरवतारवादिभिः 'अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति षोडशकलापूर्णोऽवतारो घोष्यते शिष्टश्च संसारो ब्रह्मणः सत्ताया रिक्तोऽवशिष्टः।

प्रश्नः—परं महाशय! यदि व्यापकैकात्मकशब्दब्रह्मणि वर्णपदवाक्यादिकल्पना नाऽभविष्यत् तदा किं मानवो विद्वान् भवितुं तदनधीत्य समर्थोऽभविष्यत्?

उ०—सत्यम्, यदि परमात्मा स्वानन्तमहिमद्योतकान् सूर्यादिपदार्थान् नास्रक्ष्यत् तदा शब्दप्रमाणमनङ्गीकुर्वतां नास्तिकानां समक्षे ईश्वरसिद्धिकरणेऽपि काठिन्यमापत्स्यत।

जिस प्रकार आकाश में व्यापक निराकार शब्द के ज्ञान के लिये वर्ण, पद, वाक्यादि की कल्पना शास्त्रसम्मत है, उसी प्रकार ईश्वर की प्राप्ति के लिये योगियों ने यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि का कथन किया है।

यदि यह कहा जाये कि जैसे वर्ण आदि की कल्पना से शब्द के स्वरूप में कोई विकृति नहीं आयी, उसी प्रकार अवतार आदि साकार की कल्पना में परमात्मा के व्यापक स्वरूप में भी कोई हानि नहीं होगी और इसमें हम दोनों के विचारों और मान्यता में सामञ्जस्य भी हो जायेगा। इस पर हमें यह कहना है कि कोई भी वर्णसमाम्नायज्ञाता ऐसा अभिमान नहीं करता कि समस्त शब्द गुण ही इन अक्षरों में समाविष्ट हैं। परन्तु अवतारवादी आप लोग अन्यों को अंशकला से और कृष्ण को षोडश कलाओं अर्थात् सम्पूर्ण रूप से ही अवतार मानते हैं, तब तो सारा संसार प्रभुसत्ता से रिक्त ही मानना पड़ेगा।

प्रश्न—किन्तु महाशय! यदि व्यापक एकात्मक शब्दब्रह्म में वर्ण, पदादि की कल्पना नहीं होती, तो क्या मानव उसको बिना पढ़े विद्वान् हो जाता?

उत्तर—बिल्कुल ठीक, यदि परमात्मा अपनी महिमा को बतानेवाले सूर्य चन्द्र आदि पदार्थों को नहीं बनाता, तो शब्दप्रमाण को स्वीकृत न करनेवाले नास्तिकों के समक्ष ईश्वरसिद्धि करने में कठिनता आ पड़ी होती।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्र०—तदाऽऽर्याणामेषोऽभिप्रायो यन्मन्दिरेभ्यो मूर्तीनां बहिष्कारो विधेलिमः। अथ श्रीरामकृष्णादीनामपि मूर्तयो न स्थापनीया न वाऽपि तेषां चित्राणि, कथन्तर्हि स्वामिदयानन्दचित्राणि समभिनन्द्यन्ते रक्ष्यन्ते च?

उ०—न तत्र भवद्भिरार्य-सिद्धान्तोऽधिगतः सम्यक्। नास्माकमान्दोलनं मृत्तिका-मन्दिरेभ्यो बहिष्कर्तुं ता मूर्तीः, अपितु मनोमन्दिरेभ्योऽस्ति बहिष्कर्तुम्। अस्माकं शिवरामादि-मूर्तिचित्ररक्षणे न काप्यापत्तिः, परं तेषां मनुष्यशरीरधारिणां भगवानिति मत्वाऽर्चनामनुचितां चर्चयामस्तत्प्रार्थनायाचने चाऽपि नोचिते। अज्ञानपरिणामिनी हि मूर्तिपूजा, तन्मूलमुन्मूलयितुं प्रयतामहे। मूर्तिभञ्जका यवना अपि न स्वमनसो मूर्तिपूजां निरसारयन्, परिणामे शवक्वावरपरास्ते।

ननु पाणिनेः 'जीविकार्थे चापण्ये' (अष्टा० ५।३।९९) इति सूत्रे "यास्त्वेताः सम्प्रति पूजार्थास्तासु भविष्यति" इत्यर्थे कनो लुकि (महाभाष्यम्) "देवलकादीनां जीविकार्था देव-

---

प्रश्न—तो आर्यों का यह अभिप्राय है कि मन्दिरों से मूर्तियों का बहिष्कार कर देना चाहिये। तब श्रीराम कृष्ण आदि की मूर्तियाँ भी स्थापित नहीं करनी चाहिये और न उनके चित्र रखे जावें। तो फिर आप लोग स्वामी दयानन्द के चित्रों का अभिनन्दन क्यों करते हैं और क्यों रखते हैं?

उत्तर—इस प्रश्न से ज्ञात होता है कि आपने आर्यों के सिद्धान्त को ठीक-ठीक नहीं समझा है। हमारा आन्दोलन व प्रयास इन मिट्टी के मन्दिरों से मूर्ति बाहर करने का नहीं है, प्रत्युत हम आपके मन-मन्दिरों में बसी ईश्वर के स्थानापन्न कल्पित इन मूर्तियों की उपास्यता को बाहर निकालना चाहते हैं। हमें इन पूज्य महापुरुषों के चित्र रखने में कोई आपत्ति नहीं है। परन्तु उन मनुष्यशरीरधारियों को परब्रह्म भगवान् मानकर उपासना करने को हम अयुक्त व अशास्त्रीय मानते हैं और मानते हैं कि उन जड़ चित्रों से प्रार्थना व याचना नहीं करनी चाहिये। इस अज्ञानपरिणामिनी मूर्तिपूजा का हम समूल उन्मूलन करना चाहते हैं। उसी के लिये प्रयास कर रहे हैं। मूर्तिभञ्जक यवनों ने भी हमारे पूज्य पूर्वज रामकृष्ण आदि की बाहर की मूर्तियाँ तोड़ीं, परन्तु मुर्दाकब्रपरस्ती को वे अपने मनों से नहीं निकाल पाये। और परमात्मा के स्थान पर कब्रों की और ज़्यारत की पूजा कर रहे हैं।

शङ्का—महर्षि पाणिनि के 'जीविकार्थे चापण्ये' (अष्टा० ५।३।९९) सूत्र से स्पष्ट है कि मूर्तियाँ दो प्रकार की होती थीं। एक जीविकार्थ—जो बेची नहीं जाती थीं, दूसरी जो पूजार्थ नहीं थीं, केवल बेचने के लिये बनती थीं। तो जीविकार्थ में शिव की राम की या कृष्ण की प्रतिकृति

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रतिकृतय उच्यन्ते" (काशिका) इत्यादिप्रमाणैर्मूर्तिपूजा सिध्यतीति चेन्, न च पाणिनिसूत्रं मूर्तिपूजाविधायकम्, तत्र प्रचलितप्रथायाः प्रकाशनाद् भाष्यकारस्य च 'सम्प्रति' शब्देन स्पष्टं प्रतिपादितत्वात्। काशिकयाऽपि प्रमाणितं यदर्चकैर्देवमूर्तयो जीविकार्थे कल्पिता आसन् न तु परमात्मज्ञानाय।

पृ० १६२०, पं० ३—पू०प०—यदाह—"संस्कारविधौ १९४ पृष्ठे तथा सामाजिकानां सन्ध्यायामपि प्राची दिगग्निरधिपतिरित्यादिभिर्मनसेश्वरपरिक्रमणं विहितम्। मूर्तिमन्तरा मानसमपि तत्कथं सम्भवति? उलूखलमुसलाभ्यां नैवेद्यनिवेदनं किं मूर्तिपूजनं भवति न वा? आर्याभिविनये—'वायवायाहि दर्शतेमे सोमा अरङ्कृताः। तेषां पाहि श्रुधी हवम्' (ऋ० सं० १। २। १) इति मन्त्रेण परेशाय सोमवल्ल्यादिरसः समर्प्यते। 'घृतेन सीता मधुना समज्यताम्०' इत्यत्र क्षेत्रसमीकरणकाष्ठपट्टपूजनं मूर्तिपूजनमेव। सिक्खमतखण्डनप्रसङ्गे

भी शिव, राम या कृष्ण संज्ञा से ही व्यवहृत होती थी और बेची जानेवाली मूर्तियाँ 'शिवकः, रामकः या कृष्णकः' संज्ञा से व्यवहृत होती थीं। इसी सूत्र पर महाभाष्यकार भगवान् पतञ्जलि ने लिखा है कि—"जो मूर्तियाँ सम्प्रति पूजा के लिये मन्दिरों में स्थापित की जाती हैं, वे जीविकार्थ हैं। इन में कन् प्रत्यय का लुक् हो जायेगा।" काशिकाकार ने भी लिखा है कि—"पुजारी आदि की जीविका के लिये स्थापित शिवादि देवों की मूर्तियाँ यहाँ कही गयी हैं।" इन प्रमाणों से भी मूर्तिपूजा सिद्ध है। फिर आप कैसे खण्डन करते हैं?

समाधान—आपने व्याकरण के इन स्थलों को ठीक-ठीक नहीं समझा। पाणिनि के सूत्र में मूर्तिपूजा का विधान कहाँ है? इसमें तो तात्कालिक समाज में मूर्ति बनायी जाने लगी थीं, इस तथ्य का प्रकाशन हो रहा है। पाणिनि मुनि आदि अपनी ओर से विधान करते तो 'पूजार्थे चाऽपण्ये' सूत्र लिखते। इसी भाव को महाभाष्यकार के 'सम्प्रति' अर्थात् 'इस समय' शब्द ने खोल दिया। काशिकाकार भी स्पष्ट करते हैं कि पुजारियों ने जीविका के लिये देव (राजा आदि) की मूर्तियाँ बनायी थीं। परमात्मा के ज्ञान के लिये ये मूर्तियाँ नहीं थीं।

पृ० १६२०, पं० ३—पूर्वपक्ष—"संस्कारविधि के १९४ पृष्ठ पर तथा आर्यसमाजियों की सन्ध्याविधि में भी 'प्राची दिगग्निरधिपतिः' आदि मन्त्रों से मन से ईश्वर की परिक्रमा का विधान किया हुआ है। भगवान् की मूर्ति को माने बिना मानस परिक्रमा भी कैसे हो सकती है? ऊखली और मूसल को नैवेद्य चढ़ाना क्या मूर्तिपूजा नहीं है? इसी तरह से आर्याभिविनय ग्रन्थ में 'वायवायाहि दर्शतेमे०' इस मन्त्र का उच्चारण करते हुए परमेश्वर के लिये सोमलता के रस को समर्पित करने की बात कही गयी है। 'घृतेन सीता मधुना०' आदि मन्त्र की व्याख्या करते हुए जो कहा गया है, उससे खेत को समतल करनेवाले 'पटेला' काठ की पूजा क्या मूर्तिपूजा नहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दयानन्देन सत्यार्थप्रकाशे स्पष्टमुक्तम्—"कस्यचिदपि जडस्य समर्थनं शिरोनमनमञ्जलिबन्धनं मूर्तिपूजनमेव।"

उ० प०—इदमपि सर्वं परिवर्त्य छलेन प्रस्तूयते। नैव 'मनसा परिक्रमा' मन्त्रेषु क्वाऽपि ईश्वरस्य परिक्रमणं कथ्यते मन्यते वापि।'प्राची०' इत्यादिमन्त्राणामुपरि लिखितम्—"निम्नलिखित मन्त्रों से सर्वव्यापक परमात्मा की स्तुति प्रार्थना करे।" अन्ते च लिखितम्—"इन मन्त्रों को पढ़ते जाना और अपने मन से चारों ओर बाहर भीतर परमात्मा को पूर्ण जानकर निर्भय, निःशङ्क, उत्साही, आनन्दित, पुरुषार्थी रहना।" नह्यत्र ईश्वरस्य परिक्रमणं लिखितम्।

अथवा 'विहारस्तु परिक्रमः' इति कोशप्रमाणेन नहि किञ्चिदपि वस्तु परितः क्रमणमेव परिक्रमणं कथ्यते, अन्यथा विहरणं विहार इति कथं पर्य्यायो भवेत्। तस्मान् मनसा प्रभुविरचितसृष्टौ प्राच्यादिदिक्षु परमात्मनोऽग्न्यादिशब्दैरर्थं चिन्तयन् मनः सर्वत्र व्यापकं प्रभुमनुभवेदित्येव तात्पर्यम्। वास्तविकसृष्टिस्तु मूर्तिमती विद्यत एव, पुनरन्तर्यामिणः कथं मूर्तिः सम्भवेत्? तत्र सत्यार्थप्रकाशेऽप्येष एवाशयो यज्जडस्येश्वरबुद्ध्या नमस्करणं मूर्तिपूजनमेव। ये दोषा जडमूर्तिपूजने प्रादर्श्यन्त तेऽत्रापि सङ्घटन्ते। तस्माद् वेदान्तेऽपि मूर्तिपूजानिषेधः—'न प्रतीके न हि सः' (४।१।४)।

है? सिक्खमत-खण्डन के प्रसङ्ग में दयानन्द ने सत्यार्थप्रकाश में स्पष्ट कहा है कि 'किसी भी जड़ पदार्थ के लिये सिर झुकाना, हाथ जोड़ना आदि मूर्तिपूजा के ही प्रकार हैं।'

उत्तरपक्ष—यह भी सारा परिवर्तन करके छल से प्रस्तुत किया जा रहा है। मनसा परिक्रमा मन्त्रों में कहीं पर भी ईश्वर की परिक्रमा करना नहीं लिखा है। संस्कारविधि में 'प्राची दिक्०' आदि मन्त्रों के ऊपर लिखा है—"निम्नलिखित मन्त्रों से सर्वव्यापक परमात्मा की स्तुति प्रार्थना करे।" और अन्त में लिखा है—"इन मन्त्रों को पढ़ते जाना और अपने मन से चारों ओर बाहर भीतर परमात्मा को पूर्ण जानकर निर्भय, निःशङ्क, उत्साही, आनन्दित, पुरुषार्थी रहना।" ईश्वर की परिक्रमा तो यहाँ नहीं लिखी है।

अथवा 'विहारस्तु परिक्रमः' इस अमरकोश के प्रमाण से केवल किसी वस्तु के चारों ओर घूमना ही परिक्रमण नहीं कहलाता, अन्यथा विहरण अर्थात् विहार इसका पर्यायवाचक कैसे होता? इसलिये प्रभु द्वारा विरचित सृष्टि में प्राची आदि दिशाओं में परमात्मा का अग्नि, इन्द्र आदि शब्दों से उनके विशिष्टार्थों का चिन्तन करता हुआ हमारा मन सर्वत्र व्यापक प्रभु का अनुभव करे, यही तात्पर्य है। प्रभु की सृष्टि ही वास्तविक मूर्ति दृश्यमान है ही। अन्तर्यामी की तो मूर्ति सम्भव ही नहीं है। सत्यार्थप्रकाश में भी यही आशय है कि जड़ का ईश्वरबुद्धि से नमस्करण मूर्तिपूजन ही है। जो दोष जड़मूर्तिपूजा में प्रदर्शित किये हैं, वे यहाँ भी घटित होते हैं। इसलिये वेदान्तदर्शन (४।१।४) में भी 'न प्रतीके न हि सः' कहकर मूर्तिपूजा का निषेध किया गया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्' इत्येवं भवता वाक्छलमाचर्यते। यतो महर्षिणा निगदेनैव मूर्तिपूजायाः खण्डने विहिते सति अनेन स्वमतमूर्ति-पूजापुष्ट्यर्थमृषिवाक्यमुद्धृत्य अनभीष्टार्थनिष्कर्षणेन वाक्छलं साध्यते। मुसलोलूखलपार्श्वे ग्राससन्निधानं तु तज्जन्यानवगतहिंसाविनिवृत्तिप्रायश्चित्तरूपकं क्रियते। यथा मनुः—

'कण्डनी चोदकुम्भश्च' (३।६८) इत्यादि 'वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत्' (३।८८) इति प्रमाणाच्च।

तथा च—'वायवायाहि०' इति मन्त्रेणोत्तमसोमवल्ल्याः समुत्पादकस्य परेशस्य कृतज्ञतापूर्वकस्मरणमिह कृत्वा समर्पणव्यवहारेण कथयति ऋषिर्यत् प्रभो! एतद्रसं भवान् स्वीकरोतु (स्वीकार करो)। कोष्ठकगतेन वाक्येन सुस्पष्टमपि व्यधाद् यत् (सर्वात्मा से पान करो)। एतत्त्वल्पधियामपि सुबोधकं स्यात्। परमेतादृशो भ्रान्ता अन्येषामपि भ्रान्तिं जनयन्ते। 'नह्यत्र मुखेन पानं कुरु' इत्यर्थो ध्यातव्यः। 'सर्वात्मना' इत्यनेन ध्वन्यते यत् 'पानम्' इति शब्दो

"अविशेषरूप से कहे हुए अर्थ में वक्ता के अभिप्राय से अन्यत्र अर्थ की कल्पना करना वाक्छल कहाता है" इसके अनुसार आपके द्वारा यहाँ वाक्छल किया जा रहा है; क्योंकि महर्षि के द्वारा स्पष्ट ही कण्ठ से बोलकर मूर्तिपूजा का खण्डन कर दिया गया है। इस स्थिति में श्री करपात्रीजी द्वारा स्वसम्मत मूर्तिपूजा की पुष्टि के लिये ऋषि का अन्याभिप्रायक वाक्य अन्य प्रसङ्ग से उद्धृत कर ऋषि के अनभीष्ट अर्थ को निकालकर वाक्छल सिद्ध किया जा रहा है। मुसल और उलूखल के पास अन्न-ग्रास रखना तो मुसल उलूखल द्वारा जन्य अनवगत हिंसन की विनिवृत्ति के लिये प्रायश्चित्त रूप में किया जा रहा है। जैसा कि मनु महाराज ने कहा है—

'कण्डनी, उदकुम्भ आदि में हिंसा होती है। उसकी विनिवृत्ति व वनस्पतियों के उपकारार्थ मुसल उलूखल के पास ग्रास रखे।'

इसी प्रकार 'वायवायाहि०' मन्त्र से उत्तम सोमवल्ली के समुत्पादक परमात्मा के प्रति कृतज्ञताज्ञापनपूर्वक स्मरण कर यहाँ पर समर्पणभाव के व्यवहार से मन्त्रार्थ में ऋषि ने कहा है कि हे प्रभो! यह सोमवल्ली का रस आप स्वीकृत कीजिये। यहाँ पर कोष्ठक के भीतर 'सर्वात्मा से पान करो' इस पाठ से पूर्ण स्पष्ट कर दिया गया है, जिसे अल्पबुद्धि भी सरलता से समझ सकते हैं। परन्तु ये परिजातलेखक सदृश भ्रान्त जन अन्यों को भी अपनी अन्यथा व्याख्या कर भ्रम में डालना चाहते हैं। यहाँ पर 'मुख से पान करो (पियो)' ऐसा अर्थ नहीं है। इसके दो कारण हैं—एक तो सर्वात्मा से पिया नहीं जाता, एक ओर मुख होना चाहिये, साथ ही यह भी ध्वनित है कि उस प्रभु के कोई मुखादि अङ्ग हमारे सदृश नहीं हैं। दूसरे रक्षणार्थक 'पा' धातु से पान (पा + ल्युट्)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

रक्षणार्थकात् 'पा पाने' इत्यस्माद्धातोर्निष्पन्नो गृह्यते। प्रमाणं चात्र ऋग्भाष्यमृषेः। यथा—(तेषां) तान् पदार्थान्। 'षष्ठी शेषे' (अष्टा० २।३।५०) इति शेषत्वविवक्षायां षष्ठी (पाहि) रक्षयति वा, एवमपि प्रेतार्थकर्षणेनाऽस्य वाक्छलम्।

न क्षुरोपानद्भ्यां कश्चिदार्यसमाजो भोगप्रयोगं कुरुते न वा पुष्पाण्यर्पयति, न वा प्रार्थनां विधत्ते। अवश्यं क्षुरं निशितीकुर्वन्ति आर्याः, उपानहोश्च विलेपं कारयन्ते। 'सीता' सम्बन्धि-भाष्यं न सम्यगवालोकि भवता, तदवगमने कदाऽपि अल्पीयस्या बुद्धेरेव प्रयोगः कर्तव्य आसीत्। तदाशयो यद् दुग्धमधुरपदार्थमिश्रितयोगं विधाय खाददानेन भूमेरुर्वरता जायते।

भवान् स्वपक्षमूर्तिपूजासिद्धावक्षमः सन्निह तदर्थं चाभ्युपगम्येव संस्कारविधौ ऋषिभाष्ये चाक्षेपं कर्तुं प्रावर्तिष्ट। एवं 'मताऽनुज्ञा' नामकनिग्रहस्थाने न्यपतत्। तल्लक्षणं च यथा—'स्वपक्षदोषाऽभ्युपगमात् परपक्षदोषप्रसङ्गो मताऽनुज्ञा'।

यन्नाम 'सीता-पट्ट' विषयकभाषाप्रश्नस्तत्र ब्रूमो यत् तस्मिन् काले गुजरातीमातृभाषा-

---

शब्द बनाया गया है। हिन्दी का 'पीना' अर्थ इसका नहीं है; क्योंकि रक्षण (पान) सर्वात्मा से किया जा सकता है, पीना नहीं। इस अर्थ के करने में महर्षि का किया हुआ भाष्य प्रमाण है। वहाँ 'तेषाम्' पद में शेषत्वविवक्षा में षष्ठी का विधान बताया है, अर्थात् 'तान् पदार्थान् + पाहि' उन पदार्थों की रक्षा कीजिए। यहाँ प्रत्यक्ष है कि इनके द्वारा अर्थापकर्षण करके वाक्छल किया गया है।

उस्तरे व जूते का भोग लगाना कहीं नहीं लिखा है। न उन पर फूल चढ़ाना है, न उनसे प्रार्थना करना है। हाँ, क्षुर पर धार तो रखवाते हैं और जूतों पर पालिश भी करवाते हैं। 'सीता' सम्बन्धी भाष्य आपने ठीक-ठीक नहीं पढ़ा। उसके समझने में थोड़ी बुद्धि का ही प्रयोग कर लेते तो ठीक होता। उसका आशय है कि दूध (दूध से बने तक्र आदिक कांस जैसी घासों के मूल नष्ट करने में), मीठे पदार्थ सीरा, खाँड आदि पदार्थों का मिश्रणयोग सीता कूँड में लगा कर पटेला करे। इससे भूमि अत्यन्त उपजाऊ बन जाती है।

आप अपने उठाए हुए मूर्तिपूजा के पक्ष की सिद्धि करने में असमर्थ रहे, इस प्रकार मानो मूर्तिखण्डन प्रकार को स्वीकृत कर लिया हो—तो संस्कारविधि और ऋषि के अन्य भाष्य पर आक्षेप करने लगे। इस प्रकार अब आप 'मतानुज्ञा' नामक निग्रहस्थान में आ फँसे हैं। जिसका लक्षण इस प्रकार है—'अपने पक्ष को सिद्ध न करने से उसका दोष स्वीकार करने पर दूसरे के पक्ष पर दोष ढूँढने लगना मतानुज्ञा है।'

रहा 'सीता-पटेला' विषयक भाषा का प्रश्न, उस विषय पर तो हम इतना ही कहेंगे कि आज से सौ वर्ष पूर्व गुजराती मातृभाषाभाषी महर्षि दयानन्द क्रान्तदर्शी योगी थे। वे अपनी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भाषी महर्षिः स्वदूरदर्शिदृष्ट्याऽऽर्यभाषाभविष्यदुज्ज्वलतामापादयितुकामस्तां हिन्दीभाषां जानुरिङ्गणचलनमशिक्षयदतस्तात्कालवाक्यरचनाशैली एवैषा सम्बलिता।

अस्मिन् प्रकरणे पूजाशब्दप्रयोगप्रसङ्गे वयं स्पष्टीकर्तुमभिलषामो यन्नमःशब्द इव संस्कृतवाङ्मये पूजाशब्दप्रयोगोऽपि उचितसत्कार-प्रयोग-रक्षण-दण्डार्थेषु च जायते।

उचितसत्कारे यथा—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ॥ मनु० ३ । ५६ ॥

उचितप्रयोगे—

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ॥ मनु० २ । ५४ ॥
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति । मनु० २ । ५५ ॥

उचितरक्षणे—

इयं हि नः प्रिया भार्या प्राणेभ्योऽपि गरीयसी।
मातेव परिपाल्या च पूज्या ज्येष्ठेव च स्वसा ॥ महा० विराट्० ३ । १३ ॥

उचितदण्डे—

वत्स योऽयं विधिः साक्षाज् जगतामाद्यदैवतम्।
नूनमर्चये खड्गेन तिग्मेन जवसा परम् ॥

दूरदर्शिनी दृष्टि से आर्यभाषा हिन्दी का उज्ज्वल भविष्य बनाने के लिये उस भाषा को घुटनों चलना सिखा रहे थे, इसलिये उस काल की वाक्यरचनाशैली ही यह थी।

इस प्रकरण में हम 'पूजा' शब्द के विभिन्न अर्थों के प्रयोग को भी स्पष्ट करना उपयुक्त समझते हैं। वह उचित सत्कार, प्रयोग, रक्षण तथा दण्ड अर्थ में प्रयुक्त होता है।

उचित सत्कार में—'जहाँ नारियों की पूजा होती है, वहाँ देवता रमण करते हैं।'

उचित प्रयोग में—'भोजन का नित्य पूजन करे, वह बल और ओज को देता है।'

उचित रक्षण में—'यह भार्या हमारी बड़ी बहिन के समान पूज्या अर्थात् रक्षणीया है।'

उचित दण्ड अर्थ में—'इसकी तेज तलवार से पूजा करो।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्कार आशीर्वादार्थेऽपि च—

जयाशीर्भिस्तु तं विप्रो धर्मराजानमार्चयत्।
(धर्मराजं समार्चयत्) ॥ महा० सभा० ५। १२॥

अयं पूजाशब्दो गुरुभिः शिष्यपुत्रपौत्रादिकं प्रत्यपि प्रयुज्यते। ब्राह्मणः शूद्रं प्रत्यपि प्रयुङ्क्ते—

(क) तत्र कश्चित् समुत्साहं कृत्वा शूद्रो दयान्वितः।
आगतश्चाश्रमपदं पूजितश्च तपस्विभिः॥ महा० अनुशासन० १०। ११॥

(ख) अपि शूद्रं च धर्मज्ञं सद्वृत्तमभिपूजयेत्॥ महा० अनुशासन० ४८। ४८॥

परं पूजाशब्दस्य नार्थो जडस्य धूपदीपदर्शनम्, नीराजना-करणम्, तत्समक्षे घण्टाशङ्खनादश्चेति।

पृ० १६२०, पं० १२—यदुक्तम्—"सूर्यादिग्रहपीडाशान्तये बालबुद्धिभिः 'आकृष्णेन रजसा०' इत्यादि मन्त्रा गृह्यन्ते। अयमेषां भ्रम एव, कुतस्तत्र तेषामर्थानामग्रहणात्। तद्यथा—'आकर्षणानुकर्षणप्रकरणेऽस्य मन्त्रस्यार्थ उक्तः' इति, तदपि तुच्छम्, त्वदुक्तार्थस्य तत्रैव

आशीर्वाद में भी—'विप्र ने जयाशीर्वादों से धर्मराज की पूजा की।'

यह पूजा शब्द बड़ों (गुरु) के द्वारा छोटे शिष्य, पुत्र, पौत्र, आदि के प्रति भी प्रयुक्त होता है। ब्राह्मण शूद्र के प्रति भी प्रयुक्त करता है—

(क) 'आश्रम में पधारे शूद्र की तपस्वियों ने पूजा की।'

(ख) 'सद्वृत्त धर्मज्ञ शूद्र की भी पूजा करे।'

परन्तु जड़ मूर्ति को धूप-दीप दिखाने, आरती करने, घण्टा शंखनाद करने में पूजा शब्द का अर्थ नहीं है।

पृ० १६२०, पं० १२—"ग्रहपूजा को असत्य, शास्त्रविरुद्ध सिद्ध करते हुए स्वामी दयानन्द लिखते हैं कि—इसी प्रकार से अल्पबुद्धि मनुष्यों ने 'आ कृष्णेन रजसा' इत्यादि मन्त्रों को सूर्यादि ग्रहों की पीड़ा की शान्ति के लिये ग्रहण किया है, सो उनका केवल भ्रममात्र है। मूल अर्थ से इसका कुछ सम्बन्ध नहीं है; क्योंकि उन मन्त्रों में ग्रह पीड़ा निवारण करना, यह अर्थ ही नहीं है। 'आकृष्णेन०' इस मन्त्र का अर्थ आकर्षणानुकर्षण विषय में लिखा जा चुका है। दयानन्द के इस अर्थ का खण्डन हमने वहीं कर दिया है।" पारिजातकार का यह कथन अतितरां तुच्छ है तथा

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

खण्डितत्वात्।" इति पारिजातोक्तमतितरां तुच्छम्, अयुक्तत्वात्, तदयुक्तस्य मयाऽपि तत्प्रकरण एव खण्डितत्वात् स्वामिनः सदर्थस्य च मण्डितत्वाच्च।

इहाग्रिम-त्वदुद्भावितशङ्कानां समाधानात् प्रागेव पृच्छामि—ब्रवीतु तावद् ग्रहाणां शान्तेः कथमावश्यकता भवति? किं ग्रहाः कुपिता जायन्ते? ग्रहाणामचेतनत्वात् कोपस्य च चेतनान्तःकरणधर्मत्वात् तदसम्भवः। तथा सति शान्तिप्रयासो निष्फलः। अथ चेद् ग्रहाः कल्याणसाधका भवन्त्वित्याशयेन ग्रहादिपूजनं क्रियते तदेयं प्रार्थना कामना वा प्रभुं प्रति कर्तव्या, न तु ग्रहान् प्रति, तैर्जडैरस्मदाशयाऽप्रतिबुद्धत्वात्। अतः 'द्यौः शान्तिरन्तरिक्षं शान्तिः०' इत्यादिनेश्वरः प्रार्थ्यते।

पृ० १६२०, पं० १४—यदुच्यते—"इमं देवाः' इति चन्द्रस्य, 'अग्निर्मूर्धा' इति मङ्गलस्य इत्यादिमन्त्रैस्तेषां ग्रहाणां सम्बन्धः। 'शन्नो देवीः' इत्यादौ शब्दसादृश्यमात्रादेव शन्यादिग्रहपरत्वं मन्त्राणां कल्पितम्, इति, तन्न, दयानन्दं प्रत्येव तथोक्तेः सुवचत्वात्। तेनैव 'तरुतारम्' (ऋ० १। ११९। १०) इत्यत्र तारमिति पदं दृष्ट्वा तारास्त्रं यन्त्रमित्यर्थः कल्पितः। ग्रहाणां पूजनं तु महर्षिभिरुक्तम्—'ग्रहनक्षत्रचरितैर्वा जनपदा उपध्वंस्यन्ते' (चरकसूत्रस्थाने ६।२०)

अयुक्त है और इस अयुक्त का हमने भी वहीं पर खण्डन कर दिया है एवम् स्वामी जी के सदर्थ का मण्डन कर दिया है।

यहाँ पर आपकी उद्भावित शङ्काओं के समाधान से पहले हम पूछते हैं—बताइये, ग्रहों की शान्ति की आवश्यकता क्यों है? क्या ग्रह कुपित हो जाते हैं? ग्रह तो अचेतन हैं, चेतन के अन्तःकरण का धर्म कोप करना है, वह कोप ग्रहों द्वारा करना असम्भव है। इस स्थिति में शान्ति का प्रयास भी निष्फल है। यदि कहें कि ग्रह कल्याणकारक हों, इसलिये ग्रहों की पूजा की जाती है, तो ऐसी प्रार्थना और कामना प्रभु के प्रति ही करनी चाहिये, ग्रहों के प्रति नहीं; क्योंकि जड़ ग्रह हमारी प्रार्थना को समझ ही नहीं सकते। जहाँ कहीं 'द्यौः शान्तिः०' आदि कामना की गयी, वहाँ ईश्वर से ही प्रार्थना समझनी चाहिये कि वह इन द्यौ आदि के द्वारा हमें शान्ति दे।

पृ० १६२०, पं० १४—"इमं देवाः०' यह मन्त्र चन्द्रमा का तथा 'अग्निर्मूर्धा०' आदि मङ्गल आदि के मन्त्र हैं, इनसे उन ग्रहों का सम्बन्ध है। 'शन्नो देवीः०' इत्यादि में शब्दसादृश्यमात्र से ही शनि आदि ग्रहपरता मन्त्रों की कल्पित की है। यह भूमिका का कथन दयानन्द जैसे महात्माओं के लिये शोभा नहीं देता। उन्होंने ही 'तरुतारम्' प्रभृति मन्त्र में 'तार' शब्द को देखकर कहा है कि वेद में 'तार' देने की विधि वर्णित है, ग्रहों का पूजन तो ऋषियों ने माना है। चरकसंहिता में बताया

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'यस्य वक्रानुवक्रगा ग्रहा गर्हितस्थानगताः पीडयन्ति जन्मर्क्षं वा स विनश्यति' (सू० ३२ । ४) । एवमुपवेदभूतायाः सुश्रुतसंहितायाः वचनैर्ग्रहपीडाः सूचिताः । तेषां शान्त्यर्थं पूजादिकमपि विहितम् ।"

इति सर्वं भ्रान्तज्ञानफलम् । यथा हि ऋषिदयानन्देन भवदुक्तिमनुसृत्य तारशब्दं दृष्ट्वा ताराख्यं मन्त्रमित्यर्थः कल्पित इति मन्ये, तच्चाऽपि सङ्गतमर्थमनुबध्नाति, यथा अमरकोशटीकाकृता भानुजीदीक्षितेनाऽपि निरुक्तिः प्रदर्शिता—'तारयति अतिक्रामत्यन्यान् शब्दान् (इति तारः)' । 'बहुलमेतन्निदर्शनम्' इति चुरादिगणसूत्रात् स्वार्थे णिच् पचाद्यच् । एवामाधुनिकतारस्येयं प्रक्रियैव उट्टीकिता । परं न तथा 'इमं देवाः' आदिमन्त्रेषु क्वाऽपि चन्द्राद्यर्थो दूरादप्यभिव्यज्यते । न च चरकोद्धरणे ग्रहपूजापुष्टिर्जायते । ग्रहनक्षत्रचालैरेव पृथिवी-स्थजनपदानां स्वस्थितिस्तेषाम् उपद्रवित्वाद् उपध्वंससम्भवात् ।

पृ० १६२१, पं० ५—यदुच्यते—"शन्नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा । शन्नो मृत्युर्धूमकेतुः' (अथर्व० १९ । ९ । १०) , 'शन्नो दिविचरा ग्रहाः' (अथर्व० १९ । ९ । ७) इत्यादिमन्त्रेष्वपि ग्रहशान्तय उक्ताः ।" इति, तदपि न ग्रहेभ्योऽक्षतचन्दनादिसमर्पणे ग्रहाणां

गया है कि 'ग्रहों और नक्षत्रों के प्रभाव से बड़े-बड़े जनपद उजड़ जाते हैं' (सूत्रस्थान ६ । २०) । जिस व्यक्ति के ग्रह वक्री हो जाते हैं, गर्हित स्थान में आ जाते हैं अथवा जन्मनक्षत्र को बुरी दृष्टि से देखने लगते हैं, तो वह विनष्ट हो जाता है । इसी प्रकार उपवेदभूत सुश्रुतसंहिता के वचनों से ग्रहपीडाएँ सूचित हैं । उनकी शान्ति के लिये वहाँ पूजा का भी विधान किया गया है ।"

उक्त कथन भ्रान्त ज्ञान का ही फल है । जैसे स्वामी दयानन्द ने आपकी उक्ति के अनुसार मन्त्र में 'तार' शब्द देखकर टेलीग्राफ का आविष्कार दिखा दिया । हम मानते हैं कि उन्होंने व्युत्पत्तिलभ्य सङ्गत अर्थ को देखकर ऐसा किया । अमरकोश के टीकाकार भानुजी दीक्षित ने भी निरुक्ति प्रदर्शित की है—'अन्य शब्दों का जो अतिक्रमण कर जाये, उसे तार कहते हैं' । 'बहुलमेतन्निदर्शनम्' इस चुरादिगणस्थ वचन से स्वार्थ में णिच् और पचाद्यच् से तार शब्द बनाकर यह प्रक्रिया प्रस्तुत की । उसी प्रकार 'इमं देवाः० ' आदि मन्त्रों में कहीं भी चन्द्रमा आदि अर्थ दूर से भी अभिव्यक्त नहीं होता । चरक के कथन से भी ग्रहों की पूजा की पुष्टि नहीं होती । ग्रहों और नक्षत्रों की चालों से ही पृथिवी के जनपदों की अपनी स्थिति होती है और उनके उपद्रवी होने से जनपदों के विध्वंस हो जाते हैं ।

पृ० १६२१, पं० ५—"शन्नो ग्रहाश्चान्द्रमसाः', 'शन्नो दिविचरा ग्रहाः' प्रभृति अथर्व-वेदीय मन्त्रों में भी ग्रहशान्ति की बात कही गयी है ।" यह ठीक नहीं है । इससे भी ग्रहों को चन्दन, अक्षत, पुष्प, रोली आदि का समर्पण कर पूजन कैसे सिद्ध होगा ? और उनकी प्रसन्नता कैसे साध्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसन्नतां साधयति, तदसत्, तेषां जडत्वात् प्रसन्नतायाश्चेतसो निर्मलतायाः सुचेतनस्यैव सम्भवात्। एषां प्रसादनपरत्वे देवाधिदेवस्य परेशस्य पूजाया उपेक्षणान्नास्तिक्यप्रसारापत्तेश्च लोके। ज्ञानवन्तो ग्रहाणां शान्तिन्तु अवश्यमभिलषन्तु, तथाऽभिलषणस्य लोकेषु तादृश-शुभाभिलाषप्रसारेण स्वस्य तेषां च जनानामात्मकल्याणस्य लोकोपकारस्य च भावनोदयनात्।

पृ० १६२१, पं० ८—यदुक्तम्—"द्वादश प्रधयश्चक्रमेकम्' (ऋ० १।१६४।४२) इति मन्त्रः संवत्सरकालपरः। 'षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्राः' (निरु० ४।२७) इति यास्केनाऽपि संवत्सर एवार्थः कृतः। तथापि दयानन्देन सर्वमेतदपरिगणय्य वायुयानपरत्वमस्य मन्त्रस्योक्तम्। तत्र कथं नापत्तिः क्रियते।" इति, तत्समाधीयते—

यद् यद् बुद्धिपूर्वकं तर्कयुक्तिप्रमाणपुष्टं तदवश्यमनुवर्तनीयम्। वायुयाननिर्मातृत्वं महर्षिणा लिखितम्, तत्तु तपःसमाधिसिद्ध्यधिगतं तस्य। ग्रहाणामक्षतादिभिः पूजनं न बुद्धिसङ्गतम्।

पृ० १६२१, पं० १०—"यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः। अत्रयस्तमन्वविन्दन् नह्यन्ये अशक्नुवन्॥' (ऋ० ५।४०।९) इति मन्त्रे त्वसुरवंशीयेन राहुणा सूर्यग्रहणं स्पष्ट-

---

होगी? वे तो जड़ हैं और प्रसन्नता चित्त की निर्मलता का नाम है। चित्त चेतन पर ही सम्भव है। इनकी पूजा के कारण देवाधिदेव परमेश्वर की 'अनन्याश्चिन्तयन्तो याम्' के रूप में अनन्य भाव से पूजा की उपेक्षा होने लगेगी, तब लोक में नास्तिकता का प्रसार हो जायेगा। ज्ञानी लोगों को चाहिये कि पृथिवी के अतिरिक्त अन्य ग्रहों में भी शान्ति-स्थापन की अभिलाषा तो अवश्य करना चाहिये। ऐसी अभिलाषा व कामना करने से लोगों में शुभ अभिलाषाओं का जन्म व प्रसार होगा। अपने तथा उन लोकों की कल्याणकामना से लोकोपकार और सौहार्द की भावना उत्पन्न होगी।

पृ० १६२१, पं० ८—"द्वादश प्रधयश्चक्रमेकम्' यह मन्त्र संवत्सरकालपरक है। 'षष्टिश्च ह वै त्रीणि च शतानि' यहाँ यास्क ने संवत्सरपरक अर्थ किया है। तब भी दयानन्द ने सब की उपेक्षा करके इस मन्त्र की वायुयानपरकता मानी है। उस पर फिर आपत्ति क्यों न की जाये?"

इसका समाधान यह है कि जो - जो बुद्धिसङ्गत, तर्क-युक्ति और प्रमाणों से युक्त है, उसे अवश्य मानना चाहिये। वायुयान का निर्मातृत्व महर्षि ने जो इस मन्त्र में देखा, यह दर्शन उनकी तपःपूत समाधि-दर्शन का फल है। ग्रहों के नाम से वेदी पर रेखायें खींचकर उन पर अक्षत आदि छोड़ना बुद्धिविपरीत कार्य है।

पृ० १६२१, पं० १०—"यं वै सूर्यम्०' प्रभृति ऋग्वेदीय मन्त्र में असुरवंशीय राहु के द्वारा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मुक्तम्।" इति, तदप्यविचारफलम्। मन्त्रार्थस्त्वेवम्—'यं सवितारम् आदित्येन प्रकाशितः, असुरो मेघ एव अन्धकारेण विध्यति, सूर्यश्च मेघं छित्त्वा प्रकाशमाविष्करोति। तथैव अविद्या-तम आत्मानमावृत्याज्ञानं जनयति विद्वांसश्चाविद्यां विनाश्य विज्ञानं प्रकाशयन्ति। एतद्विवेचनं ये विद्वांसस्त एव जानन्ति, नेतर इति।' इतरेष्वत्र भवतो गणना विद्यते, यतो हि न जानाति भवान् मन्त्ररहस्यं न वा ज्ञातुं यतते सदसद्विवेकिसान्निध्ये। नात्र राहोश्चर्चा। यं मन्त्रं च विनियोजयन्ति पुराणगाः 'कया नश्चित्र०' इति, तस्याऽपि नोव्वटमहीधराभ्यामप्यर्थो राहुपूजापरको विहितः। वस्तुतस्त्विमे पूजका एव क्रूरा ग्रहा लोकेभ्यः, न तु ते क्रूरा मृदवो वा।

पृ० १६२१, पं० १५—यदुक्तम्—"क्वचिच्च विनियोगेषु मन्त्राणां मुख्योऽर्थः सर्वथा न घटते। अत एवैकस्य मन्त्रस्यानेकत्र विनियोगा दृश्यन्ते।" इति सत्यं वेदमन्त्राणां विनियोगनियोजनापेक्षया वेदानां प्राक्कालाविर्भावव्यञ्जनात्। अतो वेदमन्त्राणां स्वतन्त्र-रूपेणार्थस्य विधेयता ध्वन्यते न तु विनियोगशृङ्खलिताऽनिवार्या। विनियोगाधारे बहुत्र सायणाचार्येणानर्था एव कृताः। अत एव महर्षिणा वेदपादेषु विनियोगनिगडता नाङ्गीकृता। परं सायणेन तु विचित्रकथाकल्पना मन्त्रेषु योजिताः। यथाऽत्रैकमुदाहरणं प्रस्तूयते—

सूर्य का ग्रहण स्पष्ट लिखा है।" यह कथन भी अचिन्तन का परिणाम है। मन्त्र का सही अर्थ इस प्रकार है—'हे विद्वानों! सूर्य से प्रकाशित मेघ ही अन्धकार से जिस सूर्य को ताड़ित करता है, उस को निश्चय विद्या में प्रवीण जन जानने को समर्थ होते हैं, अन्य नहीं।' भावार्थ यह है कि मेघ जैसे अन्धकार को फैलाते हैं, ऐसे ही अविद्या भी आत्मा पर आवरण डाल देती है और विद्या अविद्या का नाश करती है। इस बात को विद्वान् लोग जानते हैं। यहाँ पर आपका सम्मत राहु अभिधा-बुद्धि होने से ही आपको दीख रहा है। पौराणिक लोग राहु-पूजन में जिस मन्त्र का विनियोग करते हैं, वह मन्त्र 'कया नश्चित्र०' है। इस का उव्वट और महीधर ने भी राहुपूजनपरक अर्थ नहीं किया। अतः सुनिश्चित करना चाहिये कि वास्तव में ये ग्रहपूजक ही लोगों के लिये क्रूर ग्रह हैं, आकाशस्थ ग्रह क्रूर या मृदु नहीं हैं।

पृ० १६२१, पं० १५—"कहीं पर विनियोगों में मन्त्र का मुख्य अर्थ नहीं घटता है। इसलिये एक मन्त्र के अनेकत्र विनियोग देखे जाते हैं।" यह सत्य है कि वेदमन्त्र विनियोग-विनियोजन-काल की अपेक्षा सुदूर पूर्व में आविर्भूत हो चुके थे। इससे भी वेदमन्त्रों की स्वतन्त्र रूप से अर्थविधेयता ध्वनित होती है। विनियोगों की बेड़ी अन्वर्थ न होते हुए वेदमन्त्रों के पदों में नहीं डाली जा सकती। विनियोग के आधार में बद्ध होकर सायणाचार्य ने अनेकत्र अनर्थ ही किये हैं। इसीलिये महर्षि ने वेद के पैरों में विनियोगों की अनिवार्य बेड़ियाँ अन्धाधुन्ध ढंग से डालना स्वीकृत नहीं किया। सायण ने तो विचित्र कथाओं की कल्पना मन्त्रों से बलात् जोड़ दीं। उनमें से केवल एक उदाहरण प्रस्तुत किया जा रहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम्।
बृहस्पतिभिर्नदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः॥ ऋ० १। ६२। ३॥

सायणाचार्यविनियोगो यथा—'त एते प्रातःसवने षडहस्तोत्रियाञ्छस्त्वा माध्यन्दिनेऽहीनसूक्तानि शंसन्ति।' (सूक्तारम्भे)। 'गतः सामान्यविनियोगः। विशेषविनियोगस्तु लिङ्गादवगन्तव्यः।' (६२ सूक्तारम्भे)।

अत्रेदमाख्यानम्—"सरमा नाम देवशुनी। पणिभिर्गोष्वपहतासु तद्गवेषणाय तां सरमामिन्द्रः प्राहैषीत्। यथा लोके व्याधो वनान्तर्गतमृगान्वेषणाय श्वानं विसृजति तद्वत्। सा च सरमा एवमवोचत्—हे इन्द्र! अस्मदीयाय शिशवे तद्गोसम्बन्धि क्षीराद्यन्नं यदि प्रयच्छसि तर्हि गमिष्यामीति। स तथेत्यब्रवीत्। तथा च शाट्यायनकम्—'अन्नादिनि ते सरमे प्रजां करोमि या नो गा अन्वविन्दः।"

अत्रायं प्रश्नः किं वेदाविर्भाव उक्तघटनाया अनन्तरं जातोऽथवा प्राक्? नित्यस्यापौरुषेयस्य वेदस्य अग्न्यादिभिर्ऋषिभिः सृष्ट्यादौ गृहीतत्वात् सार्वभौमत्वात् सार्वकालिकत्वाच्च प्राग्भवनस्यौचित्यात्। सरमाकथा तु पश्चादेव कल्पितेति निश्चीयते। घटनायाः

'इन्द्रस्याङ्गिरसाम्०' (ऋ० १। ६२। ३) इस मन्त्र का विनियोग सायण के अनुसार इस प्रकार है—'प्रातःसवन में ये अहीनसूक्त पढ़ने चाहिये।' यह तो रहा विनियोग, परन्तु अर्थ करने में केवल विनियोग का ही आश्रय नहीं लिया गया। भिन्न-भिन्न कालों में कुछ कथायें भी प्रचलित हो गयीं, जिनका सम्बन्ध वेदमन्त्रों से जोड़ दिया गया। इस मन्त्र की विचित्र कथा सुनिये—

इस विषय में एक कथा है—"सरमा नाम की देवों की एक कुतिया थी, जब पणि लोग इन्द्र की गौवें चुरा ले गये, तो इन्द्र ने सरमा कुतिया को उन गौवों को खोजने के लिये भेजा। जैसे व्याध वन के भीतर भागे हुए हरिण को खोजने के लिये कुत्ते छोड़ देते हैं, उसी प्रकार सरमा को छोड़ा गया। यह सरमा कुतिया बोली—'मैं तब जाऊँगी, जब तुम उन गौवों से उत्पन्न दूध आदि को मेरे बच्चों के लिये दोगे।' इन्द्र ने कहा—'ऐसा ही होगा।' इसी पर शाट्यायन का कथन है कि इन्द्र ने कहा—'हे सरमा कुतिया! तूने मेरी गायें खोज निकालीं, इसलिये मैं तेरी सन्तान को दूध रूप अन्न खिलाता हूँ।"

यहाँ प्रश्न यह है कि वेद का आविर्भाव इस घटना के पीछे हुआ या पहले विद्यमान था? वेद नित्य और ईश्वरोक्त हैं और उनका आविर्भाव अग्नि आदि ऋषियों द्वारा हुआ तो अर्थ भी देशकाल से अतीत सार्वभौमिक और सार्वकालिक होना चाहिये और अर्थ करते समय सरमा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पश्चाद्भावित्वप्रतिपादने स्वभूमिकाप्रतिपादितनित्यत्वव्याघातापत्तेः। सरमासन्तानो लोके सारमेयः कथ्यते। किं वेदमन्त्रेऽपि शुनीत्येवार्थोऽस्य पदस्य? सर्वथा नैवेति, सायणेनाप्यन्यथा व्युत्पत्तिसमादृतत्वात्। ३। ३१। ६ मन्त्रे 'सरमा सरणशीला स्तुतिरूपा वाक्, अङ्गिरसां गवार्थ इन्द्रेण प्रहिता देवशुनी वा। वाग् देवशुनी वा।' यदि सायणाचार्यमस्तिष्के सरमाशुनीसंस्कारो नावर्तिष्यत तदाऽसाविहाऽपि 'वाग्' इत्येवार्थं निरदेक्ष्यत्।

विनियोगाख्याने समुपेक्ष्य महर्षेरर्थसौन्दर्यं निभालयन्तु विज्ञाः—

'हे मनुष्याः! यथा विद्याधर्मादिज्ञानोत्पादयित्री माता (सरमा) पुत्राय अन्नादिपदार्थान् प्राप्नोति, यथा सभाध्यक्षः सूर्यश्च किरणैर्मेघं भिन्दन् सुशिक्षितवाणीं प्राप्नोति तथा यूयमपि परमेश्वरस्य, बृहस्पतेः सूर्यस्य वा इष्टसाधयित्र्यां नीत्यां विद्याद्युत्तमगुणान् प्रकाशयत।'

एकत्र सायणः 'वाग्' इति, उव्वटः (यजुः० ३३। ५९) सरमा वाक् त्रयीलक्षणा, महीधरोऽपि 'वाग्' इति, १। ३। १० मन्त्रे सायणः स्वमपि भाष्यं कुर्वाणः 'सरमा सरस्वती' इत्याह, परं ७। ५५। २ मन्त्रे 'सरमा नाम देवशुनी, तस्याः कुलोद्भवः सारमेयः' इत्यलेखीत्, कीदृग्विचित्रम्?

कुतिया की कहानी पीछे घड़ी गयी। लोक में सरमा का सन्तान 'सारमेय' कहलाता है। परन्तु क्या वेदमन्त्र में भी सरमा का यही अर्थ कुतिया होगा? जैसाकि सर्वथा नहीं है; क्योंकि सायण ने भी इस की व्युत्पत्ति अन्यथा ही प्रस्तुत की है। जैसे—सरमा सरणशीला स्तुतिरूपा वाक्। सायण के मस्तिष्क में यदि कुतिया की कथा का अंकुर न होता तो वह 'सरमा' का अर्थ वाणी ही करते। बृहस्पति का वाचस्पति के साथ 'वाग्' वाणी की ही सङ्गति लगती है।

विनियोग और आख्यान के बन्धन में न पड़नेवाले महर्षि दयानन्द के अर्थसौन्दर्य को देखिये—

'विद्या-धर्मादि ज्ञानों के उत्पन्न करनेवाली माता पुत्र के लिये अन्नादि पदार्थों को प्राप्त कराती है। जैसे—सभाध्यक्ष और सूर्य अपने शासन की रश्मियों और किरणों से मेघ (गड़बड़ी पैदा करनेवाले, अन्धकार फैलानेवाले) को भेदता हुआ सुशिक्षित वाणी को प्राप्त कराता है। उसी प्रकार तुम लोग भी सद्गुणों को प्राप्त कर सब जगत् में अविद्यादि दुर्गुणों का विनाश करो।'

एक ओर सायण, महीधर, उव्वट सरमा का अर्थ 'वाक्' करते हैं, ऋ० १। ३। १० में सायण सरमा का अर्थ सरस्वती करते हैं, परन्तु ७। ५५। २ मन्त्र में 'सरमा देवशुनी तस्याः सन्तानः सारमेयः' ही लिखते हैं। कैसी विचित्र बात है?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्र हेतुरयमेव यन्नाऽस्य प्रज्ञापरिपक्वता तपसा न च योगबलेनार्जितः सदसद्विवेकः, न वा ब्रह्मचर्यव्रतेनैव शुचिता। महर्षिस्तूक्तसमस्तगुणसम्पत्तिसमृद्ध आसीत्।

अत आधुनिकपण्डितम्मन्यैर्वेदाध्ययनविमुखैर्बुद्धिविरहितैर्जडानामुपासनमारब्धम्। न च याज्ञवल्क्यमहर्षिणा क्वाऽप्यादिष्टं ग्रहार्चनमक्षतरोचनादिभिः।

पृ० १६२२, पं० १२—यदुच्यते—"शतं ते अयुतं हायनान् द्वे युगे त्रीणि चत्वारि कृण्मः' (अथर्व० ८।२।२१) इति मन्त्रेण सिद्धानि पुरुषाणां चतुर्युगपरिमितान्यायूंषि ज्ञातव्यानि। तादृशमेव दीर्घमायुर्याज्ञवल्क्यस्य। 'मयादित्यादवाप्तानि यजूंषि मिथिलाऽधिप' (म० भा० शा० प० ३१८।२)।"

इति सर्वं शास्त्रानवबोधफलितम्, उक्तार्थर्वमन्त्रे सृष्टिकल्पदिनस्यायुषो वर्णितत्वात्। न च कश्चित् शरीरी (४३२००००००० वर्षाणि) एतावन्तं कालं स्थातुं जीवितुं वा शक्नुयात्, एतावताऽनश्वरतापत्तेः शरीरिणः शरीरस्य। न वाऽपि याज्ञवल्क्यर्षेरेतावद्दीर्घमायुष्यं जातम्। मिथिलाधिपः, आदित्यः, व्यासः, याज्ञवल्क्यस्य शिष्योऽपत्यमपि च याज्ञवल्क्यो भवितुमर्हति। परमिमे कालान्तरे शिष्येषूपाधिरूपेऽपि प्रायुज्यन्त शब्दा इति बोध्यम्।

इसमें यह हेतु हो सकता है कि इनकी बुद्धि परिपक्व या निर्णायक ज्ञानवाली नहीं है और न योगबल से ही इन्होंने सदसद्विवेक अर्जित किया था। न ब्रह्मचर्य व्रत से ही पवित्रता कमायी थी। महर्षि तो उक्त समस्त गुणसम्पत्ति से समृद्ध थे।

अतः आधुनिक पण्डितम्मन्य वेदाध्ययन से विमुख, बुद्धिविरहितों के द्वारा जड़ पदार्थों का उपासन प्रारम्भ कर दिया गया। याज्ञवल्क्य महर्षि ने अक्षत पुष्प आदि से ग्रहों की पूजा का कहीं विधान नहीं किया।

पृ० १६२२, पं० १२—"शतं ते अयुतं हायनान्०' इस अथर्ववेदीय मन्त्र में बतायी गयी सिद्ध पुरुषों की चार युग की आयु को याद करना चाहिये। वैसी ही दीर्घ आयु याज्ञवल्क्य की थी। महाभारत में याज्ञवल्क्य जनक से कहते हैं कि हे मिथिलेश! मैंने यजुर्वेद को भगवान् आदित्य (सूर्य) से प्राप्त किया है। वहीं यह भी बताया गया है कि याज्ञवल्क्य ने सम्पूर्ण शतपथब्राह्मण की रचना की। शतपथब्राह्मण के १४वें काण्ड से भी याज्ञवल्क्य और जनक के सम्बन्ध पर प्रकाश पड़ता है।"

यह सब कथन शास्त्र की बात को न समझने के कारण किया गया है। उक्त अथर्ववेद के मन्त्र में चार अरब बत्तीस करोड़ वर्ष कल्प की आयु का वर्णन किया गया है। इतने समय तक कोई नहीं जी सकता। यदि एक कल्प आयुप्रमाण जीवन का माना जाये तब तो वह अनश्वर ही होगा। मिथिलाधिप, आदित्य (ब्रह्मचारी) व्यास, याज्ञवल्क्य— ये उपाधियाँ प्रचलित हो गयीं थीं। याज्ञवलक्य की सन्तान और शिष्य भी याज्ञवल्क्य कहलाये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न हि सरस्वती साकारा मन्तव्या। यदर्थं तत्रैव महाभारते प्रयुक्तम्—'विवृतं च ततो नाऽऽस्यं प्रविष्टा च सरस्वती।' एवमसम्भवदोषग्रस्तानि स्थलानि व्यञ्जनया सङ्गमयितव्यानि यथायथम्।

पृ० १६२३, पं० ५—यदुक्तम्—"वेदमन्त्रैर्विना कश्चिद् विधिर्नास्ति द्विजन्मनाम्" (बृहत्पाराशरस्मृतौ ९।६७) इति कथनप्रयोजनं त्वेतदेव यद् वेदाः कथमपि न विलोप्येरन् द्विजातिशयप्रयत्नेन रक्ष्येरन्। अर्थांस्ते जानीयुर्न वा परं शब्दरूपास्तु प्रयोज्या एव प्रत्येकवैदिकविधिषु। अस्तु, धन्यवादार्हास्ते, परं ज्ञानसूर्योदये तु अर्थज्ञानपुरस्सरं प्रयोगः कार्यः। स्वार्थपरायणैरज्ञानिभिः स्वकपोलकल्पिता विनियोगा अपि मध्यकाले कृताः। मत्स्यपुराणभविष्यत्पुराणाद्युदाहरणानि तु बुद्धिविरहितान्यत्र। उक्तधार्ष्ट्यवचनं तु तवैव स्वीया सम्पत्तिस्तत्र तवैवैकाधिकारं वयं मन्यामहे। अतः स्वस्मिन्नेव घटयन्तु।

पृ० १६२३, पं० २०—यदत्र—"केषाञ्चिन्मन्त्राणां प्रत्यक्षवृत्त्याऽतथार्थत्वेऽपि विनियोगानुसारेणार्थो भवति, यथा—'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति विनियोगानुसारेणेन्द्रपराया अप्यैन्द्र्या ऋचा गार्हपत्योऽग्निरर्थो भवत्येव। सूर्यदेवतापरस्याऽपि मन्त्रस्य

सरस्वती को इस कल्पित आकारवाली भी नहीं समझना चाहिये। इस प्रकार असम्भव दोष से ग्रस्त शास्त्रीय स्थलों की व्याख्या ध्वनि व ऊहन के द्वारा सङ्गत करनी चाहिये।

पृ० १६२३, पं० ५—"द्विजन्मों की वेदमन्त्रों के बिना कोई विधि नहीं है" (बृ० पाराशरस्मृति ९।६७) इस कथन का प्रयोजन तो इतना ही है कि जैसे भी हो वेद किसी भी प्रकार लुप्त न हो जावें। द्विज अति प्रयत्न से रक्षा करें। अर्थों को वे कदाचित् न भी जानें, तो शब्द की तो रक्षा कर ही लें। प्रत्येक विधि में उनका ही प्रयोग करे। पर दुर्भाग्य है कि वैदिक यज्ञ भी दुर्गासप्तशती और हनुमान् चालीसा आदि के श्लोक और चौपाइयों से करने लगे हैं। स्वार्थपरायण अज्ञानियों ने मध्यकाल में स्वकपोलकल्पित विनियोग भी रच डाले, जिनसे महान् अनर्थ गोवधादि हुए। मत्स्यपुराण और भविष्यत्पुराण के उदाहरण दिये गये बुद्धिविपरीत हैं। उक्त धृष्टता-वचन तो आपकी अपनी अविभाज्य सम्पत्ति है, उसमें हम आपका ही एकाधिकार मान रहे हैं; क्योंकि आप उसके उचित पात्र हैं, जो आपके करों की कृति से प्रत्यक्ष हो रही है।

पृ० १६२३, पं० २०—"किन्हीं मन्त्रों का अर्थ प्रत्यक्षतः वैसा न भी हो, तो भी मन्त्रों का अर्थ विनियोग के अनुसार ही किया जाता है। जैसे कि—'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इस विनियोग के अनुसार इन्द्र देवता का निर्देश करनेवाली ऋचा में गार्हपत्य अग्नि की स्तुति की जाती है। इस विनियोग के अनुसार मन्त्र का इन्द्रपरक अर्थ न स्वीकार कर अग्निपरक अर्थ माना

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विनियोगवशान्मानुषीवधूपरत्वं भवति।.....एवमेव 'दधिक्राव्णो०' इत्येष मन्त्रोऽग्न्युपस्थाने अग्निहोत्रे दधिभक्षणे, अश्वमेधेऽश्वसन्निधौ पत्नीसन्निवेशे।.....तस्माद् विनियोगानुसारेण ग्रहपरत्वमपि मन्त्राणाम्।" इत्युच्यते, तेन ग्रहपूजासिद्धिस्तु खपुष्पायते, जडपूजनस्य निष्फलत्वात्, अश्वमेधेऽश्वसान्निध्ये राज्ञः शयनस्य आचारप्रतिकूलत्वात्, अनौचित्याद-विहितत्वाच्चाविधेयता।

पृ० १६२४, ४ पंक्तितः १६३३ पृ० ९ पंक्ति यावदुद्धरणानि पुस्तकशरीरवर्धनार्थ-कत्वादनालोच्यानि आलोचनानर्हत्वात्।

पृ० १६३३, पं० १०—"यत्तु—(अयमग्निः) परमेश्वरो भौतिको वा (दिवः) प्रकाशवल्लोकस्य (पृथिव्याः) प्रकाशरहितस्य च (पतिः) पालयिता (मूर्धा) सर्वोपरि विराजमानः (ककुत्पतिः) ककुभां दिशां च मध्ये व्यापकतया सर्वपदार्थानां पालयिता (अपां रेतांसि) अयमेव जगदीश्वरो भौतिकश्चाग्निः, प्राणानां जलानां च रेतांसि वीर्याणि (जिन्वति) पुष्णाति। एवञ्चाग्निर्विद्युद्रूपेण सूर्यरूपेण च पूर्वोक्तस्य रक्षकः पुष्टिकर्ता चास्ति' इति, तत्तु विशृङ्खलमेव, अग्न्युपस्थानप्रसङ्गेऽग्निदेवतापरत्वेन व्याख्यानस्यौचित्येन ककुत्पदेन

जाता है। इसी आधार पर सूर्या नामक देवता के मन्त्र का विनियोग मनुष्यजाति की वधू के लिये किया जाता है।....ऐसे ही 'दधिक्राव्णो०' मन्त्र अग्नि के उपस्थान में, अग्निहोत्र में, दधिभक्षण में, अश्वमेध में, अश्व के पास पत्नी-सन्निवेश में विनियुक्त होता है।....अतः मन्त्र का विनियोग ग्रहपरता में है।"

यह कहकर भी आपके द्वारा जड़ ग्रहों का अक्षत, पुष्प, चन्दन आदि से ग्रहपूजन सिद्ध नहीं किया जा सकता है। यह पूजा आकाशपुष्पवत् है; क्योंकि जड़ का यह पूजन भी निष्फल है। अश्वमेध में अश्व के समीप रानी का शयन आचारप्रतिकूल, अनुचित और अविहित है अतः अविधेय है। पृ० १६२५, पं० ६ में बुध ग्रह को ज्ञानमय कहना मौर्ख्य की पराकाष्ठा है।

आगे पृष्ठ १६३३ की पंक्ति ९ तक पुस्तक-कलेवर को बढ़ाने के लिये पुस्तकों से उद्धरण दिये हुए हैं, वे इस समय यहाँ आलोचना के योग्य नहीं हैं।

पृ० १६३३, पं० १०—"अग्निर्मूर्धा०' इस मन्त्र का स्वामी दयानन्द ने यह अर्थ किया है—'यह जो अग्निसंज्ञक परमेश्वर या भौतिक अग्नि है, वह प्रकाशवाले और प्रकाशरहित लोकों का पालन करनेवाला तथा सब पर विराजमान और दिशाओं के मध्य में अपनी व्यापकता से सब पदार्थों का राजा है। वही जगदीश्वर और भौतिक अग्नि प्राण और जलों के वीर्य को पुष्ट करता है। इस प्रकार भूताग्नि भी विद्युत् और सूर्यरूप से पूर्वोक्त पदार्थों का पालन और पुष्टि करनेवाला है।' यह सारा कथन निराधार है। जब अग्नि के उपस्थान में मन्त्र का विनियोग होगा, तो उसकी व्याख्या अग्नि देवता से ही सम्बद्ध की जानी चाहिए और तब ककुद् शब्द का अर्थ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ककुभां ग्रहणे भानाऽभावात्।"

इति गहनामननपरिणतम्, स्वकीयोच्छृङ्खलस्वभावादयमिह विशृङ्खलमलेखीत्। अयं भौतिकोऽग्निर्देवो जडः, अग्निवाच्यः परमेश्वरस्तु चेतनो महादेवोऽतोऽग्निदेवतापरकमेव शृङ्खलासंयतं व्याख्यानमिदम्। ककुभो व्यत्ययेन भस्य तकारः कृतो नाऽत्र काचिद्विप्रतिपत्तिः।

पृ० १६३४—यदयम् 'उद्बुध्यस्वाग्ने०' इति मन्त्रार्थं आक्षिपति यदेतद् व्याख्यानं प्रकरणविरुद्धम्, परमेतदलीकम्, अभौतिकाग्निग्रहणेष्टत्वात्। नहि कश्चिद् जीवनायोपयोगेऽर्थस्तथा स्यात्, अर्थस्त्वयमेव श्रेयान् ऋषेः। असपत्नेष्टकायाश्चयनमपि क्रियेत नाम तव कात्यायनानुसारम्। भौतिकाग्निसम्बोधने नैवात्मकल्याणम्, तस्मात् परमेश्वरोऽपि सम्बोधितः। परमात्मसम्बोधनेनार्थो विहितः—अविद्यान्धकारनिद्रातः सर्वान् जीवान् पृथक् कृत्य विद्यार्कप्रकाशे जागरितान्कुरु, इति श्रेयानर्थः। अस्मिन् मन्त्रे इष्टम् आपूर्तं च द्वयं निर्दिष्टमस्ति। परमात्मकृपया इष्टं सिद्धं भवेत् मनुष्यस्य आत्मपुरुषार्थेन च धर्मादिचतुष्टयसामग्रीपूर्तिं कुर्यात् सः। 'इष्टापूर्ते संसृजेथाम्' इत्यनयोरेव व्याख्यानं विशदं कृतम्।

दिशा नहीं किया जा सकता।"

उक्त लेखन करपात्री जी द्वारा शास्त्रों के गहन मनन न करने का ही परिणाम है। अपने उच्छृङ्खल स्वभाव के कारण इन्होंने यहाँ स्वामी जी के लेख को विशृङ्खल कहा है। यह भौतिक अग्नि जड़देव है, अग्निवाच्य परमेश्वर चेतन महादेवतापरक ऋषि की व्याख्या समस्त सुसम्बद्ध है। 'ककुभ्' के अकार को छान्दस व्यत्यय से तकार कर लेने में कोई बाध नहीं है।

पृ० १६३४—आप यहाँ 'उद्बुध्यस्वाग्ने०' इस मन्त्र के व्याख्यान को प्रकरणविरुद्ध बताते हैं, पर ऐसा आरोप सर्वथा मिथ्या है; क्योंकि यहाँ प्रधानरूप से अभौतिक अग्नि का ग्रहण करना इष्ट है। आपके अर्थ में जीवन का उपयोगी कोई सन्देश नहीं है, इसलिये जीवनोपयोगी उपदेश पूर्ण होने से ऋषि का अर्थ ही श्रेयस्कर है। कात्यायन के अनुसार मन्त्र का विनियोग असपत्न नामक इष्टका के चयन में है। अच्छा, उस इष्टका का चयन भी कर लिया जावे, फिर इससे जीवन को क्या सन्देश मिला ? न भौतिक अग्नि के सम्बोधन में कोई आत्मकल्याण है। इसलिये ऋषि के अर्थ में परमेश्वर भी सम्बोधित किया गया है। अथवा अग्नि शब्द से ईश्वरचिन्तन पर श्रद्धा की आग को जगाया जावे, इससे प्रत्यक्ष स्फूर्ति मिलती है। इसीलिये ईश्वर से प्रार्थना की गयी है कि आप अविद्या अन्धकार से सब जीवों को पृथक् रखकर विद्या सूर्य के प्रकाश से जगमगा दो, यह अर्थ कितना श्रेष्ठ है। इस मन्त्र में इष्ट और आपूर्त दो निर्दिष्ट किये गये हैं। परमात्मा की कृपा से इष्ट सिद्ध होवे और अपने पौरुष के द्वारा धर्मादि चतुष्टय सामग्री की पूर्ति हो। इष्ट और आपूर्त दो का विशद व्याख्यान कर दिया गया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६३४, पं० १३—यदाह—'सर्वे विद्वांस एकेन सेवकेन इह जन्मनि परस्मिन् वा सीदन्तीति निर्मूलम्" इति तु 'अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत' इत्यस्यैव भाष्यमिति प्रज्ञाशून्यो न पश्यतीति।

अत्र महाविदुषः साहित्यविद्यालङ्कारस्य श्रीवागीश्वरस्य वैदिक-साहित्य-सौदामनीतोऽर्थोऽवतार्यते प्रासङ्गिकत्वात्—

"उद्बुध्यस्वाग्ने०' नित्यमुभयसन्ध्ययोर्दैनिकाग्निं प्रज्वालयतस्तदैव च मन्त्रमिमं पठतो जनस्य मानसमयं भौतिकोऽग्निरेव प्रथममधिरोहति, साहचर्यात्। परतस्तु कालान्तरे 'अस्मिन्सधस्थे अध्युत्तरस्मिन्' इत्यादीनामन्येषां पदानां सान्निध्यात् तदग्निपदं साधकचेतसि समुद्बुद्धस्याऽभौतिकस्याऽग्नेरपि व्यञ्जकम्, उत्तरलोकेन भौतिकाग्नेरसम्बन्धात् सततसाधनयाऽन्तरात्मन्येव अग्निभावं प्राप्ते साधको बाह्यमग्निं परित्यजति। तदुक्तं मनुना—

'आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्।' मनु० ६।३८॥

पृ० १६३४, पं० १३—यह कहना कि—"सारे विद्वान् एक ही सेवक के साथ इस जन्म और दूसरे जन्म में भी रहते हैं' ऐसा अर्थ करना भी सरासर गलत है।" करपात्रीजी का यह ग़लत कहना ही गलित है; क्योंकि ये ऋषि के शब्दों को सही रूप में कभी समझने और प्रस्तुत करने का संविवेक नहीं रखते। हिन्दी अर्थ (ऋषि का) फिर ध्यान से पढ़िये। इस जन्म के सेवक की दूसरे जन्म में रहने की कोई बात ही नहीं कही गयी। वस्तुतः यह प्रज्ञाशून्य भाष्य को ठीक से देखता ही नहीं।

यहाँ पर साहित्य के महान् विद्वान् श्री वागीश्वर विद्यालङ्कार के 'वैदिक-साहित्य-सौदामनी' का अर्थ प्रासङ्गिक होने से दिया जा रहा है—

"उद्बुध्यस्वाग्ने' नित्य उभय सन्ध्याओं में दैनिक अग्नि प्रज्वलित करनेवाले तथा उस समय इस मन्त्र को पढ़ते हुए मनुष्य के मन में यह भौतिक अग्नि ही प्रथम उपस्थित होता है; क्योंकि हवन करने के कार्य में इसी अग्नि का साहचर्य है। फिर कालान्तर में 'इस घर (जन्म) या उत्तर जन्म या लोक में' इन पदों के सान्निध्य से वह अग्नि पद साधक के मन में समुद्बुद्ध अभौतिक अग्नि का भी व्यञ्जक है; क्योंकि उत्तर या परलोक से भौतिक अग्नि का कोई सम्बन्ध नहीं। सतत साधना के द्वारा अन्तरात्मा में ही अग्निभाव को प्राप्त साधक बाह्य अग्नि को छोड़ देता है। जैसा कि मनु ने लिखा है—

'ब्राह्मण आत्मा में (परमेश्वरज्ञानरूपी) अग्नि को आरोपित करके घर से प्रव्रजन करे।' (६।३८)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदा तु कस्यचित् पदस्य लोकप्रसिद्धोऽत एव रूढायमानोऽर्थस्तत्र वर्णितैः कार्यकलापैर्विशेषणैश्च सामञ्जस्यं नावहति तदा तत्र तस्य प्रकृतिप्रत्ययोपसर्गादिरूपावयवानां शक्त्यां समुद्भासमानो योऽर्थस्तत्र सङ्गच्छते स यौगिकः। इत्थं वेदे योगो रूढिमपहरति।" (पृ० ९५-९६)

"यथा च 'वायसो दोषा दयमानो अबूबुधत्' (ऋ० १।२।२१) इति निरुक्ते (४।१७) उद्धृतम्। वायसपदमिह काकपरकम्। वर्ण्यमानव्यापाराणां काकेऽनुपपद्यमानत्वात्तु पर्यवसाने सूर्यपरको वाऽध्यात्मसम्बन्धी वाऽपरोऽर्थ उपतिष्ठते।" (पृ० ९६) । एवं महर्षिकृत एवार्थः श्रेयान्।

'बृहस्पते अति०' इति मन्त्रस्यार्थ ऋषिकृत एव श्रेयान्।

पृ० १६३५, अनु० २—यदप्याह—"अन्नात् परिस्रुतो रसम्०' इति तु सर्वथाऽनृतमेव, एवमाज्ञापयतीति पदस्य मूलेऽभावात्, अन्नाद् भोज्यपदार्थात् कथममृतात्मको रसश्च्युतो युक्तो वा कार्य इत्यस्यानिरूपणात्। एवं बुद्ध्यानन्दादिप्रदं रसं व्यपिबद् इत्यत्रापि किं मूलम्? विपानं विविधराजधर्मरक्षणमित्यपि निर्मूलम्। अन्धसः शुद्धान्नस्येच्छाहेतुमित्यपि स्वकपोलकल्पितमेव व्याख्यानम्। कृपेत्यपि निर्मूलम्।"

जब किसी पद का लोकप्रसिद्ध रूढ़ अर्थ वहाँ वर्णित कार्यकलाप और विशेषणों से सामञ्जस्य नहीं करता है, तब वहाँ उस प्रकृति प्रत्ययादि रूप अवयवों की शक्ति में समुद्भासमान जो अर्थ है, वह वहाँ सङ्गत होता है, उसे यौगिक कहते हैं। इस प्रकार वेद में योग रूढि को परास्त करता है। जैसे—'वायसो दोषा दयमानो अबूबुधत्' (ऋ० १।२।२१) निरुक्त (४।१७) में उद्धृत है। यहाँ 'वायस' प्रसिद्धिरूप में काकपरक है, परन्तु वर्ण्यमान व्यापार काक में अनुपपन्न है, तो अन्त में सूर्यपरक या अध्यात्मसम्बन्धी या दूसरा अर्थ उपस्थित होता है।"

इस समस्त पर्यालोचन से स्वामी दयानन्द का किया अर्थ निर्भ्रान्त, सत्य और समीचीन है।

'बृहस्पते०' इस मन्त्र का अर्थ भी ऋषिकृत ही उत्तम है।

पृ० १६३५, अनु० २—'अन्नात् परिस्रुतः०' इस मन्त्र के ऋषिकृत अर्थ को पारिजातकार कह रहा है कि—"एकदम ग़लत है; क्योंकि आज्ञा का प्रदर्शक कोई पद मन्त्र में विद्यमान नहीं है। अन्न अर्थात् भोज्य पदार्थ से अमृतस्वरूप रस को कैसे चुवाया जायेगा, अथवा अन्न में अमृत कैसे मिलाया जायेगा, इसकी कोई विधि भी नहीं बतायी गयी है। इसी तरह बुद्धि को आनन्द से भर देनेवाले रस को पीने की बात भी कहाँ से निकलेगी? विपान शब्द का अर्थ यथावत् प्रजा का रक्षण भी कैसे होगा? 'अन्धसः' पद का अर्थ शुद्ध अन्न की इच्छायुक्त करना कोरी मनमानी है। ईश्वर की कृपा की बात निकालना भी निराधार है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादिकथनं समग्रमपि वितण्डान्तर्गतं निर्बुद्धि-पूर्वकमुपन्यस्यतेऽनेन ईर्ष्याविद्वेषपरीतमनसा। अमृतात्मको रसस्तु सोमाद्योषधिसम्पादित इति मूलम्। रसशब्दस्यैव बुद्धेरानन्दादयोऽर्था भवन्ति इति प्रज्ञावन्तो विजानन्ति साहित्यरसिकाः।

इह सोमप्रसङ्गे किञ्चिद् विशदीकृत्य व्याख्यास्यते, तद्यथा—वेदेषु ब्राह्मणग्रन्थेषु च सोमवर्णनं प्रायशः क्रियते। ऋग्वेदनवममण्डलस्य तु देवता सोमः। सूत्रग्रन्थेष्वपि सोमवर्णनमस्ति। सुश्रुते तु विशेषरूपेण वर्ण्यते। अनयैव सोमलतया कायकल्पोऽपि विधीयते। यथा—

ब्रह्मादयोऽसृजन् पूर्वममृतं सोमसंज्ञितम्।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥ ३ ॥
(सुश्रुत-चिकित्सास्थाने अ० २९)

इत्यादि पारिजात का कथन वितण्डा के अन्तर्गत निर्बुद्धिपूर्वक ही लेखक द्वारा ईर्ष्या और विद्वेष से भरे मन से उपन्यस्त किया जा रहा है। इन्होंने नहीं विचारा कि सोमलता आदि ओषधियाँ भी अन्न शब्द से ग्राह्य होती हैं, जिनसे अमृत के समान बुद्धि, आनन्द, शूरता आदि गुणों को देनेवाला रस निकलता है। अन्न सोमलता का वाचक है। प्रमाण देखिये—'अन्नं सोमः' (कौशीतकी ९। ६; तां० ६। ६।१; शतपथ ३। ३। ४। ३८; ३। ९। १। ८; ७। २। २। ११), 'सोमो वै राजा ओषधीनाम्' (कौशीतकी ४। १२)।

यह सोमलतादि ओषधियों से निकलनेवाला रस आनन्द से बुद्धि को भर देनेवाला होता है। इसमें प्रमाण देखिये—'ओषधयो वै मुदः, ओषधिभिर्हीदं सर्वं मोदते।' (शत० ९। ४। १। ७)। रस का अर्थ बुद्धि, आनन्द, शौर्यादि भी होता है, यह साहित्यरसिक प्रज्ञावान् जानते हैं। 'रस्यते आस्वाद्यते रसयति वा सर्वान् पदार्थान् सोऽपि रसः' जो आस्वादित किया जाये अथवा जो सारे पदार्थों को आस्वादन योग्य कर दे, वह रस कहाता है। अतः ऋषि द्वारा किये बुद्धि आदि समस्त अर्थ सुसङ्गत हैं।

यहाँ पर सोमप्रसङ्ग की विशदीकृत व्याख्या की जा रही है। जैसे वेद और ब्राह्मणग्रन्थों में सोम का वर्णन प्रायः मिलता है। ऋग्वेद के नवम मण्डल का तो देवता ही सोम है। सूत्रग्रन्थों में भी सोम का वर्णन है। सुश्रुत में विशेष वर्णन किया गया है। इसी सोमलता द्वारा कायकल्प भी किया जाता है। जैसे—

'ब्रह्मा आदि ने सृष्टि के आदि में सोमसंज्ञक अमृत की गवेषणा की। जिसका जरा और मृत्यु के विनाश के लिये वर्णन किया जाता है।' (सुश्रुत चिकित्सास्थान, अ० २९)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

असौ सोमश्चतुर्विंशतिप्रकारकः—

अंशुमान् मुञ्जवांश्चैव चन्द्रमा रजतप्रभः।
दूर्वासोमः कनीयांश्च श्वेताक्षः कनकप्रभः ॥ ५ ॥

प्रतानवांस्तालवृन्तः करवीरोंऽशवानपि।
स्वयंप्रभो महासोमो यश्चापि गरुडाहृतः ॥ ६ ॥

गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाक्वरस्तथा।
अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥ ७ ॥

गायत्र्या त्रिपदायुक्तो यश्चोडुपतिरुच्यते।
एते सोमाः समाख्याता वेदोक्तैर्नामभिः शुभैः ॥ ८ ॥
(सुश्रुत-चिकित्सास्थाने अ० २९)

एषु चतुर्विंशतिनामसु गायत्रादीनि नामानि वैदिकच्छन्दोभिः सम्बद्धानि। तत्र सोमानां प्राभिज्ञानमपि बोधितम्—

अंशुमानाज्यगन्धस्तु कन्दवान् रजतप्रभः।
कदल्याकारकन्दस्तु मुञ्जवाल्लशुनच्छदः ॥ २३ ॥

चन्द्रमाः कनकाभासो जले चरति सर्वदा।
गरुडाहृतनामा च श्वेताक्षश्चापि पाण्डुरौ ॥ २४ ॥

वह सोम २४ प्रकार का है—

'अंशुमान्, मुञ्जवान्, चन्द्रमा, रजतप्रभ, दूर्वा, सोम, कनीयान्, श्वेताक्ष, कनकप्रभ, प्रतानवान्, तालवृन्त, करवीर, अंशवान्, स्वयंप्रभ, महासोम, गरुडाहृत, गायत्र, त्रैष्टुभ, पाङ्क्त, जागत, शाक्वर, अग्निष्टोम, रैवत, उडुपति—ये २४ नाम हैं। इनमें गायत्र आदि नाम वैदिक छन्दों से सम्बद्ध हैं'। (सुश्रुत चिकित्सास्थान, अ० २९)

वहाँ सोमों की पहचान भी दी गयी है। जैसे—

'अंशुमान् सोम में घी की गन्ध आती है, रजतप्रभ कन्दवाला होता है, केले के आकार के कन्दवाला और लशुन के से पत्तेवाला मुञ्जवान् होता है। चन्द्रमा सुनहरी चमकवाला होता है और सिन्धु नद में तैरता रहता है। गरुडाहृत और श्वेताक्ष पीले भूरे रंग के होते हैं, साँप की केंचुली के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सर्पनिर्मोकसदृशौ तौ वृक्षाग्रावलम्बिनौ ।
तथाऽन्ये मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते ॥२५ ॥

सर्व एव तु विज्ञेयाः सोमाः पञ्चदशच्छदाः ।
क्षीरकन्दलतावन्तः पत्रैर्नानाविधैः स्मृताः ॥ २६ ॥
(सुश्रुत-चिकित्सास्थाने अ० २९)

प्रश्नोऽयं यदियमद्भुतलता क्व विलुप्ता या नोपलभ्यते। उत्तरं सुश्रुतेनैव प्रस्तुतम्—

न तान् पश्यन्त्यधर्मिष्ठाः कृतघ्नाश्चापि मानवाः ।
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा ॥ ३२॥
(सुश्रुत-चिकित्सास्थाने अ० २९)

युक्तमेव, ज्ञानद्वेषिणस्तावज् ज्ञानिनः कथं प्रबोधयेयुः ? नाद्यापि सोमलता लुप्ता, प्रत्युत गुप्ता विद्यते ।

इदन्तूक्तं भौतिकसोमविषये। इतरोऽपि सोमो यद्विषये भगवन्तो वेदाः प्राहुः । यथाऽथर्ववेदे—

समान वृक्षों पर लटकते रहते हैं तथा सब सोम चित्र-विचित्र मण्डलों से चित्रित होते हैं । ये सभी सोम पन्द्रह पत्तोंवाले होते हैं, इनके कन्द में दूध होता है, लता रहती है, नाना प्रकार के पत्तों वाले होते हैं ।' (सुश्रुत चिकित्सास्थान, अ० २९)

प्रश्न यह है कि यह अद्भुत लता अब कहाँ विलुप्त हो गयी, जो उपलब्ध ही नहीं होती । इसका सुश्रुत ने ही उत्तर दिया है—

'उन्हें अधर्मी, कृतघ्न, भेषजद्वेषी और ब्राह्मणद्वेषी नहीं देख सकते ।' (सुश्रुत चिकित्सास्थान, अ० २९)

यह कथन ठीक ही है । ज्ञान से द्वेष करनेवालों को वैद्य और ब्राह्मण भला बतायेंगे ही क्यों ? वैसे तो सोमलता आज भी लुप्त नहीं, प्रत्युत गुप्त है, जो कि उसके ज्ञानी द्वारा रक्षित और ज्ञात है ।

इतना तो भौतिक सोम के विषय में कहा गया । इसके अतिरिक्त भी सोम है, जिसे भगवान् वेद बता रहे हैं । जैसे अथर्ववेद में—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सोमेनादित्या बलिनः सोमेन पृथिवी मही।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः॥

सोमं मन्यते पपिवान् यत् सम्पिशन्त्योषधिम्।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः॥

यत् त्वा सोमं प्रपिबन्ति तत आप्यायसे पुनः।
वायुः सोमस्य रक्षिता समानां मास आकृतिः॥

आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः।
ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः॥ (१४।१।२-५)

एषु गम्भीरार्थो विनिविष्टः। ये ब्राह्मणा विजानन्ति, त एवास्य रसानुभूतिं कर्तुं पारयन्ते।

उपर्युद्धृतैर्मन्त्रैर्ध्वन्यते यत् त्रिविधस्त्रिस्थानीयः सोमः। प्रथमः सुश्रुतवर्णितो भूतलगतः सोमः! द्वितीयोऽन्तरिक्षगतो ज्योतिषशास्त्रवर्णितश्चन्द्रमाः। तृतीयश्च द्युलोकगतः सोमः सहस्रारचक्रब्रह्मरन्ध्रस्थापितप्राणैर्योगिभिरास्वाद्यत आनन्दरूपः सोमः। अयं च सर्वातिशायी। अनेनैव सोमेनादित्यो बलवान् भवति, पृथिवी महीयते, नक्षत्राणि च भ्राजन्ते। एतदेव जगतो जीवनम्।

ऋग्वेदस्य नवममण्डलं पवमानसोमप्रशंसनपरिपूर्णम्। अयं च पवमानो ब्रह्मानन्द एव।

'सोम से आदित्य (मास) बल पाते हैं। सोम से पृथिवी महिमायुक्त है। नक्षत्रों की गोद में भी सोम विराजमान है॥ सोम को पिया गया मानते हैं, जिसे पीसते भी हैं। पर इस सोम को चतुर्वेदज्ञ ब्रह्मा जानते हैं। उस को राजा भी नहीं खा सकता॥ हे सोम! जिस तुम को पीते हैं, और उससे तृप्त होते हैं। वायु (प्राण) सोम का रक्षक है। मास में समान आकृति हो जाती है॥ वर्षों का सोम व्यवच्छेदक है। छापे हुए विधानों से रक्षित है॥' (अथर्व० १४।१।२-५)

वेदवर्णित यह सोम ब्रह्मानन्द-रसानुभूति है। जो ब्राह्मण जानते हैं, वे ही इस रसानुभूति को पा सकते हैं।

उक्त मन्त्रों से प्रकट हुआ सोम त्रिस्थानीय तीन प्रकार का है—प्रथम तो भूतल पर सुश्रुतवर्णित सोमलता के रूप में। द्वितीय—अन्तरिक्ष का चन्द्रमा, जिसका ज्योतिषशास्त्र में वर्णन है और तीसरा सोम द्यु अर्थात् प्रकाशलोक सहस्रारचक्र के ब्रह्मरन्ध्र में प्राणों को ले जानेवाले योगियों द्वारा प्राप्त किया हुआ आनन्द है। यह सब में श्रेष्ठ और सर्वोपरि है। इसी सोम से आदित्य बलवान् होता है, पृथिवी महती है और नक्षत्र भ्राजमान हैं। यही जगत् का जीवन है।

ऋग्वेद का नवम मण्डल इसी पवमान सोम के वर्णन से परिपूर्ण है। यह ब्रह्मानन्द है, इसे राजा भी नहीं चख सकते। इसका स्वाद तो कौपीनवन्त भाग्यवन्त सन्त ऋषि दयानन्द सदृश ही

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नेमं सोमं राजानोऽपि आस्वदन्ते। इमं तु कौपीनवन्तो भाग्यवन्तः सन्तो दयानन्दसदृशा एव ब्राह्मणा आस्वदन्ते, न करपात्रसदृशाः। अत एवोक्तम्—

'सोमोऽस्माकं ब्राह्मणानां राजा' (यजुः० ९।४०)

ब्रह्मानन्दस्वादाभिभूतमानसेषु सोमस्यैव राजत्वम्। ब्राह्मणानामन्नं तु सोम एव, तथाऽह—'अन्नं सोमः' (कौषीतकी)। तमेव सोमं ब्राह्मणानां भोजनार्थं गायत्री स्वर्गादानयद् अर्थाद् गायत्रीजपपरायणा ब्राह्मणा इमं सोममश्नन्ति। ज्योतिषावृते सहस्रारचक्रे स्रवन्तं सोमरसं योगिनो ब्रह्मस्था ब्राह्मणाः पिबन्ति। तत्सोमभागी इन्द्रो गायत्र्यनुष्ठानपदः। योगद्वारा पूतो जीवात्मा श्येनः। अयं कुशासनस्थो योगी समधिगन्ता। परं ये कुशासनस्थाः सन्तोऽपि योगदम्भं कुर्वाणाः कुटिला अहिसर्पास्तेऽपि तपस्यया सोमरसस्य कतिचन बिन्दून् कुशपतितान् लिहन्ति, तेषां तु जिह्वा विदीर्णा भवति। अतो हि ते द्विजिह्वाः। तेषां प्रत्यक्षजीवनं दम्भपूर्णं सरलं दृश्यते, परं वस्तुतो परोक्षे याथार्थ्येन कुटिला एव। 'मनस्यन्यद् वचस्यन्यत्' इति जिह्वाद्वयं तेषाम्। अत एव शतपथब्राह्मणे व्याकृतं यथायथम्—

ले सकते हैं। श्री करपात्री जैसे अभागे को कैसे मिल सकता है, जो 'अन्नात् परिस्रुतः' (पृ० १६ २५, अनु० २ में) 'अन्न' अर्थात् भोज्य पदार्थ से अमृतस्वरूप रस (आध्यात्मिकामृत) को परिस्रुत करनेवाले ऋषि दयानन्द के अर्थ में असम्भवता देख रहे हैं। यह सोमरस केवल ब्रह्मस्थ ब्राह्मणों से ही आस्वाद्य है, तभी तो कहा है—

'हम ब्राह्मणों का राजा सोम है' (यजुः० ९।४०)।

अर्थात् ज्ञानी तपस्वी ब्राह्मण पर सोम का शासन रह सकता है, किसी अन्य का नहीं। ब्राह्मणों का अन्धस् = अन्न तो सोम ही होता है। तभी तो कौषीतकीब्राह्मण में 'अन्नं सोमः' कहा है। इसी सोम को ब्राह्मणों के भोजनार्थ स्वर्ग से गायत्री लायी थी। यही सोम 'गृणीते उपदिशतीति गरुडो वेदः' गरुड (वेद) द्वारा लाया गया, जो वेद सुपर्ण अर्थात् पूर्ण तृप्तिकारक है। इसी को ज्योतिषावृत सहस्रारचक्र में टपकने पर योगी ब्राह्मण पीते हैं। उसी सोम का भागी गायत्री-अनुष्ठान में लगा हुआ इन्द्र जीवात्मा ही श्येन भी है। यह कुश के आसन पर स्थित होकर योग में सोम को प्राप्त करता है। परन्तु जो कुशासन पर ढोंगी योगमुद्रा बनाकर बैठ गये हैं, वे कुटिल अहि सर्प भी कुश पर गिरे सोमामृत के बिन्दुओं को चाट लेते हैं, अतः उनकी जिह्वा द्विधा विदीर्ण हो जाती है और वे द्विजिह्व हो जाते हैं। उनका प्रत्यक्ष जीवन कुछ और कहता और परोक्ष कुछ और कहता है। प्रत्यक्ष में सरल, पर परोक्ष में वे कुटिल होते हैं। अर्थात् 'मन में अन्य और वाणी में अन्य' यही उनका द्विजिह्वत्व है। इसीलिये शतपथ-ब्राह्मण में उसको ठीक व्याकृत किया गया है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'प्रजापतेर्वा एते अन्धसी यत् सोमश्च सुरा च।
तत्र सत्यं श्रीर्ज्योतिः सोमोऽमृतं पाप्मा तमः सुरा॥'

एतमेव सोमं पीत्वा ब्रह्मस्थ ऋषिः 'बुद्ध्यानन्दादिरसं व्यपिबत्' इत्यर्थं निश्च्योतयते मन्त्रात्, यत्रायं शङ्कमानोऽन्यथा ब्रूते। तामाध्यात्मिकीमवस्थां ब्रह्मानन्दस्वरूपामेवं समर्थयते—

'अपाम सोमममृता अभूम, अगन्म ज्योतिरविदाम देवान्।' (ऋ० ८।४८।३)

'स्वादिष्ठया मदिष्ठया पवस्व सोमधारया। इन्द्राय पातवे सुतः॥' (ऋ० ९।१।१)

केचनास्मिन् मन्त्रे 'मदिष्ठया धारया' इति पदे दृष्ट्वा मतिमूढास्ते सोमं सुराऽभिन्नमादकं द्रव्यं (शराब) इति व्याचक्षते। इमे पशुबुद्धय उक्तब्राह्मणे वर्तमाने कथं धृष्टतया सोमं सुरां चैकीकर्तुं चेष्टन्ते? नात्र मन्त्रे 'सुतः' शब्दः प्रचलितसुराच्यवनं द्योतयते, तदर्थं पश्यन्तु निरुक्तटीकाकारदुर्गाचार्यदृशा। तद्यथा—

'प्रजापति के दो अन्न (अन्धसी) हैं—सोम और सुरा, जहाँ सत्य, श्री और ज्योति है, वह सोम अमृत है और जहाँ पाप, अज्ञान है, वह सुरा है।'

इसी रस को पीकर ब्रह्मस्थ ऋषि उक्त मन्त्र से 'ब्रह्मानन्दादि रस को विशेषरूप से पिया' यह अर्थ निकालते हैं। जिस पर शङ्का करते हुए पारिजातलेखक अन्यथा ही कह रहे हैं। ब्रह्मानन्दस्वरूप उस आध्यात्मिक अवस्था का समर्थन श्रुति करती है—

'हमने सोमरस को पिया और अमर हो गये। हमने उस प्रकाश को प्राप्त कर लिया है और देवों को जान लिया है।' (ऋ० ८।४८।३)

'हमें अति स्वादिष्ट और अति आनन्दकारिणी सोमरस की धारा से पवित्र कीजिये।' (ऋ० ९।१।१)

भला जब 'पाप्मा तमः सुरा' यह ब्राह्मणवाक्य सुरा को पापमय कह रहा है, तो उसी सुरा से वेदमन्त्र 'पवस्व' (पवित्र करो) की बात कैसे कह सकता था।

जैसा कि इस मन्त्र में 'मदिष्ठया धारया' पदों को देखकर किन्हीं मतिमूढों ने सोम को सुरा से अभिन्न मादक द्रव्य बता दिया। उन धृष्ट पशुबुद्धियों ने उक्त ब्राह्मणवाक्य के स्पष्ट शब्दों को क्योंकर नहीं देखा? ऐसे ही धृष्ट वेदद्रोही इसी मन्त्र के 'सुतः' शब्द से भी इसी शराब के चुआने का अर्थ निकालते हैं। उनको निरुक्त के टीकाकार आचार्य दुर्ग का भाष्य देखना चाहिये। वे 'सुतः' शब्द की व्याख्या करते हुए लिखते हैं—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"सुत आपूरितोऽसि सुषुम्णेन रश्मिना' सुषुम्णाकिरणेन पूरितः सुषुम्णानाड्यां प्राणः सुतोऽभिधीयते। नायं मदो भौतिकोऽपि तु आध्यात्मिकानन्दः।"

एतस्मिन्नेव भावे नानकदेवोऽप्याह—

और नशे संसार के उतर जाँय परभात।
नाम खुमारी नानका चढ़ी रहे दिन रात॥

अयं हि सोमो वेदगायकगन्धर्वाणां सन्निधावासीत्, वैदिकच्छन्दःस्वासीद् अस्ति वा। वस्तुतोऽयममरकाव्यवेदामृतरसोऽनिर्वचनीयः सोम इति दिङ्मात्रम्।

विपानं विविधरूपेण पानं रक्षणमित्यस्यार्थो विविधराजरक्षणमिति। अन्ध इत्यन्ननामसु पठितम्, एवमत्र शुद्धान्नस्य इच्छाया हेतुरप्यूहितस्तेनेच्छया सेवितस्यान्नस्य अतितरां बलप्रदायित्वात्। एवं भूमिकोक्ता अर्थाः श्रेयःसाधका एव। केवलग्रहपरत्वेऽनुपयोग एवार्थानाम्।

भूमिकायाः 'शन्नो देवीः०' इति मन्त्रस्यार्थे येऽबुद्धिपूर्वकाक्षेपा विहिताः सन्ति तेषां निराकरणं शब्दनिष्पत्तिपरिज्ञाने स्वत एव जायते। यथा नहि लौकिकं प्रसिद्ध्यर्थं वेदवेत्ता-

---

"सुषुम्णा नामक रश्मि के द्वारा सुषुम्णा नामक नाडी में आपूरित प्राण का नाम सुत है। यह भौतिक मद (नशा) नहीं है, किन्तु आध्यात्मिक आनन्द है।"

इसी भाव में नानकदेव जी भी कहते हैं—

और नशे संसार के उतर जाँय परभात।
नाम खुमारी नानका चढ़ी रहे दिन रात॥

यही सोम वेद के गान करनेवाले गन्धर्वों के पास था। वैदिक छन्दों में रहता था और अब भी रहता है। वास्तव में यह अमर काव्य वेदामृत सोम अनिर्वचनीय है।

रक्षणार्थक 'पा'धातु से पान और विविध या विशेषरूप से पान (रक्षण) विपान कहाता है। अतः विद्वान् इस अर्थ को सर्वोपयुक्त समझेंगे। व्याकरणज्ञान से शून्यों से हमें कोई भी शिकायत नहीं, जो विपान का अर्थ नहीं समझ पाये। 'अन्धसः' शब्द का 'अन्न की इच्छा के हेतु को' यह अर्थ करना ही ठीक है; क्योंकि इच्छापूर्वक सेवित अन्न बलादि गुणों का विशेष आधान करता है। 'अन्धसः' षष्ठ्यन्त पद साकांक्ष है, अतः 'अन्न की' इस साकांक्ष पद के साथ 'इच्छा का हेतु' देना अतितरां सङ्गत है। इस प्रकार भूमिका के अर्थ श्रेयःसाधक हैं, केवल जड़ग्रहपरक अर्थों में पूजन के सिवाय आप किसी वैज्ञानिक विधि के सन्निवेश की भी मन्त्रों में सम्भावना नहीं रखते।

भूमिका के 'शन्नो देवीः०' इस मन्त्र के अर्थ पर आपने जो अबुद्धिपूर्वक आक्षेप किये हैं, वे आक्षेप तो शब्दों की निष्पत्ति का ज्ञान यदि आपको हो जाये, तो स्वयं निराकृत हो जाते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽनुसरिष्यति, तस्यानुपयोगित्वात्। अत्र महर्षिणा 'आपः' इति शब्देन न भौतिकं जलमभीष्टं यथा परमेश्वरः सर्वव्यापकार्थोऽभीष्टः, तथा 'पीतये' इत्यस्य पानाय इति न पूर्णार्थः स्पष्टो जायते, तत्र तु परमेश्वरप्राप्त्या पूर्णानन्दस्य भोगेन तृप्तिरेव जायते। एवमत्र पानं क्रिया पानफलं च तृप्तिरुभयमपि ऊहितं भवति। 'शंयोः' इत्यनवगतम्, पदद्वये मते शम् सुखं रोगाणां शमनं वा, 'यु मिश्रणेऽमिश्रणे च' इति भयानां यावनं दूरीकरणम्। एवं शं सुखं यावयति मिश्रयति प्रापयति। शं योः अभितः परितः स्रवन्तु अर्थात् सर्वतः सुखस्य वृष्टिं करोत्विति साधिष्ठो ह्यर्थः सर्वथा। नहि कूपमण्डूकवृत्तिर्मनुष्यस्तज्ज्ञानसागरस्य विशालतामनुभवितुं शक्नोति।

पृ० १६३७, अनु० १—'कया नश्चित्र०' इति मन्त्रकृतार्थेऽयमाक्षिपति यत्—"वृता' इत्यस्य 'शुभगुणेषु वर्तमानया' इत्यर्थो विसङ्गतः।" परमयं न ध्यातवान् यत् 'शचिष्ठया कया' अतिशयेन सत्कर्मानुष्ठानप्रकारया उपासनारीत्या तु सद्गुणेष्वेव वर्तमानता भविष्यति न दुर्गुणेषु। तत्र 'शचिष्ठया कया' इति पदद्वयं मूलम्। वर्तमानया सभया इत्यत्रैव सङ्गतम्।

पृ० १६३७, षष्ठपङ्क्तौ 'नाभयम्' इत्यपि ते मन्ये मुद्रणदोषम्, यथा 'मित्र' इत्यत्र।

जैसे लोकप्रसिद्ध अर्थ का वेदों का अर्थ करनेवाला कभी अनुसरण नहीं करेगा, प्रत्युत वेदार्थ का अनुसरण करना लोगों का धर्म है; क्योंकि लोक के अनुगमन करने में वेदार्थ का कोई उपयोग नहीं होगा। यहाँ महर्षि ने 'आपः' शब्द से केवल भौतिक अर्थ जल ग्रहण न कर सर्वव्यापक परमात्मा का ग्रहण किया है। 'पीति' का अर्थ 'पीना' कर लेने से पूर्ण अर्थ की अभिव्यक्ति नहीं होती। यहाँ परमेश्वर की प्राप्ति होने से पूर्णानन्द का योग होने पर 'तृप्ति' यह अर्थ होता है। केवल पानक्रिया पूर्ण हो जाना ही पर्याप्त नहीं, प्रत्युत पीने का उद्दिष्ट अर्थ तो तृप्ति ही होती है, जिसका यहाँ ऊहन करना अति समीचीन है। 'शंयोः' यह पद अनवगत है। दो पद मानने पर शम् अर्थात् सुख या रोगों का उपशमन होगा। 'यु' धातु मिश्रण अमिश्रण दोनों अर्थों में है, इस प्रकार सुख से मिलाना, या सुखनाशक भय का दूर करना है। 'सुख और निर्भयता की सर्व वर्षा करें' यह अर्थ अत्युत्तम है। कुएँ का मेंढक ऋषि के ज्ञानसागर की गम्भीरता और विशालता का अनुभव ही नहीं कर सकता।

पृ० १६३७—'कया नश्चित्र०' इस मन्त्र के अर्थ में ये आक्षेप करते हैं कि 'वृता' का 'सत्य विद्या आदि गुणों में वर्तमान' यह अर्थ नहीं हो सकता। इनकी अदूरदर्शिता है तो 'शचिष्ठया' अर्थात् सत्कर्मानुष्ठान के प्रकारवाली उपासनारीति तो सद्गुणों में ही वर्तमान होनी चाहिए, न कि दुर्गुणों में। इस अर्थ के ऊहन करने में 'कया शचिष्ठया' ये दो पद कारण हैं। 'नाभयम्' यहाँ मुद्रणदोष ही हम मान रहे हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६३७, पं० ९—'केतुं कृण्वन्नकेतवे०' इत्यस्य भाष्ये यदयमाह—"उषद्भिः' इत्यस्य कामयमानैरिति कथमर्थः ?" तत्र ब्रवीमि, यजुर्वेदभाष्ये उषद्भिरिति सिद्धिः 'उष दाहे' इति धातोरेव कृतः। परमिह अर्थस्याध्यात्मिकस्य प्रधानतया प्रसङ्गेन कान्त्यर्थक-वशधातोः सम्प्रसारणे कृते उषद्भिरिति निष्पाद्यते। विशिष्टार्थावगमे तथोहनस्यौचित्यमेव। विद्वद्भिरेव परमेश्वरः प्रकृष्टतया सिद्धो जायते ज्ञायते वा न तु मूर्खैः। कदाचिन्नावतारो हि साकाररूपे तस्यासम्भवात्, नश्वरत्वापत्तेश्च शुद्धबुद्धमुक्तस्वभावस्य। अकेतवे (अज्ञानाय) प्रज्ञानप्रदानं कुर्वतो जगदीश्वरस्याद्यसामर्थ्याज्जगदीश्वरार्थोहनस्य सर्वथौचित्यात्।

पृ० १६३८, पं० ६—यदाह—"पेशःशब्दोऽपि सुवर्णाद्यर्थको न चक्रवर्तिराज्यसुखपरः, प्रमाणाभावात्।" इति, तदविचारचारु, अज्ञानविनाशाय प्रज्ञानम् अपेशसेऽर्थाद् दारिद्र्य-विनाशाय पेशःअर्थात् चक्रवर्तिराज्यसुखसम्पादकं धनं च कर्तुं द्वावेव समर्थौ पुरुषः परमेश्वर-श्च, पुरुषः सामान्यदारिद्र्यविनाशं धनेन हिरण्ययेन करिष्यति परं परमात्मा तु चक्रवर्ति-राज्यादिसम्भवमपि कर्तुं शक्तः, महत्तमं महत्तमवस्तुन एव याचनीयस्यौचित्यात्। हिरण्यं कस्माद् इति प्रश्नं समाधत्ते यास्काचार्यः—"ह्रियते जनाज्जनमिति वा, हितरमणं भवतीति वा,

---

पृ० १६३७, पं० ९—'केतुं कृण्वन्नकेतवे०' इस मन्त्र के भाष्य में जो ये पारिजातकार आक्षेप कर रहे हैं कि—"उषद्भिः' इसका 'कामना करनेवालों से' अर्थ कैसे हो गया ? जबकि 'उष दाहे' से इसकी सिद्धि होती है।" परन्तु आध्यात्मिक पक्ष में अर्थ करने पर 'वश कान्तौ' धातु से सम्प्रसारण करने पर तृतीया के बहुवचन में इसकी सिद्धि और अर्थ करने में कोई विघ्न नहीं है। विद्वान् परमात्मा को प्रकृष्टरूप से सिद्ध कर लेते हैं, मूढ लोग नहीं कर पाते। शुद्ध, बुद्ध, मुक्तस्वभाव का कभी अवतार या साकार रूप नहीं होता, अन्यथा उसकी नश्वरता होने लगेगी। आप कहते हैं कि जगदीश्वर अर्थ किस पद का है ? श्रीमन् ! अकेतु अर्थात् अज्ञानी के लिये उसका अज्ञानविनाश कर ज्ञान देनेवाला भला जगदीश्वर के अतिरिक्त कौन होगा ? अतः जगदीश्वर अर्थ का ऊहन सर्वथा सूपयुक्त है।

पृ० १६३८, पं० ६—यह कहना कि—"पेशः शब्द सुवर्ण आदि अर्थवाला है, चक्रवर्ती राज्य सुखपरक इसका अर्थ करने में कोई प्रमाण नहीं है।" यह कथन विचारशक्ति से शून्य है; क्योंकि जो अज्ञानविनाशार्थ वेदों जैसा सर्वोत्तम ज्ञान देता है और दारिद्र्य-विनाश के लिये छोटा व्यक्ति तो थोड़ा धन देता है, पर सर्वशक्तिमान् विश्वनाथ तो भौतिक धनों में सबसे बड़ा धन चक्रवर्ति-साम्राज्य ही क्यों न देगा ? महत्तम से महत्तम वस्तु की याचना (माँगना या आशा करना) ही उचित है। हिरण्य नाम धन (सुवर्ण) का क्यों है ? इसका समाधान यास्काचार्य देते हैं—"लोगों से लोगों तक ले जाया जाये, जिससे हित में रमण हो या जिसमें हृदय का रमण हो, प्राप्त करने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

हृदयरमणं भवतीति वा (हर्य गतिकान्त्योरिति) , हर्यतेर्वा प्रेषणकर्मणः।" (निरु० २।३।१०) । इत्यनेन चक्रवर्तिसाम्राज्यप्रेप्सा तु सर्वातिशायि धनमस्ति। तस्मादयमर्थोऽतितरां सङ्गच्छते।

पृ० १६३८, पं० ८—यदुच्यते—"सामाजिकैस्तु मन्त्राणामभ्यासार्थमेव यज्ञेषूच्चारणं क्रियते, यागादिश्च वायुजलशुद्ध्यर्थमेव। तथा सति मन्त्रा ग्रहार्थस्तावका बोधका वा भवन्तु, मा वा भवन्तु, तथापि मन्त्राणामभ्यासार्थमुच्चारणं यथान्यत्र यज्ञेषु कर्तव्यम्, तथैव ग्रहयागेष्वपि कर्तव्यमेव, तद्रीत्या विनियोगस्याकिञ्चित्करत्वात्।"

इत्यादि मिथ्यार्थप्रतिपादनादग्राह्यम्, 'ऋचो अक्षरे परमे व्योमन्' इत्यादिभिर्मन्त्रैस्तत्सार्थकाध्ययनस्यावश्यकत्वात्। यागादिभिः प्रत्यक्षं फलं तु वायुजलशुद्धिः केनाऽपि नापलपितुं शक्यते, परमत्र 'एव'करणं सर्वथाऽलीकम्, मन्त्रार्थमननेनोच्चारणकाले आत्मज्ञानादिकल्याणापादकत्वात्। मन्त्राणामभ्यासार्थमप्युच्चारणमर्थमज्ञात्वाऽप्यद्याऽप्यजीवयन् वेदान् वैदिकपद्धतिं चाऽतो ये स्मरन्त्यपि वा उच्चारणाभ्यासं कुर्वन्ति तेऽपि सर्वदा स्तुतिमर्हन्ति, स्वजीवनार्पणेन तद्रक्षणप्रयोजनत्वात्। अद्याऽपि प्रायशो दाक्षिणात्या उपलभ्यन्ते येऽर्थाज्ञातारोऽपि सन्तोऽस्माकं पूज्याः सम्मानार्हाश्च। विनियोगोऽपि क्वचिदनर्थकल्पनाय

की इच्छावाली 'हर्य'धातु से भी इसकी रचना होती है।" (निरु० २।३।१०)। इससे सिद्ध है कि चक्रवर्ती राज्य की प्राप्ति की इच्छा तो सर्वातिशायी धन है। इसलिये भूमिकार्थ अत्युत्तम है।

पृ० १६३८, पं० ८—"आर्यसमाजियों का मन्तव्य है कि यज्ञ के अवसर पर मन्त्रों का उच्चारण केवल इसलिये किया जाता है कि उनका अभ्यास, उनकी स्मृति बनी रहे और यज्ञ-याग प्रभृति का प्रयोजन भी केवल जल-वायु की शुद्धि है। इस परिस्थिति में मन्त्र नव ग्रहों के अर्थ को बतावें या न बतावें, तो भी मन्त्रों के अभ्यास के लिये जैसे अन्य यज्ञों के अवसर पर उनका उच्चारण किया जाता है, उसी तरह से ग्रह-याग के अवसर पर भी उनका उच्चारण कर लिया जाये तो इसमें आपको क्या आपत्ति है? आपके मत से विनियोग निरर्थक होते हैं।"

इत्यादि कथन निराधार है। हम प्रथम खण्ड में भी लिख चुके हैं कि ऋषि दयानन्द ने ऐसा कहीं नहीं लिखा कि यज्ञ का प्रयोजन केवल जल-वायु-शुद्धि है, प्रत्युत 'ऋचो अक्षरे परमे व्योमन्०' आदि मन्त्रों के व्याख्यान से बुद्ध्यात्मशुद्धि, पुनः उस अर्थज्ञान से मोक्षप्राप्ति भी है। पर प्रत्यक्ष फल जल-वायु-शुद्धि का अपलाप तो कोई नहीं कर सकता। अतः 'वायुजलशुद्ध्यर्थमेव' यह 'एव' करण सर्वथा मिथ्या है। मन्त्रों के अभ्यासार्थ उच्चारण अर्थ को न जानकर भी यदि किया जाता है, तो उससे भी अद्यावधि जैसे वेदपाठियों ने वेदरक्षा की है, इसी प्रकार वेदस्वरूप की रक्षा भविष्य में भी हो सकेगी। ऐसे वेदाभ्यासी भी प्रशंसा के योग्य हैं। आज भी प्रायशः दाक्षिणात्य हैं, जो अर्थ को न जानकर भी वेदों को कण्ठस्थ किये हुए हैं, वे सम्मान्य हैं। वाममार्गसमर्थक

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

परिष्करोति पन्थानमिति कृत्वा क्वचित् त्यक्तव्योऽयमिति बहु पल्लवितमस्माभिः प्राक्।

वेददृशा अद्वैतवादस्थितिः

यद्यपि वेदार्थपारिजातग्रन्थे नवीनवेदान्तमवलम्ब्य बहुत्रोद्धरणानि दत्तानि, यैर्जीवस्य ब्रह्मरूपपरिणतिर्ग्रन्थकृता साधिता, तत्तत्स्थलेष्वावश्यकं समाधानमपि प्रस्तुत्य जीवस्य ब्रह्मणि लयं प्रलयं वा निराकृत्य युक्तिप्रमाणैरीश्वरजीवप्रकृतीनां वास्तविकसत्ता समासाधिता कल्पद्रुमे। अस्मिन्नपि ग्रन्थप्रामाण्याप्रामाण्यप्रकरणेऽसौ विषयो नवीनवेदान्तदृशा मुहुरप्युपन्यस्तोऽनेन। अतोऽत्यावश्यकं मत्वा शास्त्रप्रमाणयुक्तिसम्बलितं सुविशदमधिक-मुपन्यस्यतेऽस्माभिर्यन्नायं सिद्धान्तः क्वचिदपि वेदे। तदत्र विशिष्टजिज्ञासवः सपरितोषं विवेचनपुरस्सरं निभालयन्तु।

वैदिकदर्शनं हि केवलं मस्तिष्ककण्डूघर्षणमात्रं न विद्यते। एतन्नाम मानवीयजिज्ञासापरिष्करणपूर्वकं सोपशमं समादधन्मुक्तिसरणिदर्शनार्थमस्ति। तदुद्देश्यं

विनियोग भी अनर्थकल्पन के लिये मार्ग परिष्कृत कर देता है, यह मानकर कहीं-कहीं वह त्याज्य है। इस प्रकार हमने भी आवश्यक अंशों के समाधान में बहुत कुछ संक्षेप में लिख दिया।

वेद की दृष्टि में अद्वैतवाद की स्थिति

यद्यपि 'वेदार्थपारिजात' ग्रन्थ में नवीन वेदान्त का अवलम्बन करके बहुत स्थानों पर उद्धरण दिये हैं, जिनसे ग्रन्थकार द्वारा जीव की ब्रह्मरूप में परिणति सिद्ध की गयी है। उन-उन स्थलों पर वाञ्छित आवश्यक समाधान भी प्रस्तुत कर जीव का ब्रह्म में लय या प्रलय हो जाने का निराकरण करके जीवों तथा प्रकृति की वास्तविक सत्ता होने को सिद्ध किया गया है। इस 'ग्रन्थप्रामाण्याप्रामाण्य' विषय में भी वह अद्वैतविषय नवीन वेदान्त की दृष्टि से श्रीकरपात्री द्वारा फिर उपन्यस्त किया गया है। अतः अत्यावश्यक विषय मानकर वेदप्रमाण और युक्तियों से सम्बलित करके सुविशद रूप में हमारे द्वारा यह विषय प्रस्तुत किया गया है कि वेद में कहीं भी नवीन वेदान्त या अद्वैतवाद का मूल भी नहीं है। सो यहाँ जिज्ञासु लोग पूर्ण परितोष के सहित इसे विवेचनपुरस्सर देखेंगे।

वैदिक दर्शन केवल मस्तिष्क की कण्डू (खुजली) घर्षणमात्र नहीं है, यह तो मानवीय जिज्ञासा के परिष्करणपूर्वक उस जिज्ञासा को पूर्णतया उपशम कर समाधान करता हुआ मुक्ति के मार्ग के दर्शनार्थ बना है। उसका उद्देश्य संसार की संरचना-विज्ञान, संसार की अस्थिरता का

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

संसारस्य रचनाविज्ञानं तदस्थायितां च प्रबोध्य तत्र मानवकर्तव्यं च निर्धार्य समाजाय सुख-शान्तिपूर्वकनिवासस्य प्रेरणाप्रदानं वर्तते। वैदिकदर्शनषट्कमपि भिन्नभिन्नविषयान् परस्परा-विरुद्धान् विचित्य गहनचिन्तनं प्रस्तौति। तान् समस्तानपि विषयान् सङ्गम्यैको निर्णायक-विचार एवोपलभ्यते। स एव सकलजिज्ञासून् सन्तोष्य प्रोज्ज्वलज्ञानज्योतिः प्रदाय मोक्षवर्त्म प्रशस्तं विधत्ते।

अद्वैतवादिभिरद्वैतवादस्याभिधानं 'वेदान्त' इति क्रियते, अर्थादयमेतैर्मतोऽद्वैतवाद एव वेदानामन्तिमा शिक्षा वेविद्यते। परमिमे स्वमतपरिपुष्ट्यर्थमद्वैतवादिनोऽद्यावधि उपनिष-त्प्रमाणान्येव वेदनाम्ना प्रस्तुवन्तः सन्ति। काऽन्येषां कथा? यदाऽद्वैतवादस्य मूलाविष्कारको भगवान् शङ्कराचार्योऽपि स्वभाष्ये श्रुतिनाम्नोपनिषदां प्रमाणान्येवोद्दीधरत्, न कश्चिद-द्वैतवादी मूलवेदमस्पृशदप्यस्मिन् विषये।

एतच्छ्रेयोभागी महर्षिदयानन्द एव, यः सर्वप्रतिपाद्यविषयेषु वेदप्रमाणानि समुद्धृत्य नूतनचमत्कारेण चकितीकृतवान् लोचने चारुविवेचनविचक्षणानाम्। 'धर्मं जिज्ञासमानानां

प्रबोधन कर उस दर्शन में मानवीय कर्तव्यों का निर्धारण कर समाज को सुख-शान्तिपूर्वक बसने के लिये प्रेरणापूर्ण अपूर्व देन है। छहों वैदिक दर्शन परस्पर अविरुद्ध अर्थात् एक-दूसरे के पूरक बनकर भिन्न-भिन्न विषयों का विशद विवेचन कर गम्भीर चिन्तन प्रस्तुत करते हैं। उन समस्त विषयों का सङ्गमन कर उनसे हमें एक ही निर्णायक विचार समुपलब्ध होता है। वही विचार सकल जिज्ञासुओं को सन्तुष्ट कर तथा प्रकृष्ट उज्ज्वल ज्ञान की ज्योति को प्रदान कर मोक्ष के मार्ग को प्रशस्त करता है।

अद्वैतवादियों ने अद्वैतवाद का नाम 'वेदान्त' रखा है, अर्थात् इनके द्वारा माना जा रहा यही अद्वैतवाद ही वेदों की अन्तिम शिक्षा है (वेद का अर्थ ज्ञान है और यह ज्ञान अनन्त का दिया हुआ है, अतः उसके वेद अर्थात् ज्ञान का कोई अन्त ही नहीं हो सकता। तथापि 'वेदान्तदर्शन' गत इस शब्द का अर्थ वेदों का अन्त अर्थात् सिद्धान्त होता है। पर पक्ष-प्रतिपक्ष द्वारा प्रस्तुत तर्कों से अकाट्य निर्णय ही सिद्धान्त हो सकता है। इनका नवीन वेदान्त तर्क की कसौटी पर खरा नहीं उतरता।), परन्तु ये अद्वैतवादी अपने मत की परिपुष्टि के लिये केवल उपनिषत् के प्रमाणों को ही श्रुति के नाम से आज तक प्रस्तुत करते रहे हैं। औरों की बात क्या कहें, जब अद्वैतवाद के मूल आविष्कारक भगवान् शङ्कर ने ही अपने भाष्य में श्रुति के नाम से उपनिषदों के ही प्रमाण उद्धृत किये हैं। किसी अद्वैतवादी ने इस विषय में मूल वेद का स्पर्श तक नहीं किया।

इस का श्रेय तो केवल महर्षि दयानन्द सरस्वती को ही दिया जा सकता है, जिन्होंने समस्त ही प्रतिपाद्य विषयों में वेद की संहिताचतुष्टय से प्रमाणों को उद्धृत कर इस नवीन चमत्कार के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रमाणं परमं श्रुतिः' इति मनुवचनमनुसृत्य स्वसिद्धान्तानां पुष्टौ मूलसंहिताभ्य एव वेदमन्त्रान् प्रास्तौषीत्। तस्मात् सम्प्रति परीक्षणीयं यद् वेदेष्वपि अयम् 'अद्वैतवादः' क्वचन विद्यते न वा ?

यजुर्वेदपुरुषसूक्तस्यायं मन्त्रो निभालयितव्यः—

'पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥' (३१ । २)

अर्थाद् इदं समस्तं दृश्यमानं वर्तमानं भूतं भविष्यच्च जगत् पुरुष एवास्ति। यत् किमप्यन्नेन वर्धते तस्याऽपि स्वामी पुरुष एवास्ति।

अस्मिन् मन्त्रेऽद्वैतवादिनो ब्रुवते यदत्र सुस्पष्टमेव सर्वं पुरुष एवास्ति, अतः समस्तस्य ब्रह्मोपादानमस्ति। सकलं ब्रह्मण उत्पन्नम्, ब्रह्मणि स्थितं ब्रह्मण्येव च प्रलयं यास्यति। अतो यन्नाम जगद् दृश्यते भ्रान्त्या तदपि ब्रह्मैव, जगतः प्रतीतिरेव भ्रान्तिः। परमद्वैतवादी अत्र वेदशब्देषु गहनचिन्तनं नो विदधाति। अस्मिन् मन्त्रे 'पुरुष' शब्दः 'ईशान' शब्दश्चाद्वैतवादिनः काल्पनिकदुर्गं ध्वंसयितुमलं स्तः। असौ विस्मरति पुरुषशब्दव्युत्पत्तिमपि। श्रीमहीधराचार्यः पुरुषशब्दस्यार्थं स्पष्टयितुं श्रुतिमेव प्रस्तौति—

'इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात् पुरुषः।'

द्वारा चारुविवेचनविचक्षण पुरुषों को चकित कर दिया। 'धर्म के जिज्ञासु के लिये परम प्रमाण श्रुति है' इस मनु-वचन का अनुसरण कर ऋषि ने सिद्धान्तों की पुष्टि में वेदमन्त्रों को ही प्रस्तुत किया है। इस कारण से हमें देखना है कि यह 'अद्वैतवाद' वेद में है या नहीं ?

यजुर्वेद के पुरुषसूक्त के इस मन्त्र पर हमें विचार करना चाहिये—'पुरुष एवेदं सर्वम्०' (३१ । २)। इसमें कहा है कि यह सारा दृश्यमान वर्तमान, भूत, भविष्यत् जगत् पुरुष ही है।

इस मन्त्र पर अद्वैतवादियों का कथन है कि यहाँ स्पष्ट ही सब कुछ पुरुष ही है, अतः समस्त संसार का ब्रह्म उपादानकारण है। यह सकल ब्रह्म से उत्पन्न हुआ, ब्रह्म में स्थित तथा ब्रह्म में ही लय को प्राप्त हो जायेगा। अतः यह जो भ्रान्ति से भी जगत् दिखायी पड़ रहा है, वह भी ब्रह्म ही है। उसमें जगत् की प्रतीति ही तो भ्रान्ति है। परन्तु अद्वैतवादी यहाँ इस वेदमन्त्र पर कोई गहन चिन्तन नहीं करता कि इस मन्त्र में पढ़े 'पुरुष' तथा 'ईशान' शब्द अद्वैतवाद के इस काल्पनिक दुर्ग को ध्वस्त करने के लिये पर्याप्त हैं। वह 'पुरुष' शब्द की व्युत्पत्ति को भी भूल जाता है। आचार्य महीधर पुरुष शब्द को स्पष्ट करते हुए प्रस्तुत कर रहे हैं—

'ये लोक ही पुर हैं। यह पुरुष जो पवित्र कर रहा है, वह इस लोकसमुच्चय ब्रह्माण्ड में शयन करता है। जिस ब्रह्माण्ड में यह व्यापक है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्र यः पुरुषो निर्दिष्यते पुरि शयानः, सा पूरेव तु इदं ब्रह्माण्डं विद्यते यत्रेदं ब्रह्म व्यापकम्। सा पूरेव प्रकृतिः। ईष्टे ईशान इति। अत्र प्रश्न उद्भवति यदयमीशानः स्वामी कस्याऽस्ति? तत्राऽस्ति अमृतत्वस्य, अमृतत्वं हि नाम मोक्षः स हि जीवानां भवति। यच्चान्नेनातिरोहति वर्धते स हि संसारः। एवं ब्रह्म-जीव-प्रकृतयस्त्रयः पदार्थाः स्पष्टतयाऽत्र मन्त्रे वर्ण्यन्ते।

'पुरुष एवेदं सर्वम्' इति वचनस्य नायमभिधेयार्थो ग्रहीष्यते यन्न पुरुषातिरिक्तं किमप्यन्यत्, अपितु लक्ष्यार्थ एव ग्रहीष्यते। यथा कश्चित् कथयेद् यद् 'ऋषिर्दयानन्द एव साक्षाद् वेद आसीत्', नैतस्यायमाशयो यन्न ऋषिदयानन्दाद् भिन्ना वेदस्य काचित् स्थितिरासीत्। इयं रूपकालङ्कारप्रस्तुतिर्दयानन्दस्य वेदज्ञतामहत्त्वद्योतनायैवास्ति। प्रकृतेऽपि मन्त्रे द्योत्यते यद् भूतम्, भवद् भविष्यच्च सर्वं ब्रह्मणः शक्त्यैव सम्पद्यते। जीवाः प्रकृतिरपि तन्नियमवशीभूता एव स्वस्वकार्याण्यनुतिष्ठन्ति। तेनैव पूर्वसृष्टी रचिता, भविष्यत्यपि रचयिष्यते, सृष्टेः प्रवाहः पूर्ववदेव प्रचलिष्यति। प्रभुरस्याः सञ्चालकः, सञ्चालिते च जीवप्रकृती। स्वकर्तव्यकर्मसु जीवः स्वतन्त्रः, परन्तु फलभोगे परमेश्वराधीनोऽस्ति।

ये लोक प्रकृति से बने हैं, अतः प्रकृति 'पूः' है। किसी वस्तु का नियन्त्रण या अधिष्ठातृत्व करने के कारण वह पुरुष 'ईशान' कहाता है। यहाँ प्रश्न उठता है कि वह वस्तु कौनसी है? वहाँ कहा है कि वह अमृतत्व अर्थात् अमरता है, जिसे पाकर जन्म-मरण से छूट जाते हैं, वही मोक्ष है। ईश्वर के कभी बन्ध में न आने से उसके मोक्ष का तो प्रश्न ही नहीं। तो यह जीवों का होता है। जो अन्न से बढ़ता है, वह संसार है। इस प्रकार ईश्वर, जीव और प्रकृति—ये तीन पदार्थ इस मन्त्र में स्पष्ट वर्णित हैं।

'यह सब पुरुष ही है' इसका अभिधेयार्थ ग्रहण न होकर लक्ष्यार्थ ग्रहण होता है। जैसे कोई कहे कि 'ऋषि दयानन्द ही वेद है', इसका यह आशय कदापि नहीं कि ऋषि दयानन्द से भिन्न वेद का कोई अस्तित्व नहीं है। यह रूपकालङ्कार द्वारा प्रस्तुति दयानन्द की वेदज्ञता और महत्ता दर्शाने के लिये है। प्रकृत मन्त्र में भी द्योतित होता है कि भूत, वर्तमान और भविष्यत् ब्रह्म की शक्ति से ही सम्पन्न होते हैं। जीव और प्रकृति उन नियमों के वशीभूत होकर ही अपने-अपने कार्यों को करते हैं। उसी ने पूर्व सृष्टि बनायी थी और भविष्यत् में भी उसी के द्वारा बनायी जायेगी। सृष्टिप्रवाह पूर्ववत् चलता रहेगा। इस सृष्टि का सञ्चालक प्रभु है और सञ्चालित जीव और प्रकृति हैं। परन्तु जीव अपने कर्तव्य कर्मों में स्वतन्त्र है। करे, न करे या उलटा करे। परन्तु फल भोगने में जीव परमेश्वर के अधीन है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

आचार्यमहीधरो लिखति—'अन्नेन प्राणिनां भोग्येनान्नेन फलनेन निमित्तभूतेन' अर्थात् सर्वोऽयं संसारो यो दृश्यते सोऽपि ब्रह्मैव। ब्रह्मैव जगद्रूपे परिणतं जायते।

तत्र स्वयमेव शङ्कां प्रस्तौति चात्र—'यदा सर्वं पुरुषश्चेति तदा परिणामी स्यात्'। इत्यस्य समाधानमपि स्वयं प्रास्तावीद् यद् 'अमृतत्वस्यामरणधर्मस्येशानो मुक्तेरीशः'।

परन्तु आचार्यमहीधरस्यैतत् समाधानं चिन्तनशीलप्रतिभाशालिनो न सन्तोषयितुमर्हति। यतो हि यदाऽसावमृतत्वस्येशानोऽस्ति तदा कथं जगद्रूपे परिणतिमलभत। अथ चेज् जगद्-वस्थारूपे तद् ब्रह्म परिणतं जायते तदा कथन्तन्निर्विकारमेकरसं परिणामि च। न हि विरोधि-गुणौ स्वाभाविकौ भवितुमर्हतः।

निर्मलोक्तिरेषाऽत्र सुघटते—

अन्नं चेत् सृष्टिरूपं परिणतमभवद् ब्रह्मणो व्यापकस्य,
व्याप्यं तद् वै किमासीन्मरणविरहितो मृत्युपाशे गृहीतः।

आचार्य महीधर लिखते हैं—'अन्नेन अर्थात् प्राणियों के भोग्य तथा अन्न अर्थात् निमित्तभूत से' अर्थात् यह सारा संसार जो दिखायी पड़ता है, वह ब्रह्म ही है। ब्रह्म ही जगद्रूप में परिणत हो जाता है।

पर महीधर वहीं पर शङ्का भी करते हैं कि—'जब यह सब कुछ परिवर्ती संसार पुरुष ही है और यही ब्रह्म है, तो ब्रह्म परिणामी हो जायेगा।' इसका समाधान भी वे स्वयं ही करते हैं कि—'वह पुरुष अमृतत्व अर्थात् अमरणधर्म मुक्ति का स्वामी है, इस प्रकार वह अपरिणामी ही रहेगा।'

परन्तु आप देखेंगे कि आचार्य महीधर का यह समाधान चिन्तनशील प्रतिभाशालियों को सन्तुष्ट नहीं कर सकता; क्योंकि जब वह अमृतत्व का ईशान है, तो जगद्रूप में परिणत कैसे हो सकता है। दो विरोधी गुण (स्वभावतः) एकत्र कैसे रह सकते हैं? यदि परिणत हो गया, तो निर्विकार, एकरस और अपरिणामी क्योंकर रहा? विरोधी गुण दोनों स्वाभाविक होकर एकत्र नहीं रह सकते। यदि एक इनमें नैमित्तिक है, तो इसका निमित्त क्या शाश्वत है? यदि हाँ, तो एकतर गुण भी फलीभूत नहीं हो सकता।

यहाँ निर्मलोक्ति सुघटित हो रही है—

'यहाँ पर अन्न शब्द यदि सृष्टिरूप है, जो ब्रह्म की परिणति मानी जा रही है, तो बताइये व्यापक ब्रह्म का व्याप्य वस्तु क्या था? और जो ब्रह्म मरण से विरहित है, तो मृत्यु के पाश में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्रह्मैवं नो कदाचित् परिणमति यदा किन्निमित्तं च तत्र ?
नान्यो हेतुः स्वभावे द्वयमपि भवितुं शक्यते चेद् विरोधि ।।

अतो यावन्तं कालमिदं स्वीकरिष्यते यद् ब्रह्मैव जगद्रूपे परिणमति तावन्तं कालममृतत्वस्य स्वामी वाचा कथ्येत परं परिणामि तु स्थास्यत्येव। विकारि अपि अभिधास्यते। एतस्य समाधाममेकमेव यदसौ पुरुषो भूतभवद्भविष्यतां च सञ्चालकोऽस्ति, नित्यशुद्धबुद्धमुक्तस्वभावश्च। न च कदापि जीववद् बन्धनमुपैति। न वा तस्य कदापि भ्रान्तिर्जायते, नाऽपि संसारोऽयं भ्रान्तिर्न च प्रकृतिस्तथा, नाऽपि वा जीवो भ्रममात्रः। अयमेव सिद्धान्तो यो वेदवाक्यैः सुसङ्गच्छते तोषावहश्च सुतर्कसम्पन्नः।

'पुरि शेते' इति पुरुषशब्दस्य व्युत्पत्तिं कुर्वाणमपि महीधरं नैतत् साहसं समर्थं व्यदधाद् येनासावद्वैतवादिनां प्रबलाभिभवादुद्धर्तुमात्मानं शशाक। अत एवासावपि वेदार्थमद्वैतवादानुचरं विधातुं विवशोऽभूत्। अद्वैतवादानुसन्धानपरतन्त्रतया तस्य बुद्धेरयोग्यताऽकर्मण्यता चास्ताम्। तत्र कारणमद एवासीद् यद् वेदार्थज्ञाने कश्चिद् ब्रह्मचर्यसम्पन्नजितेन्द्रियस्तपस्वी विद्वानृषित्वप्रतिभाभावितो योगी एव समर्थ आसीत्। एवंविधः साहसी दयानन्द एव वेदार्थ-

---

कैसे आया ? जो परिणत होता है, वह कदापि ब्रह्म नहीं हो सकता। फिर भी उसे ब्रह्म कहते हो, तो परिणति में निमित्त क्या है ? जब वह अद्वैत है, तो अन्य हेतु तो हो नहीं सकता और न स्वभाव में दोनों विरोधी रह सकते हैं।'

अतः जब तक यह स्वीकृत किया जाता रहेगा कि ब्रह्म ही जगद्रूप में परिणत हो जाता है, उस समय तक वह वाणीमात्र से अमृतत्व का स्वामी भले बना रहे, पर उस समय भी परिणामी ही बना रहेगा और विकारी भी कहा जाता रहेगा। इसका समाधान बस एक ही है कि वह पुरुष भूत, भविष्यत्, वर्तमान का सञ्चालक है और नित्य शुद्ध बुद्ध मुक्तस्वभाव है। कभी भी जीव के समान कर्म करने या फल भोगने को बन्धन को प्राप्त नहीं होता। उसको कभी भ्रान्ति भी नहीं होती। फलतः न तो यह संसार भ्रान्ति है और न यह प्रकृति तथा न यह जीव भ्रममात्र है। बस, यही सिद्धान्त, जो वेदवाक्यों से सुसङ्गत है, ही तर्कसम्पन्न वा सन्तोषप्रद है।

'पुरि में सोता है' यह व्युत्पत्ति करनेवाले महीधर को यह साहस समर्थ नहीं बना सका, जिसके द्वारा वह अद्वैतवादियों के प्रबल रोवदाब से स्वयं को निकाल सकता। इसलिये वह भी वेदार्थ को अद्वैतवाद का अनुचर बनाने में विवश हो गया। अद्वैतवाद की खोज की परतन्त्रता के कारण उसकी बुद्धि की अयोग्यता और अकर्मण्यता जाग गयी। उसमें कारण, बस यही था कि वेद के अर्थज्ञान में कोई ब्रह्मचर्यसम्पन्न जितेन्द्रिय, तपस्वी, विद्वान्, ऋषित्वप्रतिभाभावित योगी ही सक्षम हो सकता था। इस प्रकार का साहसी एकमात्र भगवान् दयानन्द ही था, जिसने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रचारसङ्कल्पसमर्पितजीवनो जातः । ऋषिः प्रास्तौत् पुरुषशब्दव्युत्पत्तिं निरुक्ताङ्गीकृताम्— "पुरि षादः, पुरि शयः, पूरयतेर्वा' (निरु० २। ३) स पुरुषो विराजमानः संसारे संसारश्च तेन पूर्णोऽस्ति ।"

इह निर्मलोक्तौ सङ्कलितबिन्दवो दर्शनशास्त्रस्य निकषीभूता उपन्यस्यन्ते, येनाऽद्वैतवाद-निरसनपुरस्सरं त्रैतवादसिद्धान्तो निष्कृष्टो जायते—

यस्यास्ते वै यदस्मै त्रयमिह भवति त्रैतवादप्रयोगे,
दाता देयं ग्रहीता गुरुरपि विषयः शिष्य एवं त्रयं च ।
विक्रेता क्रय्यवस्तु क्रयकरपुरुषस्त्रित्वमत्रापि नूनम्,
सत्ता ब्रह्मप्रकृत्योर्निगमनिगदिता सर्वजीवप्रदिष्टा ॥

ऋषिदयानन्देन (यजु:० ३१ । २) मन्त्रभाष्ये लिखितम्—

'अमृतत्वस्य मोक्षभावस्य स्वामी दाताऽस्ति ।' कस्यचिद् वस्तुनः स्वामित्वं तद्दान एव सार्थकं सुघटते । अत एव ईश्वरो मोक्षदातेति व्याख्यातम्, तेन तद्दानस्य ग्रहीता जीवः सिद्धः ।

वेदार्थ-प्रचार के सङ्कल्प में सारा जीवन ही समर्पित कर दिया । ऋषिवर ने आचार्य यास्ककृत 'पुरुष' शब्द की व्युत्पत्ति प्रस्तुत की कि पुरी में बैठनेवाला, ब्रह्माण्ड तथा शरीर में सोनेवाला, सारे संसार में व्याप्त होनेवाला तथा शरीर में स्थित पुरुष होता है, वही सारे संसार में विराजमान है और उससे सारा संसार पूर्ण हो रहा है ।

यहाँ पर निर्मलोक्ति में सङ्कलित कुछ बिन्दु, जो दर्शनशास्त्र से सम्बन्ध रखते हैं, प्रस्तुत किये जा रहे हैं, जो सिद्धान्त के परीक्षण के लिये कसौटी स्वरूप हैं । इस उपन्यास के द्वारा अद्वैतवाद के निरसनपुरस्सर त्रैतवाद का सिद्धान्त उभर कर ऊपर आता है—

'जहाँ पर भी जिसका, जो और जिसके लिये—इनमें से एक का भी प्रयोग किया जायेगा, वह त्रैत का सङ्केत होगा । इसी प्रकार जहाँ दाता होगा, वहाँ देय वस्तु तथा उसका दानपात्र ग्रहीता भी अवश्य होगा । गुरु, शिष्य और उनको जोड़नेवाला अध्यापनीय विषय होगा । विक्रेता, क्रय करने योग्य वस्तु तथा क्रेता—ये तीन अवश्य होंगे । इसी प्रकार ब्रह्म और प्रकृति की सत्ता सर्व जीवों की सत्ता निगम में कही गयी है ।'

ऋषि दयानन्द ने यजुर्वेद (३१ । २) के मन्त्र के भाष्य में लिखा है—

'वह अमृतत्व मोक्षभाव का स्वामी अर्थात् दाता है ।' किसी वस्तु का स्वामित्व उस के दान में ही सुघटित होता है । इसीलिये ईश्वर मोक्ष का देनेवाला है । ऐसी व्याख्या ऋषि ने की, इससे उसका दानपात्र ग्रहीता जीव सिद्ध होता है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

द्वितीयोऽयं मन्त्रो यजुषोऽन्तिमाध्यायस्य—

'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योऽसावादित्ये पुरुषः सोऽसावहम्। ओ३म् खं ब्रह्म॥'

ऋषिभाष्यम्—

'(हिरण्मयेन) ज्योतिर्मयेन (पात्रेण) रक्षकेण (सत्यस्य) अविनाशिनो यथार्थस्य कारणस्य (अपिहितम्) आच्छादितम् (मुखम्) मुखवदुत्तमाङ्गम् (यः) (असौ) (आदित्ये) प्राणे सूर्यमण्डले वा (पुरुषः) पूर्णः परमात्मा (सः) (असौ) (अहम्) (ओ३म्) योऽवति सकलं जगत्तदाख्या (खम्) आकाशवद् व्यापकम् (ब्रह्म) सर्वेभ्यो गुणकर्मस्वरूपतो बृहत्।'

उव्वटाचार्यो महीधरश्चास्मिन् मन्त्रे लिखतः—"एतां चोपासनां कुर्यात्—'सूर्यमण्डलस्थः पुरुषोऽहमेव' इत्यभेदेन चिन्तयेत्"। एतमुदक्षरं विधिं स्वयं वर्धयन्तौ मन्त्रम द्वैतपरकं व्यधाताम्, मन्त्रशब्देषु तु नाभेदपदचिह्नमपि। इह तु भगवान् जीवमुपदिशति—

'हे मनुष्याः! योऽहमत्रास्मि स एवान्यत्र सूर्यादौ योऽन्यत्र सूर्यादावस्मि स एवाऽत्राऽस्मि। सर्वत्र परिपूर्णः खवद् व्यापको न मत्तः किञ्चिदन्यद् बृहदहमेव सर्वेभ्यो महानस्मि। मदीयं

दूसरा मन्त्र यजुर्वेद के अन्तिम अध्याय का है—

'हिरण्मयेन पात्रेण०' इत्यादि। इस पर ऋषि का भाषार्थ इस प्रकार है—

'हे मनुष्यो जिस (हिरण्मयेन) ज्योतिःस्वरूप (पात्रेण) रक्षक मुझ से (सत्यस्य) अविनाशी यथार्थ कारण के (अपिहितम्) आच्छादित (मुखम्) मुख के तुल्य उत्तम अङ्ग का प्रकाश किया जाता (यः) जो (असौ) वह (आदित्ये) प्राण वा सूर्य्यमण्डल में (पुरुषः) पूर्ण परमात्मा है (सः) वह (असौ) परोक्षरूप (अहम्) मैं (खम्) आकाश के तुल्य व्यापक (ब्रह्म) सब से गुण कर्म और स्वरूप करके अधिक हूँ (ओ३म्) सब का रक्षक जो मैं उसका (ओ३म्) ऐसा नाम जानो।'

आचार्य उव्वट और महीधर इस मन्त्र में लिखते हैं कि—"सूर्यमण्डल में स्थित पुरुष मैं हूँ, इस प्रकार का चिन्तन व उपासना करे"। इनका यह सारा अर्थ उदक्षर स्वकल्पित है, केवल उसे अद्वैतपरक बनाने के लिये यह अर्थ बढ़ाया गया। जबकि मन्त्र में अभेद पद का चिह्न भी नहीं है। वस्तुतः इसमें भगवान् जीव को उपदेश देते हैं—

'हे मनुष्यों! जो मैं यहाँ हूँ, वही अन्यत्र सूर्य्यादि लोक में जो अन्य स्थान सूर्य्यादि लोक में हूँ, वही यहाँ हूँ। सर्वत्र परिपूर्ण आकाश के तुल्य व्यापक मुझ से भिन्न कोई बड़ा नहीं, मैं ही सबसे बड़ा हूँ। मेरे सुलक्षणों से युक्त पुत्र के तुल्य प्राणों से प्यारा मेरा निज का नाम ओ३म् यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सुलक्षणपुत्रवत् प्राणप्रियं निजस्य नाम ओ३म् इति वर्तते । यो मां प्रेमसत्याचरणभावाभ्यां शरणं गच्छति तस्यान्तर्यामिरूपेणाहमविद्यां विनाश्य तदात्मानं प्रकाश्य शुभगुणकर्मस्वभावं कृत्वा सत्यस्वरूपावरणं स्थापयित्वा शुद्धं योगजं विज्ञानं दत्त्वा सर्वेभ्यो दुःखेभ्यः पृथक्कृत्य मोक्षसुखं प्रापयामि ।'

एवमेव यजुषि मन्त्रोऽपरो विद्यते यत्राऽद्वैतवादिनोऽद्वैतवादस्य गन्धं जिघ्रन्ति—

'वेनस्तत् पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु ॥' (३२ । ८)

ते कथयन्ति—'यत्र विश्वं भवत्येकनीडम्, अर्थाद् इदं विश्वं प्रलयकाले ब्रह्ममयं जायते ।' किन्तु 'वेनः' (पण्डितो विदितवेदरहस्यः) 'तद्' (ब्रह्म) 'पश्यन्' (प्रजासु उत्पद्यमानासु व्यक्तसृष्टिषु) इति पदानि तु अद्वैतवादबीजस्यारोपणभूमिमेवोषरां विदधति, त्रैतवादं जनयन्ति, परिपोषयन्ति पल्लवयन्ति च । यथा—

वेनो ज्ञाता जीवः, परं ब्रह्म यदाश्रिता सृष्टिः प्रलये पुनः सूक्ष्मरूपे परिणता जायते, या च सृष्टिर्यदाश्रिता सूक्ष्मा व्यक्तत्वमापद्यते, प्रकृतिरुपादानरूपेति त्रयः पदार्थाः सुस्पष्टं द्योतन्ते । एवं व्याप्यप्रजायां वर्तमानायां व्यापकब्रह्मणश्च सत्तायामद्वैतवादो माध्यमिकबौद्धवद् विक्षिप्त-

---

है । जो मेरा प्रेम और सत्याचरणभाव से शरण लेता, उसकी अन्तर्यामी रूप से मैं अविद्या का विनाश कर उसके आत्मा का प्रकाश करके शुभ गुण कर्म स्वभाववाला कर सत्यस्वरूप का आवरण स्थिर कर योग से हुए विज्ञान को दे और सब दुखों से अलग करके मोक्षसुख को प्राप्त कराता हूँ ।'

इसी प्रकार यजुर्वेद में एक अन्य मन्त्र है, जिसमें अद्वैतवादी अद्वैतवाद की गन्ध को सूँघते हैं—'वेनस्तत् पश्यन्निहितं गुहा०' । यहाँ वे कहते हैं कि—'यह सारा विश्व प्रलयकाल में एकनीडस्थ अर्थात् ब्रह्ममय हो जाता है' । किन्तु 'वेनः' अर्थात् पण्डित वेद के रहस्य को जाननेवाला उस ब्रह्म को देखता हुआ उत्पद्यमान प्रजाओं अर्थात् व्यक्त सृष्टियों में व्यापक—इन पदों ने तो इस अद्वैतवाद की कमर ही तोड़ दी तथा अद्वैतवाद के बीजारोपण की भूमि को ऊषर बना दिया तथा त्रैतवाद को जन्म देकर, सिञ्चित कर पुष्पित और पल्लवित कर दिया । जैसे—

वेन = जीव, ब्रह्म = जिसके आश्रित सृष्टि है, जो कि प्रलय में सूक्ष्मरूप में परिणत हो जाती है तथा जो सृष्टि ब्रह्माश्रित होकर व्यक्तत्व को प्राप्त होती है, यह उपादानरूप प्रकृति है । इस प्रकार तीन पदार्थ स्पष्ट हैं । अतः वर्तमान व्याप्य प्रजा में व्यापक ब्रह्म की सत्ता में अद्वैतवाद

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कल्पनैव। यदैकमेव तत्त्वं तदा भिन्नता कथं दृश्यते ? यद्ययं भ्रम एव तदा भ्रान्तोऽयं विचारकः कोऽस्ति ?

निर्मलोक्तिरियं समाधानं चावलम्बते नवीनाद्वैतवाद इति विपश्चिद्भिर्विवेचनीयम्। यथा—

यद्येकं केवलं ब्रह्म भ्रान्तिर्वै कुत आगता।
सर्वज्ञत्वं गुणस्तस्यान्तरायो गुणिनः कथम्॥

सर्वज्ञब्रह्मणोऽल्पज्ञो जीवः कथमजायत।
अज्ञानाच्चेत् कुतस्तावत् सर्वज्ञस्याभवत् पुनः॥

अज्ञानस्य सुखस्यानुभूतिर्नैव भ्रमो भवेत्।
विद्यमानानुभूतिर्हि गुणः कस्य ब्रवीतु मे॥

गीतायामपि चोच्यते—

'विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।'

इदं सकलमज्ञानं भ्रमो वा मूलप्रकृतिकारणादेव। प्रकृतिप्रभावश्च जीव एव जायते, न ब्रह्मणि। इदमेव युक्तियुक्तं समाधानम्। परमद्वैतवादिनां मते प्रत्यक्षभेदस्यास्य किं कारणम् ?

माध्यमिक और वैभाषिक आदि बौद्धों के समान विक्षिप्त कल्पना ही है। प्रश्न यह है कि जब तत्त्व एक है तो भिन्नता किसकी और कैसी है ? यदि यह भ्रम ही है, तो यह भ्रान्त विचारक कौन है ?

यह निर्मलोक्ति द्वारा अद्वैतवाद में इसका समाधान प्रस्तुत है, जो कि विद्वानों को विवेचनीय है। यथा—

'यदि ब्रह्म एकाकी है तो भ्रान्ति कहाँ से आ गयी ? उस ब्रह्म का गुण तो सर्वज्ञता है तो ब्रह्म और इस सर्वज्ञता गुण के बीच में विच्छेदक अज्ञान का पर्दा कैसे सम्भव है ? उपादान सर्वज्ञ ब्रह्म से अल्पज्ञ जीव कैसे पैदा हो गया ? अज्ञान से यदि माना जाये तो यह अज्ञान कहाँ से आ टपका ? फिर अज्ञान और सुख की अनुभूति भी क्या भ्रम है ? तो यह विद्यमान अनुभूति किसका गुण है ? यह बताइये।

गीता में कहा है कि 'विकार तथा गुण प्रकृति से सम्भूत हैं।' इससे ज्ञात होता है कि यह सारा अज्ञान व भ्रम प्रकृति से ही सम्प्रसूत है। प्रकृति का प्रभाव अल्पज्ञता तथा अल्पशक्तिमत्त्व होने से जीव पर ही होता है, ब्रह्म पर नहीं। यह युक्तियुक्त कारण है। पर अद्वैतवादियों के मत में इस प्रत्यक्ष भेद का क्या कारण है ? इसका उनके पास कोई उत्तर नहीं। यह भेदप्रतीति भी भ्रम

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतस्य न किमप्युत्तरम्। एषा भेदप्रतीतिरपि भ्रम एवेति वचनमुन्मत्तप्रलापमात्रम्। दृश्यमाने प्रत्यक्षे नेत्रनिमीलनमेव। अतः—

प्रकृत्या चाभिभूतस्य भ्रमो जीवस्य सम्भवेत्।
नहि प्रभावितं ब्रह्म प्रकृत्या क्वाऽपि सम्भवेत्॥

एवमनेकासमाधेयशङ्के युक्तिशून्योऽद्वैतवादो न वेदसम्मतः। बौद्धानामनुकरणमात्रमेव। वेदभगवांस्तु सुस्पष्टमेव जीवब्रह्मणोर्भेदं व्याचष्टे। यथा—

'न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥' (यजु० १७। ३१)

अर्थात्—हे जीवाः! यूयं न जानीथ तं य इमा विविधाः सृष्टीरचयत्। यश्च युष्मदन्यो युष्माकमन्तरं च विद्यते, यतो यूयमज्ञानावृताः स्थ अर्थान्नीहारेणावृताः। जल्प्या व्यर्थवादविवादलग्नाः, असुतृपः स्वप्राणतर्पणे निजशरीरपरिपोषणे च रताः, उक्थशासः पाण्डित्याभिमानमत्ताः, स तु युष्माकमन्तरं सदा वर्तमानस्तिष्ठति, स एव तु गतिभक्षणयोः शक्तिं समुत्पादितवान् यया सर्वे यूयं जीवाश्चरथ।

ही है—ऐसा कथन तो उन्मत्तप्रलापमात्र ही ठहरेगा तथा दृश्यमान प्रत्यक्ष पर मानो आँखें बन्द कर लेना है। अतः सिद्ध है कि—

'प्रकृति से अभिभूत जीव को भ्रम सम्भव है। ब्रह्म कहीं भी प्रकृति से प्रभावित नहीं हो सकता।'

इस प्रकार अनेक असमाधेय शङ्काओंवाला अद्वैतवाद, जो कि युक्तिशून्य है, वह सर्वज्ञाननिधान भगवान् वेद से सम्मत कदापि नहीं हो सकता। जैसे बौद्धों ने ईश्वरातिरिक्त बुद्धिशून्य अन्य वाद स्वीकार किये, उसी के अनुकरण पर 'ईश्वर ही ईश्वर है, इसके सिवा कुछ नहीं' यह वाद स्वीकार कर लिया गया। वेद भगवान् तो स्पष्ट ही जीव और ब्रह्म के भेद का व्याख्यान कर रहे हैं—

'न तं विदाथ य इमा जजानान्यद्०' (यजु० १७। ३१)

अर्थात्—हे जीवो! तुम उसे नहीं जानते हो, जिसने इन विविध प्रजाओं की सृष्टि की है, जो तुम सब से अन्य है और तुम्हारे भीतर समाया हुआ है; क्योंकि तुम लोग नीहार अर्थात् अज्ञानरूप कुहरे से आवृत हो, जल्प, वितण्डा, व्यर्थ वाद-विवाद में उलझे हुए हो, अपने प्राणों के तर्पण और अपने शरीर-पोषण में लगे हुए हो, पाण्डित्य के अभिमान में भरे हुए हो, वह तो तुम्हारे भीतर सदा वर्तमान रहता है, उसी ने तुम्हें चलने-फिरने और भोजन की शक्ति प्रदान की है, जिससे तुम लोग अपना जीवन-यापन करते हो।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतन्मन्त्रभाष्य उव्वटाचार्यस्तु स्पष्टं लिखति—

'य इमानि भूतजातानि जजान, जनयति उपसंहरति च अतः कारणाद् युष्माकं तस्य च पुरुषस्य महदन्तरं बभूव। पुरुषो जनको यूयं जन्याः पुरुषो भ्रामको यूयं भ्राम्याः'।

एतमेवाशयं मीताश्लोकः प्रस्तौति—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥(गी० १८।६१)

एतस्मादपि स्पष्टतरो भेदवादः कोऽन्यो भवितुमर्हेत्?

वस्तुतस्तु नवीनाद्वैतवादिनामेषोऽभेदवादसिद्धान्तो नास्तिकतायै प्रश्रयं प्रादात्। उपासनां भक्तिभावनां च सर्वां चोत्पाट्यैकं शुष्कं ज्ञानवादमजनयत्। अद्वैतवादस्याद्यप्रणेतुर्भगवतः शङ्कराचार्यस्य निर्मलहृदये कश्चित् सन्देहो जातुचिदुदपद्यत यदयमद्वैतवादमूलकोऽभेदवादः सर्वव्यापकप्रभूपासनाया द्वाराण्येव नापिदध्यात्, अत एवासाववादीत्—

इस मन्त्र के भाष्य में तो उव्वटाचार्य ने भी स्पष्ट लिख दिया कि—

'जिसने इन समस्त भूतों को उत्पन्न किया व करता है तथा उपसंहार करता है, अतः तुम में और उसमें बड़ा अन्तर है। पुरुष जनक और तुम जन्य हो, पुरुष भ्रामक और तुम भ्राम्य हो।'

आप ही बताइये कि अब कुछ और कहने को रह गया? इसी आशय को श्रीमद्भगवद्गीता भी प्रस्तुत करती है—

'हे अर्जुन! ईश्वर सब के हृदयदेश में रहता है, जोकि सारे भूतों (प्राणियों) को यन्त्रारूढवत् अपनी माया से घुमा रहा है।'

अब बताइये, भ्रामक ईश्वर, भ्राम्य यन्त्रारूढ प्राणी और साधन माया—इससे अधिक स्पष्ट त्रैतवाद वा भेदवाद का पोषक कौनसा प्रमाण होगा?

वास्तव में अद्वैतवादियों का यह अभेदवाद का सिद्धान्त नास्तिकता के लिये ही प्रश्रय दे रहा है और अब तक दिया है। इसने समस्त उपासना व भक्ति-भावना को चौपट करके सूखे नीरस ज्ञानवाद को ही पैदा किया। अद्वैतवाद के आद्यप्रणेता भगवान् शङ्कर के निर्मल हृदय में कदाचित् कोई सन्देह पैदा हो गया कि यह अद्वैतवादमूलक अभेदवाद कहीं सर्वव्यापक प्रभु की उपासना के द्वार ही बन्द न कर दे, इसीलिये उनके मुखारविन्द से सहसा यह श्लोक सुनायी पड़ा—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो नहि तारङ्गः ॥'

अर्थाद् अभेदवादे सत्यप्येतावांस्तु भेदोऽवश्यं भवत्येव यदहं तवांशोऽस्मि, परन्न त्वं ममांशोऽसि। यथा तरङ्गस्तु समुद्रस्य भवत्यंशः, परन्न क्वचनाऽपि तरङ्गस्यांशः समुद्रो भवति।

परं सतर्कीभूय बुद्ध्येदं विविच्येत तदाऽयं दृष्टान्तो भ्रान्त एवाऽपद्यते। यतो हि तरङ्गो वाय्वादिकम्पनकृतो जलस्य गतिभेद एव न चाऽस्य पृथक् स्वतन्त्रसत्ता, परं जीवस्य तु पृथक् स्वतन्त्रसत्ताऽस्त्येव। नाऽयं जीवो ब्रह्मणः क्रियामात्रः, अपितु क्रियागुणवान् जीव एकद्रव्यमस्ति प्रत्यक्षमेव। पृथक् पृथग् गुण-कर्म-स्वभाववतां जीवानामभिन्नगुण-कर्म-स्वभावप्रतिपादनं प्रत्यक्षं सत्यापलापवञ्चनैव।

जीवात्मनस्त्वनेके, सर्वजीवात्मनां सामान्येऽपि संस्कारवैशिष्ट्यादनेकत्वम्। कतिचन सामान्यधर्मा अल्पज्ञत्वामृतत्वादयः समाना अपि प्रकृतिसंसर्गसमुद्भूतगुणाल्पज्ञतावशाद् गुणकर्मादिभिन्नत्वादनेकत्वम्। 'य इह नानेव पश्यति' इत्यनेन तु सर्वव्यापिनो ब्रह्मण एकत्वं प्रतिपाद्यते। परं 'पश्यति' क्रियया द्रष्टा दृश्यं चोभयमभिव्यज्यते। तदस्माभिर्यथा—

'हे नाथ! हमारे और तुम्हारे बीच से द्वैत का भेद हट जाने पर भी इतना तो अब भी शेष है कि मैं तुम्हारा, पर तुम मेरे न हो सके। जैसे तरङ्ग समुद्र की तो होती है, पर तरङ्ग का समुद्र नहीं होता।'

परन्तु सुतर्कसम्पन्न बुद्धि से यह विवेचन किया जाये तो भगवान् शङ्कर का उक्त दृष्टान्त भ्रान्त ही सिद्ध होता है; क्योंकि तरङ्ग में वाय्वादि के कम्पन से उत्पादित जल का ही एक गतिभेद है, समुद्रजल से तरङ्ग की भिन्न सत्ता नहीं है, पर जीव की पृथक् स्वतन्त्रता है ही। यह जीव समुद्रतरङ्ग के समान ब्रह्म की गति या क्रियामात्र नहीं है, अपितु क्रियागुणवान् जीव एक द्रव्य है, यह प्रत्यक्ष है। पृथक्-पृथक् गुण-कर्म-स्वभाववाले जीवों का अभिन्न गुण-कर्म-स्वभाव का प्रतिपादन करना प्रत्यक्ष ही सत्य का अपलाप करनेवाली वञ्चना है।

जीवात्मा तो अनेक हैं, सब जीवात्माओं के कुछ बातों में सामान्य होने पर भी संस्कार-वैशिष्ट्य से अनेकत्व है। कुछ अल्पज्ञता, अमरता आदि समान धर्म भी हैं, परन्तु प्रकृति-समुद्भूत गुणों की अल्पज्ञतावश से गुण-कर्मों के भिन्न होने से अनेकता है। 'य इह नानेव पश्यति' इस वचन से आपाततः ब्रह्म का एकत्व प्रतिपादित होता है, परन्तु 'पश्यति' क्रिया से द्रष्टा (जीव) और दृश्य ब्रह्म—ये दोनों ही अभिव्यञ्जित हो रहे हैं। जैसा कि हमारी रचना द्वारा प्रस्तुत है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

द्रष्टा दृश्यं विना नैवाऽतो नोऽद्वैतता क्वचित्।
ईशभक्त्युपदेशाय जीवस्य श्रुतयो हि ताः ॥ १ ॥

अतो वेदादिशास्त्रेषु अद्वैतारोपणं ध्रुवम्।
तदर्थकृष्टितानाभ्यां नादर्तव्यं कदाचन ॥ २ ॥

ततोऽभिन्ननिमित्तोपादानकारणं मनीषिभिः।
ब्रह्मणः प्रतिपत्तव्यं नहि तर्कसुदक्षिणैः ॥ ३ ॥

वैभाषिमाध्यमादीनां बौद्धानां कुतर्कणैः।
नाश्रयेद् भीतिमापन्नोऽद्वैतवादं कदाचन ॥ ४ ॥

न्यायदर्शनशास्त्रज्ञो बौद्धानां च कुतर्किणाम्।
दुःशङ्का हि समाधातुं समर्थः सर्वदा बुधः ॥ ५ ॥

'त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे।' इति वेदमन्त्रेण ब्रह्मजीवयोः सम्बन्धः पितुः पुत्रस्योपास्यस्योपासकस्य च निर्दिश्यते। 'अहं ब्रह्माऽस्मि' इति मदगतोक्तिस्तु भक्तराजप्रह्लादपीडकस्य हिरण्यकशिपोरेवानुकृतिस्तस्मात्—

द्रष्टा दृश्य के बिना नहीं हो सकता, अतः कहीं भी अद्वैतता नहीं है। जीवों के लिये ईश्वर की भक्ति का उपदेश देने के लिये प्रभु ने वेद दिये हैं ॥ १ ॥

इसलिये वेदादिशास्त्रों में अद्वैतवाद का आरोपण निश्चय ही उनके अर्थों की खींचातानी है, जिसका कदापि आदर न करना चाहिये ॥ २ ॥

अतः तर्कनिपुण विद्वानों द्वारा ब्रह्म को सृष्टि-रचना में अभिन्ननिमित्तोपादानकारण नहीं मानना चाहिये ॥ ३ ॥

माध्यमिक तथा वैभाषिक आदि बौद्धों के कुतर्कों से भयभीत होकर अद्वैतवाद का कभी आश्रय नहीं लेना चाहिये ॥ ४ ॥

न्यायदर्शन शास्त्र को जाननेवाला विद्वान्, कुतर्की-बौद्धों की दुःशङ्काओं का समाधान करने में सर्वदा समर्थ है ॥ ५ ॥

वेद के 'त्वं हि नः पिता वसो०' इस मन्त्र में ब्रह्म और जीव का सम्बन्ध पिता और पुत्र, उपास्य तथा उपासक का निर्दिष्ट किया गया है। 'अहं ब्रह्माऽस्मि' यह दम्भ, अभिमान तथा मद से परिपूर्ण कथन तो भक्तशिरोमणि प्रह्लाद के प्रपीडक क्रूर पिता 'हिरण्यकशिपु' का ही हो सकता है। अतः विस्तरभिया से विराम करते हुए कहना है कि—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अद्वैतवादगन्धोऽपि नहि वेदेषु विद्यते।
प्रच्छन्नबौद्धवादोऽयं विष्णुभक्तैरसम्मतः॥

एतद्विषयकः शुकशङ्करयोः संवादसन्दर्भो ममैककाव्यादुद्धियते काव्यरसपानप्रकृति-कौतूहलसमाधानसुकृतये। यथा—

भास्वन्तं ब्रह्मतेजोज्वलदनलरुचा भास्करं कीर आह,
'कस्त्वं ? कौतस्कुतोऽसि ?' प्रखरमतिमिमं मण्डनं पण्डितानाम्।
शास्त्रार्थे जेतुमागां तव पुरमधुना शङ्करोऽहं प्रसिद्धः,
अद्वैती चेदभिन्नोऽहमपि खलु पुनर्मण्डनस्यैव रूपम्॥ १॥

सद्यः शास्त्रार्थकण्डूं व्यपनय विपुलां तां मया साकमेव,
'त्वं चाहं, त्वं न चाहं' कतर इह मतः पक्ष एव त्वयाऽस्ति ?
आद्ये शास्त्रार्थचर्चा प्रचलति पुरतो नैव, पक्षे द्वितीये,
द्वैतीये त्वं परास्तः, प्रभवसि लपितुं स्वामिनः किं पुरस्तात् ?॥ २॥

'वेदों में तो अद्वैतवाद का गन्ध तक नहीं है, विष्णुभक्तों के द्वारा असम्मत यह प्रच्छन्न बौद्धवाद ही है।'

मेरे द्वारा रचित काव्य से एतद्विषयक शुक और शङ्कर का संवाद-सन्दर्भ काव्यरसपान-प्रकृतिक पुरुषों के कौतूहलसमाधान सुकृति के लिये उद्धृत किया जा रहा है—

ब्रह्मतेज की जाज्वल्यमान अग्नि की कान्ति से भासमान भास्कर शङ्कर से तोता पूछने लगा कि "तुम कौन हो ? कहाँ से आये हो ?" शङ्कर कहने लगे—"मैं पण्डितों के मण्डनस्वरूप प्रखरबुद्धिशाली इन मण्डनमिश्र को शास्त्रार्थ में जीतने की कामना से तुम्हारी नगरी में आया हूँ, मैं वही सुप्रसिद्ध शङ्कर हूँ।" तोता बोला—"यदि तुम वही अद्वैती शङ्कर हो, तो मुझे भी मेरे स्वामी मण्डनमिश्र से अभिन्न समझो" ॥ १ ॥

"और मेरे ही साथ शास्त्रार्थ करके अपनी शास्त्रार्थ-खाज को शीघ्र मिटा लो। वैसे तो 'तुम मैं ही हो और मैं भी तुम हूँ', 'तुम मैं नहीं हो'—बताओ इन दोनों पक्षों में कौनसा पक्ष तुम्हें इष्ट है ? यदि मैं और तुम का अभेदरूप प्रथम पक्ष इष्ट है, तो शास्त्रार्थचर्चा का प्रसङ्ग ही नहीं उठता और यदि तुम मुझसे भिन्न हो तो शास्त्रार्थ-प्रसङ्ग उठने पर भी (भेद होने से) तुम्हारे द्वारा द्वैत स्वीकार कर लेने पर स्वयं ही शास्त्रार्थ का पक्ष ही गिर गया। इस द्वितीय पक्ष में तुम्हारा पराजय तो यहीं हो गया, फिर तुम हमारे स्वामी के समक्ष शास्त्रार्थ में कैसे टिकोगे ?" ॥ २ ॥

शङ्कर बोले—"मैं वेदपारङ्गत पण्डितों के साथ शास्त्रार्थ करता हूँ, न कि पक्षियों के साथ।" इस पर तोता कहने लगा—"ठीक, मैं भी मानता हूँ, तो बताना होगा कि एक ही ब्रह्म अद्वैत में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'वादं कुर्वे सहैवं निगमविलसितैः पण्डितैः, पक्षिभिर्नो',
मन्ये, किन्तु त्वमेवाभव इह पुरतोऽद्धा ममाद्वैतपक्षी।
ख्यातं लोके सदैवोत्पतति खगगणः साधु पक्षद्वयेन,
अद्वैतेनाश्विदानीं त्वमिव निपतति क्ष्मातलेऽद्वैतपक्षः ॥ ३ ॥

मुग्धद्वैतीयपक्षिव्रत इह विहितः पञ्जरागारबद्ध,
ऊचे बद्ध शुकोऽहं त्वमपि तनुधरे पञ्जरे किन्न वेत्सि?
मन्ये बद्धोऽनुयुक्तस्त्वमसि खलु तदा द्वित्वकोटिः प्रसिद्धा,
अद्वैतिन् ब्रह्मणस्ते भवति च कतरा कातरा वा स्ववस्था ॥ ४ ॥

शङ्कर उवाच—

वाचालङ्कारितं त्वां वदितुमभिलषाम्येव नो स्वामिनाऽहम्,
नावृत्य द्वारमेतद् गमयतु सदनान्तः प्रतीक्षापथस्थम्।

शुक उवाच—

जाने ह्यद्वैतभिक्षो! बहिरपि विकलश्चान्तरेतुं वियासुः,
ब्रह्मन् ब्रह्मात्मकस्य प्रभवति भवतः किं बहिर्वा किमन्तः? ॥ ५ ॥

मनुष्य और पक्षी दो कहाँ हैं? तथापि इस समय तो मेरे सामने तुम भी अद्वैतपक्षधर होने से निश्चित ही एक पक्षी हो। संसार में यह प्रसिद्ध है कि आकाश में पक्षी दो पक्षों (पंङ्खों) से उड़ता है और जिन पक्षियों के द्वैत (दो) पक्ष नहीं होते, वे अद्वैत (एक पङ्खवाले) पक्षी तुम्हारी तरह भूतल पर ही गिर जाते हैं, अर्थात् जैसे इस समय भी हम आकाशस्थ पिंजरे में तुमसे ऊपर हैं और तुम भूतल पर हो" ॥ ३ ॥

शङ्कर बोले—"भोले पक्षी, द्वैतपक्षी होने के कारण ही तो तुम्हें पिंजड़े के कारागार में बन्द किया गया है।" तोते ने कहा—"पिंजड़े में तो तुम भी बद्ध हो। अन्तर केवल इतना है कि मैं एक लौहधातुनिर्मित पिंजड़े में बद्ध हूँ और तुम सत्त्व-रज-तमनिर्मित त्रिधातु निर्मित पिंजड़े में बन्द हो और मुझे तो बन्ध का ज्ञान है पर तुम्हें बद्ध होने का ज्ञान नहीं है। अच्छा, मैं यह भी मानता हूँ, पर तुम्हारे ब्रह्म की तो बन्ध और मुक्ति दो कोटि सिद्ध हो गयीं, अब यह बताओ कि तुम्हारा ब्रह्म इनमें से किस दुर् या सु अवस्था में है?" ॥ ४ ॥

शङ्कर बोले—"तुम्हारे स्वामी के द्वारा तुमको अधिक वाचाल बना दिया गया है, ऐसे वाचालङ्कारित से अब मैं बात नहीं करना चाहता। अतः चिरप्रतीक्षापथस्थ मेरे लिये द्वार कपाट खोलकर भीतर जाने दो।" तोता बोला—"ठीक है, मेरे स्वामी ने ही मुझे वाचा से अलङ्कृत किया है। मुझे प्रसन्नता है कि आज द्वैत के द्वार पर अद्वैत भिक्षुक आया हुआ है और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतस्मिन् शङ्करोऽसौ विचलितमनसा क्षुब्धतां खिन्नतां चैत्,
ऊचे 'धृष्टोऽसि' कीरः प्रतिवचनमदात् सोपहासं च तस्मै।
'स्वीकुर्वे धृष्टतां स्वां परमसि भगवन् त्वञ्च तद्भिन्न एव',
कीरं सम्भर्त्सयन्ती वटुमिह मिलितुं सारिका साऽनुमेने ॥ ६ ॥

एवं पश्यामो वयं समग्रेऽपि वेदे नैकोऽपि मन्त्रः पुष्णाति नवीनाद्वैतमित्यलमति-पल्लवितेन श्रुतिमतिपल्लवितनिर्भ्रान्तज्ञानेषु।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'ग्रन्थप्रामाण्याप्रामाण्य-विषयः'
॥ सम्पूर्णः ॥

अन्दर जाने के लिये विकल हो रहा है। पर बटुक! यह बताओ, ब्रह्मरूप ब्रह्म के लिये अन्दर और बाहर का भेद क्या है?" ॥ ५ ॥

इस पर शङ्कर वटुक विचलित मन हो खिन्न होकर झुँझला उठा और बोला कि शुक तू धृष्ट है। तोते ने सोपहास उत्तर दिया—"भगवन्! मैं अपनी धृष्टता स्वीकार करता हूँ कि आप मुझ से भिन्न ही हैं"। ऐसे व्यंग्य वचन बोलते तोते को मैना ने घुड़क दिया और शङ्कर को आचार्य से मिलने की अनुमति दे दी॥ ६ ॥

इस प्रकार हम देखते हैं कि समग्र वेद में एक भी मन्त्र नहीं है, जिससे नवीन वेदान्त की पुष्टि हो सके। इस विषय में श्रुतिसम्मत मति से पल्लवित निर्भ्रान्तज्ञानसम्पन्नों में अधिक नहीं कहा जा रहा है।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'ग्रन्थप्रामाण्याप्रामाण्य-विषय'
॥ सम्पूर्ण हुआ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथाधिकारानधिकारविषयः संक्षेपतः

पृ० १६३९, पं० ४—यदुक्तम्—"वेदादिशास्त्रपठने सर्वेषामधिकारोऽस्ति, वेदानामीश्वरोक्तत्वात्, (सर्वमनुष्योपकारार्थत्वात्,) सत्यविद्याप्रकाशकत्वाच्च। यद्यद्धि (खलु) परमेश्वररचितं तत् सर्वार्थमिति जानीमः' इति, तत्तुच्छम्, तथात्वे परमेश्वरनिर्मितायां दुहितरि सर्वेषामधिकारापत्त्या विवाहादिव्यवस्थालोपापत्तेः। तस्मात् परमेश्वरनिर्मितत्वं न सर्वाधिकारप्रयोजकं तथा न सर्वविद्याप्रकाशकत्वमपि प्रयोजकम्, पश्वादिषु व्यभिचारात्।"

इति सर्वं प्रवञ्चनपटोरस्य छलेनाभ्युपेतम्, भूमिकोक्तवचनार्थानां विरोधानात्, तत्रैव वा सर्वसमाधान दर्शनात्।

भूमिकायां लिखितं 'वेदादिशास्त्रपठने सर्वेषामधिकारोऽस्ति' इत्यनेन शास्त्रं पिपठिषूणामित्यर्थाभिव्यञ्जनापेक्षणान् नैवाशङ्का सङ्गच्छते। एतेन पशूनामधिकारे यत्त्वया

पृ० १६३९, पं० ४—"वेद आदि शास्त्र पढ़ने का सबको अधिकार है या नहीं? इस विषय को उठाते हुए स्वामी दयानन्द ने लिखा है कि— 'इनको पढ़ने का सबको अधिकार है; क्योंकि जो ईश्वर की सृष्टि है, उसमें किसी का अनधिकार नहीं हो सकता। देखिये-जो-जो पदार्थ ईश्वर से प्रकाशित हुए हैं, सो-सो सबके उपकारार्थ हैं।' किन्तु भूमिका का यह कथन एकदम निराधार है। ईश्वर की सृष्टि में किसी का अनधिकार नहीं हो सकता, स्वामी दयानन्द के इस हेतु को सही मान लिया जाये तो परमेश्वर की बनायी हुई पुत्री में सबका समान अधिकार मानना पड़ जायेगा और इस तरह से विवाह आदि की व्यवस्था का कोई अर्थ नहीं रह जायेगा। इसलिये परमेश्वर की बनायी चीज़ में सबका समान अधिकार है, इस बात को सही नहीं माना जा सकता। सत्यविद्या का प्रकाशक होने से भी वेद में सबका अधिकार नहीं माना जा सकता; क्योंकि पशु प्रभृति का इसमें अधिकार नहीं है; क्योंकि उनमें वेद के अध्ययन करने की शक्ति नहीं है। लौकिक सामर्थ्य शूद्र में होते हुए भी उनमें शास्त्रीय योग्यता का अभाव होने से उनको वेदाध्ययन का अधिकार नहीं दिया जा सकता।"

प्रवञ्चनपटु करपात्री जी का उक्त लेख छल से पूर्ण है, वस्तुतः तो भूमिका के शब्दों में ही उनकी कुशङ्काओं का समाधान निहित है।

भूमिका में लिखा है कि 'वेदादि शास्त्र पढ़ने में सबका अधिकार है', पढ़ेंगे कौन? जो पिपठिषु होंगे। पशु कभी पिपठिषु (पढ़ने का इच्छुक) तो होता नहीं। इससे पशुओं के अधिकार में अतिव्याप्ति नहीं होती। महर्षि ने सबके (वेद) अधिकार सिद्ध करने में तीन हेतु दिये— ईश्वरोक्त होने से, सब मनुष्यों के उपकारार्थ हाने से तथा सत्य विद्याओं के प्रकाशक होने से।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शङ्कितं तत्र नातिव्याप्तिः। तथा पाठः कोष्ठान्तर्गत एतेनानुद्धृतः, मनुष्याणामेव वेदानामुपकारार्थत्वाद् इति द्योत्यते। अत्र 'हि खलु' इति निपातद्वयपठनेनाऽपि परमेश्वरेणैव निर्मितत्वमपेक्ष्यते न तु जीवसहकृतम्। यथा मैथुनसृष्ट्यां दुहित्रादिसृष्टौ जीवानां निमित्तत्वम्, एवमीश्वररचितमिति वचनमेव दुहितरं नातिव्याप्नोति।

किञ्च, अधिकारस्य नाम द्वैविध्यम्—स्वत्वं योग्यता च। एवं पशुषु योग्यताविरहादपि अधिकारो वेदाध्ययनस्य निवर्तते। यच्चोच्यते शास्त्रीययोग्यताविरहस्तु शूद्रेष्वपि, उपनयनस्य द्विजानामेव विहितत्वात्, कृतोपवीतस्यैव वेदाध्ययनाधिकारात्, तन्न, वेदविरुद्धत्वे सर्वशास्त्राणामप्रामाण्यात्। वेदे तु स्पष्टमेव—'यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय स्वाय चारणाय' (यजु: २६। २) इति विधानम्।

ननु सत्त्वेऽपि वेदप्रामाण्ये शास्त्रेषु द्विजातीनामेवोपनयनसंस्कारविधानात् शूद्रस्य नास्ति वेदाधिकार इति चेन्न, प्रथमं तु वेदवाणीवदनं शूद्राय विहितम्, तेनैव ध्वन्यते यत् शूद्राणां

इन्होंने 'सब मनुष्यों के उपकारार्थ' यह हेतु संस्कृत-पाठ से लुप्त कर दिया। ये तीनों हेतु वेद पढ़ने के अधिकार के विषय में ही घटित होते हैं। विद्वान् जानते हैं कि 'यद् यद् हि खलु परमेश्वरेण रचितम्' इस में 'हि' और 'खलु' दो निपात 'परमेश्वर के ही द्वारा रचित अर्थात् अन्य किसी जीवात्मा के द्वारा नहीं' इस बात के द्योतक हैं। आपने जो पुत्री में सबका अधिकार जताने की कुतर्क कुचेष्टा की है, उसकी व्यावृत्ति इसलिये हो जाती है कि पुत्री परमेश्वर द्वारा रचित नहीं, पुत्री आदि जीवों की मैथुनी सृष्टि में निमित्त जीवात्मा (माता-पिता) है। अतः पुत्री के विषय में सर्वाधिकार की शङ्का ही नहीं हो सकती।

यह भी जानना चाहिये कि अधिकार दो प्रकार का होता है-एक स्वत्व तथा दूसरा योग्यता। पशुओं में पिपठिषा (योग्यता) का अभाव है। जन्म से शूद्रों में जो आप शास्त्रीय योग्यता का विरह देखते हैं, वह तो कुछ महामूढ द्विजाति उत्पन्नों में भी हो सकता है। यह कहना कि उपनयनयुक्त ही वेदों को पढ़ सकता है और वह उपनयन केवल ब्राह्मण, क्षत्रिय और वैश्यों का ही होगा, यह बात नहीं है। जन्म से ही द्विज मान यज्ञोपवीत कर पढ़ने की बात करना तो 'यथेमां वाचम्०' इस मन्त्र के विरुद्ध पड़ता है। इस मन्त्र से तो ब्राह्मणादि द्विज, शूद्र और अतिशूद्रों को भी वेद का अधिकार कहा गया।

पूर्वपक्ष—भाई! वेद का प्रमाण होते हुए भी शास्त्रों में तो उपनयन का अधिकार स्पष्टरूप से द्विजमात्र का है। इसलिये शूद्र का वेदाधिकार सिद्ध ही नहीं है।

उत्तरपक्ष—पहले जब वेदवाणी का कथन शूद्र के लिये है, तो उससे ध्वनित होता है कि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शूद्रवर्णोत्पन्नानामपि उपनयनं कर्तव्यम्। अपरं च वर्णानां गुणकर्मस्वभावानुसारं विधानात्। नहि रूढा ब्राह्मणादिजातिवाचकाः शब्दा अपेक्ष्यन्ते। तत्र ब्राह्मणक्षत्रियवैश्यबुभूषूणामुपनयनं कार्यमित्यर्थादपि ब्राह्मणादीनां विहितम्, नो वा कश्चित् शूद्रो बुभूषुर्भवति, भवति चेत् तस्यापात्रत्वं वेदे स्यात्। अत एव द्विजातीनां संस्कारो विहितः।

पृ० १६३९, पं० ११—यदाह—"तस्माच्छास्त्रीयसामर्थ्याभावेन पूर्वोत्तरमीमांसयोरपशूद्राधिकरणविरोधाच्च न वेदाध्ययने सर्वाधिकारः। अतस्तेषामनुग्रहार्थमेव पुराणेतिहासादिभिर्वेदानां सारस्तेभ्यः समर्थ्यते।

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह॥'

इत्यनेन न शूद्राणामधिकारः।" इत्यपि न, मीमांसायां 'सर्वत्वमाधिकारिकम्' (१।२।१६) इत्यनेन ब्रह्मविद्यायां मृत्योरतिक्रमणेच्छायाः सर्वेषां समानत्वे सर्वाधिकारो घोषितः। 'हृद्यपेक्षया मनुष्याधिकारत्वात्' (वे० द० १।३।२५) इत्यनेन सर्वमनुष्याधिकारो

उसे भी वेद पढ़ाना चाहिये। तो यज्ञोपवीत भी किया ही जायेगा। वस्तुतः वर्णों की व्यवस्था गुण, कर्म और स्वभाव के अनुसार है, अतः उपनयन-विधान में भी जिनके माता-पिता ब्राह्मण, क्षत्रिय और वैश्य हैं, वे तो प्रायः अपने वर्ण के ही बनना चाहेंगे अथवा जो बालक ब्राह्मण, क्षत्रिय और वैश्य बुभूषु हों या उनके वैसे लक्षण प्रकट हों, उनके तो घर पर ही यज्ञोपवीत करा दें। बाद को शूद्रकुलोत्पन्न में भी यदि आचार्य ब्राह्मणादि बनने के लक्षण देखें तो गुरुकुल में उपनयन करावें। शूद्र तो कोई होना ही न चाहेगा, यदि कोई कुलक्षणी चाहेगा तो उसकी स्वतः ही अपात्रता हो जायेगी। इसलिये द्विजातियों का उपनयनसंस्कार विहित है।

पृ० १६३९, पं० ११—"इस शास्त्रीय सामर्थ्य के न रहने से और पूर्व एवम् उत्तरमीमांसा के 'अपशूद्राधिकरण' की व्यवस्था के अनुसार भी वेदों के अध्ययन करने का सब को अधिकार नहीं दिया गया है। इसीलिये शूद्र, स्त्री प्रभृति के कल्याण के लिये इतिहास पुराण प्रभृति ग्रन्थों में वेदों का सार संगृहीत कर दिया गया है। शास्त्रों में बताया गया है कि स्त्री, शूद्र, अन्त्यज प्रभृति के कानों में श्रुति का उपदेश नहीं पहुँच सकता। अतः शूद्रों का वेदाध्ययनाधिकार नहीं है।"

श्री करपात्रीजी का यह कथन वेदविरुद्ध है। वे 'शूद्राय स्वाय चारणाय' इस वेद-विधान का खण्डन सकल शास्त्रों के प्रमाण देकर भी नहीं कर सकते। उनको वेद के अनुकूल बनना पड़ेगा। रही बात मीमांसा की, तो उसमें (१।२।१६) भी मृत्यु के अतिक्रमण की इच्छा सब मनुष्यों में होने से सब का ब्रह्मविद्या में समान अधिकार है। जैसे एक कुएँ से जल भरने का अधिकार तो सबको होवे, पर अपनी सामर्थ्य के अनुसार वह छोटे-बड़े पात्र में जल खींच सके,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्रह्मजिज्ञासाया वर्णितः। वस्तुतस्तु वेदविद्याधिकाराद् दुर्व्यसनिनो ब्राह्मणबालका अपि वञ्चिता भवितुमर्हन्ति। अत्र प्रमाणम्—

'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्॥' (निरु० २।४)

इति असूयकः, अनृजुः, अजितेन्द्रियस्तु अपात्रमेव वेदस्य।

उद्धृतश्रीमद्भागवतपुराणेनाऽपि न भावत्कं समर्थनं जायते। 'कर्मश्रेयसि मूढानाम्' इति पाठेनाऽपि ये शुभाशुभपरिज्ञानं कर्तुं न क्षमास्ते शूद्रा मन्यन्ते। किञ्च, इतिहासपुराणानामपि पञ्चमवेदत्वं घोषितं भवता तयोश्चाधिकारोऽध्ययनस्य शूद्राणां प्रतिपाद्यते, एवमपि वेदाध्ययनं न प्रतिषिध्यते तेषां भवद्दृष्ट्याऽपि।

व्याकरणमहाभाष्यकारोऽपि गुणकर्मभ्यामेव समर्थयते—

'विद्या तपश्च योनिश्च एतद् ब्राह्मणलक्षणम्।
विद्यातपोभ्यां यो हीनो जातिब्राह्मण एव सः॥'

अत्र योऽसौ जातिब्राह्मणपदवाच्यः, स एव मनुना ब्राह्मणब्रुवशब्देन 'यथा काष्ठमयो

यह पृथक् बात है। वेदान्तदर्शन (१।३।२५) में भी ब्रह्मजिज्ञासा में सब मनुष्यों का अधिकार वर्णित है। वस्तुस्थिति तो यह है कि दुर्व्यसनी ब्राह्मण-बालक भी वेदाध्ययनाधिकार से वञ्चित होने के योग्य है। इसमें निम्न मन्त्र प्रमाण है—

'विद्या ब्राह्मण के पास आयी और कहने लगी—मेरी रक्षा करो, मैं तुम्हारी निधि हूँ। रक्षा का उपाय भी उसने बताया कि गुणों से अभिद्रोह करनेवाला, कुटिल और इन्द्रियाराधक को तुम मेरा उपदेश न करना। असूयक, कुटिल और अजितेन्द्रिय वेद का पात्र नहीं है।'

आप का उद्धृत श्रीमद्भागवत का प्रमाण भी आपकी पुष्टि नहीं करता; क्योंकि 'यदि वे कर्मश्रेयस् अर्थात् शुभाशुभ कर्मों का निर्णय करने में मूढ हों, तब श्रुति गोचर नहीं होती' यह अर्थ है। दूसरे आप तो इतिहास और पुराणों का भी पञ्चम वेद मानते हो, उनके पढ़ने का अधिकार तो आप शूद्रों का मानते ही हो। इस प्रकार आपकी दृष्टि से भी वेदाध्ययन तो प्रतिषिद्ध नहीं हो पाया।

महाभाष्यकार पतञ्जलि भी शुभ और अशुभ लक्षणों के द्वारा ही ब्राह्मण होने का लक्षण कहते हैं—'विद्या, तप और जन्म—ये ब्राह्मण होने के लक्षण हैं। परन्तु जो विद्या और तप से शून्य है, वह केवल जात्या ही ब्राह्मण है।'

यहाँ जो जातिब्राह्मण शब्द है, उसी को मनु ने 'ब्राह्मणब्रुव' कहा है। जैसे 'काष्ठ का हाथी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

हस्ती यथा चर्ममयो मृगः' इत्यादिना निःसत्त्वो निष्फलः सूचितः । अतो महाभारत उक्तम्—

'न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम्॥'

आश्चर्यं तु तदा जायते यदा सर्वेषां ब्रह्मरूपत्वप्रतिपादकानामग्रगन्ता विद्वान् शङ्कराचार्यः कथं स्वभाष्येऽलेखीत्—

"इतश्च न शूद्रस्याधिकारो यदस्य स्मृतेः श्रवणाध्ययनार्थं प्रतिषेधो भवति। वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधस्तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः स्मर्यते। श्रवणप्रतिषेधस्तावत्—'अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्' इति। 'यद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्मात् शूद्रसमीपे नाध्येतव्यम्' इति। अत एवाध्ययनप्रतिषेधो यस्य हि समीपेऽपि नाध्येतव्यं भवति। स कथमश्रुतमधीयीत ? भवति च वेदोच्चारणे जिह्वाच्छेदो धारणे शरीरभेद इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति—'न शूद्राय मतिं दद्यात्' इति।"

अत्र पृच्छामि भवन्तं यत् तेभ्यः शूद्रेभ्यः सारसमर्पणमत्र भवानपि सहमतः, किमर्थम् ? स्यात् कारणं शूद्राणां पदपदार्थविज्ञानसमवबोधशक्तेरभावः। इदन्तु एवमेव यद् दुग्धं प्रतिषिध्य

या चमड़े का बना कृत्रिम मृग' इससे भी उसे निःसत्त्व और निष्फल कहा है । इसीलिये महाभारत में कहा है—

'वर्णों में कोई विशेषता नहीं है, सारा जगत् ही ब्रह्मा ने बनाया, अतः ब्राह्म है । बाद में कर्मों के द्वारा वर्णों को प्राप्त हो गये।'

आश्चर्य तो तब होता है जब सब को ब्रह्म माननेवालों के अग्रणी विद्वान् शङ्कराचार्य ने अपने भाष्य में कैसे लिख दिया कि—

"इससे शूद्र को अधिकार नहीं है, जो इसका स्मृति से श्रवण अध्ययन का प्रतिषेध किया गया है । वेद का श्रवण और अध्ययन, तदर्थ ज्ञान और अनुष्ठान का प्रतिषेध शूद्र का किया गया है । श्रवणप्रतिषेध में-'वेद श्रवण करनेवाले इस शूद्र के राँगा और लाख से कान बन्द कर देने चाहिये' । 'शूद्र को श्मशान समझो । शूद्र के समीप में वेदाध्ययन नहीं करना चाहिये ।' इसलिये अध्ययन का प्रतिषेध है । जब सुन ही नहीं सकता तो पढ़ेगा कैसे ? वेद का उच्चारण यदि शूद्र करे तो जिह्वाछेदन करना चाहिये, याद कर ले तो शरीर को फाड़ दे । इसीलिये अर्थज्ञान और अनुष्ठान का उसे प्रतिषेध है कि—'शूद्र को मति भी न दे ।"

इस विषय में बताइये कि आपके कथनानुसार 'इतिहास और पुराण वेदों का सार है', उस सार को शूद्र के लिये दिये जाने में आप भी सहमत हैं, पर क्यों ? स्यात् इसमें आपकी समझ से

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तस्मै कस्मैचित् परं मण्डं जालिका वाऽवश्यं प्रदेया। एतेनाऽपि असामर्थ्यमेव व्यज्यते शूद्राणाम्, परमसामर्थ्यपरीक्षणं पाठयिताऽऽचार्यः परीक्षितुं समर्थः। परीक्षाऽपि किं केवलं शूद्रकुलोत्पन्नस्यैवाथवाऽन्येषामपि? परीक्षोत्तीर्णास्तूपनेया अध्यापनीयाश्च। एतेनाऽपि न जन्मनैव केवलं वर्णव्यवस्था भवितुमर्हतीति सिद्धम्। शाङ्करभाष्येणाऽपि रूढैव वर्णव्यवस्थात्र मन्यते। रामानुजवल्लभाचार्यादिभिरपि शङ्कर एवानुगम्यते।

सम्राड्वेदसमादेशे कस्मिन्ननुचरे शास्त्रे शक्तिस्स्यादादेशावहेलायै। तद् येषु ग्रन्थेषु जन्मपरकवर्णव्यवस्थामाश्रित्य वेदाध्ययनस्य निषेधो व्यधायि, त्रपुजतुभ्यां च श्रोत्र-परिपूरणममानवीयकृत्यं न्यदिश्यत। तद्देष्टा कश्चिदपि नाम भवेदुपेक्ष्य एव—'विरोधे त्वनपेक्ष्यं स्यात्' (मी० १। ३। ३)। इतिहासेनाऽपि नीचकुलोत्पन्नानां मतङ्गादीनामृषिपदवीप्राप्त्या वेदाध्ययनं निर्बाधं सिध्यति, विनाऽध्ययनमृषित्वासिद्धेः। यथा—

'स्थाने मतङ्गे ब्राह्मण्यं नालभद् भरतर्षभ।
चण्डालयोनौ जातो हि कथं ब्राह्मण्यमाप्नुयात्॥' (महा० अनु० ३। १९)

कारण हो सकता है कि वे पद-पदार्थ के विज्ञान के समझने की शक्ति नहीं रखते हों। तब तो यह ऐसा ही हुआ कि किसी के लिये दूध देना हो तो मना कर दिया जाये और उसे मलाई या रबड़ी दे दी जाये। बलिहारी है ऐसी बुद्धि की! क्या इससे भी शूद्रों का असामर्थ्य ही अभिव्यक्त हो रहा है? पर असामर्थ्य का परीक्षण करने में तो पढ़ानेवाला आचार्य ही समर्थ हो सकता है। पर परीक्षा भी क्या केवल शूद्रकुल में उत्पन्न बालक की ही ली जायेगी अथवा औरों की भी? और परीक्षा में उत्तीर्ण बालक तो उपनयन व अध्यापन के योग्य होंगे। इससे भी केवल जन्म से ही वर्णव्यवस्था सिद्ध नहीं हो सकती। शाङ्करभाष्य से भी रूढ़ वर्णव्यवस्था मानी जा रही है। रामानुज और वल्लभाचार्य आदि के द्वारा शङ्कर का ही अनुगमन किया जा रहा है।

सम्राड् वेद के आदेश करने पर भला किस अनुचर शास्त्र में आदेश की अवहेलना का साहस हो सकता है। सो जिन ग्रन्थों में जन्मपरक वर्णव्यवस्था का आश्रय लेकर वेदाध्ययन का निषेध किया गया है, उनमें राँगा और लाख से श्रोत्र परिपूरण करने का अमानवीय क्रूर कृत्य निर्दिष्ट किया गया है। उसका देष्टा ऋषि नामधारी ही क्यों न हो, उसकी उपेक्षा कर देनी चाहिये। जैसा कि मीमांसादर्शन (१। ३। ३) में कहा है। इतिहास से भी सिद्ध है कि नीच कुल में भी उत्पन्न मतङ्गादि को ऋषि पदवी की प्राप्ति से वेदाध्ययन निर्बाध था; क्योंकि विना वेदाध्ययन के ऋषित्व-प्राप्ति नहीं हो सकती। यथा—

'हे भरतप्रवर! मतङ्ग ने शूद्र के सहारे ब्राह्मणी के गर्भ से उत्पन्न होके कठिन तपस्या करने पर भी ब्राह्मणत्वलाभ नहीं किया, वह युक्तिसङ्गत है; परन्तु विश्वामित्र ने किस प्रकार ब्राह्मणत्वलाभ किया?' (महा० अनु० ३। १९)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शङ्कराचार्योऽपि 'अपशूद्राधिकरणे' अन्ततो गत्वाऽलेखीत्—

"येषां पुनः पूर्वकृतसंस्कारवशाद् विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम्, ज्ञानस्यैकान्तिकफलत्वात्।"

आपस्तम्बेऽ(धर्म० २।११।१०-११) पि तथा—

'धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ।'

ननु 'जातिपरिवृत्तौ' इत्यनेन तु जन्मान्तर एव जघन्यो ब्राह्मणादिर्भविष्यतीति चेन्न, जातिशब्दस्येह वर्णवाचकत्वादन्यथा ब्राह्मणस्य मतपरिवर्तने यवनादौ कथन्न रूढिपूजका सुताविवाहादिव्यवहारमाचरन्ति, तेषामपि सम्मतौ जन्मना ब्राह्मणोऽस्मिन्नेव जन्मनि शूद्रत्वमधिगतो मन्यते। 'कर्मतो जात्यन्तरताऽपि नासत्यम्' (ऐतरेया० पृ० १६) इत्याचार्यसत्यव्रतसामश्रमी। मनुनाऽपि समर्थितं जन्मविषये एकस्मिन्नेव जन्मन्यनेकजन्मनां भवनम्। यथा—

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्॥ २।१६९॥

शङ्कराचार्य ने भी 'अपशूद्राधिकरण' में अन्ततः लिख ही दिया कि—"जिनके पूर्वजन्मकृत संस्कारों के कारण से विदुर, धर्मव्याध आदि के ज्ञान का उत्पन्न होना व उनके ज्ञान की फलप्राप्ति का निषेध नहीं किया जा सकता; क्योंकि ज्ञान का फल तो अवश्यंभावी है।"

आपस्तम्ब (धर्म २।११।१०-११) भी देखिये—'धर्मचर्य्या के द्वारा जघन्य वर्ण जातिपरिवर्तन में पूर्व-पूर्व वर्ण को प्राप्त कर लेता है।'

प्रश्न—'जातिपरिवृत्तौ' शब्द से जन्मान्तर में जघन्य वर्ण ब्राह्मणादि बन सकते हैं, ऐसा अर्थ क्यों न माना जाये?

उत्तर—जाति शब्द यहाँ पर वर्णवाचक है, अन्यथा ब्राह्मण के मत परिवर्तन करने पर यवन आदि होने पर रूढिपूजक उसे ब्राह्मणादि ही क्यों नहीं मानकर पुत्री आदि का विवाह आदि कर देते? इससे निश्चित है कि उनकी सम्मति में भी वह शूद्र इसी जन्म में बन गया। 'कर्म से जात्यन्तरता होना असत्य नहीं है' (ऐतरेया० पृ० १६) ऐसा आचार्य सत्यव्रत सामश्रमी ने कहा है। महाराज मनु ने भी एक जन्म में ही अनेक जन्मों का होना माना है। यथा—

'द्विज का प्रथम जन्म माँ से, द्वितीय जन्म मौञ्जीबन्धन से और तृतीय जन्म यज्ञदीक्षा में होता है, ऐसा श्रुति का सिद्धान्त है।' (२।१६९)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्र यद् ब्रह्मजन्माऽस्य मौञ्जीबन्धनचिह्नितम् ।
तत्राऽस्य माता सावित्री पिता त्वाचार्य उच्यते ॥२ । १७० ॥

आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा सत्या साऽमराऽजरा ॥ २ । १४८ ॥

वस्तुतोऽयं वर्णशब्दो मूलतो वैदिकत्वाद् यौगिकः । तस्माद् वृणोतेर्वर्णः । जातिशब्दः कात्यायनसमये परिवारार्थे प्रायुज्यत पाणिनिसमये च गोत्रचरणार्थयोः । तदनन्तरं 'समानप्रसवात्मिका जातिः' आकृतिग्रहणादपि जातिप्रयोगोऽभूत् ।

अतो न कश्चिज्जन्मना ब्राह्मणादिः ।

पृ० १६४०, पं० ३—"अपरं च, किमीश्वरोक्तत्वाद् वेदाः सर्वैकर्तृकाध्ययनविषयाः ? ओमिति चेन्न, त्वद्रीत्या कण्ठतालुवादिहीनस्य निराकारस्येश्वरस्योच्चारयितृत्वासम्भवेन तदुक्तत्वासम्भवात् । अन्यथा पश्वादीनामपि वेदोच्चारणं स्यात् । सर्वशक्तिमतोऽपि प्रकृति-

---

'वह जो मौञ्जीबन्धन से चिह्नित ब्रह्म जन्म है, वहाँ उसकी माँ सावित्री और पिता आचार्य कहा जाता है ।' (२ । १७०)

'वेद का पारङ्गत आचार्य उस बालक की जिस जाति को विधिपूर्वक उत्पन्न करता है, वह जाति सत्य, अजर तथा अमर है ।' (२ । १४८)

वास्तव में वर्ण शब्द वैदिक है, जो 'वृणोतेः' अर्थात् वरण करने से होता है । जाति शब्द कात्यायन के समय परिवार अर्थ में, पाणिनि के समय गोत्र और चरण अर्थ में तथा 'समानप्रसवात्मिका जातिः' व आकृति से ग्रहण होने में जाति का प्रयोग बाद में हुआ । जैसे—मनुष्य जाति, पशु जाति आदि ।

अतः कोई जन्ममात्र से ब्राह्मणादि नहीं बन सकता ।

पृ० १६४०, पं० ३—"क्या आप ईश्वर के द्वारा उपदिष्ट होने से वेदों के अध्ययन में सबका समान अधिकार मानते हैं ? यदि हाँ, तो आपके मत से तो ईश्वर निराकार होने से कण्ठ, तालु प्रभृति अवयवों से रहित है, तब वह वेदों का उच्चारण कैसे करेगा ? उच्चारण न कर सकने पर वेदों को उनके द्वारा उपदिष्ट कैसे माना जा सकता है ? बिना कण्ठ आदि अवयवों के ही उच्चारण मानने पर तो पशु प्रभृति को भी वेद का उपदेश और उसके उच्चारण की सामर्थ्य मिल जानी चाहिये । वास्तव में तो ईश्वर भले ही सर्वशक्तिमान् हो, किन्तु संसार की व्यवस्था चलाने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विरुद्धकार्यकर्तृत्वासम्भव एव। अन्यथाम्रबीजादपि निम्बाङ्कुरोत्पत्तिप्रसङ्गाद् रिकार्डादिषु तु पुरुषोच्चरितशब्दानामेवाभिव्यक्तिः। अथेश्वरकर्तृकत्वादेव सर्वकर्तृकाध्ययनविषयत्वं वेदानां सिषाधयिषितमिति, तदपि तुच्छम्, क्षित्यादौ हेतोः सत्त्वेऽपि सर्वाध्ययनविषयत्वाभावेन व्यभिचारात्। न चाध्ययनविषयत्वाभावेऽपि सर्वभोगाविषयत्वेनैव सर्वाध्ययनविषयत्वमस्त्येव, अध्ययनस्यापि भोगविशेषत्वादिति वाच्यम्, भोग्यजातस्य सर्वत्रासम्भवेन सर्वकर्तृकत्वासम्भवात्।"

इत्यादि ग्रन्थवर्धनम्, अबुद्धिपूर्वकप्रश्नततीनामुद्भावितत्वात्। कथं ज्ञानं प्रदत्तं निराकारेण ब्रह्मणा, इत्यखिलं पूर्वं समाहितम्, नाऽत्र पिष्टपेषणं क्रियते। वर्णानामुच्चारणं मानसिकमपि सम्भवति। हृदयस्थिते ब्रह्मणा ऋषीणां मनोव्यापकत्वात् तत्रैव ज्ञानप्रादुर्भावनान्नावशिष्यते शङ्कालेशोऽपि। नहि प्रकृतिविरुद्धमाचरितुमीश्वरः समर्थः, परं भवन्तः पौराणिका

के लिये वह भी प्रकृति के विरुद्ध कोई कार्य नहीं करता। ऐसा न होने पर आम की गुठली में से नीम का पेड़ पैदा न होने में क्या बाधा मानी जायेगी? आजकल प्रचलित सिनेमा आदि के रिकार्डों में पुरुष के द्वारा उच्चारित शब्दों की ही अभिव्यक्ति होती है। ईश्वर की कृति होने से ही वेदों में सब के अध्ययन को सिद्ध करना भी ग़लत है; क्योंकि ईश्वर की कृति तो पृथिवी प्रभृति पदार्थ भी हैं, किन्तु वे सब के अध्ययन का विषय नहीं होते। इस तरह से आपका ईश्वरकर्तृत्व हेतु पृथिवी में व्यभिचरित हो जाता है; क्योंकि उसमें सर्वाध्ययनकर्तृत्व की स्थिति नहीं है। यदि आप कहें कि पृथिवी में सर्वाध्ययनकर्तृत्व भले ही न हो, किन्तु सर्वभोगविषयत्व तो उसमें रहता ही है। अध्ययन भी एक प्रकार का भोग ही है, इस तरह से पृथिवी में भी सर्वभोगविषयत्व के रूप में सर्वाध्ययनकर्तृत्व की स्थिति रहने से उक्त व्यभिचार नहीं होगा, तो इसका उत्तर यह है कि ईश्वरनिर्मित पृथिवी प्रभृति में सर्वत्र भोग्यस्थिति समान रूप से रहती ही हो, सब कोई समान रूप से उसका उपभोग कर सकते हों, ऐसी स्थिति नहीं रहती।"

इत्यादि कथन में तर्क से चिन्तन करने का कोई अंश नहीं है और ग्रन्थ बढ़ाने के लिये ही प्रश्नों की उद्भावना की है। निराकार ब्रह्म के द्वारा ऋषियों के विमल हृदयों में व्यापक होने से वेदज्ञान का प्रकाश कर दिया गया। यह सब कुछ हमारे द्वारा सविवरण पूर्व ही समाधान किया जा चुका है, पर आप अपने 'पिसे हुए को पीसने' की कहावत के अनुसार स्वभाववश ऐसा बार-बार करते हैं।

श्रीमन्! वर्णों का अन्तर्मानस उच्चारण भी तो होता है, तो व्यापक सर्वज्ञ ब्रह्म ने ज्ञानप्रकाश कर दिया। इसमें शङ्काक्लेश-लेश भी शिष्ट नहीं रहता। प्रकृतिविरुद्ध ईश्वर तो नहीं कर सकता,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बुद्धिशून्या अश्वमहिषमुखादपि वेदमन्त्राणामुच्चारणं कारयितुमर्हन्तीति निखिलं पौराणिककथासु प्रसिद्धम्।

अत्रैतस्य छलवैशिष्ट्यं यद् ऋषिणा त्रिषु हेतुषु 'ईश्वरोक्तत्वात्' इति हेतुः प्रस्तुतः, भवता 'कर्तृत्वम्' परिवर्त्यते। अध्ययनं सरलतया युज्यते ज्ञानेन न तथा कृतवस्तुना पृथिव्यादिना। अत्र प्रश्न ऋषिभिर्ज्ञानाधिकारप्राप्तेः। दुर्जनतोषन्यायेनाऽपि पृथिव्यादि-विषयाध्ययने सर्वाधिकारस्य दृग्गतत्वमस्ति। तृतीयहेतोः सर्वसत्यविद्याप्रकाशकत्वादित्यपि सर्वं व्यावर्तयति, न तदा भवादृशभ्रान्तिसाफल्यावकाशः।

पृ० १६४०, पं० ११—यदुच्यते—"किञ्च, सत्यविद्याप्रकाशत्वाद् वेदानां सर्वाध्ययनविषयत्वेऽसत्यविद्याप्रकाशकत्वस्य सर्वकर्तृकाध्ययनविषयत्वं न प्राप्नोति।" इत्यादि सकलमदार्शनिकमतिप्रेरितम्, असत्यस्य विद्यात्वाऽभावात्। नाऽपि तद्विषयकाणि शास्त्रपदाभिधेयानि भवितुमर्हन्ति।

पर आप तो बहुत से कार्य प्रकृतिविरुद्ध करते हैं; क्योंकि पौराणिक बुद्धिशून्यता के कारण अश्व महिष आदि के मुख से भी मन्त्रोच्चारण करने की सामर्थ्य अपनी कल्पित कथाओं में मानते हैं।

यहाँ आपका विशेष छल यह है कि ऋषि ने वेदों के अध्ययन के अधिकार में तीन कारणों में प्रथम ईश्वरोक्तत्व हेतु दिया है, आप चालाकी से धीरे-धीरे उक्तत्व को कर्तृत्व में बदल रहे हैं। अध्ययन का विषय तो सीधा उक्त ज्ञान से जुड़ जाता है, पर कृतवस्तुविषयक ज्ञान के विषय में खोज की बात बाद को आती है। परमेश्वर द्वारा उक्त तो ज्ञान है और कृत समस्त ब्रह्माण्ड है। प्रश्न यह तो है ही नहीं कि पृथिवी आदि पर उपलब्ध सुखादि को भोगने का अधिकार सबको है या नहीं। यहाँ तो सीधा प्रश्न है कि सृष्टि के आदि में दिये ईश्वरीय ज्ञान को ऋषियों के माध्यम से सब को पाने का अधिकार है या नहीं? अच्छा, दुर्जनतोषन्याय से ईश्वर की कृति पृथिवी आदि को ही ले लीजिये, उसके सम्बन्धी विषयों को पढ़ने में क्या भूगर्भशास्त्र और खगोलविद्या के खोजने या जाननेवाले आपकी मानी हुई शूद्रजाति में महान् विद्वान् उत्पन्न नहीं हुए? अवश्य हुए और हैं। फिर ऊपर ऋषि ने 'सत्यविद्याओं के प्रकाशक होने से' सबका अध्ययनाधिकार है, यह तीसरा हेतु दिया। इस तृतीय हेतु से भी 'पृथिवी' में अध्ययन के अधिकार अनधिकार सोचने का प्रश्न ही नहीं उठता; क्योंकि 'पृथिवी आदि' सब सत्यविद्याओं के प्रकाशक भी नहीं हैं। अतः शास्त्राध्ययन करनेवाले प्रौढ़ व्यक्ति शीघ्र समझ लेंगे कि आप अल्पधी और अल्पाधीतों को ही भ्रान्त कर सकते हैं, सूक्ष्मज्ञ सदसद्विवेकियों को नहीं।

पृ० १६४०, पं० ११—यह कहना भी बुद्धिशून्य है कि—"सत्यविद्या के प्रकाशक होने से वेदाध्ययन में सबका अधिकार माना जाये, तो असत्यविद्या के प्रकाशक शास्त्रों के अध्ययन का सबको अधिकार नहीं होना चाहिये, किन्तु देखा तो यह जाता है कि इनके अध्ययन का

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विद्या हि नाम आत्मशुद्धान्तःकरणसंयोगजनितं पदार्थदर्शनम्। तस्मादेतदाश्रितं तर्कशास्त्रजालमेतस्य सर्वं विनश्यति। पठनाधिकारे सत्यविद्याप्रकाशकत्वहेतुर्नाऽसद्धेतुः। इदं वचनमपि मौढ्यप्रेरितं यत् 'नास्तिकादिग्रन्थेषु सर्वसत्यविद्याप्रकाशकत्वविद्यमानताऽस्त्येव' इति, तत्र ब्रह्मरूपसर्वश्रेष्ठसत्यविद्याया अप्रकाशकत्वात्। वेदेतरवेदाङ्गोपाङ्गेष्वपि सत्यविद्याप्रकाशकत्वं घटते परन्न तत्रेश्वरोक्तत्वम्।

पृ० १६४१, पं० ६—यदुक्तम्—"ब्रह्मसूत्रेऽपशूद्राधिकरणे (१।८), जैमिनिसूत्रे शूद्रस्यानधिकाराधिकरणे (६।७), पारस्करादिभिः सूत्रकारैर्मन्वादिस्मृतिकारैश्च रामायणमहाभारतादिनिर्मातृभ्यां वाल्मीकिबादरायणाभ्यां शङ्कररामानुजमध्ववल्लभवेङ्कटसायणादिभिः स्पष्टमेव स्त्रीणां शूद्राणां वेदाध्ययनाधिकार उक्तः। दयानन्देन मनोः प्रामाण्यमभ्युपेतम्। मनुना तु—

'एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूययाः॥' (१।९१)

'अतोऽन्यद् यद्धि कुरुते तद् भवत्यस्य निष्फलम्।' (१०।१२३)

'परिचर्यः स्त्रिया साध्व्या सततं देववत् पतिः।' (५।१५४)

सबको अधिकार है।" क्योंकि शास्त्र कभी असत्यविद्या के प्रकाशक नहीं होते। भला जो शास्त्रों को असत्य विद्याओं का प्रकाशक माने, उसे हम मनुष्य कहने में भी हिचकिचायेंगे।

विद्या तो आत्मा के शुद्ध अन्तःकरण के संयोग से जन्य पदार्थों का दर्शन कहाती है। इसलिये इनका अशुद्ध अन्तःकरण से जन्य तर्कशास्त्रजाल सब नष्ट हो जाता है। पढ़ने के अधिकार में सत्यविद्या प्रकाशक हेतु कदापि असद् हेतु नहीं है। यह कथन भी मूढता है कि नास्तिकादि ग्रन्थों में सर्व सत्यविद्या प्रकाशकता की भी विद्यमानता है; क्योंकि ब्रह्म रूप सर्वश्रेष्ठ विद्या का तो वास्तविक ग्रन्थों में सर्वथा अभाव है। वेद से इतर वेदांग और उपांगों में भी सत्य विद्याएँ हैं, पर वे ईश्वरोक्त नहीं हैं।

पृ० १६४१, पं० ६—"ब्रह्मसूत्र के अपशूद्राधिकरण में, जैमिनिसूत्र के शूद्रानधिकाराधिकरण में, पारस्करप्रभृति के सूत्रग्रन्थों में, मनु प्रभृति के स्मृतिग्रन्थों में, रामायण-महाभारत प्रभृति ग्रन्थों में वाल्मीकि, बादरायण प्रभृति ऋषियों ने, शङ्कर, रामानुज, मध्व, वल्लभ, वेङ्कट, सायण प्रभृति आचार्यों ने स्पष्ट ही लिखा है कि स्त्रियों और शूद्रों को वेदों के अध्ययन का अधिकार नहीं है। दयानन्द ने मनु को प्रमाण माना है। मनु ने स्पष्ट लिखा है कि भगवान् ने शूद्र के लिये एक ही काम बताया है कि वह त्रैवर्णिकों की शुद्ध मन से सेवा करे। इसके सिवाय वह अन्य कुछ भी कार्य करता है, तो वह निष्फल जाता है। साध्वी स्त्री को अपने पति की देवता के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'नास्ति स्त्रीणां पृथग् यज्ञो न व्रतो नाप्युपोषणम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥'(५।१५५)

'अर्थस्य संग्रहे चैनां व्यये चैवं नियोजयेत्।
शौचे धर्मेऽन्नपक्त्यां च परिणाह्यस्य वेक्षणे॥'(९।११)

एभिर्वचनैः स्त्रीणां शूद्राणां च पतिशुश्रूषाद्विजशुश्रूषाव्यतिरिक्तानामुपनयन-वेदाध्ययनादिकर्मणां न केवलमविधानमेवाऽपितु नैष्फल्यमपि निगदव्याख्यातम्।"

इति समग्रं शास्त्राचिन्तनफलत्वादग्राह्यम्। अपशूद्राधिकरणे 'चातुर्वर्ण्यमविशेषात्' (मी० ६।१।२५) इति सूत्रे चातुर्वर्ण्यमधिकृत्य 'यजेत' 'जुहुयाः' इत्येवमादिशब्दमुच्चरति वेदः। कुतः? अविशेषात्। नहि कश्चिद् विशेष उपादीयते। तस्माच्छूद्रो न निवर्तते। (शाबरभा०)

आत्रेयेण निषिद्धोऽधिकारोऽयम्, परं बादरिणा समर्थितः। एवं पक्षप्रतिपक्षाभ्यां तर्कप्रतितर्काभ्यां प्रतिपादिते विषये अन्ते सूत्रकारेण 'अपि वा वेदनिर्देशाद् अपशूद्राणां प्रतीयते (३२) इति सूत्रेण 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्' इति वचनैर्न शूद्राणामधिकार इति कथ्यते। इदमेव प्रकरणमपशूद्राधिकरणनाम्ना प्रसिद्धम्। वस्तुतोऽपशूद्र-

---

समान सेवा करनी चाहिये। स्त्रियों के लिये अलग से किसी यज्ञ, व्रत अथवा उपवास का विधान नहीं है। वह जो पति की सेवा करती है, उसी से वह स्वर्ग में सुखोपभोग करती है। पति को चाहिये कि वह पत्नी को धन का सञ्चय और व्यय करने में नियुक्त कर दे। वही घर की पवित्रता, धर्म का आचरण और अन्नदान जैसे कार्यों की भी देखभाल करे। मनुस्मृति के इन वचनों से स्पष्ट है कि स्त्रियों और शूद्रों को पति की सेवा और द्विजों की सेवा को छोड़कर उपनयन, वेदाध्ययन प्रभृति कर्मों में कोई अधिकार नहीं है, साथ ही यदि वे इन कर्मों का आचरण करते हैं, तो उनको कोई फल नहीं मिलेगा।"

परिजातकार का यह समस्त लेख शास्त्रों का सम्यक् चिन्तन न करने से अग्राह्य है। अपशूद्राधिकरण (मी० ६।१।२५) सूत्र में कहा है कि 'यजेत' तथा 'जुहुयाः' आदि प्रयोग चातुर्वर्ण्य को अधिकृत कर कहे गये हैं, किसी वर्णविशेष को नहीं कहा गया है। इसलिये शूद्र का यजन और हवन से निवर्तन नहीं है। (शाबर भाष्य)

आत्रेय ने निषेध तथा बादरि ने समर्थन किया है। अन्त में 'अपि वा०' इस सूत्र से 'वसन्त में ब्राह्मण, ग्रीष्म में क्षत्रिय और शरद् में वैश्य का उपनयन करे' इन वचनों से शूद्रों का अधिकार तो कहा नहीं गया है। यही प्रकरण 'अपशूद्राधिकरण' नाम से प्रसिद्ध है। वास्तव में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नाम्नैव ध्वन्यते 'अपगता अपवर्जिता वा शूद्रा अस्मिंस्तत्' यदासीत् प्रागधिकारः। वर्णानां गुणकर्मस्वभावैर्निर्धारणं व्यवस्थायां कर्तुमसम्भाविन्यां शूद्राधिकारो निषिद्धः। परं तात्कालिकव्यवस्थायां प्रामाणिकत्वे वेदेतिहासविरुद्धत्वान्नेयं रूढा व्यवस्था मान्या तिष्ठति। सृष्टेरादावाविर्भूतानां वेदानामधिकारानधिकारप्रश्नस्य व्यवस्थाग्रन्थरचनोत्तरमुद्भावितत्वात्, मनुस्मृतौ तादृग्वचनप्रक्षेपसम्भवादन्यप्रमाणानामप्युपलम्भात्। एतत्प्रकरणस्थप्रथमसूत्रेण तु 'अविशेषात्' इति शूद्राणां तदधिकारे स्वारस्यमेव प्रकाशितम्। मनोरपि शूद्रशब्दो गुणकर्म-स्वभावज एव इष्टः। शोकार्थकात् 'शुच'धातोः 'शुचेर्दश्च' (उणा० २। १९) इति सूत्रेण शूद्रशब्दः सिध्यति। 'असतो वा सम्भूतो यत् शूद्रः' (तै० ३। २। ३। ९) असतोऽविद्यात इति। मनुः 'शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्' (१०। ६५) इति कथनं सन्दृभ्णाति—

'विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्।
शुश्रूषैव तु शूद्रस्य धर्मो नैश्श्रेयसः परः॥' (९। ३३४)

'शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः।
ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते॥' (९। ३३५)

अपशूद्र नाम से ही ध्वनित है कि पहले अधिकार था, जिसे अब छीना गया; क्योंकि गुण, कर्म और स्वभाव से वर्णों की व्यवस्था अराजकता होने से करना असम्भव हो गया तब शूद्र का अधिकार निषिद्ध कर दिया। आदिकालीन व्यवस्था में वेदोक्त होने से अधिकार था। वेद और इतिहास के विरुद्ध होने से यह रूढ व्यवस्था अमान्य है। सृष्टि के आदि में आविर्भूत वेदों के अध्ययन या अनध्ययन के अधिकार का प्रश्न तो बाद में उठा, जिस पर तात्कालिक व्यवस्थाग्रन्थों ने विचार किया। मनुस्मृति में अनधिकारविषयक श्लोक प्रक्षिप्त किये गये; क्योंकि अधिकार भी अन्यत्र द्योतित है। इस प्रकरण के प्रथम सूत्र में तो 'अविशेषात्' कहने से सबका अधिकार सिद्ध है। मनु को भी गुण, कर्म, स्वभाव से ही शूद्र शब्द इष्ट है। शोकार्थक 'शुच्'धातु से उणादिसूत्र (२। १९) से शूद्र शब्द सिद्ध होता है। इसीलिये कहा है कि 'असत् से शूद्र प्रकट हुआ' (तै० ३। २। ३। ९)। असत् का अर्थ यहाँ अविद्या है। मनु ने 'शूद्र ब्राह्मणता और ब्राह्मण शूद्रता को प्राप्त हो जाता है' इस सन्दर्भ में कहा है—

'गृहस्थ, यशस्वी, वेदों के विद्वान् विप्रों की सेवा करना ही शूद्रों के नैःश्रेयस का साधन है।' (९। ३३४)

'पवित्र, उत्कृष्ट सेवा करने का इच्छुक, मधुरभाषी, अहङ्कारशून्य, ब्राह्मण आदि का आश्रय नित्य करनेवाला शूद्र उत्कृष्ट जाति को प्राप्त कर लेता है।' (९। ३३५)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्र शुचिः सन् ब्राह्मणाद्युत्तमां जातिं वर्णं प्राप्नोतीति स्पष्टम्। पं० सत्यव्रतसामश्रमिणाऽप्युक्तम्—

"अमिश्रितार्यशोणितानामनार्याणां बुद्धिमान्द्यादितोऽनुपयुक्तयैवास्मच्छास्त्रेषु वेदग्रहणायोपनयनविधेरभावोऽनुग्रह एव, विमिश्रितार्यशोणितानां तु वेदव्याससदृशानां वेदग्रहणायोपनयनं केन वारितमिति स्फुटम्। मनुरप्याह—'बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः' इत्यादि (१०। १७), 'जातो नार्यामनार्यायामार्यादार्यो भवेद् गुणैः' (१०। ६७) इति च।" (ऐतरेया० पृ० १७)।

अग्रे 'साध्व्या सततं देववत् पतिः परिचर्यः' अथवा 'नास्ति पृथग् यज्ञः' इत्यनेन नेदं जातुचिद् ध्वन्यते यत् परमेश्वरो नोपासनीयः, पतिर्यं यज्ञं करिष्यति तत्र पत्नी सम्मिलिता न भविष्यतीति। प्रत्युत पृथग् यज्ञं न विदधीत, पत्या सार्धं तु विदधीतैव। यदि स्त्रीशूद्राणां नाधिकार उपनयने वेदाध्ययने वा, तदा कथं कवषैलूषो जन्मना शूद्रः कथङ्कारमृषिर्मन्त्रद्रष्टा जातः? कथं वा ऋषिका लोपामुद्राऽपालादयः स्त्रियोऽभूवन्। नोपनयनं विना वेदाध्ययनमादिष्टमव्रतस्य, अतो निर्णयसिन्धुकारो भवतां मान्यो व्यलेखीत्—

यहाँ पर ब्राह्मण आदि उत्तम जाति (वर्ण) प्राप्त करना अति स्पष्ट है। पं० सत्यव्रत सामश्रमी ने कहा है—

"अमिश्रित आर्यशोणितवाले अनार्यों की बुद्धिमन्दता से अनुपयुक्त होने से हमारे शास्त्रों में वेदों के ग्रहण करने के लिये उपनयनविधि का अभाव अनुग्रह ही है और आर्यशोणित से मिश्रित वेदव्यास सदृशों का वेदाध्ययन के लिये भला उपनयन का निषेध कौन कर सकता है, यह स्पष्ट है। मनु ने भी कहा है कि—'कुछ मनीषी बीज की प्रशंसा करते हैं और कुछ क्षेत्र की' (१०। १७), 'अनार्या नारी में आर्य से अर्य गुणों से उत्पन्न होता है' (१०। ६७)।" (ऐतरेयालोचन, पृ० १७)

आगे 'साध्वी के द्वारा देववत् पति की परिचर्या करनी चाहिये' तथा 'स्त्रियों के लिये यज्ञ, व्रतादि पृथक् नहीं है' इस कथन से यह तो सिद्ध होता है कि 'यज्ञ, व्रतादि पति के साथ करे', यह ध्वनित नहीं होता कि 'परमेश्वर की उपासना भी एकान्त में न करे'। ध्यान तो पृथक् ही सम्भव है। और न यह अर्थ निकलता है कि पति जिस यज्ञ को करेगा, उसमें पत्नी सहकारिणी नहीं बनेगी। अपितु यह अर्थ व्यञ्जित होता है कि पति के साथ अवश्य करे। यदि स्त्री और शूद्रों का वेदाध्ययन में अधिकार नहीं है, तो कवषैलूष, जो जन्मना शूद्र था, मन्त्रों का द्रष्टा ऋषि कैसे बन गया? और लोपामुद्रा, अपाला आदि भी ऋषिकायें कैसे बन गयीं? अव्रत अर्थात् उपनयन के विना तो वेदाध्ययन कर ही नहीं सकता। इसलिये आपके पूज्य निर्णयसिन्धुकार ने भी लिखा है कि—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते।
अध्ययनं च वेदानां भिक्षाचर्यं तथैव च ॥'

"प्रावृतां यज्ञोपवीतिनीमभ्युदानयन् जपेत्—'सोमो ददद् गन्धर्वाय' इति।" (गोभिल-गृह्य० २।१।१९) इति मन्त्रोच्चारणमपि दर्शयति।

हारीतसंहितायां तु स्त्रीणां द्वैविध्यं दर्शितम्—ब्रह्मवादिन्यः सद्योवध्वश्चेति। पराशरसंहिताया भाष्यकारो मध्वाचार्य आह—"तत्र ब्रह्मवादिनीनामुपनयनमग्निबन्धनं वेदाध्ययनं स्वगृहे भिक्षा इति। वधूनां तूपस्थिते विवाहे कथञ्चिदुपनयनं कृत्वा विवाहः कार्यः।" महाकविर्बाणभट्टोऽपि प्रमाणयति महाश्वेतां कृतोपनयनाम्—"अयुग्मलोचनसकाशात् प्रसादलब्धेन चूडामणिचन्द्रमयूखजालेन मण्डलीकृतब्रह्मसूत्रेण पवित्रीकृतकाया-मित्युल्लिख्य।" वाल्मीकिरामायणेऽपि महाराज्ञ्यः कौसल्यामातुरन्तिकमुपेतो रामोऽपश्यत्—

'सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा।
अग्निं जुहोति स्म तदा मन्त्रवत्-कृतमङ्गला ॥'

सा स्वस्तिवाचनादि कृत्वा मन्त्रैरग्निहोत्रं कुर्वाणासीत्। कश्चित् पामरो व्याख्यातवान्

'कल्प में पहले नारियों का मौञ्जीबन्धन हुआ करता था, वेदाध्ययन और भैक्ष्यचर्या भी होती थी।'

इसीलिये "वस्त्रावृत यज्ञोपवीतधारिणी कन्या विवाहमण्डप में—'सोमो ददद् गन्धवार्य'-इस मन्त्र को पढ़ती हुई आवे" यह गोभिलवचन चरितार्थ होता है। कहिये, यहाँ तो स्त्री द्वारा मन्त्रोच्चारण भी दिखा दिया।

हारीतसंहिता में तो स्त्रियों के दो प्रकार बताये गये हैं—ब्रह्मवादिनी और सद्योवधू। पराशरसंहिता के भाष्यकार मध्वाचार्य कहते हैं कि—"वहाँ ब्रह्मवादिनियों का उपनयन, अग्नि-बन्धन, वेदाध्ययन और स्वगृह में भिक्षा विहित है। और सद्योवधुओं का विवाहकाल उपस्थित होने पर जैसे-तैसे भी हो, उपनयन करके विवाह कर देना चाहिये।" महाकवि बाणभट्ट ने भी वर्णन किया है कि—"शिव के पास से प्रसादलब्ध चूडामणिभूत चन्द्र के किरणजाल से मण्डलीकृतकाय ब्रह्मसूत्र से काया को पवित्र करके"। राम जब महारानी कौसल्या माता के पास पहुँचे, तो उन्होंने देखा—

'रेशमी वस्त्र धारण किये हुए, प्रसन्न, नित्य व्रतादि में परायण मन्त्रों से मङ्गलाचरण करके हवन कर रही थी।'

किसी पामर ने इसकी व्याख्या करते हुए लिखा कि इस श्लोक में 'जुहोति' अन्तर्भावित

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदत्र 'जुहोति' इति अन्तर्भावितण्यर्थे प्रयुज्यते, तथा सति 'सा पण्डितैर्हावयति स्म' इत्येवार्थः। तं पृच्छामि किं वाल्मीकिर्महर्षिर्हावयति इति ण्यन्तं प्रयोगं नैवाऽजानात्? किमेतत्पण्डितापेक्षया वाल्मीकेः संस्कृतज्ञानं दुर्बलमासीत्? नैवं चेत्, सन्दिग्धं प्रयोगं कथमसौ कृतवान्? इमाः सर्वा अपि कल्पना विशिरःपादाः। दुर्जनतोषन्यायेन तथा सति पण्डिता जुह्वति जुह्वतश्च पण्डितान् सा प्रेरयतीति कृत्वाऽपि 'ब्रह्मा त्वो वदति जातविद्याम्' इतिवत् प्रेरयन्त्यास्तु पण्डितेभ्यो ज्ञानमतिरिच्येत।

महोदय! ईसाईमते काचित् स्त्री पादरी-विशप-डीन-पोपाद्यभिख्यां प्रशस्तां धारयितुं नानुमता, न वा यवनमते स्त्री 'इमाम' भवितुमर्हति। वैदिकधर्मस्य प्रभुविरचितवेदाश्रितस्य त्विदमेव वैशिष्ट्यं यदत्र ऋषिकाः, उपाध्यायाः, आचार्याः परसहस्रशोऽभूवन् भवितुमर्हन्ति च। परन्त्वदूरदर्शिकूपमण्डूकपण्डितम्मन्यैर्बुद्धिविपरीतकल्पनाकौशलमाकलय्य स्त्रियः शूद्र-पङ्क्त्यामास्थाप्यन्ते, शूद्राश्च रूढजातिजन्मतो मत्वा वेदाध्ययनस्याभाजनानीति घोष्यन्ते। इहाऽपि धन्यवादार्हा मातृशक्तिर्याऽद्यावधि वेदवञ्चिताऽपि शूद्रं स्वपुत्रमङ्के कृतवती क्षणमपि नात्यजत्। अत एव 'स्त्री शूद्रौ०' इह उच्यते।

'णि' के अर्थ में प्रयुक्त है। वैसा मानने पर 'वह पण्डितों से हवन करा रही थीं' यह अर्थ किया जायेगा। हम उससे पूछना चाहते हैं कि क्या वाल्मीकि महर्षि ण्यन्त 'हावयति' रूप नहीं जानते थे, जो वहाँ प्रयोग नहीं कर पाये? क्या वाल्मीकि का ज्ञान इस पण्डित की अपेक्षा भी दुर्बल था? यदि ज्ञान अधिक था, तो उन्होंने यह सन्दिग्ध प्रयोग कैसे कर दिया? उस पण्डित की ये तुकें बेसिर-पैर की हैं। अच्छा चलो, दुर्जनतोष न्याय से अन्तर्भावितण्यन्त ही मान लिया जावे, तो भी अक्ल से काम नहीं लिया गया। तब अर्थ होगा कि पण्डित हवन करते थे और कौसल्या हवन करते हुए पण्डितों को प्रेरित कर रही थी कि 'इस प्रकार करो।' इस प्रकार 'ब्रह्मा त्वो वदति' मन्त्र के अनुरूप ब्रह्मा का कार्य कर रही थी। तो इनका वेदविधि-ज्ञान तो पण्डितों से भी अधिक हुआ।

महोदय! ईसाई मत में कोई स्त्री पादरी नहीं हो सकती। विशप, डीन और पोप—इस प्रशस्त संज्ञा को प्राप्त नहीं कर सकती। यवनमत में इमाम बनने की उसे अनुमति नहीं है। प्रभुविरचित वेदाश्रित धर्म का तो यही सबसे बड़ा गौरव है कि वह ऋषिका, उपाध्याया, आचार्या बन सकती है और सहस्रों ऐसी हो चुकी हैं। परन्तु अदूरदर्शी, कूपमण्डूक, पण्डितम्मन्यों ने बुद्धिविहीन कल्पनाएँ करके मातृशक्ति को शूद्रों की पङ्क्ति में स्थापित कर दिया और शूद्रों को रूढ जाति से उत्पन्न मानकर वेदाध्ययन का अपात्र मानते हैं। परन्तु मातृशक्ति भी धन्य है, जिसने ब्राह्मणादि द्विजों की भी माँ होकर विद्या से वञ्चित होना स्वीकार किया, पर अपने सपूतपीडित व दलित शूद्रपुत्रों को अपनी छाती से ही चिपटाये रही, कभी साथ नहीं छोड़ा। तभी तो 'स्त्रीशूद्रौ नाधीयाताम्' में भी आगे रहना स्वीकार कर लिया और शूद्रों के साथ उपनयन और वेद से भी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

महर्षिर्दयानिधिर्धन्यधन्यो दयानन्दो निर्भयं वेदमूलकमुद्घोषयताधिकारं तेषाम्। वेदमन्त्रोऽपि सर्वसामान्यो यस्य न विनियोगोऽन्यविशिष्टकर्मणि। मम सम्मतावस्य 'शूद्राधिकारे' कर्मणि विनियोगो विधेयः। शूद्रा नार्यश्चाकल्पान्तं महर्षेर्ऋणं निर्यातयितुं न क्षमाः।

पृ० १६४२, पं० ३—अत्र यदाहायम्—"सीतायाः षष्ठे वर्षे विवाह उक्तः, उपनयनं तु नोक्तम्" इति सर्वं रामायणेऽपि प्रच्छन्ननास्तिकैर्वेदविद्वेषिभिरेव प्रक्षिप्तम्। वाल्मीकिरामायणे तु 'तमस्मेरा युवतयो युवानं मर्मृज्यमानाः' (ऋ० २। ३५। ४) इति वेदमनुसृत्यैवोक्तम्। अत्रिमुनिपत्न्याऽनसूयया सह वार्तां कुर्वाणा भगवती सीता कथयति—

'पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता।
चिन्तामभ्यगमद् दीनो वित्तनाशादिवाधनः॥' (अयोध्याका० ११८। ३४)

ऋषिकन्यकानां विवाहो यौवन एवाऽभूत्। भगवतः श्रीकृष्णस्य निजप्रियाया रुक्मिण्याः स्वयंवरोऽपि युवावस्थां प्राप्ताया अभूत्। यथा—

वञ्चित होती रही। धन्य हो माता की सहृदयता! सच है 'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति'।

महर्षि दयानिधि देवदयानन्द को धन्यवाद है, जिन्होंने वेदमूलक शूद्रों के अध्ययन के अधिकार की पुनः घोषणा की। वेदमन्त्र भी ऐसा सर्वमान्य ढूँढ निकाला, जिसका विनियोग किसी विशिष्ट कर्म में नहीं है। मेरी सम्मति में इस मन्त्र का विनियोग 'शूद्रस्य वेदाधिकारे' शूद्र के लिये वेदाधिकार में किया जाना चाहिये। शूद्र और नारियाँ महर्षि के इस ऋण को कल्प बीतने तक उतारना चाहते हैं।

पृ० १६४२, पं० ३—यह इनका उद्धरण भी वाल्मीकि रामायण में ऐसे ही प्रच्छन्न नास्तिकों ने प्रक्षिप्त कर दिया कि—"सीता का छठे वर्ष में विवाह हुआ, किन्तु उपनयन संस्कार का उल्लेख नहीं है।" वाल्मीकि रामायण में वस्तुतस्तु 'तमस्मेरा युवतयो युवानं मर्मृज्यमानाः' (ऋ० २। ३५। ४) इस मन्त्र के अनुरूप ही कहा है। अत्रि मुनि की पत्नी अनसूया के साथ बात करती हुई जगज्जननी भगवती सीता जी कहती हैं—

'मेरे पिता पति के संयोग के योग्य मेरी आयु को देखकर अत्यन्त चिन्तित हो गये, जैसे कोई निर्धन शेष धन के नाश की चिन्ता से ग्रस्त हो जाता है।' (अयोध्या० ११८। ३४)

ऋषिकन्याओं का भी विवाह यौवन में ही हुआ था। भगवान् श्रीकृष्ण की निज प्रिया रुक्मिणी का स्वयंवर भी युवावस्था पाने पर ही हुआ था। आपका श्रीमद्भागवतपुराण ही कह रहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'तां देवमायामिव वीरमोहिनीं सुमध्यमां कुण्डलमण्डिताननाम्।
श्यामां नितम्बार्पितरत्नमेखलां व्यञ्जत्स्तनीं कुन्तलशङ्कितेक्षणाम्॥'
(श्रीमद्भागवत० १०।५३)

श्लोके 'श्यामाम्' इति पदेन 'षोडशवार्षिकीम्' इत्यर्थः। दमयन्त्या विवाहोऽपि युवावस्थायां जातः। नूतना विवाहविधानप्रक्षेपा यवनैः कन्यापहरणभिया मुसलमानराज्ये ग्रन्थेषु कृताः। सतीप्रथाऽपि तदैव स्वरक्षणार्थं हिन्दूनारीभिः स्वीकृता, येन म्लेच्छो न स्पर्शेदङ्गम्।

ननु 'पद्भ्यां शूद्रो अजायत' इत्यत्र 'अजायत' इति पदं जन्मना वर्णं साधयति, ओम् इति, शूद्रस्य तु अजायत इति प्रयोगेण 'जन्मना जायते शूद्रः' इत्येव सिध्यति। यो गुणान् कर्माणि वा द्विजानां न धारयेत् स तु शूद्र एव।

अत्र ब्राह्मणेन सह आसीत् क्षत्रियवैश्याभ्यां कृत इति अनुवर्तते, शूद्रभवनाय न कश्चित् प्रयासोऽनुष्ठेयो भवतीति व्यज्यते।

'देवमाया के समान वीरमोहिनी, सुमध्यमा, कुण्डलमण्डिताननाम, नितम्ब पर मेखला पहने हुए, कुन्तल के सदृश कुटिल नेत्रवाली श्यामा को विवाहित किया।' (श्रीमद्भागवत पु० १०। ५३)

इस श्लोक में 'श्यामा' पद से षोडषवार्षिकी तो स्पष्ट ही है। दमयन्ती का विवाह भी युवावस्था में हुआ था। नये विवाहविधान-प्रक्षेप यवनों के द्वारा कन्यापहरण के भय से मुसलमानों के राज्य में आपत्तिकाल में कर लिये गये। सतीप्रथा भी उसी समय आत्मरक्षा के लिये आर्यवीरललनाओं ने स्वीकृत कर ली थी, जिससे म्लेच्छ अङ्गस्पर्श न कर सके।

प्रश्न—'पैरों से शूद्र पैदा हुए' इसमें 'अजायत' क्रिया से प्रकट है कि जन्म से ही वर्ण (जाति) होता है; क्योंकि वह तो पैदा ही शूद्र हुआ।

उत्तर—शूद्र के साथ 'अजायत' पैदा हुआ, इस क्रिया से 'जन्मना पैदा हुआ शूद्र ही होता है' इस अर्थ पर हमें कोई आपत्ति नहीं। जब तक वह द्विजों के कर्मों को धारण न करे, तब तक शूद्र ही रहेगा।

इस मन्त्र की सभी क्रियाओं पर ध्यान दीजिये। 'ब्राह्मणोऽस्य मुखमासीत्' यहाँ पर 'आसीत्' क्रिया है, इस पुरुष का मुखवत् मुख्य ब्राह्मण था, है और होगा भी। अब आगे पढ़ा हुआ 'कृतः आसीत्' किया गया है अर्थात् ब्राह्मण भी किया गया, क्षत्रिय भी करने से हुआ और वैश्य भी कर्म करने से होता है, पर शूद्र कोई बनना नहीं चाहता। चाहे भी कोई तो उसे प्रयत्न करना कुछ नहीं है, वह तो जैसा था वैसा ही बना रहे तो शूद्र ही है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तदा किं शूद्रस्य ब्राह्मणादिभवनाग्र कश्चिन्नावसरः ? अस्त्येव, स्वामिना सत्यार्थ-प्रकाशे सर्वबालानां विना भेदभावं गुरुकुलप्रवेशो राज्ञाऽवश्यं कारयितव्य इति विहितत्वात्।

एवं सति तु शूद्राणामुच्छेद एव भविष्यति, किमेतच्छूद्राणां हितमस्ति ? आम्, शूद्राणां सुराज्ये प्रायशो बाहुल्यं न भवति लोकहिताय। यथोक्तं मनुना—

'यद् राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनश्यत्याशु तत् कृत्स्नं दुर्भिक्षव्याधिपीडितम्॥' (८। २२)

पृ० १६४३, पं० ४—यच्च—"हे मनुष्यों ! मैं ईश्वर जैसे (ब्रह्मराजन्याभ्यां) ब्राह्मण क्षत्रिय के लिये, वैश्य के लिये शूद्र और अपने स्त्री सेवक आदि के लिये, उत्तम लक्षण प्राप्त हुए अन्त्यज के लिये (च) भी (जनेभ्यः) इन उक्त मनुष्यों के लिये (इह) संसार में प्रकट की हुई (कल्याणी) सुख देने वाली (वाचम्) चारों वेदरूप वाणी का उपदेश करता हूँ। वैसे ही आप लोग भी अच्छे प्रकार उपदेश करें। जैसे मैं (दातुः) दानवाले के संसर्गी (देवानां) विद्वानों की दक्षिणा, अर्थात् दान के लिये प्रिय मनोहर प्यारा होऊँ और मेरी यह कामना उत्तमता

तो क्या शूद्र के लिये ब्राह्मणादि होने का कोई अवसर नहीं है ? है ही। ऋषि दयानन्द ने सत्यार्थप्रकाश में 'विना भेदभाव के सब बालकों को गुरुकुल में प्रवेश राजा को अवश्य करा देना चाहिये' ऐसा लिखा है। इस प्रकार शूद्रों का या शूद्रता का समूल उच्छेदन का ही प्रयास करना चाहिये।

वाह ! खूब कहा कि शूद्रों का समूल विनाश हो, इसमें शूद्रों का क्या हित होगा ? हाँ हित होगा। किसी भी राज्य में शूद्रों का (गुण कर्म से, जाति से नहीं) बढ़ जाना अहितकर होता है। मनु ने कहा भी है—

'जो राज्य शूद्रबहुल, नास्तिकों से आक्रान्त और द्विजविहीन हो जाता है, वह राष्ट्र दुर्भिक्ष और व्याधिप्रपीडित होकर शीघ्र नष्ट हो जाता है।' (८। २२)

पृ० १६४३, पं० ४—"दयानन्दीय वेदभाष्य में तो—'हे मनुष्यों ! मैं ईश्वर जैसे ब्राह्मण-क्षत्रियों के लिये, वैश्य के लिये, शूद्र और अपने स्त्री-सेवक आदि के लिये, उत्तम लक्षण प्राप्त हुए अन्त्यज के लिये भी, इन उक्त मनुष्यों के लिये संसार में प्रकट की हुई, सुख देनेवाली चारों वेदरूप वाणी का उपदेश करता हूँ, वैसे ही आप लोग भी अच्छे प्रकार से उपदेश करें। जैसे मैं दानवाले के संसर्गी विद्वानों की दक्षिणा अर्थात् दान के लिये प्रिय, मनोहर, प्यारा होऊँ और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

से बढ़े तथा मुझे वह परोक्ष सुख प्राप्त हो, वैसे आप लोग भी होवें और वह कामना तथा सुख आपको प्राप्त होवे' इति ।

एताभ्यामुद्धरणाभ्यां स्पष्टं विज्ञायते यदीश्वरो ब्राह्मणक्षत्रियौ वैश्यं शूद्रं स्वस्वस्त्रीसेवकान् अन्त्यजं च वेदानध्यापयति, ईश्वरस्य च स्त्रीसेवकाः सन्तीति, स च ब्राह्मणादीन् वेदानध्यापयतीति दयानन्दीयोऽभिप्रायः । तत्रेदं विचारणीयं यदेतत् सर्वनिराकारस्य देहेन्द्रियकण्ठतात्वादिरहितस्य किं सम्भवति ?"

इति व्याकरणादिशास्त्रानभिज्ञस्यास्य अशिक्षितजनप्रवञ्चनापटोश्छलमेव विद्यते। 'अध्यापयति' इत्यस्य योगे द्वितीयाविभक्तेः प्रयोगस्यैवौचित्याद् इति शाब्दज्ञा विदन्ति । परमिह 'ब्राह्मणक्षत्रियाभ्यां शूद्राय चार्याय स्वाय चारणाय' इत्यत्र चतुर्थ्याः सम्प्रदाने प्रयोगो विद्यते न तु कर्मत्वम् । 'स्वाय' इत्यस्याशयो यदेते ब्राह्मणादीनां स्त्रियः सेवकाश्चाभिलक्षिताः । कण्ठ-तात्वादिसम्भावनायामेव उपदेशस्यौचित्यं यदाह तत्र तु प्रामाणि समाधीयत यद् ऋषीणां हृदयेषु व्यापकत्वादीश्वरस्य विनैव भौतिककण्ठादीनि ज्ञानस्य प्रकाशितत्वसम्भवात् ।

मेरी यह कामना उत्तमता से बढ़े तथा मुझे वह परोक्ष सुख प्राप्त हो, वैसे आप लोग भी होवें और वह कामना तथा सुख आपको प्राप्त होवे।'

इन दोनों उद्धरणों से दयानन्द का यह स्पष्ट अभिप्राय प्रतीत होता है कि ईश्वर ब्राह्मण, क्षत्रिय, वैश्य, शूद्र को तथा स्त्री, सेवक और अन्त्यज—सबको वेद का अध्ययन कराते हैं । इससे यह सिद्ध होता है कि ईश्वर के स्त्री, सेवक प्रभृति हैं । इसमें विचारणीय बात यह है कि निराकार ईश्वर के जब शरीर और कण्ठ, तालु आदि अवयव नहीं हैं, तो यह सब कैसे सम्भव हो सकेगा ?"

उक्त रूप में महर्षि के लेख पर इनका ऐसा कथन प्रकट करता है कि इनको व्याकरणादि तथा वाक्यरचना का भी ज्ञान नहीं है । हाँ, ऐसे अल्पज्ञों को ठगने में इनका यह प्रस्तुतीकरण छल ही है । आप अपनी ओर से 'अध्यापयति ईश्वरः' इस क्रिया का प्रयोग कर रहे हैं और इस बात को थोड़ा भी व्याकरण जाननेवाला जानता है कि इसके योग में द्वितीया विभक्ति होती है । परन्तु यहाँ 'ब्राह्मणराजन्याभ्यां शूद्राय स्वाय' आदि सभी में चतुर्थी विभक्ति है, कर्म नहीं है । आपकी नुमायशी बुद्धि देखिये कि आप 'स्वाय' का अन्वय पूर्व साहचर्य में पठित 'ब्रह्मराजन्याभ्यां' के साथ न करके 'ईश्वर' के साथ करके 'ईश्वर के स्त्री, सेवक' अर्थ कर रहे हैं, जबकि ब्राह्मणादि के अपनी 'स्त्री, सेवक' अभीष्ट हैं । ईश्वर के कण्ठ तालु आदि की सम्भावना करने में आप फिर यह वही छेड़ बैठे, जब कि पूर्व ही बता दिया गया कि ईश्वर सर्वव्यापक अग्न्यादि ऋषियों के हृदय में वेदों का प्रकाश कर देता है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६४३, पं० १४—पश्यन्तु पक्षपातविरहिता विवेकिनो यदयमार्याभिविनयस्य अर्थप्रकाशं भागं विलोप्य शिष्टमुद्धरति लोकलोचनेषु धूलिप्रक्षेपणप्रवीणः। यथा—"हे इन्द्र परमैश्वर्ययुक्त ईश्वर हमारा वध मत कर (अर्थात्) अपने से अलग हमको मत गिरावे। हमारे प्रिय (भोगों) लोगों को मत चोर और मत चोरवावै, हमारे गर्भों का विदारण मत कर, अत्र परमेश्वरस्य विदारयितृत्वमुक्तम्।" इति। अत्र कोष्ठकान्तर्गते पदे विलोपिते, 'भोगो' इत्यस्य स्थाने चापपाठे 'लोगों' इति मूलकृदनुवादकौ कृतवन्तौ। अत्राधुनिकभाषादृष्ट्या 'चोर और चोरवावै' इति रूपो हिन्दीप्रयोगो विचित्र इव प्रतीयते, परं १९३२ संवत्सरे (सन् १८७५) यदा हिन्दीभाषानिर्माणकाल आसीत्, तस्मिन् काले सारल्यदृष्ट्या प्रायुज्यत महर्षिणा। एतास्याऽभिप्रायस्तु 'विलुप्त न करें' इति।

पृ० १६४४, पं० ३—यच्च—"अश्वस्य त्वा वृष्णः शक्ना धूषयामि' (वा० सं० ३७। ९) दयानन्दीयभाष्ये—'(वृष्णः) यज्ञस्थल में वेगवान् (अश्वस्य) अश्व के (शक्ना) लीद से तुमको भरवाये, पृथिव्यादि के ज्ञान के लिये तुमको भरवाये, तत्त्वबोध के उत्तम अवयव के लिये तुम को यज्ञसिद्धि के लिये तपाता हूँ' किमेतत् सर्वं निराकारस्य सम्भवति? दयानन्दस्यैतादृश एव वेदार्थः।" इति अकिञ्चित्करम्, उक्तभाषाया भाष्येऽप्राप्तेः।

पृ० १६४३, पं० १४—निष्पक्ष लोग देखें कि यह 'आर्याभिविनय' के अर्थप्रकाशन भाग को विलुप्त कर लोगों के लोचनों में धूलि झोंकने में प्रवीण शेष उद्धृत कर रहा है। यथा—"हे इन्द्र परमैश्वर्ययुक्त ईश्वर हमारा वध मत कर (अर्थात्) अपने से अलग हमको मत गिरावे। हमारे प्रिय (भोगों)लोगों को मत चोर और मत चोरवावै। हमारे गर्भों का विदारण मत कर, यहाँ पर परमेश्वर का विदारयितृत्व कहा है।" इन्होंने उक्त वाक्य में कोष्ठान्तर्गत पदों का अपने पाठ में विलोप कर दिया है। 'भोगों' के स्थान में 'लोगों' लिख दिया। ऐसी भूल लेखक और अनुवादकार दोनों ने ही की है। ऋषि की भाषा में आधुनिक भाषालेखकों को 'चोर चोरवावै' इस रूप का हिन्दीप्रयोग कुछ अटपटा सा लग रहा होगा, पर १८७५ सन् में जब हिन्दी को महर्षि रूप दे रहे थे, तब वह हिन्दी का निर्माणकाल या जन्मकाल था। उस समय सरलता की दृष्टि से महर्षि ने ऐसा प्रयोग किया।

पृ० १६४४, पं० ३—'अश्वस्य त्वा वृष्णः०' इस मन्त्र का दयानन्दीय भाष्य यह है—'यज्ञस्थल में वेगवान् घोड़ों के लीद से तुमको भरवाये, पृथिवी आदि के ज्ञान के लिये तुमको भरवाये, तत्त्वबोध के उत्तम अवयव के लिये तुमको यज्ञसिद्धि के लिये तपाता हूँ।' क्या ये सब बातें ईश्वर को निराकार मानने पर सम्भव हो सकती हैं? स्वामी दयानन्द ने सब जगह वेदों का इसी तरह का अर्थ किया है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नह्यत्र निराकारस्य कृते प्रत्यपादि स्वामिना, मनुष्योऽत्र सम्बोधितः। तत्रायं भावः— ईश्वरोऽन्तरिक्षे देवयजनस्थलेऽग्निना शक्ना अर्थाद् दुर्गन्धनिवारकधूम्रादिना तापयति।

ऋषिदयानन्देन 'शक्ना' शब्दस्य 'शक्लृ'धातोर्निष्पन्नत्वात् त्रयोऽर्था व्यधिषत—(१) दुर्गन्धादिनिवारणसमर्थधूम्रादिना, (२) शक्ना अश्वस्य शकृता, (३) तेजसा। परं भवतः पूज्यमहीधरेण महावीराणां धूपने प्रत्येकवारं सप्तसप्ताश्वशकृन्ति गृहीत्वा दक्षिणाग्नि-दीप्तेनाश्वपुरीषेण त्रिभिर्मन्त्रैस्त्रीन् महावीरान् धूपयेदिति लिखितम्। तत्र तेन तु 'शक्ना' इत्यस्य सर्वत्राश्वशकृदर्थ एव गृहीतः। भवतोऽविचारकपूर्वजभाष्यकारैस्तु विकार्य विनाशित एव वेदार्थः। तैर्न कश्चिदर्थोऽत्र जीवनोपयोगी विचारितः।

पृ० १६४४ पं० ७—यच्च—"वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्' (अथर्व० १९। ७१। १) इति द्विजानामेव वेदेऽधिकार उक्तः। तथा च शूद्रादीनां वेदाध्ययनेऽधिकारबोधने परस्परं व्याघातः। 'तदप्रामाण्यमनृतव्याघातपुनरुक्तिदोषेभ्यः' (गौ० सू० २। १। ५७) इति रीत्याऽप्रामाण्यापत्तिर्वेदानां स्यात्। किञ्च, यथेमां वाचमत्र वेदपदं नास्ति, 'वेदमाता द्विजानाम्'

श्रीमन्! यहाँ निराकार ईश्वर की कोई चर्चा ही नहीं। वैसे ये अर्थ साकार मनुष्य को सम्बोधित कर किये गये हैं। इस मन्त्र के अर्थ में प्रथम अंश दुर्गन्धनाशक पदार्थ से हवन कर जल-वायु को शुद्ध करने में है। दूसरा अंश, जिसमें लीद से तपने की बात है, वह आप सदृश उन्मादरोगग्रस्त को लीद के धुएँ से तपाने में या तुम्हारे साकार ईश्वर पर ही सम्भव अवस्था में घटित हो सकता था।

ऋषि दयानन्द ने तीसरे 'शक्ना' का अर्थ 'अग्नि के तेज से तपाता है' यह किया है। पर आपके पूर्वज उव्वट और महीधर आदि ने तीनों स्थानों पर 'शक्ना' का अर्थ लीद ही किया है, जो आपको नहीं दीखा। और पूर्व के मन्त्र पढ़ कर बनाये गये मिट्टी के तीन महावीरों को प्रत्येक वार सात लेडियों (शकृत्पिण्ड) से दक्षिणाग्नि में दीप्त पुरीष से तपाना लिखा है। वहाँ 'शक्ना' का सर्वत्र लीद अर्थ ही किया है। आपके पूर्वजों ने तो मन्त्रों का जीवनोपयोगी कोई अर्थ नहीं किया।

पृ० १६४४, पं० ७—"वेदमाता प्रचोदयन्तां पावमानी०' इस अथर्ववेदीय मन्त्र में वेदों के अध्ययन में द्विजों को ही अधिकार दिया गया है। इसलिये शूद्र प्रभृति का वेदाध्ययन का अधिकार बतानेवाली श्रुति का इस श्रुति से विरोध होगा। श्रुतियों का इस तरह का परस्पर विरोध व्याघात कहलाता है। न्यायसूत्र में बताया गया है कि इस दोष की उपस्थिति में श्रुति अप्रमाण हो जायेगी; क्योंकि एक श्रुति दूसरी श्रुति का बाध करेगी, तब यह निश्चय हो पाना कठिन होगा कि इनमें कौनसी श्रुति सही है। फलतः दोनों ही श्रुतियाँ परस्पर विरुद्ध होने से अप्रमाण मान ली जायेंगीं। 'यथेमां वाचम्०' इस मन्त्र में 'वेद' शब्द नहीं है और 'वेदमाता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यत्र तु वेदपदमस्ति। तेन वेदे द्विजानामधिकारः, वेदातिरिक्तवाचि समेषामधिकारः। 'यथेमां वाचम्' इत्यस्येश्वरो देवतेति भ्रमः, परमेतदन्तिमांशेन विरुध्यते, न ह्याप्तकामस्येश्वरस्यमे कामः समृध्यतामित्याशीः सम्भवति।"

इत्यपि सर्वं शास्त्राननफलितम्। प्राग् बहु समाधीयत, इहाऽपि किञ्चित् पुनर्यद् द्विजा भूत्वैव वेदपठनाधिकारः, जन्मना शूद्राणामपि गुरुकुले प्रविष्टानां तीव्रबुद्धीनामाचार्येणोपनयन-स्यानन्तरंवेदाध्ययनसम्भवात्। तस्य कामस्तु नित्यः संसारे वेदप्रचारो जायेतेत्यात्मकः।

'पावमानी द्विजानाम्' इत्यादि परिजातकारकथनं भ्रामकमुन्मत्तप्रलपितमिव। 'पावमानी द्विजानाम्' इत्यनेनायं सिषाधयिषति द्विजमात्रस्यैव वेदाध्ययनाधिकारं परं न तथा सम्भवति। 'द्विजानां पावमानी' इत्यस्य तात्पर्यं न जन्मजातद्विजानभिलक्ष्य वर्तते, अपि नाम ते कियन्तोऽपि आचारभ्रष्टाः स्युः, तान् पावयिष्यत्येव श्रुतिः। द्विजातिरिक्तेषु जन्मजातेषु नाल्पोऽपि दोषोऽनया दूरीकर्तुं शक्यत इति। यतो हि परमात्मनि तद्वाण्यां वा नैवंविधपक्षपातस्य कृते गुञ्जावकाशः सम्भवति। उक्तमन्त्रस्य तात्पर्यं तु अद एव यद् येऽपि द्विजन्मानो भवन्ति अर्थाद् येषामेकं जन्म मातृकुक्षेरितरच्च सावित्र्युदरात् तेषां पवित्रतां नूनं विधास्यति श्रुतिः। एतेनाऽपि सिध्यति यद् ये च पूता बुभूषवस्ते अवश्यमुपनयनं कारयेयुः, यत्कृते च गुरुकुलप्रवेशोऽपरिहार्यत्वेन विधेयः।

द्विजानाम्' इस में वेद शब्द विद्यमान है। इससे यह सिद्ध होता है कि वेदों के अध्ययन में केवल द्विजों का अधिकार है और वेद से भिन्न शास्त्रों के अध्ययन में सबका अधिकार है। 'यथेमां वाचम्' इस मन्त्र में यह भ्रम हो जाता है कि इस मन्त्र का वक्ता ईश्वर ही है, किन्तु इसी मन्त्र के अन्तिम अंश से इसकी निवृत्ति हो जाती है; क्योंकि ईश्वर आप्त काम है, उसको सब कुछ प्राप्त है, अतः ईश्वर के लिये यह आशीर्वचन सार्थक नहीं हो सकता कि मेरी सब कामनाएँ पूरी हों।"

इत्यादि पारिजातकार का कथन भ्रामक तथा उन्मत्तप्रलापवत् है। 'पावमानी द्विजानाम्' से आप द्विजमात्र का वेदाधिकार सिद्ध करना चाहते हैं, जो ठीक नहीं। 'द्विजों को पवित्र करनेवाली' इसका यह अर्थ कदापि नहीं कि जो जन्मना द्विज हैं, चाहे वे कितने ही भ्रष्ट हों, उन्हें पवित्र कर लेगी और द्विजातिरिक्त में थोड़ी सी भी न्यूनता होगी तो उसे पवित्र नहीं करेगी; क्योंकि परमात्मा और उसकी वेदवाणी में ऐसा पक्षपात सम्भव ही नहीं है। तब इसका अर्थ होगा—जो भी दो जन्म धारण करेंगे अर्थात् प्रथम माता से, दूसरा उपनयन कराके सावित्री के उदर से जन्म लेंगे, उन्हें पवित्र करेगी। इसलिये इससे भी सिद्ध होता है कि पवित्र होने के इच्छुक सभी द्वितीयजन्मा अर्थात् उपनयन अवश्य करावे, जिसके लिये गुरुकुलप्रवेश अनिवार्य होना चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतस्याग्रिममन्त्रस्यापि च देवता ईश्वर एव। ईश्वरायाशीर्वाददानवार्ताविमर्शनमपि मौर्ख्यमेव, नाऽपि वेश्वरोऽभिलषत्याशिषं तस्य सर्वमनोरथफलितत्वात्। श्रीमन्! 'भूयासम्' इति लोक एव लिङ्याशिष्यर्थे निष्पद्यते, परं वेदे तु भूयासमित्यस्यार्थः 'अस्मि, आसम्, भविष्यामि' इति त्रयोऽपि सम्भवन्ति। अस्माकमीश्वरस्त्वाप्तकामो गुरूणामपि गुरुरस्ति। मन्ये भवतोऽवतारी गुरुस्त्ववश्यं गरीयसामाशीःकामः स्यात्। तस्य निराकारस्य कामस्तु सर्वकल्याणकृद्वेदवाण्याः प्रसार एव।

न वा वेदोक्तीनां क्वाऽपि विरोधः, सर्वत्रैव 'पञ्चजना मम होत्रं जुषध्वम्' इति भावस्यैव पोषितत्वात्। शूद्रजात्युत्पन्नानां बालानामप्युपनयनं विधेयमेव। त्रैवर्णिकस्यैवोपनयनमिति पक्षोऽपि साध्यकोटिमवगाहते। न च साध्यकोटिमवगाहमानः कदाचित् स्वयमसिद्ध सन् परान् साधयितुमलं भवितुमर्हति दिव्यवर्षसहस्रेणाऽपि। तस्माच्छूद्राणां वेदाध्ययनानधिकारोऽनादरणीय एव। अन्यथा 'रुचं विश्येषु शूद्रेषु' इत्यादिश्रुतयः समानार्थप्रतिपादयित्र्योऽनेकाः प्रपीड्येरन्। अस्मिन् मन्त्रे 'रुक्' आत्मप्रकाश एवेष्यते। नाऽसौ वेदाध्ययनमन्तरा जातुचित् सम्भवति।

इस मन्त्र का तथा अग्रिम मन्त्र का भी देवता ईश्वर ही है। ईश्वर को आशीर्वाद की बात सोचना भी मूर्खता है और न यहाँ ईश्वर आशीर्वाद चाह रहा है। श्रीमन्! 'भूयासम्' आशिषि लिङ् से लोक में आशीर्वाद अर्थ में होता है, पर वेद में 'भूयासम्' का अर्थ 'अस्मि', 'आसम्' तथा 'भविष्यामि' भी है, अर्थात् तीनों कालों में विद्वानों और दानी व शीलवान् पुरुष का प्रिय हुआ, होता हूँ और होऊँगा, यह अर्थ है। हमारा ईश्वर तो आप्तकाम 'गुरूणां गुरुः' है; हाँ, आपका अवतारी ईश्वर अवश्य अपने से बड़े गुरुओं से आशीर्वाद की कामना कर सकता है। निराकार ईश्वर का काम तो नित्य है कि वेदों का प्रचार संसार में यथावत् प्रचरित हो।

वेदोक्तियों में कहीं भी विरोध नहीं है, अतः व्याघात दोष भी नहीं है। बड़ी स्पष्टता से 'पञ्च जन मेरे होत्र को करें' इत्यादि स्थलों में सर्वत्र 'यथेमां वाचम्' की भावना की पुष्टि की गयी है। शूद्रजाति में उत्पन्न बालकों का भी उपनयन होना चाहिये। त्रैवर्णिक का ही उपनयन हो, इसमें 'एव' निर्धारण भी साध्यकोटि में है। साध्यकोटि में स्थित स्वयम् असिद्ध होकर कभी कोई किसी को सिद्ध करने में समर्थ दिव्य सहस्र वर्षों में भी नहीं हो सकता। इसलिये शूद्रों का वेदाध्ययनाधिकार आदरणीय ही है। नहीं तो 'रुचं विश्येषु शूद्रेषु' इत्यादि समानार्थक श्रुतियाँ प्रपीडित होने लगेंगी। इस श्रुति में 'रुक्' अर्थात् आत्मप्रकाश ही इष्ट है, जो विना वेदाध्ययन के नहीं हो सकता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऐतरेयालोचने सामश्रमिमहाभागः पौराणिकश्रेष्ठः समर्थयते—"शूद्रस्य वेदाधिकारे साक्षाद् वेदवचनमपि प्रदर्शितं स्वामिदयानन्देन—'यथेमां वाचमावदानि जनेभ्यः' इति।" तदेवं वेदविधेः पक्षपातदोषभाक्त्वं न कथमपीति स्पष्टम्। एतेन 'वाचम्' इति पदेन न वेदग्रहणमित्यपि निराकृतं भवति, 'वाचा विरूपनित्यया' आदिस्थलेषु सर्वत्र वेदस्यैव गृहीतत्वात्। 'सा वा एषा वाक् त्रेधा विहिता ऋचो यजूंषि सामानि' (शत० १०।४।५।२, ६, ५, ३, ४) इत्येताभ्यां वाक्पदेन वेदा ग्राह्याः। अयमल्पश्रुतो न लोचनगोचरीकर्तुमक्षमिष्ट उव्वटमहीधरावपि, यथा—'वाचा वचनानि ऋग्यजुःसामलक्षणानि' (यजुः० १७।५७, १९।१२) इत्यादीनि। 'इमाम्' इति पदपाठेनाऽपि सर्वप्रथमप्रस्तुता कल्याणी वेदवाणी एवास्तीति ध्वनितम्, एतस्याः प्रागन्यवाचोऽसत्त्वात्।

यदाह 'आवदानि' इत्यनेन नैवेश्वरस्य वक्तुराक्षेपः स्याद् अन्यथा 'अग्निमीडे' इत्यत्र तथा सम्भवात्, इति तून्मत्तप्रलाप एव, सर्वजनेभ्यः सर्गादौ परमात्मना प्रदत्तत्वात्, वेदवाणीवदनस्य प्रथममीश्वरस्यैवोचितत्वात्। परमात्मना आत्मन एव 'अग्निमीडे' इति मन्त्रेण स्वयं स्तवनस्यानौचित्यात्।

पौराणिक अग्रणी श्री सामश्रमी ने अपने ऐतरेयालोचन में समर्थन करते हुए लिखा है—"स्वामी दयानन्द ने तो शूद्र के वेदाध्ययनाधिकार में साक्षात् वेदमन्त्र ही प्रस्तुत कर दिया है—'यथेमां वाचम्"। इसलिये वेदविधि का पक्षपात दोष का भाजन जाता रहा। इस सन्दर्भ से 'वाचम्' इस से वेद का ग्रहण न करने की इनकी बात का निराकरण हो गया। 'वाचा विरूपनित्यया' आदि में 'वाचा' से वेदवाणी का ही ग्रहण है। 'वह यह वाक् तीन प्रकार से विहित है, जैसे ऋग्, यजुः और साम' (शत० १०।४।५।२)। यहाँ परिजात लेखक ने शतपथ आदि ग्रन्थों को नहीं देखा, अतः यह अल्पश्रुत है। उव्वट और महीधर ने 'वाक्' से ऋक्, यजुः और साम लक्षण लिये (यजुः० १७।५७, १९।१२ आदि)। 'इमाम्' इस पदपाठ से भी सर्वप्रथम उपस्थित कल्याणी वेदवाणी ही है, और कोई वाणी उस समय थी ही नहीं, जिसे 'इसको' कहा जा सकता—यह अर्थ ध्वनित होता है।

"आवदानि' इससे वक्ता ईश्वर का आक्षेप होगा, अन्यथा 'अग्निमीडे' आदि मन्त्रों में भी उत्तम पुरुष में ईश्वर ही कर्ता माना जायेगा" पारिजातकार का यह कथन बुद्धि तथा युक्ति से शून्य है; क्योंकि यहाँ 'आवदानि' उत्तममपुरुष है, इसलिये ईश्वर का आक्षेप नहीं किया गया है, प्रत्युत 'इमां वाचं ब्राह्मणादिजनेभ्यः सर्वेभ्योऽपि दत्तत्वात्' अर्थात् इस वेदवाणी को सब ब्राह्मणादि को देनेवाला कर्ता सृष्टि के आदि में अन्य कोई नहीं था और उसी ईश्वर ने ऋषियों के हृदयों में यह वाक् व्यक्त (वद व्यक्तायां वाचि) की थी, अतः ईश्वर आक्षिप्त हुआ है। 'अग्निमीडे' में परमात्मा के द्वारा 'भौतिक अग्नि की' स्तुति करने का औचित्य नहीं है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'न चेश्वरस्य मे कामः समृध्यतामित्याशीः सम्भवति' इत्युक्तम्, तदप्यविचारितफलम्, तादृशप्रयोगाणां भाक्तत्वाद् भाक्ता हीमे तत्त्वतोऽवधारणीयाः, अन्यथा 'सोऽकामयत बहु स्याम्' इत्यादिष्वपि तादृशदोषस्य दुर्वारता समापद्येत।

पृ० १६४५, पं० ९—यच्च—"यदि सृष्टिनियमविरुद्धं कर्तुं शक्नुयादीश्वरस्तदैव शरीरमुखकण्ठताल्वादिमन्तरा वक्तुमुपदेष्टुं वा शक्नुयात्" इत्युक्तम्, तत्तुच्छम्, सृष्टिक्रमविरुद्धत्वेतदेवापद्येत यदि ईश्वरः सर्वव्यापकः सनंशेन सर्वात्मना वा शरीरं धारयितुं प्रकल्प्येत। नहि तस्यांशो भवितुमर्हति निरवयवत्वात्, न वाऽपि सर्वात्मना शरीरं धारयितुं प्रवर्तिष्यते, सावयवत्वे परमाणुसंयोगनिर्मितशरीरे तद्वियोगेन विनाश्यत्वापत्तेः। न चाऽपि तव सिद्धान्तेन शरीरेण विना स्वशरीरमपि रचयितुं शक्नोति, एवमनवस्थादोषप्रसङ्ग उपतिष्ठेत्। अतस्ते कल्पनाप्रासादो हेत्वाभासच्छलादिनिर्मितभित्तिष्वेव, यश्च सत्तीक्ष्णतर्कतोयप्रबलधारा-प्रहारैर्वालुकाऽऽधारोच्चितभवनमिव सद्य एव धराशायितां प्राप्नोति।

पृ० १६४५, अनु० २—"किञ्च, ब्राह्मणादयोऽन्त्यजान्ताः परमेश्वरस्य छात्राः साकारा

दूसरे 'मुझ ईश्वर का काम (इच्छा) समृद्ध हो' यह प्रयोग भाक्त है, अन्यथा 'उसने इच्छा की कि बहुत हो जाऊँ' आदि प्रयोगों पर भी वह आपत्ति दुर्वार हो जायेगी।

पृ० १६४५, पं० ९—"यदि वह सृष्टि के नियमों का अनुसरण करता है, तो फिर विना कण्ठ, तालु आदि के वह कैसे उच्चारण कर सकता है।" आपका यह कथन पिष्टपेषण तथा बुद्धिबाह्य है, इसका उत्तर भी दिया जा चुका है। श्रीमन्! सृष्टिक्रम के विरुद्ध तो तब होगा जब निरवयव, निराकार, सर्वव्यापक, सर्वान्तर्यामी परमेश्वर अपने अंश से, जैसा कि आप मानते हैं, या सर्वात्मा से शरीरधारण करे। उसके अंश तो निरवयव होने से नहीं हो सकते और न सर्वात्मा से सावयव परमाणुनिर्मित शरीरधारण कर सकेगा। वैसी कल्पना करने पर सर्वव्यापकता की क्षति होगी आर शरीरधारण करने में शरीर के अवयवों के वियोग होने से विनाश्यत्व दोष आयेगा। और आपके सिद्धान्त से हस्तपादादि के विना शरीर भी कैसे बना सकेगा, इस प्रकार अनवस्था दोष भी आ पड़ेगा। अतः हेत्वाभास छलादि से निर्मित आपकी कल्पनारूपी मिट्टी के दुर्ग की भित्तियाँ हमारे तीक्ष्ण तर्क जलधारा-प्रवाहों से बालु के आधार पर खड़े हुए भवन की भाँति धराशायी हो जायेंगी।

पृ० १६४५, अनु० २—"इस आपत्ति के रहते भी यदि आप परमात्मा को वेदों का उपदेष्टा मानते हैं, तो आपको इन प्रश्नों का उत्तर देना पड़ेगा कि ब्रह्माण्ड से लेकर अन्त्यज पर्यन्त ये परमात्मा के शिष्य साकार हैं या निराकार? प्रमाण के अभाव में शिष्यों को निराकार नहीं मान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निराकारा वा ? न निराकाराः, प्रमाणाभावात्। नाऽपि सर्वदेशिनः, त्वया जीवानामणुत्वाभ्युपगमात्। परमेश्वरोऽप्येकदेशीभूत्वाऽध्यापितवान् सर्वव्यापक एव वा ? न प्रथमः, अपसिद्धान्तापातात्। नान्त्यो निष्प्रमाणत्वात्।"

इत्याद्यनर्गलान् प्रश्नाभासान् बालालापानिव करोत्ययम्। श्रूयन्तान्तावत्, आम्, मन्ये इमे परमेश्वरस्य छात्रा आसन्, साकारा आसन्। एष पक्षस्त्वत्र न निराकृतोऽनेन। परमेश्वर एकदेशी भवितुमेव न शक्नोति, सर्वव्यापकत्वात्। सर्वव्यापकः सन्नेव अग्न्यादीनां छात्राणां हृदयेष्वपि वर्तमानत्वाद् वेदप्रकाशं व्यदधात्।

यदकथयो नान्त्योऽर्थात् सर्वव्यापकत्वपक्षोऽध्यापने सम्भवति, प्रमाणाभावात्। अयमेतमपि हेतुमलीकं प्रस्तौति, बहुप्रमाणैः पोषितत्वात्। यजुर्वेदस्य (३१) अध्याये 'तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे' इति सप्तममन्त्रात् प्राक्तनमन्त्रेषु गुरुरस्य महीधरो वेदोत्पादकस्य परमेश्वरस्य व्यापकत्वं प्रतिपादितवान्। 'सहस्रशीर्षा' इत्यत्र 'सः पुरुषो भूमिं ब्रह्माण्डलोकरूपां सर्वतः तिर्यगूर्ध्वमधश्च स्पृत्वा व्याप्य.....ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्याव-

---

सकते और न वे सर्वत्र व्यापक ही माने जा सकते हैं; क्योंकि आप तो जीवों को अणु मानते हैं। परमेश्वर ने इन सब शिष्यों को किसी एक जगह पर बैठकर पढ़ाया अथवा वह सर्वत्र व्यापक था ? इसमें पहला पक्ष मानने पर परमेश्वर की सर्वव्यापकता समाप्त हो जाती है और अन्तिम पक्ष में ऐसा कोई प्रमाण नहीं मिलता कि संसार में सर्वत्र व्याप्त परमेश्वर ने अपने सभी पूर्वोक्त शिष्यों को वेद पढ़ाया।"

आपके ये प्रश्न ही निर्बुद्धिता के हैं; क्योंकि सारी दुनियाँ के मनुष्यों को परमात्मा के द्वारा पढ़ाने की कहीं बात ही नहीं कही गयी है। वेद तो उन चार ऋषियों के विमल हृदयों में प्रकट हुए थे। 'आवदानि जनेभ्यः' अर्थात् मनुष्यमात्र के लिये इस वाणी का उपदेश करता है। इससे भी यह कहाँ प्रश्न उठता है कि जिनके हितार्थ इस वाणी का उपदेश है, वे सभी वहाँ उपस्थित हों या उन सबके हृदयों में वेद का आविर्भाव करे। अच्छा यह भी मानते हैं कि ये शिष्य साकार थे अर्थात् शरीरधारी थे, इस शरीरधारिता का आपके द्वारा निराकरण भी नहीं किया गया है। परमेश्वर कभी एकदेशी हो ही नहीं सकता; क्योंकि वह सर्वव्यापक है। सर्वव्यापक होने से अग्न्यादिशिष्यों के हृदयों में व्यापक था ही, अतः इसमें प्रमाणाभाव कहना ही मिथ्या हेतु है; क्योंकि अनेक प्रमाणों से प्रोषित है।

यजुर्वेद के ३१वें अध्याय के 'तस्माद् यज्ञात्०' इस मन्त्र से पूर्व के मन्त्रों में इनके गुरु महीधर ने भी वेदोत्पादक परमेश्वर की व्यापकता का प्रतिपादन किया है। 'सहस्रशीर्षा' इस मन्त्र में 'वह पुरुष ब्रह्माण्डलोकरूप भूमि को सब ओर से तिरछे ऊपर नीचे व्याप्त कर ब्रह्माण्ड से बाहर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्थितः 'एवंविधात् पुरुषाद् ऋग्वेदादयो जज्ञिरे इति प्रामाण्यात्। त्रिकालाऽबाधितपरमेश्वरं प्रति भूतवर्तमानभविष्यत्कालव्यवहारो न सम्भवति, न तदारम्भकालः कश्चिद् उत्पद्यमानायाः सृष्टेस्तु भवेत्।

'सृष्टेरारम्भसमये पठनपाठनक्रमो ग्रन्थश्च कश्चिदपि नासीत्। तदानीमीश्वरोपदेशमन्तरा न च कस्याऽपि विद्यासम्भवो बभूव' इति भूमिकालेखेन भूतकालेतिहासवर्णनं कथं प्रसज्यत इति बोद्धव्यमासीत्। वेदास्तु परमेश्वरस्य ज्ञानं परमेश्वरवदेवैतेषामपि परमेश्वरे सदैव स्थितेः सम्भवः। पुनः पुनः पृष्टपिष्टप्रश्ना न मुहुः समाधीयन्ते, पूर्वसमाहितत्वात्। अग्रे न किमपि मौलिकं प्रश्नत्वेन प्रस्तूयतेऽनेन, केवलग्रन्थशरीरस्थौल्यापादनायैव कृष्णीकृतानि पृष्ठानि।

पृ० १६४६, पं० १२—यच्च—"स्वायेति पदेन स्त्रीसेवकाः कथं गृह्यन्ते? किञ्च तत्र मानम्? अरणपदस्यातिशूद्रोऽर्थ इत्यत्राऽपि किं मूलम्? वस्तुतस्तु स्वायेत्यस्य कुलजात इत्यर्थः, अरणायेत्यस्य अन्यकुलजात इत्यर्थः।" इत्यपि खल्वनवस्थितचित्तस्येव प्रलापः। स्वायेत्यस्यार्थ एतस्य पूज्यो वाममार्गी महीधरोऽपि 'आत्मीयाय' कुरुते। आत्मीयाश्चात्र

भी सब ओर व्याप्त होकर अवस्थित है।' ऐसे पुरुष से ऋग्वेदादि उत्पन्न हुए, यह प्रमाण है। त्रिकाल से अबाधित परमेश्वर के प्रति भूत, वर्तमान और भविष्यत् काल का व्यवहार सम्भव नहीं है। उसका कोई आरम्भ काल भी नहीं है, उत्पद्यमान सृष्टि का आरम्भादि हो ही सकता है।

'सृष्टि के आरम्भकाल में पठन-पाठन का क्रम और ग्रन्थ कोई नहीं था। उस समय ईश्वरोपासना के बिना किसी का विद्यावान् होना सम्भव ही नहीं था।' इस भूमिका के लेख से भूतकाल का इतिहासवर्णन कैसे प्रसक्त हो सकता है, यह विचारना चाहिये था। वेद तो परमेश्वर के ज्ञान हैं, तो परमेश्वर के समान ही इनकी भी परमेश्वर में सार्वकालिक स्थिति सम्भव है। पुनः उन्हीं किये गये प्रश्नों का बार-बार यहाँ समाधान नहीं किया जायेगा; क्योंकि पहले इनका समाधान किया जा चुका है। आगे इनके द्वारा कुछ भी मौलिक प्रश्नरूप में प्रस्तुत नहीं किया जा रहा है, केवल ग्रन्थ की स्थूलता बढ़ाने के लिये पृष्ठ काले किये गये हैं।

पृ० १६४६, पं० १२—यह कहना कि—"स्वाय पद से स्त्री, सेवक आदि का ग्रहण कैसे हो सकता है? इसमें प्रमाण क्या है? अरण पद का अतिशूद्र अर्थ करने में भी क्या मूल है? वास्तव में स्वाय पद का अपने कुल में उत्पन्न और 'अरणाय' पद का प्रयोग अन्य कुल में उत्पन्न पुरुष के लिये हुआ है।" यह भी अनवस्थित चित्त का ही प्रलाप है; क्योंकि 'स्वाय' पद का अर्थ इनके पूज्य वाममार्गी महीधर तक ने 'आत्मीयाय' किया है। ये आत्मीय पुत्र, स्त्री और भृत्य आदि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मन्त्रे वर्णितानामेव, न तु करपात्रपरिकरगतानाम्। प्रसङ्गोपात्तेऽस्मिन् बुद्धिरेव मानम्।

अरणपदस्य अपगतोदकोऽर्थः, एतस्यानालोचनवत आलोचकस्य लोचनगोचरीभूतोऽपि नाऽसौ, महदाश्चर्यं न वा महती विपश्चिच्चमूरप्यक्षिलक्षीकृतवती। शूद्रेष्वपि केचन अपगतोदकास्त एवाऽतिशूद्रा व्यवहारे। अथवा न रणो रमणीयः क्रीडनीयोऽपि वा सोऽरणोऽतिशूद्रः। ऋषिदयानन्देन 'नहि ग्रभाय अरणः' (ऋ० ७। ४। ८) इत्यत्र 'अन्यगोत्रजोऽनौरसो वा पुत्रः' इत्यर्थः कृतः। परमनेकार्थत्वेऽपि शब्दस्य सङ्गत एवार्थो योजनीय इति विमृश्य महीधरोऽपि एतमर्थं न समगमयताऽत्र।

पृ० १६४८, पं० ८—"किञ्च ब्रह्मराजन्याभ्यामित्यत्र ब्रह्मराजन्यशब्दौ रूढ्या ब्राह्मणक्षत्रियौ प्रवर्तेते, यौगिकवृत्त्या वा?" इत्यादिप्रश्नोद्भावनमपि अकिञ्चित्करम्, वेदे शब्दानां यौगिकत्वात्। एतेन न जन्मना वर्णव्यवस्था सिध्यति जातुचित्। तेषामृषीणामायूंषि उपनयनकारकं वा पृच्छसीत्यस्योत्तरे वयमेतदेव ब्रूमो यद् यावदायुस्तव ब्रह्मण आसीत् तावत् तेषामपि, उपनयनकर्ताऽपि स एवाऽसीत्। भवान् ब्रूतां तव ब्रह्मा हस्ततलघर्षणेनोत्पाद्यमानायां

हो सकते हैं और वे आत्मीय ब्राह्मणादि के होंगे, न कि करपात्री आदि के। इसमें प्रसङ्गप्राप्त का ही ग्रहण करने में बुद्धि प्रमाण है।

'अरण' पद का अर्थ है—जिसका जल ग्रहण न किया जाये। इस अन्धवदालोचक के लोचनगोचर नहीं हुआ और आश्चर्य है कि इनके सहयोगी लेखकों की सेना ने भी नहीं देखा कि शूद्रों में भी कुछ ऐसे होते हैं, जो अपगतोदक अर्थात् अन्त्यज होते हैं अथवा जो साथ में रमणीय खेलने योग्य भी न हो, उसे 'अरण' कहते हैं। ऋषि दयानन्द ने 'नहि ग्रभाय अरणः' (ऋ० ७। ४। ८) मन्त्र में 'अन्यगोत्रोत्पन या अनौरस पुत्र' अर्थ किया है। परन्तु शब्द के अनेकार्थक होने पर भी सङ्गत अर्थ ही योजनीय होता है। महीधर ने भी यह अर्थ ही सङ्गत समझ अन्यगोत्रज अर्थ यहाँ नहीं किया।

पृ० १६४८, पं० ८—तथा "ब्रह्मराजन्याभ्यां' ये शब्द रुढि द्वारा ब्राह्मण क्षत्रिय में ही प्रवृत्त होते हैं या कि यौगिक वृत्ति से?" इत्यादि प्रश्नोद्भावन तुच्छ है; क्योंकि वेद में शब्द सभी यौगिकवृत्ति प्रधान होते हैं। इससे कभी भी जन्म से वर्णव्यवस्था सिद्ध नहीं हो सकती। आप अग्नि आदि ऋषियों की आयु पूछते हैं और उनके उपनयनकर्ता कौन थे? इसके उत्तर में तो हम इतना ही कहेंगे कि जितनी आयु आपके ब्रह्मा की थी, उतनी ही उनकी थी और जिसने ब्रह्माजी का उपनयन कराया, उसी ने अग्न्यादि का भी कराया। यदि आपके (जन्मना जायते शूद्रः) ब्रह्मा का उपनयन नहीं हुआ और विना उपनयन वेद पढ़ लिये, तो इसे शूद्रों को भी अनुपवीत अवस्था

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सरस्वत्यां तत्सम्मुखे च तत्काले विवाहप्रस्तावमकार्षीत् तदा तस्याः किमायुरासीत् ? यथैतस्याः सरस्वत्या मांता नासीत् तथैव तेषामृषीणाममैथुन्यां सृष्ट्यामुत्पन्नानां नास्तां शरीरधारिणौ पितरौ। अपि च मार्कण्डेयपुराणवर्णितसृष्टिक्रमविरुद्धजनयित्री माता मृगी मिथ्याधारैव। यथा—

'ततस्तं सुषुवे पुत्रं सा मृगी लक्षणान्वितम्।
तस्मिञ्जाते च भूतानि सर्वाणि प्रययुर्मुदम्॥'(अ० ७१ । ४५)

पृ० १६४९, अनु० १—यच्च—"सुश्रुतानुसारेण अशुभलक्षणानामकुलीनानां शूद्राणां च वेदसंहिताधारो नास्ति(स० प्र० २५) , तत्रैव ४४ पृष्ठे तु समेषामधिकारो वर्णितः ।" इत्यपि विचारशून्यम्, अविरोधात्। सुश्रुते कुलसम्पन्नं गुणसम्पन्नमितिसम्पन्नशब्दः कुलगुणाभ्यां प्रत्येकं सम्बध्यते। कुलसम्पन्नमायुर्वेदाध्यायिकुलसंयुक्तं गुणसम्पन्नं वयःशौचादिशिष्य-गुणसंयुक्तमिति डल्हणाचार्यटीकाकृच्चाह । तेभ्यः प्राथम्यं देयम् । परं येषां कुलपरम्परयाऽपि तादृशाध्ययनप्रकृतिर्न स्यात्, शूद्रजात्युत्पन्ना वाऽपि स्युस्तेऽपि नाधिकाराद् वञ्चिताः । कदाचित् पूर्वसंस्कारोदये बुद्धिविकासे सति तदध्ययनाधिकारो दातव्य एवेति परमकारुणिको भगवान् वेदज्ञानदाता 'यथेमां वाचम्०' इति मन्त्रमाह। भगवन्निर्मितवस्तुन्यधिकारः प्रत्येकस्य, परं

में रहकर ही आपके मत से वेदाध्ययन का निदर्शन-विधान क्यों न मान लिया जावे ? अब आप भी बताइये कि आपके ब्रह्मा ने हथेली घिसकर जो सरस्वती कन्या उत्पन्न की थी, उससे विवाह का प्रस्ताव किया था, तो उस कन्या की आयु का तो अनुमान है कि वह कुछ क्षणों की थी, पर आपके ब्रह्मा बाबा की आयु क्या थी ? जैसे उस सरस्वती की माँ नहीं थी, उसी प्रकार अमैथुनी सृष्टि में ऋषियों के भी माता-पिता नहीं थे । सृष्टिक्रम के विरुद्ध माता मृगी का होना मिथ्याधार है । यथा—

'तब मृगी ने लक्षणयुक्त उस पुत्र को उत्पन्न किया, उसके पैदा होने पर सारे प्राणी प्रसन्न हो गये ।'(मार्कण्डेय पुराण, अ० ७१ । ४५)

पृ० १६४९, अनु० १—"सत्यार्थप्रकाश में कहा है कि सुश्रुतसंहिता के अनुसार अशुभ लक्षणवाले अकुलीन शूद्रों को वेदसंहिता के अध्ययन का अधिकार नहीं है, वहीं दूसरी जगह सब के वेदाध्ययन करने की बात पुष्ट की गयी है ।" यह कथन भी विचारशून्य है । इसमें कोई विरोध नहीं है; क्योंकि सुश्रुत में कुछ आचार्यों का मत दिखाया गया है, जो मन्त्र छोड़ आयुर्वेदाध्ययनपरायण कुल में उत्पन्न हैं और विनम्रता आदि शिष्यगुणसम्पन्न हैं, उन को प्राथमिकता से आयुर्वेद पढ़ाये उपनयन विना किये हुए भी । पर जिनमें कुल-परम्परा से आयुर्वेदाध्ययन का प्रचलन न हो,वे भी वञ्चित न रह जायें, कदाचित् पूर्व जन्म का संस्कार उदय हो जावे तो वे भी विकास के अवसर से क्योंकर वञ्चित रखे जायें, अतः परमकारुणिक वेदवाणी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बुद्धिमताऽऽचार्येण पात्रापात्रत्वनिर्धारणं कर्तव्यम्। ब्राह्मणवंशोद्भवोऽपि कुचालो भवितुमर्हेत् सोऽवश्यं वञ्चनीयः, शुभगुणसम्पन्नो जन्मनाऽपि शूद्रोऽवश्यमध्यापनीय इति विवेकः।

पृ० १६५०, पं० ४—यच्चोच्यते—"यथेमाम्०' इति मन्त्रात् पूर्वस्मिन् मन्त्रे परमात्मोच्यत इत्युव्वटः, परमात्मानं प्रत्युच्यत इति महीधरः। तेनाऽत्र 'आवदानि' इति क्रियायाः प्रार्थनायाश्च कर्ता ऋषिर्न परमेश्वरः, ईश्वरस्तु देवतात्वेनात्र प्रतिपाद्यो न प्रतिपादकः।" इत्यप्यविचारचारु।

प्रथमन्त्वेतद् द्रष्टव्यं यदेतत्रावक्तनमन्त्रस्य देवता अग्न्यादयस्तदा कथं भवद्गुरुणाऽत्र शब्दैरेभिः परमात्मोच्यते? भवतश्च कथमिह सहमतिः? ऋग्वेदस्य 'अग्निमीडे' इति मन्त्रस्य ऋषि (दयानन्द) भाष्ये च कथमाक्षिप्यते 'अग्नि' शब्देन परमात्मनः स्वीकारे? अग्रे समेषां मन्त्राणां रचयिता तु ईश्वर एव, ऋषिस्तदर्थद्रष्टा देवतेश्वरः। अत एवेश्वरः प्रतिपाद्यते मन्त्रार्थेन। तस्य कार्याण्यत्र वर्णितानि। अग्रिममन्त्रस्याऽपि ईश्वरो देवता, तत्राप्यस्य कार्याणि निगदितानि।

माँ ने अपने इन उपेक्षित पुत्रों को भी 'यथेमां वाचम्०' मन्त्र कहकर अध्ययन का अधिकार दे दिया। परम पिता के द्वारा निर्मित वस्तु में प्रत्येक का अधिकार है, परन्तु बुद्धिमान् आचार्य को पात्रापात्र का निर्णय करना है। ब्राह्मणवंशोद्भव भी कुचाल हो सकता है, उसे अवश्य वञ्चित करना चाहिये, कुलगुणसम्पन्न विनम्र शूद्र को भी अवश्य पढ़ावे—यही विवेक है।

पृ० १६५०, पं० ४—"यथेमाम्०' इस मन्त्र से पूर्व मन्त्र में परमात्मा को सम्बोधित किया गया है। परमात्मा कहा जा रहा है या महीधर के अनुसार परमात्मा के प्रति कहा जा रहा है। इस तरह से इस मन्त्र की 'आवदानि' इस क्रिया का और प्रार्थना का भी कर्ता अर्थात् ऋषि परमेश्वर नहीं है, वह तो देवता है। अतः प्रतिपाद्य होने से वह प्रतिपादक नहीं हो सकता।"

इस कथन पर जब तक विचार न किया जाये तब तक ही अच्छा लगता है। यहाँ प्रथम तो यह देखना है कि इससे प्रथम मन्त्र का देवता अग्नि है, तो फिर आपके गुरु यहाँ पर 'अग्नि' से परमात्मा का ग्रहण क्यों करते हैं, आपके प्रसिद्ध भौतिक अग्नि का क्यों नहीं करते? आपकी इसमें सहमति कैसे है? जबकि आप 'अग्निमीडे' में ऋषि द्वारा अग्नि शब्द से परमेश्वरार्थ ग्रहण करने में सहमत नहीं हैं। सब मन्त्रों का रचयिता तो ईश्वर ही है, ऋषि तो मन्त्रार्थद्रष्टा हैं। इस तथा अग्रिम मन्त्र का देवता ईश्वर है, उसके रचित कार्यों का वर्णन किया जा रहा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१६५० पृष्ठस्य दशमपंक्तेः १६५४ पृष्ठस्य १३ पंक्ति यावत् कुतोऽवतारितम्, न कश्चिदाक्षेपस्तत्र।

पृ० १६५४, पं० १४—यदुच्यते—

"शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्॥' (मनु० १०।६४)

इत्यत्र कुल्लूकभट्टः—'शूद्रायां ब्राह्मणाज्जातः पारशवाख्यो वर्णः प्रजायते। सामर्थ्यात् स्त्रीरूपः, सा स्त्री यदि ब्राह्मणेनोढा सती प्रसूयते दुहितरमेव जनयेत्, साऽपि ब्राह्मणेनोढा दुहितरमेव जनयेत्, साऽप्येवमिति सप्तमे युगे जन्मनि स पारशवाख्यो वर्णो वीर्यप्राधान्याद् ब्राह्मण्यं प्राप्नोति।' तदनन्तरमेव 'शूद्रो ब्राह्मणतामेति' इति पद्यम्। अस्याप्ययमर्थः—एवं पूर्वश्लोकरीत्या क्रमेण सप्तमं जन्म प्राप्तः शूद्रतां प्राप्नोति। एवं क्षत्रियात् पञ्चमे वैश्यात् तृतीये जन्मनि उत्कर्षापकर्षौ बोद्धव्यौ।" इत्यपि सर्वं बुद्धितर्कविपरीतम्, एतच्छ्लोकस्य प्रक्षिप्तत्वात्, अग्रिमश्लोकस्य 'शूद्रो ब्राह्मणतामेति' इत्यस्य विरोधतात्।

ननु द्वयोरप्यनयोरुपर्य्युक्तटीकया सङ्गतिर्जायत एवातो नास्ति प्रक्षेपो न वा विरोध इति चेन्न,

---

१६५० पृष्ठ की दसवीं पंक्ति से १६५४ पृष्ठ की १३वीं पंक्ति तक आपने ग्रन्थ से उतार कर अपने ग्रन्थ का कलेवर बढ़ाया है, वह हमारा उत्तरणीय नहीं है।

पृ० १६५४, पं० १४—"शूद्रायां ब्राह्मणाज्जातः' इस श्लोक की व्याख्या में मनुस्मृति के टीकाकार कुल्लूकभट्ट कहते हैं कि—"शूद्रा स्त्री में ब्राह्मण से पैदा हुआ शिशु पारशव वर्ण का कहलाता है। वह यदि स्त्री हो और उसका ब्राह्मण से विवाह हो जावे, उससे भी स्त्री अपत्य पैदा हो और उसका भी ब्राह्मण के साथ विवाह होकर उससे भी स्त्री अपत्य पैदा हो तो इस परिस्थिति में सातवीं पीढ़ी में जाकर वह पारशव वर्ण बदलकर वीर्य की प्रधानता के आधार पर ब्राह्मण वर्ण कहलाने लगता है।' इस के बाद का पद्य है—'शूद्रो ब्राह्मणतामेति०'। इसका भी अर्थ है कि पूर्वोक्त क्रम से ब्राह्मण शूद्रता को प्राप्त हो जाता है। इस प्रकार क्षत्रिय से पाँचवें तथा वैश्य से तीसरे जन्म में उत्कर्ष और अपकर्ष होंगे।" पारिजातकार का उक्त कथन बुद्धि तथा तर्क के विपरीत है तथा 'शूद्रो ब्राह्मणतामेति' इस अग्रिम श्लोक के भी विपरीत है।

यदि यह कहें कि ऊपर की हुई कुल्लूक भट्ट की व्याख्या और 'शूद्रो ब्राह्मणताम्' इन श्लोकों का विरोध तो नहीं, दोनों का एक ही उद्देश्य केवल यह बताना है कि जन्मान्तर में ब्राह्मण

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' (मनु० २ । १६८)

इत्यस्य तादृशे मते स्पष्टो विरोधः । न चात्र सप्त जन्म प्रतीक्षा कृता शूद्रता या ब्राह्मणतायाश्च प्राप्तये । कवषैलूषः शूद्रजातावुत्पन्नः कथमन्यथाऽस्मिन्नेव जन्मनि ब्राह्मणताम् ऋषित्वं वाऽध्यगमत् ? अतः गुणकर्मभिर्मतायां वर्णव्यवस्थायामन्तर्विरोधोऽपि परिहृतो जायते । ऐतरेयब्राह्मणे (२ । १९) कवषैलूषकथाप्रसङ्ग एवम्—

"ऋषयो वै सरस्वत्यां सत्रमासत, ते कवषमैलूषं सोमादनयन्, दास्याः पुत्रः कितवो ब्राह्मणः कथं नो मध्येऽदीक्षिष्टेति । तं बहिर्धन्वोदहन्नत्रैनं पिपासाहं तु सरस्वत्या उदकं मापादिति । स बहिर्धन्वोदूढः पिपासया वित्त एतदपोनप्त्रीयमपश्यत्—'प्र देवत्रा ब्रह्मणे गातुरेतु' (ऋ० १० । ३०) ।" अयमस्य सूक्तस्य द्रष्टा जातः ।

पृ० १६५५, पं० १०—यदयमाह—"प्रज्ञाविरहाद् विद्यापठनधारणविचारासमर्थत्वात् तस्याऽध्यापनं श्रावणं व्यर्थमेवाऽस्ति, निष्फलत्वात्' इति, तदपि मन्दम्, प्रज्ञावतां शूद्राणां श्रवणमननादौ समर्थानां विदुरधर्मव्याधप्रभृतीनां महाभारतादिषु स्मरणात् ।" इत्यपि छलपूर्वक-

---

या शूद्र बनता है, इतना ही अन्तर है । परन्तु यह कथन भी ठीक नहीं; क्योंकि 'योऽनधीत्य०' श्लोक में स्पष्ट ही जीते हुए ही शूद्रत्व को प्राप्त होने की बात से उक्त व्याख्या का विरोध स्पष्ट है । दूसरे सात जन्मों की प्रतीक्षा में वर्णपरिवर्तन होने और कवषैलूष जो शूद्र जाति में उत्पन्न हुआ, वह तो इसी जन्म में मन्त्रद्रष्टा ऋषि बन गया, उससे विरोध स्पष्ट है । अतः गुणकर्मानुसार वर्ण-व्यवस्था करने में कहीं विप्रतिपत्ति नहीं आती । ऐतरेयब्राह्मण (२ । १९) में कवषैलूष की कथा इस प्रकार है—

'ऋषियों ने सरस्वती पर यज्ञ प्रारम्भ किया । उन ऋषियों ने कवष ऐलूष को सोम से वञ्चित कर दिया । यह दासी का पुत्र हमारे बीच में कैसे दीक्षित हो गया । बाद में कवषैलूष ने मन्त्रदर्शन किया ।'

पृ० १६५५, पं० १०—"प्रज्ञा के न होने से विद्या का पठन, धारण व इसके विचार करने में असमर्थ होने के कारण शूद्र का अध्यापन व श्रवण व्यर्थ ही है' यह कथन मन्द है; क्योंकि प्रज्ञावाले शूद्र श्रवण मनन आदि में समर्थ विदुर, धर्मव्याध आदि का महाभारत में वर्णन है, जिससे ज्ञात है कि उनमें भी अप्रतिम प्रज्ञावान् होते हैं ।" पारिजातकार का यह कथन भी छल से भरा हुआ है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मुद्धरणम्, 'यत्र यत्र शूद्रो नाध्यापनीयो न श्रावणीयश्चेत्युक्तं तत्राऽयमभिप्रायः' इत्यस्य भागस्य विलोपनात्। अर्धोद्धरणेनाऽयं स्वकीयां सहानुभूतिं प्रकटयतीव शूद्रान् प्रति ग्राहस्याश्रुविमोचनमिव, मृगान् प्रति व्याघ्रस्य करुणामिव वा।

महर्षेस्त्वाशय एष यद् यत्र क्वाऽपि शास्त्रे निषेधो दृश्यते तत्र यः कश्चित् क्वाऽपि प्रज्ञाशून्यत्वादसमर्थो वा भवेत् तस्य कृत एव मन्तव्यः। ये च किल कुशाग्रबुद्धय उत्तमगुणविनयसत्यभाषणाचरणसम्पन्नास्ते त्ववश्यमध्यापनीया विना भेदभावमिति संक्षेपः। शिष्टं समग्रं समाहितम्। महर्षये धन्यवादान् वितरन्ती निर्मलोक्तिरेषाऽत्र प्रशस्यताम्—

विप्रेभ्यो मतिभूषितेभ्य इह रे सत्क्षत्रियेभ्योऽनिशम्,
व्यापारक्रमकर्मकौशलविशे शूद्राय सत्सेविने।
एतत्स्त्रीजनसेवकेभ्य इतरेभ्योऽभेदबुद्ध्याऽमृतम्,
धन्यस्त्वं श्रुतिवार्द वर्षसि मुदा कल्याणवाणीरसम्॥

श्रीमन्! ऋषि ने जो बात जिस रूप में भी लिखी है, उसको उसी रूप में प्रस्तुत करना सङ्गत है। ऋषि ने—'जहाँ कहीं शूद्र को अध्यापन न करे या न सुनाये' यह कहा है, वहाँ उस लेख का तात्पर्य है कि जो शूद्र प्रज्ञा से रहित हो, विद्या के पढ़ने, धारण व विचार करने में असमर्थ हो, उसका अध्यापन और श्रवण व्यर्थ है, जैसा ब्राह्मणादिकुलोत्पन्न भी हो सकता है। शूद्रों में भी प्रज्ञावान् विद्या पढ़ने, धारण और विचार करने में समर्थ हो सकते हैं। इस लेखक ने ऋषि का पाठ 'तत्राऽयमभिप्रायः' तक लुप्त ही कर दिया और छलपूर्वक वाक्योपन्यास से शूद्रों के प्रति अपनी सहृदयता ऐसे ही दिखा रहा है जैसे प्राणियों को निगलता हुआ घड़ियाल आँसू बहावे कि हम तो तुम्हें अब भी निगलना नहीं चाहते, पर क्या करें हमारा ऐसा स्वभाव बन गया है, अथवा व्याध का मृगों के प्रति, चिड़ीमार का चिड़ियों के प्रति कृत्रिम करुणाप्रवाह है।

महर्षि का तो आशय यह है कि प्रज्ञाशून्य और असमर्थ नहीं पढ़ सकता, उसे मत पढ़ाओ, पर जो कुशाग्रबुद्धि, उत्तमगुणसम्पन्न हैं, उन्हें विना भेदभाव के वेद पढ़ाये। शिष्ट सारा समाधान कर दिया। करुणा के पारावार महर्षि के लिये धन्यवाद देती हुई यह निर्मलोक्ति अतितरां प्रशस्त है—

'हे वेदवारिद! यहाँ मतिभूषित ब्राह्मणों के लिये, उत्तम क्षत्रियों के लिये, व्यापारक्रम में कुशल वैश्यों, सत्सेवी शूद्र, इनके स्त्री, सेवक आदि तथा इतरों के लिये निरन्तर विना भेद-भाव के प्रसन्नता से कल्याणी वाणी के रसमय अमृत की वर्षा करते हो, तुम धन्य हो।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कविरन्योऽप्युक्तप्रशस्तिस्वरे स्वकीयस्तुतिमप्यन्योक्तिरूपे प्रस्तौति—

शालेयेषु शिलातलेषु च गिरेः शृङ्गेषु गर्तेषु च,
श्रीखण्डेषु विभीतकेषु च तथा पूर्णेषु रिक्तेषु च।
स्निग्धेन ध्वनिनाऽखिलेऽपि जगतीचक्रे समं वर्षतो,
वन्दे वारिद सार्वभौम ! भवतो विश्वोपकारि व्रतम् ॥

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'अधिकारानधिकार-विषयः'
॥ सम्पूर्णः ॥

इसी प्रशस्ति के स्वर में दूसरा कवि भी अपनी प्रस्तुति अन्योक्ति के रूप में प्रस्तुत कर रहा है—

'धानों के खेतों में, शिलातलों पर, पर्वत के शिखर और गर्तों (गड्ढों) में, चन्दन और बहेड़ों के वृक्षों पर, पूर्ण और रिक्तों में मधुर-ध्वनि से सारे जगन्मण्डल में समान वर्षा करते हुए हे सार्वभौम बादल ! आपके विश्वोपकारी व्रत को मैं प्रणाम करता हूं।'

श्रीमान् पण्डित बिहारीलाल जी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुत निर्मला मिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'अधिकारानधिकार-विषय'
॥ सम्पूर्ण हुआ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ पठनपाठनविषयः संक्षेपतः

पृ० १६५६, पं० ८—यदुक्तम्—"तत्रादौ पठनस्यारम्भे शिक्षारीत्या स्थानप्रयत्नस्वरज्ञानायाक्षरोच्चारणोपदेशः कर्तव्यः, येन नैव स्वरवर्णोच्चारणज्ञानविरोधः स्यात्। तद्यथा—'प' इत्यस्योच्चारणमोष्ठौ संयोज्यैव कार्यम्। अस्यौष्ठौ स्थानम्, स्पृष्टः प्रयत्न इति वेद्यम्।' इत्यादि, तदपि विशृङ्खलमेव, उच्चारणोपदेशेनोच्चारणज्ञानस्यैव सम्भवात्, स्थान-प्रयत्न-स्वरज्ञानस्योपदेशान्तरसाध्यत्वात्। 'प' इत्यस्योच्चारणमोष्ठौ संयोज्यैव कार्यम्' इत्यप्यसङ्गतम्, ओष्ठसंयोगमन्तरा तदुच्चारणस्यासम्भवेन एवकारव्यावर्त्याभावात्।" इति तु 'मुखमस्तीति वक्तव्यमवल्गं वाप्यनर्गलम्' इत्यस्य निदर्शनमस्ति, बालालपितत्वात्।

पकारस्य 'स्थान-प्रयत्नस्वराणामसकृदुच्चारणं कृत्वैव परिष्करणं भविष्यति, उपदेशमात्रेणैव नैतज् ज्ञानं भविष्यति' इत्याशयप्रकाशनेन प्रतीयते यन्नैव भवतः 'शिक्षा' वेदाङ्गस्य ज्ञानमस्ति। अस्मिन् वेदाङ्गे वर्णानां स्थानप्रयत्नस्वराणां कस्मात् स्थानादल्पप्राणावर्णाः, दीर्घ-

---

पृ० १६५६, पं० ८—"स्वामी दयानन्द ने लिखा है—'पठन-पाठन के आदि में लड़कों और लड़कियों को ऐसी शिक्षा करनी चाहिये कि वे स्थान, प्रयत्न के योग से वर्णों का ऐसा उच्चारण कर सकें कि जिससे सबको प्रिय लगे। जैसे 'प' इसके उच्चारण में दो प्रकार का ज्ञान होना चाहिये—एक स्थान और दूसरे प्रयत्न का। पकार का उच्चारण ओठों से होता है, परन्तु दो ओठों को ठीक-ठीक मिलाकर ही पकार बोला जाता है। इसका ओष्ठ स्थान और स्पृष्ट प्रयत्न है।' किन्तु यह पूरा कथन गलत है; क्योंकि उच्चारण का उपदेश करने से उच्चारण का ज्ञान ही हो सकता है। वह किस तरह उच्चरित होगा, किस स्थान, प्रयत्न और स्वर में इसका उच्चारण किया जायेगा, यह तो बार-बार बोलकर और बुलवाकर उच्चारण का परिष्कार करने पर ही आवेगा। 'प' का उच्चारण ओठों को ठीक-ठीक मिलाकर ही होता है, यह कथन भी असङ्गत है; क्योंकि विना ओठों के मिलाये जब पकार का उच्चारण ही नहीं होता, तब एवकार के प्रयोग से आप किसकी व्यावृत्ति (निषेध) करेंगे? अर्थात् किसी व्यावर्त्य के अभाव में 'एव' का प्रयोग यहाँ व्यर्थ ही किया गया है।"

पारिजातकार का उक्त कथन केवल मुख में जीभ होने का साक्षीमात्र है, बस, फिर तो अनर्गल बेलगाम बोल दिया, जैसे बालालाप होता है।

'प' का स्थान, प्रयत्न और स्वर का बार-बार उच्चारण करके ही परिष्कृत होगा, उपदेश करने से इसका ज्ञान नहीं होगा' इस आशय की बात कहने से ज्ञात होता है कि आप को 'शिक्षा'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्वासेनाऽपि कथमुच्चारणं भवति, इदं समग्रं बोधितमस्ति, अद्यत्वे न पुनर्भवान् परिचिनोति, यत् प्रशस्तवैज्ञानिकप्रक्रिययोच्चारणं शिक्ष्यते, प्राचीन काल एतज्ज्ञानस्य तु पृथगेव वेदाङ्गं प्रणीयते स्म। महाभाष्यकार आह—'उच्चारणोपदेशोऽवश्यं कर्तव्यः। येन शशः षषः, पलाशः पलाषः, मञ्जः मञ्जो न स्यात्'।

यदि कस्यचिदुच्चारणशिक्षकस्य ताल्वादिस्थाने दोषो विकारो वा विद्यते, तदा नासावसकृदुच्चार्याऽपि वर्णं परिष्कर्तुं स्पष्टीकर्तुं वा शक्तः। परन्तु यदि शिक्षकोऽङ्गुल्यादि-निर्देशैर्निर्दिशेदपि स्थानं कथमपि वा एकमात्रद्विमात्रादिस्वराणां स्पृष्टादिप्रयत्नानामपि ज्ञानं कर्तुं क्षमेत, तदाऽपि शिष्यो दोषेभ्यः परिरक्षणं कर्तुं शक्नुयात्। एवमृषिबोधितप्रक्रियया संवृतादिदोषाणां ज्ञानेनाऽपि वर्णोच्चारणदोष-निवारणे सरलता शीघ्रता वा भविष्यति। कति-पयदोषा महाभाष्यकारेणोदाहृताः—

यथा—संवृतम्—वर्णोच्चारणस्थानसमीपगतजिह्वाव्यापारेण यो वर्ण उच्चार्यतेऽसौ संवृतदोषभाक्। ए, ओ उच्चारणेऽयं दोषो विदुषामपि असावधानतया जायते। उच्चारण-स्थानादपसृत्य जिह्वापरिवेष्टनेनोच्चारणं कलसंज्ञम्, अपेक्षितश्वासापेक्षयाऽधिकश्वासं

वेदाङ्ग का कुछ भी ज्ञान नहीं। इस वेदाङ्ग में वर्णों के स्थान, प्रयत्न, स्वरों का किस स्थान से अल्प प्राण या दीर्घ श्वास से कैसे उच्चारण होता है, यह सब बताया गया है। आज-कल आपको तो ज्ञान ही नहीं है, बड़े वैज्ञानिक रूप में उच्चारण सिखाया जाता है। प्राचीन काल में इसके ज्ञान का पृथक् ही वेदाङ्ग बना। महाभाष्यकार कहते हैं कि 'उच्चारण का उपदेश अवश्य कर्तव्य है, जिससे शशः षषः, पलाशः, पलाषः और मञ्ज मञ्ज न हो जाये।'

यदि किसी शिक्षक उच्चारणकर्ता के ताल्वादि किसी स्थान में दोष या विकार है, तो वह बार-बार उच्चारण से भी परिष्कृत नहीं कर सकता। परन्तु यदि शिक्षक ने अङ्गुल्यादि निर्देशों से स्थान बता दिये और एक मात्रा द्विमात्रादि स्वर व स्पृष्ट आदि प्रयत्नों का ज्ञान करा दिया है, तो भी शिष्य दोषों का बचाव कर लेगा। इसी प्रकार संवृत आदि दोषों का ज्ञान होने से भी वर्णोच्चारण के दोषों के निवारण में सरलता और शीघ्रता होगी। कतिपय दोष उदाहरणार्थ महाभाष्यकार ने गिनाये हैं—

'संवृत' (वर्णोच्चारण के स्थान के समीप में रहती हुई जिह्वा के व्यापार से जो वर्ण उच्चरित हो। जेसे ए, ओ आदि में संवृतोच्चारण प्रायः विद्वानों में भी देखे जाते हैं), 'कल' (उच्चारण-स्थान से हटकर जीभ घुमाकर किया गया उच्चारण), 'ध्मात' (अपेक्षित श्वास से अधिक श्वास भरकर बोला हुआ, इससे ह्रस्व वर्ण भी दीर्घ प्रतीत होता है), 'एणीकृत' (सन्दिग्ध वर्णोच्चारण, जैसा साफ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भृत्वोच्चारणं ध्मातम्, एतेन ह्रस्वोऽपि वर्णो दीर्घः प्रतीयते। सन्दिग्धोच्चारणमेणीकृतम्, एवमम्बूकृतार्धक-ग्रस्त-निरस्त-प्रगीतोपगीत-विषण्ण-रोमशदोषा भवन्ति। यथाह पस्पशाह्निके—'संवृतः, कलो ध्मात एणीकृतोऽम्बूकृतोऽर्धको ग्रस्तो निरस्तः, प्रगीत उपगीतः क्ष्विण्णो रोमश इति।' एतद्दोषसम्भवनानिराकरणाय उच्चारणोपदेशोऽवश्यं कर्तव्यः।

उच्चारणोपदेशेन वर्णानामुच्चारणस्थानताल्वादीनां स्पृष्टादिप्रयत्नानां ह्रस्वाद्युदात्तादीनां स्वराणां ज्ञानं भवतीति निःसंशीति। शिक्षणकाले पकारमुच्चार्य दर्शयेद् बालं बोधयेच्चापीमौ ओष्ठौ एतयोः पूर्णतया संयोजनेनैव सम्यगुच्चारणमेवं भवति। पूर्णतया ओष्ठयोः संयोजनं विना आङ्गलभाषायाः 'कोओप्शन' आदिशब्देषु पकार मुच्चारयन्ति, तदुच्चारणं न शुद्धम्। अत एवाऽवधारणाय एवकारः कृतः सार्थकः।

पृ० १६५७, पं० १—'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह' इत्यस्य व्याख्यानेऽयं वक्ति यत्—"गानकर्ता षड्जादिस्वरालापनेऽन्यथोच्चारणं कुर्याच्चेत्' इत्यत्र (मानकर्तेति प्रमादः) गानकर्ता इत्यस्य स्थाने गायकशब्दः प्रयोक्तव्यः" इति, परमयं गानविद्या-

---

न ओ सुनायी पड़े और न औ, जैसा अंग्रेजी में अधिकांश उच्चारण होता है, जिसे वे गुण मानते हैं), 'अम्बूकृत' (मुख के अन्दर ही उच्चारित), 'अर्धक' (अपेक्षित श्वास से कम श्वास भरकर बोला गया, जैसा साँस टूटते हुए पर भी बोलता चला जाये), 'ग्रस्त' (जिह्वा के मूल में ही हिलगा हुआ), 'निरस्त' (फैंका सा), 'प्रगीत' (गाकर बोला गया), 'उपगीत' (गाये हुए के समान), 'विषण्ण' (कम्पित) और 'रोमश' (गम्भीर)।

इसलिये उच्चारणोपदेश से तालु आदि स्थान, स्पृष्ट आदि प्रयत्न, ह्रस्वोदात्तादि स्वरों का असन्दिग्ध ज्ञान हो जाता है। शिक्षणकाल में 'प' का उच्चारण (सरलतम उदाहरण दिया गया है) करे, साथ ही ओठों को पूरा और सीधा मिलाकर भी दिखाये और बताये कि यदि ठीक-ठीक न मिलाये कुछ तिरछे करके भी मिलाये तो उच्चारण तो हो जायेगा, पर वह उच्चारण दोषयुक्त होगा। इसलिये ऊपर-नीचे के ओठ समानान्तर से आकर मिलें। अतः ऋषि ने सम् + युज्य अर्थात् सम्यक् प्रकार से योग करे, ऐसा लिखा। इस प्रकार 'एव' करना पूर्ण सार्थक और आवश्यक है। आगमादि में यद्यपि कलादि दोष समान न हों, तथापि उच्चारण करके उपदेश तो करना ही चाहिये, जिससे षष आदि रूप में शशादि विकृत न हो सकें।

पृ० १६५७, पं० १—'दुष्टः शब्दः स्वरतो वर्णतो वा' इस की व्याख्या पर ये आक्षेप करते हैं कि—"गानकर्ता यह प्रमादपाठ है, गानकर्ता के स्थान में गायक शब्द का प्रयोग करना चाहिये।" परन्तु यह मुण्डी स्वयं गानविद्या से शून्य और अरसिक है। 'गान' इस संज्ञा शब्द की प्रयोज्यता

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शून्योऽरसिको मुण्डी 'गान' शब्दस्यैवाऽत्र प्रयोज्यता युक्तियुक्तेति नाऽभिजानाति। गानानि खलु विविधानि, तत्र कस्मिन् गाने कः स्वरः कोमलो मन्द्रादिसप्तकेषु च कतमेषु प्रयोज्यः—इति तु सामगानप्रवीण एव जानाति।

अस्मत्सुपुत्री सङ्गीतप्रभाकरपरीक्षोत्तीर्णा साहित्याचार्या मञ्जुला शर्मा पृष्टा सती स प्रत्यमेवाबोधयद् यद् यद्यपि अमरकोषे गीतं गानमिति पर्य्यायवाचकम्, परमृषिदयानन्दात् प्राक्प्रणीता ग्रन्थाः सङ्गीते आसन्। यथा सङ्गीतस्थाने सङ्गानं तदर्थाभिधायकम्, तथा तदभिध्यायैवर्षिणा गानकर्ता इत्यत्र गानशब्दः प्रायोजि। यथाच शार्ङ्गदेवकृतसङ्गीतरत्नाकरे — रञ्जकस्वरसन्दर्भो गीतमित्यभिधीयते'। एतद्गीतस्य प्रकारद्वयम्—गन्धर्वो गानं चेति। गान्धर्व-स्त्वपौरुषेयसामगानं मार्गी इत्यभिधीयते, समाजमनोरञ्जकं तु गानं निबद्धमनिबद्धं वा।

सामगानविद्याप्रवीणो महर्षिर्दयानन्द एवेदं वैशिष्ट्यमजानात्। यथा न सैरिभः सरोवरा-वगाहनेन पङ्कोत्खननेनिपुणः फुल्लकमलानां सौरभरसमूल्याङ्कनं कर्तुं क्षमते, तत्तु केवलं मधुकरं व्यतिरिच्य कथमन्यो जानीयात्? अस्थानप्रयत्नोच्चारितशब्दस्य कर्णकटुत्वं मानसविप्रियत्वं

ही यहाँ युक्तियुक्त और तात्पर्यवती है। गान तो विविध होते हैं। कोमल आदि स्वरों में किसका प्रयोग किया जाये तथा उस गान में अपनी ओर से कौन सा सौन्दर्य उत्पन्न किया जा सकता है, उस गान में अपनी मौलिकता ला देनेवाले का गानकर्ता शब्द विशेष अभिप्राय को सोचकर प्रयुक्त किया है। गायक तो परम्पराप्राप्त को वैसा ही गले से उतार देनेवाला भी हो सकता है। 'गानकर्ता' शब्द में स्वयं का भी कर्तृत्व गुण निहित व सम्भावित है।

सङ्गीतप्रभाकर हमारी पुत्री मञ्जुला शर्मा आचार्या ने अभी-अभी बताया कि अमरकोश में गीत और गान पर्यायवाची शब्द हैं, परन्तु ऋषिवर से पूर्व जो सङ्गीतग्रन्थ संस्कृत में थे, उनको ध्यान में रखते हुए यहाँ 'गान' कर्ता शब्द का प्रयोग किया गया है। शार्ङ्गदेवकृत संगीतरत्नाकर में कहा गया है—'रञ्जकस्वरसन्दर्भो गीतमित्यभिधीयते' अर्थात स्वरों का वह समुदाय, जिससे मन का रञ्जन हो, गीत कहाता है। इसी गीत के दो प्रकार हैं—एक गान्धर्व और दूसरा गान। गान्धर्व अपौरुषेय सामगान है, जिसे मार्गी कहते हैं, आजकल प्रचलित समाज में मनोरञ्जन हो, वह गान होता है। वह गान भी निबद्ध गान (तालबद्ध) और अनिबद्ध (ताल रहित) पर स्वरबद्ध अवश्य होता है।

सामगानविद्या में प्रवीण महर्षि दयानन्द इस वैशिष्ट्य को जानते थे। कमलसुशोभित सरोवर की कीचड़ के उत्खनन में कुशल सैरिभ (भैंसा) फूले कमलों के सौरभ व मधुरस का मूल्याङ्कन नहीं कर सकता, मधुकर ही कर सकता है। गानविद्याविशारद ही शब्दों के लालित्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तु गानविद्याविशारद एव ज्ञातुमर्हति। सत्यमुक्तं पद्यात्मकं केनाऽपि कविना—

'गुणिनि गुणज्ञो रमते नाऽगुणशीलस्य गुणिनि परितोषः।
अलिरेति वनात् कमलं न दर्दुरस्त्वेकवासोऽपि॥'

दृष्टान्तदार्ष्टान्तयोः सङ्गमनं शिक्षते चेदन्तेवासिता कस्यचिदार्यश्रोत्रियस्योपेतव्याऽसीत्।

यथोक्तं भूमिकायाम्—'गानकर्ता षड्जादिस्वरालापनेऽन्यथोच्चारणं कुर्याच्चेत् स तस्यैवापराधो भवेत्' इत्यत्र 'गानकर्ता' इत्यस्य स्थाने 'गायकः' इति प्रयोगेण न जातुचिद् विशिष्टध्वनितोऽभिप्रायः सिध्येत्। विशेषतया सामवेदे तन्मन्त्राणामुच्चारणभेदाद् रचनाविशेषभेदाः षड् भवन्ति, तद्यथा स्तोमाः—त्रिवृत्-पञ्चदश-सप्तदश-एकविंश-त्रिणव-त्रयस्त्रिंशरूपाः। एतेषां रचनाप्रकाराणां सामवेदीयताण्ड्यब्राह्मणे तृतीय-चतुर्थ-पञ्चमाध्यायेषु विस्तरशो वर्णनं वर्तते।

सामवेदीयमन्त्रेषु गानभेदाश्चेमे रथन्तर-वैराज-बृहत्-शाक्वर-वैरूप-रैवतनामानि सामानि। इमानि सामानि 'पृष्ठ' इति नामाऽप्यभिधीयन्ते। एवमिह गानशब्देन तत्तद्गानान्यपि

और कर्णकटुत्व या मनोहारिता को जान सकता है। किसी कवि ने ठीक कहा है—

'गुणी में गुणज्ञ ही को रस आता है, अगुणी गुणों में परितोष नहीं कर सकता। अलि वन से उड़कर कमल के पास पहुँच जाता है, परन्तु सरोवर में निरन्तर रहनेवाले मेंढक का कमल के प्रति कोई आकर्षण नहीं होता।'

महोदय! दृष्टान्त और दार्ष्टान्त में सङ्गमन सीखना चाहो तो आपको किसी आर्य श्रोत्रिय की अन्तेवासिता (शिष्यत्व) स्वीकार करनी चाहिये।

जैसा भूमिका में कहा है कि—'गानकर्ता षड्ज आदि स्वरों का उच्चारण अल्प करता है, तो यह अपराध उसी का समझा जाता है।' यहाँ पर 'गानकर्ता' इसके स्थान पर 'गायक' शब्द उस विशेष अभिव्यञ्जनीय भाव को नहीं कह पायेगा। विशेषरूप से यह बात सामवेद में स्पष्ट हो जाती है। वहाँ पर सामवेदीय मन्त्रों के उच्चारणभेद से स्तोमादि रचनाविशेष हैं। ये स्तोम त्रिवृत्, पञ्चदश, सप्तदश, एकविंश, त्रिणव और त्रयस्त्रिंश नामवाले छः हैं। इन स्तोमों के रचनाप्रकार सामवेदीय ताण्ड्यब्राह्मण के ३, ४, ५ अध्यायों में विस्तार से वर्णित हैं।

सामवेदीय मन्त्रों में गानभेद ये हैं, यथा—रथन्तर, वैराज, बृहत्, शाक्वर, वैरूप और रैवत—ये छः हैं। इन्हीं सामों को 'पृष्ठ' के नामों से भी कहा जाता है। जैसे कि—'बृहच्च वा इदमग्ने रथन्तरञ्चास्ताम्...षट् पृष्ठान्यासन्' (ऐत० ब्रा० ४।४।६) में वर्णित है। इस प्रकार

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

लक्षितानि। तत्रैव चाभीष्टा व्यञ्जनया सामगानस्य लयानामपि भेदास्ते चेमे—क्रुष्ट-प्रथमा-द्वितीया-चतुर्थी-मन्दातिस्वार्थाः।

एतत्सम्बन्धे विशेषजिज्ञासवोऽनुरुध्यन्ते प्रातिशाख्य-बृहद्देवता-तैत्तिरीयब्राह्मण-सामविधानब्राह्मण-पुष्यसूत्र-सामतन्त्र-नारदशिक्षा अध्येतुम्। पूनास्थवाक्कीलमहोदय-श्री-एन.के.पटवर्धनः सामगानस्य विशिष्टमध्ययनं विधाय महत्त्वपूर्णमन्वेषणं कृतवान्। सामवेदस्यैवोपवेदो गान्धर्ववेदः, यस्मात् षोडशसहस्र-रागरागिण्यः प्रादुर्भूताः।

पृ० १६५८, पं० २—अत्र 'दुष्टः शब्दः स्वरतो वर्णतो वा' इत्यस्य सुष्ठुतमं भाष्यं महर्षिणा कृतं तत्रायं वक्ति यत्—"हिन्दीव्याख्याने तु य इन्द्रस्योत्तमतामिच्छेत् सोऽन्तोदात्तमुच्चरेत्, यो मेघस्य वृद्धिमिच्छेत् स आद्युदात्तमुच्चरेत्' इत्यादिकं सर्वं निर्मूलमेव" इति कथनं तुच्छमेव। हिन्द्यां तु भूमिकायाः संस्कृतस्य भावार्थो लिख्यते, न तु व्याख्यानं क्रियते। अयं वराको भावार्थ-व्याख्यानयोरन्तरमपि न वेत्ति।

इह मुद्रणे अन्ताद्यविपर्ययः कथमपि जातोऽस्ति, यतो हि संस्कृते सर्वथा यथार्थोल्लेखो

'गान' शब्द पढ़ने से ऋषि के द्वारा विविध गानों के भेद अभिलक्षित हैं; क्योंकि प्रत्येक गान के स्वर वा आलाप भिन्न होते हैं। महर्षि के 'गानकर्ता' शब्द से व्यञ्जना शक्ति द्वारा साम-गान के लयों के भेद भी अभीष्ट हैं। वे भेद हैं—क्रुष्ट, प्रथमा, द्वितीया, चतुर्थी, मन्द, अतिस्वार्थ।

इस सम्बन्ध में विशेष जिज्ञासुओं से अनुरोध है कि वे प्रातिशाख्य, बृहद्देवता, तैत्तिरीयब्राह्मण, सामविधानब्राह्मण, पुष्यसूत्र, सामतन्त्र, नारदशिक्षा पढ़ें। पूना के वकील श्री एन.के. पटवर्धन ने सामगान का विशिष्ट अध्ययन करके महत्त्वपूर्ण अन्वेषण किया है। सामवेद का ही उपवेद गान्धर्ववेद है, जिससे सोलह सहस्र राग और रागिनियाँ निकली हैं।

पृ० १६५८, पं० २—'दुष्टः शब्दः स्वरतो वर्णतो वा' इसका महर्षि ने सुन्दर भाष्य किया है, उस में पारिजातकार का कहना है कि—"हिन्दी व्याख्यान में तो जो इन्द्र की उत्तमता चाहे, वह अन्तोदात्त उच्चारण करे तथा जो मेघ की उत्तमता चाहे, वह आद्युदात्त उच्चारण करे' पर यह कथन निराधार है।" हमारी समझ में इस लेखक का आक्षेप तुच्छ और निर्मूल है; क्योंकि भूमिका की हिन्दी में संस्कृत का भावार्थ कहा गया है, व्याख्यान नहीं किया है। यह बेचारा भावार्थ और व्याख्यान में अन्तर ही न समझ पाया।

भूमिका में मुद्रण में किसी प्रकार उल्टा छप गया है। संस्कृत में ठीक रूप से छपा है। आदि और अन्त शब्द का परस्पर विपर्यय है। इस प्रकार तो आपके मुद्रण में भी १६५७ पृष्ठ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वर्तते। भवतोऽपि मुद्रणे १६५७ पृ० 'गान' स्थाने 'मान' इति मुद्रितम्। शिष्टं प्राक् समाहितत्वान्नेह पिष्टपेषणं क्रियते त्वादृशम्।

पृ० १६५८ पृष्ठानुच्छेदतः १६६२ पृष्ठे 'इत्यादि वचनेभ्यः' यावन्तं पुस्तकपीवरताऽऽपादनमनेन कृतं येनाज्ञाः पाण्डित्यमेतेनैवाऽस्य निर्धारयेयुः।

पृ० १६६२, अनु० २—"यत्तु—'विद्वांसो मनुष्या इन्द्रियाणि च सूर्यादयश्च सर्वे लोका अधिनिषेदुर्यदाधारेण निषण्णास्तद् ब्रह्म विज्ञेयम्' इति, तत्तुच्छम्, तदाधारत्वेन देवपदोपादानवैयर्थ्यात्। 'सर्वोपकारकरणार्थमीश्वराज्ञायां यथावन्न वर्तन्ते' इत्यादिकमपि निर्मूलम्। धर्मार्थकाममोक्षाख्यं फलमित्यपि निर्मूलम्, अक्षरबाह्यत्वात्।"

इति समस्तमपि अचिन्तनशीलस्याऽस्य दृशा मूलशब्दभाष्यतात्पर्यादि निर्मूलं कथयितुं शक्यते, व्याख्याने भाष्ये वा तावतामेव शब्दानां प्रयोगस्यातपेक्षत्वात्।

'ऋचो अक्षरे०' अस्मिन् मन्त्रे देवपदेन विद्वांस इन्द्रियाणि सूर्यादयश्च लोका गृह्यन्ते, यच्छासनेन सर्वे यथायथं कुर्वन्ति। तदेव ब्रह्म विज्ञेयं भवति नान्यदिति तात्पर्यम्। 'यस्तन्न वेद०'

की तृतीय पंक्ति में 'गान' के स्थान पर 'मान' छपा हुआ है। शिष्ट पूर्व में समाधान समाहित है, अतः उसका आपके समान पिष्टपेषण नहीं किया जा रहा है,

पृ० १६५८ से १६६२ तक के कथन से पुस्तक का कलेवर बढ़ाने को ही इन्होंने पाण्डित्य समझा है।

पृ० १६६२, अनु० २—"जिसमें सम्पूर्ण विद्वान् मनुष्य आदि स्थित हैं, वह परमेश्वर कहलाता है' यह व्याख्या उचित नहीं है; क्योंकि ऐसा मानने पर इस मन्त्र में 'देव' पद को रखना व्यर्थ हो जायेगा। 'सबका उपकार करनेवाली ईश्वर की आज्ञा को जो ठीक तरह से नहीं समझते हैं' ऐसा अर्थ करना भी निराधार है। इसी तरह से धर्म, अर्थ, काम और मोक्ष रूपी फल की चर्चा भी विना प्रसङ्ग के यहाँ उठा दी गयी है।"

पारिजातकार की इस अचिन्तनशील दृष्टि से मूल शब्द और भाष्यादि के तात्पर्य को निर्मूल कहा जा सकता है; क्योंकि व्याख्यान और भाष्य में उतने ही अर्थात् मूलमात्र के शब्दों का ही सीमित प्रयोग नहीं किया गया; व्याख्यान में किया भी नहीं जाना चाहिये।

'ऋचो अक्षरे०' इस मन्त्र में 'देव' पद से विद्वान्, इन्द्रियाँ और सूर्यादि लोकों का ग्रहण होता है। ये सब परमेश्वर के शासन में रहकर यथायथ करते हैं, वही ब्रह्म जानने योग्य है, इससे भिन्न नहीं।' 'यस्तन्न वेद०' इसका ही व्याख्यान आगे है—'जो मूढ ईश्वराधार को नहीं जानता,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यस्यैवास्ति व्याख्यानमग्रे—'यो मूढो न जानाति ईश्वराधारत्वं यद् जीवः सर्वोपकारार्थमेवोत्पादितः परमात्मनेति स यथावन्नाचरति' इति व्याख्यानं मूलस्यैव। 'ये च तद् ब्रह्म जानन्ति ते तु क्रमशो ब्रह्मज्ञानफलं धर्मार्थकाममोक्षाख्यं प्राप्नुवन्त्येव' इति समग्रं शुद्धबुद्ध्योपगम्यते, अनिध्यातशास्त्रार्थाः कथं ज्ञातुं शक्नुयुः ? फलतः धर्मादिचर्चा प्रसङ्गोपात्ता।

पृ० १६६४, पं० २—"यत्तु—'विज्ञायाऽपि धर्मं नाचरति स मनुष्यः काष्ठस्तम्भवद् भवति' इति, तदशुद्धम्, मूले तादृशार्थबोधकपदाभावात्।" इति वचनं तु बुद्धिसम्बन्धविरहितम्, शास्त्रेषु अध्ययनस्य फलं विज्ञानं विज्ञानस्य सार्थक्यमाचरणवत्त्व एव प्रतिपादितत्वात्। अन्यथाऽसौ जड एव विज्ञेयः। यतो हि विद्या फलीभूता चतुर्भिः प्रकारैरेव भवति—'आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन' इति महाभाष्यवचनात्।

पृ० १६६४, पं० १६—यदप्याह—"मनुष्योऽर्थज्ञानपूर्वकं वेदाध्ययनं करोति, तस्मै वाक् तन्वं विविधतया प्रकाशयति' इत्यादिकम्। तत्तु यत्किञ्चित्, वाक्पदस्य विद्यार्थत्वे मानाऽभावात्। अर्थज्ञानातिरिक्तस्य प्रकाशस्यानपेक्षितत्वाच्च।" तदपि अल्पाधीतिफलितम्।

जो जीव सबके उपकारार्थ संसार में आया है, वह यथावत् आचरण नहीं करता।' यह व्याख्या मूल की है। 'य इत्तद् विदुस्त इमे सपासते०' इसका सीधा अर्थ है कि 'जो ब्रह्म को जानते हैं, वे ब्रह्म के जानने के फल मोक्ष को प्राप्त होते हैं। उस मोक्ष को प्राप्त होने से पूर्व धर्मार्थ काम के यथार्थ स्वरूप का भी उन्हें ज्ञान होता है।' यह सारा अर्थ शास्त्र का मनन न करनेवाले कैसे जान सकते हैं, जो कि शुद्ध बुद्धि के द्वारा ही उपगम्य है। अतः धर्मार्थादि की चर्चा प्रसङ्गोपात्त है।

पृ० १६६४, पं० २—"धर्म को जानकर भी जो मनुष्य धर्म का आचरण नहीं करता' यह अर्थ भी ग़लत है; क्योंकि मूल में इस अर्थ को बतानेवाला कोई शब्द नहीं है।" पारिजातकार का यह कथन ऊहनशील प्रतिभा के अभाव में किया गया है; क्योंकि शास्त्रों के अध्ययन का फल विज्ञान होता है और धर्म-विज्ञान का फल आचरणवान् होना है, अन्यथा वह धर्म-विज्ञान ही निष्फल होगा। महाभाष्यकार का कहना है कि विद्या चार प्रकार से फलीभूत होती है—'आगम, स्वाध्याय, प्रवचन और व्यवहार के द्वारा।'

पृ० १६६४, पं० १६—"जो मनुष्य धर्मज्ञानपूर्वक वेदाध्ययन करता है, उसके लिये वाक् अर्थात् विद्या विविध रूप से अपना स्वरूप प्रकट कर देती है।' यहाँ पर स्वामी दयानन्द ने वाक् का अर्थ विद्या किया है, उसमें कोई प्रमाण नहीं है; क्योंकि अर्थज्ञान के अतिरिक्त विद्या का कोई प्रकाश नहीं।" पारिजातकार का यह आक्षेप अल्पज्ञान का फल है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'वाग् वै सरस्वती, विद्या वै धिषणा' (तै० सं० ५ । १ । ७ । २) , 'धिषणा वाक्' (निघं० १ । ११) , 'वागेव सरस्वती' (ऐ० ब्रा० २ । २४) आदिप्रमाणैर्वाक् सरस्वत्यस्त्येव । सरस्वती विद्या देवी अथवा ब्रह्मविद्या माता मन्यते । 'पावकाः नः सरस्वती, चोदयित्री सूनृतानां वचसाम्, सरस्वती प्रचेतयति' (मनुः० २० । ८४-८६) इत्यादिप्रमाणैर्विद्यैव सरस्वतीति पुष्यते । अर्थाज्ज्ञानातिरिक्तं प्रकाशं वाक् किमप्यन्यन्न प्रकाशयति, इति कथनं त्वशास्त्रविदाऽपि वक्तुं सुलभम् । परमत्र महर्षिशब्दतात्पर्यं विपश्चितः साहित्यशास्त्रगभीरमनना अवबुध्यन्ते । शब्दाः सन्तीमे 'तस्मै वाग् विद्या शरीरं स्वस्वरूपं विविधतया प्रकाशयति ।' अर्थज्ञानपूर्वकमधीयानो विद्यायाः शब्दार्थमयं विविधं स्वरूपं प्रकाशितमधिगच्छति । तत्र शब्दार्थवत् काव्ये वाच्यलक्ष्य-व्यङ्ग्यादिकमर्थं गुणरीत्यलङ्काररसांश्चाभिजानीते ।

पृ० १६६५, अनु० २—'उत त्वं सख्ये स्थिरपीतमाहुर्नैनं०' इति मन्त्रविषये—"यतु—'सख्ये यथा सर्वेषां प्राणिनां मित्रभावकर्मणि उत त्वमन्यमनुष्यं पूर्णविद्यायुक्तं स्थिरपीतं धर्मानुष्ठानेश्वरप्राप्तिरूपं मोक्षफलं पीतं प्राप्तं येन तं विद्वांसं परमसुखप्रदं मित्रं प्राहुः' इति, तदतीव मन्दम्, वेदार्थप्रशंसासम्बद्धत्वात्, सर्वेषां प्राणिनां सख्ये स्थितेर्वेदार्थज्ञानं प्रत्यहेतुत्वात् । 'परमसुखप्रदं मित्रम्' इत्यपि मूलार्थासम्बद्धमेव । स्थिरशब्दस्यार्थस्तु नोक्तः । धर्मानुष्ठानमन्यद्

क्योंकि 'वाग् वै सरस्वती, विद्या वै धिषणा' (तै० सं० ५ । १ । ७ । २), 'धिषणा वाक्' (निघं० १ । ११), 'वागेव सरस्वती' (ऐ० ब्रा० २ । २४) आदि प्रमाणों से वाक् ही सरस्वती है । वाक्, सरस्वती, विद्या, ब्रह्मविद्या—ये सब पर्यायवाची शब्द हैं । 'पावकाः नः सरस्वती' आदि मन्त्रों से वाक् (विद्या) ही सरस्वती है । वाक् अर्थ का प्रकाश करती है, यह तो सामान्य जन भी जानता है, पर शब्द, अर्थ और उनके सम्बन्ध को विद्वान् ही जानता है । उसके लिये शब्दार्थवत् काव्य में लक्ष्य, व्यङ्ग्यादि अर्थ, गुण, रीति और अलङ्कारादि प्रकाशित हो जाते हैं।

पृ० १६६५, अनु० २—"उत त्वं सख्ये स्थिरपीतमाहुः०' इस मन्त्र में—'सब मनुष्यों को उचित है कि विद्वानों के साथ प्रीति करें, अर्थात् जैसे सम्पूर्ण मनुष्यों के साथ मैत्री करने योग्य मनुष्य को सब लोग सुख देते हैं, वैसे ही तू भी जो वेदादि विद्या और विज्ञानयुक्त पुरुष हैं; उसको अच्छी प्रकार सुख दे कि जिससे तुझे विद्यारूप लाभ सदा होता रहे । विद्वान् नाम उसका है, जो कि अर्थसहित विद्या को पढ़कर वैसा ही आचरण करे, जिससे कि धर्म, अर्थ, काम, मोक्ष और परमेश्वर की प्राप्ति यथावत् हो सके । इसी को 'स्थिरपीत' कहते हैं । ऐसा जो विद्वान् है, वह संसार को सुख देनेवाला होता है ।' भूमिका का यह कथन मन्द है । इस मन्त्र में वेदार्थ की प्रशंसा की गयी है । सभी प्राणियों से मित्रता रखने से वेदार्थ ज्ञान का कोई सम्बन्ध नहीं है । 'परम

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ईश्वरप्राप्तिरूपं फलमन्यत्। तयोः कथं पेयत्वम् ? पीतमित्यस्य प्राप्तमिति च कथमर्थः ? 'ईदृशं विद्वांसं न केऽपि हिंसन्ति, तस्य सर्वप्रियंकारकत्वात्' अनेनाऽपि न वेदविद्याप्रागल्भ्यं व्यज्यते। अन्यदपि सर्वं मूलाक्षरासंस्पर्शि कपोलकल्पितं यत्किञ्चिदेव।"

इति सर्वं मतिमान्द्येनोदितम्। विद्वांसो विचारयन्तु यदयमाह—'भूमिकोक्तमशुद्धं वेदार्थप्रशंसासम्बद्धत्वात्'। अयं हेतुर्हेत्वाभास एव। यत्र यत्र वेदार्थप्रशंसासम्बन्धस्तत्र तत्राशुद्धमित्यत्र न व्याप्तिः।

'सख्ये' अत्र निमित्तार्थे सप्तमी, सख्यार्थमित्यर्थः। गुरुरूपाद् ह्रदाद् आकण्ठपीतं ज्ञानजलं ज्ञानाऽमृतं वा येन तम्। स्थिरमर्थाद् ध्रुवम्, ध्रुवरूपेण येन मोक्षफलं वेदज्ञानामृतं पीतं तं सख्यार्थं वदन्ति। एवंविधस्य पुरुषस्य मैत्री परमसुखप्रदा भवतीति ध्वन्यर्थः। ज्ञानिन एतस्याऽत्र ज्ञानमवधारयिष्यन्ति यदयं धर्मानुष्ठानेनेश्वरज्ञानफलमित्यर्थं न विशिनष्टि। नेह धर्मानुष्ठानं फलमुक्तम्, तस्य करणत्वात्।

सुख देनेवाला मित्र' इस अर्थ का भी मूल पद से कोई सम्बन्ध नहीं है। 'स्थिर' शब्द का भी अर्थ यहाँ (दयानन्द ने) नहीं बताया। धर्म का अनुष्ठान करना एक बात है और ईश्वर की प्राप्ति दूसरी बात। उनका पीना कैसे हो सकता है ? 'पीत' शब्द का अर्थ प्राप्त कैसे हो सकता है ? ऐसे विद्वान् को कोई दुःख नहीं पहुँचाता; क्योंकि वह सबका प्रिय करनेवाला होता है, इस बात से भी वेदविद्या का महत्त्व नहीं प्रकट होता। इसी तरह से दूसरी बातें भी मूलाक्षरों से बहुत दूर हैं। ये केवल कल्पित और भ्रान्त हैं।"

समाधान—यह उक्त कथन बुद्धि की मन्दता से प्रेरित है। विद्वान् विचार करें जो ये कह रहे हैं कि 'भूमिकोक्त अशुद्ध है; क्योंकि वेदार्थ की प्रशंसा से सम्बद्ध है।' जो-जो वेदार्थ की प्रशंसा से सम्बद्ध होगा, वह-वह अशुद्ध होगा—यह कदापि व्याप्ति नहीं बन सकती, अतः यह हेतु नहीं, हेत्वाभास है। कदाचित् आप इसका यह अर्थ निकालें कि सभी प्राणियों के साथ मित्रता रखने के लिये वेदार्थ का कोई सम्बन्ध नहीं, तब भी ठीक नहीं; क्योंकि वेदार्थवेत्ता के हृदय में सर्वकल्याण की भावना व मैत्री अवश्य होगी।

'सख्ये' यहाँ निमित्तार्थ में सप्तमी होने से 'मित्रता रखने के लिये' यही अर्थ ठीक है। गुरुरूप ह्रद से आकण्ठ ज्ञानामृत पीनेवाले, स्थिर अर्थात् ध्रुव मोक्षफल या वेदज्ञानामृत पीनेवाले की मित्रता परमसुखप्रद मानते हैं—यह अर्थ ध्वनित होता है। ज्ञानी लोग ऐसे व्यक्ति के ज्ञान का निरादर ही करेंगे कि यह धर्मानुष्ठान के द्वारा ईश्वरज्ञानफल को विशेषता नहीं देता। यहाँ पर धर्मानुष्ठान को करण कहा गया है, वह फल नहीं हो सकता।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यच्चायं वक्ति—"कथं तयोः (धर्मानुष्ठानमोक्षयोः) पेयम्?" इत्यस्य समाधानसमये स्मरामि—'अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख'। नहि कश्चिदामूलशुष्कवृक्षे सूचीवेधनेन रसं प्रवेश्य पुनर्हरितं विधातुं क्षमः। कः खलु ब्रह्माऽपि रसज्ञानलवदुर्विदग्धमेतं प्रबोद्धुं क्षमतां यत्—'नेत्रैः पपुस्तृप्तिमवाप्नुवद्भिः' अत्र महाकवि-कालिदासेन दर्शनस्य पानं नेत्रैर्वर्णितम्? अन्यच्चाऽपि—

'वसिष्ठधेनोरनुयायिनं तम्, आवर्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम्॥'
(रघुवंश २।१९)

सुबन्धोः पद्यमपि तथा—

'अविदितगुणाऽपि सुकवेर्भणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हरति दृशं मालतीमाला॥'

इत्यनयोः कालिदाससुबन्ध्वोः काव्यसौन्दर्यमेवमभिधाधीः कथङ्कारं हृदयङ्गमं कुर्यात्?

यहाँ पर करपात्री जी पूछते हैं कि—"धर्मानुष्ठान और ईश्वर प्राप्तिरूप मोक्षफल का पान कैसे होगा?" प्रथम तो 'पीतं' का अर्थ 'प्राप्त किया गया' है, यदि 'पीना' अर्थ भी लिया जाये तब भी साहित्यिक दृष्टि से सुन्दर अर्थ ही होगा। वस्तुतः नीरसहृदय व्यक्ति तो किसी अर्थ का रासायनिक विश्लेषण ही करने लग जायेगा। उसके भाग्य में कवित्व के रसास्वादन करने के लिये कवि ने ईश्वर से प्रार्थना की है। कोई व्यक्ति सूखे काठ में सूचीवेधन द्वारा रस का प्रवेश करके उसे हरा नहीं बना सकता। कौन सा ब्रह्मा भी इस रसज्ञानलवदुर्विदग्ध को समझा सकेगा कि महाकवि कालिदास ने वर्णन किया है कि 'प्रजा ने (अतृप्त तृप्ति को अप्राप्त) नेत्रों से रघु के दर्शनों को पिया'? यहाँ पर पान करना मुख का कार्य था, परन्तु नेत्रों में पीने के गुणों को आरोपित करके कवि ने काव्य का सौन्दर्य बढ़ा दिया।' और भी देखिये—

रघुवंश(२।१९) के श्लोक में भी निर्निमेष उपोषित लोचनों से राजा दिलीप को सुदक्षिणा द्वारा पीने की बात कही गई है। सुबन्धु कवि के पद्य में भी यही सौन्दर्य है—

'अविदित गुणवाली भी उत्तम कवि की उक्ति कानों में माधुर्य की धारा प्रवाहित कर देती है, परिमल को अप्राप्त भी मालती के पुष्पों की माला दृष्टि को बरबस खींच लेती है।'

वमन मुख से होने पर भी धारा को कानों में ढेरों लौटने के अभिप्राय में 'वमति' प्रयुक्त किया गया है। इस प्रकार के काव्यसौन्दर्य को केवल अभिधाग्राहक बुद्धिवाला कैसे हृदयङ्गम

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अयं तु कर्णेषु कथं वमनम्, नेत्रैः कथं पानमित्येव प्रक्ष्यति। महोदय ! नासिकया घ्रातं कर्णाभ्यां श्रुतं नेत्राभ्यां दृष्टं मनसा वाऽनुभूतं सर्वं प्राप्तमेव भवतीति पीतमित्यपि।

वेदाध्यायिनं तदर्थविदं वा सर्वे प्रणिपातपूर्वकं प्रपद्यन्ते श्रद्धया, न कोऽपि हिंसतीति किं नाऽत्र वेदज्ञानगौरवं परिलक्ष्यते ? ऋषिणा तु सकलं समाधौ दृष्ट्वा व्यलेखि, परं भवतामेवेदं कपोलकल्पितं निःसारं च मया साधितम्। नाऽत्र किमपि निरुक्तविरुद्धम्। 'गल्लौ हि विधिना दत्तौ गल्पजल्पनशिल्पिनौ' इत्यनुरुध्य व्यर्थजल्पनेन कपोलयोः सार्थक्यं कुरुतेऽयम्।

पृ० १६६६, पं० १३—यदप्युक्तम्—"यो ह्यविद्वान् अपुष्पां कर्मोपासनानुष्ठानाचार-विद्यारहिताम् अफलां धर्मेश्वरविज्ञानाचारविरहां श्रुतवान् तयार्थज्ञानसुशिक्षारहितया मायया कपटयुक्त्या वाचाऽस्मिल्लोके चरति नैव स किञ्चित् प्राप्नोति' इति, तदपि यत् किञ्चिदेव, कर्मानुष्ठानाचारविद्याधर्मेश्वरविज्ञानाचारविद्ययोः पुष्पफलभावस्याऽनिरूपणात्। मायापदेन कपटयुक्ता वाक् कथमुच्यते, किं तत्र मूलमित्यस्य वक्तव्यत्वात्, निरुक्तविरुद्धत्वाच्च। निरुक्ते तु(१।२०) 'वाक्प्रतिरूपया मायया' इत्युक्तम्, सा च न कपटयुक्ता वाक् किन्तु

कर सकता है। ये तो यही पूछेंगे कि कानों में वमन या नेत्रों से पीना कैसे हो सकता है ? महोदय ! नासिका से सूँघा, कानों से सुना, नेत्रों से देखा या मन से अनुभव किया हुआ—यह सारा ही प्राप्त किया हुआ ही होता है। इसी प्रकार पीत अर्थात् प्राप्त हुआ, ऐसा अर्थ करना सर्वथा सङ्गत है।

वेद के पढ़नेवाले या उसके अर्थ को जाननेवाले पुरुष को सभी श्रद्धा से विनम्रतापूर्वक प्राप्त होते व प्रणाम करते हैं, कोई उसको हानि नहीं पहुँचाता, क्या इससे वेद के ज्ञान का गौरव या वेदार्थ प्रशंसा प्रकट नहीं होती ? ऋषि दयानन्द ने तो सब कुछ समाधि में दर्शन करके लिखा है, परन्तु आपका ही कथन कपोलकल्पित व निःसार है, यह हमने सिद्ध कर दिया है। ऋषि ने निरुक्त के विरुद्ध कुछ भी नहीं लिखा है, आपकी यह केवल बकवास है।

पृ० १६६६, पं० १३—"जो कोई अविद्यारूप अर्थात् अर्थ और अभिप्रायरहित वाणी को सुनता और कहता है, उसको कभी कुछ भी सुख प्राप्त नहीं हो सकता; किन्तु शोकरूप शत्रु उसको सब दिन दुःख ही देते रहते हैं; क्योंकि विद्याहीन होने से वह उन सब शत्रुओं को जीतने में समर्थ नहीं हो सकता।' भूमिका की यह व्याख्या भी ग़लत है; क्योंकि कर्मानुष्ठान, आचारविद्या, धर्म और ईश्वर का विज्ञान तथा आचारविद्या का कहीं भी परस्पर पुष्प और फलभाव वर्णित नहीं है। 'माया शब्द से कपटयुक्ता वाक् कही जाती है', इसमें भी प्रमाण की आवश्यकता है और यह अर्थ निरुक्त की व्याख्या के स्पष्ट विपरीत है। निरुक्त में तो माया का अर्थ वाणी का प्रतिरूप किया जाता है। वह वाणी कपटयुक्त नहीं है, किन्तु वाणी का प्रतिरूप है। माया अर्थ गाय के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वाक्प्रतिरूपा मायाविनिर्मिता मायामयी गौरिव मायामयी वाग्रूपा, तथा चरन् न पुरुषार्थं लभते।"

इति वचोऽपि बुद्धिमान्द्यफलम्। वाक्प्रतिरूपा माया तु कपटयुक्तैव, न विरुद्धा। पुष्पं ह्यत्र प्राक्कारणरूपं फलं च तत्परिणामरूपं निगद्यते। तस्मात् कर्मोपासनाऽनुष्ठानाचारविद्याः प्राक्कारणरूपास्तत्परिणामरूपा धर्मेश्वरविज्ञानाचारास्तदनुकूला जायन्त एव। अतो भूमिकायामूहितं पुष्पफलरूपेण नह्यत्र शास्त्रविरोधो मानाभावात्।

'माया' शब्दो हि प्रज्ञावाचकोऽपि, परमिह 'भवन्ति मायाविषु ये न मायिनः' इत्युक्त्याऽपि मायाशब्दस्य कपटार्थकत्वेऽपि कपटयुक्ता वाग् इति सार्थायानेव प्रयोगः। स्वयमपि मायाविनिर्मिता मायामयी गौरिवेति वचसाऽपि कपटार्थः सिध्यति। निरुक्तेऽर्थमेकं वाचः पुष्पफलमाह। कर्मकाण्डक्षेत्रे क्रमशो यज्ञज्ञानं पुष्पं देवताज्ञानं फलम्, अध्यात्मक्षेत्रे देवताज्ञानम् अग्निवायुसूर्यादीनां पुष्पम् अध्यात्मज्ञानं स्वात्मज्ञानं परमात्मज्ञानं च फलम्, व्यवहारक्षेत्रे कर्मोपासनानुष्ठानाचारविद्या पुष्पं धर्मेश्वरविज्ञानं फलमिति विवेकः।

समान मायामयी वाणी है, वैसा आचरण करते हुए पुरुषार्थ प्राप्त नहीं होता अर्थात् जैसे जादू की गाय दूध नहीं देती, वैसे ही मायामयी वाणी भी फलवती नहीं होती।"

यह सारा कथन बुद्धि की मन्दता का परिणाम है। आपने इस प्रकरण को समझा ही नहीं। वाणी का तो उदाहरण दिया गया है। वस्तुतः पुष्प शब्द कारण का प्रतिनिधि है और फल कार्य या परिणाम का प्रतिनिधि। इसलिये कर्मोपासनाऽनुष्ठान आचारविद्या पुष्प (कारण) रूप हैं और इसके परिणामस्वरूप धर्म और ईश्वर का विज्ञान फलरूप है। इसलिये इस अर्थ से निरुक्त का बिलकुल विरोध नहीं है, प्रत्युत निरुक्तप्रदर्शित पथ के अनुरूप यह व्याख्या है। इसको विरुद्ध बताने में इन्होंने कोई प्रमाण नहीं दिया।

'माया' शब्द का अर्थ प्रज्ञा भी होता है, परन्तु यहाँ पर 'ये मूढधी पराजय को प्राप्त होते हैं, जो माया-पुरुषों में मायावी नहीं बनते' इस उक्ति के अनुरूप माया शब्द का अर्थ कपटार्थक होने पर कपटयुक्त वाणी भी है। अतः यह प्रयोग ठीक है। स्वयं भी यहीं पर आप 'माया-विनिर्मित मायावी गौ के समान' छल-कपट अर्थ में प्रयोग करते हैं। निरुक्त में वाणी का एक अर्थ पुष्प-फल कहा गया। कर्मकाण्ड के क्षेत्र में पुष्प है यज्ञज्ञान और इसका फल है देवताज्ञान। अध्यात्मक्षेत्र में देवता-ज्ञान, अग्नि, वायु, आदित्य का ज्ञान पुष्प है और स्वात्मज्ञान या परमात्मज्ञान—ये फल हैं। इसी प्रकार व्यवहारक्षेत्र में कर्मोपासनाऽनुष्ठान, आचारविद्या पुष्प और धर्म, ईश्वरविज्ञान फल हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६६७ तः प्रकरणसमाप्तिं यावदयम्प्रवातरयद् ग्रन्थस्थौल्यार्थं महाभाष्य-पाणिनि-शिक्षा-ब्राह्मणादिभ्यश्चासन्दृब्धम्। अन्ते कथयति—"सम्बन्धस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः' इति सायणभाष्येण च स्पष्टमेव विज्ञायते। दयानन्देन कथं नैतद् दृष्टमित्याश्चर्यम्।" इत्यपि मिथ्यैव, सायणाचार्येण बहुत्राधर्मप्रतिपादकार्थविधानात्। तद्यथा निदर्श्यतेऽवसरप्राप्तं किञ्चित्—

महाशय करपात्रिन्! महर्षिदयानन्दस्य सायणस्य च कालिकस्थितिषु महदन्तरमासीत्। साधनेष्वपि वा, दृष्टिकोणे शैल्यां वाऽपि।

सायणकाले यत्र तत्र संस्कृतप्रचारोऽधिक आसीत्, भिन्नभिन्नशास्त्राणामध्येतारो मर्मज्ञाश्चाप्यासन्, जनतायां वेदशास्त्राणि प्रति सम्मानभावोऽप्यतिष्ठत्। भारते बाह्यसंस्कृतीनां प्रभावोऽल्पीयानेवासीत्, परं महर्षिदयानन्दसमये विदेशि-भाषायाः, विदेशि-वेशस्य भूषाया वैदिकविचाराणां च तीव्रतमः प्रहार आसीत्, प्राचीनसंस्कृतसंस्कृतिभ्यां रुचिर्दूरेऽपास्ताऽभूत्, वेदा भेषचारिणां ग्रन्था अमन्यन्त। ईदृग्भयावहस्थितौ सहस्रवर्षाणामेकत्रीभूता अवकरराशि-र्वेदानामुपरि स्थिताऽभूत्।

पृष्ठ १६६७ से प्रकरण की समाप्ति तक जितना इन्होंने यहाँ महाभाष्य, पाणिनिशिक्षा, ब्राह्मणग्रन्थों से जो उतारा है, वह ग्रन्थ की स्थूलता बढ़ाने के लिये है। यहाँ आप कह रहे हैं कि—"वेद का धर्म और ब्रह्म के साथ प्रतिपादक और प्रतिपाद्यभाव सम्बन्ध है, अर्थात् धर्म और ब्रह्म का ज्ञान वेदों से ही हो सकता है। यह बात सायणाचार्य के भाष्य से स्पष्ट ही प्रतीत होती है, फिर स्वामी दयानन्द ने इस बात को क्यों नहीं समझा, यह आश्चर्य है।" करपात्रीजी का यह कथन भी दम्भपूर्ण व मिथ्या है। सायण ने तो इस वाक्य की आड़ में वेद के द्वारा अधर्म का भी प्रतिपादन किया है। यहाँ कुछ उदाहरणांश दिया जा रहा है, जो शास्त्र से सम्मत नहीं है और सायण ने प्रतिपादन किया है—

महाशय करपात्रिन्! सायण और महर्षि दयानन्द के समय की स्थितियों में बड़ा भारी अन्तर है। वह अन्तर साधन, दृष्टिकोण और शैली में भी है।

सायण के समय में जहाँ-जहाँ संस्कृत का प्रचार अधिक था। भिन्न-भिन्न शास्त्रों के पढ़नेवाले और धर्मज्ञाता भी थे। जनता में वेदशास्त्रों के प्रति सम्मानभाव भी था। भारत में बाहरी संस्कृतियों का प्रभाव अधिक नहीं था। परन्तु महर्षि दयानन्द के समय विदेशी भाषा, विदेशी वेश-भूषा और वैदेशिक विचारों के तीव्रतम प्रहार हो रहे थे। प्राचीन संस्कृत और संस्कृति से रुचि दूर हट गयी थी। तब वेद भेड़ चरानेवालों के ग्रन्थ माने जाने लगे थे। ऐसी भयावह स्थिति में हज़ार वर्षों के एकत्रीभूत अवकर (कूड़े) के ढेर वेद पर एकत्र हो गये थे।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तस्मिन् युगे प्रथमं धारणाद्वयविदारणमकार्षीद् ऋषिः—यन्न वेदा धूर्तानां न वा मेषचारिणां ग्रन्थाः, अपितु परमात्मन आदिज्ञानमस्ति।

सायणाचार्यस्यैष महानर्थोऽवलोकनीयः—

'यत् संवत्समृभवो गामरक्षन् यत् संवत्समृभवो मा अपिंशन्।
यत् संवत्समभरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः॥'
(ऋ० ४। ३३। ४)

अत्राऽश्वलायनसूत्र(८८) स्याधारे ऋभूणां प्रतिष्ठायामयं मन्त्रोऽस्ति। एतत्सम्बन्धे १। १६१ सूक्तप्रारम्भे एकाऽऽख्यायिका कल्पिता यत् सुधन्वनस्त्रयोऽभूवन् पुत्राः—ऋभुः, विभुः, आवाजः। इमे ऋभवः कथ्यन्ते। अस्मिन् मन्त्रे दर्शितं यद् ऋभुभिरेका गौर्मारिता, तस्याश्च खण्डान्यकुर्वन्। असौ कल्पिताख्या सम्प्रदायप्रवर्तिते गोमारणपक्षधरेऽस्ति। परन्तु नैवं तात्पर्यस्याभासोऽपि मन्त्रे। महर्षिदयानन्दस्यास्य मन्त्रस्य भाष्यं पश्यन्तु धार्मिका गोरक्षाव्रतधारिणः—

'बुद्धिमन्तः पितृजना वत्ससदृशप्रियसन्तानान् शिक्षयन्ति, गामर्थाद् वाणीं रक्षन्ति। आचार्यजनाश्चाऽपि प्रेम्णा पालितसन्तानान् मातृश्चाऽपि बिभ्रति।' इत्यादि।

सायणः केवलं विनियोगस्य रक्षणार्थमेनं महान्तमनर्थं कृतवान्। एवं प्रबलपक्षपात-

---

उस युग में ऋषि ने सर्वप्रथम दो धारणाओं का उन्मूलन किया—वेद धूर्त या भेड़ चरानेवालों के ग्रन्थ नहीं हैं, अपितु वेद परमात्मा का आदिज्ञान है।

सायणाचार्य द्वारा वेद से कितना महान् अनर्थ प्रतिपादित किया गया है, देखिये—

'यत् संवत्समृभवो गामरक्षन्०' (ऋ० ४। ३३। ४)। कात्यायन सूत्र के आधार पर ऋभुओं की प्रतिष्ठा का यह मन्त्र है। इसके सम्बन्ध में १। १६१ सूक्त के प्रारम्भ में एक आख्यायिका कल्पित की गयी है कि सुधन्वा के तीन पुत्र थे—ऋभु, विभु और आवाज। ये तीनों ही ऋभु कहलाते थे। इस मन्त्र में यह दिखाया है कि ऋभुओं के द्वारा एक गौ मारी गयी। उसके खण्ड किये गये। यह सम्प्रदायप्रवर्तित गोमारण पक्ष में है। परन्तु उक्तभाव का मन्त्र में आभास तक नहीं है। अब इसी मन्त्र का ऋषिदयानन्द कृत यह गोरक्षक उत्तमार्थ देखें—

'बुद्धिमान् पितर जब बछड़े के सदृश प्रिय सन्तानों को शिक्षा देते हैं कि वे 'गाम्' अर्थात् वाणी की रक्षा करते हैं। आचार्यजन प्रेम से पाली सन्तान और माताओं का भरण-पोषण करते हैं।' इत्यादि।

सायण ने विनियोगरक्षा-हेतु गोवध करनेवाला कितना बड़ा अनर्थ किया है। इस प्रकार

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रलेपान्धदृशाऽनर्थं पुण्यकरं मनुते, उत्तमभाष्यविधातुश्चर्षेर्निन्दां कुर्वन्न लजत इत्यति-त्रपाकरम्। अतोऽहमन्ते प्रार्थये धर्मनिष्ठासम्पन्नान् सुरगिराभक्तान् सर्वान् यत्तेऽन्धविश्वासं विध्वंस्य महर्षिदर्शितमार्गे चलित्वाऽऽत्मकल्याणं विदध्युः। तथैषा निर्मलोक्तिः प्रेरयति—

सुरगिरा-गरिमाऽगरुवासितः, श्रुति-सुधा-रस-सार-विभासितः।
विमल-चारु-वचो-रचनाञ्चितः, ऋषिवरार्च्यविचार उपास्यताम्॥

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'पठनपाठन-विषयः'
॥ सम्पूर्णः ॥

पक्षपात की प्रलिप्तान्ध-दृष्टि से ये अधर्म और अनर्थ वेदप्रतिपाद्य पुण्यकर मानते हैं, उत्तम वेदार्थ करनेवाले महर्षि की निन्दा करते हुए किंचित् लज्जित नहीं होते। यह बात करपात्री जी को अत्यन्त त्रपाकर है। अतः हम अन्त में सुरगिराज्ञात धर्मनिष्ठासम्पन्न पुरुषों से प्रार्थना कर रहे हैं कि वे अन्धविश्वास को विध्वस्त करके महर्षि द्वारा प्रदर्शित मार्ग पर चलकर आत्मकल्याण करें।

इसी ओर यह निर्मलोक्ति प्रेरित कर रही है—

'देववाणी की गरिमा के अगर से सुगन्धित, वेद के अमृत रस के सार की कान्ति से समुज्ज्वल, निर्मल सुन्दर वचनों की रचना से समर्चित ऋषिवर के इस उत्तम विचार को हृदयङ्गम करना चाहिये।'

श्रीमान् पण्डित बिहारी लालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मला मिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'पठनपाठन-विषय'
॥ सम्पूर्ण हुआ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ संक्षेपतो भाष्यकरणशङ्कासमाधानादिविषयः

पृ०१६७१—यदुच्यते—"प० यत्तु केनचित्—'वेदे द्वौ काण्डौ कर्मकाण्डो ब्रह्मकाण्डश्च। बृहदारण्यकाख्यो ग्रन्थो ब्रह्मकाण्डः, तद्व्यतिरिक्तं शतपथब्राह्मणं संहिता चेत्यनयोः कर्मकाण्डत्वमिति काण्वभाष्यमाश्रित्य बृहदारण्यकातिरिक्तस्य सर्वस्यैव वेदस्य कर्मकाण्डत्वमुक्तं सायणेन' इति, तदपि मन्दम्, तत्र बृहदारण्यकपदस्यानन्यशेषब्रह्मपरमन्त्रब्राह्मणपरत्वेनादोषात्।" इति सर्वमसङ्गतम्। प्रथमं तु केनचिद् (केनचिदिति पदैतस्य कोऽभीष्ट इति न प्रत्यपादयत्) उक्तं न तु भूमिकाकारेण। स्यात् तदपि साधूक्तम्। परं बृहदारण्यकशब्दस्य मन्त्रात्मको वेद इत्यर्थः कथं निष्पीडितः? अखिलमुदक्षरमदः। इदन्तु अज्ञानमेव यन्न मन्त्रात्मके वेदे परा विद्या, तस्या वेदानुक्तत्वे वेदबाह्यत्वेऽप्रामाण्यं प्रसज्येत। ब्राह्मणानामवेदत्वं पूर्वं विवेचितं तत्रैव द्रष्टव्यम्।

पृ० १६७१—"वेद में दो काण्ड हैं—कर्मकाण्ड और ब्रह्मकाण्ड। बृहदारण्यक ब्रह्मकाण्ड का ग्रन्थ है। इसके अतिरिक्त सारा शतपथब्राह्मण और संहिता कर्मकाण्ड के अन्तर्गत आते हैं। यह बात काण्वसंहिता के भाष्य में सायण ने कही है। इसके आधार पर बृहदारण्यक के अतिरिक्त सारे वेद को कर्मकाण्ड के अन्तर्गत सायण ने माना है।" इस पर महर्षि दयानन्द ने आक्षेप किया है कि सब वेदों को क्रियाकाण्डपरक मानना मिथ्या है। इस पर श्री करपात्री जी का कहना है कि स्वामी जी का आक्षेप ठीक नहीं; क्योंकि सायण का अभिप्राय ब्रह्मबोधक मन्त्र-ब्राह्मणात्मक समस्त वाङ्मय से है।

परन्तु वेदार्थपारिजातकार का यह उत्तर असङ्गत है। हमने 'वेदसंज्ञाप्रकरण' में महर्षि की वेदत्वेन मान्यता का प्रतिपादन किया है कि चार संहिताएँ ही वेद हैं। बृहदारण्यक से अभिप्राय ब्रह्मबोधक समस्त मन्त्रब्राह्मणात्मक निकालने में क्या प्रमाण है? न सायण का ऐसा अभिप्राय ही है। आप व्यर्थ ही खींचातानी कर रहे हैं, जब कि स्पष्टरूप में बृहदारण्यक नामक ग्रन्थ पृथक् से है ही। सबसे बड़ा आश्चर्य है कि संहितामात्र में आप और सायण ब्रह्मबोधक मन्त्र ही नहीं मानते। केवल कर्मकाण्ड का ही विषय वेदों में मानते हैं, जबकि वेद समस्त विद्याओं के आकर हैं। परा विद्या यदि संहिताओं में न मानी जावे, तो उसका सर्वथा अप्रामाण्य आ पड़ेगा। ब्राह्मणों के अवेदत्व का विवेचन पूर्व किया जा चुका है, पाठक वहीं पर देखें।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६७२, पं० ८ —यदुच्यते—"इन्द्रं मित्रं वरुणम्" इति मन्त्रस्यार्थोऽन्यथैव वर्णितः सायणाचार्येण, तथाहि—'तत्रेन्द्रशब्दो विशेष्यतया गृहीतः, मित्रादयश्च विशेषणतया। अत्र खलु विशेष्योऽग्निशब्दः।.....विशेष्यस्य पुनरुच्चारणं भवति, विशेषणस्यैकवारमेवेति। तथैवाग्रे परमेश्वरेणाग्निशब्दो द्विरुच्चारितो विशेष्यविशेषणाभिप्रायत्वात्। इदं सायणाचार्येण नैव बुद्धम्' इति, तदप्यज्ञानविजृम्भितम्, अपर्यनुयोज्यानुयोगेन निग्रहस्थानपतितत्वात्।"

इति सकलमनधीतशास्त्रस्याप्रबुद्धवचनम्। नहि न्यायशास्त्रे क्वाऽपि 'अपर्यनुयोज्यानुयोगो नाम निग्रहस्थानम्। न्याये हि 'पर्यनुयोज्योपेक्षणम्' नाम निग्रहस्थानम्। तल्लक्षणं हि—'निग्रहस्थानप्राप्तस्याऽनिग्रहः" इति। अर्थाद् यः कश्चिदप्युक्तनिग्रहस्थानेष्वेकतमनिग्रहस्थाननिपतितस्तं 'त्वममुकनिग्रहस्थाने निपतितः' इत्युक्त्वा न निगृह्णाति तदेदं भवति। तथाच भाष्यम्—'उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणम्'।

यद्यपीदं विबोधनं मध्यस्थकार्यं तथाऽपि वादिप्रतिवादिकार्यमतितया प्रतिबोधनं कर्तव्यम्। अहो आश्चर्यम्! नूतननाम्ना आविष्कारो विहितोऽनेन। अस्तु भवदुक्तं नाम न भवेन्निग्रहस्थानम्, तथाऽपि निग्रहस्थानपतनं भवता घोष्यते, अतो भवानेव निगडितो

पृ० १६७२, पं०८ से—"ऐसे ही सायणाचार्य ने 'इन्द्रं मित्रं वरुणम्' इस मन्त्र का अर्थ भी भ्रान्ति से बिगाड़ा है; क्योंकि उसने इस मन्त्र में विशेष्य और विशेषण को अच्छी तरह से न समझकर इन्द्र शब्द को तो विशेष्य करके वर्णन किया और मित्र आदि शब्द उसके विशेषण ठहराये हैं। यह उनका भ्रम है। यहाँ पर अग्नि विशेष्य है; क्योंकि विशेष्य का पुनः उच्चारण हो सकता है, विशेषण का एक बार ही होता है। यहाँ मन्त्र में अग्नि शब्द दो बार कहा गया है। इसे सायण न समझ सके।" स्वामी जी के इस लेख को स्वामी करपात्री जी अज्ञानजन्य मानते हैं और कहते हैं कि ये अपर्यनुयोज्यानुयोग नामक निग्रहस्थान में पतित हैं।

वस्तुतः करपात्री जी का यह कथन भ्रान्त तथा अज्ञानजनित है। रही उक्त निग्रहस्थान में फँसने की बात, इस विषय में श्रीमान् को पता ही नहीं है कि न्यायदर्शन में उक्त नाम का कोई निग्रहस्थान है ही नहीं। न्याय में 'पर्यनुयोज्योपेक्षण' नाम का तो निग्रहस्थान है। उसका लक्षण है कि निग्रहस्थान में फँसे हुए को फाँसने की उपेक्षा करना', अर्थात् 'तुम अमुक निग्रहस्थान में आ गये' यह कहकर फिर निग्रहण न करने में ही यह निग्रहस्थान होता है।

यद्यपि यह बताना मध्यस्थ का कार्य है, तथापि वादी को प्रतिवादिकार्यमति से बताना ही चाहिये। महान् आश्चर्य तो यह है कि इस लेखक ने निग्रहस्थान की नई संज्ञा भी बना दी। संज्ञा संज्ञा ही रहेगी, सर्वनाम नहीं हो सकती। अस्तु, आपका कहा निग्रहस्थान नहीं है, तथापि आप

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निरनुयोज्यानुयोगेन। तल्लक्षणं चेत्थम्—'अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः' इति। सम्प्रति तु भवानुभयतस्पाशरज्ज्वा बद्धः। भवतोऽनेकदर्शनादि-विषयाचार्याणां सेना भङ्गोत्तुङ्गतरङ्गोन्मादवशीकृतमतिरेतद्भ्रान्तलेखकाले क्वाऽशेत?

'अपर्यनुयोज्यानुयोग' नामकं निग्रहस्थानं न भवेन्नाम, परं दुर्जनतोषन्यायेनैव मन्तव्यं यत् स्वामिदयानन्दः सायणं मुधैवाक्षिपति यत् तन्मतमिन्द्र शब्दस्य विशेष्यत्वमयुक्तम् इति, तन्न, यास्काचार्येणाऽप्यग्नेर्विशेष्यत्वाभिकांक्षितत्वात्। यथा—'इममेवाग्निं महान्तमा-त्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति। इन्द्रं मित्रं वरुणमग्निं दिव्यं दिविजं सूर्यं गरुत्मन्तं गरणवन्तं रसहरणवन्तं सुपर्णं गुरुमात्मानं महान्तमात्मानं यमं मातरिश्वानं वदन्ति विप्राः।'

एवमिह अग्निशब्दो विशेष्यः, इन्द्रादिपदानि विशेषणानि। तत्र चायमग्निः परमात्म-वाचकः। अन्यत्राऽपि यथा—'अग्निर्वै सर्वेषां देवानामात्मा' (शत० १४। ३। २। ५), 'अग्निरेव ब्रह्म' (शत० १०।४।१।५), 'ब्रह्म वा अग्निः' (शत० २।५।४।८)।

निग्रहस्थान में गिरने की बात कह रहे हैं, इसलिये 'निरनुयोज्यानुयोग' नामक निग्रहस्थान में आप अब अवश्य आ फँसे हैं। जिसका लक्षण है—'निग्रहस्थान के न होने पर निग्रहस्थान में फँसने का अभियोग लगाना'। अब आप द्विमुखी फन्दे में स्वयम् आ फँसे हैं। बताइये, आपकी अनेक दर्शन आदि विषयों के आचार्यों की सेना की भङ्ग की उत्तुङ्ग तरङ्ग से उत्पन्न उन्माद से वशीकृत मति आपके द्वारा इस भ्रान्तिपूर्ण लेख लिखने के समय कहाँ सो रही थी? आपको उन्होंने भी सचेत नहीं किया।

दुर्जनतोषन्याय से 'अपर्यनुयोज्यानुयोग' नाम का कोई निग्रहस्थान नहीं भी हो, तब भी यह मान लिया जाय कि स्वामी दयानन्द पर यह दोष लगा रहे थे कि अग्नि को विशेष्य न मानकर इन्द्र का विशेषण मानना गलत है। इस पर यास्काचार्य के भाष्य को प्रमाणरूप में प्रस्तुत किया गया है कि अग्नि विशेष्य होना चाहिये। 'इममेव०' (निरु० ७। १८) अर्थात् इसी अग्नि को महान् आत्मा, परमात्मा, मेधावी लोग बहुत प्रकार से कहते हैं। जैसे इन्द्र (विद्युत्), मित्र (उद्जन वायु), वरुण (अम्लजन वायु), दिव्य (सूर्य), सुपर्ण (जीवात्मा), गरुत्मान् (परमात्मा), यम (मृत्यु) और मातरिश्वा (वायु)—ये आठ नाम अग्नि (अग्रणी) परमात्मा के हैं।

इस प्रकार अग्नि शब्द विशेष्य तथा इन्द्र, मित्र, वरुणादि विशेषण हैं। शतपथब्राह्मण में भी अग्नि को अनेकार्थक व परमात्मवाचक माना है—'अग्निर्वै सर्वेषां देवानामात्मा' (शत० १४। ३। २। ५), 'अग्निरेव ब्रह्म' (शत० १०। ४। १। ५), 'ब्रह्म वा अग्निः' (शत० २। ५। ४।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवं यथा अग्न्यादिपदार्थानामिन्द्रादीनि नामानि, तथैवैकपरमात्मनोऽग्न्यादयो नामानि सहस्रशः सन्ति। यदा 'सद्' शब्देनेह ब्रह्म वाच्यं तदाऽग्निशब्दो विशेषणमिति।

पृ० १६७३, पं० २—"प्रथमोपस्थितत्वात् प्रमाणसङ्गतत्वाच्च सायणेनेन्द्रपदमेव विशेष्यमुक्तम्। 'इन्द्रं मित्रम्' इत्यनुक्रमणीवचनात् सूर्योऽस्य मन्त्रस्य देवतेति सायणेन सूर्यपरोऽयं मन्त्रो व्याख्यातः। सूर्यो महानात्मा हिरण्यगर्भ एव, 'एकैव महानात्मा देवता स सूर्य इत्याचक्षते' इत्युक्तत्वात्। तथाहि—अमुमादित्यमैश्वर्यविशिष्टमिन्द्रं प्राहुः, तथा मित्रं प्रमीतेर्मरणात् त्रातारमहरभिमानिनं तन्नामकं देवं प्राहुः। पापस्य वारकत्वाद् वरुणं रात्र्यभिमानिनं देवमाहुः, तथाग्निमङ्गनादिगुणविशिष्टमेतन्नामकमाहुः। अश्मो अपि अयमेव दिवि भवो दिव्यः सुपर्णः सुपतनः। गरुत्मान् गरणवान् पक्षवान् वा। एतन्नामको यः पक्ष्यस्ति सोऽप्ययमेव।" इत्यादि यदुच्यते पारिजाते तत्सर्वं वेदगभीरभावानधिगमनादेव अबोध-विलसितम्।

समीक्षा—नैवास्ति कश्चित् शास्त्रीयो नियमो यद् यः प्रथममुपतिष्ठेत् स एव विशेष्यो भवति। अन्यच्च विशेष्यत्वे इतरमिन्द्रपदस्य न किमपि प्रमाणमुपनतमिहानेन। सूर्यो भवेन्नामा-

---

८)। इस प्रकार जैसे अग्नि आदि पदार्थों के इन्द्र आदि नाम हैं, उसी प्रकार एक परमात्मा के अग्नि आदि सहस्रों नाम हैं। और 'सत्' वस्तु ब्रह्म का अग्नि शब्द विशेषण भी हो सकता है।

पृ० १६७३, पं०२—"इन्द्र पद प्रथम उपस्थित है, अतः अन्य प्रमाणों का भी सहारा लेकर सायण ने यहाँ इन्द्र को विशेष्य माना है। अनुक्रमणी के अनुसार इस मन्त्र का देवता सूर्य है, अतः सायण ने इस मन्त्र की व्याख्या सूर्यपरक ही की है। यहाँ सूर्य महानात्मा हिरण्यगर्भ से अभिन्न है। श्रुति में इस सूर्य को महानात्मा कहा गया है। मन्त्र का अर्थ यह है कि इस आदित्य (सूर्य) को ही ऐश्वर्यविशिष्ट इन्द्र कहा जाता है [और इसी को दिन का अभिमानी देवता मित्र कहा जाता है]। (यह कोष्ठान्तर्गत वाक्य हिन्दीकार का निराधार कल्पित है।) इसको मित्र इसलिये कहते हैं कि यह देवता मृत्यु से जीवों की रक्षा करता है। इसी को पापों से निवृत्त करनेवाला देव वरुण कहा जाता है, जो कि रात्रि का अभिमानी देवता है। इसी को प्रकाशगुणवाला अग्नि भी कहा जाता है। यही आकाश में उत्पन्न होनेवाला, आकाश में अप्रतिहत विचरण करनेवाला सुपर्ण गरुड़ है, जो कि विषधर सर्पों को निगल जानेवाला और पक्षियों में श्रेष्ठ माना जाता है।" इत्यादि पारिजात का कथन वेद के गम्भीर भावों तक न पहुँचने के कारण अज्ञानविलसित है।

समीक्षा—कोई ऐसा शास्त्रीय नियम नहीं है कि मन्त्र या श्लोक में जो प्रथम पद उच्चरित हो, वह विशेष्य ही होगा। इन्द्र को विशेष्य बताने में आपने या सायण ने कोई प्रमाण भी प्रस्तुत नहीं किया है। अनुक्रमणी में सूर्य देवता हो सकता है, तो होवे। उससे भी यह कैसे जाना जा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नुक्रमण्यनुसारं देवता। तदैतत् कुतोऽधिगम्यते यदिन्द्रपदं विशेष्यमस्ति। यद्युच्येत इन्द्रपदस्य सूर्योऽर्थस्तदा अग्निपदस्याऽपि सूर्योऽर्थो भवितुमर्हेत् तव दृशाऽपि। यदुच्यते 'सूर्यो महानात्मा' तत्तु भवता कल्पितम्, नात्रायमर्थोऽभीष्टः।

सायणाचार्य आदित्यपरां सर्वामृचां व्याचष्टे, तदत्र हि न तत्पाण्डित्यम्। नहि खल्वयं मन्त्रागताख्यातत्रयस्य कारणं निध्यातवान्, अत एव सम्पूर्णामृचामेकवाक्यतामापादयत्। एकमग्निशब्दमङ्गनादिगुणविशिष्टमुक्त्वा, अपरं चाग्निशब्दमेवमेव मत्वा तोषमापेदे। एतस्येयमतितरां विचित्रा सङ्गतिः।

केचिदित्युपन्यस्य तत्पक्षे अग्निशब्द उद्देश्य इन्द्रादयश्च विधेया इत्याख्यातवान्। एतेन सायणाचार्यस्य तत्त्वानभिज्ञत्वमेव प्रतिभाति। श्री-सायणादर्शभूतो दुर्गोऽपि अपव्याख्यातवानेतामृचाम्। नेमौ ध्यातवन्तौ यद् यत्रेयमृचा 'इन्द्रं मित्रं वरुणम्' इति वर्तते, तत्र निरुक्ते प्रकरणमग्नेरेव। तदुदाहरण एवोद्धृता। तथाहि (निरु० ७। ४। १४, १७, १८) —'अग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामः'।

(क) ततो नु मध्यमः—(उत्तरे ज्योतिषी अग्नी उच्येते) 'अभिप्रवन्त समनेव योषा'।

सकता है कि इन्द्र पद विशेष्य है। यदि कदाचित् कहें कि इन्द्र पद का अर्थ सूर्य होता है, तो अग्नि पद का अर्थ आपकी दृष्टि से सूर्य हो सकता है। सूर्य को महान् आत्मा कहने का यहाँ कोई प्रसङ्ग नहीं। इससे इन्द्र की विशेष्यता कैसे सिद्ध होगी।

सायणाचार्य ने सम्पूर्ण ऋचा को आदित्यपरक घटा दिया है। इससे कोई विशिष्ट पाण्डित्य तो द्योतित नहीं होता। सायण ने यहाँ मन्त्रगत तीन-तीन आख्यातों (क्रियाओं) के होने पर तो मनन नहीं किया, इसीलिये उन्होंने सम्पूर्ण ऋचा की एकवाक्यता बना दी। जबकि तीन वाक्य बनते हैं। एक अग्नि शब्द को अङ्गनादिगुणविशिष्ट कहकर दूसरे अग्नि शब्द को मानकर वह सन्तुष्ट हो बैठे। इसकी यह विचित्र सङ्गति है।

पंक्ति ११ में ये 'केचित्' कहकर 'अग्नि ही सब देवताओं का प्रतिनिधि है' इस पक्ष में प्रथम अग्नि शब्द को उद्देश्य और द्वितीय अग्नि को विधेय कह रहे हैं। इस मत को उपन्यस्त करने में भी सायण की तत्त्वानभिज्ञता ही सिद्ध होती है। इस ऋचा का सायण के आदर्शभूत आचार्य दुर्ग ने भी व्याख्यान सही नहीं किया है। इन दोनों ने ही ध्यान नहीं दिया कि जहाँ पर यह ऋचा 'इन्द्र मित्रं वरुणम्०' निरुक्त में है, वहाँ अग्नि का ही प्रकरण है। उसके उदाहरण में ही उद्धृत है। जैसे निरुक्त ७। ४। १४,१७,१८— 'अग्नि पृथिवीस्थान तक है, उसकी व्याख्या प्रथम की जायेगी'।

(क) मध्यम अग्नि—विद्युत् और सूर्य ये उत्तर ज्योति हैं—'अभिप्रवन्त समनेव' इस मन्त्र

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्राग्निर्विद्युत्।

(ख) 'समुद्रादूर्मिर्मधुमाँ उदारत्' इत्यादित्यमुक्तं मन्यन्ते।

(ग) 'अग्निः सर्वा देवताः' (इति ब्राह्मणम्)।

एवं निरुक्तप्रकरणे अग्निशब्दस्यैवानेकानर्थानत्र वक्ति यास्काचार्यः। तत्पुष्ट्यै निदर्श्यते—'इन्द्रं मित्रं वरुणम्' इति।

एवं यास्कदृशा (१) 'इन्द्रं मित्रं वरुणम्' इति (उद्देश्यम्)। (२) 'अग्निमाहुः' इति (विधेयम्)। एष नियमोऽपि यत् 'उद्देश्यमनुक्त्वैव न विधेयमुदीरयेत्' इति।

इत्थं महर्षिदयानन्दस्य दृगेव मन्त्रार्थं साधीयां समपश्यत्, न पुनरन्यस्य। तदनु मन्त्रान्वय एषः—

(१) (विप्राः) इन्द्रं मित्रं वरुणम् अग्निमाहुः, अथो स दिव्यः सुपर्णो गरुत्मान् (तं वाग्निमाहुः)।

(२) विप्रा एकं सद् बहुधा वदन्ति।

(३) अग्निं यमं मातरिश्वानमाहुः।

में 'अग्नि' विद्युत् (मध्यम) वाची है। मन्त्रार्थ यथास्थान देखें।

(ख) 'समुद्रादूर्मिर्मधुमाँ०' आदि मन्त्र में अग्नि को आदित्य कहा है।

(ग) 'सर्व देवता अग्नि है' ऐसा ब्राह्मणग्रन्थ में है।

इस बात को और अधिक प्रमाणित करनेवाली 'इन्द्रं मित्रम्०' ऋचा है।

इस प्रकार अग्नि शब्द के निरुक्त में अनेक अर्थ किये गये हैं। उसकी पुष्टि में निम्न निदर्शन है—'इन्द्रं मित्रम्०' आदि।

इस प्रकार यास्क की दृष्टि से 'इन्द्रं मित्रं वरुणम्' ये उद्देश्य है और 'अग्निमाहुः' यह विधेय है। नियम भी यह है कि 'उद्देश्य को विना कहे विधेय का कथन न करें'।

इस प्रकार महर्षि दयानन्द की दृष्टि ने ही मन्त्रार्थ को ठीक-ठीक रूप में देखा, कोई अन्य वैसा न देख सका। उसके अनुरूप मन्त्रान्वय इस प्रकार है—

(१) (विप्र) अग्नि को इन्द्र, मित्र, वरुण कहते हैं। वह दिव्य, सुपर्ण और गरुत्मान् है।

(२) (विप्र) एक अग्नि को बहुत प्रकार से कहते हैं।

(३) अग्नि को यम और मातरिश्वा कहते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अस्मिन् मन्त्रे आख्यातपदत्रयनिवेशादन्वया अपि त्रयः। अत्रायं विशेषो यत् प्रथमोऽग्निशब्दो विधेयः, द्वितीयोऽग्निशब्द उद्देश्यः यमादयश्च विधेयाः।

इह निर्मलोक्तिरेषान्वर्था—

ऋषेर्नैरुक्तवेदार्थं करपात्रानुयायिनः।
अवगन्तुमशक्तास्ते ततो निन्दां प्रकुर्वते॥

पृ० १६७३, पं० १०—यदाहायम्—"सायणस्यानभिज्ञत्वकथनं च 'अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते' इत्युक्तिमेवानुसरति।" तत्तु महान् पक्षपातोऽसत्यमावरीतुमस्य। इह जिज्ञासूनुक्तमतिरिच्य सायणस्य वेदार्थानधिगमस्य किञ्चिन्निदर्श्यते—

(क) सायणो हि पूर्ववर्तिन आचार्यानुपेक्ष्य केवलयाज्ञिकप्रक्रियायामेव भाष्यं चकार तदपि नामापूर्णम्। गृह्यसूत्रविनियुक्तमन्त्राणां विषये तद्भाष्यं कतिपयस्थलानि मुक्त्वा न किमपि विशदीकरोति, स्मार्तप्रक्रियायामपि वेदमन्त्राणामभीष्टार्थत्वात्। केवलश्रौतयज्ञप्रक्रियामभिलक्ष्यैव व्याख्यातवानयम्। श्रौतप्रक्रियायामपि तद्भाष्यं साध्यकोटिगतामेव

इस मन्त्र में आख्यात के तीन पद हैं, इसलिये अन्वय भी तीन होंगे। इस में यह विशेषता होगी कि प्रथम अग्नि शब्द विधेय होगा और दूसरा अग्नि शब्द उद्देश्य होगा, यम आदि विधेय होंगे।

फलतः यहाँ यह निर्मलोक्ति अन्वर्थ है—

'निरुक्त के अनुसार ऋषि के वेदार्थ को करपात्री जी के अनुयायी समझ सकने में असमर्थ हैं, अतः वे निन्दा करने पर तुले हुए हैं।'

पृ० १६७३, पं० १०—"स्वामी दयानन्द द्वारा सायण की वेदार्थ के सही-सही समझने में अनभिज्ञता बताना' ऐसा ही है जैसे उस स्थान तक न पहुँच कर निन्दा करने में प्रवृत्तिमात्र है।" करपात्री जी की यह उक्ति तो उन पर ही घटित है, क्योंकि वे महर्षि के गम्भीर अर्थों को समझने की क्षमता नहीं रखते। यहाँ हम जिज्ञासुओं के समक्ष उक्त कथन के अतिरिक्त भी सायण के वेद को न समझने की क्षमता का उदाहरण प्रस्तुत करते हैं। यथा—

(क) सायणाचार्य ने पूर्ववर्ती आचार्यों की उपेक्षा करके केवल याज्ञिकं प्रक्रिया में ही भाष्य किया है, वह भी अधूरा। गृह्यसूत्र के विनियुक्त मंत्रों के विषय में सायण का भाष्य कतिपय स्थलों को छोड़कर और कुछ भी स्पष्ट नहीं कर पाता, क्योंकि वेदमंत्रों की अभीष्टता तो स्मार्तप्रक्रिया में भी है। केवल श्रौतयज्ञप्रक्रिया को अभिलक्षित करके ही इन्होंने व्याख्या की है। श्रौतप्रक्रिया में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रामाणिकतामवगाहते। फलतो याज्ञिकावधारणाग्रस्तमतित्वादसौ वेदे पठितानां मनुष्य-जन-नर-मर्तादिशब्दानां यौगिकनिर्वचनाधारमपहाय वाच्यवाचकसम्बन्धस्य सामान्यनियमावहेलनां विधाय यजमानार्थमेव सर्वत्राग्रहीत्। यथा—

'मानुषेषु यजमानेषु' (ऋ० १।६०।४) 'जनान् यजमानान्' (ऋ० १।१४०।१२), 'जनानां यजमानानाम्' (ऋ० ५।१६।२), 'नरः कर्मणां नेतारोऽध्वर्यादयः' (ऋ० ३।८।६) इत्यादिस्थलेषु मनुष्यादीनां वाच्योऽर्थो यजमान एवेत्यत्र किं नियामकम्? यदा मननशीलो मानुष उपदेशकोऽध्यापको वैज्ञानिकः कश्चिदपि भवितुमर्हति न केवलं द्रव्ययज्ञकर्ता यजमान एव। 'जन' शब्देनाऽपि शौर्य-धनुर्वेदकुशलः, प्राण; राजसैनिक आदयोऽप्यर्था ग्रहीतुं शक्यन्ते। एवमेव 'नर' शब्देन यथाप्रकरणं सुनीतिमान्, सभाध्यक्षः, सेनापतिः, वीरपुरुषः, सज्जनः, नायक आदयोऽप्यर्था ग्रहीतुं शक्येरन्। एवमन्यदप्यूह्यम्।

(ख) निम्नमन्त्रे अग्निशब्देन रूढिग्रस्तमतिना सायणाचार्येण बलाद् भौतिकोऽग्निर्गृहीतः। यदा इमानि विशेषणानि, यथा—प्रमतिः=प्रकृष्टमतिमान् त्वं पिता यस्य वयं सन्तानाः, एवं वीरव्रतपादयः शब्दा न भौतिकाग्नौ घटन्ते, इमानि विशेषणानि तु चेतन एव

भी उनका भाष्य साध्यकोटि में ही है। फलतः याज्ञिक अवधारणा से ग्रस्तमति होने के कारण सायणाचार्य ने वेद में पढ़े हुए मनुष्य, जन, नर, मर्त्ता आदि शब्दों के यौगिक निर्वचन के आधार का परित्याग कर, वाच्यवाचक सम्बन्ध के सामान्य नियम की अवहेलना करके मनुष्यादि 'यजमान' का अर्थ ही सर्वत्र ग्रहण कर अपनी अदूरदर्शिता प्रकट कर दी है। जैसे—

'मनुष्यों में यजमानों में' (ऋ० १।६०।४), 'जनों को यजमानों को' (ऋ० १।१४०।१२), 'जनों का यजमानों का' (ऋ० ५।१६।२), 'नर अर्थात् कर्मों के नेता अध्वर्यु आदि' (ऋ० ३।८।६) इत्यादि स्थलों में मनुष्य आदि शब्दों से यजमान अर्थ ही लिया जायेगा, इसमें नियामक क्या है? मननशील मानुष क्या, उपदेशक, अध्यापक, वैज्ञानिक—कोई भी अर्थ हो सकता है, केवल यज्ञकर्ता यजमान ही नहीं। 'जन' शब्द से भी शौर्य और धनुर्विद्या में कुशल, प्राण, राजा, सेनापति, सैनिक कोई भी हो सकता है। इसी प्रकार 'नर' शब्द से यथाप्रकरण सुनीतिमान् सभाध्यक्ष, सेनापति वीर पुरुष, सज्जन, नायक आदि अर्थ गृहीत किये जा सकते हैं। इसी प्रकार और भी समझिये।

(ख) निम्न मन्त्र में अग्नि शब्द से रूढिगत मतिवाले सायण ने बलात् भौतिक अग्नि को ग्रहण किया है। जबकि ये मन्त्रगत विशेषण चेतन में ही घटित हो सकते हैं। जैसे—उत्तमबुद्धिवाले, तुम हमारे पिता हो और हम तुम्हारी सन्तान हैं। इसी प्रकार वीर, व्रतपा आदि

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

घटितुं शक्यन्ते। यथा आध्यात्मिकपक्षे ईश्वरेऽपि तथान्यत्र सभाध्यक्षे मन्त्रार्थः, यथा स्वा० द० भाष्यम्—

मन्त्रः—

'त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम्।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य॥'

(ऋ० १। ३१। १०)

अर्थात् हे दभितुं हिंसितुमयोग्य उत्तमकर्मयुक्तयोग्यरचनाकर्मकर्तः (अग्ने) सभाध्यक्ष! प्रकृष्टमतिस्त्वमस्माकं पालकोऽसि, त्वमायुःप्रदोऽसि, तव कृपया वयं ज्ञानवन्तः सन्ताना यथा भवेम तथा कुरु। यथा शतिनो सहस्रिणो विद्वांसो मनुष्यास्त्वां सुवीरं व्रतपामासाद्य रायो धनानि संयन्ति तथा वयमपि धनानि समिमः।

एवं वेदार्थविषयमुत्पादयितुं सायणभाष्यं प्राथम्यं भजते।

शब्द भी भौतिक अग्नि में घटित नहीं हो सकते। ये विशेषण तो चेतन में ही घटित हो सकते हैं। जैसे आध्यात्मिक पक्ष में मन्त्र का अर्थ होगा—

'हे परमेश्वर! तुम हमारे पिता हो, हम तुम्हारी सन्तान हैं, आप आयु बढ़ानेवाले, सुख उत्पन्न करनेवाले हैं। सैंकड़ों और हजारों प्रशंसित पदार्थविद्या व कर्मयुक्त विद्वान्, सत्यपालक और उत्तम वीर पुरुषोंवाले आपको प्राप्त कर उत्तम युक्तिरूप धन को प्राप्त करते हैं।'

इस प्रकार यौगिक प्रकिया से हटकर केवल यज्ञपरक व्याख्या में सभी मन्त्रों को प्रयुक्त करनेवाले भाष्यकारों में सायणाचार्य का प्रथम स्थान है।

पृ० १६७४, पं० ११—"अग्नि शब्द को विशेष्य मानकर इन्द्र प्रभृति विशेषणों के साथ उस के सम्बन्ध की जो बात कही, वह भी गलत है, क्योंकि अग्नि शब्द यदि मुख्य परमात्मा का वाचक माना जाता है, तो वहाँ विशेषण के रूप में सत् शब्द की कोई आवश्यकता नहीं है।"

यह पारिजातकर्ता का आक्षेप ठीक नहीं, क्योंकि उन्होंने प्रकरण का ठीक-ठीक मनन नहीं किया है। ऋषि ने स्वयं लिखा है कि 'यहाँ अग्नि और इन्द्रादि नाम एक सद्वस्तु ब्रह्म ही के हैं, क्योंकि इन्द्रादि अग्नि के विशेषण और अग्नि आदि ब्रह्म के नाम हैं।' अर्थात् 'सत्' शब्द से जब ब्रह्म वाच्य होगा तो उसका अग्नि विशेषण बन जायेगा। यह प्रकरण का निष्कर्ष है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६७४, पं० ५—यच्चात्राह—"यास्कोऽपीममेवाग्निं महान्तमात्मानमिति हिरण्यगर्भमेवाग्निमाह। न परमात्मानम्। महान् महत्तत्त्वं हिरण्यगर्भ एव—'एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम्॥ (मनु० १२। १२३)" इति, तदप्यविचारितचारु, मनुनोत्तरभागेनाध्यात्मिकपक्षे अग्निशब्देनेश्वरार्थग्रहणात्।

न च महान्तमात्मानमित्यनेन भौतिकाग्नेरेव ग्रहणं भविष्यतीति वाच्यम्, तत्र 'महानात्मा' शब्देन परमात्मनोऽपि ग्रहणात्। तथाहि निरुक्तपरिशिष्टे—अथैतं महान्तमात्मानमेष ऋग्गणः प्रवदति—'इन्द्रं मित्रं वरुणमग्निमाहुः' इति। अथैष महानात्माऽऽत्मजिज्ञासयाऽऽत्मानं प्रोवाच—'अग्निरस्मि जन्मना जातवेदाः।' 'अहमस्मि प्रथमजा' इत्येताभ्याम्।

'अग्निरस्मि०' इत्यृचो भाष्ये सायणाचार्योऽप्याह—'परब्रह्मत्वमुक्तं भवति' (आरण्यसंहिता)।

पृ० १६७४, पं० ५—"यास्काचार्य भी इस अग्नि की सर्वात्मकता हिरण्यगर्भ के रूप में ही मानते हैं, परमात्मा के रूप में नहीं। महान् अर्थात् महत्तत्त्व का प्रतिनिधि हिरण्यगर्भ ही है। इसी को लोग अग्नि, मनु और प्रजापति कहते हैं।"

पारिजातकार का उक्त लेख छलपूर्ण है। प्रथम तो यहाँ यास्क ने हिरण्यगर्भ रूप में अग्नि को मानने की बात ही नहीं छेड़ी। आप 'छेड़ी' समझते हैं तो उद्धरण देना चाहिये। दूसरे वेदमंत्रों के आध्यात्मिक अर्थ करने में यास्क सर्वथा सहमत हैं, अतः उपासना-प्रकरण में इसका अर्थ अर्थात् अग्नि का अर्थ परमात्मा ही होगा। सृष्टि-रचना-प्रकरण में महान् का महत्तत्त्व अर्थ होगा।

मनु के श्लोक का उत्तरार्ध तो स्पष्ट ही 'अपरे ब्रह्म शाश्वतम्' की बात कह रहा है। फिर अग्नि शब्द परमात्मा का वाचक न बताना प्रकाश को अन्धकार कहना ही है।

'महान्तम् आत्मानम्' इससे भौतिकाग्नि का ही ग्रहण होगा, यह कथन ठीक नहीं है, क्योंकि परमात्मा का भी ग्रहण किया जाता है। जैसाकि निरुक्त के परिशिष्ट में कहा है—और इसी महान् आत्मा, जिसका वर्णन 'चित्रं देवानाम्' में किया है, परमेश्वर का प्रतिपादन यह चार मन्त्रों का ऋक्समूह कर रहा है, जिसमें प्रथम मन्त्र 'इन्द्रं मित्रम्०' आदि है और जिस महान् आत्मा परमेश्वर ने जिज्ञासा के कारण उस जीवात्मा को अपना स्वरूप 'अग्निरस्मि' तथा 'अहमस्मि' इन दो ऋचाओं से बतलाया है।

'जादू वह जो सिर पर चढ़कर बोले।' अतः 'अग्निरस्मि' इस ऋचा के भाष्य में सायणाचार्य ने भी 'परब्रह्मत्व कहा जाता है' ऐसा कहा है। इसी प्रकार शतपथादि में अनेक प्रकरण हैं, जैसे कि—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ब्राह्मणमपि चात्र—'ब्रह्म ह्यग्निः' (शत० १।४।२।११), 'आत्मा वाग्निः' (शत० १।२।३।२), अग्निर्ब्रह्म' (शत० ३।२।२।७)।

कल्पोऽपि भवति तथा—

'इन्द्रादिशब्दा गुणयोगतो वा व्युत्पत्तितो वापि परेशमाहुः।
विप्रास्तदेकं बहुधा वदन्ति प्राज्ञास्तु नानापि सदेकमाहुः॥'

उपनिषद्यपि—'प्राणो ह्यग्निः परमात्मा' (मैत्र्युपनि० ६।१९)।

यच्च—'आग्नेयमष्टाकपालं निर्वपेत्', 'अग्निमानय', 'अग्निं प्रणय' इत्यादिप्रमाणैः पार्थिवज्योतिषः सम्बन्धं ब्रूते, तत्र को नाम यज्ञविषये भौतिकाग्नेरितरथा परेशमग्निं साधयति? एतद् 'अवयवविपर्यासवचनमप्राप्तकालं' नाम निग्रहस्थानमस्य।

यच्च ब्रूते—'यस्मै हविर्निरूप्यते, अयमेव सोऽग्निरिति' इत्यत्र 'न त्वद्रीत्या काचिदग्निर्देवता स्वीकृता, न वा तदर्थं हविर्निरूप्यते' इति वचः प्रपञ्चोऽपि अपटुपाठक-प्रवञ्चनमेव। यतो हि यत्राध्यात्मिकार्थसम्भवस्तत्रैव सङ्गतिः। इहापि मन्त्रे 'अदितिर्द्यौः' इतिवद् यास्कदृशाऽध्यात्मार्थः सम्भवति। भौतिकाग्नये हविर्निरूप्यते परमाध्यात्मिकार्थेऽपि यस्मै अग्नये परेशाय हविर्निरूप्यते। तथा—त्वादर्शभूतोव्वटेन 'कस्मै देवाय प्रजापतये हविर्दद्म' इत्यलिख्यत, तद् हविर्भक्तेर्भावनाया वोपलक्षकमस्ति।

'अग्नि, ब्रह्म (परमेश्वर) का वाचक है।' 'जिसको हवि अर्पित की जाती है, यह वही अग्नि है।' 'अग्नि लाओ।' आदि प्रमाणों से पार्थिव अग्नि का सम्बन्ध कहा जाता है। तो भाई! ये उदाहरण देना निष्फल है; क्योंकि यहाँ पर कोई ऐसा नहीं कहता कि इस यज्ञविषय में आप भौतिक अग्नि का ग्रहण न करिये और न कोई कह रहा है कि यहाँ अग्नि से परमेश्वर का ग्रहण है। यह तो 'अवयवविपर्यासवचन अप्राप्तकाल' निग्रहस्थान है।

यह कहना कि 'स्वामी दयानन्द के द्वारा कोई अग्नि देवता नहीं बताया गया, जिसके लिये हवि दी जाती है' केवल वचन-प्रपञ्च है, जो अपटु (मूर्ख) पाठकों को ठग सकता है; क्योंकि जहाँ पर आध्यात्मिक अर्थ सम्भव है, वहीं पर उस की सङ्गति की जाती है। यहाँ पर भी मन्त्र में 'अदितिर्द्यौः' में जैसे यास्क ने आध्यात्मिक अर्थ घटाया, वह सम्भव है। भौतिकाग्नि में तो हवि दी ही जाती है, परन्तु आध्यात्मिक पक्ष में परमेश्वर रूप अग्नि के लिये भावनारूपी हवि अर्पित की जाती है। आपके आराध्य उव्वट ने भी 'कस्मै देवाय हविषा' के अर्थ में प्रजापति के लिये भक्ति और भावना की हवि अर्पित करने की व्याख्या की है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'न स्वामिना अग्निर्देवता स्वीकृता' इति वचोऽपि विचक्षणचक्षुषोः प्रत्यक्षं धूलिक्षेप एव, 'अग्निर्देवता वातो देवता' इति ऋषिग्रन्थे प्रमाणत्वेनोपन्यासात्। परमेतत्तथ्यं नोपेक्षणीयं यन्नायमग्निर्देवता चेतना।

पृ० १६७४, पं० ११—यदाह—"विशेष्योऽग्निशब्दो विशेषणानां सङ्गेऽन्वितो भूत्वा पुनः स एव सद्वस्तुब्रह्मविशेषणं भवति, इति, तत्तुच्छम्, अग्निशब्दस्य मुख्यपरमात्मपरत्वे सद्विशेषणत्वानुपपत्तेः।"

इति पारिजातकृत आक्षेपः प्रकरणामननादेव जातः। 'सत्' शब्देन ब्रह्मणो वाच्यत्वे अग्निर्विशेषणं भवतीति विवेकः।

पृ० १६७४, पं० १३—आ०—"विशेष्यं प्रति विशेषणं पुनः पुनरन्वितं भवति न चैवं विशेषणम्। यत्र शतं सहस्रं वैकस्य विशेष्यस्य विशेषणानि स्युस्तत्र विशेष्यस्य पुनः पुनरुच्चारणं विशेषणस्यैकवारमेव। तथैवात्र मन्त्रे परमेश्वरेणाग्निशब्दो द्विरुच्चारितो विशेषणविशेष्याभिप्रायेणैव।" इति भूमिकावचनेऽयमाक्षिप्यते, यथा—

"तदपि न विचारचारु, विप्रतिषिद्धत्वात्। तथाहि नहि क्वचिदपि विशेष्यस्य मूलवचने प्रतिविशेषणमुच्चारणं दृश्यते। व्याख्यातारस्तु बोधसौकर्य्याय क्वचिद् विशेष्यं प्रति विशेषणमुच्चारयन्ति।" इति।

समा०—महाशय! किञ्चित्तु बुद्धेरुपयोगो विधेलिमः। महर्षिणोक्तम्—'विशेष्यं प्रति विशेषणं पुनः पुनरन्वितं भवति'। भवान् ब्रवीतु किं न भवति? यदाऽनिवार्यत्वेनान्वयस्तत्र

'स्वामी दयानन्द ने स्वीकृत नहीं की है।' यह वचन भी विचक्षण पुरुषों के चक्षुओं में प्रत्यक्ष धूलिक्षेप ही है। 'अग्निर्देवता०' मन्त्र ऋषि ने अपने ग्रन्थ में प्रमाणरूप से उद्धृत किया है। परन्तु यहाँ भी इस तथ्य की उपेक्षा नहीं करनी चाहिये कि यह अग्नि देवता जड़ है।

पृ० १६७४, पं० १३—आक्षेप—"विशेष्य के प्रति विशेषण के वार-वार अन्वित होने की जो बात कही है, वह विचार करने पर जँचती नहीं; क्योंकि यह बात परस्पर विरुद्ध है। किसी भी मूल वचन में कहीं भी विशेष्य का वार-वार उच्चारण नहीं किया जाता, कुछ व्याख्याकार ही अर्थ को सरलता से समझाने के लिये प्रत्येक विशेषण के साथ विशेष्य को जोड़ देते हैं, इत्यादि।"

समाधान—महाशय! कुछ तो बुद्धि से काम लिया होता। महर्षि ने प्रत्येक विशेषण के साथ विशेष्य के अन्वित होने की बात कही है। आप बताइये, क्या अन्वित नहीं होता है? प्रत्येक वाक्यरचना-विशेषज्ञ इस अन्वय को स्वीकार करेगा। जब अनिवार्यत्वेन अन्वित होता है, तो विशेषण उच्चारण करते ही विशेष्य की आकांक्षा जागृत होती है, तब शब्द का मन में ही सही

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विशेषणस्य तदा साकाङ्क्षत्वे मानसिकं वाचिकं वोच्चारणं विनाऽन्वयः कथं सम्भवेत्? खण्डान्वये तु 'कीदृशमग्निम्? इन्द्रम् ऐश्वर्यवन्तम्, पुनः कीदृशमग्निम्? मित्रम्, पुनः कथम्भूतमग्निम्? वरुणम्' इत्यादिप्रकारेण पौनःपुन्येनोच्चार्यत एव। नार्थविमर्शः पुनरुच्चारणं विना सम्भवति। उच्चारणशब्देन भवताऽपि मानसिकमुच्चारणमनुमोद्यते, अन्यथा 'दृश्यते' इति स्थाने ताल्वाद्यभिघातजे शब्दे तु 'श्रूयते' इति वक्तव्यमासीत्।

'तथैव परमेश्वरेणाऽग्निशब्दो द्विरुच्चारितः' इत्यनेनाऽपि ताल्वाद्यभिघातज-शब्दातिरिक्त एव शब्दो बोध्यते, तस्याशरीरत्वात्।

ननु लोके—

'वागर्थाविव सम्पृक्तौ, वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥'

इत्याद्युदाहरणेषु विशेष्यमेकवारमेवोच्चार्यते लिख्यते वा, पुनः 'इन्द्रं मित्रम्०' इति मन्त्रे त्वग्निशब्दो द्विर्लिखितः, किं कारणमिति चेन्न, उक्तश्लोके 'वन्दे' इति एकैव क्रिया, अतः 'पार्वतीपरमेश्वरौ' इति विशेष्यं सकृदुक्तम्। कथम्भूताविमौ 'जगतः पितरौ', पुनः कथम्भूतौ

यदि वाणी से न भी करें, तो अन्वित का उच्चारण हो जाना सहज है। खण्डान्वय में 'कैसे अग्नि को, इन्द्रम्, पुनः कीदृशम्, मित्रम्' आदि ध्वनि से उच्चारित करने में होते ही हैं। अर्थ-विमर्श विना मानसिक अर्थोच्चारण के सर्वथा असम्भव है। उच्चारण शब्द से मानसिक उच्चारण आपको भी अभीष्ट है, अत एव आपने 'दृश्यते' का प्रयोग किया है, अन्यथा 'श्रूयते' का प्रयोग करते (यथा पृष्ठ १६७४ की अन्तिम पंक्ति में 'प्रतिविशेषणमुच्चारणं दृश्यते' प्रयोग किया है)।

इसीलिये परमेश्वर ने इस मन्त्र में (उक्त भावव्यञ्जनार्थ व शिक्षणार्थ भी) अग्नि शब्द का द्विरुच्चारण किया है। ऋषि के 'द्विरुच्चारितो भवति' वाक्य से भी ध्वनित है कि ताल्वादि-अभिघातज ही शब्द नहीं होता, अपितु मानसिक आदि भी शब्दोच्चारण होता है, जो ऋषियों के हृदय में प्रभु ने दिया था।

शङ्का—लोक में 'वागर्थाविव सम्पृक्तौ०' इत्यादि उदाहरणों में तो विशेष्य एक वार ही उच्चारित है, फिर 'इन्द्रं मित्रम्०' में अग्नि शब्द द्विरुच्चारित क्यों है?

समाधान—उक्त श्लोक में तत्सम्बन्धित क्रिया एक है, अतः एक वार विशेष्य 'पार्वती-परमेश्वरौ' कह दिया और ये पार्वती परमेश्वर कैसे हैं? तो उत्तर होगा—जगत् के पिता हैं। पुनः

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'वागर्थाविव सम्पृक्तौ' इति प्रतिविशेषणं विशेष्यमन्वितं भविष्यति। उक्तमन्त्रे क्रियात्रयत्वेनेकवारोच्चारणं कृतम्।

पृ० १६७५, पं० १—यदुच्यते—"द्वा सुपर्णा सयुजा सखाया०' इत्यत्र कथमेकवारं 'सुपर्णा' इति ? सदग्निशब्दयोरुभयोरपि परमात्मवाचकयोर्विशेष्यविशेषणभावानुपपत्तेः। नहि घटः कुम्भ इत्यत्र विशेषणविशेष्यभावः।" इदमपि एतस्य शब्दशक्तिवाक्यप्रयोगानभिज्ञानमेव। नहि सम्भवेद् रूढो रूढशब्दस्य विशेषणं विशेष्यं वा। परं यौगिकस्य योगरूढस्य वा तु असौ भावः (विशेषणविशेष्यभावः) सम्भवत्येव। यथा—

(क) 'नमामि तं शङ्करं चन्द्रशेखरम्।' अत्र शङ्करश्चन्द्रशेखरश्चोभावपि शिववाचकौ परं पूर्वस्य पूर्णतया यौगिकार्थे शं करोतीत्यर्थे विशेषणे 'चन्द्रशेखर' इति विशेष्यम्।

ये कैसे हैं ? उत्तर—वाणी और अर्थ के समान सम्पृक्त हैं। इस प्रकार प्रति विशेषण के साथ स्वयं या अपने प्रतिनिधिभूत सर्वनाम के द्वारा अन्वित होंगे। उक्त मन्त्र में तीन क्रियाएँ साकांक्ष हैं, अतः अनेक वार अग्नि शब्द पढ़ा गया।

पृ० १६७५, पं० १—आपका प्रश्न है कि 'द्वा सुपर्णा सयुजा सखाया०' में सुपर्ण विशेष्य अनेक वार क्यों नहीं पढ़ा ? उसका समाधान है कि 'परिषस्वजाते' क्रिया प्रथम है, उसमें यह विशेष्य अन्वित है। अत्ति का कर्ता 'अन्य' है, उसी प्रकार आगे भी। परन्तु यहाँ पर भी द्वौ, सयुजौ, सखायौ—इन तीन विशेषणों के प्रत्येक के साथ 'सुपर्णौ' अन्वित (उच्चारित) अवश्य रहेगा। इसमें कोई अपवाद नहीं।

आक्षेप—'सद्' और 'अग्नि' ये दोनों ही शब्द परमात्मा के वाचक हैं, तो इनका परस्पर विशेष्य-विशेषण भाव कैसे बन सकेगा ? घट और कुम्भ शब्द का परस्पर विशेषण विशेष्य भाव नहीं हो सकता। दोनों सद् और अग्नि प्रधान होने पर विशेष्य-विशेषण नहीं हो सकते। इस प्रकार 'अग्नि शब्द यहाँ ब्रह्म का वाचक है' यह कहना अशुद्ध है।

समाधान—उक्त शङ्काओं से स्पष्ट है कि यह व्यक्ति शब्दशास्त्र तथा उस की शक्ति का ज्ञान नहीं रखता और वाक्यरचना-विज्ञान से भी अनभिज्ञ है। शब्दसंज्ञा अन्य रूढ शब्दसंज्ञा का विशेषण और विशेष्य नहीं हो सकता। परन्तु यौगिक बने व योगरूढ शब्दों का तो विशेष्य विशेषण भाव घटित हो ही सकता है। घट और कुम्भ दोनों ही लौकिक रूढ संज्ञा व्युत्पत्ति पक्ष में भी रूढता ही इनकी मुख्य हो गयी है। उदाहरण में देखिये, जैसे—

(क) 'मैं चन्द्रशेखर शङ्कर को प्रणाम करता हूँ' यहाँ प्रथम विशेषण व्युत्पत्तिलभ्यार्थ और दूसरा शङ्कर रूढ संज्ञा है। परन्तु 'मैं शङ्कर अर्थात् कल्याण करनेवाले चन्द्रशेखर को प्रणाम करता हूँ' यहाँ पर शङ्कर विशेषण और चन्द्रशेखर विशेष्य है। वैसे उक्त दोनों ही शिववाचक हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(ख) 'तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(कुमा० स० ५।१)

इत्यत्र 'मनोभवं दहता, पिनाकिना' द्वयोरप्यर्थः 'शिवेन' इति, तथा 'सती, पार्वती' इत्युभयोरप्यर्थः 'पार्वती' इति चास्ति। एवमग्रेऽप्यूहनीयम्। परं यौगिकेन विशेषणेन विशेष्येण च विशेषशब्दार्थ एव ध्वन्यते।

तथैव यदा अग्निर्विशेषणं सदिति च विशेष्यं तदा ज्ञानादिप्रकाशकं ब्रह्मेत्यर्थः, यदा च सदिति विशेषणमग्निश्च विशेष्यं तदा त्रिकालाबाधितसत्तात्मकोऽग्निः परमात्मेत्यर्थो निष्पीडितः स्यादिति विवेकः।

इहाधस्तननिर्मलोक्तिः सम्यग् घटते—

यत् कृत्रिमं च पाटलं पुष्पं विनिर्ममे,
भ्रान्त्योपयन्ति वास्तवं मत्वा मधुव्रताः।

(ख) 'उसी प्रकार सामने मनोभव कामदेव को भस्म करते हुए पिनाकी शङ्कर ने सती को भग्नमनोरथ अर्थात् निराश कर दिया। तो पार्वती ने अपने रूप की निन्दा की, क्योंकि सौन्दर्य तो वास्तविक वही है, जो अपने प्रिय में सौभाग्य फलवाला होवे'।

इस कुमारसम्भव (५।१) के श्लोक में सती और पार्वती यौगिकरूढ और रुढ भी हैं, परन्तु सती पार्वती में प्रथम विशेषण भी हो सकता है। इसी प्रकार 'पिनाकी शिव' में प्रथम विशेषण भी हो सकता है। तथा 'मनोभव को दहन करनेवाले' यह शत्रन्त प्रयोग होते हुए भी केवल शङ्कर का ही वाचक हो सकता था; परन्तु विशेषण बनने से इसमें पुनरुक्ति दोष नहीं आया।

उसी प्रकार 'अग्नि' जब विशेषणरूप में और 'सत्' विशेष्यरूप में रक्खा जावेगा तो अग्नि ब्रह्मवाचक न होकर ज्ञानादिप्रकाशक अर्थ देगा और सत् का वाच्य ब्रह्म होगा। यह 'सत्' विशेष्य ही होगा। और जब 'अस्तीति सत्' सत्तामात्र का द्योतक होगा, तब इसका अर्थ होगा — तीनों कालों में होनेवाला, और अग्नि शब्द परमात्मा का वाचक विशेष्य होगा। तब 'सदग्निः' का अर्थ त्रिकालाऽबाधित सत्तात्मक परमात्मा होगा। इस प्रकार महर्षि का प्रतिपाद्य निर्भ्रान्त और तर्कानुगत है।

यहाँ पर अधस्तन निर्मलोक्ति यथार्थ घटित होती है—

'जो यह गुलाब का फूल बनावटी बनाया है, प्रारम्भ में भौंरे इसे वास्तविक मानकर भ्रान्ति से इसपर मँडरा रहे हैं; परन्तु दीर्घकाल की अनुभूति के अनन्तर वे जान लेंगे कि यह मिथ्या है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दीर्घानुभूत्यनन्तरं ज्ञास्यन्ति ते मृषा,
आक्षेपणं तथा प्रसिद्धमस्ति 'पात्रिणः' ॥

पृ० १६७५, अनु० २—"सर्वैरपि परमेश्वर एव हूयते। तथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति, यद्वा यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितम्' इत्युक्तम्, इदमपि पूर्वापरविरुद्धम्। "सर्वैर्नामभिः परमेश्वर एव हूयते चेत् पुनस्तेन होमसाधकाहवनीयरूपेणावस्थितो भौतिकोऽग्निः किमर्थो गृहीतः ?" इति भूमिकाक्षेपः सायणभाष्ये।

तत्र पारिजातकृत् प्रत्याह—"तदपि तदीयतात्पर्यानभिज्ञानमूलकम्, अग्निशब्दस्य पर्यवसानदृष्ट्या परमेश्वरत्वेऽप्यग्निशब्दस्य मुख्योऽर्थः पार्थिवोऽग्निरेव।"

परं विवेचका विचिन्वन्तु स्वयं यद् ऋषिदयानन्दस्य एष आक्षेप एवेत्यवधारणे वर्तते अर्थात् 'परमेश्वर एव हूयते' तस्य इत्यर्थः। तदा कथं यज्ञार्थं भौतिकोऽयमग्निर्गृहीतः ? अन्यथा 'अप्येव' शब्दयोरन्योन्यस्थानप्रयोगमकरिष्यच्चेत् सम्यगभविष्यत्, यथा 'सर्वैरेव नामभिः परमेश्वरोऽपि हूयते' इति।

उसी प्रकार श्री करपात्री जी का यह आरोपग्रन्थ (वेदार्थपारिजात) मिथ्या सिद्ध हो गया।'

पृ० १६७५, अनु०१— "स्वामी दयानन्द ने लिखा है कि—'ऐसे सायणाचार्य ने और भी बहुत से मन्त्रों की व्याख्या में शब्दों के अर्थ उलटे किये हैं', तथा उन्होंने—'सब पुरुषों से परमेश्वर ही पुकारा जाता है, जैसे राजा का पुरोहित राजा के हित का ही काम सिद्ध करता है। अथवा जो अग्नि यज्ञ के सम्बन्धी पूर्व भाग में (आहवनीय के रूप में) हवन करने के लिये स्थित है' ऐसा कहा है। यह सायणाचार्य का कथन अयोग्य और पूर्वापरविरोधी होकर आगे पीछे के सम्बन्ध को तोड़ता है, क्योंकि जब सब नामों से परमेश्वर का ही ग्रहण करते हैं, तो फिर जिस भौतिक अग्नि में हवन करते हैं, उसको किसलिये ग्रहण किया है ?" यह आक्षेप सायणभाष्य पर है।

इसका उत्तर पारिजातकार दे रहा है कि—"स्वामी दयानन्द ने सायण का तात्पर्य नहीं समझा।" आगे करपात्री कहते हैं कि —"सारे देवताओं का पर्यवसान प्राण में और प्राण का परमेश्वर में पर्यवसान होता है। परमेश्वर से सब देवता अभिन्न हैं।.....अग्नि शब्द का मुख्य अर्थ भौतिक अग्नि ही है।"

इस पर विवेचक विचार करें कि इससे यह कहाँ सिद्ध हुआ कि परमेश्वर का ग्रहण नहीं होगा। अरे भाई ! ऋषि का तो सीधा आक्षेप 'परमेश्वर एव' इस वाक्य के 'एव' अर्थात् 'ही' पर ही है। तब यज्ञाग्नि का ग्रहण सायण के कथनानुसार नहीं होना चाहिये। अन्यथा सायण का यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सम्प्रति पर्यवसानदृष्ट्या परमेश्वरेऽपि अग्निशब्दार्थं स्वयमेव मनुते। यच्च महर्षिणा पूर्वं प्रत्यपादि यत् 'परमेश्वरस्य नात्यन्तं त्यागो भवति' इति, तदसूयया व्यरौत्सीदयम्। इयं कीदृशी पौर्वापर्यविस्मृतिशीला मतिरेतस्य ? तात्पर्यानधिगतिस्त्वेतस्यैव, नहि शब्दं पठितं कदापि क्वचिदपि विरुणद्धि तात्पर्यम्। अयं सम्प्रति आक्षेपस्य उत्तरस्याप्रतिपत्तौ 'अप्रतिभा' नामकनिग्रहस्थाने निगडितः।

पृ० १६७५, पं० १५—यदुक्तम्—"प्रसिद्धिबाधस्यान्याय्यत्वात् शास्त्रचोदितानां धव-खदिरपलाशानामपि लोकप्रसिद्धित एव प्रतीयमानत्वात्।" इति तत्तमज्ञानमेव, प्रसिद्ध्यपेक्षया प्रकरणस्य 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन्' इत्यनुरुद्ध्य तदर्थस्य प्राधान्याद्वाऽर्थस्य बलीयस्त्वात्। यथा 'विधुर' शब्दो लोके प्रसिद्धः पत्नीविरविरहित इति, परं

वाक्य 'सर्वैरपि परमेश्वर एव हूयते' 'सभी के द्वारा परमेश्वर ही पुकारा जाता है' के स्थान पर 'अपि' के स्थान पर 'एव' और 'एव' के स्थान पर 'अपि' परिवर्तित कर देने पर सब समाधान हो जाता है। यथा—'सर्वैरेव परमेश्वरोऽपि हूयते' कि सभी के द्वारा परमेश्वर भी (अग्नि आदि शब्दों से) पुकारा जाता है।

अब आपके सर पर चढ़कर स्वामी जी का जादू बोल रहा है। ऊपर आप अग्नि शब्द की परमात्मवाच्यता पर आक्षेप कर रहे थे, यहाँ पर्यवसानदृष्टि से परमेश्वर में अग्नि का अर्थ मान रहे हैं। और ऋषि दयानन्द के 'परमेश्वरस्य नात्यन्तं त्यागो भवति' की पुष्टि कर रहे हैं। तब तो यह सब असूया के कारण इनका विरोध है। यह इनकी पौर्वापर्य को भुला देनेवाली कैसी मति है ? इनकी विस्मरण शक्ति तो अतितरां तीव्र है। तात्पर्य न समझने की बात आप स्वामी दयानन्द पर आरोपित कर रहे हैं। जबकि नासमझी के सुपात्र आप स्वयं सिद्ध हो रहे हैं। श्रीमन् ! याद रखिये कि पठित शब्द का तात्पर्य कदापि विरोधी नहीं हो, उसमें काकूक्ति आदि मूल में हो सकती है। इस प्रकार स्वयं तात्पर्य न समझकर और आक्षेप करते हुए आप अब 'अप्रतिभा' नामक निग्रहस्थान में आ पड़े हैं।

पृ० १६७५, पं० १५—"प्रसिद्धि का बाध कभी उचित नहीं माना जाता, शास्त्र में उपदिष्ट धव, खदिर आदि शब्दों का भी अर्थ सदा लोकप्रसिद्धि के अनुसार ही किया जाता है।"

यह कथन अज्ञानमात्र है; क्योंकि वेद का निर्वचन करने में लोकप्रसिद्ध अर्थों के ही कारण अनर्थ हुए हैं। अतः प्रसिद्धि की अपेक्षा प्रकरण की बलवत्ता यास्क ने बताई है, अर्थात् 'ऋषि जिस भाव या इच्छा का जिस देवता पर आधिपत्य चाहता है, उसी अर्थ की प्रधानता होती है।' जैसे विधुर शब्द का अर्थ पत्नीरहित अर्थात् 'रँडुआ' है, परन्तु 'श्रीमान् अप्पयदीक्षित का इतिवृत्त हमें

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'श्रीमदप्पयदीक्षितस्येतिवृत्तं न किञ्चित् समासादितमस्माभिरितिहाससाधनविधुरम्' इत्यत्र नासावर्थो ग्रहीष्यते। लोकेऽपि प्रकरणभेदादेव शब्दो विभिन्नार्थवाचको भवति। न्याये गुणाः शब्दस्पर्शादयः, काव्ये माधुर्यप्रसादादयः, सांख्ये सत्त्वादयः, एवं व्याकरणगणितादौ तत्तदर्थकाः। तथा आयुर्वेदे—

'कुमारीपादघातेन तत्क्षणे म्रियते फणिः।'

अत्राप्यायुर्वेदविषयत्वात् कुमारीशब्देन ग्वारपाठा, फणिशब्देन सीसकं गृह्यते, न तु लोकप्रसिद्धार्थः।

एवमिहापि धवखदिरयोरर्थग्रहणं यथाप्रकरणं भविष्यति। खदिरस्य इन्द्रेन्दुपादपेषु एकतमोऽर्थः, धवस्यापि पतिपादपादिषु कतमोऽपि ग्रहीष्यते।

पृ० १६७६, पं० १—"आग्नेयोऽष्टाकपालो भवति' इत्यादावग्न्यधिष्ठात्री देवता गृह्यते, केवलस्य भौतिकस्य पार्थिवाग्नेर्हविर्भाक्त्वानुपपत्तेः, 'अभिमानिव्यपदेशस्तु' (ब्र० सू० २।१।५) इतिन्यायाच्च।" इति निखिलं कथनं शास्त्रीयस्थलानवबोधात्, परमात्मनाऽऽधृतशक्तेर्वस्तुष्वप्यनवगमाच्च।

कुछ भी नहीं मिल सका, इतिहास साधनों से विधुर (अल्प, रहित) है हम लोगों के लिये।' कहिये, यहाँ क्या इतिहास साधन में 'रँडुआ' है, यह अर्थ करेंगे। लोक में भी प्रकरणभेद से ही शब्द विभिन्नार्थवाचक हो जाता है। जैसे न्याय में गुण शब्द, स्पर्श आदि, काव्य में गुण माधुर्य, ओज आदि, सांख्य में गुण शब्द से सतोगुण, रजोगुण आदि; इसी प्रकार व्याकरण गणित आदि में गुण, योग आदि शब्दों के विभिन्न अर्थ होंगे। तथा आयुर्वेद में—'कुमारी के पादघात से तत्काल फणि मर जाता है' यहाँ कुमारी शब्द से प्रसिद्धार्थ कन्या तथा फणि शब्द से सर्प अर्थ ग्रहण न करके प्रकरणगत क्रमशः ग्वारपाठा व सीसा अर्थ गृहीत होंगे।

इसी प्रकार धव और खदिर का अर्थग्रहण प्रकरणानुसार ही होगा, जैसे खदिर के इन्द्र, इन्दु और पादप में अन्यतम तथा धव के पति पादप आदि अर्थों में से अन्यतम अर्थ गृहीत होगा।

पृ० १६७६, पं० १—"आग्नेय' प्रभृति शब्दों में अग्नि के अधिष्ठाता देवता का ग्रहण होता है; क्योंकि केवल भौतिक अग्नि हवि का वाहक नहीं हो सकता। 'अभिमानिव्यपदेशस्तु' इस ब्रह्मसूत्र के अनुसार ऐसे स्थलों पर उन-उन जड़ पदार्थों के अभिमानी देवता का ग्रहण किया जाता है।" यह समस्त कथन शास्त्रीय स्थलों को तथा परमात्मा द्वारा रचित जड़ पदार्थों में आधृत की हुई शक्ति को न समझने के कारण है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

बहुदेवप्रणयिनी पौराणिकी सनातनिबुद्धिर्जडपदार्थेषु प्रत्येकाधिष्ठातृदेवकल्पनां कुरुते। ईश्वरोऽपि सांसारिकनृपतिवद् अल्पसामर्थ्यवान् कल्प्यते तैः, अत एवासौ प्रतिविभागाधिकारिणं विनियुनक्ति, येन सुप्रबन्धो जायेत। पुनश्च शनैः शनैः सर्वा देवता ईश्वराधिष्ठिताः, इति कथयित्वा ते आमन्यन्त एकेश्वरवादस्थितिम्। यथेह श्रीकरपात्री अपि ब्रूते यत् सर्वदेवतानां प्राणेषु पर्यवसीयमानत्वं तेषां चेश्वरे।

परमेष तर्कोपन्यासोऽल्पप्राणः। पश्यतु, किं परमात्मनः सर्वशक्तिमत्ता तत्तज्जडपृथिवी-सूर्यजलभूम्यादीनां सरलं नियन्त्रणं न कर्तुं पारयते? य एते अधिष्ठातृदेवास्तेषां चैतन्यं किमीशजीवचैतन्याद् भिद्यते अथवा न भिद्यते? भवेन्नाम कीदृशमपि, परं ते समेऽपि देवा मूलतः स्वभावेन भिद्यन्ते, न च ते समानाः। शिरस्थशृङ्गत्वेन न गावो महिष्योऽजाश्चैक्यं भजन्ते, गले सास्नादिमत्तया न वाऽपि सर्वा गाव एकत्वे। हस्ते लेखनीधारणमात्रेण न कपिल-गालवयोरेकत्वं वक्तुं शक्यते।

महाराज! भवतो देवानां मतय आकृतयश्च भिन्नाः। वाहनेषु भेदो भोजनेऽपि भिन्नता, स्वभावे चाप्यन्तरम्, कथं पुनरैक्यम्? किं भवान् निरामिषं वज्राङ्गबलिनं मांसाशनमद्यपानप्रिय-

---

बहुदेवप्रणयिनी पौराणिक सनातनी बुद्धि प्रत्येक जड़ पदार्थ के एक-एक अधिष्ठातृदेव की कल्पना करती है। मानो कि ईश्वर भी संसारी राजाओं की भाँति अल्प सामर्थ्यवाला है और हर डिपार्टमेण्ट का एक-एक हाकिम नियुक्त कर देता है, जिससे उसका सुप्रबन्ध रहे। और फिर धीरे-धीरे ये सब देवता ईश्वराधिष्ठित हैं, यह कहकर एकेश्वरवाद पर आते हैं, जैसे यहाँ पर करपात्री जी भी, जो कि सभी देवताओं का पर्यवसान प्राण में और प्राण का पर्यवसान परमेश्वर में बताते हैं।

पर यह तर्कोपन्यास कितना लचर है। देखिये, क्या परमात्मा की सर्वशक्तिमत्ता उन-उन जड़ सूर्य, जल, पृथिवी आदि का सीधा नियन्त्रण नहीं कर सकती है? फिर ये अधिष्ठातृदेव चेतन हैं, तो इन की चेतनता ईश्वर या जीवों की चेतनता से भिन्न है या वैसी ही? अथवा जैसी भी हो, फिर वे आपके सभी देवता एक-दूसरे के स्वभाव में मूलतः विपरीत हैं। वे सब देवता समान तो हो नहीं सकते। सर पर सींग होने से गाय, भैंस, बकरी एक हैं; गले में सास्ना होने से सब गायें एक हैं; हाथ में कलम होने से कपिल और ग़ालिब एक हैं—ऐसा कुतर्क नहीं माना जा सकता।

महाराज! आपके देवताओं की अकलें और शकलें दोनों ही भिन्न-भिन्न हैं। सवारियों में भेद, भोजन में भेद, स्वभावों में अन्तर—फिर एक कैसे? क्या आप निरामिषभोजी बजरङ्गबली को और बकरा-बोतल प्रिय भैरों जी को एक चौके में खिला सकते हैं? वाराह जी की तो भोजन

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भैरवस्य महानसे भोजयितुमर्हसि? भवतो भगवतो वाराहस्य तु प्राशने विषये कथैव का? कथयतु किं बदरीफलानामुत वातादानां च समुदायः कदाऽपि एकरूपतां भजिष्यते? क्रीणीहि एकभावेन। वाढम्, कथने तु पशुशब्देन सर्वे पशवः, फलशब्देन समानि फलानि, एवं तु वर्गा रचयितुं शक्यन्ते। यदि भवान् एवंविधमैक्यं प्रमाणीकरिष्यति तदा देवदनुज-राक्षसपिशाचाश्चेतनाः सर्व एव। किं चेतनसामान्यादिमे समे परमात्मा एव? अस्मिन्नद्वैतवादि-दृष्टिकोणे रामोऽपि परमात्मा रावणोऽपि परमात्मा। भवेन्नामैकत्वमनयोः, परं भगवत्याः सीताया हृदयं तु प्रष्टव्यम्।

देवाः सर्वे चेतना अत एवैकत्वमेतेषाम्, अत एवेश्वरत्वम्, हन्त! कीदृशी युक्तिप्रस्तुतिः? मनुष्याः सर्वेऽपि चेतनत्वेनैकत्वं भजन्ते, फलतस्ते परमात्मा। धन्योऽसि महाराज! सर्वं गुडं गोमयं च समानमाख्यातम्।

भवान् जडपदार्थानामधिष्ठातृत्वमत एव स्वीकुरुते यतो हि ते स्वयं कार्यकरणे-ऽसमर्थाः। यथाऽत्राग्निर्हविर्वाहने। इदं तु सम्यगेव यदा प्रकृतिः किमपि कार्यं स्वयं कर्तुं न शक्नोति, तदा 'स्वाभाविकी ज्ञानबलक्रिया च' इति परमेश्वरस्तत्र शक्त्याधानं कुरुते। सर्वशक्तिमानसौ—

विषय में शान ही दूसरी है। कहिये, क्या सामुदायिक रूप से बेर और बादाम एक हो सकते हैं? खरीदियेगा एक भाव? हाँ, कहने को तो पशु शब्द से सब पशु, फल शब्द से सब फल—इस प्रकार वर्ग बनाये जा सकते हैं और अगर इस प्रकार के वर्गीकरण को एकता का प्रमाण मान लिया जावे तो देव, दनुज, राक्षस, पिशाच चेतन सब ही हैं। बस, सब एक और वही परमात्मा है। राम भी परमात्मा और रावण भी परमात्मा है। इस अद्वैतवादी की दृष्टि में राम रावण चाहे एक भी हो सकते हैं, पर भगवती सीता के हृदय से तो पूछिये, क्या वे रावण को राम समझ लेंगीं? कदापि नहीं।

देव सब चेतन हैं, इसलिये एक हैं और इसीलिये ईश्वर हैं—क्या बढ़िया दलील है! मनुष्य सब चेतन हैं, अत एव सब एक हैं, निदान वे सब परमात्मा हैं! वाह महाराज! सब गुड़-गोबर बराबर।

आपको जड़ पदार्थों को अधिष्ठातृदेव मानने की इसलिये आवश्यकता पड़ी कि जड़ पदार्थ स्वयं कार्य करने में असमर्थ हैं, जैसे यहाँ अग्नि हविवाहन में। यह बात तो ठीक है कि जड़ प्रकृति स्वयं कार्य नहीं कर सकती, इसलिये 'स्वाभाविकी ज्ञानबलक्रिया च' वाला परमेश्वर उसे कार्यशक्ति प्रदान करता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥' (गीतायाम् १८। ६१)

स जडैः पदार्थैः कार्यं कारयति। एका विद्युद् यन्त्रस्य सर्वोपाङ्गेभ्यो गतिं प्रदत्ते, न च यन्त्रोपाङ्गेषु पृथक् पृथग् विद्युद् विद्यते। यथा शरीरस्य प्रत्येकावयवे न जीवात्मा पृथक् पृथक्। शरीरस्य सर्वावयवानामधिष्ठाता एक एव। एवं जडजगत एकब्रह्मद्वारा सञ्चालनं जायते। यथाऽह कठः—'एको वशी सर्वभूतान्तरात्मा।' सूर्यादीन् चेतनदेवान् मन्तुं प्रकाण्डपण्डित-सामश्रमी अपि विरुणद्धि। स चैतत् पौराणिकानां कल्पितमभन्यत—

"पौराणिकदैवताकारादिकल्पनाऽपि नूनं वेदविज्ञानग्रहणाऽसमर्थमतीनां स्त्रीशूद्रद्विज-बन्धुरूपाणां बालधियां धर्मोपदेशसाहाय्यायैव।.....तथैव विद्याऽपरपर्यायवेदाध्ययनहीना बालाः कल्पितदेवस्वरूपादौ विश्वसन्त्येव, परं न तथा देवस्वरूपप्रत्यक्षदर्शिनो विद्वांसो वैदिकाः।" (ऐतरेयालो० पृ० १७०)

भावत्कमिदं वचनमत्यन्तमल्पज्ञताधारं यज्जडाग्निर्हविर्वाहकः कथङ्कारं सम्भवति? अत एव तु तदधिष्ठातृदेवश्चेतनोऽभिमन्यते। महोदय! अग्नौ कणकणभस्मकरणाय शक्तिरस्ति। वायुरस्य सखा, स च तं सुगन्धं विस्तार्य रोगकीटविनाशकार्यं कुरुते। सूर्यकिरणास्तद् हव्यं

'सर्वव्यापक परमेश्वर सारे पदार्थों को माया के द्वारा यन्त्रारूढवत् चला रहा है।' (गीता १८। ६१)

वह जड़ पदार्थों से काम करा रहा है। एक बिजली मशीन के समग्र पुरजों को गति प्रदान करती है, प्रत्येक पुरजे में अलग-अलग बिजली नहीं। जैसे शरीर के प्रत्येक अवयव में जीवात्मा पृथक्-पृथक् नहीं। शरीर के सर्व अवयवों का अधिष्ठाता एक ही जीवात्मा है। इसलिये जड़ जगत् का एक ही ब्रह्म द्वारा सञ्चालन होता है। जैसा कि कहा है—'एको वशी सर्वभूतान्तरात्मा'—कठ।सूर्यादि को चेतन देवता मानने की बात से तो प्रकाण्ड पण्डित स्वर्गीय श्री सामश्रमी जी ने साफ मना किया है और इसे पौराणिक मनगढ़न्त बताया है—

"पौराणिक देवताओं की कल्पना तो साधारण बुद्धिवालों को धर्मोपदेश देने के लिये है। ऐसे देवताओं के आकार पर वेदज्ञान से रहित लोग ही विश्वास करते हैं, वेदज्ञ नहीं।"

आपका यह कथन नितान्त अल्पज्ञता का सूचक है कि 'वह अग्नि हवि का वाहक कैसे हो सकता है, अत एव अधिष्ठातृ देव चेतन मानते हैं।' महोदय! अग्नि में कण-कण को भस्म कर सूक्ष्म करने की शक्ति है,वायु इसका सखा है, वह उस सुगन्ध को विस्तृत कर रोगकीटाणुओं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जलादिवृष्टये अत्यन्तशुद्धं सूक्ष्मीभूतं चाकृष्य प्रभुनिर्दिष्टव्यवस्थानुसारमनेकविधकार्याणि सम्पादयन्ते। अत एव यज्ञस्य तिस्रो देवता अमन्यन्त।

अतोऽवगन्तव्यं यज्जडदेवानां चेतनवद् यद्वर्णनमुपलभ्यते तदौपचारिकमारोपमात्रं च। यथा सर्वभाषाकवितासु व्यवहृत्यं भवति। यथा—

'खड्गो ब्रूते', 'मातृभूमिर्बलिदानायाकारयति',

'माटी कहे कुम्हार से, तू का रोंदे मोय।
इक दिन ऐसा आयगा, मैं रोंदूँगी तोय॥'

वेदोऽपि काव्यम्। तत्राऽपि जडदेवाश्चेतना इव व्यवहृता भवन्ति। ब्राह्मणग्रन्थेषु चेमा एव वैदिकधाराः प्ररोचका विधातुं कथारूपेण निदर्श्यन्ते। यथा हि महाभारते— 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'।

वस्तुत एतेषां जडपदार्थानां भगवन्तमतिरिच्य नान्ये इन्द्रादिदेवाश्चेतना अधिष्ठातारो यथा पौराणिकानां धारणा। विद्युद् जड इन्द्रः, चेतन इन्द्रस्तु सर्वैश्वर्यनिधानपरमात्मा।

को नष्ट करने का काम करता है। सूर्य की किरणें उस हव्य को जलादि वर्षण को अत्यन्त शुद्ध बनाने को आकृष्ट कर प्रभु से सौंपी व्यवस्था के अनुसार अनेकविध कार्य करती हैं। इसलिये यज्ञ के ये तीन देव माने गये हैं।

जड़ देवों का चेतन की भाँति मन्त्रों में जहाँ वर्णन किया है, वह उपचार से, आरोपमात्र से है। जैसे सभी भाषाओं में कविताओं में व्यवहार होता हैं—

'तलवार कहती है', 'मातृभूमि की पुकार है', 'माटी कहे कुम्हार से तू का रोंदे माय। इक दिन ऐसा आयगा, मैं रोंदूँगी तोय॥'

वेद भी काव्य है, वहाँ भी इन जड़ देवों के लिये चेतनवत् व्यवहार किया गया है और ब्राह्मणग्रन्थों में इन्हीं वैदिक धाराओं को बहुत रोचक बनाने के लिये कथाओं के रूप में दे दिया है। जैसा कि महाभारत में कहा है—'इतिहासपुराणाभ्यां वेदमुपबृंहयेत्'।

वास्तव में इन जड पदार्थों का भगवान् के अतिरिक्त कोई इन्द्रादि देव, जैसी कि इन पौराणिकों की धारणा है, नहीं है। बिजली जड़ इन्द्र है और चेतन इन्द्र सर्वैश्वर्यनिधान परमात्मा है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जिज्ञासा—अथ येऽग्न्यादय इमे प्रत्यक्षाः, न त एते देवाः, अपि त्वेषामभिमानिनः सन्ति, ततद्द्रव्यादिनामतः स्वर्गस्थाः केचन। अत एवैवमसूत्रयद् व्यासः स्वदर्शनशास्त्रे—"अभिमानिव्यपदेशस्तु०" इत्यादि। तदेतद् व्यासवचनमार्षमपि कथं न स्यान्मन्तव्यमित्यत्र ब्रूमः।

सत्यम्, अस्त्येतद् व्यासवचनम्, परमेतस्य यद्विधा व्याख्या कृता स्वस्वसम्प्रदायपुष्ट्यै पौराणिककालोत्पन्नैः शङ्कराचार्यादिभिः, सा त्वसत्यैव। नहि कस्याप्यद्यतनस्य स्वमत-स्थापनव्याकुलीभूतस्य लेखनीसम्भूतं निखिलमपि आख्यातं सत्यं भवितुमर्हति, नापि हि तादृशानां तेषां सर्वेषामेव प्रकृतवादित्वे मिथो मतपार्थक्यमुपपद्येतेति विज्ञातमेतत्।

वस्तुतस्त्वत्र यदुक्तं व्यासमहर्षिणा—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' (ब्र० सू० २। १। ५) तदर्थस्त्वेवम्—श्रूयन्ते हि 'मृदब्रवीत्', 'आपोऽब्रुवन्', 'फेनोऽब्रवीत्' इत्येवमादयः (शत० ६।१।३)। आसु श्रुतिषु श्रुतानां मृदादीनां कथं चेतनाविशिष्टत्वमुररी-कार्यमित्याह—'अभिमानि०' इत्यादि। यद्यपि विशिष्टचेतनवत्स्वेव 'अहं ब्रवीमि' इत्यहङ्कारो-ऽभिमानः सम्भवति, नान्यत्र मृदादौ; तथाप्येवमादौ तस्याभिमानिनो 'व्यपदेशः'। व्यपदेशो

जिज्ञासा—जो अग्नि आदि प्रत्यक्ष हैं, वे देवता नहीं हैं; अपितु इनके अभिमानी ही देवता हैं, जो उस-उस द्रव्य के नाम से स्वर्ग में रहनेवाले कोई हैं। इसीलिये व्यास ने कहा कि 'अभिमानिव्यपदेशस्तु०' इत्यादि। और यह व्यासवचन आर्ष है, फिर अमान्य कैसे हो सकता है।

समाधान—हाँ, यह व्यास का वचन सर्वथा मान्य है; परन्तु इसकी जो व्याख्या की है, वह अपने-अपने सम्प्रदाय मत की पुष्टि के लिये पौराणिक-कालज शङ्कर आदि ने कर ली है, वह ठीक नहीं है। किसी भी आधुनिक व्यक्ति का अपने मत की स्थापना के लिये व्याकुलचित्त का लेखनीप्रसूत सब कुछ कहा हुआ तो सत्य नहीं हो सकता और न ही उन सभी के प्रकृत वाद में आपसी मतों की पृथक्ता ही उपपन्न हो सकती है, यह स्पष्ट है।

वास्तव में यहाँ जो महर्षि व्यास ने कहा है, उसका अर्थ तो इस प्रकार है कि—सुना जाता है कि 'मिट्टी बोली', 'जल बोले', 'फेन बोला' (शत० ६।१।३) इत्यादि। इन श्रुतियों में सुने हुए मिट्टी आदि का चेतनाविशिष्टत्व कैसे स्वीकार किया जावे, अतः कहते हैं। यद्यपि विशिष्ट चेतनावालों में ही 'मैं बोलता हूँ' यह अहङ्कार अभिमान सम्भव होता है, अन्यत्र मिट्टी आदि में नहीं, तथापि इनमें उस अहङ्कारी का व्यपदेश, व्यवहार व आरोप कर लेते हैं। यह व्यवहार मात्र

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्यवहारः, व्यवहारमात्रमौपचारिकमिति यावत्। कुतः? 'विशेषानुगतिभ्याम्' चेतनाचेतनयोर्विशेषस्तु सर्वैर्ज्ञायते लौकिकशब्दार्थशक्ति-ग्रहादिशिक्षादितः, तस्मान् मृदादिषु तदभिमानित्वं तद्व्यावहारिकमौपचारिकमिति सम्पद्यत एव।

अनुगतिश्च 'अहर्वै मित्रो रात्रिर्वरुणः' (ऐ० ४।२।४), 'असौ वा आदित्यो देवः सविता' (शत० ६।३।१।१९), 'एष एवेन्द्रो य एष तपति' (शत० १।६।४।१८), 'अयं वै वायुर्योऽयं पवते' (शत० १।५।४।५) इत्येवमादिश्रुतिभ्यश्चैवमेवेति।

सम्प्रति उपासनापरकाणामध्यात्मपराणां वेदमन्त्राणां व्याख्याने यथा न भवतोऽभिरुचिः, तथैव भवद्गुरोः सायणाचार्यस्याऽपि नाऽभिरुचिः। अत्राह सामश्रमिमहाभागः— "हन्तैवं पदार्थविज्ञानशिक्षोपयोगीनि बहूपदेशपूर्णानि चैतादृशान्युत्कृष्टतमान्यधिदैवतव्याख्यानान्यपहाय, परमात्मज्ञानपिपासूनां तर्पणानि अध्यात्मव्याख्यानानि च विलोप्य अधियज्ञव्याख्यानान्येवाभाषत सर्ववेदभाष्यकारः सायणाचार्यस्तथाऽन्योऽपि। उक्तं च तेन सायणेन ऋक्संहिताभाष्ये अस्यवामीयसूक्तव्याख्यानारम्भे— 'एवमुत्तरत्राऽप्यधिदैवतपरतयाऽध्यात्मपरतया च योजयितुं शक्यम्, तथाऽपि स्वरसत्वाभावाद् ग्रन्थविस्तरभयाच्च न लिख्यते; तत्र द्वा सुपर्णेत्यादौ स्फुटमाध्यात्मिकोऽर्थः प्रतीयते तत्र तमेव प्रतिपादयामः' (१।१६४।१) इति।" (ऐतरे० पृ० १८८-९१)। अहो स्वरसत्वाभावः!

औपचारिक ही है; क्योंकि 'विशेषानुगतिभ्याम्' अर्थात् चेतन और जड़ में जो विशेष है, वह तो लौकिक शब्दार्थशक्तिग्रह आदि की शिक्षा से सभी जानते हैं। इसलिये मृदादि में उसका अभिमानित्व व्यावहारिक व औपचारिक हो ही जाता है।

अनुगति के उदाहरण हैं—'दिन मित्र है और रात्रि वरुण है' (ऐ० ४।२।४), 'वह आदित्य देव सविता है' (शत० ६।३।१।१९), 'यही इन्द्र है जो तपता है' (शत० १।६।४।१८) इस प्रकार की श्रुतियाँ हैं।

अब उपासनापरक व अध्यात्मपरक वेदमन्त्रों के व्याख्यान करने में जैसे आपकी रुचि नहीं है, उसी प्रकार आपके गुरु सायणाचार्य ने ऋक्संहिता के भाष्य में 'अस्यवामीय' सूक्त के व्याख्यान में कहा है कि—

"इस प्रकार बाद में भी मन्त्रों की अर्थयोजना अधिदैवत तथा अध्यात्मपरक की जा सकती है, तब भी अपने को इसमें कोई रस नहीं आ रहा है-और ग्रन्थ के विस्तर का भी भय है, अतः नहीं लिखा जा रहा है। वहाँ 'द्वा सुपर्णा०' में तो स्पष्ट ही आध्यात्मिक अर्थ प्रतीत हो रहा है। उसमें उसी का प्रतिपादन कर रहे हैं।"(१।१६४।१)। इस पर सामश्रमी जी की टिप्पणी है कि "आश्चर्य है कि आप को उन अर्थों में आनन्द ही नहीं आया।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६७६, पं०३—यदुच्यते—"परमेश्वरेण देवा अभिन्नास्तद्विभूतित्वात्, परस्परं च भिन्नाः। यथा मृदा घटादयोऽभिन्नाः परस्परं तु भिन्नाः।" इति तदभिन्ननिमित्तोपादानकारणं परमेश्वरं मन्यमानस्यैतस्य घोरमज्ञानम्। घटस्याभिन्नत्वे मृदो हि उपादानत्वं न च तथा परमेश्वरस्य, निमित्तकारणत्वादित्येवं प्राग् बहु व्याख्यातं प्रथमखण्डे।

पृ० १६७६, पं० ९—यदुच्यते—"परमेश्वरस्य जन्मरूपवत्त्वशरीरधारणादिनिषेधादिति भूमिकावचनं तुच्छम्, 'अजायमानो बहुधा विजायते' (यजुः० ३१। १९), 'नमो हिरण्यबाहवे' (यजुः० १६। १७), 'नीलग्रीवाः शितिकण्ठाः' (यजुः० १६। ५६) इत्यादिभिरजस्याऽपि परमेश्वरस्य मायया बहुशबलरूपवत्त्वात्।"

इति सकलं पौराणिकधारणापुच्छम् अस्वच्छं तुच्छम्, अकायस्य परमेश्वरस्याजायमानत्वात्। अजायमानो हि न कथमपि जायते, यतो हि तस्य प्रजापतेर्योनिं स्वरूपं सर्वतः पश्यन्ति, सर्वव्यापके एव तस्मिन् सर्वभुवनानां स्थितेः सम्भवात्। परं ध्यानवतामनुभूत्यां स विजायतेऽर्थाद् विशेषरूपेण प्रकटीभवति। 'प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते' (यजुः० ३१। १९) इत्यनेन स्पष्टम्।

पृ० १६७६, पं० ३—"परमेश्वर से देव अभिन्न हैं; क्योंकि वे देव उसकी विभूति हैं और परस्पर भिन्न हैं। जैसे मिट्टी घट आदि अभिन्न हैं और परस्पर भिन्न हैं।" इस कथन के द्वारा परमेश्वर को अभिन्ननिमित्तोपादान कारण मानना सर्वथा अज्ञान है। घट की मिट्टी से अभिन्नता में मिट्टी उपादान है, उस प्रकार जड़ादि देवों का परमेश्वर अपने माया (प्रकृति) उपादान से रचने के कारण स्वयम् उपादान नहीं, अपितु निमित्तकारण है। इस प्रकार हमने पूर्व ही प्रथम खण्ड में पर्याप्त व्याख्यान कर दिया है।

पृ० १६७६, पं० ९—पूर्वपक्ष—"परमेश्वर के शरीरी होने का निषेध है' यह भूमिकाकार का कथन तुच्छ है। 'अजायमान भी बहुत प्रकार से उत्पन्न होता है', 'हिरण्यबाहु को नमस्कार', 'नीलग्रीव शितिकण्ठ' इत्यादि प्रमाणों के द्वारा अजन्मा परमेश्वर का भी माया के द्वारा बहुत शबल रूप होता है।"

उत्तरपक्ष—पौराणिक धारणा की ये विचारपूँछ अतितरां तुच्छ है; क्योंकि उसके 'अकाय' शब्द से सभी प्रकार के शरीरों के होने का अभाव सिद्ध है। वह कभी पैदा ही नहीं हो सकता; क्योंकि ध्यानी लोग उस प्रजापति के स्वरूप को बहुधा देखते हैं। उसके सर्वव्यापक होने पर ही सारे भुवनों की स्थिति रह सकती है। केवल ध्यानियों की अनुभूति में ही वह परमेश्वर विशेषरूप से प्रकट होता है। 'प्रजापतिश्चरति०' यह यजुः का प्रमाण पूर्णतया इसी बात का प्रतिपादक है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न च 'हिरण्यबाहवे' हिरण्यालङ्करान् धारयतस्तस्य कस्यचित् कैलासवासिनो देहवतः शङ्करस्य वर्णनमिह, हिरण्यं ज्योतिरिव तीव्रतेजस्कौ बाहू यस्य तस्मै इत्यर्थात्। एवं 'नीलग्रीवाः शितिकण्ठाः' इति बहुवचनेनैव जन्मधारित्वं खण्ड्यते।

वस्तुतोऽस्मिन्नध्याये अग्निवाय्वादीनामेव वर्णनम्। एतदाराध्य उव्वटोऽपि तथाऽऽह— "स एकोऽत्राग्निश्चितो बुभुक्षमाणो रुद्ररूपेणावतिष्ठते।.....'स एव शतशीर्षो रुद्रः समभवत्' (यजुः० १६।१), 'असौ य आदित्यो नीलग्रीव इवास्तं गच्छन् लक्ष्यते' (यजुः० १६।७), 'नीलग्रीवाय च शितिकण्ठाय च' (यजुः० १६।२८) अत्राप्यग्नेः सूर्यस्य वा वर्णनम्।

पृ० १६७६, पं० १३—"गणानां त्वा०' इति मन्त्रसन्दर्भे ऐतरेयशतपथवचनानि समुद्धृतानि। उपर्युक्तैर्ब्राह्मणवचनैर्मन्त्रस्य कः सम्बन्धः कश्च ब्राह्मणानुसारी मन्त्रार्थ इति विषये मौनमेवावलम्बितम्।"

इत्यपि जल्पताऽनेन न स्वदृगुपयोगो व्यधायि, मन्त्रगतशब्दानामैतरेयेण शतपथेन च सह प्रत्यक्षं सम्बद्धत्वाद् ब्राह्मणानुसारिमन्त्रार्थस्य संक्षेपेण भूमिकायां प्रदर्शितत्वाच्च। न महर्षिणा मौनमवलम्बितम्, प्रत्युत श्रीकरपात्रेण स्वपण्डितसैन्येन सार्धं नयनपिधानमवलम्बितम्। तच्च

ऊपर प्रमाणों में आपके कल्पित स्वर्णालङ्कारों के धारक किसी कैलासवासी शङ्कर (ऐतिहासिक पुरुष) का वर्णन नहीं है। ज्योति (हिरण्य) के समान तीव्र तेज ही जिसके रक्षक बाहु हैं। तथा 'नीलग्रीवाः' 'शितिकण्ठाः' के बहुवचन ही आपके जन्म लिवाने की भावना के खण्डक हैं।

वास्तव में इस अध्याय में अग्नि, वायु आदि का वर्णन है। इसी भावना से उव्वट ने भी कहा है—"शतरुद्रिय अग्नि को बुभुक्षित रुद्र रूप माना है, १६।७ में नीलग्रीव अस्ताचल को जाते सूर्य और आकाश के दृश्य का वर्णन है। तथा १६।२८ में भी इसी अग्नि वा सूर्य का वर्णन है।"

पृ० १६७६, पं० १३—"गणानां त्वा०' इस मन्त्र के सन्दर्भ में ऐतरेय शतपथ के वचन उद्धृत किये हैं। उपर्युक्त ब्राह्मणवचनों से मन्त्र का क्या सम्बन्ध है? ब्राह्मण के अनुसार मन्त्रार्थ क्या है? इस विषय में मौन का ही अवलम्बन कर लिया।"

यह भी कहते हुए पारिजातकर्ता ने अपने नेत्रों का उपयोग नहीं किया, मन्त्रगत शब्दों के ऐतरेय और शतपथ से प्रत्यक्ष ही सम्बद्ध होने के कारण ब्राह्मणानुसारी अर्थ संक्षेप से भूमिका में संस्कृत और आर्यभाषा दोनों में लिखा है। महर्षि ने इस विषय में मौनावलम्बन नहीं किया है, प्रत्युत श्री करपात्री और उनकी पण्डित सेना ने अपनी आँखें यहाँ बन्द कर ली हैं। यह सब वहीं

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्रैव द्रष्टव्यम्। इह भाष्यभूमिकायां सायणमहीधरभाष्ययोर्वेददूषकार्थखण्डनदिशा-बोधनमेवोद्दिष्टम्, न तु ब्राह्मणादीनां व्याख्यानम्, तेषां सन्दर्भोल्लेखनमात्रेण स्वार्थ-प्रामाणिकताया एवाभीष्टत्वात्।

पृ० १६७८, पं० ८—यदाह—"सर्वान् कार्यान् भूगोलान् परमेश्वरः स्वसामर्थ्ये गर्भवत् कथं दधाति? सामर्थ्यं तु शक्तिरेव। शक्तिश्च नहि कार्याधिकरणं भवति, किन्तु स्वस्वाधिकरणेष्वेव कार्याणि तिष्ठन्ति। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति' (तै० उ० ३ । १) इति वचनेन तु ज्ञायते यत् परमात्मन एव सर्वाणि भूतानि जायन्ते तेनैव जीवन्ति तस्मिन्नेवाभिसंविशन्ति। गर्भधानामपि गर्भधर्मिति कुतोऽर्थो गृहीतः ?"

इत्यपि समग्रं शास्त्रस्याऽमननात् फलितम्। सामर्थ्यं शक्तिरपि शक्तिशक्तिमतोर-भेदात् परमेश्वरः स्वसामर्थ्ये धारयत्येव। किञ्च, शक्तिरित्यनेन तदभीष्टाधिकरणमपि व्यज्यते, इहैव सप्रथशब्दव्याख्यानेन। यथा—प्रथेन व्यापकेन प्रकृत्यादिना स्वसामर्थ्येन वा सह वर्तते स सप्रथः। एवं सामर्थ्यं प्रकृतिरप्यभीष्टा। न नो हानिः परं नवीनवेदान्तसिद्धान्तध्वंस आपद्येता-

---

ग्रन्थ में लिखा हुआ देखिये। यहाँ पर महर्षि का उद्दिष्ट केवल सायण और महीधर के वेददूषक भाष्यों की खण्डनदिशा का संकेत मात्र देना है, इन ग्रन्थों के पोषक ब्राह्मणग्रन्थों के संकेत भी अभीष्ट हैं; परन्तु ब्राह्मणग्रन्थ यहाँ पर व्याख्येयतारूप में अभिप्रेत नहीं हैं।

पृ० १६७८, पं० ८—यह कथन कि—"सभी कार्यों को, भूगोलों को परमेश्वर अपनी सामर्थ्य में गर्भ की तरह कैसे धारण करता है? सामर्थ्य तो शक्ति को ही कहते हैं। यह शक्ति किसी कार्य का अधिकरण नहीं बन सकती, कार्य तो अपने-अपने अधिकरणों में ही रहते हैं। 'यतो वा०' इस श्रुति से तो ज्ञात होता है कि परमात्मा से ही सारे कार्य पैदा होते हैं। उसी से जीते हैं और उनका लय भी उसी में हो जाता है (तै० उ० ३ । १), इस वचन से तो ज्ञात होता है कि परमात्मा से ही सब भूत उत्पन्न होते हैं। 'गर्भधारण करनेवालों का भी गर्भधारण करनेवाला' यह अर्थ कहाँ से ले लिया?"

यह भी सब शास्त्र के मनन न करने का फल है। सामर्थ्य शक्ति है और शक्ति व शक्तिमान् में अभेद होने से परमेश्वर अपनी सामर्थ्य में धारण ही करता है। शक्ति शब्द से तुम्हारा अभीष्ट अधिकरण भी व्यञ्जित हो रहा है, जो यहीं पर 'सप्रथ' शब्द की व्याख्या में कहा गया है। यथा—प्रथ अर्थात् व्यापक प्रकृति आदि वा स्वसामर्थ्य के साथ है। इस प्रकार सामर्थ्य के अर्थ में प्रकृति भी हमारी अभीष्ट है। हमारी तो उसके मानने में कोई हानि नहीं, पर नवीन वेदान्ती आपके सिद्धान्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

धिकरणभूतप्रकृतेर्वस्तुत्वे। प्रकृतिश्च सर्वाः प्रजा गर्भे धारयति, तां प्रकृतिमपि परमेश्वर एव धारयतीत्यतो गर्भधानामपि प्रकृतिं प्राणिनश्च स्वगर्भे धारयति। तस्माद् भूमिकोक्तं सकलं सङ्गच्छते। परन्तु भवान्नैव स्पष्टमकरोद् यदधिकरणं तव किमभीष्टम्।

पृ० १६७८, पं० १५—यच्चाह—"प्रजापतिः परमेश्वरो जमदग्निसंज्ञोऽस्ति' इत्यस्य प्रकृते कः प्रसङ्गः ?" इतिमात्रोद्धरणं छलम्, 'प्रजापतिर्वै जमदग्निः सोऽश्वमेधः' इत्यादिसम्पूर्ण-पाठानुद्धरणात्। यतो ह्यत्र अश्वमेधप्रकरणे प्रजापतिः परमेश्वरः छत्रं विड् राजादयोऽप्यश्व-शब्देनाभिधीयन्त इति द्योतनार्थत्वात् प्रासङ्गिकम्। 'जमदग्निभिरभिहुत इत्यत्र प्रज्वलिताग्निभि-र्ऋत्विग्भिः स एव परमेश्वर आभिमुख्येन पूजितो भवति' इत्यध्यात्मपक्षे, आधिभौतिकपक्षेऽयं भौतिकोऽग्निर्गृहीष्यत एवेति निष्कर्षः। अतोऽनेनेह दुर्गभाष्यावतरणमनावश्यकं पुस्तक-कलेवरवर्धकम्।

पृ० १६८०, अनु० १—ऐतरेयोद्धरणं तु युक्तमेव, भिन्नत्वेऽपि गणपतिशब्दस्य नाश्वोऽर्थो भवितुमर्हतीति दर्शनात् 'ब्रह्मणस्पतिरेव गणपतिरिति साधनाच्च।

स्वामिना 'सप्रथः' शब्दस्तदुद्धरणगतत्वाद् व्याख्यातो न तु यजुर्वेदगतमन्त्रमभि-

---

का तो ध्वंस हो रहा है; क्योंकि अधिकरणभूत प्रकृति भी वस्तुसिद्ध है। प्रकृति तो सब प्रजाओं को गर्भ में धारण करती है। उस प्रकृति को भी परमेश्वर ही धारण करता है। इसलिये गर्भधारणकर्त्री प्रकृति और प्राणियों को परमेश्वर अपने गर्भ में धारण करता है। अतः भूमिकोक्त समस्त कथन सङ्गत है।

पृ० १६७८, पं० १५—यहाँ "प्रजापति परमेश्वर जमदग्निसंज्ञक है' इसका क्या प्रसङ्ग है ?" इतना मात्र उद्धरण देना छल है। जबकि 'वह अश्वमेध है' यह भी सम्पूर्ण पाठ में सम्मिलित है, जिससे अश्वमेध प्रकृत विषयप्रसङ्ग को प्रकट कर रहा है। यहाँ पर परमेश्वर, राजा आदि भी अवश्य शब्दाभिधेय हैं, अतः प्रासङ्गिक है। 'जमदग्नियों से अभिहुत' यहाँ पर प्रज्वलिताग्नि ऋत्विजों के द्वारा वही परमेश्वर आभिमुख्येन पूजित होता है, यह अर्थ तो अध्यात्मपक्ष में होता है और आधिभौतिक अर्थ में भौतिक अग्नि गृहीत होगी ही, यह निष्कर्ष है। अतः यहाँ पर पुस्तक के कलेवर-वर्धन के लिये दुर्ग-भाष्य का उतारना अनावश्यक है।

पृ० १६८०, अनु० १—ऐतरेय का उद्धरण तो भूमिका में देना युक्तियुक्त है, भिन्न होने पर भी अर्थात् ऋग्वेदीय 'गणानां त्वा' यह ऊपर मन्त्र होने पर भी गणपति का अर्थ अश्व नहीं हो सकता, यह स्पष्ट करने के कारण वहाँ भी गणपति ब्रह्मणस्पति है, यह भौतिक अश्व नहीं है।

स्वामी जी ने 'सप्रथ' शब्द ऐतरेय के उद्धरण में आने से व्याख्यात किया है, यजुर्वेदगत

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

लक्ष्य। तत्रापि भवता त्विह 'वसिष्ठस्य प्रथो नाम पुत्रः, भरद्वाजस्य सप्रथो नाम पुत्रः' इत्युद्धृत्यानित्येतिहासः साध्यत इति तु भवादृशामपाण्डित्यमेव। नहि क्वाऽपि अनित्यर्ष्यादीनां वर्णनं वेदे यथाऽयमाह (पृ० १६८१, पं० १६) —"जमदग्निदृष्टाभिर्ऋग्भिरेनं प्रीणीयात्। प्रजापतिरेव जमदग्निः।" नह्यत्र प्रीणयितव्यः कश्चिच्छरीरधारी ऋग्भिः।

महर्षिदयानन्दस्येदमुद्दिष्टं यद् वेदस्य व्याख्यानं नैरुक्तप्रक्रियामवलम्ब्यैव कर्तव्यम्। यथा च विविधज्ञानविज्ञानसम्पन्ना मन्त्रा निगडिताः केवलयाज्ञिकपद्धतिप्रतिपादकग्रन्थैरेषा सङ्कीर्णा धारणा परित्याज्या। ब्राह्मणादिरचयितृभिराप्तैर्या यौगिकी सरणिरनुसृता सैवाऽवलम्बनीया भाष्यकृद्भिः।

पृ० १६८२, पं० ३—अत्र—"क्षत्रं वाश्वो विडितरे पशवः' इत्यत्र यदुक्तम्—'यथाश्वस्यापेक्षयेतर इमेऽजादयः पशवो न्यूनबलवेगा भवन्ति, तथा राज्ञः समीपे विट् प्रजा निर्बलैव भवति, तस्य राज्यस्य यद्धिरण्यं सुवर्णादिवस्तु ज्योतिः प्रकाशो वा न्याय-करणमेतत्स्वरूपं भवति।"

इत्यादिभूमिकाव्याख्यानमुद्धरदिभः शाब्दन्यायप्रतिकूलं मन्यमानैः (पृ० १६८२, पं०

मन्त्र को अभिलक्षित कर इसका व्याख्यान नहीं किया है। वहाँ पर भी आप जैसों ने तो 'वसिष्ठ का प्रथ नामक पुत्र तथा भरद्वाज का सप्रथ नामक पुत्र' ऐसा अनित्य इतिहास वेद में माना है। जैसा कि इन्होंने पृ० १६८१, पं० १६ में कहा है। यांद रखिये, यहाँ ऋचाओं से कोई शरीरधारी ऋषि प्रीणयितव्य नहीं है।

महर्षि दयानन्द का उद्दिष्ट यह है कि वेद की व्याख्या नैरुक्त प्रक्रिया का अवलम्बन करके की जावे। जैसे अब विविध ज्ञान-विज्ञान सम्पन्न मन्त्र केवल याज्ञिक पद्धति का प्रतिपादन करनेवाले ग्रन्थों ने यज्ञ में ही निगडित कर दिये, यह सङ्कीर्ण धारणा छोड़नी होगी। ब्राह्मणादि की रचना करनेवालों ने जो श्रेष्ठ यौगिक प्रणाली अपनायी थी, उसी का भाष्यकारों को अनुकरण करना चाहिये।

पृ० १६८२, पं० ३—"क्षत्रं वाश्वो विडितरे पशवः' इस शतपथवाक्य की व्याख्या करते हुए स्वामी दयानन्द ने लिखा है—'जैसे घोड़े के सामने भेड़-बकरी आदि पशु कम वेग और बलवाले होते हैं, उसी तरह से क्षत्रिय के सामने सारी प्रजा निर्बल होती है। उस राज्य का हिरण्य अर्थात् सुवर्ण प्रभृति कीमती वस्तुएँ, या ज्योति अर्थात् प्रकाश ही, याने न्याय करने की सामर्थ्य ही, उसका स्वरूप अर्थात् धन होता है।"

इत्यादि भूमिका-व्याख्यान को शाब्द न्याय के प्रतिकूल जल्पन करते हुए पृ० १६८२ की

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१२) —"एष एव प्रदानभेदो वपानामुपन्यस्तः पुरोडाशानाम्" इत्यादिवाक्यैर्यज्ञे मांसाहुतीः प्रतिपादयद्भिर्भवादृशैर्वेदमन्त्रार्थैः सह बलात्कार एव कृतो मन्त्रानर्थरूपपरिणतिं प्रापयद्भिः। पुरुषमेधाश्वमेधादीनां वास्तविकार्थश्च विलोपितो मूढैः। तैः पशुयागे पश्वाहुतेः पश्चात् 'यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः' इति नियमेन पशुदेवतायै पुरोडाशविधानमपि कृतम्।

याज्ञिका एतान् पुरोडाशान् छिन्नाङ्गानां छिद्राणि अपिधातुमुपयोजयन्ति। तेषां कथनमिदं यद् यदा यज्ञे मारितः पशुः स्वर्गे जीवितो भवति तदा तत्पशुशरीरान्निःसारितानामङ्गानां छिद्राणि तानि पशुपुरोडाशैः पूर्यन्ते।

वस्तुतस्त्विदं सर्वं दुराशयैः कल्पितमेव। इदमिह चिन्त्यं यद् यज्ञे मारितोऽपि पशुः स्वर्गं गतोऽपि पशुरेव जातस्तदा किं वैशिष्ट्यम्? तस्मादेव स्वामिदयानन्दः कर्मकाण्डाडम्बरेभ्यो मन्त्रानमोचयत्।

उद्धरणस्य च योऽर्थः स्वामिना प्रत्यपादि (पृ० १६८३, पं० २), क्षत्रस्य प्राबल्यं विशां दौर्बल्यं च विवक्षितमिति कथयता भवतैव समर्थितः।

१२वीं पंक्ति में—"वपा के प्रदान में भी यही भेद माना है" इत्यादि वाक्यों से यज्ञ में मांसाहुतियों का प्रतिपादन करनेवाले आप सदृश लोगों ने वेदमन्त्रार्थों के साथ बलात्कार किया है। यहाँ तक कि मन्त्रों की अनर्थकता भी प्रतिपादित कर दी है। तथा मूढों ने पुरुषमेध और अश्वमेधादि के वास्तविक अर्थों का विलोप कर दिया। उन मूढों ने पशुयाग में पशु के मांसाहुति के पश्चात् 'जिस देवतावाला पशु है, उसी देवता का पुरोडाश' इस नियम के अनुसार पशुदेवता के लिये पुरोडाश-विधान किया है।

याज्ञिक लोग इन पुरोडाशों को कटे हुए अङ्गों के छिद्रों को ढकने के लिये प्रयोग में लाते हैं। उनका कथन यह है कि जब यज्ञ में मारा हुआ पशु स्वर्ग में जीवित होता है, तब उस पशु के शरीर से निकले हुए अङ्गों को पुरोडाशों से भर दिया जाता है।

वास्तव में यह सब दुष्टाशय मांसाहारियों द्वारा कल्पित है। यहाँ यह अवश्य विचारणीय है कि यज्ञ में मारा हुआ पशु स्वर्ग को गया हुआ भी पूर्ववत् पशु ही बना तो विशेषता क्या हुई? इसीलिये स्वामी दयानन्द ने कर्मकाण्ड के आडम्बरों से मन्त्रों को मुक्त कराया।

उद्धरण का जो अर्थ स्वामी जी ने किया है, यहाँ घूम-फिर कर इस पारिजातकर्ता को भी पृ० १६८३, पं० २ में 'क्षत्रिय की प्रबलता और प्रजाओं का दौर्बल्य विवक्षित है' यह कहना पड़ा।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६८३, पं० १८—अयं विचित्रबुद्धि 'न वै मनुष्यः स्वर्गं लोकमञ्जसा वेदाश्वो वै स्वर्गं लोकमञ्जसा वेद। अश्नुते व्याप्नोति सर्वं जगत् सोऽश्व ईश्वरः' इत्यत्र आक्षिपति—"तदपि प्रकरणविरुद्धम्", परमग्रे स्वयं शतपथमुद्धरन्नाह—'देवा वा अश्वमेधे पवमानं स्वर्गं लोकं न प्राजानंस्तमश्वः प्राजानात्' इति। तस्मादश्वमेधप्रकरणेऽश्वशब्दार्थप्रतिपादनं युक्तियुक्तं सप्रयोजनञ्च।

पृ० १६८४, १३ पंक्तितः १६८८ पृष्ठं यावद् यत् श्रीकरपात्रिणा प्रलपितं तत्त्वनावश्यकतया पल्लवितं ब्राह्मणप्रदिष्टरूपकम्। तत्र प्रश्नोऽयं यन् महीधरेण योऽश्लीलार्थो व्यधायि, सोऽनुचितोऽस्ति न वा?

यच्चालेखीत् (पृ० १६८७, अनु० १) —"तथा चाश्वमेधीयोऽश्वोऽत्र प्रजापतिरूपत्वेन यजमानपत्नीभिः प्रार्थ्यते। न मृतेनाश्वेन सम्भोगादिकं काम्यते।" इह को ब्रूते मृतेन सह सम्भोगार्थम्? तव महीधरस्तु जीवितेनैव सह वर्णयति, रेतःक्षेपणस्य जीवितेनैव सम्भवात्।

पृ० १६८३, पं० १८—यहाँ पर "अश्व' नाम परमेश्वर का भी है; क्योंकि कोई मनुष्य स्वर्गलोक को अपने सहज सामर्थ्य से नहीं जान सकता, किन्तु अश्व अर्थात् ईश्वर ही उनके लिये स्वर्ग-सुख को जानता है।" इनका आक्षेप है कि—"यह प्रकरणविरुद्ध है"; किन्तु आगे शतपथब्राह्मण का उद्धरण देते हुए ये स्वयं कहते हैं कि—'देवता लोग स्वर्ग को न जान पाये, किन्तु अश्व ने जाना।' वह अश्व यह तो है ही नहीं, तो परमेश्वर ही का वाचक है। इसलिये स्वामी जी द्वारा अश्वमेध के प्रकरण में अश्व शब्द के अर्थों का प्रतिपादन सप्रयोजन व युक्तियुक्त है।

पृ० १६८४, पं० १३ से १६८८ पृष्ठ तक जो प्रलाप करपात्री जी ने किया है, वह अनावश्यकतया बढ़ाया है, जो कि ब्राह्मणग्रन्थ का ही रूपक है। इनकी बुद्धि का कोई योगदान नहीं, कदाचित् कहीं पाया भी जाय तो वही भ्रष्टार्थ है। उस अश्वमेध में प्रश्न तो यह है कि महीधर ने जो अश्लीलार्थ किया है, वह अनुचित है या नहीं?

जो १६८७ पृष्ठ के प्रथम अनुच्छेद में लिखा है कि—"अश्वमेध का घोड़ा यहाँ पर प्रजापतिरूप से यजमान-पत्नियों द्वारा प्रार्थित है, मरे हुए घोड़े से तो सम्भोग आदि की कामना नहीं की जा सकती।"

महोदय! यहाँ कह भी कौन रहा है कि मृत घोड़े के साथ सम्भोग प्रार्थित है। तुम्हारा महीधर तो जीवित घोड़े के साथ ही सम्भोग वर्णन कर रहा है; क्योंकि वीर्यक्षेपण जीवित के साथ ही सम्भव है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १६८८, पं० १—यच्चाह—"शालग्रामे विष्णुबुद्धिरिवाश्वः प्रजापतिरेव प्रार्थ्यते" इति, तदपि निदर्शनं बालिशतापूर्णम्। न गोमयं रसगोलम् 'यस्यास्ति बुद्धिः कुणपे त्रिधातुके' इति भागवतवचनानुसारम्।

पृ० १६८८, अनु० १—यदाह—"ता उभौ चतुरः चतुरः पदः' इति मन्त्रस्य 'अश्वशिश्नमुपस्थे कुरुते, महिषी स्वयमेवाश्वशिश्नमाकृष्य स्वयोनौ स्थापयति' इत्युक्तम्, न केवलं दयानन्देन किन्तु चार्वाकेणाऽपि.....सायणोव्वटमहीधरैस्तु कातीयश्रौतसूत्रवचनानि शतपथवचनानि चानुसृत्यैव मन्त्रार्था लिखिताः।" इति, तत्तु प्रायशो भङ्गामदोन्मत्तस्येव प्रलपनम्।

इहैषोक्तिर्घटते—'लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ?' नात्रात्रपेण करपात्रेण भूमिकापाठो नेत्रपात्रीकृतो यदयं माहीधरभाष्यं दयानन्देन लिखितमिति कृत्वा प्रस्तौति।

सत्यमुक्तम्—'नास्ति बुद्धिरयुक्तस्य'। अयमिह आक्षेप्यार्थे उत्तरस्याप्रतिपत्त्या 'अप्रतिभा' नामके निग्रहस्थाने निपतितः।

पृ० १६८८, पं० १—यह कथन कि—"शालग्राम में विष्णुबुद्धि के सदृश अश्व भी प्रजापति ही प्रार्थित हो रहा है", अच्छा मान लिया, पुनः रेतःक्षेपण घोड़ा कर रहा है या प्रजापति ? महोदय ! गोबर को रसगुल्ला या शालग्राम समझ प्रयोग में मत ले आइये। यह निदर्शन मूर्खता का हो सकता है। आपके श्रीमद् भागवत में लिखा है कि—'पशु गधे की ही बुद्धि मुर्दा या धातु में देवता-भावना करती है।'

पृ० १६८८, अनु० १—यह कहना कि—"ता उभौ चतुरः' में यह अपशब्दावली ऋषि दयानन्द की है वा चार्वाक की भी हो सकती है। सायण, उव्वट व महीधर ने तो कात्यायन व शतपथ का अनुसरण कर लिखा है।" यह सब इन्होंने प्रायः भाँग के नशे में उन्मत्त हो प्रलाप किया है।

यहाँ पर यह उक्ति घटित होती है कि—'लोचनविहीन के लिये दर्पण का कोई उपयोग नहीं।' जबकि त्रपारहित श्री करपात्र को भूमिका का पाठ दिखाई ही नहीं पड़ा। जोकि उक्त 'अश्वशिश्नमुपस्थे कुरुते' आदि महीधर के भाष्य को ऋषि दयानन्द का बता रहे हैं।

सच कहा है कि 'अयुक्त अर्थात् योगविहीन को बुद्धि ही नहीं होती'। वस्तुतः इन्हें आरोप्य या आक्षेप्य अर्थ में उत्तर ही नहीं सूझा, अतः ये 'अप्रतिभा' नामक निग्रहस्थान में फँस गये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

किञ्च माहीधरं दुष्टभाष्यं दयानन्दनाम्नोद्धरताऽनेन भाष्यस्य दुष्टत्वं स्वीकृतमेवेति ध्वन्यते।

एवमयं (पृ० १६८८, पं० १०) —"कैश्चित् सामाजिकैस्त्वेतेन पातिव्रत्यभङ्गोऽपि शङ्कितः, परन्तु नियोगेनैकादशसंख्याकैः पुरुषैर्यथेच्छसन्तानोत्पादनैर्विधवाविवाहैश्च पातिव्रत्यं परिपाल्यते।" इति कथयन् 'स्वपक्षन्दोषाऽभ्युपगमात् परपक्षदोषप्रसङ्गो मताऽनुज्ञा' इति निग्रहस्थाने निपतति। कात्यायननाम्ना वाममार्गानुगतं व्याख्यानमपि वेदार्थविरुद्धं सर्वथा धिक्कार्यं बुद्धिमद्भिः। पातिव्रत्यभङ्गशङ्का तव पक्षधरैरेव कार्या त्वदर्थं मन्यमानैः।

पृ० १६८८, पं० १३—यदाह—"पत्न्यः पर्यन्तीत्यत्र न सामान्यस्त्रियो गृह्यन्ते, किन्त्वश्वमेधयजमानस्य राज्ञः पत्न्यो गृह्यन्ते।..... अपि वाऽविस्मृतमपि निह्नवन्ति क्षमयन्ति च ऋत्विग्यजमानाः।" इत्यादि निखिलं तत्स्थस्याभिप्रायानवगम एव।

अत्र करपात्रादीनामाशयबोधप्रकारो दूषित एव। एवंविधाश्वमेधविधानाय चतसृणां

दूसरे महीधर के दूषित भाष्य को दयानन्द के नाम से उद्धृत करते हुए इन्होंने भाष्य की दुष्टता तो स्वीकृत ही कर ली, यह बात ध्वनित हो रही है।

इस प्रकार यह पृ० १६८८ की पंक्ति १० पर—"कुछ सामाजिकों को इससे (अश्वसंयोग से) पातिव्रत्यभङ्ग की शङ्का हुई, परन्तु नियोग से ११ संख्यात पुरुषों से यथेच्छ सन्तानोत्पादन में विधवाविवाहों से पातिव्रत्य का पालन करा रहे हैं।" यह कहते हुए अपने पक्ष के दोष का उत्तर न दे अर्थात् दोष स्वीकृत कर परपक्ष में दोष-प्रसङ्ग देने लगने से 'मतानुज्ञा' नामक निग्रहस्थान में आ गिरे। वस्तुतः बुद्धिमानों को कात्यायन नाम से वाममार्गानुसारी वेदार्थविरुद्ध सब धिक्कारने योग्य है।

कैसी बुद्धिविडम्बना और निर्लज्जता की पराकाष्ठा है कि आप अपने ऋत्विजों द्वारा आदिष्ट यजमान-पत्नियों के अश्वसंयोग में भी पातिव्रत्य भङ्ग की शङ्का नहीं कर रहे हैं?

पृ० १६८८, पं० १३—यह कथन कि—"पत्न्यः पर्यन्ति' यहाँ सामान्य स्त्रियों का ग्रहण नहीं है, किन्तु अश्वमेध के यजमान राजा की पत्नियों का ग्रहण है।.....अथवा इस तरह ऋत्विग् और यजमान इस विशसन की विस्मृति न होने पर भी कुछ देर के लिये उसको छिपा लेते हैं और इस तरह से इनसे क्षमा माँगते हैं। इत्यादि।" यह सब उस प्रकरण के अभिप्राय को न समझना ही है।

यहाँ पर करपात्री जी आदि की आशय समझने की दिशा ही दूषित है; क्योंकि इस रूप में समझने पर तो राजा को अश्वमेध करने के लिये चार स्त्रियों की अनिवार्यता विहित माननी पड़

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पत्नीनामनिवार्यताऽऽपद्येत। तदैकपत्नीव्रतपरायणानां दाशरथिरामादीनां राज्ञामश्वमेध-विधायकता कथमपि न सम्पद्येत, यदा स्वर्णसीतामादाय समपादि।

फलतोऽयमश्वमेध आधिदैविकजगतः कस्यचिद् यज्ञस्य प्रतिरूपकः तद्यथा लौकिकाश्वमेधे सार्वभौमो राजाऽभिषिक्तः, राज्ञस्तेजःप्रतीकत्वेनाऽश्वः पूर्वार्धकृष्णः पश्चिमार्धश्वेतः शकटाकारो ललाटे श्वेतचिह्नः। अयमाधिदैविकजगतः सूर्यप्रतिरूपकः। चतस्रश्च पत्न्यो राज्ञः प्राचीप्रतीच्युदीचीदक्षिणा महिषी-बल्लभा-अनुबल्लभा-दूतपुत्री चेत्येवमुन्नेयं विपश्चिद्भिः।

पृ० १६९०, पं० ३—यच्चोच्यते—"यश्च पशूनां प्रजानां मध्ये विज्ञानवान् भवति स इमां सर्वां प्रजाम् अतति सर्वत्र व्याप्नोति' इत्यादिकं दयानन्दोक्तं मन्त्रब्राह्मणसूत्रैः सर्वथा विरुध्यत एव।"

इति वचःप्रलाप एव, ऋषिणा मन्त्रस्य ब्राह्मणमुद्धृत्य सत्यार्थपोषितत्वात्। परम्पराप्राप्ता अर्थास्तु कालान्तरे वेदविरोधकैर्वामगैरेव प्रचारिता दुर्मतिभाष्यकृद्भिः। न सा कदर्थिता परम्परा धीमद्भिरनुसर्तव्या।

सत्यैषा निर्मलोक्तिः—

जायेगी। तब एक पत्नीव्रत-परायण दाशरथि राम आदि राजाओं के अश्वमेध यज्ञ की विधान-सम्भावना ही असम्भव हो जायेगी, जब कि स्वर्ण-प्रतिमा (सीता की) को रखकर विधि सम्पन्न की गई थी।

निष्कर्ष यह है कि अश्वमेध किसी आधिदैविक जगत् के किसी यज्ञ का प्रतिरूपक है। यथा लौकिक अश्वमेध में सार्वभौम राजा अभिषिक्त होता है। राजा के तेज के प्रतीक रूप से पूर्वभाग में कृष्ण और पश्चिमार्ध में श्वेत शकटाकार ललाट में श्वेत चिह्नवाला अश्व है। यह प्रतिरूपक सूर्य है। इसकी पूर्व दिशा महिषी, पश्चिम दिशा बल्लभा, उत्तर दिशा अनुबल्लभा तथा दक्षिण दिशा दूतपुत्री—ये चार पत्नियाँ हैं। इसी प्रकार अरत्निमात्र रशना आदि का रूपक विद्वानों को समझ लेना चाहिये। यथा—'अरत्निर्निष्कनिष्ठेन मुष्टिना' इत्यमरः।

पृ० १६९०, पं० ३—यह कहना कि—"प्रजा के बीच में रहनेवाला ज्ञानी पुरुष सब पर छा जाता है' इस प्रकार दयानन्द की व्याख्या मन्त्र, ब्राह्मण, सूत्र प्रभृति सभी परम्परागत ग्रन्थों के विपरीत है।"

इनका यह कथन प्रलापमात्र है; क्योंकि ऋषि ने सत्यार्थ की सम्पुष्टि मन्त्र के ब्राह्मण को उद्धृत करके दी है। परम्पराप्राप्त अर्थ तो प्रायः वाममार्गी दुर्मति भाष्यकारों ने, जो वेदविरोधी थे, कालान्तर में किये हैं। वह कदर्थित परम्परा विद्वानों को कदापि अनुसरणीय नहीं है।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भ्राष्ट्रे यातु परम्परा तदुपरि त्वञ्चापि याहि द्रुतम्,
किन्त्वेषा श्रुतिधर्मलोपनपरा नो वा मतिर्मंस्यते ।
नाऽद्धा संज्ञपनं पशोर्विशसनं किन्त्वज्ञसंशिक्षणम्,
ऋग्वेदादिकभाष्यभूमिसुमतं ग्राह्यं सदा कोविदैः ॥

ऋग्वेदस्य १ । १६३ तमसूक्तस्य अश्वमेधगताश्वस्तु निर्विवादं सूर्योऽस्ति । तत्रैकादशे मन्त्रे 'तव शृङ्गाणि विष्ठिता' इत्यनेन लौकिकाश्वाद् भिन्नता साधिता, तस्य शृङ्गाभावत्वात् ।

पृ० १६९१, पं० ३—आक्षेपः—"यकासकौ' इत्यत्र दयानन्दकथनं निराधारमेव निर्मूलत्वात्, यकासकौ, आहलगिति, निगल्गालीति, धारकेत्यादिपदानामव्याख्यानाच्च । (निरुक्तादिरीत्या गभपसशब्दयोर्भगलिङ्गपरत्वेन व्याख्यानाच्च । राष्ट्रं विशः, पसाख्यं राष्ट्रं विशो गभसंज्ञेति संज्ञाविधानस्य प्रयोजनं वक्तव्यम् । तथात्वे 'वै' इति प्रयोगानपत्तेश्च । 'आयुर्वै घृतम्' इत्यादौ संज्ञाविधानाभावाच्च) । 'सभाधीनो राजा कार्यः' इत्यस्य च नीतिशास्त्रविरुद्धत्वाच्च । मूले तादृशार्थबोधकपदाभावाच्च । तस्मान् महीधरादिभाष्योक्त एव मन्त्रार्थो मन्तव्यः । किञ्च, 'स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च' (अमरकोषे) इति सप्ताङ्गं राज्यं भवति । तत्र

निर्मलोक्ति यहाँ सत्यरूप से घटित हो रही है—

'तुम्हारी यह कल्पित परम्परा भाड़ में जाय और उसके ऊपर से शीघ्र ही तुम भी जाओ; किन्तु यह श्रुति धर्म को लुप्त करनेवाली मति कदापि मान्य नहीं होगी । 'संज्ञपन' का अर्थ कदापि 'विशसन' या 'पशुहत्या' नहीं है; प्रत्युत विद्या और दण्ड द्वारा संशिक्षण ही है । अतः ऋग्वेदादि-भाष्यभूमिका का उत्तम मत है, जो विद्वानों को सदा ग्राह्य है ।'

ऋग्वेद के प्रथम मण्डल के १६३वें सूक्त का अश्वमेध में माना अश्व निर्विवादरूप से सूर्य है । उस सूक्त के ११वें मन्त्र में 'शृङ्ग' (किरण) शब्द तो निश्चित ही इस भौतिक अश्व की अमान्यता प्रतिपादित कर रहा है; क्योंकि उसके सींग नहीं होते ।

पृ० १६९१, पं० ३—आक्षेप—"यकासकौ' इस मन्त्र पर दयानन्द का भाष्य निराधार ही है, क्योंकि निर्मूल है । 'यकासकौ, आहलग्, निगल्गालीति, तथा धारक' इत्यादि पदों का उन्होंने व्याख्यान नहीं किया है । (निरुक्त आदि की रीति से चार पंक्तियों का हिन्दी अनुवाद पारिजात में नहीं है) । 'राजा सभा के अधीन होना चाहिये' यह नीतिशास्त्र के विरुद्ध है । मूल में वैसे अर्थ का बोधक कोई पद नहीं है । अतः महीधर आदि द्वारा किये भाष्य में कहा मन्त्रार्थ ही मानना चाहिये । तथा 'स्वामी (राजा), मन्त्री, मित्र, खजाना, राष्ट्र, दुर्ग तथा सेना' (अमरकोष)—ये राज्य के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भारतीयशास्त्रेषु सप्ताङ्गान्तर्गतस्वामिपदेन राजैव ग्राह्यो भवति।.....सभाधीनो राजा भवतीत्यत्र तु न किमपि प्रमाणम्।

समाधानम्—इति सकलमपि वैधेयत्वाधारम्, महीधरादिदूषिताश्लीलार्थन्यासीकृतमतित्वात्, आर्षशास्त्रविवेचनदृशोऽभावात्, ऋषिदयानन्दभाष्यविरोधं कर्तुं कृतप्रतिज्ञत्वादस्य भूमिकाभाष्यस्य च शतपथप्रमाणमूलानुगत्वात्। यकादिपदानां यकाऽसकाविति साकच्कौ प्रज्ञा, आहलगिति आसमन्ताद्धलं विलेखनमञ्चति सः, निगल्गलीति भृशं निगलतीव वर्तते, धारका सुखस्य धर्त्रीति पदानां यजुर्भाष्ये व्याख्यातत्वाच्च। निरुक्तादिरीत्या इति प्रभृत्यारेखाङ्कितपदानामनुवाद एव निगलितो हिन्दीकारेणाधिकमागमप्रासङ्गिकं मत्वेति मन्ये। निरुक्तप्रमाणमपि नोद्धृतं तदर्थे।

'सभाधीनो राजा कार्यः' इत्यनुशासनमयमल्पाधीतिरनधीतनीतिधर्मशास्त्रो नीतिविरुद्धं घोषयतीति श्रूयन्तां तद्वचसो नीतिशास्त्रपुष्टप्रमाणानि—यथा मनुः परिषद्वर्णने त्र्यवरां परिषदं परिभाषयते—

सात अङ्ग हैं। यहाँ भारतीय शास्त्रों में 'स्वामी' पद से राजा ही ग्राह्य होता है।.....'सभा के अधीन राजा होता है' इसमें कोई प्रमाण नहीं है।"

समाधान—इस समस्त कथन का आधार अज्ञान है; क्योंकि इन्होंने अपनी बुद्धि को महीधर आदि के अश्लीलार्थों में गिरवी रख दिया है, आर्ष शास्त्रों की विवेचन दृष्टि इन पर है नहीं। ये ऋषि दयानन्द के भाष्य का प्रत्यक्षर खण्डन करने की प्रतिज्ञा कर बैठे हैं, फिर विचारना कैसा ? पर भूमिका-भाष्य तो शतपथप्रमाणित तथा मन्त्रानुगत है। 'यकासकौ' का ऋषि ने अपने यजुर्वेदभाष्य में 'प्रज्ञा' अर्थ किया है। ये 'यकाऽसकौ' 'या' और 'असौ' के अकच् सहित सर्वनाम हैं। 'आहलग्' का अर्थ ऋषि ने 'आसमन्ताद् विलेखनकर्ता' किया है। 'निगल्गलीति' का अर्थ 'अत्यन्त निगलता सा' है तथा 'धारका' का अर्थ 'सुख को धारण करनेवाली' किया है; क्योंकि भाष्यकरणशङ्कासमाधान में तो तत्तदर्थों का दिग्दर्शन मात्र किया गया है।

'निरुक्त आदि की रीति' से लेकर कोष्ठान्तर्गत वाक्यों का अनुवाद इनके हिन्दीकार ने नहीं किया है, अर्थात् इसे यह 'निगल्गलीति' कर गया। उन्होंने शायद इसे अप्रासङ्गिक मानकर अनुवाद नहीं किया, जो ठीक किया। 'गभ' और 'पस' के अर्थ दिखाने में निरुक्त का प्रमाण भी नहीं दिया।

'सभाधीन राजा हो' इस अनुशासन को यह अल्पाध्ययनशील नीतिशास्त्रों का अध्ययन न करने से नीतिविरुद्ध घोषणा करने लगा है। ऋषि के वचनों की पुष्टि में नीतिशास्त्र व धर्मशास्त्र के प्रमाण लीजिये। महाराज मनु ने परिषद् वर्णन में 'त्र्यवरा परिषत्' की परिभाषा की है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋग्वेदविद् यजुर्विच्च सामवेदविदेव च।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये॥ (१२। ११२)

राजा तत्परिषदोऽनुशासने कार्यं कुर्वीत, यथा—

ब्राह्मणान् पर्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत् तेषां च शासने॥ (मनु० ७। ३७)

अत्र स्पष्टं हि विद्वत्त्रयपरिषच्छासनं राज्ञ उपरि। सभेयः पारिषद्यो वा मन्वादि-शास्त्रानुसारमेव भवितुमर्हेत्। विदुरोऽपि सभ्य एव धृतराष्ट्रसभाया अन्यैः सहासीत्। तदनुशासनाऽमतौ विनाशः प्रत्यक्षीभूत एव समेषाम्।

मूले तादृशार्थबोधकपदं तु नासूयाऽपहतचक्षुषां भवादृशामक्षिलक्षीकृतं भवति, तत्तु केवलं शास्त्राप्रतिहतगाम्भीर्यावगाहनदक्षस्वच्छमतीनामृषितुल्यानन्दसदृशानामेव भवति। यथाऽत्र 'राष्ट्री' शब्दोऽस्ति, राष्ट्रमस्य राज्ञोऽस्तीति, एवं मत्वा कदाचिन्नैकाधिकारी स्वैरी भवेद् राजा तस्मात् शास्त्रानुकूलं व्याख्यातमिह, यच्च शतपथादिप्रमाणितम्।

'ऋग्वेद, यजुर्वेद और सामवेद के जाननेवाले ही धर्मसंशय के निर्णय करने में 'त्र्यवरा परिषद्' के अङ्ग हैं।'

राजा इस परिषद् (सभा) की अधीनता में कार्य करे। यथा—

'राजा प्रातः उठकर ब्राह्मणों का पर्युपासन (सेवा-सत्सङ्ग) करे, जो ऋगादि तीन वेदों के विद्वान् हैं उनके शासन में सदा रहे।'

यहाँ राजा के ऊपर विद्वत् परिषत् का शासन स्पष्ट है। सभा या परिषद् में होने के कारण ही इन्हें 'सभेय' या 'पारिषद्य' कहते हैं। धृतराष्ट्र की सभा के विदुर नीतिविद् भी सभ्य या सभेय थे तथा अन्य भी सभेय थे। इस सभा के परामर्श को न मानने के परिणाम से ही सब का विनाश हुआ।

आपकी दृष्टि के असूया से विलुप्त होने के कारण आपको उस अर्थ का बोधक पद दिखाई नहीं पड़ा। वह तो केवल शास्त्रों में गाम्भीर्य के अवगाहन में अप्रतिहत दक्ष तथा निर्मल मतिसम्पन्नों को ही दिखाई पड़ सकता है। जो कि इस मन्त्र में 'राष्ट्री' शब्द है, जिसका राष्ट्र है वह राष्ट्री कहलाया। राजा 'राष्ट्र का मैं ही एकाकी स्वामी हूँ, मेरे ऊपर कोई नहीं' ऐसा मानकर कदाचित् एकाधिकारी स्वच्छन्दचारी न हो जावे, अतः ऋषि ने शास्त्रानुकूल स्पष्ट व्याख्या कर दी, जो कि शतपथादि से प्रमाणित है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'समज्या परिषद् गोष्ठी सभासमितिसंसदः ।' (इत्यमरः) इति प्रमाणेनाऽद्याऽपि भारतराज्ये संविधाननिर्माणसंशोधनस्य संसदधीनत्वं संविधानाधीनत्वं च राष्ट्रपतेर्मन्त्रि-परिषदश्च प्रत्यक्षमेवाधीनता । तवोद्धृतप्रमाणेऽपि अमात्यसुहृच्छब्दाभ्यां सभाया एव ध्वननम् ।

एवं राज्ञः सभाधीनत्वं प्रमाणितम्, पुनरस्य वचः 'मुखमस्तीति वक्तव्यं यद्वा तद्वाऽप्यनर्गलम्' इति साधकं नूनमिति दिक् ।

पृ० १६९२, पं० ८—"तद् मूलाक्षरासम्बद्धमेव । प्रतिलामीत्यस्य तु व्याख्यानमेव न कृतम्" इति यदाह, तदप्ययुक्तम्, मन्त्रमूलाक्षरमनुबध्य शतपथं प्रमाणीकृत्य व्याख्यानात् । प्रतिलामीत्यस्य स्निह्यामीत्यस्याऽपि व्याख्यानात् ।

यदाह—"कात्यायनेनाधिमेथनकर्मणि विनियोजितत्वाद् ऋत्विजां यजमानपत्नीभिः कुमारीभिर्दासीभिः सहाधिमेथनं कर्म प्रचलति" इत्यस्मिन्नधिकं किं कथयामो यदि यतिवरस्य तेऽपि महीधरभाष्यप्रकटितप्रकारमधिमेथनमश्लीलं कर्म प्रशस्तं मतं तदाऽब्रह्मण्यम् । भवेन्नाम सर्वनाशः संस्कृतेः परन्त्वधिमेथनं करपात्रदिशा प्रचलिष्यत्येव । सत्यमुच्यते—

अमरकोष में 'समज्या, परिषद्, गोष्ठी, सभा, समिति और संसद्' आदि पर्यायवाची हैं । इसी प्रमाण से आज भी भारत राज्य में संविधाननिर्माण व संशोधन संसद् के अधीन और संविधान के अधीन राष्ट्रपति (राजा) और मन्त्री परिषद् की अधीनता प्रत्यक्ष है । तुम्हारे उद्धृत प्रमाण में भी 'अमात्य' और 'सुहृत्' शब्दों से भी इनके सभी के अङ्ग होने का ध्वनन है ।

इस प्रकार राजा का सभाधीनत्व है, तब तो पारिजातकर्ता का वचन यही सिद्ध कर रहा है कि 'जब मुख मिला हुआ हो, तब जो चाहो सो बको ।'

पृ० १६९२, पं० ८—"इस मन्त्र का भाष्य भी निर्मूल और असम्बद्ध है । यहाँ भी 'प्रतिलामि' शब्द का व्याख्यान नहीं किया ।" करपात्री जी का यह कथन अयुक्त है, मन्त्रमूलक अक्षरों के अनुरूप शतपथ का प्रमाण उद्धृत कर ऋषि ने व्याख्यान किया है । यजुर्भाष्य में 'प्रतिलामि' का व्याख्यान 'स्निह्यामि' अर्थात् 'स्नेह करता हूँ' किया है ।

यह कथन कि—"कात्यायन के द्वारा अधिमेथन कर्म में इनका विनियोग करने के कारण ऋत्विजों का यजमान-पत्नियों, कुमारियों और दासियों के साथ अधिमेथन कर्म चलता ही है" भी ऋत्विजों को कदाचारी बनने की छूट है । इसमें और अधिक क्या कहें । यदि आप संन्यासी को भी यह अश्लील 'अधिमेथन' कर्म प्रशस्त लग रहा है, तो अनर्थ और महापाप की पराकाष्ठा है । चाहे आर्य संस्कृति का विनाश ही क्यों न हो जाये; परन्तु करपात्रीजी की प्रेरणा से तो यह 'अधिमेथन' चलेगा ही । सच कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतात्,
शीलं शैलतटात् पतत्वभिजनः सन्दह्यतां वह्निना ।
आचारः क्षयमेतु वाऽपि कुलटा दारा भवेयुर्ध्रुवम्,
कातीयन्त्वधिमेथनं प्रचलतु त्वत्प्रीतये किन्तु धिक् ॥

पृ० १६९३, पं० ६—तस्मादुव्वटमहीधराद्याचार्यकृतव्याख्यानमेव वेदानुकूलम्" इति दुरर्थं पोषयतोऽस्य न लज्जाश्लेषः ।

१६९४ पृष्ठेऽपि—"सिद्धान्ते तु श्रौतसूत्ररीत्या यजमानपत्नीनां कुमारीणां च ऋत्विग्भिरुपहासः प्रकृतः" इति ब्रुवतोऽस्य सिद्धस्य नान्तो जातो नाऽपि वा शतधा विदीर्णाऽस्य जिह्वा या न वचने जिह्वेति जिह्वा।

पृ० १६९५, पं० १—यदाह—"एको राजेत्यर्थः कल्पितः। अन्यदपि कल्पितम्" इति समस्तं शतपथोद्धरणमविचार्यैव कथ्यतेऽनेन। अत्र राष्ट्री इत्यर्थो राजाऽस्त्येव। आद्या-(भक्ष्या) मिति पाठेन 'न पुष्टं पशुं मन्यते' इत्यस्यार्थः—'मांसाहारी मांसभक्षणेच्छां करोति'

'जाति चाहे रसातल को चली जावे, गुणगण इसके भी नीचे चला जावे, शील पर्वत की चोटी से गिरकर चूर-चूर हो जावे, अभिजन चाहे सन्ताप की आग में जल जावें, सदाचार का चाहे क्षय हो जावे और स्त्रियाँ चाहे निश्चित ही कुलटा बन जावें; परन्तु धिक्कार है कि कात्यायन का यह 'अधिमेथन कर्म' आपकी प्रीति के लिये चलता ही रहे।'

पृ० १६९३, पं० ६—"इसलिये उव्वट, महीधरादि का व्याख्यान ही वेदानुकूल है" यह दुर्वचन कहते हुए इसे लज्जा भी नहीं आती।

१६९४ पृष्ठ पर भी—"सिद्धान्त में तो श्रौतसूत्र रीति से यजमानपत्नी और कुमारियों का उपहास प्रकृत विषय है" इसे सिद्धान्त बतानेवाले इस सिद्ध (पारिजातकर्ता) का अन्त भी नहीं हुआ और इनकी जीभ के टुकड़े-टुकड़े भी न हुए, जो कि यह कहते हुए यह कुटिला नहीं लजाती।

पृ० १६९५, पं० १—"एक राजा की बात केवल आपके मन की कल्पना है। इसलिये राजा किसी पुष्ट पशु को देखकर उसका मांस खाना चाहता है, यह भी कोरी आपकी कल्पना ही है।" इन्होंने यह कथन शतपथोद्धरण पर विना विचार किये कहा है। इससे पूर्व 'आद्या' अर्थात् 'भक्ष्या' यह पाठ होने से 'पुष्ट पशु को नहीं मानता' अर्थात् 'मांसाहारी तो मांसभक्षण करने की इच्छा करता है' यही अर्थ करना ठीक है। महर्षि दयानन्द तो गुण, कर्म और स्वभाव से वर्ण-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यप्यर्थः सम्यगेव। गुणकर्मस्वभावत एव वर्णो महर्षिणा मन्यते न तु केवलकर्मणा यथा च भवान् लिखति—'कर्मणा वर्णः' इति। अत एव भीरुत्वं वैश्यपुत्रस्य शूद्रस्य च मौर्ख्यमेवेत्यर्थः प्रपोष्यते।

पृ० १६९५, पं० ११—यच्चाह—"उत्सक्थ्या०' इति मन्त्रभाष्ये वृषन् इत्यस्य सभाध्यक्षः कथमर्थः? अस्यां प्रजायामिति कस्य शब्दस्यार्थः? अञ्जिशब्दस्य ज्ञानसुखन्यायाः कथमर्थाः? 'कामुकः सन् नाशमाचरति, तं त्वमवगुदमधः शिरसं कृत्वा ताडयित्वा कारागृहे धेहि' इति कस्य पदस्य वाक्यस्य वार्थः, अवशब्दस्याधोऽर्थत्वात्। ताडनं कारागृहनिवेशनमित्यादिकं तु सर्वं निर्मूलमेव। उत्सक्थीत्यस्य व्यभिचारिणी स्त्री कथमर्थः? समुच्चारणं दुर्दशा कथम्? महीधरस्य निन्दनं कृत्वा स्वमेव पातकिनं करोषि, इति धार्ष्ट्यम्।" करपात्रिन्! जनतां नरके पातयतीति पातकी भवानेव भवतश्च महीधरो यः पवित्रवेदमन्त्रेषु 'अधिमेथन' कर्म ऋषिसमर्थितं प्रतिपाद्य ऋत्विग्भिः कुमारीभिर्दासीभिश्च सह व्यभिचारोऽनुमन्यते। तदा महापातकी तु भवानपत्रपः।

वैदिका हि यौगिकाः शब्दा इति सिद्धान्तमनुसृत्य वृषा वर्षयिता, राज्यप्रकरणे

व्यवस्था मानते हैं, न कि केवल कर्म से वर्ण होता है। इसीलिये भूमिका-व्याख्यान में वैश्य पुत्र की भीरुता और शूद्र की मूर्खता बताई है। इससे यह भी ध्वनित है कि इन लक्षणों से वैश्य या शूद्र पहचाना जायेगा। 'जन्मना शूद्र में मूर्खता है' ऐसा ऋषि नहीं कह रहे हैं।

पृ० १६९५, पं० ११—यह कहना कि—"उत्सक्थ्या०' इस मन्त्र के भाष्य में 'वृषन्' का सभाध्यक्ष अर्थ कैसे हो गया? 'इस प्रजा में' यह अर्थ किसका है? 'अञ्जि' इसका ज्ञान, सुख, न्याय अर्थ कैसे हुआ? 'कामुक होता हुआ नाश का आचरण करता है' यह भी किस पद का अर्थ है? 'अवगुद' शब्द का अर्थ नीचे सिरवाला कैसे होगा? कारागृह में डालना किसका अर्थ है? 'अव' शब्द का अर्थ नीचे होता है। 'उत्सक्थी' शब्द का व्यभिचारिणी अर्थ कैसे हुआ? 'समुच्चारण' का अर्थ दुर्दशा कैसे हुआ? महीधर की निन्दा करके दयानन्द स्वयं को पातकी बना रहे हैं।"

करपात्री जी! 'जनतां नरके पातयतीति पातकी' अर्थात् आप और आपके महीधर पवित्र वेद-मन्त्रों से 'अधिमेथन' कर्म को ऋषि का कथन कहकर ऋत्विजों को कुमारी और दासियों से व्यभिचार करा रहे हैं, तब महापातकी तो आप ठहरते हैं। आपकी निर्लज्जता अपरम्पार है।

वैदिक शब्द यौगिक हैं, इस सिद्धान्त के अनुसार 'वृषा' का अर्थ वर्षा करनेवाला, राज्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सभाध्यक्षः प्रजासु हितसाधनेनानन्दं वर्षयति, ततः उन्नेयमस्यां प्रजायामिति । अञ्जिशब्दः 'अञ्जू व्यक्तिप्रक्षणकान्तिगतिषु' इति धातोः सिध्यति, अतो ज्ञानादयोऽर्था युक्तियुक्ताः । अतितरां विस्मयो यदयमेतावताऽप्यश्लीलभाष्यं कुर्वाणं महीधरं नाभिनन्दति, प्रत्युत अभिनन्दयत्येव ।

सम्प्रति सदसदन्वेषणपरा विचक्षणा लोककल्याणसिसाधयिषवः पश्यन्तु यदेवंविधैरेव पञ्चाननचर्मधारकशृगालैरिव विद्वन्नाम कलङ्कयद्भिः कदाचाररतैः संस्कृतभाषाविज्ञैरपि शास्त्रश्रद्धालवः प्रज्ञाविरहिता एवं निस्त्रपं प्रतार्यन्ते आत्मनः पण्डितान् मन्यमानैः सडिण्डिम-घोषणपुरःसरम् । तद्यथा—

पृ० १६९६, पं० १२—"शास्त्रप्रामाण्यमाश्रित्य स्वीयदुहितृभगिन्यादयोऽन्येभ्यो

प्रकरण में प्रजाहित-साधक सभाध्यक्ष, विद्याप्रकरण में विद्वान् सुख व ज्ञानानन्द की वर्षा करनेवाला अर्थ होगा, तब वह सुखवर्षा प्रजा में ही तो करेगा, अतः 'इस प्रजा में' यह अर्थ स्वयं उन्नेय होगा। वेदमन्त्र में 'स्त्रीणां जीवभोजनः' अर्थात् स्त्रियों के जीवन को खानेवाला कामुक ही होगा। निरुक्त में 'नि' और 'अव' उपसर्ग नीचे करने और दबाने अर्थ में प्रयुक्त होते हैं, जैसे—'निगृह्णाति' तथा 'अवगृह्णाति'। गुद पर दबाव अधः शिर कर टाँगने पर ही पड़ता है। फिर राजा अपराधी को अधः शिर करके कोई न्योता थोड़े ही खिलायेगा, वह तो प्रताड़ित कर कारागृह में ही भिजवाएगा।

'अञ्जि' शब्द व्यक्ति, प्रक्षण, कान्ति और गत्यर्थक 'अञ्जू' धातु से बनता है। गति के तीन अर्थ—ज्ञान, गमन और प्राप्ति हैं। यहाँ ज्ञान अर्थ लिया है। कान्ति अर्थ से काम्यमान सुख और न्यायकारी राजा या सभाध्यक्ष से काम्यमान न्याय होगा।

'उत्सक्थि' का अर्थ व्यभिचारिणी ही होगा; क्योंकि 'सक्थि' कहते हैं जानु (घुटने) के ऊपर के भाग को। 'ऊर्ध्वं सक्थिनी यस्याः सा' अर्थात् जिसकी जानु का ऊपरी भाग प्रायः ऊपर को ही उठा रहे।

भक्षणार्थक 'चर्' धातु होने से 'चारय' से पूर्व सम् और समासगत होते हुए भी उत् उपसर्ग को पुनः प्रयोग में लाने पर 'समुच्चारय' का अर्थ दुर्दशा करना ही होगा।

अब सदसद्विवेचनशील लोककल्याण-इच्छुक विद्वान् लोग देखें कि ऐसे ही शेर की खाल ओढ़े हुए शृगालों, कदाचारनिरत, विद्वन्नाम को कलङ्कित करनेवाले संस्कृतभाषा-विज्ञों के द्वारा ही शास्त्रविमुख प्रज्ञारहित श्रद्धालु लोग इस प्रकार निर्लज्जता से ठगे जा रहे हैं, फिर भी ये लोग सडिण्डिमघोष अपने को पण्डित मान रहे हैं। यथा देखिये—

पृ० १६९६, पं० १२—"शास्त्र को प्रमाण मानकर अपनी पुत्री, बहिन आदि का किसी

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दीयन्ते, अन्यतश्च पत्न्यर्थं कन्या आनीयन्ते, तत्र तर्कस्यावकाशो नास्ति, तथैव शास्त्रोक्तानि कृत्यान्यप्यनाशङ्कनीयानि। शास्त्रमाश्रित्यैव गङ्गास्नानेन पापं क्षीयते, कर्म-नाशाजलस्पर्शे च पुण्यं क्षीयते, तथैवाश्वमेधिके राजपत्नीनां महिष्यादीनां मृताश्वेन सह शयने मृताश्वस्य पृथक्-कृतेषु संस्कृतेष्वङ्गेषु तदीयशिश्नस्य स्पर्शः स्वोपस्थोपरि स्थापनादिक-मृत्विजां यजमान-कुमारी-पत्नी-दासीनां चाश्लीलभाषणं सर्वमपि कृत्यं पुण्यायैव, शास्त्रचोदितत्वात्।" इत्यखिलमवल्गमनर्गलम्।

इदमिह सन्दृभ्णामि कथानकेनैकेन यदेकदा एका वरा नाम्नी राज्ञी अवरानाम्नीं स्वदासीं नीत्वा गङ्गास्नानार्थं गताऽऽसीत्, राजा च तेषु दिवसेषु प्रवासे देशाद् बहिर्जगाम। राज्ञी एव शासनं चालयन्ती आसीत्। गङ्गायास्तटे स्वस्ववस्त्राणि रक्षित्वा ते गङ्गायामवतीर्णे। स्नात्वा च पूर्वमायाता दासी राज्ञ्यो वस्त्राण्यधारयत्, अनन्तरं राज्ञी निःसृता। दासी अवदत्—भ्रान्त्याहं भवत्या वस्त्राण्यधारयम्, प्रासादे परिवर्तयिष्यामि, क्षमस्व। राज्ञी दास्या वस्त्राण्यधारयत् तद्दास्याः सानुनयानुरोधेन यदद्याहमपि तव दासी भूत्वाऽपि बहुमूल्यवस्त्रगौरवसुखमनु-

---

के साथ विवाह किया जाता है और पत्नी बनाने के लिये दूसरों से कन्या लाई जाती है, इसमें तर्क का कोई सहारा नहीं लिया जाता, उसी तरह शास्त्रोपदिष्ट अन्य कार्यों के प्रति भी शंका उठाने की कोई आवश्यकता नहीं है। शास्त्र के कथनानुसार ही गङ्गास्नान से पाप का और कर्मनाशा में स्नान करने से पुण्य का नाश होता है। उसी प्रकार आश्वमेधिक यज्ञकर्म में राजा की पत्नियाँ महिषी आदि का मृताश्व के साथ शयन करने पर पृथक् किये व संस्कार किये अङ्गों में उसके शिश्न का स्पर्श अपनी उपस्थ (योनि) के ऊपर स्थापन करना ऋत्विज्, यजमान-पत्नी, कुमारी आदि का अश्लील भाषण सभी कृत्य पुण्य के लिये हैं; क्योंकि शास्त्र ने कहा है।"

इनका उक्त समस्त कथन बेलगाम और अनर्गल है। यहाँ पर हम एक कहानी को सन्दर्भित करना चाहते हैं—

एक बार एक राज्य में एक वरा (भलाई) नाम की रानी थी और अवरा (बुराई) नाम की उसकी दासी थी। रानी अपनी दासी को लेकर गङ्गास्नान करने गई। राजा उन दिनों प्रवास पर विदेश गया हुआ था। रानी ही शासन चलाया करती थी। तट पर वस्त्र रखकर वे दोनों गङ्गा में उतर गईं। दासी नहाकर पहले आ गई, उसने आते ही रानी के वस्त्र धारण कर लिये। बाद में रानी स्नान कर निकली तो दासी बोली—क्षमा कीजिये, मैंने भ्रम से आपकी पोशाक पहन ली, महल में चलकर बदल लूँगी। रानी ने दासी के कपड़े पहन लिये। उस दासी के सानुनय अनुरोध से कि चलो आज मैं भी तुम्हारी दासी होकर बहुमूल्य (मान्य) वस्त्रों का गौरवसुख अनुभव

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भविष्यामि। अग्रे चाऽप्यनुनयं कृतवती यत् सिंहासनस्थितेरपि कियत् सुखं भवतीत्यप्यनुभवितुं भवती अनुमंस्यते कृपया। सरला राज्ञी तु तस्यामतिस्नेहं कुर्वाणाऽभूत्। साऽङ्गीकृतवती। कालान्तरे विभवादिदानेनामात्यादयोऽप्यनया राज्ञीवेशधारिण्या दास्या स्ववशीकृताः।

कालेऽस्मिन्नेकसहृदयेन महात्मना प्रबोधिता राज्ञी चेतनामापेदे तां तदासनमधिष्ठापयितुम्। तदा राज्ञी अपि रहस्यमधीत्यावोचद् भोः! त्वं पूर्वमनुनयेन छलेन सिंहासनमध्यरोहः, साम्प्रतं वेशमवतार्य मह्यं देहि सिंहासनं च रिक्तं विधेहि। तदा दासी अकथयद् यदिमानमात्यादीन् पृच्छ त्वं यत् त्वन्तु मम दास्यसि, एषोक्तिर्न विश्वसनीया ते। राज्ञी अकथयद् यन्मे पती राजा विदेशेऽस्ति साम्प्रतम्। दासी अकथयद् यन्मम पतिस्त्वत्रैव, सोऽपि राजा परं राज्यमहं चालयामि।

ते समेऽपि कुत्सिताचारा लोभिनोऽमात्यादयः साक्ष्यमदुर्यत् सत्यमेषा राज्ञी एव, त्वं दास्यसि, अन्यथा व्यतीते बहुतिथे काले कथं त्वं मौनमवालम्बथाः।

प्रजाजनेषु यद्यपि केचन सत्यप्रिया आप्ता अकथयन्नपि यदेषा मिथ्याचारिणी गङ्गायां

कर लूँगी। आगे भी उसने अनुनय कर लिया कि सिंहासन-स्थिति का भी सुख कितना होता है, यह भी अनुभव करने के लिये आप मुझे कृपा कर अनुमति देंगी। सरलहृदय रानी तो उस दासी में अतिप्रेम करती ही थी, उसका अनुरोध स्वीकार कर लिया। कालान्तर में धन आदि देकर रानी का वेश धारण करनेवाली इस दासी के द्वारा मन्त्री आदि सभी अपने वश में कर लिये।

इसी काल में एक सहृदय विद्वान् महात्मा योगिराज उधर आ निकले, उन्होंने उस रानी को सावधान किया। रानी सजग हुई और इन ऋषिवर योगिराज ने प्रयास भी किया कि रानी उस सिंहासन पर बैठ जाये। तब रानी भी इस षड्यन्त्र रहस्य को समझ गई और बोली—अरे! तुम इस छल भरे अनुनय से सिंहासन पर बैठी हो, सिंहासन मेरा है, इसे रिक्त कर दो। रानी बनी दासी बोली कि इन मन्त्री आदि से पूछ लीजिये कि तुम तो मेरी दासी हो, अतः यह तुम्हारा कथन विश्वसनीय नहीं है। रानी कहने लगी कि मेरे पति तो इस समय विदेश में रह रहे हैं। दासी बोली कि मेरे पति तो यहीं हैं पर राज्य मैं चला रही हूँ।

वे सभी लोभी, लालची, कामी मन्त्री आदि गवाही देने लगे कि यही सच्ची रानी है, तुम तो दासी हो, दासी होकर रह भी रही हो, नहीं तो इतना काल व्यतीत होने पर भी तुम मौन क्यों साधे रहीं।

प्रजाजनों में से यद्यपि कुछ सत्यप्रिय आप्त जनों ने कहा भी कि इस मिथ्याचारिणी ने गङ्गा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्नात्वा छलेन वेशं सत्यराज्ञ्या अधारयत्। पश्यन्तु, तेजस्वि देदीप्यमानं सर्वराजलक्षण-सम्पन्नमस्या मुखमेषा खलु वञ्चिता। परं स्वार्थसाधकबहुमतप्रजाजनसमक्ष आप्ताः पराजिताः।

अयं हि दृष्टान्तो दार्ष्टान्तिकमिदं यदाद्यमहर्षिभिः कृता व्याख्या वास्तविकराज्ञी वरा, शास्त्रं प्रत्यन्धश्रद्धा गङ्गास्नानम्। अत्रान्तरे नवीनमहीधरादिव्याख्या अवरानाम्नी दासी अस्ति। अश्वमेधादियज्ञोपयोगितैवानुनयस्तस्या दास्याः।

आद्यमहर्षिव्याख्या राज्ञी बहुकालं वेदवैधसिंहासनमान्यतया राज्यमकरोत् परं कालान्तरे वराव्याख्यायाश्छलेन मान्यासनमधिकृतवती अवरा व्याख्या। तदा ऋषिदयानन्द-सदृशमहात्मना प्रबोधिता सती पुनरार्षव्याख्या सिंहासनेप्सयाऽवरामकथयत्। तदा पौराणा

में नहाने के बहाने छल से सच्ची रानी की पोषाक पहन ली थी। और भी देखो, इसका मुख सच्चाई के तेज से देदीप्यमान हो रहा है, सारे राजलक्षण तर्कसङ्गत इसी में घटित हो रहे हैं, इसे धोखा दिया है। परन्तु काम लोभ मद (शराब) मोह आदि से ग्रस्त स्वार्थसाधक प्रजा के बहुमत के समक्ष आप्त लोग भी उपेक्षित और पराजित हो गये।

यह तो हुआ दृष्टान्त, इसका दार्ष्टान्तरूपक यह है कि प्राचीन महर्षियों ने जो वास्तविक सच्ची वैज्ञानिक (वेद की) व्याख्या की थी, वही सच्ची वरा (श्रेष्ठा) नाम की रानी है। शास्त्रों के प्रति अन्धविश्वास ही गङ्गास्नान है। इसी बीच में सायणोव्वटमहीधरादि की कुव्याख्या ही अवरा (निकृष्ट) नाम की दासी है। अश्वमेधादि यज्ञों की उपयोगिता का कथन ही उस दासी का अनुनय-विनय है।

पहले तो आर्ष व्याख्या रानी बनकर बहुकाल तक सृष्टि के आदि से राज्य करती रही और वेद के मान्य सिंहासन पर बैठी रही; परन्तु कालान्तर में अन्धविश्वास के भकाभोंड़े में छल से महीधरादिकृत व्याख्या दासी वेदसिंहासन पर आ बैठी और लोगों में उस अवरा दासी व्याख्या को वेद की सच्ची वरा व्याख्या रानी के रूप में प्रचारित और प्रसारित किया। तब समाधि को छोड़ वेदोद्धार का व्रत लेकर योगिराज महात्मा दयानन्द ने योगसमाधि में समझा कि यह दुष्ट व्याख्या तो दासी है, तब आर्ष व्याख्यारूपी रानी को चिताया कि तुम्हें ही इस वेदसिंहासन पर बैठने का अधिकार है और ऋषि ने जीवन भर प्रयास भी किया कि कुव्याख्या दासी को हटाकर आर्ष व्याख्या रानी को सिंहासन प्राप्त हो। दासी ने कहा कि इस सिंहासन की स्वामिनी तो मैं हूँ, पूछो सायण से, पूछो उव्वट और महीधराचार्य से। वरा ने कहा—अभी ये कुछ भी कह सकते हैं, मेरा पति (वेद) विदेश के पुस्तकालयों में अपने अनुचरों (आर्षग्रन्थ-भाष्यों) के साथ गया हुआ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

रूढमतयः पौरोहित्यकर्मकाण्डाडम्बरैः प्रज्ञावैभवमपहरन्तो लोलुपाः करपात्रसदृशाः साक्ष्यमदुर्यदवरैव वास्तविकी राज्ञी सायणोव्वटमहीधराद्याराधिता ।

एवं केचन तर्कसहायाः सदसद्विवेकशीलाः साक्षीभूताः प्रमाणयन्त्यपि । परं पुराणमतान्धबुद्धयोऽन्धश्रद्धालवो बहुमता अद्यापि निह्नुतवेशा दासीमवरामेव वराराज्ञीरूपेण समर्थयन्ते।

तथैव पारिजातकार एषोऽन्धविश्वासान्धकारे जनतां भ्रामयितुं सततं यतते समर्थयन् यथोपरि। परं न गङ्गास्नानेन पापं क्षीयते, शरीरशुद्धिस्त्वपेक्ष्यते । दुर्जनतोषन्यायेन तथात्वेऽपि वेदगिरिज्ञानगङ्गोत्रीस्रोतसः प्रोद्भूतपवित्रार्षप्रतिभाप्रखरप्रवाहवती गङ्गाऽपि त्वेतादृग्भिः स्वमलिनमानसजन्यकुविचारमलप्रवाहवत्कुल्यानिपातनेन प्रदूषिता मानवकलेवरमपि प्रदूषयन्ती अपारपापपङ्ककलङ्कप्रबलप्रवाहे पातयति प्रतिपलम् । एवंविधानि वेदानां प्रदूषित-

---

है । दासी ने ब्राह्मणग्रन्थ (भी वेद है) की ओर संकेत करते हुए कहा कि मेरे पति तो यहीं पर हैं। कात्यायन ऋषि के परामर्श से राज्य की सञ्चालिका मैं ही हूँ।

आचार्य सायण, दासी में आसक्त अश्लीलाचार्य महीधर, दासी से विनियोग का नियोग करनेवाले कात्यायन आदि मन्त्री एक स्वर से बोल उठे तथा तब पुराणरूढमति,प्रजा-प्रज्ञा वैभव के अपहरणकर्ता श्री करपात्र सदृश संन्यास वेशधारी लालची साक्ष्य-पुष्टि में खड़े हो गये और कहने लगे कि यह अवरा ही वास्तविक रानी है, इसी की आराधना सायण, उव्वट और महीधर आदि ने की है ।

कतिपय तर्कशील सदसद्विवेकी इस अवरा को प्रमाणित नहीं भी मानते हैं; परन्तु पुराणमतान्धबुद्धि, अन्धश्रद्धालु बहुमतवाले हैं, जो आज भी छद्मवेशी दासी अवरा को ही वरा राज्ञी के रूप में समर्थन देते हैं।

इसी प्रकार यह पारिजातकर्ता भी अन्धविश्वास के अन्धकार में उक्त अवरा का समर्थन करता हुआ जनता को भ्रान्त रखने का निरन्तर प्रयास कर रहा है, जैसे कि ऊपर प्रकाशित है । गङ्गास्नान से शरीरशुद्धि तो होती है, किन्तु 'न वारिणा शुध्यति चान्तरात्मा' जल से अन्तरात्मा शुद्ध नहीं होती । दुर्जनतोष न्याय से वैसा मान भी लो तो वह गङ्गा तो वेद पर्वत के ज्ञान-गङ्गोत्री के स्रोत से समुद्भूत, पवित्र आर्ष प्रतिभा के प्रखर प्रवाहवाली गङ्गा भी, ऐसे लोगों ने उनके मलिन-मानस-जन्य कुचिन्तन के मलप्रवाहवाले गन्दे नालों को उस पवित्र ज्ञानगङ्गा में गिराकर प्रदूषित कर दी है । जो कि मनुष्य के कलेवर को भी प्रदूषित कर अपार पाप कलङ्क के प्रबल प्रवाह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भाष्याणि जनमानसेषु वेदान् प्रति घृणामुत्पादयन्ते ।

पृ० १६९७, पं० १३—कात्यायनशतपथप्रमाणान्युद्धरन्नयमाह—"कथमेतन्न दृष्टं दयानन्देनेत्याश्चर्यम्।" इति समादध्मो यन् महर्षिणा परमहंसेन तु सर्वं दृष्टं, परं यत् कच्चरमतिष्ठत् तत् फल्गु अपास्य सारं ग्राह्यममन्यत पयस्तद् गृहीतम्। तथा चोक्तम्—

'सारं ततो ग्राह्यमपास्य फल्गु। हंसो यथा क्षीरमिवाम्बुमध्यात्॥'

अत एवोक्तं संस्कारविधौ यद् ब्राह्मणं सूत्रं वा वेदविरुद्धं हिंसापरकं भवेत् तन्न प्रमाणयितव्यम्। (वेदारम्भसंस्कारः)

एतदग्रे पुनरुक्तिभिः पिष्टपेषणं विधाय १७१६ पृष्ठानि यावदनर्गलमभ्यधायि ग्रन्थकलेवरवर्धनार्थम्।

तत्राऽपि यदयमाह (पृ० १७१०, पं० १२) —"सांख्यैर्यथा हिंसाया अनर्थजनकत्वेऽपि क्रतूपकारकत्वमभ्युपेयते।.....पूर्वमीमांसकैस्तु विहितस्यानर्थकरत्वाऽभावेऽपि विधानादेवाश्लीलभाषणानन्तरं प्रायश्चित्तरूपेण 'दधिक्राव्णो अकारिषम्' इत्यादिमन्त्रस्य जपो-

---

में प्रतिपल गिरा रही है। वेदों के ऐसे प्रदूषित भाष्य जनमानसों में वेदों के प्रति घृणा ही उत्पन्न कर रहे हैं।

पृ० १६९७, पं० १३—कात्यायन और शतपथ के प्रमाणों को उद्धृत कर पारिजातकार कहते हैं कि—"स्वामी दयानन्द को ये प्रमाण क्यों नहीं दिखाई पड़े, यह आश्चर्य है।"

महोदय! आपको ठीक ही आश्चर्य है कि ऐसे विशालप्रज्ञ दूरदर्शी परमहंस महर्षि की दृष्टि से ये प्रमाण ओझल रहे। हे अदूरदर्शिन्! इसका समाधान यह है कि महर्षि को ये सभी प्रमाण दिखाई पड़े थे, पर जो अप्रामाण्य कूड़ा-कचरा था, उसे निःसार समझकर छोड़ दिया और सार को ग्राह्य समझा। ठीक ही कहा है—'हंस सार-सार को गहि रहै, परिहरि वारि-विकार।' क्योंकि उनकी 'ऋतम्भरा' प्रज्ञा थी, इसीलिये संस्कारविधि में लिखा कि 'जो ब्राह्मण व सूत्रग्रन्थ वेदविरुद्ध हिंसापरक हो, उसे प्रमाण नहीं मानना चाहिये।' (वेदारम्भसंस्कार)

इसके आगे पुनरुक्तियों से पिष्टपेषण करके १७१६ पृष्ठ तक ग्रन्थ का शरीरवर्धन मात्र है।

उसमें भी कहा है कि (पृ० १७१०, पं० १२ से)—"सांख्यानुयायिओं ने हिंसा को अनर्थ का कारण माना है, किन्तु इसको यज्ञ के लिये उपकारक भी माना है।....पूर्वमीमांसकों का तो कहना है कि विहित कर्म कभी अनर्थजनक नहीं हो सकता, तो भी वैदिक विधि के अनुसार ही अश्लील भाषण करने के उपरान्त प्रायश्चित्त के रूप में 'दधिक्राव्णो' इस मन्त्र का जप करना चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽङ्गीक्रियते ।.....अन्यपाशुकयज्ञेऽपि सम्भावितपातकनिवृत्त्यर्थम् 'इदमापः प्रवहत अवद्यं च मूलं च यत्। यच्चाभिदुद्रोह अनृतं यच्च शेपे अभीरुणम्। आपो मा तस्मादेनसः पवमानश्च मुञ्चतु' (वा० स० ६। १७) , 'चात्वाले मार्जयन्ते सपत्नीका इदमापः प्रवहतेति' (का० श्रौ० सू० ६। ६। २१) इति सूत्रानुसारेण सर्वे ऋत्विजश्चात्वालसमीपेऽद्भिरात्मानमभ्युक्षन्ति।"

तदिदं समस्तमपि वेदशास्त्रानभिज्ञवाममार्गप्रवृत्तैरपव्याख्यातम्। नहि सांख्यसूत्रकर्त्रा क्वापि हिंसया क्रतूपकारो मन्यते। क्रतुविषये पश्वालम्भविधायकभ्रान्तौ कारणं 'वैदिकी हिंसा हिंसा न भवति' इत्यस्यापव्याख्यानम् 'संहितामन्त्रा हिंसालिङ्गाः' (वायु० ५७। १०७) इत्येवंविधस्थलानि सन्ति। तदनु च 'अजैर्यष्टव्यम्' अत्र अजशब्दस्य 'छागः' इत्यर्थो गृहीतः। 'योगाद्रूढिर्बलीयसी' इति न्यायसाहाय्येन न तु वायुपुराण एव 'उपरिचर'-कथायामेवोक्तानि अप्ररोहीणि त्रिसप्तवार्षिकाणि 'अज' नामकव्रीहयो यज्ञबीजानि गृहीतानि। यथा च—

'यज्ञबीजैः सुरश्रेष्ठ तेषु हिंसा न विद्यते।
त्रिवर्षपरमं कालमुषितैरप्ररोहिभिः॥' (वायु० ५७। १००)

अश्लील भाषण करने से आयु का क्षय होता है और मुँह से दुर्गन्ध निकलती है। विहित मन्त्र का जप करने से इन दोषों की शान्ति हो जाती है।—अन्य पशुयज्ञों में भी सम्भावित पातक की निवृत्ति के लिये 'इदमापः प्रवहत' इस मन्त्र का उच्चारण करते हुए कात्यायनश्रौतसूत्र में बताई गई विधि के अनुसार सभी ऋत्विग्गण चबूतरे के पास खड़े होकर जल से अपने शरीर का मार्जन कर पवित्रता का सम्पादन करते हैं।"

ऊपर का समस्त कथन वेदशास्त्र के अनभिज्ञ वाममार्गियों द्वारा दूषित व्याख्यान किया गया है। सांख्यसूत्रकर्ता ने कहीं पर भी हिंसा को क्रतु (यज्ञ) का उपकारक नहीं माना है। क्रतु-विषय में पशु के आलम्भ (हिंसा) विधायक भ्रान्ति में कारण है कि 'वैदिकी हिंसा हिंसा नहीं होती' इसकी दूषित व्याख्या करना, अर्थात् राजा न्यायाधीश आदि अपराधियों को जो कि विहित दण्ड या हिंसन करते हैं, वह हिंसन नहीं—यही इसकी सद्व्याख्या है। वायुपुराण आदि में 'संहिता-मंत्रों में हिंसा पाई जाती है' ये वचन भ्रान्तिकारक बने। इसके साथ 'अजों से यज्ञ करना चाहिये' यहाँ पर 'अज' शब्द का बकरा अर्थ 'योग से रूढि बलवती होती है' इस न्याय से कर लिया गया। परन्तु वायुपुराण में ही 'उपरिचर' कथा में जो बोने पर न जमे, ऐसे तीन या सात वर्ष पुराने व्रीहि (धान) 'अज' शब्द से यज्ञबीज लिये जाते हैं। जैसे—

'हे सुरश्रेष्ठ! तीन वर्ष पुराने न जमनेवाले यज्ञबीज ले, उनमें हिंसा नहीं है।'

(वायु० ५७। १००)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पञ्चतन्त्रेऽपि तथा—

"एतेऽपि याज्ञिका यज्ञकर्मणि पशून् व्यापादयन्ति, ते मूर्खाः परमार्थं श्रुतेर्न जानन्ति। तत्र किलैतदुक्तम्—'अजैर्यष्टव्यम्।' अत्र व्रीहयः सप्तवार्षिकाः कथ्यन्ते, न पुनः पशुविशेषः।"

एवमेव पुरुषाश्वगवादिविषयेऽपि भ्रान्तिरजायत। वेदे तु 'यजमानस्य पशून् पाहि', 'अभयं नः पशुभ्यः', 'द्विपदे शं चतुष्पदे' आदीनि पशुहिंसानिषेधकानि वाक्यानि।

यदाह—'प्रायश्चित्तविधानाद् दोषस्याथवा पापस्य निवृत्तिर्जायते' तदपि नाम तत्त्वानवगम एव, प्रायश्चित्तलक्षणस्याऽनवबोधात्। तद्धि—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥ (मनु० ११। ४७)

इसी प्रकार पञ्चतन्त्र में भी कहा है—

"ये भी याज्ञिक यज्ञकर्म में पशुओं को मारते हैं, वे मूर्ख वेद के परमार्थ को नहीं जानते। वहाँ पर यही कहा है कि 'अजों से यज्ञ करना चाहिये।' यहाँ सप्तवार्षिक व्रीहि अज शब्द से गृहीत हैं, पशुविशेष (बकरा) नहीं।"

इसी प्रकार पुरुषमेध, अश्वमेध, अविमेध, गोमेध आदि में भी भ्रान्ति उत्पन्न की गई। यदि यज्ञ में पशुमारण वेदविहित माना जाये तो ऋत्विक् 'यजमानस्य पशून् पाहि' कहकर यजमान के पशुओं की रक्षा की कामना करता है, इससे हिंसा का विधान क्योंकर हो सकता है? तथा 'द्विपदे शं चतुष्पदे', 'अभयं नः पशुभ्यः' आदि वाक्यों का प्रयोजन क्या रह जायेगा? सामवेद में यजमान स्पष्ट घोषणा करता है कि 'हे देवगण! हम यज्ञों में पशुवध कर्म नहीं करते और न पशुओं को हिंसार्थ यूप से बाँधते हैं।'

'प्रायश्चित्त के विधान से दोष या पाप की निवृत्ति हो जाती है' यह कथन भी उस स्थल को न समझने के कारण है। प्रायश्चित्त का लक्षण देखिये—

'प्रायः नाम तप का है, चित्त निश्चय को कहते हैं। तप जब निश्चय से संयुक्त हो जाता है अर्थात् मैं इस तप द्वारा निश्चय करता हूँ कि पुनः यह पाप न करूँगा, इसे प्रायश्चित्त कहते हैं।'

(मनु० ११। ४७)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तपआदिसाधनपूर्वकं किल्विषनिवारणार्थं चित्तं निश्चयः प्रायश्चित्तं भवति। प्रायश्चित्ती हि तत् कर्म दण्डस्वरूपे स्वयं तपः = कष्टसहनं कुर्वन् निश्चिनोति यन्न पुनरहमिदं पापं करिष्यामि इति तत् प्रायश्चित्तम्। एवं नावशिष्यते मनःखिन्नता। 'पापकृन्मुच्यते पापात्' एतस्याशयो यत् पापकरणभावनातो भविष्यति मुच्यते, न तु कृतपापस्य फलभोगात्। यतः—

'न त्वेव कृतोऽधर्मः कर्तुर्भवति निष्फलः।' (मनु० ४। १७३)

तथा— कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते।
नैवं कुर्यात् पुनरिति निवृत्त्या पूयते तु सः॥ (मनु० ११। २३०)

पूनाप्रवचने स्वामिदयानन्देनैतस्यायमर्थः कृतः—'पश्चात्तापेन न पापक्षयः परन्त्वग्रे पापकरणाद् विरमति।'

तथाऽग्रेऽपि—

एवं सञ्चित्य मनसा प्रेत्य कर्मफलोदयम्।
मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत्॥

तप आदि साधनपूर्वक पाप के निवारणार्थ निश्चय करना 'प्रायश्चित्त' कहलाता है। प्रायश्चित्त करनेवाला दण्डस्वरूप में कष्ट सहन करता है, इस प्रकार मन की खिन्नता शेष नहीं रहती। 'पापकर्ता पाप से छूट जाता है' इसका यह आशय है कि वह भविष्य में पाप करने की भावना से छूट जाता है, न कि पापकर्म फल के भोग से; क्योंकि—

'किया हुआ अधर्म कार्य निष्फल नहीं होता अर्थात् उसका फल अवश्य भोगना पड़ता है।' (मनु० ४। १७३)

जैसा कि कहा है—

'पाप को करके और सन्ताप करके पाप से छूट जाता है कि फिर ऐसा नहीं करूँगा, उस भावना की निवृत्ति के कारण वह पवित्र हो जाता है।' (मनु० ११। २३०)

पूनाप्रवचन में स्वामी दयानन्द महाराज ने इस श्लोक का यह अर्थ किया था कि 'पश्चात्ताप से पापक्षय नहीं होता, परन्तु आगे पाप करने से विरत हो जाता है।'

आगे भी कहा है कि—

'मरकर कर्मों का फल अवश्य मिलेगा, इस विचार को मन में रखते हुए मनुष्य मन, वाणी और शरीर से सदा शुभ कार्य करे।' (मनु० ११। २३१)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अज्ञानाद् यदि वा ज्ञानात् कृत्वा कर्म विगर्हितम्।
तस्माद् विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत्॥ (मनु० ११। २३१-२३२)

इति प्रमाणैः 'सुरभि नो मुखा करत्' इति मन्त्रजपः सार्थको न त्वश्लीलभाषणं कृत्वा पुनरपि ऋत्विजादयः कुर्वाणा अपशब्दप्रयोगं कदाचन शुध्यन्ति। उक्ताभिप्रायमेव पुष्णाति 'इदमापः०' मन्त्रजपोऽपि।

पृ० १७११, पं० १५—संङ्ग्रहालय एव न्यसनीया मतिरस्य या होलिकायामश्लील-भाषणं भारतीयसभ्यतायामनुमतं मन्यते। अग्रेऽयं लिखति—"तेन शब्देन सा पापा राक्षसी तृप्तिमाप्नुयात्।"

धन्योऽसि तव समान्याचरणानि राक्षसवृत्तीनामेव तृप्त्यर्थं सन्ति। अर्थापत्त्या सिध्यति तानि कर्माणि न कदापि देवानां तृप्तिकराणि सेत्स्यन्ति।

अन्ते च मीमांसकमहाभागशङ्कनपुरस्सरं समाधानं प्रस्तूयते—

महीधरेणोक्तमन्त्राणां यादृशो भ्रष्टोऽर्थः स्वभाष्ये लिखितस्तथैव शतपथब्राह्मणेऽपि दृश्यते। यादृशश्च ग्रन्थकृता सत्योऽर्थः प्रदर्शितः सोऽपि तत्रोपलभ्यते। शतपथ उभयथा

'अज्ञान व ज्ञान से निन्दित कर्म करके उससे विमुक्ति चाहता हुआ दूसरी वार निन्दित कर्म न करे।' (मनु० ११। २३२)

इन प्रमाणों के अनुसार पुनः वैसा कर्म न करने का निश्चय करे, तभी 'हमारे मुख सुगन्धित हों' यह जप सार्थक है, न कि ऋत्विज् फिर भी अश्लील भाषण करता भी रहे। 'इदमापः' मन्त्र का जप भी इसी अभिप्राय का पोषक है।

पृ० १७११, पं० १५—इस लेखक की बुद्धि तो अजायबघर में रखने योग्य है जो कि होलिका पर अश्लील भाषण को भारतीय सभ्यता से अनुमत मान रहा है। आगे यह लिखता है कि—"उस अश्लील शब्द से वह पापिनी राक्षसी होलिका तृप्ति को प्राप्त करे।"

धन्य हो! जो कि तुम्हारे सब कर्म राक्षसों की तृप्ति के लिये हैं। अब इसी कथन से पुष्ट होता है कि रानी, कुमारी और दासियों से अश्लील मज़ाक से भी राक्षस ही तृप्त होंगे। अर्थापत्ति से यह सिद्ध होता है कि इन कर्मों से देवता कदापि तृप्त नहीं होंगे।

प्रकरणान्त में श्री पं० युधिष्ठिर मीमांसक जी का शङ्कनपुरस्सर समाधान प्रस्तुत किया जा रहा है—

महीधर ने जैसा अर्थ किया है, वैसा शतपथ में भी मिलता है। फिर ग्रन्थकार ने महीधर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्याख्याने महीधरव्याख्यानस्यैव दोषनिदर्शनं ग्रन्थकृता केन हेतुना कृतमित्युदेति शङ्का। तस्याः समाधानमिदम्—

यादृशो महीधरेणार्थः कृतः स शतपथे 'एते उक्त्वा यदश्विगोः परिशिष्टं भवति' इति परिशिष्टरूपेण निन्दितार्थस्य परिशेषात् प्रकरणान्तरव्यवधानाच्च ज्ञायते यदयमश्लीलार्थः शतपथ उत्तरकालं प्रक्षिप्तः। एतच्चास्य प्रकरणस्यादौ परिशिष्टशब्दनिर्देशात् पुनरुक्तदोषाच्च स्पष्टमेव।

महीधरेण विद्यमानेऽपि शतपथे साध्वर्थे तमुपेक्ष्य परिशिष्टशब्देन निर्दिष्टे प्रक्षेपांशे लिखितोऽश्लीलार्थ एव स्वभाष्ये निर्दिष्ट इति कृत्वा महीधरकृतार्थस्यैव ग्रन्थकृता समालोचना विहिता न तु शतपथे परिशिष्टप्रकरणोक्तस्यार्थस्य। यतस्तस्य परिशिष्टशब्देन प्रक्षेपत्वं विस्पष्टमेवेति।

एवमेव कात्यायनादिश्रौतसूत्रनिर्दिष्टाश्लीलार्थपरस्य विनियोगस्याऽपि गतिर्ज्ञेया। ते ग्रन्थाः शतपथे प्रक्षेपानन्तरं वा रचिताः। तेष्वेव ग्रन्थेषु साध्वर्थपरं विनियोगं निष्काश्या-

---

के ही अर्थों का खण्डन क्यों किया? शतपथ का खण्डन क्यों नहीं किया? इसका उत्तर यह है—

शतपथ में उक्त प्रकार का अश्लील अर्थ 'अश्विगोः परिशिष्टं भवति' निर्देश करके लिखा है। परिशिष्ट शब्द से स्पष्ट है कि शतपथ में यह अर्थ बाद में घुसेड़ा गया है। इतना ही नहीं इसकी प्रक्षेपता तो शतपथ में पूर्वत्र यथाप्रकरण साधु अर्थों के विधान में भी स्पष्ट है। अन्यथा शतपथकार पूर्वत्र उत्तम अर्थ का निर्देश ही न करते और यही अश्लील अर्थ यथावत् यथास्थान पूर्व ही रख देते।

इससे स्पष्ट है कि महीधर ने परिशिष्ट शब्द और पुनरुक्ति दोष की ओर ध्यान न देकर साध्वर्थ (जो उसी ग्रन्थ में निर्दिष्ट है) की उपेक्षा करके अश्लीलार्थ ही स्वीकार किया है। इससे ग्रन्थकार महर्षि दयानन्द ने महीधर आदि के अर्थों की अपने ग्रन्थ में आलोचना की है, शतपथ के परिशिष्ट प्रकरण की आलोचना नहीं की; क्योंकि परिशिष्ट कथनमात्र से उसकी प्रक्षिप्तता स्वयमेव स्पष्ट ही है।

इसी प्रकार कात्यायनादि के श्रौतसूत्रनिर्दिष्ट अश्लीलार्थपरक विनियोग की भी स्थिति समझनी चाहिये। या ऐसा समझना चाहिये कि वे ग्रन्थ शतपथ के प्रक्षेप (परिशिष्ट) के अनन्तर बनाये गये। उन्हीं ग्रन्थों में साध्वर्थपरक विनियोगों को न रखकर अश्लीलार्थपरक विनियोग रख

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

श्लीलार्थपरो विनियोगो निवेशित इत्यपि शक्यते वक्तुम्।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'भाष्यकरणशङ्कासमाधानादि-विषयः'
॥ सम्पूर्णः ॥

दिये गये, यह भी कहा जा सकता है। जैसे भी हो, इन दुष्ट भाष्यों के क्रूर प्रहारों से वेद की रक्षा करनी चाहिये।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'भाष्यकरणशङ्कासमाधानादि-विषय'
॥ सम्पूर्ण हुआ।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ प्रतिज्ञाविषयः संक्षेपतः

पृ० १७१६, पं० ८—पू० प०—"अत्र वेदभाष्ये कर्मकाण्डस्य वर्णनं संक्षेपतः करिष्यते। परन्त्वेतैर्वेदमन्त्रैः कर्मकाण्डविनियोजितैर्यत्र यत्राग्निहोत्राद्यश्वमेधान्ते यद्यत् कर्तव्यं तत्तदत्र विस्तरशो न वर्णयिष्यते। कुतः? कर्मकाण्डानुष्ठानस्यैतरेयशतपथब्राह्मणपूर्वमीमांसाश्रौत-सूत्रादिषु यथार्थं विनियोजितत्वात्' इत्यादि भूमिकोक्तं न सम्यक्, तत्कृतार्थस्य पूर्वोक्तरीत्या मन्त्रब्राह्मणमीमांसाश्रौतसूत्रादिविरुद्धत्वात्। एवमुपासनाकाण्डज्ञानकाण्डपरं व्याख्यानमपि तदीयमसङ्गतमेव, पातञ्जलवैयासिकसूत्रादिविरोधात्। विरोधस्य च तत्र तत्र प्रदर्शितत्वात्।"

उ० प०—इति यदुक्तं करपात्रिणा तदसूयाप्रसूतम्, भूमिकोक्ततात्पर्याऽनवबोधात्। महर्षिदयानन्दस्यात्र भाषाया विशिष्टं तात्पर्यम्। यथाहि—

वेदभाष्ये 'शब्दार्थतः' मन्त्रगतशब्दानुमन्तव्यार्थप्रदर्शनिपूर्वकं कर्मकाण्डं वर्णयिष्यते। अत्र अर्थनिर्देशनं हि मुख्यमुद्दिष्टम्, न तु कर्तव्यकर्मविधिः। यो हि कर्मविधिर्निर्दिष्टस्तत्र तत्र ऐतरेयादिषु स तु तन्निर्दिष्टार्थानुरूपं दर्शितः। तदर्थानुरूपं च विनियोगोऽपि तत्र तत्र ग्रन्थेषु

पृ० १७१६, पं० ८—पूर्वपक्ष—'इस प्रकरण का आरम्भ करते हुए दयानन्द कहते हैं—'इस वेदभाष्य में शब्द और उसके अर्थ द्वारा कर्मकाण्ड का वर्णन करेंगे। परन्तु कर्मकाण्ड में लगाये हुए वेदमन्त्रों में से जहाँ-जहाँ जो-जो कर्म अग्निहोत्र से लेकर अश्वमेधपर्यन्त करने चाहिये, उनका वर्णन यहाँ नहीं किया जायेगा; क्योंकि उनके अनुष्ठान का यथार्थ-विनियोग ऐतरेय, शतपथ आदि ब्राह्मण, पूर्वमीमांसा, श्रौत और गृह्यसूत्र आदि में कहा हुआ है' इत्यादि भूमिका का कथन ठीक नहीं है; क्योंकि उनका किया हुआ अर्थ पूर्वप्रदर्शित पद्धति से विपरीत ही पड़ता है। इसी तरह से उनका उपासना और ज्ञानकाण्डपरक अर्थ भी असम्भव है; क्योंकि यह पातञ्जल, व्यास प्रभृति के अर्थों के विरुद्ध है। जैसा कि पहले ही बताया जा चुका है।"

उत्तरपक्ष—ऊपर जो कुछ श्री करपात्र ने कहा है, वह असूयाप्रसूत अत एव अयुक्त है; क्योंकि भूमिका के लेख का तात्पर्य इन्होंने समझा ही नहीं। महर्षि की भाषा को यहाँ बड़े विवेचन के साथ पढ़ना चाहिये। उसका विशेष तात्पर्य है—

(१) प्रथम बात यहाँ कही गई है कि वेदभाष्य में शब्द और उनके अर्थों को करने में जितना कर्मकाण्ड है, उसका तो वर्णन हो जायेगा; परन्तु कर्तव्य कर्म का विस्तर से वर्णन नहीं किया जायेगा; क्योंकि कर्मकाण्ड का अनुष्ठान ऐतरेयादि में कहा हुआ है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कृतः। तदा अत्र स्ववेदभाष्ये यो वास्तविकोऽर्थो वेदानुकूलो युक्तिप्रमाणादिपुष्टश्च विधास्यते, एतदनुरूपो विनियोगोऽपि परिवर्तनीयो भविष्यतीत्येवार्थोऽपि ध्वन्यते। यद्यन्यत्र ग्रन्थेषु वेदानुकूलो नार्थः, प्रक्षिप्तोऽपि वांशः सोऽवश्यं त्याज्यः परतःप्रमाणत्वात्।

न च ऐतरेयादिषु योऽर्थो विनियोगो वा सर्वो यथार्थः सत्य इति वाच्यम्, तत्र यत्र कुत्रचिदयथार्थानुमतविनियोगस्याऽप्ययुक्तत्वादित्यन्यत्र विस्तरो निभालनीयः।

न वा येऽर्था उक्तास्त एव सम्भवन्ति नान्ये इति वाच्यम्, 'न ह्येतेषु अर्थस्येयत्तावधारणमस्ति, महार्था ह्येते दुष्परिज्ञानाश्च।.....एते वक्तृवैशिष्ट्यात् साधून साधुतरांश्चार्थान् स्रवन्ति।' (निरु० टी० २।८)।

---

(२) दूसरी बात यह है कि (क) युक्तिसिद्ध (ख) वेदादिप्रमाणानुकूल (ग) मन्त्रार्थ के अनुगत वहाँ कहा गया भी विनियोग ग्रहण किया जा सकता है।

इसका निष्कर्ष यह निकला कि ग्राह्यकर्म, कर्मानुष्ठान व विनियोग मान्य होंगे, अतः उन ग्राह्यों का पुनः वर्णन पिष्टपेषण होगा।

इस पर पारिजातकार कहता है कि स्वामी जी का अर्थ उक्त पूर्वप्रदर्शित पद्धति से विपरीत पड़ता है। यह सामान्य बात कह डाली, इसकी विपरीतता का उदाहरण प्रस्तुत करना चाहिये था।

वस्तुतः सायण, महीधरादि के अर्थ अवश्य ऐतरेयादि पद्धति के विरुद्ध हैं। आपकी ही बुद्धि कितनी विपरीत है, जो उपासना और ज्ञानपरक अर्थों को वेदों में मानने को तैयार नहीं है। तथा यह भी आपकी उल्टी बुद्धि का कथन है कि ये अर्थ पातञ्जल आदि के विरुद्ध हैं; परन्तु आपने यह बताया नहीं और न वेदार्थ में पातञ्जल आदि का कोई प्रमाण ही उद्धृत किया। गाल बजाना आसान है, कोई ठोस विपरीतता का उदाहरण देते तो समाधान दिया जाता। वेदों की अध्यात्मपरकता की सिद्धि पूर्व भी की जा चुकी है।

ऋषि ने ऐतरेयादि के विनियोगों पर यह सन्देह भी किया है कि उनमें अनेक मिलाये व बढ़ाये हुए हैं, तो वे वेदार्थानुकूल न होने पर त्याज्य भी होंगे।

यह भी नहीं कहा जा सकता कि जो अर्थ कह दिये हैं बस वे ही सम्भव हैं, अन्य नहीं; क्योंकि 'इन अर्थों में इयत्ता का अवधारण नहीं किया जा सकता। ये वेद महार्थ और दुष्परिज्ञेय हैं। ये वक्ता के वैशिष्ट्य के कारण साधु और साधुतर अर्थों को स्रवित करते रहते हैं।' (नि० टीका २।८)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इदमपीह स्मर्तव्यं यद् देवता या अधिगतास्ताभ्योऽप्यतिरिक्ता भवितुमर्हा मन्त्रार्थानुकूलत्वात्। यथाह उव्वटाचार्यः—

'गुरुतस्तर्कतश्चैव तथा शातपथश्रुतेः।
ऋषीन् वक्ष्यामि मन्त्राणां देवताश्छन्दांसि च यत्॥'

श्रीकरपात्रकथनं तु व्यर्थमेव, उपासनाकाण्डज्ञानकाण्डयोर्मन्त्रार्थानां सर्वशास्त्रसङ्गतत्वात्, प्रदर्शितकल्पितविरोधस्य तत्र तत्र परिहृतत्वाच्च।

न च सायणाचार्येण वेदमन्त्राणामाधियाज्ञिकार्थ एव पर्यवसीयमानत्वात्, आर्यभट्टेन स्वमहासिद्धान्तग्रन्थे 'वेदा हि यज्ञार्थमभिप्रवृत्ताः' इत्युक्तेः, शबरस्वामिना च 'यजतिशब्दवाच्यमेव धर्मं समामनन्ति' इति प्रकथनाच्च केवलं यज्ञार्थमेव मन्त्राणां प्रतिपादितत्वाच्च उपासनाकाण्डादिगता अर्थाः सम्भवन्तीति वाच्यम्, निरुक्तशास्त्रेण आधिदैविकाध्यात्मिकार्थौचित्यप्रतिपादनात्, वेदस्य च तथैव सर्वविद्यामूलकत्वोपपादनाच्च। अत एवाह महाभाष्यप्रदीपिकायामाचार्यभर्तृहरिः—

"इदं विष्णुर्विचक्रमे'(ऋ० १। २२। १७) इत्यत्र एक एव विष्णुशब्दोऽनेकशक्तिः

यहाँ पर यह भी स्मरणीय है कि जो देवता पूर्वतः निश्चित हुए मिलते हैं, उनके अतिरिक्त भी मन्त्रों के अर्थों के अनुसार अन्य भी देवता हो सकते हैं। जैसा कि उव्वट ने भी कहा है कि—

'मैं अपने गुरु से सुझाये तर्क व शतपथ की सहायता से मन्त्रों के ऋषि, देवता और छन्दों को कहूँगा।'

उपासना और ज्ञानकाण्ड के अर्थ सर्वशास्त्रानुमत हैं। तथा जहाँ-जहाँ आपने कल्पित विरोध दिखाया है, उसे-उस का हमने सर्वत्र परिहार किया है।

सायणाचार्य के विचार से वेदमन्त्रों के आधियाज्ञिक अर्थ में ही पर्यवसीयमान होने से, आर्यभट्ट द्वारा अपने महासिद्धान्त ग्रन्थ में 'वेद यज्ञ के लिये ही अभिप्रवृत्त हैं' इस उक्ति से और शबरस्वामी के द्वारा 'यजति' शब्द से वाच्य धर्म का ही समाम्नान करने से केवल यज्ञार्थ ही मन्त्रों को प्रतिपादित करने से उपासनाकाण्डादिगत अर्थ सम्भव नहीं है, ऐसा नहीं कह सकते; क्योंकि निरुक्तशास्त्र के द्वारा आधिदैविक और आध्यात्मिक अर्थों के औचित्य का प्रतिपादन हुआ है, तथा वेदों के सर्वविद्याओं का मूल होने के कारण से भी ये अर्थ सम्भव हैं। इसीलिये 'महाभाष्यप्रदीपिका' में आचार्य भर्तृहरि ने कहा है—

"इदं विष्णुर्विचक्रमे' इस मन्त्र में एक ही विष्णु शब्द अनेक शक्तिवाला होता हुआ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सन् अधिदैवतमध्यात्ममधियज्ञं चात्मनि नारायणे चषाले च तया शक्त्या प्रवर्तते।" इति।

तथा चाह निरुक्ते—"याज्ञदैवते पुष्पफले देवताध्यात्मे वा' (११। २०) अर्थाद् आध्यात्मिकव्याख्यानापेक्षया आधिदैविकोऽर्थो गौणः, तदपेक्षया याज्ञिकोऽर्थो गौणतरः।" इति।

निरुक्तस्य प्राचीनतमटीकाकृत् स्कन्दस्वामी आह—"सर्वदर्शनेषु च सर्वे मन्त्रा योजनीयाः। कुतः ? स्वयमेव भाष्यकारेण सर्वमन्त्राणां त्रिप्रकारैः प्रतिज्ञानात्।"

पृ० १७१६, पं० १३—यदुच्यते—"पारम्परिको वेदपाठो न सामाजिकैरद्य यावत् कर्तुं पार्यते" इति दम्भविजृम्भणम्, बहुत्र वेदपाठिनां क्षमत्वात्।

पृ० १७१७, पं० ३—"किञ्च, यदि तदाचार्य एव मिथ्याप्रतिज्ञस्तदा तदनुयायिनां सत्यप्रतिज्ञत्वे कथं विश्वासः स्यात्।"

अधिदैवत, अध्यात्म और अधियज्ञ और आत्मा, नारायण और चषाल में उस शक्ति से प्रवृत्त होता है।"

और निरुक्त में भी कहा है—"याज्ञदैवते पुष्पफले देवताध्यात्मे वा" (१। १९) अर्थात् आध्यात्मिक व्याख्यान की अपेक्षा आधिदैविक अर्थ गौण है और आधिदैविक की अपेक्षा याज्ञिक अर्थ गौण है। निरुक्त के व्याख्याता दुर्गाचार्य ने भी मन्त्रों के अर्थ ३ प्रकार के माने हैं, यथा—'आध्यात्मिकाधिदैविकाधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते।' (नि० टी० १। १५) अर्थात् आध्यात्मिकादि तीनों में मन्त्रार्थ जाने जाते हैं।

निरुक्त के प्राचीनतम टीकाकार स्कन्द स्वामी कहते हैं कि याज्ञिक, आधिदैविक और आध्यात्मिक तीनों प्रकारों में सब मन्त्रों की योजना करनी चाहिये; क्योंकि भाष्यकार यास्क स्वयं तीन प्रकार के विषय बताने के लिये अर्थ को मन्त्ररूपी वाक् का 'पुष्पफल' कहते हैं और यज्ञादि को पुष्प व फल माना है।

पृ० १७१६, पं० १३—यह कहना कि—"पारम्परिक वेदपाठ आर्यसामाजिक आज भी नहीं कर पाते हैं।" दुरभिमानपूर्ण है। बहुत स्थानों पर आर्यसमाज के विद्वान् इस पाठ में सक्षम मिलते हैं।

पृ० १७१७, पं० ३—"दूसरी बात यह है कि जब स्वामी जी आर्यसमाजियों के आचार्य मिथ्याप्रतिज्ञ हैं, तो उनके अनुयायियों का सत्यप्रतिज्ञ होना कैसे सम्भव है ?"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यप्येतस्य वचनं दुर्वृत्तिजन्यम्, 'संस्कृतप्राकृताभ्यां यद् भाषाभ्यामन्वितं शुभम्' इति वचनेन भूमिकायां मन्त्रार्थवर्णनस्योभयोरपि भाषयोरुपलभ्यमानत्वात् सत्यप्रतिज्ञत्वमक्षतमेव। अर्थवर्णनं महर्षिणैव कृतं न त्वन्यपण्डितैः। 'स्वाश्रितैः पण्डितैर्निर्मापितः' इति मीमांसक-कथनेनापि ण्यन्तप्रयोगेण 'महर्षिणा प्रमाणीकृतोऽसौ लेखः' इत्यपि त्वभिव्यज्यते। अत एतस्यासूयकस्य कपोलकल्पनामल्लतैव।

अग्रिमाक्षेपमुद्दिश्य निर्मलोक्तिरियं साधु संघटते—

कुमोहमासाद्य कदर्थपोषणे,
रता मतिर्हा करपात्रिणाऽर्जिता।
यत्सायणाचार्यकृतार्थपद्धतिम्,
समर्थयन्नाक्षिपतीह भूमिकाम्॥

पृ० १७१७, अनु० १—यदाह—"सायणाचार्यादिभिः स्वेच्छानुसारतो लोकप्रवृत्त्य-नुकूलतश्च लोके प्रतिष्ठार्थं भाष्यं लिखित्वा प्रसिद्धीकृतम्' इति, तत्तु मोहमूलकमेव, तद-र्थानभिज्ञानात्।"

यह कथन भी करपात्री जी की दुष्ट वृत्ति का ही सूचक है। ऋषि ने संस्कृत और प्राकृत दोनों भाषाओं में मन्त्रार्थ-वर्णन की बात कही थी, सो दोनों में ही उपलब्ध है। अतः हमारा आचार्य सत्यप्रतिज्ञ है। अर्थवर्णन महर्षि ने स्वयं ही किया है, अन्य पण्डितों ने नहीं। कदाचित् अन्य पण्डितों की लेखनी द्वारा बद्ध मान भी लिया जाये तो ऋषि के जीवन में मुद्रित होने तथा ऋषि द्वारा प्रतिरोध न करने से उसकी मान्यता सिद्ध हो गई। 'अपने आश्रित पण्डितों के द्वारा निर्मापित कराया' ऐसा श्री युधिष्ठिर मीमांसक जी के कहने से भी ण्यन्त-प्रयोग से महर्षि द्वारा प्रमाणीकृत अभिव्यक्त होता है। इस असूयक लेखक की मल्लता कपोलकल्पना में ही है।

अग्रिम आक्षेप को उद्दिष्ट कर यह निर्मलोक्ति यहाँ संघटित होती है—

'श्री करपात्री जी द्वारा अर्जित मति कुमोहग्रस्त होकर कदर्थपोषण में निरत है, जो कि सायणाचार्यकृत अर्थपद्धति का पोषण कर उत्तमार्थ से सुशोभित ऋषि की भूमिका पर आक्षेप कर रहे हैं।'

पृ० १७१७, अनु० १—ऋषि ने सायणाचार्य की आलोचना में लिखा है कि उन्होंने मनमाने ढंग से लोगों की प्रकृति को अनुकूल करने से लोकप्रतिष्ठा के अर्जन के लिये भाष्य लिखा। इसको पारिजातकार मोहमूलक व उनका अर्थ न समझ पाने की बात कह रहे हैं। ऐसा इनका कहना बालकवत् है; क्योंकि सायण के कर्मकाण्डपरक अर्थ में गाम्भीर्य ही कहाँ है और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति निखिलं पारिजातकृतो बालालपनम्, सायणार्थावगमने गाम्भीर्याभावात्, अधिकृतयाज्ञप्रक्रियाया अप्यपूर्णत्वात्, स्मार्तप्रक्रियायामपि मन्त्राणामव्याख्यानात्, श्रौतप्रक्रियायामपि सायणभाष्यस्य साध्यकोटिगतत्वादप्रामाणिकत्वाद् भ्रान्तिबहुलत्वाच्च।

पृ० १७१७, अनु० २—आक्षेपः—"निमित्तकारणस्येश्वरस्यास्मिन् कार्ये जगति सर्वाङ्गव्याप्तिमत्त्वात्, कार्यस्येश्वरेण सहान्वयाच्च नैवेश्वरस्यैकस्मिन्नप्यर्थे त्यागो भवतीति' तत्तु विचित्रमेव, अनुपपत्तेः। तथाहि—किंव्याकरणकोषाप्तवाक्यव्यवहारादिजनितशक्ति-ग्रहादिवशाद् मन्त्राणामीश्वरपरत्वमास्थीयते, आहोस्विज्जगतो निमित्तकारणत्वाद् मन्त्राणां तत्परत्वमिति? नाद्यः, जगन्निमित्तत्वस्यातन्त्रत्वापातात्। नान्त्यः, नास्तिकवचसामपीश्वर-परत्वापत्तेः।"

समाधानम्—इति त्वखिलं कुतर्कखलछलकृताचरणपर्युपेतम्, 'नैवेश्वरस्यैकस्मिन्न-प्यर्थे त्यागो भवति' इति पदस्य 'एकस्मिन्नपि मन्त्रार्थेऽत्यन्तमिति पदस्य विलोपनेन छलाभ्युपेतत्वात्। यतोहि अस्मिन् वाक्ये 'अत्यन्तम्' इति पदमेवातिमहत्त्ववदस्ति। तेनेश्वरस्य

जो भी याज्ञप्रक्रिया स्वीकृत है, वह भी अपूर्ण है; क्योंकि स्मार्तप्रक्रिया में इन्होंने मन्त्रों का व्याख्यान नहीं किया है। भौतिक प्रक्रिया में भी सायण का भाष्य साध्यकोटिगत है। अतः अप्रामाणिक और भ्रान्तिबहुल है।

पृ० १७१७, अनु० २—आक्षेप—"निमित्तकारण ईश्वर इस कार्य जगत् के सर्वांशों में व्यापक है, इस तरह प्रत्येक कार्य ईश्वर से सम्बद्ध है' स्वामी जी का यह कथन भी विचित्र सा लगता है; क्योंकि ऐसा सम्भव ही नहीं है। क्या व्याकरण, कोश, आप्तवाक्य, व्यवहारादि जनित शब्द-संकेत के अनुसार सभी मन्त्रों की व्याख्या आप ईश्वरपरक करते हैं, अथवा ईश्वर के जगत् का निमित्तकारण होने से आप मन्त्रों की व्याख्या ईश्वरपरक करते हैं। इनमें पहला पक्ष इसलिये नहीं बनेगा कि मन्त्रों का अर्थ करने में जगत् की निमित्तकारणता का कोई उपयोग नहीं हो सकता। दूसरा पक्ष भी इसलिये नहीं बनेगा कि व्याकरण प्रभृति प्रमाणों के आधार पर तो नास्तिकों के वचन भी ईश्वरपरक ही माने जाने लगेंगे, जब कि वे ईश्वर को मानते ही नहीं।"

समाधान—यह निखिल कथन कुतर्क-खल-छल-कृत आचरण से युक्त है; क्योंकि ऋषि का पाठ है—'एकस्मिन्नपि मन्त्रार्थेऽत्यन्तम्'। आपने 'मन्त्रार्थे' के स्थान पर केवल 'अर्थे' रखा तथा 'अत्यन्तम्' पद को बिल्कुल ही विलुप्त कर दिया। आपके हिन्दीकर्ता ने आपकी बुरी नियत का ठीक अनुवाद प्रस्तुत किया है। जबकि ऋषि लिखते हैं—'ईश्वर का एक भी मन्त्र के अर्थ में अत्यन्त त्याग नहीं होगा।' अर्थात् ईश्वर का कथन यदि सीधा नहीं है तो कहीं दूर से ही उस मन्त्रार्थ से ईश्वर का सम्बन्ध अवश्य ध्वनित होगा। इसमें कारण है कि निमित्तकारण ईश्वर

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नात्यन्तं त्यागो भवति, अर्थात् परम्परयाऽपि सम्बन्धः सर्वथा भवतीत्यभिप्रायः। अयं हि मन्त्रार्थकरणे ईश्वरस्मृतेरत्यन्ताभावं समर्थयते। नह्यत्रोच्यते भूमिकाकृता यन्मन्त्राणां व्याख्यानमीश्वरपरमेव सर्वत्र भवति व्याकरणादिना निमित्तकारणत्वेन वा।

वस्तुतोऽयं विषमविषमयविषयवशीकृतमनीषोऽनीशः सन्तुलितवाचां प्रयोगेऽवल्गावाक् स्वकीयकुटिलकल्पनाकलितकोटिकोटिसङ्कलनकामनया महर्षिमहनीयशास्त्रावगाहनक्षमप्रतिभाप्रभादीपे शलभतां लभत एव सर्वत्र। श्रुतिसंरक्षणशिक्षणविलक्षणविचक्षणस्तु स्वामिदयानन्दः सूक्ष्मशब्दार्थसन्निवेशकौशलेन सर्वत्र दुर्मुखान् दुष्प्रज्ञान् जयते पराजयते वा, यथात्र 'अत्यन्त' पदविन्यासेन।

अग्रेऽमूलमुज्जृम्भते यत्—"किञ्चेश्वरस्य जगन्निमित्तत्वमस्तु, मा भूत् सर्वमन्त्राणां तत्परत्वम्।" इति क्वास्ति प्रश्नो मन्त्राणामीश्वरपरत्वस्य वाच्यता वा ? परमास्तिको भक्तो वा सर्वत्र ईश्वरस्यास्तित्वध्वनितार्थांस्तु करिष्यत्येवेति विवेकः।

सर्वव्याप्त है और कार्य का ईश्वर के साथ सम्बन्ध है। निमित्त का वर्णन हो या उसके कार्य का वर्णन हो, कार्य द्वारा कर्ता अवश्य सम्बद्ध होगा ही। आप भी बड़े विचित्र हैं, जो ऋषि के कथन को विचित्र और असम्भव कह रहे हैं। इस पर आपकी बुद्धि का नमूना देखिये। आप प्रश्न करते हैं कि क्या फिर व्याकरणादि मंत्रों की व्याख्या ईश्वरपरक करेंगे ? हे विचित्रमते ! ईश्वर का अत्यन्त त्याग न होने से ईश्वरपरक व्याख्या की बात कैसे समझ में आ गई ? जहाँ-कहीं व्याकरणादि का प्रमाण प्रस्तुत होने मात्र से ईश्वरपरकता की बात तो स्वामी जी ने कहीं नहीं कही। ये तो मन्त्रार्थ करने में ईश्वर की स्मृति के अत्यन्ताभाव का समर्थन करते हैं।

वस्तुतः विषम विषमय विषयों से वशीकृत मनीषावाला यह व्यक्ति नपी-तुली वाणी के प्रयोग में असमर्थ है और स्वयं बेलगाम बोलकर अपनी कुटिल कल्पना से युक्त करोड़ों प्रकार के संग्रहवाली कामना से महर्षि के महनीय शास्त्रावगाहन में समर्थ प्रतिभा के प्रभा-दीप में सर्वत्र पतङ्ग बन रहा है। श्रुतिसंरक्षण में चतुर विलक्षण विद्वान् स्वामी दयानन्द सूक्ष्म शब्दार्थ के सन्निवेशकौशल से सर्वत्र दुर्मुख दुष्प्रज्ञों को जीतते या हराते हैं। जैसे यहाँ पर भी महत्त्वपूर्ण 'अत्यन्त' पदविन्यास द्वारा अभीष्टार्थ ध्वनित कर दिया है।

आगे इनका कथन निर्मूल है कि यदि हम आपसे प्रश्न करें कि ईश्वर जगत् का निमित्तकारण भले ही हो, परन्तु सभी मन्त्रों का अर्थ ईश्वरपरक हो, ऐसा कोई आवश्यक नहीं है। हमारे इस तर्क में आप कोई दोष बताइये, प्रथम तो दोष यही है कि ऋषि ने ईश्वर के निमित्तकारण होने से मन्त्रों के अर्थ ईश्वरपरक होने चाहिये, ऐसा कहीं नहीं कहा। दूसरे आपकी समझ का दोष

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

"तर्हि किं दूषणमिति व्यभिचारशङ्कानिवर्तकतर्कायोगेन व्याप्त्यसिद्धे" इति वचनेन तु 'अर्थान्तरम्' नामकनिग्रहस्थाने भवानापतति, 'प्राकृतादर्थादप्रतिसम्बद्धार्थम्' इति तल्लक्षणत्वात्। इह प्रकरणे 'नात्यन्तमीश्वरस्य त्यागो भवति' इत्युच्यते, तत्र हेतुरस्ति—'निमित्तकारणेश्वरस्य कार्यजगत्सर्वाङ्गव्याप्तिमत्त्वात्' इति। पुनः किमर्थमुद्भावनं व्याकरणकोशादिशक्तिग्रहस्यासम्बद्धस्य।

नहि केवलं निमित्तकारणमात्रस्येह व्याप्तिमत्त्वमुपपाद्यते, प्रत्युत निमित्तकारणीभूतेश्वरसर्वव्यापकता प्रतिपाद्यते। स एव व्याप्तः सन् हेतुर्जायते अर्थात् कार्यजगद्व्याप्तिमन्निमित्तकारणेश्वरस्यात्यन्तत्यागाभावे हेतुत्वमाह। पुनः कुलालदण्डचक्रादीनां घटेन निमित्तकारणत्वेऽपि न सहान्वयः।

तस्मात् "नहि कार्येण सहान्वयोऽपि तत्र हेतुः सम्भवति, आकाशस्य घटादिना सहान्वयेऽपि घटार्थत्वाभावात्। निमित्तत्वेन कार्ये सर्वाङ्गव्यापिताऽपि न सम्भवति,

---

है। फिर से पढ़िये कि ईश्वर का अत्यन्त त्याग इसलिये नहीं होता कि वह निमित्तकारण सारे कार्य जगत् में व्यापक है। अब कार्य जगत् की चर्चा जहाँ भी आयेगी, कर्तृ-स्मरण होना भक्त को स्वाभाविक है और कार्य जगत् से बाहर की चर्चा में तो सीधा ईश्वर का सम्बन्ध हो ही जाता है।

सभी मन्त्रों के अर्थ के निमित्तकारण के साथ व्याप्ति आप ढूँढने में लग गये। जबकि कोई प्रसङ्ग ही नहीं। वक्ता के अभिप्राय से भिन्न अर्थाकर्षण का प्रयास छल भरा ऐसा ही है जैसे सिकता-राशि से तेल निकालना।

यहाँ पर उक्त प्रकार से आप 'अर्थान्तर' नामक निग्रहस्थान में भी आ फँसे हैं; क्योंकि आप प्रचलित अर्थ से असम्बद्धार्थ निकाल रहे हैं। 'ईश्वर का अत्यन्त त्याग नहीं होता' इसमें निमित्तकारण ईश्वर की कार्यजगद्व्यापकता हेतु है।

ऋषि ने 'कार्यस्येश्वरेण सहान्वयाच्च' ये शब्द भी सार्थक रखे हैं। अर्थात् केवल ईश्वर ही रचयिता ऐसा है, जिसका सहान्वय कार्य से रहेगा। कुम्भकार, दण्ड, चक्र आदि का कार्य घट से कदापि सहान्वय नहीं होता। यद्यपि कुलाल आदि निमित्त कारण हैं।

इसलिये कार्य के साथ अन्वय होना भी ईश्वर के अत्यन्त त्यागाभाव में हेतु नहीं हो सकता; क्योंकि आकाश का घटादि के साथ अन्वय है, फिर भी घट में आकाश निमित्त नहीं है। कुलाल

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निमित्तानामपि कुलालदण्डचक्रचीवरादीनां घटसर्वाङ्गव्यापित्वाभावात्" इति सर्वमपि अनर्गलवचनं परास्तम्।

एकतस्त्वयं महर्षिं विरुणद्धि परतः स्वयमङ्गीकरोति १६७१ पृष्ठे—

"तत्र यद्यपि बुद्धिशुद्धिद्वारा कर्मोपासनपराणामपि मन्त्रब्राह्मणानां ब्रह्मपर्यवसायित्वमेव 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः।"

इति वचने 'एव' कारेण ब्रह्मपर्यवसायित्वं प्रतिपादयति। कीदृक्षी विचित्रा भ्रान्ता मतिर्या पूर्वापरलेखविरोधमपि नैवाकलयते? बुद्धिर्न शुद्धिमापेदे एतस्य स्वस्यैव वचसा।

निर्मलोक्तिरत्र सञ्जाघटीति—

न पुराणजधीः शुद्धा, दयानन्दमतेन ते।
जनुर्दरिद्रदारिद्र्यं, सत्यं नो हरते हरिः॥

निमित्तकारण है पर सहान्वय नहीं। अतः निष्कर्ष यह निकला कि निमित्तकारण होते हुए सहान्वय आवश्यक है। अतः करपात्री जी द्वारा महर्षि दयानन्द के विरुद्ध की गई अनर्गल बकवास व्यर्थ ही सिद्ध हुई।

एक ओर तो ये स्वामी जी का विरोध करते हुए कहते हैं कि 'ईश्वर का अत्यन्त त्याग नहीं होता, यह कथन ठीक नहीं'; दूसरी ओर ये स्वयम् १६७१ पृष्ठ पर स्वीकार करते हैं कि—

"यद्यपि कर्मकाण्ड और उपासनापरक मन्त्र और ब्राह्मणभाग भी बुद्धि की शुद्धि के द्वारा ब्रह्मज्ञान में ही विनियुक्त होते हैं; क्योंकि श्रुति में कहा गया है कि सारे वेद उसी पद का विवरण देते हैं, तो भी उनका अवान्तर तात्पर्य धर्म के प्रतिपादन में है, इसका अपलाप नहीं किया जा सकता।"

कहिये यहाँ पर दयानन्द का जादू सर पर चढ़कर बोल रहा है कि नहीं? कैसी विचित्र भ्रान्त मति है, जो कि पूर्वापरविरोध लेख को भी नहीं देख पाती। फिर इनकी ही बात से सिद्ध है कि इनकी बुद्धि शुद्ध नहीं है। यहाँ निर्मलोक्ति यह घटित होती है—

'महर्षि दयानन्द के मत के द्वारा भी तुम्हारी पुराणगत बुद्धि शुद्ध नहीं हुई। ठीक है जन्म से दरिद्र व्यक्ति के दारिद्र्य को भगवान् भी दूर नहीं कर सकता।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सत्यमेव प्रकल्पितपुराणपाठपातकविषोपसर्गजो विकार एतमाजीवनमनुभन्त्स्यति।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'प्रतिज्ञा-विषयः'
॥ सम्पूर्णः ॥

सच है कपोलकल्पित पुराणों के पाठ के पातक विष के फैलने से जन्य विकार इससे आजीवन ही अनुबद्ध रहेगा।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मला मिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'प्रतिज्ञा-विषय'
॥ सम्पूर्ण हुआ ॥

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ प्रश्नोत्तरविषयः संक्षेपतः

पृ० १७१८ पं० ५—भूमिकायाम्—"किमर्था वेदानां चत्वारो विभागाः सन्ति ? उत्तरम्—भिन्नभिन्नविद्याज्ञापनाय ।" तत्रायं वेदार्थपारिजातकृत् कथयति—"तदपि निःसारम्, जैमिनिसूत्रादिविरुद्धत्वात् । तत्र तु—'तेषाम् ऋग् यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुःशब्दः' इत्युक्तम् ।"

परमिदं निःसारकथनमेव निःसारम्, वेदेषु पृथक् पृथग् अनेकविद्याज्ञापनात् । यथा एका गानविद्या तस्याश्च भेदास्त्रयः, द्रुतमध्यमविलम्बितभेदयुक्तत्वात् । नैवं सूत्रविरोधः । यतोहि तत्र प्रश्नोऽस्ति—'किमर्था वेदानां भेदाः' । तस्योत्तरं हि ऋषिणा दीयते । जैमिनेः सूत्रेषु ऋगादीनां विभक्तानां लक्षणानि प्रतिपाद्यन्ते ।

विभागप्रयोजनं लक्षणकथनं च नैकतां भजते । यथा हि लोके कश्चित् पृच्छेत्—'दुग्धदातॄणां गोमहिषादीनां किमर्था भेदाः ?' तदोत्तरिष्यामो वयम्—'भिन्नभिन्नगुणवद्दुग्धज्ञापनाय ।' लक्षणानि च गोमहिषादीनां पृथक् सास्नादिमत्त्वादीनि सम्भवन्ति । तथैवेहाऽपि ।

पृ० १७१८, पं० ५—"इस तरह से भूमिका का प्रश्नोत्तर-विषय भी निःसार है । जैसे कि इन्होंने प्रश्न किया है कि वेदों के चार विभाग क्यों किये हैं ? फिर उत्तर दिया है कि भिन्न-भिन्न विद्या बताने के लिये ।" इस पर यह वेदार्थपारिजातकार कहता है कि—"यह निःसार है; क्योंकि इसका जैमिनिसूत्र से स्पष्ट विरोध है । जैमिनि सूत्र में तो बताया गया है कि 'जहाँ अर्थ के अनुसार पादों (चरणों) की व्यवस्था की गई है, वह ऋग्वेद है । जो गाये जाते हैं, वे सामवेद हैं और बचे हुए मन्त्र यजुर्वेद के नाम से जाने जाते हैं ।' यह कहा गया है ।"

परन्तु करपात्री जी का यह निःसार-कथन ही निःसार है; क्योंकि वेदों में पृथक्-पृथक् अनेक विद्यायें ज्ञापित की गई हैं । जैसे एक गान-विद्या, उसके ही तीन भेद हैं—द्रुत, मध्यम और विलम्बित । इससे जैमिनि के सूत्र का कोई विरोध नहीं है; क्योंकि भूमिका में तो यह प्रश्न किया गया है कि वेदों के विभाग किसलिये हैं ? पर जैमिनि के सूत्रों में इस प्रश्न का उत्तर नहीं दिया गया है; अपितु उन विभक्त हुए वेदों के लक्षणों का प्रतिपादन किया गया है ।

विभाग का प्रयोजन और विभक्तों का लक्षणकथन कभी एक नहीं हो सकते, यह बात भी आपकी मोटी बुद्धि न जान पाई । जैसे कोई लोक में पूछे—'दूध देनेवाली गाय-भैंसों के परस्पर भेद किसलिये किये गये ?' तब हम उत्तर देंगे कि भिन्न-भिन्न गुणवाले दूधों को बताने के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतत्प्रश्नेनास्य प्रश्नसूक्ष्मताऽप्रबोधः स्पष्ट एव।

यदुच्यते—"ऋग्भिः स्तुवन्ति, यजुर्भिर्यजन्ति, सामभिर्गायन्ति' इत्यादिभिस्तु ऋगादीनां प्रयोजनमुक्तम्" इति, तत्प्रयोजनमपि वेदविभागे कारणमेव। यथा यो मन्त्र ऋग्वेदे पठितः, तेनात्र स्तुवन्ति, गुणान् प्रतिपादयन्ति, तेनैव मध्यमोच्चारणगत्या यजन्ति, सामवेदपठितेन च तेनैव गानं गानशास्त्रप्रतिपादितविध्यनुरूपं गायन्ति।

'अर्थः प्रयोजनं कारणमित्यनर्थान्तरमेव'। तन्न, विशिष्टोच्चारणप्रकारस्य यजनक्रियोपयोगस्य एकस्यैव मन्त्रस्य ऋक्त्वं यजुष्ट्वमप्युच्यते। यथा—'वायुर्वा त्वा मनुर्वा त्वेत्याह.....यजुषा युनक्ति व्यावृत्त्यै' (तै० ब्रा० १। ३। ६। २९) । अत्र भट्टभास्करभाष्ये (प्रथमभागे, पृ० १५५) उक्तम्—'यजुर्वेदपठितत्वाद् ऋगेवोच्यते' इति। तदेवं नहि जैमिनिसूत्राणि वेदविभागे कारणानि। एवं 'गीतिषु सामाख्या' इत्यत्र गानस्य गेयाक्षराणां च परस्परमाश्रयाश्रयीभावेन गीतिविशिष्टमन्त्र एव गीतिशब्दप्रयोगोऽवगन्तव्यः।

यजुर्लक्षणगतेन शेषपदेन ऋक्सामलक्षणभिन्नलक्षणमेवाख्यातं यजुषः, अर्थाद् यन्न पादबद्धं न च गानरूपमर्थात् प्रश्लिष्टं तद् यजुः। इदमभावमात्रकारणमेव हि न यजुर्वेदविभागे

लिये। परन्तु गो, महिष आदि के लक्षण पूछने पर सास्नादि वाली गाय आदि होती हैं, यह उत्तर देंगे। उसी प्रकार उक्त स्थल पर भी समझिये। इस प्रश्न में आप सूक्ष्मता को न समझ सके, यह बात स्पष्ट हो गई।

यह कहना कि—"ऋग्भिः स्तुवन्ति' आदि वाक्यों में तो इन का प्रयोजन बताया गया है।" वह प्रयोजन भी वेदों के विभाग में कारण ही है। जैसे जो मन्त्र ऋग्वेद में पढ़ा है, उससे यहाँ स्तुति अर्थात् गुणों का प्रतिपादन करते हैं। उसी से मध्यमोच्चारण करके यजन करते हैं। इसी मन्त्र से गानशास्त्र द्वारा प्रतिपादित विधि के अनुसार गान करते हैं।

अर्थ, प्रयोजन और कारण—ये सभी एकार्थक शब्द हैं। पर ऐसा नहीं है, विशिष्ट उच्चारण-प्रकारक यजन क्रिया के उपयोगवाले एक ही मन्त्र का ऋक्त्व और यजुष्ट्व भी कहा जाता है। जैसे—'वायुर्वा त्वा ....यजुषा युनक्ति व्यावृत्त्यै' यहाँ पर भट्टभास्कर के भाष्य में कहा गया है कि यजुर्वेद में पाठ होने पर भी ऋग् ही है। सो इस प्रकार जैमिनि के सूत्र वेद के विभाग में तो कारण नहीं ठहरते। इस प्रकार 'गीतिषु सामाख्या' इसमें गान और गेय अक्षरों के परस्पर आश्रयाश्रयीभाव से गीतिविशिष्ट मन्त्र में ही गीति शब्द का प्रयोग किया गया है, ऐसा समझना चाहिये।

यजुर्लक्षणगत शेष शब्द से ऋक् और साम के लक्षणों से भिन्न लक्षण ही यजुः का कहा गया है। अर्थात् जो न पादबद्ध है और न गानरूप है, वह प्रश्लिष्ट यजुः है। इस प्रकार यह अभाव-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कारणम्, यज्ञक्रियाविद्याविशेषप्रतिपादनमेव कारणं सुमहद् विद्यते। ऋचां साम्नामुच्चैस्त्वं चाऽपि धर्मविशेष एव, न च विभागे कारणम्। विशिष्टं तु महर्षिणा अस्मिन्नेवोत्तरे प्रतिपादितम्, तत् सूक्ष्माकलनोत्कलिकैः शेमुषीवद्भिरध्येतव्यम्। अतो भूमिकोक्तं निखिलमपारार्थपारावारसारभूतम्।

न तु 'वेदेष्वष्टकमण्डलाध्यायसूक्तषट्कः' इत्यत्र षट्कपदं व्यर्थम्, यतो हि न षट्कसंज्ञो वेदेषु कश्चिद् विभाग इति चेन्न, 'षण्णां समूहः षट्कः' इति ऋग्वेदे अष्टकाध्यायवर्गमण्डलानुवाकसूक्तेति षट्कख्यापनाय पाठः सार्थकः। अथवा षट्कसंज्ञोऽपि वेदेषु कश्चिद् विभागो भवति। यथा शौनकानुक्रमण्याम् (३२) —'आद्ये चतुर्विंशतिर्ह्यनुवाकाः, अतः परं मण्डलं यच्चतुष्कम्, द्वे पञ्चके, त्रीणि षट्कानि चैवं दशाष्टकसप्तनवमं द्वादशान्त्यम्।'

पृ० १७१८, पं० ८—यच्चाह—"ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः॥'(ऋ० १।७१।११) इत्यनेन मन्त्रेण चतुर्णां मन्त्रात्मकानां वेदानां कार्यमुक्तम्।"

तदयुक्तम्। नह्यत्र वेदविभागप्रयोजनमुपन्यस्यते, अपि त्वत्र 'इत्यृत्विक्कर्मणां विनियोगमाचष्टे' (नि० १।७) अर्थाद् ऋत्विजां कर्मविषये विनियोगं विभज्य नियोजनं

मात्र कारण है। यजुर्वेद विभाग का कारण नहीं है, प्रत्युत यज्ञक्रिया-विद्या-विशेष का प्रतिपादन ही बड़ा कारण है। ऋक् और साम का उच्चैस्त्व धर्मविशेष ही विभाग में कारण नहीं है। विशेष तो ऋषि ने अपने इसी उत्तर में बतला दिया है, उस की सूक्ष्म आकलन की उत्कण्ठावाले बुद्धिमान् लोगों को यहाँ पढ़ना चाहिये। अतः भूमिका के कथन में अपार अर्थ के समुद्र का सार भरा हुआ है।

यहाँ एक प्रश्न होता है कि वेदों में अष्टक, मण्डल, अध्याय, सूक्त, षट्क कहे गये हैं; जबकि षट्क कोई विभाग नहीं है। इसका समाधान है कि षट् के समूह का नाम 'षट्क' होता है। ऋङ्मन्त्रों का अष्टक, मण्डल, अध्याय, अनुवाक वर्ग, सूक्त—यह षट्क हुआ। अथवा वेदों में षट्कसंज्ञक विभाग भी है, जैसा कि शौनकानुक्रमणी (३२) में कहा है—'प्रारम्भ में २४ अनुवाक, इसके बाद मण्डलचतुष्क, दो पञ्चक, तीन षट्क' आदि।

पृ० १७१८, पं० ८—यह कहना अयुक्त है कि 'ऋचां त्वः पोषमास्ते०' इस मन्त्र में चारों मन्त्रात्मक वेदों का अर्थ बताया गया है; क्योंकि यहाँ पर वेदों के विभाग का प्रयोजन नहीं कहा गया है, अपितु यहाँ निरुक्तकार ने ऋत्विजों के कर्मों के विषय में विनियोग का विभाग करके

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निबन्धनमेकैकस्य प्रवृत्तिमत्त्वं कथयति। अतो वेदानां विभागे भिन्नभिन्नविद्याज्ञापनायैवेति साधीय उत्तरम्। एवं सत्यखिलकर्मविनियोजनं लक्षणादिकं च विद्याज्ञापने समवेतं भवति।

पृ० १७१९, पं० १—आ०—यच्चाह—"ऋच स्तुतौ, यज देवपूजासङ्गतिकरणदानेषु, साम सान्त्वने, षोऽन्तकर्मणि, थर्वतिश्चरतिकर्मा तत्प्रतिषेधः।'(निरु० ११।१८) 'चर संशये' अनेनाथर्वशब्दः संशयनिवारणार्थो गृह्यते' इत्यादि, तदपि तुच्छम्, ऋगादिशब्दानां योगरूढत्वात्।"

समा०—अत्र ब्रूताम्, भवतस्तुच्छवचनस्य कोऽभिप्रायः? यदाह हेतुम्—'योगरूढत्वात्' इति तु अतितरां तुच्छम्, असद्धेतुत्वात्। योगरूढानामपि शब्दानां धातूत्पन्नत्वात्तदर्थसंगतत्वाच्च। पूर्वं हि धातुभिर्निर्मिताः शब्दा लोकप्रयोगे तेष्वभिप्रेतेष्वर्थेषु रूढसंज्ञात्वमभिप्रेता जायन्ते। भवानपि न थर्वन्तीत्यथर्वाणः स्थिरप्रकृतयो हि ते, इति दुर्गोक्तिमुद्धरति। एतेनाऽपि न धातुनिर्मितत्वं व्याहन्यते ऋगादीनाम्।

प्रत्येक ऋत्विज की प्रवृत्तिमत्ता बताई है, अर्थात् इन ऋत्विजों में उद्गाता, ब्रह्मा आदि क्या-क्या कार्य करें। इनके कार्य का विनियोजनमात्र है, वेदों के चार विभाग करने का प्रयोजन कदापि नहीं। इसलिये वेद-विभाग भिन्न-भिन्न विद्याओं के ज्ञापन के लिये है, यही उत्तर अतितरां श्रेष्ठ है; क्योंकि इस उत्तर में ही अर्थात् तत्तद् विद्याओं की भिन्नता के कारण ही ऋत्विजों के कर्म व वेदों के लक्षण भी यथायथ घटित हो जाते हैं।

पृ० १७१९, पं० १—आक्षेप—"ऋच स्तुतौ, यज देवपूजासङ्गतिकरणदानेषु, षो अन्तकर्मणि और साम सान्त्वने, थर्वतिश्चरतिकर्मा—इन अर्थों के विद्यमान होने से चार वेदों अर्थात् ऋग्, यजुः, साम और अथर्व की संज्ञायें रखी गयी हैं। तथा अथर्ववेद का प्रकाश ईश्वर ने इसलिये किया है कि जिससे तीनों वेदों की अनेक विद्याओं के सब विघ्नों का निवारण हो और उनकी गणना अच्छी तरह से हो सके।' किन्तु यह सब भी गलत है; क्योंकि यहाँ ये शब्द योगरूढ हैं।"

समाधान—यहाँ आप बताइये कि आपके इस तुच्छ वचन का क्या अभिप्राय है? आपने जो 'योगरूढ' हेतु कहा है, वह अतितरां तुच्छ है; यह असद् हेतु है; क्योंकि योगरूढ शब्दों की धातुनिष्पन्नता कदापि अस्वीकृत नहीं की जा सकती है, अतः धातु-अर्थ तो सङ्गत रहेगा ही। पहले शब्द धातु से निष्पन्न होता है फिर लोक में प्रयोग करने के बाद अभिप्रेत अर्थ में रूढ हो जाता है। इस स्थिति में भी शब्द की यौगिकता का वैपरीत्य कदापि नहीं होता। आप भी स्वयं 'न थर्वन्तीत्यथर्वाणः' इस दुर्गोक्ति का उद्धरण दे रहे हैं, अर्थात् अथर्वा स्थिरप्रकृतिक होते हैं। इससे भी सिद्ध है कि ऋग् आदि के धातुनिर्मित होने का व्याघात नहीं है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पूर्वं धातुना निर्मितत्वे यौगिके सति रूढत्वं भवति भवतु नाम लोके। परं संज्ञात्वे कथङ्कारं योगत्वं व्याहन्येत ?

(क) यदा 'अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः, इत्यत्र संज्ञात्वेऽपि पितृपुत्रादीनां योगरूढत्वेऽपि वा पाति इति पिता, पुरु जायते, पुन्नामकनरकात् त्रायत इति वा।' इत्यर्थो यौगिक एव। न ह्येतावता लौकिकस्तवनसाधनयजनादिषु ऋगादिप्रयोगाऽपत्तिः।

(ख) यथा हि वेदेऽपि—'आ वहेथे पराकात् पूर्वीरश्नन्तावश्विना' (ऋ० ८।५।३१) इत्यत्र 'व्यश्नुवाते सर्वम्' इति व्युत्पत्त्यैव 'अश्विनौ' इत्याह।

(ग) तन्त्रवार्तिकेऽपि कुमारिलभट्टोऽनुमोदते वेदार्थे धात्वर्थयोजनाम्। यथा—

'अवन्तेषु हि देशेषु कः सिद्धः क्वेति गम्यताम्।
निगमादिवशाच्चाद्य धातुतोऽर्थः प्रकल्पितः॥'

(घ) निरुक्तटीकाकारः स्कन्दोऽप्यलेखीत्—

'एवमेतत् सर्वनाम्नामाख्यातजत्वं प्रतिपादितम्। तत् किमर्थम्? उच्यते—अर्थान्तरे यो रूढिशब्दस्तस्यार्थान्तरे प्रयोगः—रूढ्यर्थस्याभावात् कर्मनिमित्तो यथा प्रतीयेतेत्येवमर्थम्।'

इस प्रकार पहले धातु से निर्मित होने के कारण शब्द के यौगिक होने पर लोक में रूढता होती है, वेद में नहीं। तब लोक में संज्ञारूप में प्रचलित होने पर भी वेद के शब्दों की यौगिकता का व्याहनन नहीं होता।

(क) देखो, जब 'अदितिर्द्यौरदितिरन्तरिक्षम्०' यहाँ पर अदिति संज्ञा होने पर भी तथा लोक में भी पिता-पुत्र आदि शब्दों में पालन करनेवाला, बहुत्राण करनेवाला या पुंनामक नरक से त्राणकर्ता—ये यौगिक अर्थ वर्तमान रहते हैं। इतने से लौकिक स्तवन, साधन, यजन आदि में ऋग् आदि के प्रयोग की आपत्ति नहीं होगी।

(ख) जैसे वेद में भी—'आ वहेथे०' यहाँ पर 'सब को व्याप्त करनेवाले' इस व्युत्पत्ति से ही 'अश्विनी' शब्द बनता है।

(ग) कुमारिल भट्ट ने तन्त्रवार्तिक में भी वेदार्थ में धात्वर्थ-योजना का अनुमोदन किया है। जैसे—'अवन्तेषु हि देशेषु' इत्यादि में प्रकट है।

(घ) निरुक्तटीकाकार स्कन्द ने लिखा है—'इस प्रकार यह सब नामों का आख्यातजत्व प्रतिपादित किया है। वह किसलिये ? कहा जा रहा है—अर्थान्तर में जो रूढ शब्द है, उसका

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

नन्वत्र 'योगाद् रूढिर्बलीयसी' इति सिद्धान्तव्याकोपे का गतिरिति चेत्—

'गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम्॥'

इह यथा 'लक्षणायां स्वीकृतायां योगरूढेन गीष्पतिरिति पदेन (गिरां पतिरिति) योगार्थमात्रप्रतिपादने न किञ्चिद् बाधकम्।' (इति रसगङ्गाधरे श्रीजगन्नाथः)। तथा योगरूढैर्ऋग्यजुरादिपदैः स्तवनसाधनसङ्गतिकरणादियोगार्थमात्रपरिग्रहे न काचित् क्षतिः।

न च भूमिकायामिहोल्लिखितं यन्नेमे शब्दा ऋषिप्रयोगानन्तरं रूढा जाताः। तदेदमेतद्वचनं विवेकविरामाऽर्चनम्, अनर्गलगलगलितं च। नैवं लौकिकस्तवनसाधनादीनामपि ऋगादिप्रयोगापत्तिः। अशेषशेमुषीजुषा महर्षिणा विपुलं विमृश्यमभिहितम्—'अतो गुणज्ञानक्रियाविज्ञानोन्नतिविशेषविद्यारक्षणानां पूर्वाऽपरसहभावे संयुक्तत्वात् क्रमेण ऋग्यजुःसामाथर्वाण इति चतस्रः संहिताः परिगणिताः संज्ञाश्च कृताः सन्ति।' इति।

अर्थान्तर में प्रयोग होता है। रूढि के अर्थ का अभाव होने से वह प्रयोग कर्मनिमित्त होता है, ऐसा प्रतीत हो, इसलिये।'

प्रश्न—'योग से रूढि बलीयसी होती है' यौगिकता के सिद्धान्त मानने में इस उक्ति के व्याकोप होने पर क्या गति होगी ?

उत्तर—'गीष्पति श्री अङ्गिरा के गुणगणों का वर्णन करने में सगर्व नहीं हो सकता और सहस्राक्ष इन्द्र भी उसके अद्भुत रूप का परिच्छेदन (विवेचन) नहीं कर सकता।'

यहाँ पर जैसे लक्षणा स्वीकृत करने पर योगरूढ 'गीष्पति' इस पद से योगार्थमात्र प्रतिपादन में कोई बाधक नहीं है, ऐसा रसगङ्गाधरकार पण्डित जगन्नाथ कहते हैं, इसी प्रकार आपके द्वारा योगरूढ प्रतिपादित ऋग्, यजुः, साम आदि पदों से स्तवन, साधन, यजन, सङ्गति-करणादि यौगिक अर्थमात्र ग्रहण किये जाने में कोई क्षति नहीं है।

भूमिका में यह तो लिखा नहीं है कि ऋषियों के प्रयोग के अनन्तर ये शब्द रूढ नहीं बन गये। तब श्री करपात्री का यह कथन विवेकशून्यता का ही पूजन है और इनके गले से यह अनर्गल निकल पड़ा है। इस प्रकार लौकिक स्तवन साधनादि के अर्थ ऋग् यजुः आदि शब्दों से गृहीत नहीं होंगे। सम्पूर्ण शेमुषी (बुद्धि) सम्पन्न महर्षि दयानन्द ने विचार कर लिखा है कि 'गुणज्ञान, क्रियाविज्ञान, इनकी उन्नति तथा रक्षा का पूर्वापर क्रम से जान लेना अर्थात् ज्ञानकाण्ड के लिये ऋग्वेद, क्रियाकाण्ड के लिये यजुर्वेद, इनकी उन्नति के लिये सामवेद और शेष विद्याओं की रक्षा व प्रकाश करने के लिये अथर्ववेद—इन की प्रथम, दूसरी, तीसरी व चौथी संख्या बाँधी है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७१९, पं० ६—'वेदमन्त्राणामुपरि ऋषिदेवताछन्दःस्वराः किमर्थाः' इत्यस्योत्तरं भूमिकोक्तं यद्—'वेदानामीश्वरोक्त्यनन्तरं येन येन ऋषिणा यस्य यस्य मन्त्रस्यार्थो दृष्टस्तत्र तत्रादरार्थं तत्तदृषिनाम्नोऽङ्कितम्' इति। तत्रायमाह—"तदपि विसङ्गतम्, निष्प्रमाणत्वात्" इति।

वेदविषयकप्रश्नोत्तरक्रमे मन्त्राणामुपरि निर्दिष्टऋषिदेवताछन्दःस्वरविचारस्यात्र सर्वथा सङ्गतिरेव, न त्वसङ्गतिः। प्रमाणं भवत्कृते सायणलिखितपुरावृत्तसूक्तीयोपोद्घातः। यथा—

'तदाऽभवद् ऋषिः सूक्तद्रष्टा श्यावाश्वनामकः॥' अस्माकं पक्षे च एष तर्कोऽपि प्रमाणम्। यथा—'मन्त्रसूक्ते तथैकस्मिन्ननेकऋषयो मताः, अर्थाद् एकमन्त्रस्य एकसूक्तस्य वा नानेकऋषयो रचयितारो भवितुमर्हन्ति?' इत्यादि।

(अस्मत्कृतशोधप्रबन्धे 'वेदमन्त्रों पर निर्दिष्ट ऋषि मन्त्रद्रष्टा थे, मन्त्रकर्ता नहीं' इतिनामकेऽधिकं द्रष्टव्यं जिज्ञासुभिः।)

यदा मन्त्रेषु ऋषिनामानि निर्दिष्टानि, मन्त्राश्चापौरुषेया नित्यास्तदा 'मन्त्रान् सम्प्रादुः' इति निरुक्तवचनेनेदमेव सिध्यति यत् ते ऋषयोऽसाक्षात्कृतधर्मभ्यो मन्त्रार्थान् प्रकाशितवन्त इति।

पृ० १७१९, पं० ६—'वेदमन्त्रों के ऋषि, छन्द और स्वर किसलिये हैं?' इसका भूमिका में उत्तर दिया है कि—'वेदों के ईश्वर द्वारा प्रादुर्भूत होने के अनन्तर जिस-जिस मन्त्र का अर्थ देखा, वहाँ-वहाँ आदरार्थ उस-उस ऋषि का नाम वेदमन्त्र के साथ लगा दिया गया।' इस समस्त कथन पर करपात्री जी लिखते हैं कि—"इसमें कोई तुक व प्रमाण नहीं है।"

करपात्री जी का यह कथन भी बेतुका और प्रमाणहीन है। ऋषि का कथन सर्वथा सङ्गत है। इसमें प्रमाण सायणकृत पुरावृत्तसूक्त का उपोद्घात है। जैसे—

'तब श्यावाश्व नामक ऋषि सूक्तद्रष्टा हुए।' और हमारे पक्ष में तो यह तर्क भी प्रमाणित है कि 'एक मन्त्र और एक सूक्त के कई-कई ऋषि रचयिता क्या हो सकते हैं?'

इस विषय को हमारे 'वेदमन्त्रों पर निर्दिष्ट ऋषि मन्त्रद्रष्टा थे, मन्त्रकर्ता नहीं' नामक शोधप्रबन्ध में जिज्ञासु देखें।

जब मन्त्रों पर ऋषिनाम निर्दिष्ट हैं और मन्त्र अपौरुषेय तथा नित्य हैं, तो 'मन्त्रान् सम्प्रादुः' इस निरुक्तवचन से यही सिद्ध होता है कि उन ऋषियों ने असाक्षात्कृतधर्मवालों के लिये मन्त्रार्थों का प्रकाश किया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७१९, पं० १२—यदुच्यते—"यो वाचं श्रुतवान् भवत्यफलामपुष्पामित्यफलाऽस्मा अपुष्पा वाग् भवतीति वा...' इत्यादिव्याख्याने भूमिकायां यदुक्तम्—'यो मनुष्योऽर्थज्ञानेन विना श्रवणाध्ययने करोति तदफलं भवति। तेन मन्त्रज्ञानानुरूपकर्मानुष्ठानं ये कुर्वन्ति ते ज्ञात्वा ऋषयो भवन्ति।' तदप्यसङ्गतम्, कपोलकल्पितं च।" इति।

इदं सर्वं निरुक्तवाचोऽमननफलं भवतः। यतो हि 'अर्थं वाचः पुष्पफलमाह'।

'सेयं विद्या श्रुतिमतिबुद्धिस्तस्यास्तपसा पारमीप्सितव्यम्, तदिदमायुरिच्छता न निर्वक्तव्यम्। तस्माच्छन्दस्तु शेषा उपेक्षितव्याः। अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति।' (निरु० १३।१३)।

इति वचनेनाऽपि स्पष्टं भवति यद् वाचः फलमर्थो भवति, विना तेन तस्यां शब्दरूपायां श्रुतायामपि मननं निदिध्यासनं वा अर्थस्यैव भवितुमर्हति। एवं श्रुतस्य मतस्य निदिध्यासितस्यार्थस्य तपसा आचरणेनैव पारमीप्सितव्यम्। अतः 'यो वाचं श्रुतवान् भवत्यफलामपुष्पाम्' इत्यस्य स्पष्ट एवाभिप्रायो यद् वाण्याः फलं त्वर्थ एव। अर्थोऽपि यदाऽऽचरणेऽवतरति तदैव

पृ० १७१९, पं० १२—'यो वाचं श्रुतवान्०' इत्यादि का जो भूमिका में अर्थ कहा है कि—'जो मनुष्य अर्थ को सूझे बिना अध्ययन व श्रवण करते हैं, उनका सब परिश्रम निष्फल होता है।'

'प्रश्न—वाणी का फल क्या है?

उत्तर—अर्थ को ठीक-ठीक जानकर उसी के अनुसार व्यवहारों में प्रवृत्त होना वाणी का फल है।'

पारिजातकार कहता है कि यह अर्थ कपोलकल्पित है। पर इसका यह आरोप बुद्धिशून्यता का द्योतक है। इसने निरुक्त की वाणी का मनन ही नहीं किया; क्योंकि वाणी का फल तो स्पष्ट ही अर्थ कहा गया है। अन्यत्र निरुक्त १३।१३ में भी देखिये—

'यह वेदविद्या, जिसका श्रवण, मनन और निदिध्यासन किया जाता है, उस के पार को भी तप के द्वारा प्राप्त करना चाहिये। आयुः के इच्छुक, श्रवण, मनन, निदिध्यासन से रहित के लिये निरुक्तशास्त्र नहीं पढ़ाना चाहिये; क्योंकि वेद या मन्त्र जिस-जिस देवता का कथन करता है, उस-उस का निरुक्त जाननेवाले को स्वरूप का अनुभव होता है।'

इस निरुक्तवचन से भी वाणी का फल अर्थ ही स्पष्ट होता है। विना अर्थ की शब्दरूप वाणी के सुन लेने पर भी मनन (अवबोधन) व निदिध्यासन शब्द का नहीं हो सकता। मनन व निदिध्यासन अर्थ के ही होते हैं। तभी उस अर्थ को आचरण में लाया जाता है। अर्थ आचरण में

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वाणी फलिता मन्यते विज्ञैः । तस्मात् कपोलकल्पितकथनमेव कपोलकल्पितम् ।

ये साक्षात्कृतधर्माणो भवन्ति त एव हि ऋषयोऽपि भवन्ति। धर्मशब्दोऽत्र विद्योपलक्षकः। विद्या च वेत्ति यथावत्तत्त्वमनया सा विद्या। विद्याया धर्मस्य वा साक्षात्कारो हि तज्ज्ञानपूर्वकं कर्मानुष्ठानेनैव जायते । यदाह 'चोदनालक्षणोऽर्थो धर्मः' (मी० १ । २) इत्यत्र धर्मशब्दो वेदोपलक्षकः, स च विद्यारूप एव । मक्षिकास्थाने मक्षिकानिपातनस्वभावेनानेन न क्वाऽपि ऊहपूर्वकोऽर्थो निध्यातः ।

'मन्त्रान् सम्प्रादुः' इत्यस्यैवार्थो मन्त्रार्थान् प्रकाशितवन्तः । 'उत त्वः पश्यन्' इति मन्त्रस्याभिप्राये अर्थज्ञस्यैव प्रशंसा। साक्षात्कर्ताऽपि अर्थज्ञ एव भवति।

पृ० १७२०, पं० १२—यदुक्तम्—"वेदं निरुक्तवचनं दयानन्दीयाभीष्टसाधकम्, तत्र ऋषिपदनिर्वचनाभावात्।"

महाशय ! ऋषिपदस्य निर्वचनं भवानिह कथमन्विष्यसि ? यदा साक्षादिह 'साक्षात्कृत-धर्माण ऋषयो बभूवुः' इति परिभाषितमेव ।

उतरकर ही फलित होता है । अतः इनका यह आरोप ही निराधार फलतः कपोलकल्पित है ।

'साक्षात्कृतधर्माण ऋषयो बभूवुः' में धर्म शब्द नकारान्त है, इसलिये यह पुण्य का पर्याय नहीं है, प्रत्युत धर्मन् शब्द ज्ञानात्मक अर्थात् वेदज्ञान का वाचक है, जो कर्म का हेतु है। अर्थात् वेदरूप विधान के साक्षात् करनेवाले ऋषि हुए । धर्म का साक्षात्कार ज्ञानात्मक वेदविद्या के अनुरूप कर्मानुष्ठान करने से होता है । 'चोदनालक्षणोऽर्थो धर्मः' (मी० १ । २) सूत्र में भी धर्म शब्द वेदोपलक्षक है, जो कि विद्यारूप ही है । मक्षिकास्थान पर मक्खी लाकर रखने के स्वभाववाले इस लेखक ने ऊहा या तर्क से कहीं भी काम नहीं लिया । हाँ, यत्र कुत्रापि कुतर्क तो किया है ।

ऊपर आये 'मन्त्रान्' का आशय 'मन्त्रार्थान्' ही होगा । 'उत त्वः०' इस मन्त्र में अर्थज्ञ की ही प्रशंसा की गई है, अर्थज्ञ ही साक्षात्कृतधर्मा होता है ।

पृ० १७२०, पं० १२—"वस्तुतः यह निरुक्तवचन दयानन्द के अभीष्ट मत का साधक नहीं हो सकता; क्योंकि वहाँ पर 'ऋषि' पद का कोई निर्वचन नहीं किया गया है ।"

यह कथन इनकी बुद्धिशून्यता का द्योतक है । महाशय ! यहाँ पर निर्वचन की क्या कहें, यहाँ तो साक्षात् ऋषि को परिभाषित किया गया है । निर्वचन में तो फिर भी अस्पष्ट रहता, परिभाषा में तो पूर्ण स्पष्ट हो गया ।

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदप्याह 'वाचोऽफलत्वे अर्थज्ञानपूर्वकं वाचः श्रवणमित्यर्थः कुतो लब्धः ?' इत्युत्तरे इदमेव पर्याप्तं यद् 'यस्तन्न वेद किमृचा करिष्यति' इति। वाचः श्रवणं सार्थकमेव सफलं भवतीति नात्र तत्त्वविदां सन्देहः।

तत्र निर्मलोक्तिरेषा मननीया—

वाचा साधनं पुष्पम्, अर्थः साध्यः फलन्तदा।
तस्मात् साध्यासनं ह्युच्चैः, अधस्तात् साधनासनम्॥

अर्थज्ञानपूर्वकवेदपाठसम्बन्ध एवाहेदम्—'योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।' अर्थज्ञ एवाप्तो भवति। तल्लक्षणम् ऋषिणा प्रोक्तं निर्मलपद्यानुवादे प्रस्तूयते—

पूर्णविद्वान् हि धर्मात्मा, परोपकरणप्रियः।
सत्यवादी पुरुषार्थी, जितसर्वेन्द्रियः पुमान्॥ १॥

यथा स्वात्मनि जानाति, सुखं चैव विवक्षति।
सर्वकल्याणाभावेन, आप्तोऽसौ ऋषिणा स्मृतः॥ २॥

ऋषिदयानन्देन 'य एवं ज्ञात्वा कुर्वन्ति त ऋषयो भवन्ति' इत्युक्तम्, तत्र 'ऋषिर्दर्शनात्'

यह कहना कि 'वाचा के अफलत्व में अर्थज्ञानपूर्वक वाणी का श्रवण अर्थ कहाँ से आ टपका' अबुद्धिजन्य बकवास है। पहले भी हम समझा चुके हैं, यहाँ केवल इतना ही कहेंगे कि 'जो अर्थ नहीं जानता, वह शब्दमात्र से कुछ नहीं कर सकता।' वाणी तो सार्थक ही सफल होती है, अन्यथा नहीं। इसमें तत्त्ववेत्ता लोग संशयरहित हैं।

इस विषय में यह निर्मलोक्ति मननीय है—

'वाणी साधन है, अतः वह पुष्पसदृश है और अर्थ साध्य होता है, अतः वह फलरूप है। इस कारण से साध्य का आसन ऊँचा होता है और साधन का आसन नीचे होता है।'

अर्थज्ञानपूर्वक वेद के विषय में कहा है कि 'जो अर्थज्ञ होता है, वह सम्पूर्ण कल्याण प्राप्त करता है और ज्ञान द्वारा समस्त पाप क्षय करके निर्मलात्मा होकर स्वर्ग को प्राप्त करता है।' यह अर्थज्ञाता ही आप्त कहलाता है, जिसका लक्षण ऋषि दयानन्द ने स्वयं किया है, जो प्रस्तुत है—

'पूर्ण विद्वान् धर्मात्मा, परोपकारप्रिय, सत्यवादी, पुरुषार्थी जितेन्द्रिय पुरुष जैसा अपने आत्मा में जानता है, सर्वकल्याणभाव से सुख को कहना चाहता है, उसी को आप्त कहते हैं।'

ऋषि दयानन्द ने 'जो इस प्रकार जानकर कर्म करते हैं, वे ऋषि होते हैं' ऐसा कहा है, वहाँ

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्येतदभिप्रेत्यैव ।

पृ० १७२३, पं० ७—'यत्र द्योत्यानां पदार्थानां प्राधान्येन स्तुतिः क्रियते, तत्र सैवेयं मन्त्रमयी देवता' इति भूमिकोक्तमयं कथयति—"तदतीव मन्दम्, पूर्वोक्तनैरुक्तपदवाक्यानां तदर्थत्वाभावात् । अर्थानां प्राधान्येन स्तुतावर्थस्यैव देवतात्वं स्यादिति कुतस्तस्या मन्त्रमयीत्वम् ।" एवम्—"यच्च मन्त्राद् भिन्नार्थस्यैव सङ्केतः प्रकाश्यते, तदपि नैघण्टुकं व्याख्यानम्' इत्यपि न किञ्चित्, सर्वत्रैव मन्त्राद् भिन्नस्यैवार्थस्य प्रकाशनात् । नहि मन्त्रात् सङ्केतः प्रकाश्यते, किन्तु सङ्केतग्रहपूर्वकान्मन्त्रान्मन्त्रार्थः प्रकाश्यते ।"

इति सर्वं पारिजातोक्तमविचारोत्पन्नम् । देवता हि द्योतनाद् भवन्ति, प्राधान्येन यस्यार्थस्य स्तुतिर्मन्त्रे भवति स एव देवता भवति तस्य मन्त्रस्य । प्रधानदेवता मन्त्रमयी भवति, अर्थात् सर्वोऽपि मन्त्रोऽर्थेन तामेव देवतां व्याप्नोति अथवा सा देवता सर्वं मन्त्रं व्याप्नोतीति वा वक्तव्यम्, एवं सा हि देवता मन्त्रमयी कथ्यते । गौणरूपेणान्यार्थो यो द्योत्यते सा गौणी देवता तत्र। यथा—'अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः सम्राजन्तमध्वराणाम्' अस्यामृचि प्रधानदेवता अग्निः, गुणभूता च देवता अश्व इति। अग्रेऽपि मन्दोक्तिरस्य ।

पर 'ऋषिदर्शनात्' का अभिप्राय निहित है ।

पृ० १७२३, पं० ७—'जिन-जिन मन्त्रों में जिन-जिन पदार्थों की प्रधानता से स्तुति की है, उनके मन्त्रमय देवता जानने चाहिये, अर्थात् जिस-जिस मन्त्र का जो-जो अर्थ होता है, वही उसका देवता कहाता है ।' यह भूमिका का कथन करपात्री जी की दृष्टि में—"अति मन्द है, पूर्व में कहे निरुक्त के पदवाक्यों का यह अर्थ नहीं हो सकता । अर्थ की प्रधानता मानने पर जब स्तुति में अर्थ की ही प्रधानता होगी, तो इस स्थिति में यह अर्थ मन्त्रमय कैसे हो सकता है ?" इसी तरह से—"मन्त्र से भिन्न अर्थ का सङ्केत बताने के लिये ही निघण्टु में व्याख्या की जाती है ।' यह कथन भी इसलिये गलित है कि सभी जगह तो मन्त्र से भिन्न अर्थ का ही प्रकाशन किया जाता है, मन्त्र से कोई सङ्केत प्रकाशित नहीं होता, किन्तु सङ्केत का ग्रहण निघण्टु आदि की सहायता से कर लेने पर मन्त्र के पदों से मन्त्र के अर्थ का ज्ञान होता है ।"

इत्यादि समस्त पारिजात का कथन अयुक्त और अविचारगत है, मन्त्र के द्वारा प्रधानरूप से जिस अर्थ का द्योतन होता है, वही तो उस मन्त्र का देवता होता है । उसी देवता का समस्त मन्त्र में आधिपत्य होने से वह देवता मन्त्रमयी होती है । अर्थात् तद्देवतापरक अर्थ से ही वह मन्त्र व्याप्त होगा । गौणरूप से जिस अर्थ का द्योतन होगा, वह देवता गौणी होगी । जैसे 'अश्वं न त्वा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यतोहि सर्वमन्त्रस्यार्थस्तु अग्निमेव स्तौति 'अश्वं न त्वा' इति मन्त्रे, परं तत्प्रधानार्थाद् भिन्नार्थ उपमानार्थकोऽश्वः, स च गुणभूतः ।

यच्चाह—"न हि मन्त्रात् सङ्केतः प्रकाश्यते" इति वाक्यरचनं तु छलाभ्युपेतम्, यतो नैतदुच्यते । तत्र 'मन्त्राद् भिन्नार्थस्यैव सङ्केतः प्रकाश्यते' इति वाक्ये 'मन्त्रात्' इत्यत्र पञ्चमी भिन्नार्थमपेक्ष्य, न तु 'मन्त्रात्' इत्यत्र नैमित्तिकी पञ्चमी । अथवा भवत्येव मन्त्रात् सङ्केतः ।

ननु यदुक्तं 'नहि मन्त्रात् सङ्केतः प्रकाश्यते, किन्तु सङ्केतग्रहपूर्वकान्मन्त्रार्थः प्रकाश्यते' इति, तन्नैवानिवार्यम्। 'सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः । तद्-व्यवहाराच्चास्मदादीनामपि सुग्रहः सङ्केतः ।' इति न्यायवाचस्पत्ये उक्तम् ।

तथा योगवाचस्पत्ये उक्तम्—'सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसङ्केतस्तु प्रकाशकः ।' अत एव 'नित्यः शब्दार्थसम्बन्धः' इति तान्त्रिकाः । सर्वैरर्थैः सर्वशब्दानां सम्बन्धश्च योगिज्ञानगम्य एव तेषां योगबलेनोभयरूप-

---

वारवन्तम्०' इस मन्त्र में प्रधानरूप से अग्नि देवता की स्तुति है और गौणरूप से अश्व की स्तुति होने से गौण देवता अश्व है । यह अश्व अग्नि का उपमानार्थक होने से गौण है ।

यह कहना कि—"स्वामी दयानन्द 'मन्त्र से' सङ्केत मानते हैं, जो हो नहीं सकता ।" यह आरोप भी छल से युक्त है; क्योंकि 'मन्त्र से भिन्न अर्थ का ही सङ्केत प्रकाशित किया जाता है' इस वाक्य में 'मन्त्रात्' में भिन्न शब्द की अपेक्षा से पञ्चमी विभक्ति है, न कि निमित्त अर्थ में । अथवा दुर्जनतोषन्याय से 'मन्त्रात्' में निमित्त अर्थ में ही पञ्चमी माने लेते हैं ।

शङ्का—पर अभी तो समाधान में कहा गया कि निमित्तार्थ में पञ्चमी नहीं है; क्योंकि निमित्त अर्थ में पञ्चमी मानने पर 'सङ्केतग्रहपूर्वक मन्त्रार्थप्रकाशन माना जायेगा', मन्त्र से भिन्न अर्थ का सङ्केतप्रकाशन नहीं माना जा सकेगा ।

समाधान—प्रभु की सर्गादिरचना मन्त्र में यह आवश्यक नहीं है कि पहले सङ्केतग्रह हो, फिर मन्त्र का अर्थ जाना जावे; क्योंकि 'सर्ग के आदि में होनेवाले महर्षि देवता के लिये ईश्वर के द्वारा ही साक्षात् सङ्केत किया गया था, उसी के पश्चात् हम लोगों का यह सङ्केतग्रह प्रचलित हुआ ।' ऐसा न्यायवाचस्पत्य में कहा है ।

इसी प्रकार योगवाचस्पत्य में कहा है कि—'सब शब्द सब अर्थों के वाचक हैं और सब अर्थों का सब शब्दों से सम्बन्ध है। इसका प्रकाशक ईश्वरसङ्केत है ।' इसीलिये तान्त्रिक 'शब्दार्थसम्बन्ध' नित्य मानते हैं । सब अर्थों से सब शब्दों का सम्बन्ध योगिजनगम्य ही है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पराप्रत्यक्षादित्यादि लघुमञ्जूषायां पल्लवितं यथायथम्। अतो न सङ्केतग्रहपूर्वकान्मन्त्रार्थः प्रकाश्यते, अपि त्वीश्वरोक्तमन्त्रादेव सङ्केतः प्रकाश्यत इति दिक्।

पृ० १७२३, पं० १५—यदाह—"येन येनर्षिणा यस्य यस्य मन्त्रस्यार्थः प्रकाशितोऽस्ति, तस्य तस्य ऋषेरेकैकमन्त्रस्य सम्बन्धे नामोल्लेखः कृतोऽस्ति' इति, तदपि न सङ्गतम्, अनुपपत्तेः। प्रकाशपदेनाध्यापनं व्याख्यानं वा? नाद्यः प्रमाणाभावात्। समाख्यादिबलेनाध्यापनं निश्चीयते। न च सर्वेषामृषीणां नामभिः समाख्या दृश्यते, नापि व्याख्यानम्, तदनुपलम्भात्। ऋषिर्दर्शनाद् इत्युक्तरीत्या मन्त्रदर्शनादेवर्षित्वम्।"

इति सर्वोऽपि प्रलाप एव, भूमिकाप्रकाशिततात्पर्यानवबोधात्। यतो हि ऋषिदयानन्देन तदधस्तादेव 'प्रकाशितः' इति पदस्य व्याख्यानमपि कृतमस्ति। तद्यथा—

'तथा यस्य मन्त्रस्य यो योऽर्थोऽस्ति, स सोऽर्थस्तस्य तस्य देवताशब्देनाभिप्रायार्थ-विज्ञापनार्थं प्रकाश्यते' इति। अर्थाद् येन ऋषिणा योऽर्थो दृष्टः स देवतानाम्ना व्यज्यते, यतो हि 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति।'

योगबल से उभयरूप परा का प्रत्यक्ष होता है। इसलिये हम लोगों के सङ्केतग्रहपूर्वक मन्त्रार्थ प्रकाशित होना आवश्यक नहीं।

पृ० १७२३, पं० १५—"जिन-जिन मन्त्रों में जिन-जिन पदार्थों की प्रधानता से स्तुति की है, उनके मन्त्रमय देवता जानने चाहिये। अर्थात् जिस-जिस मन्त्र का जो-जो अर्थ होता है, वही उसका देवता होता है।' भूमिका का यह कथन एकदम गलत है; क्योंकि इसकी सङ्गति नहीं है। प्रकाश पद का अर्थ आप अध्यापन करते हैं या व्याख्यान? पहला अर्थ करने में कोई प्रमाण नहीं है। समाख्या के आधार पर ही अध्यापन परम्परा निश्चित होती है। सभी ऋषियों के नामों के साथ ऐसी परम्परा नहीं जुड़ी है। व्याख्यान भी इसका अर्थ नहीं किया जा सकता; क्योंकि ऐसा कोई प्रमाण उपलब्ध नहीं है। 'ऋषिर्दर्शनात्' इस वाक्य के आधार पर मन्त्रद्रष्टा ही ऋषि माना जाता है।"

वस्तुतः करपात्री जी का यह प्रलापमात्र है; क्योंकि उन्होंने भूमिका में प्रकाशित तात्पर्य को समझने का प्रयास नहीं किया या समझे ही नहीं। क्योंकि ऋषि दयानन्द ने उसके नीचे ही 'प्रकाशित' पद की व्याख्या भी कर दी। जैसे—

'तथा जिस-जिस मन्त्र का जो-जो अर्थ है, उस-उस का वह-वह अर्थ देवता शब्द के द्वारा अभिप्रायार्थ बताने के लिये प्रकाशित कर दिया है।' अर्थात् जिस ऋषि ने जो अर्थ देखा, वह (अर्थ) देवता शब्द से व्यक्त किया जाता है; क्योंकि 'जिस कामनावाला ऋषि जिस देवता में अर्थपतित्व चाहता हुआ स्तुति का प्रयोग करता है, उस देवतावाला वह मन्त्र होता है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'नहि ऋषिरध्यापको व्याख्याता वा भवति' इति वचनन्तु बालिशताख्यापकम्, दर्शनशब्दस्योभयार्थप्रतिपादकत्वात्। यः पश्यति तस्याऽपि दर्शनं भवति अथवा योऽन्यान् दर्शयति तत्राऽपि दर्शनं कथ्यते। ऋषिः स्वयं दृष्ट्वाऽन्यान् दर्शयति, तदैव स्वदर्शनस्य सार्थकता।

यथा परमात्मा सर्वजगतो द्रष्टा अन्यानपि सर्वं जगद् दर्शयति जीवान्। द्रष्टार एव वक्तारो भवन्ति, नान्ये। बृहद्देवतायामनुक्रमण्यां तु तासां तासां देवतानां सङ्कलनमेवानुष्ठितं केवलम्।

यदुच्यते—'अर्थानामानन्त्येनानन्तदेवतात्वप्रसङ्गात्।' तद् ब्रवीत्वयं यद्दिमनन्तार्थत्वं केन शब्देनाभिव्यज्यते? सर्वानुक्रमणीलेखोऽपि भूमिकोक्तं परिपुष्णाति—'या तेनोच्यते सा देवता' (२।५)। षड्गुरुशिष्य एवं व्याचष्टे—'तेन वाक्येन यत् प्रतिपाद्यं वस्तु सा देवता' इति।

पृ० १७२४, पं० ११—यदुक्तम्—"दयानन्दीये भाष्ये सर्वथा सङ्गत्यभावः। यथोन्मत्तः कदाचित्किञ्चिदन्यदाऽन्यदसङ्गतमेव ब्रवीति, तथैव केनचिन्मन्त्रेण राजोपदेशः क्वचित्सेनापति-मन्त्र्यादिसन्देशो दृश्यते।" इति।

'ऋषि अध्यापक वा व्याख्याता नहीं होता' ऐसा कहना तो अपनी बालिशता प्रकट करना मात्र है; क्योंकि 'दर्शयतीति' विग्रह से उक्त दोनों अर्थ सम्भव हैं। जो देखता है उसका भी दर्शन होता है, तथा जो औरों को दिखाता या बताता है, वह भी दर्शन शब्द से अभिधेय होता है। ऋषि स्वयं देखकर दूसरों का दिखाता है, तभी तो दर्शन की सार्थकता है।

जैसे परमात्मा सब जगत् का द्रष्टा है और जीवों को भी वह जगत् दिखाता है। द्रष्टा ही वक्ता होते हैं, अन्य नहीं। 'बृहद्देवता' में उन-उन देवताओं का सङ्कलनमात्र किया गया है।

यह कहना कि—'अर्थ अनन्त होने से देवता भी अनन्त होने का प्रसङ्ग होगा' तो आप बताइये, यहाँ अनन्तार्थता किस शब्द का अर्थ है? सर्वानुक्रमणी का लेख भी भूमिका के कथन की परिपुष्टि करता है—'जो उसके द्वारा कही जा रही है, वही देवता है।' षड्गुरुशिष्य भी ऐसा ही कहते हैं—'जिस वाक्य से जो वस्तु प्रतिपाद्य है, वह देवता है।'

पृ० १७२४, पं० ११—"दयानन्द के भाष्य में किसी तरह की सङ्गति देखने को नहीं मिलती, जैसे कोई पागल आदमी जब जो मन में आता है, बकता रहता है, उसी तरह स्वामी दयानन्द भी मन्त्रों का मनमाना अर्थ करते रहते हैं। किसी मन्त्र से वे राजा के लिये उपदेश निकालते हैं और कहीं सेनापति, मन्त्री आदि का सन्देश सुनाते दिखाई पड़ते हैं।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ततु सायणमहीधरभाष्यशृङ्खलापाशितमतित्वादेवोक्तम्। इयं खल्वेतस्याऽपि कूपमण्डूकता यो हि सायणवन्मन्त्राणामर्थं यज्ञपरकमेव मन्यते। एषा खलु मिथ्या धारणा। यथाह सायणः स्वयम्—

'आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा।
यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते॥'

(सायणऋ० भा० उपोद्घाते)

अनेन भाष्यमाध्यमेन सहस्रवर्षसञ्चितपुराणमिथ्याधारणा प्रमाणिता। इदं खलु वेदानां दुर्दैष्टिकत्वमेवाभूत्, यदीदृक्षा अल्पश्रुतजना व्याख्यातारोऽमिलन्। परं परमकारुणिक-परमात्मनोऽनन्तकृपया महर्षिदयानन्दः प्रादुर्बभूव, यो वेदभालात् कदर्थकलङ्कमपाकृत्य वेदं च सर्वविद्यानिधानं मत्वा उत्तमार्थान् प्रकाशयत्। सर्वविषयान् वेदगतान् प्रतिपादयन् सर्वविद्या-ऽऽकरत्वं साधितवान् श्रुतीनामसौ। परमयं स्वयं विक्षिप्तमतिरारोपयति स्वीयामुन्मत्ततां निःशेषशेमुषीसम्पन्ने महर्षिदयानन्दे। मूढवच्च वेदविषयोपन्यासे यज्ञातिरिक्तान्यविषयाणाम-भूमिं वेदमनुमनुते।

यह सब सायण महीधर आदि के यज्ञमात्र व अश्लीलार्थ से पाशित मति होने के कारण करपात्री जी ने कहा है। यह इनकी भी कूपमण्डूकता है, जो कि सायण के समान वेद के मन्त्रों को यज्ञार्थ ही मानते हैं या नश्वर राजाओं के युद्ध का इतिहास मन्त्रों में मानते हैं, यह सब इनकी मिथ्या धारणा ही है। जैसा कि सायण ने ऋग्वेद भाष्य के उपोद्घात में स्वीकार किया है—

'यज्ञों में अध्वर्यु के कर्मों की प्रधानता होने के कारण मैंने प्रथम यजुर्वेद का भाष्य किया, इसके अनन्तर हौत्र कर्म के लिये ऋग्वेद का व्याख्यान किया जायेगा।'

इससे प्रतीत होता है, मानो वेदों में होमातिरिक्त अन्य कुछ भी नहीं है। इस भाष्य के माध्यम से सहस्र वर्षों से सञ्चित मिथ्या पुराण की धारणा प्रमाणित हो गई। यह सब वेदों का दुर्भाग्य ही है कि ऐसे अल्पश्रुत जन वेद के व्याख्याता बन बैठे। परन्तु परम कारुणिक परमात्मा की अनन्त कृपा से महर्षि दयानन्द प्रादुर्भूत हुए, जिन्होंने वेद के माथे से बुरे अर्थों के कलङ्क को मिटाकर तथा वेद को समस्त विद्याओं का आगार मानकर उत्तम अर्थों को प्रकाशित किया। वेदगत सब विषयों का प्रतिपादन करते हुए उन्होंने श्रुतियों को समस्त विद्याओं का आकर (उत्पादन भूमि) सिद्ध किया है। परन्तु यह विक्षिप्तमति स्वयं आक्षेप करने लगा है और अपने पागलपन को सम्पूर्ण शेमुषी से विभूषित महर्षि दयानन्द पर आरोपित कर रहा है, तथा मूढ के समान वेद-विषयों के उपन्यास करने में वेद को यज्ञविषयों के अतिरिक्त विषयों का अस्थान मानता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कः खलु वेदविषय इति प्रसक्ते प्रश्ने, कः खलु वेदानामविषय इत्येव प्रश्नः समीचीनतरः समकालावच्छेदेन समुज्जृम्भते। को हि नाम स विषयो यो वेदेषु न चर्चितः। वेदो हि नामाशेषज्ञानविज्ञानविशेषपरिज्ञानप्रदं शाश्वतिकं शास्त्रम्। एवं व्योमयानविज्ञानम्, वर्णाश्रमधर्मः, ब्रह्मचर्याद्याश्रमः, प्रजाराजवैश्यधर्म इत्यादयः समेऽपि विषया इह चर्चिताः सन्ति।

ननु स्वीये 'वैदिक-साहित्य और संस्कृति' नामके ग्रन्थे पण्डितप्रवरः श्रीबलदेव उपाध्यायो व्यलेखीत् प्रथमसंस्करणभूमिकायां यत्—"जो लोग वेद के भीतर संसार की समस्त भौतिक और ऐहिक विद्याओं, कलाओं और आविष्कारों को ढूँढ निकालने का अक्लान्त परिश्रम करते हैं, वे नहीं जानते कि वेद तथा ज्ञान में अन्तर है। 'विद्' धातु तथा 'ज्ञा' धातु में सामान्यतः ऐक्य होने पर भी मूलतः पार्थक्य है। भौतिक विद्याओं की जानकारी का नाम है ज्ञान तथा अध्यात्म शास्त्र के तथ्यों की अवगति का अभिधान है वेद। एक का लक्ष्य बाह्य विषयों की ओर रहता है, तो दूसरे का लक्ष्य आन्तर विषयों के विश्लेषण की ओर रहता है।" अतो वेदे खलु न भौतिकैहिकविद्यानां चर्चासम्भवः, इति चेन्न, उक्तलेखव्यवस्थायां प्रमाणाभावात्। नहि क्वचिदपि शास्त्रीयमेतदर्थं भेदविश्लेषणं विद्यते। अपरं च पारिजात-कृतोऽप्येतदाख्यानं विपर्य्यये। तेन 'मोक्षे धीर्ज्ञानम्' इत्याध्यात्मिकभाव एव ज्ञानशब्दप्रयोगः

वेद का विषय क्या है ? ऐसा प्रश्न उठने पर, ऐसी कौन सी उत्तम विद्या या विषय है, जो वेदों में नहीं है ? समस्त कालावच्छेदेन यही उत्तर समीचीनतर लग रहा है। वेद तो समस्त ज्ञान-विज्ञान विशेष परिज्ञान देनेवाला शाश्वत शास्त्र है। इस प्रकार व्योमयान-विज्ञान, वर्णाश्रमधर्म, ब्रह्मचर्याश्रम, प्रजा राजा वैश्यधर्म आदि सभी विषय इसमें चर्चित हैं।

प्रश्न—अपने 'वैदिक साहित्य और संस्कृति' नामक ग्रन्थ में पण्डित श्री बलदेव प्रसाद उपाध्याय ने प्रथम संस्करण की भूमिका में लिखा है कि 'जो लोग वेद के भीतर संसार की समस्त भौतिक और ऐहिक विद्याओं, कलाओं और आविष्कारों को ढूँढ निकालने का अक्लान्त परिश्रम करते हैं, वे नहीं जानते कि वेद तथा ज्ञान में अन्तर है। 'विद्' धातु तथा 'ज्ञा' धातु में सामान्यतः ऐक्य होने पर भी मूलतः पार्थक्य है। भौतिक विद्याओं की जानकारी का नाम है ज्ञान तथा अध्यात्मशास्त्र के तथ्यों की अवगति का अभिधान है वेद। एक का लक्ष्य बाह्य विषयों की ओर रहता है, तो दूसरे का लक्ष्य आन्तर विषयों के विश्लेषण की ओर रहता है।" अतः वेद में भौतिक ऐहिक विद्याओं की चर्चा सम्भव नहीं है।

उत्तर—यह सारा कथन भ्रान्त मस्तिष्क की उपज है; क्योंकि उक्त ज्ञान और वेद की अर्थव्यवस्था में कोई प्रमाण प्रस्तुत नहीं किया और न कहीं इसका शास्त्रीय विश्लेषण प्राप्त है। दूसरे पारिजातकार का भी कथन उक्त कथन के विपरीत है। करपात्री जी ने तो 'मोक्ष की बुद्धि को ज्ञान कहा है। इस प्रकार आध्यात्मिक अर्थ में ज्ञान शब्द का प्रयोग किया है। अमरकोष के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कृतः। अमरकोषातिरिक्तकोषे प्रायेण ज्ञानवेदशब्दयोः समानार्थे प्रयुज्यमानत्वान्नोक्ता भेदव्यवस्था सङ्गच्छते। विशिष्टं तु 'वेदार्थ-कल्पद्रुमस्य' प्रथमखण्डे विवेचितम्, जिज्ञासुभिस्तत्रैवावलोकनीयम्।

अपरं च महाशय! दयानन्दीये भाष्ये तु सर्वविद्याऽकरस्य वेदस्यार्थकरणे सङ्गतिपुरस्सरा अनेकार्थाः प्रदर्शिताः। परं च सायणादिभिस्तु वाच्यवाचकसम्बन्धमनादृत्य मनुष्यनाम्नां जन-जन्तु-मर्तादिशब्दानां 'यजमानः' एकार्थः सर्वत्र विहितः। यजमानार्थे च किं नियामकं कारणं वा? सायणकृतवेदार्थे प्रमुखोऽयं दोषः, यत् स कर्मकाण्डभ्रमावर्तमिपतित एव भ्रान्तः। ऋषिदयानन्दस्योत्तमार्थस्य सायणकृतस्य वार्थस्यान्तरं निदर्शनरूपे 'यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि' (ऋ० १।१।६) अस्मिन् मन्त्रे द्रष्टव्यम्। कीदृङ्मनोरमो महर्षिदयानन्दकृतोऽर्थः! नात्र विस्तरभिया प्रपञ्च्यते।

पृ० १७२४, पं० ९—यदुच्यते—"वेदेष्वग्निवाय्विन्द्राग्निसरस्वत्यादिशब्दानां क्रमेण पाठः किमर्थः कृतोऽस्तीति प्रश्नस्योत्तररूपेण पूर्वापरविद्याविज्ञापनार्थं विद्यासङ्ग्यनुषङ्गिप्रतिविद्यानुषङ्गिबोधार्थं च' इति, तदपि यत्किञ्चित्, निर्मूलत्वात्।"

अतिरिक्त कोष में प्रायः ज्ञान और वेद शब्दों की समानार्थ प्रयोग होने के कारण उपाध्याय जी की उक्त व्यवस्था सर्वथा अग्राह्य है। विशेष जिज्ञासु 'वेदार्थ-कल्पद्रुम' प्रथम खण्ड में हमारे द्वारा विवेचित इस विषय को पढ़ें।

दूसरे महाशय! स्वामी दयानन्द के भाष्य में सब विद्याओं के आकर वेद के अर्थ करने में सङ्गतिपुरस्सर वेदमन्त्रों के अनेक अर्थ दिखलाये हैं; परन्तु सायणादि ने वाच्य-वाचक सम्बन्ध को तिरस्कृत करके मनुष्यसंज्ञक जन, जन्तु, मर्त आदि शब्दों के केवल एक 'यजमान' ही अर्थ सर्वत्र किया है। बताइये, इनका केवल 'यजमान' अर्थ करने में क्या कारण या नियामक है? सायण के किये वेदार्थ में प्रमुख दोष यह है कि वे कर्मकाण्ड के भ्रमावर्त (भँवर) में निपतित हो वहीं चक्कर काट रहे हैं। ऋषि दयानन्द का उत्तमार्थ और सायणकृत अर्थ का अन्तर विस्तरभय से यहाँ प्रस्तुत नहीं किया जा रहा है।

पृ० १७२४, पं० ९—"वेदों में क्रमवार अग्नि, वायु, इन्द्र, सरस्वती आदि शब्दों का प्रयोग किसलिये किया है? इस प्रश्न के उत्तर में स्वामी दयानन्द ने लिखा है—'पूर्वापर विद्याओं को जानने के लिये, अर्थात् जिस-जिस विद्या में जो-जो मुख्य और गौण हेतु हैं, उनके प्रकाश के लिये ईश्वर ने अग्नि आदि शब्दों का प्रयोग पूर्वापर सम्बन्ध से किया है।' किन्तु यह कथन भी एकदम निराधार है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति निखिलं खलु खलाचरणकुण्ठितबुद्धीनामनूहनशीलप्रकृतीनामिव वचनम्। प्रखरप्रतिभाभावितस्य योगिनस्तपस्विनः सूत्ररूपस्य मूलस्य समुपबृंहणसमर्थप्रज्ञावतोऽखिलमनन्यद्रष्टव्यं हस्तामलकमिव भवति तथैवात्रर्षेः। एतस्य हिन्दीकारेणाऽपि छलेन 'पूर्वापरविद्याविज्ञापनार्थम्' इत्यस्यानुवादः कृतः—'स्वामी दयानन्द ने लिखा है—पूर्वापर दिशाओं को जानने के लिये।' न चात्र स्वामिना पूर्वापरशब्दाभ्यामिह दिशोल्लेखः कृतः।

पृ० १७२४, पं० १३—यच्च—"तद्यथाऽग्निशब्देनेश्वरभौतिकार्थयोर्ग्रहणं भवति। यथाऽनेनेश्वरस्य ज्ञानव्यापकत्वादयो गुणा विज्ञातव्या भवन्ति। यथेश्वररचितस्य भौतिकस्याग्नेः शिल्पविद्याया मुख्यहेतुत्वात् प्रथमं गृह्यतेऽग्निः तथेश्वरस्य सर्वाधारकत्वानन्तबलवत्त्वादिगुणा वायुशब्देन प्रकाश्यन्ते। यथा शिल्पविद्यायां भौतिकाग्नेः सहायकारित्वान्मूर्तद्रव्याधारकत्वाच्च तदनुषङ्गित्वाच्च भौतिकस्य वायोर्ग्रहणं कृतमस्ति, तथैव वाय्वादीनामाधारकत्वाद् ईश्वरस्यापीति।' इति भूमिकोक्तं मन्दम्, अग्नेः शिल्पविद्याहेतुत्वस्य मन्त्रेषु ब्राह्मणेषु सूत्रेषु च परमेश्वरस्य देवताविशेषस्य च संस्कृताहवनीयादीनामिव निर्देशाभावात्। ईश्वरस्य ज्ञानव्यापकत्वादयोऽपि मन्त्राणां भाक्ता एवार्था न शाक्ताः। अग्न्यादिशब्दाना

मेरी दृष्टि में यह निराधार-कथन खलाचरण द्वारा कुण्ठित हुई बुद्धि की ऊहाशक्ति के नष्ट होने से प्रसूत है तथा यह वक्ता अल्पश्रुत है। प्रखर प्रतिभा से परिपूर्ण तपस्वी योगी की उपबृंहण में दक्ष प्रज्ञा को हस्तामलकवत् प्रत्यक्ष है। स्वामी जी ने 'पूर्वापर विद्या बताने के लिये' लिखा, पर पारिजात में 'पूर्वापर दिशाओं के जानने के लिये' लिखकर छल किया है।

पृ० १७२४, पं० १३—"आगे स्वामी दयानन्द लिखते हैं—'अग्नि से ईश्वर और भौतिक आदि कितने ही अर्थों का ग्रहण होता है, इस प्रयोजन से कि उसका अनन्त ज्ञान अर्थात् उसकी व्यापकता आदि गुणों का बोध मनुष्यों को यथावत् हो सके। फिर इसी अग्नि शब्द से पृथिवी आदि भूतों के बीच में जो प्रत्यक्ष अग्नि तत्त्व है, वह शिल्पविद्या का मुख्य हेतु होने से उसका ग्रहण प्रथम ही किया है। तथा ईश्वर के सबको धारण करने और उसके अनन्त आदि गुणों का प्रकाश जानने के लिये वायु शब्द का ग्रहण किया है। तथा शिल्पविद्या में अग्नि का सहायकारी और मूर्त द्रव्य का धारण करनेवाला मुख्य वायु ही है, इसलिये प्रथम सूक्त में अग्नि का और दूसरे सूक्त में वायु का ग्रहण किया है।' किन्तु यह कथन भी इसलिये विचारणीय है कि मन्त्र, ब्राह्मण, सूत्रग्रन्थों में जैसे संस्कृत आहवनीय अग्नि का वर्णन मिलता है, उस तरह का वर्णन अग्नि के शिल्पविद्या में उपयोग का कहीं देखने को नहीं मिलता। इन मन्त्रों से ईश्वर के व्यापक ज्ञान का अर्थ गौण पद्धति से किया जा सकता है, शक्तिवृत्ति से नहीं। प्रथमतः अग्नि प्रभृति शब्द से मुख्य वृत्ति के आधार पर प्रसिद्ध अग्नि आदि अर्थ ही किया जा सकता है। इसी तरह से शिल्प

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसिद्धेष्वग्न्यादिष्वेव शक्तिग्रहस्य प्राथम्यात्। यदपि 'शिल्पविद्यायामग्नेः सहायकारित्वेन वायुग्रहणमुक्तम्' इति, तदपि न किञ्चित् पार्थिवेङ्गलकाष्ठादीनां ततोऽप्यधिकसहायकारित्वेन तेषामेव वर्णनीयत्वापातात्, आग्नेयतैलादि(पेट्रोलादि) वर्णनस्य वेदेऽदर्शनेन न्यूनता-दोषापाताच्च।" इति।

इदं निखिलमालोचनमतितरां मन्दम्, युक्तियुक्तविचाररहितत्वात्। द्रव्ययज्ञार्थ-माहवनीयाग्नेर्वर्णनं याज्ञिकपद्धतिप्रणेतृषु ग्रन्थेषु लभ्यते तथैव वेदे ब्राह्मणे भारद्वाजप्रणीत-विमानरचनाग्रन्थेष्वपि बहुत्र अग्निना शिल्पविद्यासिद्ध्यै वर्णनानि प्राप्यन्ते।

एतदर्थं 'तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहा.....तिस्रः क्षपस्त्रिरहातिव्रजद्भिः०' इत्यादिमन्त्रा मननीयाः। 'अथातो द्युस्थानदेवतास्तासामश्विनौ' (निरु० १२।१) स्थलान्यपि समालोचनीयानि, यत्र शिल्पविद्यासाङ्केतिकवर्णनमुपलभ्यते।

विद्या में अग्नि का प्रधान सहायक वायु है, इसलिये अग्नि के बाद वायु के ग्रहण की बात भी इसलिये गलत हो जायेगी कि वायु की अपेक्षा पत्थर का कोयला जैसे पदार्थ अग्नि के अधिक सहायक होंगे। इनका तथा पैट्रोल जैसे अग्नि के अत्यन्त सहायक ज्वलनशील पदार्थों का वर्णन वेदों में न मिलने से आपकी दृष्टि के अनुसार तो वेद में न्यूनता दोष मानना पड़ जायेगा।"

पारिजात की यह समस्त आलोचना अतितरां मन्द बुद्धि की द्योतिका है; क्योंकि इसमें कोई युक्तियुक्त विचार प्रस्तुत नहीं किया गया है। द्रव्ययज्ञ करने के लिये आहवनीय अग्नि की चर्चा याज्ञिक पद्धति बतानेवाले ग्रन्थों में उपलब्ध होती है। उसी प्रकार वेद, ब्राह्मण, भारद्वाज ऋषि द्वारा प्रणीत विमानशास्त्रादि ग्रन्थों में भी बहुत स्थलों पर अग्नि के द्वारा शिल्पविद्या सिद्ध करने के वर्णन प्राप्त होते हैं। आपका कथन तो मानो वेद में शिल्पविद्या का होना ईश्वरज्ञान में न्यूनता को मढ़ रहा है।

शिल्पविद्या के विषय में देखिये—'तुग्रो ह०' 'तिस्रः क्षपस्०' इत्यादि मन्त्रों का मनन कर शिल्प से आविष्कार करना चाहिये। निरुक्त १२।१ में द्युस्थानीय देवताओं में अग्नि का प्रथम वर्णन है। यहाँ 'अश्विनौ शब्द से सबको व्यापन करनेवाले रस और प्रकाश गृहीत होते हैं। इस प्रकार 'अश्विनौ' शब्द से द्यावापृथिवी (सूर्य से प्रकाश और पृथिवी से अग्नि), दिन और रात, कई के मत में सूर्य और चन्द्रमा, अध्यापक-उपदेशक, भिषक्, शल्यचिकित्सक, राजा, राज्ञी आदि भी 'अश्विनौ' कहलाते हैं। ऐसे ही अन्य स्थल भी समालोचनीय हैं, जहाँ पर शिल्पविद्या का सांकेतिक वर्णन मिलता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इदमतितरां नास्तिकतावहं कथनं यद् वेदेषु शिल्पविद्यादिविषयाणामुपयोगिवर्णनं नाऽस्ति। तत्राग्न्यादिपदार्थानां गुणनिर्देशाद् बुद्धिमद्भिः शिल्पविद्या ज्ञातव्या। ऋ० ३। २। २९ आदिसूक्तेषु शिल्पविद्यायाः प्रत्यक्षीकरणं प्रज्ञावद्भिरेवावाप्यते, न बुद्धिशून्यैः।

'स पर्यगाच्छुक्रमकायमव्रणम्' 'यद् भूतं च भव्यं च सर्वं यश्चाधितिष्ठति' आदिमन्त्रेषु ईश्वरस्य ज्ञानव्यापकत्वादयोऽर्थाः शाक्ता एव न भाक्ताः। अन्यत्र बहुत्र भाक्ता अपि, न क्वापि परमेश्वरस्यात्यन्तं त्यागो भवति मन्त्रेषु।

आधिभौतिकेष्वेवार्थेषु अग्न्यादीनां शब्दानां प्रसिद्धेष्वर्थेषु शक्तिग्रहस्य प्राथम्यम्, आध्यात्मिकपक्षे तु ईश्वरार्थस्यैव प्राथम्यम्। महर्षिणा शिल्पविद्यायामग्नेः सहायकारित्वेन वायोर्ग्रहणं कृतम्। तत्रायं वक्ति—"तदपि न किञ्चित्, पार्थिवेङ्गालकाष्ठादीनां ततोऽप्यधिक-सहायकारित्वेन।"

परमेतेन बालिशत्वमेवाऽस्य शब्दात्मनोऽज्ञस्य प्रतीयते। नहि काष्ठादीनि सहायकारीणि। नो वा तूलं तैलं दीपप्रकाशे सहायकं कथ्यते, तत्तत्समवेतेनैव प्रकाशनात्।

यह तो अति नास्तिकतापूर्ण कथन है कि वेदों में शिल्पविद्या का उपयोगी वर्णन नहीं है। वहाँ अग्नि आदि पदार्थों के गुणनिर्देश से बुद्धिमानों द्वारा शिल्पविद्या जाननी चाहिये। ऋ० ३। २। २९ आदि मन्त्रों में शिल्पविद्या का वर्णन बुद्धिमान् देखते हैं, बुद्धिहीनों को वह दिखाई नहीं देता।

'स पर्यगात्०' आदि मन्त्रों में ईश्वर के ज्ञान व्यापकत्व आदि गुण शक्तिवृत्ति से ही प्राप्त होते हैं, वहाँ ये अर्थ गौण नहीं हैं। अन्यत्र बहुत स्थलों पर गौण वृत्ति से भी ये गुण सिद्ध होते हैं; क्योंकि ऋषि ने कहा है कि किसी मन्त्र में परमात्मा का अत्यन्त त्याग नहीं है।

आधिभौतिक अर्थों में ही अग्नि आदि शब्दों का प्रसिद्ध अर्थों में शक्तिग्रहण होता है, आध्यात्मिक पक्ष में नहीं। उसमें अग्नि आदि शब्दों से ईश्वर अर्थ का ही प्राथम्येन ग्रहण होगा। महर्षि ने शिल्पविद्या में अग्नि का सहायकारी वायु ग्रहण किया है। वहाँ पारिजातकार का कथन है कि "यह कथन तुच्छ है; क्योंकि पार्थिव पत्थर का कोयला आदि जैसे पदार्थ अग्नि के अधिक सहायक होंगे।"

पार्थिव पत्थर-कोयला पैट्रोल आदि अत्यन्त सहायकारी हैं, परन्तु आपाततः ठीक लगने पर भी विचारशील व्यक्ति कोयला पैट्रोल आदि को अग्नि का सहायकारी कभी नहीं मान सकते हैं। काष्ठादि सहायकारी कदापि नहीं। क्या दीप जलाने में मिट्टी-तेल-रूई सहायकारी हैं?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अग्नेर्ज्वलनकर्मणि वायोरेव सहायकत्वनिश्चयात्, नहि सहायकं विना अर्थाद् निर्वाते स्थाने-ऽग्निर्ज्वलिति, अतः कोशेऽपि 'रोहिताश्वो वायुसखः' इत्यत्र अग्निपर्य्यायेषु वायुसख इति पठितम्। सहायकपर्य्यायेषु च अमरकोषे 'अनुप्लवः सहायश्चानुचरोऽभिसरः समाः' पठ्यन्ते। अत्र अनुप्लवत्वमनुचरत्वं सहायकस्य स्पष्टम्। काष्ठादीनि नाग्नेः सहायकानि, तानि हि खाद्यान्यग्नेः। न सहायकः खाद्यत्वेन परिणमति। नातिज्वलनशीलपदार्थपेट्रोलादि-वर्णनानुपलब्ध्या वेदे न्यूनतादोषापातः, मूलरूपेण सर्वपदार्थविद्योपलब्धेः।

शिल्पविद्यायामिहापि किञ्चिन्निदर्श्यते, यथा—

'अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रिचक्रः परिवर्तते रजः।
महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ॥'

(ऋ० ४।३६।१)

एतत्सूक्तस्य मन्त्रेषूच्यते यन् मनुष्या अनेकप्रकारकलाचक्राणि अश्वादिपशुरहितानि अग्निजलचालितविमानानि रचयित्वा पृथिव्यां जलेऽन्तरिक्षे उड्डीयैश्वर्ययुक्तं पूर्णसुखं प्राप्नुयुः।

कदापि नहीं। क्योंकि इनका समवेत स्वरूप ही आग में प्रदीप्त होता है। सहायक वह होता है, जिसके जीते-जीते स्वयं को जीवन प्राप्त हो। अग्नि के जलने में वायु ही सहायकारी होता है; क्योंकि निर्वात प्रदेश में अग्निज्वलन कदापि नहीं हो सकता। निर्वात स्थान में दीपक बुझ जाता है। कोश में भी 'अग्नि' को 'वायु-सखा' कहा गया है। अमरकोश में सहायकों के पर्यायवाचकों में 'अनुप्लव, सहाय, अनुचर, अभिसर' कहे गये हैं, जिनसे स्पष्टतया अभिव्यक्त है कि 'अनु' अर्थात् पीछे चलनेवाला या 'अभितः' = चारों ओर चलनेवाला, वह केवल वायु है। 'अनु' उपसर्ग का अर्थ पत्थर कोयले या पैट्रोल में घटित नहीं होता। काष्ठादि तो अग्नि के खाद्य हैं, सहायक नहीं हैं। सहायक कभी खाद्य नहीं होता। ज्वलनशील पदार्थों का भी मित्र आदि शब्दों से वर्णन मिलता है। यदि न भी मिले तो भी मूलरूप में तत्सम्बन्धी विद्या का वर्णन प्राप्त है।

ऋ० ४। ३६वाँ सूक्त देखिये—'अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रिचक्रः परि वर्तते रजः।' इस सूक्त के मन्त्रों में कहा है कि मनुष्य अनेक प्रकार के कलाचक्रों तथा पशु-घोड़ा वाहन से रहित अग्नि और जल से चलाये गये विमान आदि वाहनों को बना पृथिवी, जलों और अन्तरिक्षों में जा-आकर और ऐश्वर्यों को प्राप्त कर पूर्ण सुखवाले होवें। वाहनों के बनानेवाले दक्ष शिल्पी जन होवें। उनका ग्रहण और सत्कार कर शिल्पविद्या की उन्नति करो।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनसस्परिध्यया।
ताँ ऊ न्वस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि॥'

(ऋ० ४।३६।२)

अर्थाद् बुद्धिमन्तो हस्तक्रियादक्षाः सवनस्य शिल्पविद्योत्पन्नस्य कार्यस्य तृप्तये विज्ञानेन ध्यानेन शिल्पविद्यायाः समुन्नतिं कुर्युः।

तथैव (ऋ० १।१९।१) —

'प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे।
मरुद्भिरग्न आगहि॥'

अर्थाद् हे विद्युत् त्वं सुन्दरशिल्पयज्ञेषु ऐश्वर्यरक्षार्थं प्रहूयसे। तत्त्वं मरुद्भिर्विशिष्ट-वायुभिः सहायाहि।

अत्र साङ्केतिकभाषया शिल्पविद्याया वर्णनं स्पष्टमुपलभ्यते। तद् यदा विद्युद् अम्लजन-उद्जन-नत्रजन-हरिणादिविशिष्टवायुभिः संयुक्ता भवति, तदा विविधवर्णरञ्जितः प्रकाशो जायते। एवं विद्युन्मरुतोरद्भुतश्चमत्कारो नयनगोचरीभवति। एवं विना तारं तारकृत्यं यदैश्वर्यरक्षणार्थमत्युपयोगि विद्यते। एतत्सिद्धिरपि विद्युतो वायोश्च संयोगेन जायते। विद्युत्तरङ्गस्त्रितनामकवायौ (ईथर) चलन्ति, तेन च समाचारयन्त्रस्य रचना सम्पद्यते।

एवं वेदे बहुत्र सूक्तेषु शिल्पविद्याऽस्ति या दयानन्दस्य तपोनिशितदृशोपलभ्यते।

इसी प्रकार (ऋ० १।१९।१) मन्त्र में भी कहा है कि हे विद्युत्! सुन्दर शिल्पयज्ञों में ऐश्वर्यरक्षा के लिये बुलाये जाते हो, सो तुम विशिष्ट वायुओं के साथ आओ।

यहाँ सांकेतिक भाषा से शिल्पविद्या का वर्णन स्पष्ट पाया जाता है कि जब विद्युत् को अम्लजन, उद्जन, नत्रजन अथवा हरिण आदि विभिन्न वायुओं से संयुक्त किया जाता है, तब अनेक प्रकार के रङ्गवाला सुन्दर प्रकाश उत्पन्न होता है। इस रूप में स्पष्ट ही बिजली और वायु का अद्भुत चमत्कार दृष्टिगोचर होता है। इस तरह विना तार के तारकार्यों की सिद्धि बिजली और वायु के मिलने से होती है, जो राज्यादि ऐश्वर्य की रक्षा के लिये अत्युपयोगी है। बिजली की लहरें त्रित नामक (ईथर) वायु में चलती हैं, उससे इस समाचारयन्त्र की रचना होती है।

इस प्रकार वेद में सूक्त के सूक्त शिल्पविद्या से भरे पड़े हैं, केवल उन्हें देखनेवाली ऋषि दयानन्द जैसी आँख चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदेषु करपात्रीति संज्ञा न लभ्यते, तदा किं तत्रायं न्यूनतादोषः सम्भवति? श्रीमन्! मूलभूतपदार्थवर्णनेन तज्जन्यसमस्तोत्तरोत्तराविष्कृतपदार्थानां मूले समावेशो मंस्यते। अथ च सकलमप्यवर्णयिष्यत चेद् ऊहनसामग्र्यभावाद् बुद्धेर्विकासो न समभविष्यत्।

पृ० १७२५, पं० ८—"यदपि—'यथेश्वरस्येन्द्रशब्देन परमैश्वर्यवत्तादिगुणा विदिता भवन्ति, तथा भौतिकेन वायुनाप्युत्तमैश्वर्यप्राप्तिर्मनुष्यैः क्रियते, एतदर्थमिन्द्रशब्दस्य ग्रहणात्' इत्याद्यपि बालभाषितम्, इन्द्रपदेनाऽपि वायुग्रहणेनोभयोः पर्यायतापत्त्या पौनरुक्त्यापातात्। ऐन्द्रवायवीयमन्त्राणां निरालम्बनतापत्तेश्च।"

इत्यपि निखिलं शास्त्रस्य गम्भीरानालोचनफलितम्। तदेवमवबुध्यताम्—देवतास्तिस्र इति नैरुक्ता मन्यन्ते। तत्राग्निः पृथिवीस्थानः, वायुर्यद्वा इन्द्रोऽन्तरिक्षस्थानः, सूर्यो द्युस्थानः।' (निरु० ५। ७)। पृथिवीस्थानोऽग्निरिति नाम्ना खल्वेकः, द्युस्थानः सूर्य इत्यपि नामत एकः, परन्तु अन्तरिक्षस्थानो वायुः—इन्द्रो वेति नाम विकल्पत्वेन। एकं वस्तु यद्वा वस्तुद्वैतमपि स्यात्। वस्तुद्वैते तिस्र इति कथनविरोधो जायते।

वेदों में करपात्री संज्ञा का वर्णन नहीं, तो क्या वेदों में न्यूनता दोष आ सकता है। श्रीमन्! मूल रूपों के वर्णन से तज्जन्य समस्त पदार्थ जो उत्तरोत्तर आविष्कृत होते रहे हैं, वे तो मूल में ही समाविष्ट माने जायेंगे। यदि सभी वर्णित होता तो बुद्धि के लिये ऊहन-सामग्री न रहने से बुद्धि का विकास भी नहीं होता।

पृ० १७२५, पं० ८—"स्वामी दयानन्द लिखते हैं—'ईश्वर के अनन्त गुण विदित होने और भौतिक वायु से योगाभ्यास करके विज्ञान और शिल्पविद्या से उत्तम ऐश्वर्य की प्राप्ति करने के लिये इन्द्र शब्द का ग्रहण तीसरे स्थान पर किया है; क्योंकि अग्नि और वायु की विद्या से मनुष्यों को अद्भुत-अद्भुत कला-कौशल आदि बनाने की युक्ति ठीक-ठीक जान पड़ती है।' यह भी बालभाषित है, जब इन्द्र और वायु दोनों पर्यायवाची होंगे और एक ही मन्त्र में वर्णन से पुनरुक्ति दोष आयेगा।"

यह भी सारा कथन शास्त्र का गम्भीरता से विचार न करने का परिणाम है। सो इस प्रकार समझिये—'नैरुक्त तीन देवता मानते हैं, उनमें अग्नि पृथिवीस्थानीय, वायु या इन्द्र अन्तरिक्षस्थानीय और सूर्य द्युस्थानीय देवता है।' पृथिवीस्थानवाला अग्नि नामक एक, द्युस्थानी सूर्य भी नाम से एक है, परन्तु अन्तरिक्षस्थानवाला वायु या इन्द्र वैकल्पिक नाम है। ये एक भी हैं तथा दो वस्तु भी हैं। ये दो वस्तु होने पर तीन देवता कथन से विरोध होता है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वस्तुतस्तु त्रिषु लोकेषु त्रीणि ज्योतींषि सन्ति—अग्निविद्युत्सूर्याः। इन्द्रो विद्युद् 'यदशनिरिन्द्रः' (कौ० ६। ९) । विद्युन् मेघेषु विद्योतते, यदा स इन्द्रो भवति। मेघा अन्तरिक्षे वर्तन्ते तेषां पातयिता विद्युद्देव इन्द्रः। इन्द्रो वृत्रं मेघं हन्ति—इति बहुषु मन्त्रेषु वर्ण्यते। निरन्तरव्यापारवान् वायुरन्तरिक्षे चलति। स एष एक एव देवो द्विपार्श्वकः। पृथिवीस्पृग् वायुः, द्युस्पृग् द्यून्मुख इन्द्रः। 'यो वै वायुः स इन्द्रो य इन्द्रः स वायुः' (शत० ४। १। ३। १९)

यच्चाह—'इन्द्रस्य वायुपर्य्यायत्वे एकस्मिन् मन्त्रे द्वयोरप्युक्तत्वेन पौनरुक्त्यापत्तिः स्यात्' तन्न, नहि सर्वत्र पर्यायत्वं, तत्तत्पदेन प्रकरणतो भिन्नार्थे प्रस्थापितत्वात्, धात्वर्थ-सौक्ष्म्याकलनाच्च। यथाह आचार्ययास्कः—

"इरां दृणातीति वा, इरां ददातीति वा, इरां दधातीति वा, इरां दारयत इति वा, इरां धारयत इति वा, इन्दवे द्रवतीति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा। 'तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वम्' इति विज्ञायते। इदं करणादित्याग्रायणः। इदं दर्शनादित्यौपमन्यवः। इन्दतेर्वैश्वर्यकर्मणः। इन्दच्छत्रूणां दारयिता वा, द्रावयिता वा आदरयिता च यज्वनाम्।"

(नि० १० । ८)

वास्तव में तीन लोकों में तीन ज्योतियाँ हैं—अग्नि, विद्युत् और सूर्य। इन्द्र नाम विद्युत् का है, जैसा 'यदशनिरिन्द्रः' कौशीतकी ब्राह्मण में कहा है। जब कि विद्युत् मेघों में दमकती है, तब वह इन्द्र कहाती है। मेघ अन्तरिक्ष में वर्तमान रहते हैं, उनका गिरानेवाला इन्द्र है। इन्द्र वृत्र का हनन करता है, ऐसा बहुत मन्त्रों में वर्णन है। निरन्तर व्यापारवान् वायु अन्तरिक्ष में चलता है। वह यह एक ही देव द्विपार्श्वक है। पृथिवी को छूनेवाला वायु और द्यु को उन्मुख तथा द्यु को छूनेवाला इन्द्र कहाता है। 'जो वायु है वह इन्द्र है और जो इन्द्र है वह वायु है', ऐसा शतपथकार कहते हैं।

यह कथन कि 'एक मन्त्र में इन्द्र तथा वायु दोनों के आने पर पुनरुक्ति दोष होगा' त्रुटिपूर्ण है; क्योंकि वहाँ पर्य्यायत्व नहीं होगा। उन-उन पदों के पृथक्-पृथक् धातु से निर्मित होने पर धातु के सूक्ष्मार्थ का आकलन करने पर भिन्नार्थ की प्रतीति होगी। जैसा कि यास्क के निर्वचन में देखिये—

"विद्युत् जल को फाड़ती है, विद्युत् जल को देती है, विद्युत् जल को धारण करती है, विद्युत् जल की वृष्टि के लिये सञ्चरण करती है और सूर्य चन्द्रमा को प्रदीप्त करने के लिये सुषुम्णा रश्मि से जाता है। विद्युत् जल में रमण करती है तथा सब प्राणियों को प्रकाश देती है।"

(नि० १० । ८)

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवं शतपथादिषु सूर्यः, प्राणः, मनः, यजमानः, रुक्म, क्षत्रम्, रेत इत्यादयोऽर्था इन्द्रस्य जायन्ते। तथैव 'वायुः पदनाम (निघ० ५। ४) वायुर्वातिर्वा स्याद् गतिकर्मणः, एतेरिति स्थौलाष्ठीविः, अनर्थको वकारः (नि० १०।१), वायुः सोमस्य रक्षिता, वायुमस्य रक्षितारमाह साहचर्याद् रसहरणाद् वा।' (नि० ११।५) । एवं वायुशब्दस्य ब्रह्म, बृहस्पतिः, पवमानः, पूषा, समुद्रः, सविता, प्राणः—इत्यादयोऽर्था भवन्ति। एवं द्वयोः स्वतन्त्राऽपि सत्ता सम्भवति।

पृ० १७२५, पं० १०—"अश्विशब्देन शिल्पविद्यायां यानचालनादिविद्याव्यवहारे जलाग्निपृथिवीप्रकाशादयो हेतवः प्रतिहेतवश्च सन्ति, तदर्थं वाय्वग्निग्रहणानन्तर-मश्विशब्दप्रयोगो वेदेषु कृतोऽस्ति इत्यपि भूमिकोक्तं वेदविरुद्धमेव, तथाखेऽश्विशब्दस्य द्विवचनानुपपत्तेः।"

इत्यनधीतशास्त्रस्य श्रीकरपात्रिणो बुद्धिमान्द्योक्तिरेव। अश्विशब्दस्य द्विवचनोपपत्तिस्तु युग्मवाचित्वाद् सङ्गतैव। तद्युगलं च यथा—'तत्कावश्विनौ? द्यावापृथिव्यावित्येके। अहोरात्रावित्येके। सूर्यचन्द्रमसावित्येके। राजानौ पुण्यकृता-वित्यैतिहासिकाः।' (निरु० १२। १)

ब्राह्मणग्रन्थों में इस प्रकार प्राण, मन, यजमान, रुक्म, क्षत्र, रेत इत्यादि इन्द्र के अर्थ हैं। उसी प्रकार निघण्टु में 'वायु' पदनाम है। 'वा' इस गतिकर्मक धातु से 'वायु' शब्द बनता है। इस प्रकार ब्रह्म, बृहस्पति, पवमान, पूषा, समुद्र, सविता, प्राण इत्यादि अर्थ वायु के हैं। इस प्रकार दोनों के अर्थों की पृथक् या विशेषणात्मक सत्ता हो सकती है, तब पुनरुक्ति दोष का प्रश्न उद्भूत नहीं होता।

पृ० १७२५, पं० १०—"अश्वि शब्द का ग्रहण तीसरे सूक्त और चौथे स्थान में इसलिये किया है कि उससे ईश्वर की अनन्त क्रियाशक्ति विदित हो; क्योंकि शिल्पविद्या में विमान आदि चलाने के लिये जल, अग्नि, पृथिवी और प्रकाश आदि ही पदार्थ मुख्य होते हैं अर्थात् जितने कलायन्त्र, विमान, नौका और रथ आदि यान होते हैं, वे सब पूर्वोक्त प्रकार से पृथिवी आदि पदार्थों से ही बनते हैं।' यह कथन भी वेदविरुद्ध है; क्योंकि यदि ऐसा अर्थ अभिप्रेत होता, तो मन्त्रों में अश्वि शब्द के स्थान में द्विवचन का प्रयोग अनावश्यक मानना पड़ जायेगा।"

इस स्थल को शास्त्रीय दृष्टि से न पढ़नेवाले करपात्री जी की यह बुद्धिमान्द्योक्ति है। अश्वि शब्द की द्विवचन की उपपन्नता तो युग्म (जोड़े) के कहने से है। जैस—ये अश्विनी कौन हैं? उत्तर में बताया कि द्यावापृथिवी, अहोरात्र, सूर्यचन्द्र, राजा-राज्ञी आदि अश्विनौ हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'अथातो द्युस्थानाः.....' (निरु० १२। १) अत्र द्युस्थानोक्तत्वात् प्रकाशयुक्ताः सूर्याग्निविद्युदादयो गृह्यन्ते। तत्र यावश्विनौ द्वौ द्वौ सम्प्रयुज्येते यौ च सर्वेषां पदार्थानां मध्ये गमनशीलौ भवतः, तयोर्मध्यादस्मिन् मन्त्रेऽश्विशब्देन अग्निजले गृह्येते। कुतः? यद् यस्माज्जलं स्वकीयवेगादिगुणैः रसेन सर्वं जगद् व्यश्नुते=व्याप्तवदस्ति। तथाऽन्योऽग्निः स्वकीयप्रकाशवेगादिभिरश्वैः सर्वं जगद् व्यश्नुते। तस्मादग्निजलयोरश्विसंज्ञा जायते। तथैव स्वकीयगुणैर्द्यावापृथिव्यादीनां द्वन्द्वानामप्यश्विसंज्ञा भवतीति विज्ञेयम्। एवं जलाग्निपृथिवी-प्रकाशाहोरात्रादयो वाच्या उपपद्यन्तेऽश्विशब्दस्य।

पृ० १७२५, पं० १२—"यत्तु—सरस्वतीशब्देनेश्वरस्यानन्तविद्यावत्त्वशब्दार्थसम्बन्ध-रूपवेदोपदेष्टृत्वादिगुणा वेदेषु प्रकाशिता भवन्ति, वाग्व्यवहाराश्च।' इति, तदपि वेदानां लोकायतीकरणमेव, निराकारस्य शब्दार्थसम्बन्धोपदेष्टृत्वाऽसम्भवात्, वेदस्य शब्दार्थसम्बन्ध-रूपत्वाभावाच्च। वाग्व्यवहारसामान्येषु सरस्वतीपदप्रयोगादर्शनाच्च। अग्नीन्द्रवायु-सरस्वत्यादिशब्दानां परमेश्वरमात्रवाचकत्वे पर्यायताऽऽपत्तिः, तत्तन्नामभिः सूक्त-

---

निरुक्त (१२। १)—'अथातो द्युस्थानाः....' में द्युस्थान कहने के कारण प्रकाशस्थ अर्थात् प्रकाशयुक्त सूर्य, अग्नि, विद्युत् आदि का ग्रहण होता है। वहाँ जो दो-दो सम्प्रयुक्त हैं और जो दो सब पदार्थों के मध्य में गमनशील अथवा गति देने के हेतु हैं, उनके मध्य से इस मन्त्र में अग्नि और जल का ग्रहण किया जाता है। क्योंकि यह जल अपने वेगादि गुणों से रस के द्वारा सारे जगत् को व्याप्त करते हैं। उसी प्रकार अन्य अग्नि अपने प्रकाश वेगादि अश्वों के द्वारा सारे जगत् को व्याप्त करता है। इस कारण अग्नि और जल की अश्वि संज्ञा हो जाती है। उसी प्रकार अपने गुणों से द्यावापृथिवी आदि द्वन्द्वों की भी अश्वि संज्ञा होती है, ऐसा जानना चाहिये। इस प्रकार जल, अग्नि, पृथिवी, प्रकाश, अहोरात्र आदि अश्वि शब्द के वाच्य उपपन्न होते हैं।

पृ० १७२५, पं० १२—"इसी प्रकार सरस्वती नाम परमेश्वर की अनन्त वाणी का है, जिससे कि उसकी अनन्त विद्या जानी जाती है, तथा जिससे उसने सब मनुष्यों के हित में अपनी अनन्त विद्या से भरे वेदों का उपदेश किया है। इसलिये तीसरे सूक्त और पाँचवें स्थान में सरस्वती शब्द का पाठ वेदों में किया है।' स्वामी दयानन्द का यह कथन भी वेदों में नास्तिक चार्वाक मत को मान्यता देने के समान है; क्योंकि निराकार ईश्वर शब्द और अर्थ के सम्बन्ध को बताने में किसी प्रकार समर्थ नहीं हो सकता। साथ ही यह बात भी ध्यान देने की है कि वेद केवल शब्द और अर्थ के सम्बन्ध को बताकर ही कृतार्थ नहीं हो जाता। सामान्य बोलचाल की भाषा के लिये सरस्वती शब्द का प्रयोग होता भी नहीं। अग्नि, इन्द्र, वायु, सरस्वती प्रभृति शब्द यदि केवल परमेश्वर के ही वाचक माने जायेंगे, तो ये सब परस्पर पर्यायवाची शब्द हो जायेंगे और तब

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भेदानुपपत्तिश्च । सिद्धान्ते तु ऋषिछन्दोदेवतादीनां निरूपणं कृतमेव ।"

इत्यपि पारिजातोक्तं प्रस्तुतविषयाऽध्यानादन्यत्रार्थकर्षणाच्च छलोपन्यास एव। नास्तिकतावहं वचस्त्वस्यैव न ऋषिदयानन्दस्य, ऋषीणां हृदयेषु परेशस्य व्यापकत्वात् तत्रैव शब्दार्थसम्बन्धस्य यथायथप्रकाशनसम्भवात्। इदमपि कथनमलीकमेव ज्ञानमयस्य वेदस्य शब्दार्थसम्बन्धाऽव्यतिरिक्त्वात्, न ज्ञानं पृथक् क्वाऽप्यवतिष्ठते शब्दार्थसम्बन्धात्।

इदं वचो भूमिकायाः सर्वथा साधीयो यद् वेदेषु उपदेष्टृत्वादिगुणाः प्रकाशिताः सन्ति, वेदोपदेशानन्तरमेव सर्वलौकिकवाचा व्यवहारस्य सम्भवो जायते। न वेदवाचो विना स्वतो जननमस्याः (वाचः) । नात्रर्षिरगादीद् यद् 'वाग्व्यवहारसामान्ये सरस्वतीपदप्रयोगो भवति'। अत आक्षेपो बुद्धेश्छलमेवाऽस्य। अथवाऽकथनेऽपि प्रधानत्वेन सरस्वतीपदेन अनन्त-विद्यावत्त्वं प्रकाश्यते, गौणत्वेन लोकेऽपि सरस्वतीशब्दस्य लौकिकवाचः पर्यायत्वमपि व्यवहरन्ति जनाः। यथाऽस्य सिद्धा सरस्वतीत्यपि।

उस-उस नाम के आधार पर सूक्तों में परस्पर भेद किस प्रकार किया जा सकेगा । हमारे मत के अनुसार ऋषि, छन्द, देवता प्रभृति का स्वरूप पहले ही बताया जा चुका है ।"

करपात्री जी का भूमिका पर यह आक्षेप बुद्धि का छलमात्र है; क्योंकि उन्होंने महर्षि के लेख को गम्भीरता से नहीं देखा । इससे तो करपात्री जी की ही नास्तिकता झलकती है; क्योंकि उनके सिद्धान्त के अनुसार भी साकार वस्तु का कर्ता हाथ-पैर वाला साकार ही होना चाहिये । तब ईश्वर के साकार होने में अनवस्था दोष उपस्थित होगा; क्योंकि इस साकार के लिये पूर्व-पूर्व साकार का कर्ता ईश्वर अपेक्षित होगा, अतः यह कथन तर्कशास्त्र-विपरीत है । यह पूर्व भी कहा जा चुका है कि अमैथुनी सृष्टि के आदिम अग्न्यादि ऋषियों के निर्मल हृदयों में ईश्वर ने शब्दार्थ-सम्बन्ध सम्पन्न वेद का प्रकाश किया । अतः इनका कथन त्रुटिपूर्ण है; क्योंकि ज्ञानमय वेद के शब्दार्थसम्बन्ध अव्यतिरिक्त अर्थात् वेदज्ञान से पृथक् नहीं हैं, उसमें समवेत हैं ।

भूमिका का यह वचन तो सर्वथा सिद्ध है कि वेदों में उपदेष्टृत्व आदि गुण प्रकाशित हैं । वेदों के उपदेश के अनन्तर ही सारे लौकिक वाणी के व्यवहार प्रचलित हुए । वेदवाणी के विना और न इसके पूर्व लोकभाषा का व्यवहार प्रारम्भ हुआ । दूसरे आप मिथ्या कह रहे हैं, यहाँ पर ऋषि दयानन्द ने यह नहीं लिखा कि वाग्व्यवहार सामान्य में सरस्वती पद का प्रयोग होता है । अतः यह छलोक्ति मात्र है । अथवा न कहने पर प्रधानरूप से अनन्त विद्यावत्त्व ही प्रकट होता है । गौण रूप से तो लोक में भी लौकिक वाणी के पर्याय रूप में प्रयुक्त है, जैसे अच्छे वक्ता की वाणी सुनकर प्रशंसक श्रोता कहते हैं कि 'इसे सरस्वती सिद्ध है, जो धाराप्रवाह से प्रवाहित हो रही है ।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७२६, पं० ४—"वेदानामारम्भेऽग्निवाय्वादिशब्दप्रयोगैः प्रसिद्धिर्जायते यद् वेदेषु भौतिकपदार्थानामेव तत्तच्छब्दैर्ग्रहणं भवति, यत आरम्भे खल्वीश्वरशब्दप्रयोगो नैव कृतोऽस्ति।' इति प्रश्नस्य प्रतिवचनत्वेनोक्तम्—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति महाभाष्यकारेण लण्सूत्रव्याख्यानोक्तन्यायेन सर्वसन्देहनिवृत्तिर्भवतीति। कुतः? वेदवेदाङ्गोपाङ्गब्राह्मणग्रन्थेष्वप्यग्निशब्देनेश्वरभौतिकार्थयोर्व्याख्यानस्य विद्यमानत्वात्। तथेश्वरशब्दप्रयोगेणापि व्याख्यानेन विना सर्वथा सन्देहनिवृत्तिर्न भवति। ईश्वरशब्देन परमात्मा गृह्यते, तथा सामर्थ्यवतो राज्ञः कस्यचिन्मनुष्यस्यापीश्वर इति नामास्ति।"

इत्यादिकथनमयं पारिजातकृद् अकिञ्चित्करं ब्रूते। पुनराह—

"वेदवेदाङ्गोपाङ्गब्राह्मणादिग्रन्थेषु स्वामिनः प्रामाण्यबुद्धिर्नास्ति। किञ्च, मन्त्रब्राह्मणसूत्रादिभिश्चाग्निवाय्वादिशब्दा देवताविशेषपरा एव। 'अणुदित्' सूत्रातिरिक्तस्थले च 'व्याख्यानतो विशेषप्रतिपत्तिः' इत्यस्याप्रवृत्तिरेव।"

पृ० १७२६, पं० ४—"इसके आगे स्वामी दयानन्द लिखते हैं—'वेद के आरम्भ में अग्नि, वायु आदि शब्दों के प्रयोग से यह सिद्ध होता है कि जगत् में जिन पदार्थों का नाम अग्नि आदि प्रसिद्ध है, उन्हीं का ग्रहण करना चाहिये और इसीलिये लोगों ने उन शब्दों से संसार के अग्नि आदि पदार्थों को मान भी लिया है। नहीं तो उचित था कि जो-जो शब्द जहाँ-जहाँ होना चाहिये था, वहाँ-वहाँ उसी का ग्रहण करते कि जिससे कभी किसी को भ्रम नहीं होता, अथवा आरम्भ में उन शब्दों की जगह ईश्वर परमेश्वर आदि शब्दों का ही ग्रहण करना था।' इस तरह के प्रश्न को उपस्थित कर उसका समाधान इस तरह से प्रस्तुत किया है—'यों तो ऐसा करने से भी भ्रम हो सकता है; परन्तु जब व्याख्यानों के द्वारा मन्त्रों के पद का अर्थ खोल दिया गया है, तब उनके देखने से सन्देह आप से आप ही निवृत्त हो जाते हैं; क्योंकि शिक्षा आदि अङ्ग वेदमन्त्रों के पद-पद का अर्थ ऐसी रीति से खोलते हैं कि जिससे वैदिक शब्दार्थों में किसी प्रकार का संदेह शेष नहीं रह सकता। और जो कदाचित् ईश्वर शब्द का प्रयोग करते, तो भी विना व्याख्यान के संदेह की निवृत्ति नहीं हो सकती; क्योंकि ईश्वर नाम उत्तम सामर्थ्यवाले राजा आदि मनुष्यों का भी हो सकता है और किसी-किसी की ईश्वर संज्ञा भी होती है।"

करपात्री जी इस कथन को तुच्छ कहते हुए आरोप लगाते हैं कि—

"ब्राह्मणादि जो व्याख्यानग्रन्थ हैं; उन्हें स्वामी दयानन्द प्रामाणिक नहीं मानते और ब्राह्मणादि ग्रन्थों में अग्नि आदि शब्द देवतापरक हैं। दूसरे 'व्याख्यानतः०' यह परिभाषा 'अणुदित् सवर्णस्य चाप्रत्ययः' सूत्र में पूर्व णकार से अण् और पर णकार से इण् ग्रहण करने के लिये बनाई गई है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यात्मकं सर्वमविचारितफलम्, महाभाष्योक्त्या प्रमाणितत्वात्। न च 'व्याख्यानतो विशेषप्रतिपत्तिः' इत्यस्य पूर्वेण णकारेण अण्प्रत्याहारस्य परेण णकारेणेण्प्रत्याहारस्य ग्रहण एव प्रवृत्तिः स्यादिति वाच्यम्, सामान्यतो घटितनियमानामन्यत्रोचितस्थले घटनस्य दुर्वार्यत्वात्। नास्ति तत्र कश्चित् प्रतिबन्ध उक्तः।

प्रामाण्यविषये तु सम्यगुपपादितं प्रागेव यद् वेदानां प्रामाण्यस्वतस्त्वं भवति, अन्येषां ग्रन्थानां वेदानुकूल्ये परतः प्रामाण्यम्। इदमपि वचनं युक्तिप्रमाणशून्यं यद् अग्न्यादिशब्दैः केवलं तद्वाच्या देवता एव गृह्यन्ते त्वन्मता विशिष्टाधिष्ठात्रात्मवत्यः।

पृ० १७२७, पं० ६—यच्चाह—"केनोपनिषदि 'ब्रह्म ह देवेभ्यो विजिग्ये' इत्यादिप्रघट्टकस्य ब्रह्मरूपस्य महद्यक्षस्य समक्षेऽग्निवाय्विन्द्रादयो हतप्रभा जाताः। अग्निस्तृणमपि दग्धुं न शशाक, वायुश्च तृणमादातुमसमर्थ आसीत्। तत्राग्निवायुशब्दौ नेश्वरपरौ

इनका यह कथन ही इनकी ठस बुद्धि का प्रमाण है। स्वामी जी ने महर्षि पतञ्जलि का यह सामान्य नियम, जो सर्वत्र घटित है, उद्धृत किया है, जो 'अण्' प्रत्याहार और 'इण्' प्रत्याहार के ग्रहण की व्यवस्था में भी लग गया। किसी व्यक्ति ने आमों की फसल के दिनों में आम काटने के लिये चाकू मोल लिया, तो खरबूजों (ऊर्वारुक्), तरबूज, अमरूद आदि के दिनों में इन्हें भी काटा जा सकता है। पर मन्दधी यह कहेगा कि भाई! यह चाकू तो आम काटने के लिये लिया गया था, उससे अमरूद नहीं काटना चाहिये। ऐसी बात करपात्री जी की है। वस्तुतः इस परिभाषा के अन्यत्र प्रयोग करने में कोई प्रतिबन्ध नहीं है।

प्रामाण्यविषय में पूर्व यथाप्रकरण स्पष्ट रूप से कहा जा चुका है कि स्वतः प्रमाण वेदों के अनुकूल होने से ब्राह्मणादि के प्रामाण्य स्वीकृत हैं। अग्नि शब्द से चेतन अधिष्ठातावाले देवता ही लिये जायें, ऐसा कथन भ्रममात्र है; क्योंकि जड़ देवताओं का ईश्वरातिरिक्त कोई अधिष्ठातृ देव नहीं है।

पृ० १७२७, पं० ६—" केनोपनिषद् के 'ब्रह्म ह देवेभ्यो विजिग्ये' इस प्रघट्टक में ब्रह्मरूप महान् यक्ष के सामने अग्नि, वायु, इन्द्र प्रभृति सभी देवगण हतप्रभ होते देखे गये हैं। अग्नि एक तिनका भी न जला सका और न वायु ही उस तिनके को उड़ा सका। यहाँ अग्नि और वायु शब्द ईश्वर के वाचक नहीं माने जा सकते और न भौतिक अग्नि और वायु के ही ये वाचक हो सकते

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न वा भौतकाग्निवायुपरौ, अल्पशक्तित्वादव्यवहर्तृत्वाच्च। तस्माद्यथा मृद्विकारा घटादयः परिच्छिन्नत्वादिना मृदो भिन्ना अपि मृत्प्रकृतित्वान्मृद्रूपा अपि, तथैव विशिष्टैश्वर्यवत्त्वेन चेतनावन्तोऽग्न्यादयो देवताः सीमितैश्वर्यवत्त्वेनेश्वराद् भिन्ना अपि तत्प्रकृतिकत्वाद् ईश्वररूपा अपि।"

अयं विक्षिप्तवत् प्रस्तौति, न किञ्चिन्नियामकं यत् सर्वत्राग्निवायुशब्दाभ्यामीश्वरार्थमेव गृह्णीयात्। इदं हि आलङ्कारिकं वर्णनम्। इदं कः खलु नानुमोदयेत् प्राज्ञो यत् श्लिष्टार्थकशब्दैर्बह्वपि अल्पाक्षरैरेवोक्तं जायते, तेनैवाह स्वामी दयानन्दो यद् अन्यथा कोटिशः श्लोकैः सहस्रग्रन्थैरपि विद्यालेखपूर्तिरसम्भवाऽस्ति।

अन्यद् यदाह पारिजातकारो यद् जरन्मीमांसका वेदपरायणा अपि नेश्वरमवगन्तुं

हैं; क्योंकि इनकी शक्ति ससीम होती है। इसलिये जैसे मिट्टी से भिन्न होते हुए घट प्रभृति पदार्थ अपनी आकृति आदि के कारण सभी मिट्टी के ही विकार माने जाते हैं। उसी तरह से विशिष्ट ऐश्वर्य के कारण अग्नि प्रभृति चेतन देवता होते हुए भी अपने ऐश्वर्य की सीमित स्थिति के कारण ईश्वर से भिन्न होते हुए भी ईश्वर के ही प्रसाद से उस ऐश्वर्य के अधिकारी होने से ईश्वर के ही स्वरूप माने जाते हैं।"

श्री करपात्री जी का उक्त कथन बेलगाम वाणी का प्रलापमात्र है। भला, यह अग्नि, वायु आदि चेतन कैसे माने जा सकते हैं? ऐसा ऋषि ने कहीं नहीं लिखा कि अग्नि शब्द से सर्वत्र ईश्वर का ग्रहण करे।

आप यहाँ कहते हैं कि केनोपनिषद् के इस प्रसङ्ग में यह भौतिक अग्नि भी नहीं। अच्छा, अग्निस्वरूप विद्युत् सूर्य के अतिरिक्त वह कौन सी अग्नि है, जो जलाने का काम करती है? यह वाक्यरचना तो विक्षिप्तवत् एकसी ही है। इनमें क्या अन्तर है, जो आपने भौतिक अग्नि आदि को भी ससीम कहा और फिर बाद में चेतना देवता अग्नि को बताते हुए भी ससीम कहा।

महोदय! वास्तविकता यह है कि आप इस आलङ्कारिक स्थल को समझे ही नहीं। भला, इसका कौन बुद्धिमान् अनुमोदन नहीं करेगा कि श्लिष्टार्थक शब्दों से अल्प स्थान में बहुत सा कह दिया जाता है। इसीलिये स्वामी दयानन्द ने कहा है कि अन्यथा करोड़ों श्लोकों के सहस्रों ग्रन्थों से भी विद्या के लेख की पूर्ति नहीं हो सकती।

वृद्ध मीमांसकों के वेदपरायण होने पर भी उनको नास्तिक बताना, यह करपात्री जी का

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रभवन्तीत्यलीकमनर्गलं च।

उपनिषद्वर्णनन्त्वेतदालङ्कारिकम्, तद्यथा—अस्या उपनिषदः प्रथमखण्डे ब्रह्म ज्ञातुमिन्द्रियाणामयोग्यता प्रत्यपादि, द्वितीये च ब्रह्मज्ञानस्य साधनं तद्वैलक्षण्यमपि वा। इह पुनस्तृतीये खण्डे ब्रह्मज्ञानमधस्तनेनालङ्कारेण प्रतिपाद्यते। 'ब्रह्म ह देवेभ्यो विजिग्ये, तस्य स ब्रह्मणो विजये देवा अमहीयन्त। त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति।' (केनो० ३।१)। अत्रेदमुच्यते यत् पञ्चभूतानीन्द्रियाणि च स्वस्य कार्ये सफलानि भवन्ति, परं न ब्रह्मसाहाय्यं विना किञ्चिदपीन्द्रियमेकमपि वा भूतं सफलं भवितुमर्हति। किन्त्वज्ञानेनाहङ्कारेण वा इन्द्रियाण्यवाधारयन् अनन्यसहायकं स्वकीयं सामर्थ्यं कार्यसाफल्योत्कर्षभाजि।

अग्रिमश्रुतिषु भूतेन्द्रियाहङ्कारसंहारार्थं तृणज्वालनोत्पातनकथा प्रस्तुता। निष्कर्षोऽयं न ब्रह्मसाहाय्यं विना भूतेन्द्रियाणि किमपि कर्तुं पारयन्ते। नात्र कश्चिच्चेतनोऽग्निः प्रतिपादितः। अत्रत्यौ अग्निवायू नेत्रत्वचाप्रतिरूपकौ। इति नायं लेखको बिभर्ति शास्त्रावबोधसामर्थ्यमथवा

अपना चिन्तन है। वैसे मीमांसाशास्त्र सर्वथा ईश्वर का प्रतिपादक है।

यह उपनिषद्वर्णन आलङ्कारिक है। सो इस प्रकार—इस उपनिषद् के प्रथम खण्ड में ब्रह्म के जानने में इन्द्रियों की अयोग्यता तथा द्वितीय खण्ड में ब्रह्मज्ञान का साधन और उसकी विलक्षणता बतायी गयी है। पुनः यहाँ तृतीय खण्ड में ब्रह्मज्ञान को निम्न अलङ्कार द्वारा समझाया गया है। 'ब्रह्म ह देवेभ्यः' इस श्रुति में बताया है कि पञ्चभूत और इन्द्रियाँ अपने-अपने कार्य में सफल होती हैं, परन्तु ब्रह्म की सहायता के विना भूत व इन्द्रियाँ सफल नहीं हो सकतीं। किन्तु अज्ञान वा अहङ्कार से इन्द्रियाँ अपनी ही सामर्थ्य को सफलता का हेतु मानती हैं, जिसमें ब्रह्म की सहायता को न मान अपना ही उत्कर्ष व महत्त्व मानती हैं।

आगे की श्रुतियों में पञ्चभूत और इन्द्रियों के अहङ्कार के संहार के लिये आलङ्कारिक वर्णन है कि एक तिनका रख दिया गया, उसे अपनी समस्त शक्ति लगा कर न तो आग जला सकी और न वायु ही उड़ा सका। तब अग्नि की प्रतिनिधि आँख और वायु की प्रतिनिधि त्वचा, दोनों इन्द्र अर्थात् जीवात्मा से कहने लगे। इस इन्द्र ने ब्रह्म को जानकर कहा कि उसकी शक्ति से सब कुछ हो रहा है। श्री करपात्री जी इस अलङ्कार को तो समझे नहीं और एक नये चेतन अग्नि की बात कहने लगे। इससे प्रतीत होता है कि यह लेखक शास्त्रीय स्थलों के समझने में पूर्वाग्रहसे मुक्त बुद्धि से काम नहीं लेते, अथवा देखते हुए भी पक्षपात का चश्मा लगा कर सत्य के दर्शन

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पश्यन्नपि न च पश्यतीति दिङ्मात्रम् ।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'प्रश्नोत्तर-विषयः'
॥ सम्पूर्णः ॥

नहीं कर पाते । इति दिङ्मात्रम् ।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'प्रश्नोत्तर-विषय'
॥ सम्पूर्ण हुआ ॥

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ वैदिकप्रयोगविषयः संक्षेपतः

पृ० १७२९, पं० ४—यदपि—'तास्त्रिविधा ऋचः' इत्यादि निरुक्तवाक्यमुद्धृत्य महर्षिणा यद्व्याख्यानं कृतं तत्रायमाक्षिपति—

"तदेतन्मूर्खजनप्रतारणमेव, त्वदुक्तार्थस्य निर्मूलत्वात्।" इति, एतदपि मूर्खजन-वञ्चनायैव भवद्वचनम्, अप्रमाणत्वात्। यतो हि भूमिकावचनं तु सर्वथा मूलं सङ्गच्छते।

यच्चोच्यते—"मध्यमपुरुषप्रयोगार्थौ द्वौ भेदौ इत्यादिप्रयोगाणां शुद्धिस्तु चिन्त्यैव।" इति, परं नात्र शुद्धिश्चिन्त्या, प्रत्युत भवद्बुद्धिशुद्धिरेव चिन्त्या, या न शुद्धप्रयोगं विचिनोति। मध्यमपुरुषप्रयोगः (प्रयोगे वा) अर्थः प्रयोजनं ययोस्ताविति प्रतिपादनान् निखिलमपि शुद्धमेव। तद्यथा—'यत्राऽर्थाः प्रत्यक्षाः सन्ति तत्र मध्यमपुरुषप्रयोगा भवन्ति। यत्र न स्तोतव्या अर्थाः परोक्षाः (परं) स्तोतारश्च खलु प्रत्यक्षास्तत्राऽपि मध्यमपुरुषप्रयोगो भवति।'

पृ० १७२९, पं० ४—महर्षि दयानन्द सरस्वती ने वेद के प्रयोगों के विशेष नियमों को बताने के लिये निरुक्त का ७। १,२ उद्धरण देते हुए बताया है कि "भिन्न-भिन्न देवतावाले ये मन्त्र तीन प्रकार के होते हैं—परोक्षकृत, प्रत्यक्षकृत और आध्यात्मिक। इसमें नाम सब विभक्ति तथा 'सु' आदि प्रत्ययों से युक्त होकर तथा आख्यात (धातु) पद अर्थात् क्रियापद के प्रथमपुरुष-वाले 'तिप्' आदि प्रत्ययों से युक्त होते हैं, ऐसे मन्त्र परोक्षकृत कहलाते हैं। जिनके उदाहरण आचार्य यास्क ने यथास्थान दिये हैं। इसी प्रकार मध्यमपुरुष 'त्वम्' 'असि' आदि प्रयोग हैं और उत्तमपुरुष के 'अहम्' 'अस्मि' आदि प्रयोग हैं।" यह सब बताते हुए आगे लिखा है कि "संसारी जड़ पदार्थों को प्रत्यक्ष कराके केवल उनसे अनेक उपकार लेना जताया है, दूसरा प्रयोजन (अर्थात् उपासना आदि) नहीं है।"

परन्तु जड़पूजा के कारण जड़बुद्धि से पारिजातलेखक कहते हैं कि—"ये बातें सब ठगविद्या की हैं; क्योंकि इसमें कोई प्रमाण नहीं।" अब यह तो लेखक बताये कि किस बात में प्रमाण नहीं। क्या जड़पूजा नहीं करनी चाहिये, इस बात में? इसमें तो यथाप्रकरण प्रमाण दिये हैं। वास्तव में तो श्री करपात्री जी का कथन ही ठगविद्या व मूर्खजनों का प्रतारण है।

आपका यह कथन भी कि—"मध्यमपुरुषप्रयोगार्थौ द्वौ भेदौ' यह चिन्तनीय है।" वस्तुतः व्याकरणज्ञान न होने से आपकी बुद्धि की अशुद्धि ही चिन्तनीय है, तथा आपका 'प्रयोगानाम्' प्रयोग अवश्य चिन्तनीय है। 'मध्यमपुरुष का प्रयोग है अर्थ (प्रयोजन) जिन दो भेदों का' यह प्रयोग सर्वथा शुद्ध है। वेद में जहाँ पर जड़ पदार्थ प्रत्यक्ष होते हैं, वहाँ निरुक्तकार के उक्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भेदद्वयं दर्शयति हि ऋषिस्तत्र। यत्रार्थाः प्रत्यक्षाः सन्ति तत्र मध्यमपुरुषप्रयोगा भवन्ति। यथा—'त्वमिन्द्र बलादधि सहसो जात ओजसः' 'इन्द्र मृधो जहि'। प्रत्यक्षस्तत्राऽपि मध्यमपुरुषप्रयोगः।'मा चिदन्यद् विशसत' इत्यत्र स्तोतारः प्रत्यक्षकृताः। तथा चाऽह दुर्गोऽपि—'एवमेतेषु युष्मद्गुणपदप्रयोगेषु सम्बद्धाः स्तोतारः, स्तोतव्यानि तु यानि देवतान्तानि, तानि परोक्षकृतानि सम्बन्धीनि।' इत्येवं मध्यमपुरुषप्रयोगो दर्शितः।

पृ० १७२९, पं० ५—यदुक्तम्—"वस्तुतस्तु सम्बोद्ध्यत्वविशिष्टचेतनेषु युष्मत्पदप्रयोगो भवति, अहङ्कारविशिष्टचेतनेऽस्मत्शब्दप्रयोगो भवति। जडेषु तु चेतनदेवताभिप्रायेणैव युष्मत्पदप्रयोगो भवति। यथा चैतत्तथा—'अभिमानिव्यपदेशस्तु' (ब्र० सू० २।१।५) इति निर्देशादिभिरुक्तमेव।"

इदं सकलमेव तत्त्वानवगाहनादेवोक्तम्। 'अचेतनेष्वपि चेतनवदुपचाराः' (३।१।७) इति महाभाष्यकारेणोक्तत्वात् सम्बोधनविभक्तेर्मध्यमपुरुषस्य वा प्रयोगो भवत्येव। यथा—'स्वधिते मैनं हिंसीः' इति।

नियम से मध्यमपुरुष का प्रयोग होता है और जहाँ स्तोतव्य अर्थ परोक्ष होते हैं, वहाँ भी मध्यमपुरुष का प्रयोग होता है।

ऋषि ने वहाँ दो भेद भी दिखाये हैं। जहाँ अर्थ प्रत्यक्ष होते हैं, वहाँ मध्यमपुरुष होता है। यथा—'त्वमिन्द्र बलादधि' में। जहाँ स्तोतव्य अर्थ परोक्ष होते हैं। 'मा चिदन्यद् विशंसत' यहाँ पर स्तोता प्रत्यक्षकृत हैं। दुर्गाचार्य भी कहते हैं कि—'इस प्रकार इन युष्मद्गुणपद प्रयोगों में सम्बद्ध स्तोता प्रत्यक्ष और देवतान्त परोक्षकृत से अभिसम्बन्ध होते हैं।' इस प्रकार मध्यमपुरुषप्रयोग दर्शित किया गया।

पृ० १७२९, पं० ५—यह कहना कि—"वास्तविक स्थिति यह है कि जब चेतन पदार्थ को सम्बोधित करना रहता है, तब मध्यमपुरुष का प्रयोग होता है और अहङ्कार से विशिष्ट चेतन में उत्तमपुरुष का। जड़ पदार्थों में मध्यमपुरुष का प्रयोग चेतन देवता के अभिप्राय से किया जाता है। इस विषय पर विस्तृत विचार 'अभिमानिव्यपदेशस्तु' इस वेदान्तसूत्र का प्रमाण देकर पहले ही किया जा चुका है।"

पारिजात का यह समस्त लेख ऋषितत्त्व को न समझने के कारण है। महाभाष्यकार पतञ्जलि ने लिखा है कि 'अचेतनों में भी चेतनवत् उपचार होते हैं।' इससे सम्बोधन विभक्ति वा मध्यमपुरुष का प्रयोग होता है। जैसे 'हे कुठार, इसकी हिंसा मत करो।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

न चोक्तवेदान्तसूत्रेण चेतनाधिष्ठातृदेवताऽभिलक्ष्यते इति वाच्यम्, तत्सूत्रस्याऽन्याभिप्रयणात्। यथाहि कश्चित् कथयेद् यद् ब्रह्म कार्यरूपं न भवेत् तदा कथं कथ्येत अभिमानी। तदोत्तरति—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्'। विशेषस्तु, जगन्निर्माणकालात् प्रलयकालस्य भिन्नताबोधनम्, अनुगतिश्चैकस्य ब्रह्मणे बहुरूपजगत्पदार्थेष्वनुगतत्वम्। आभ्यां द्वाभ्यां कारणाभ्यां ब्रह्म अभिमानि व्यपदिश्यते।

लोकेऽप्यामूर्खपण्डितं जडपदार्थेषु चेतनवद् व्यवहरति, परं तथा व्यवहारेऽपि न ते पदार्थाश्चेतना मन्यन्ते। कवयोऽपि जडपदार्थान् निर्दिशन्ति चेतनवत्। यथा—'तटानि निपतितुमिच्छन्ति'। चेतनद्वारा सम्भाविताया इच्छाया जडेषु तटेषु प्रयोगः।

पृ० १७२९, पं० ७—यदाह—"जडपदार्थानामुपकारार्थं प्रत्यक्षकरणमात्रमेव' इति वाक्यस्य प्रकृते किं प्रयोजनम्। कथं च तावता तत्र मध्यमपुरुषप्रयोगः समर्थ्यते? इति तु स एव विजानातु। पूर्वोक्तनिरुक्तप्रघट्टकेन तु मनागप्यस्यार्थस्य न सम्बन्धः।" इति।

तदपि बुद्धिमान्द्यफलमेव। अनेन वाक्येन तु एतत् प्रबोध्यते यद् जडपदार्थेषु प्रत्यक्षवद्

यह भी कथन ठीक न होगा कि इस वेदान्तसूत्र से चेतन अधिष्ठातृ देवता अभिलक्षित होता है; क्योंकि इस सूत्र का अभिप्राय ही अन्य है। जैसे कोई कहे कि ब्रह्म कार्यरूप नहीं होवे तो अभिमानी कैसे कहा जा सकता है। इस प्रश्न के उत्तर में कहा गया है कि 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्'। जगन्निर्माणकाल से प्रलयकाल की भिन्नता का बोधन 'विशेष' है, तथा एक ब्रह्म का बहुरूपवाले जगत् के पदार्थों में अनुगत होना 'अनुगति' है। इन दोनों कारणों से ब्रह्म अभिमानी व्यपदिष्ट होता है।

लोक में भी मूर्ख या विद्वान् सभी जड़ पदार्थों में चेतनवत् व्यवहार करते हैं, परन्तु वैसा व्यवहार करने पर भी वे जड़ पदार्थ चेतन नहीं माने जाते। कवि भी जड़ पदार्थों को चेतनवत् मानकर व्यवहार करते हैं। जैसे—'किनारे गिरना चाहते हैं।' चेतन द्वारा सम्भावित इच्छा का जड़ तटों में व्यवहार किया गया है।

पृ० १७२९, पं० ७—"जड़ पदार्थों का प्रत्यक्ष कराके उनसे उपकार लेने का यहाँ क्या प्रयोजन हो सकता है? और इसके आधार पर मध्यमपुरुष के प्रयोग का समर्थन कैसे किया जा सकता है? यह बात दयानन्द ही जाने। प्रस्तुत प्रकरण में उद्धृत निरुक्त के इस प्रघट्टक से तो इसका कुछ भी सम्बन्ध नहीं है।"

श्री करपात्रीजी का यह कथन विचारशक्ति की कुण्ठितता का प्रमाण है। निरुक्तवाक्य से तो यह ध्वनित हुआ है कि जड़ पदार्थों में प्रत्यक्षवत् जो मध्यमपुरुष का प्रयोग किया है,

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यो मध्यमपदप्रयोगः कृतस्तेन वेदेन विज्ञाप्यते यत् तेषां पदार्थानां कार्येषु पर्याप्तलाभं ग्रहीतुं प्रत्यक्षं सर्वैः कर्तव्यम् इति। मध्यमपदप्रयोगसमर्थनं च प्राग् दर्शितम्। प्रघट्टकसम्बन्धस्तु इहैव प्रबोधितः सम्यक्।

पृ० १७२९, पं० १२—यच्चोक्तम्—"अत्र विच्छिद्य वचनान्युद्धृतानि, तदुदाहरणानि च नोद्धृतानि।"

इत्यकिञ्चित्करम्, केवलं प्रलाप एव। यावदावश्यकमासीत् तदेवोद्धृतम्। भवांस्तु ग्रन्थकलेवरवर्धनायानावश्यकं बहूद्धरति। नहि मन्दानामिव प्रवृत्तिर्ऋषीणां जायते। महर्षिर्यास्कोऽपि प्रतीकमात्रमुद्धरति, यथा—'इन्द्रो दिव इन्द्र ईशे पृथिव्याः' (ऋ० १०।८९।१०) न तु समग्रं मन्त्रम्।

पृ० १७३०, पं० १—"नह्यत्र सर्वा ऋचस्त्रिविधार्थका भवन्तीत्यर्थः सम्भवति। नहि

उससे वेद में विज्ञापित होता है कि वे पदार्थ पास में है तथा सामने हैं। पास और सामने होने का तो तात्पर्य यही है कि उन का उपयोग कर लाभ उठाया जावे, अन्यथा प्रत्यक्ष कर मध्यमपुरुष के प्रयोग का प्रयोजन ही क्या ठहरा? मध्यम पद के प्रयोग का समर्थन और उदाहरण हम पूर्व दिखा चुके हैं। तथा निरुक्त के प्रघट्टक का सम्बन्ध भी बता दिया है। आपकी जड़ोपासना से फलित बुद्धि की जड़ता इसे सम्यक् नहीं समझ पा रही है।

पृ० १७२९, पं० १२—"स्वामी दयानन्द ने कुछ वचनों को छोड़कर निरुक्त का उद्धरण दिया है। इस प्रकार निरुक्त के वाक्यों का उपयोग करके निरुक्त के नाम से अपने गलत सिद्धान्त का प्रतिपादन करते हैं।"

श्रीमन्! आप उस गलत सिद्धान्त का अङ्गुल्या निर्देश क्यों नहीं करते? सच तो यह है कि दयानन्द के निष्कलङ्क सिद्धान्तों की धवलिमा के दर्पण में आपको अपनी ही आँख का काला तिल प्रतिबिम्बित दीख रहा है। आपको तो ताल्वादि स्थानों का और जिह्वा का संघर्षण करना है, उससे जो भी निकल पड़े, उस शब्दावली की मस्तिष्क से सम्बन्धविच्छिन्नता ही जान पड़ती है। महर्षि ने जितना अंश आवश्यक समझा, उद्धृत कर दिया। आपकी भाँति उन्हें ग्रन्थ की स्थूलता तो नहीं बढ़ानी थी। आप तो बहुत सा अनावश्यक उतार देते हैं। याद रखिये, मन्दबुद्धियों के समान ऋतम्भरप्रज्ञ ऋषियों की बुद्धि अनावश्यक नहीं कहती। महर्षि यास्क ने भी सब विभक्ति तथा पुरुषों में समग्र मन्त्र नहीं उतारा, प्रतीकमात्र दिया है।

पृ० १७३०, पं० १—विचारशील लोग आपकी उलटी बुद्धि का नमूना देखेंगे। श्री

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सर्वासु प्रत्यक्षकृतस्त्वपरोक्षकृतत्वादिकं सम्भवति, परस्परविरुद्धत्वात्।"

इत्यत्रपेण सर्वमनर्गलमभिहितमनेन, भूमिकामूलस्यामननात्। ऋषिस्त्वत्र स्पष्टं लिखति यत्—'सर्वे मन्त्रास्त्रिविधानामर्थानां वाचकाः। तेषु मन्त्रेषु केचित् परोक्षाणाम् (अर्थानाम्) केचित् प्रत्यक्षाणाम्, केचिदध्यात्मं वक्तुमर्हाः' इति। भवन्मतिर्या हि विपरीतं सर्वत्र विमृशति सा तु सङ्ग्राह्या अद्भुतालय एव।

अपरं चेदमुच्यते यद् ऋषिणा प्रकरणप्रारम्भ एव 'निरुक्तकारः संक्षेपतो वैदिकशब्दानां विशेषनियमान्' इति, अतः केवलनियमानेवोददीधरन्न चोदाहरणानि।

पृ० १७३०, पं० ३—भवदुक्तौ 'परोक्षकृतामृचां लक्षणमुच्यते' इत्यत्र 'परोक्षकृताम्' इति शुद्धिश्चिन्त्या। न च 'परोक्षं कुर्वन्तीति परोक्षकृतस्तासाम्' इति साध्यम्, निरुक्त-कारेणाप्यतदर्थत्वाभीष्टत्वात्।

करपात्री जी कहते हैं कि—"सभी मन्त्रों के तीन प्रकार के अर्थ होते हैं, ऐसा हो भी नहीं सकता· क्योंकि परोक्षकृत और प्रत्यक्षकृत अर्थ परस्पर विरोधी हैं, उनकी एक साथ स्थिति कैसे रह सकती है।"

अब हम आप से पूछते हैं कि ऋषि दयानन्द का वह वाक्य दिखाइये, जिसमें उन्होंने लिखा है कि 'प्रत्यक्ष और परोक्षकृत एक ही मन्त्र के अर्थ किये जायेंगे।' आपको लज्जा आनी चाहिये झूँठ बोलते हुए। ऋषि ने तो स्पष्ट लिखा है—'सब मन्त्र तीन प्रकार के अर्थों में से ही किसी प्रकार के अर्थ के वाचक हो सकते हैं। जिनमें कोई प्रत्यक्ष, कोई परोक्ष और कोई अध्यात्म अर्थ के वाचक होंगे।' पारिजातलेखक की मति सर्वत्र उलटी ही चलती है। इस वाममार्गगामिनी मति को तो अद्भुतालय में संगृहीत रखना चाहिये था।

आपके १४ सहयोगी पण्डित सभी निद्रामुद्रितलोचन थे, जिन्होंने इस प्रकरण के प्रारम्भिक वाक्य को ही नहीं देखा। ऋषि लिखते हैं—'अब इसके आगे वेदस्थ प्रयोगों के विशेष नियम संक्षेप से कहते हैं।' इसलिये उन्होंने निरुक्त से केवल नियम उद्धृत किये, उदाहरण छोड़ दिये।

आपने अभी ऊपर कहा था कि—"स्वामी दयानन्द का 'मध्यमपुरुषप्रयोगार्थौ भेदौ' यह चिन्त्य है।" इसका समाधान तो हमने कर दिया। अतः आपका १७३० पृष्ठ की तीसरी पंक्ति में 'परोक्षकृतामृचां लक्षणम्' कैसे शुद्ध है? 'परोक्ष को करनेवाली ऋचाओं का—परोक्षं कुर्वन्तीति परोक्षकृतः' यह अर्थ यास्काचार्य को अभीष्ट नहीं है; क्योंकि उन्होंने सर्वत्र कृतान्त का ही प्रयोग किया है, अतः यह प्रयोग चिन्त्य है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७३३, पं० ६—यच्चाह—"वागाम्भृणी नाम्नी ऋषिका 'अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥' (ऋ० १०। १२५। १) इति ब्रवीति।"

इति प्रतिपादयताऽनेन वेदाध्ययनस्य स्त्रिया अधिकार एवाभिव्यञ्जितः। न चैतावदेव, ऋषित्वं ब्रह्मभावत्वं वाऽपि घोषितम्। वस्तुतस्तु आम्भृणी वाग् नामाऽपि ऋषिकायाः प्रसिद्धम्।

पृ० १७३३, पं० ८—यदाह—"जगदाकारेण परिणममानाया मायाया अधिष्ठानत्वेनासङ्गस्यापि ब्रह्मणः सर्वोपादानत्वसम्भवात्।"

इति वचस्तु कुण्ठितधिय एव। ब्रह्म जगदुपादानकारणं भवेच्चेत् तदा तत् परिणाम्यवस्थान्तरयुक्तं विकारि च सम्पद्येत। किञ्च, उपादानस्य गुणकर्मस्वभावाः कार्येषु संक्राम्यन्ति। तथा 'कारणगुणपूर्वकः कार्यगुणो दृष्टः' (वै० ३। २। १। २४)।

इन्होंने यहाँ मन्त्रों के उदाहरण तथा उनकी सायणकृत व्याख्या उतार कर अपने ग्रन्थ की स्थूलता बढ़ा दी है। यद्यपि वे अर्थ भी खण्डनीय हैं, परन्तु यहाँ हमारा दृष्टिकोण है कि इन्होंने ऋषि की बातों का उद्धरण देकर जो भी खण्डन का असफल प्रयास किया है, उसका हम समाधान कर इनकी योग्यता की कलई खोल दें।

पृ० १७३३, पं० ६—इस पंक्ति में लिखा है—"वागाम्भृणी नाम की मन्त्र का दर्शन करनेवाली स्त्री ऋषि (ऋषिका) इस सारे जगत् के कारण ब्रह्म को अपना ही स्वरूप मानती हुई कहती है।"

अब यहाँ इनसे पूछिये कि 'स्त्री और शूद्र का अनधिकार' का सिद्धान्त कहाँ सो गया? इससे स्पष्ट उपनयन और वेदाध्ययनाधिकार अभिव्यञ्जित हैं। इतना ही नहीं, ऋषित्व और ब्रह्मभाव भी प्रतिपादित किया है। कहिये, ऋषि दयानन्द का जादुई सत्यसिद्धान्त अब इन के सर पर सवार है या नहीं?

पृ० १७३३, पं० ८—यह कहना कि—"उसी तरह जगत् के रूप में परिणत हो रही माया के कारण, उसके अधिष्ठान के रूप में विद्यमान असङ्ग ब्रह्म भी सारे जगत् का उपादानकारण बन जाता है। वस्तुतः यही उक्त निरुक्त की वाक्यावली का अर्थ है।"

यह सब इनकी कुण्ठित मति का द्योतक है। यदि ब्रह्म को जगत् का उपादानकारण मानोगे, तो ब्रह्म भी अवस्थान्तर को प्राप्त तथा विकारी हो जायेगा और वह विकारी नश्वर भी होगा, पर ब्रह्म ऐसा नहीं है। दूसरे उपादानकारण के गुण, कर्म, स्वभाव भी कार्य में आना अपरिहार्य है। जैसाकि वैशेषिकदर्शन का कथन है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एवं च कार्यकारणयोर्जगद्ब्रह्मणोर्गुणवैपरीत्यं दुर्घटं स्यात्, उभयोर्गुणविरोधश्च प्रत्यक्षं समीक्ष्यते। तथाहि ब्रह्म सच्चिदानन्दस्वरूपं जगच्च कार्यरूपमचेतनमानन्दशून्यञ्च। ब्रह्माजं जायमानं च जगत्। ब्रह्मादृश्यं दृश्यं च जगत्। ब्रह्माखण्डं जगच्च खण्डरूपम्। न च पृथिव्यादिकार्यं चेतनं ब्रह्मवत्। तस्माद् ब्रह्मणो जगत उपादानत्वकथनमशास्त्रम्। इति दिक्।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'वैदिकप्रयोग-विषयः'
॥ सम्पूर्णः ॥

इस प्रकार जगत् और ब्रह्म को कार्य कारण (उपादान) मानने पर गुणों की विपरीतता कैसे सङ्गत हो सकेगी? जगत् तथा ब्रह्म के गुण विपरीत प्रत्यक्ष ही प्रतीत हैं। जैसे ब्रह्म सच्चिदानन्दस्वरूप है, जगत् कार्यरूप, अचेतन और आनन्दरहित है। ब्रह्म अजन्मा है और जगत् जायमान है। ब्रह्म अखण्ड है और जगत् खण्डरूप है। पृथिव्यादि कार्य ब्रह्मवत् चेतन नहीं है। अतः ब्रह्म को जगत् का उपादान कहना अशास्त्रीय है, इसीलिये माया अर्थात् प्रकृति अनादि है। इति दिक्।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीयमतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'वैदिकप्रयोग-विषय'
॥ सम्पूर्ण हुआ ॥

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ संक्षेपतः स्वरव्यवस्थाविषयः

पृ० १७३४, पं० ३—"उच्चैरुदात्तः' इत्यादिसूत्रेषु महाभाष्ये। तत्र महाभाष्यसम्मतत्वाद् विप्रतिपत्तिर्नास्ति।"

"यत्तु—'षड्जादयः सप्त—षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादाः' (पिङ्गलसूत्रे ३।६४) ।एषां लक्षणव्यवस्था गान्धर्ववेदप्रसिद्धा ग्राह्या।' इत्यादि, तत्तु प्रकृते निरुपयोग्येव। पूर्वं तु प्रश्नोत्तरविषये प्रोक्तम्—येन येन स्वरेण वादित्रपूर्वकं गानं कर्तुं योग्यमस्ति तदर्थं षड्जादिस्वरोल्लेखनं कृतमस्तीति, तदपि कषायायितम्, तद्रीत्या षड्जादीनामपि लक्षणस्य वक्तव्यत्वात्।"

इति वदन्नयं वस्तुतः 'अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख' इत्यस्यैव निदर्शनीभूतो लेखकः। महाशय! प्रकृते अर्थात् स्वरव्यवस्थाविषये षड्जादिस्वर-वर्णनं न निरुपयोगि, प्रत्युतातिरामुपयोगि एव।

यच्चोक्तम्—"वादित्रादिगानयोग्यरीत्या षड्जादीनामपि लक्षणं वक्तव्यम्" इति कथनं

पृ० १७३४, पं० ३—"ऊपर सारा विवरण 'उच्चैरुदात्तः' आदि पाणिनीय सूत्र के महाभाष्य के अनुसार है। इसमें हमारा कोई विवाद नहीं है।" ऐसा श्री करपात्री जी भूमिकोद्धरण देते हुए लिखते हैं।

पुनः 'अब षड्ज आदि स्वरों को लिखते हैं, जो कि गानविद्या के भेद हैं। वे हैं—षड्ज, ऋषभ, गान्धार, मध्यम, पञ्चम, धैवत और निषाद। इनके लक्षण व्यवस्थासहित, जो कि गन्धर्ववेद अर्थात् गानविद्या के ग्रन्थों में प्रसिद्ध हैं, वहीं से जान लेना।' इस पर पारिजातकार का कथन है कि—"इन गानविद्या के स्वरों का प्रकृत विषय से कोई सम्बन्ध नहीं है। पहले भी स्वामी दयानन्द प्रश्नोत्तर पद्धति में यह लिख चुके हैं कि जिन स्वरों की सहायता से वेदमन्त्रों को गीत और वाद्य के साथ जोड़ा जा सकता है, इसी के लिये षड्ज आदि स्वरों का विधान किया गया है। हम वहीं इसका उत्तर दे चुके हैं कि यह मात्र बेसुरा प्रलाप है।"

इस पर हमारा कथन है कि वेदनिष्ठ गानविद्या की बात श्री करपात्री जी के लिये तो ऐसी ही है जैसे कोई भैंसे को वेणु-वादन सुनाने लगे। वास्तव में अरसिक व्यक्तियों के समक्ष काव्य की सरसता निष्फल ही होगी। महाशय जी! प्रकृत अर्थात् स्वरव्यवस्था के वर्णनप्रसङ्ग में ही षड्जादि स्वरों की उपयोगिता हो सकती है तथा उसका वर्णन करना प्रासङ्गिक और उचित होगा।

यह कहना कि "यहाँ षड्जादि का लक्षण भी बताना चाहिये था" सर्वथा अनुचित है;

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तु व्यर्थम्, न होकस्थल एव सर्वं वक्तुं शक्यम्। षड्जादीनां हि लक्षणानि तद्विषयक-ग्रन्थेषूक्तानि। अत एवोक्तमृषिणा—'एषां लक्षणव्यवस्था गान्धर्ववेदप्रसिद्धा ग्राह्या। अत्र तु ग्रन्थभूयस्त्वभिया लेखितुमशक्या' इति।

यच्चाह—"नैवैकस्य मन्त्रस्यानेके स्वराः सम्भवन्ति, नैकेन वा स्वरेण गानं सम्भवति" इत्यपि षड्जादिस्वराणां मन्त्रेषु दृष्टानां तात्पर्यानवबोधादेवाभिहितम्।

तथा चावधेयं यत्—"ये खलु सामवेदे प्रपञ्चिताः क्रुङ्प्रथमद्वितीयतृतीय-चतुर्थमन्द्रातिस्वर्याभिधाः सप्त स्वरास्ते उदात्ताद्यवान्तरभेदभूता न कर्हिचित्तद्व्यतिरिक्ता इति दृढमाकलयामः। केचित्तु नारदीयशिक्षामाश्रित्य व्यवतिष्ठन्ते तत्सङ्गीतशास्त्रप्रसिद्धाः षड्जादयः स्वरास्तेऽपि पुनरिम एव सामस्वरा न तेभ्योंऽशतोऽपि बेभिद्यन्ते। एतेष्वेवोदात्तानुदात्तस्वरितेषु ते षड्जादयः स्वरा अप्यन्तर्भवन्ति। उक्तं च पाणिनीयशिक्षायाम्—

उदात्तौ निषादगान्धारावनुदात्ता ऋषभधैवतौ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः॥" इति।

क्योंकि सब कुछ एक ही स्थान पर लिख पाना अयोग्य है। इसीलिये ऋषि ने लिखा—'लक्षणव्यवस्था गन्धर्ववेद में प्रसिद्ध ग्रहण करनी चाहिये, ग्रन्थ बढ़ जाने के भय से यहाँ नहीं लिखा जा रहा है।'

श्री करपात्रीजी का यह कहना भी अज्ञता है कि—"एक मन्त्र के अनेक स्वर नहीं होते और न एक स्वर के सहारे किसी मन्त्र का गान ही किया जा सकता है" क्योंकि उदात्त उदात्ततरादि अनेक स्वर एक मन्त्र में भी सम्भव हैं। षड्जादि में से गायत्री आदि के एक-एक स्वर पिङ्गल में अवश्य विहित हैं, उनमें से एक स्वर होगा। 'एक स्वर से गान नहीं होता' यह कथन आपका अस्पष्ट होने से गानविद्या के अज्ञान को प्रकट करता है। महोदय! गानविद्या में विविध राग आदि में एक ही संवादी स्वर निश्चित होता है। मन्त्रों के षड्जादि स्वरों का आप तात्पर्य ही नहीं समझते।

इस विषय में किञ्चित् लिखा जा रहा है कि सामवेद में जो स्वर प्रपञ्चित किये गये हैं, यथा—क्रुङ्, प्रथम, द्वितीय, तृतीय, चतुर्थ, मन्द्र, अतिस्वर्य—ये सात स्वर होते हैं। उदात्तादि अवान्तरभेदभूत ये कदापि उनसे व्यतिरिक्त नहीं हैं। कुछ नारदीयशिक्षा का आश्रय लेकर व्यवस्थित होते हैं। संगीतशास्त्र में प्रसिद्ध षड्ज आदि सात स्वर सामवेद के उक्त स्वरों से भिन्न नहीं हैं। वे षड्जादि स्वर उदात्त, अनुदात्त और स्वरित में ही अन्तर्भूत हो जाते हैं। जैसाकि पाणिनीय नाम से प्रसिद्ध शिक्षा में कहा गया है—

'निषाद और गान्धार उदात्त, ऋषभ और धैवत अनुदात्त, तथा षड्ज, मध्यम और पञ्चम स्वरित से उत्पन्न हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

एतेनावगन्तव्यं यद् गायत्र्यादिमन्त्रेषु ये षड्जादयः स्वरा निर्दिश्यन्ते तेषामुच्चैर्नीचैः समानस्वरे वा गानं कर्तव्यम्।

तेषां षड्जादीनां लक्षणानि शिक्षायां यथा—

'षड्जं रौति मयूरोऽपि वृषो नर्दति चर्षभम्।
अजा विरौति गान्धारं क्रौञ्ची नर्दति मध्यमम्॥

पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।
अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः॥'

यदप्युच्यते—"षड्जादयस्तु कथं केन प्रकारेण ज्ञायन्ते" इत्यादि तदत्रोच्यते यन् महर्षिणा स्वयमेव लिखितं यद् 'गान्धर्वविद्याप्रतिपादकग्रन्थेभ्योऽसौ प्रकारो ज्ञातव्यः।'

सङ्गीतं हि गायनवादननृत्यात्मकं भवति। नादस्थानं श्रुतिस्वराणां ज्ञानं गुरुमुखादध्येतव्यम्।

गायने हि नहि सितपीतादयो वर्णकेषु ग्राह्याः, किन्तु स्वरप्रयोगस्य विभिन्नक्रिया अपि वर्णाः कथ्यन्ते। ते हि स्थाय्यारोहावरोहसञ्चारिभेदाच्चतुर्विधाः। एवमेव गाने अलङ्कार-तानालापा अपि भवन्ति।

इससे समझना चाहिये कि जो गायत्री आदि मन्त्रों में षड्जादि स्वर निर्दिष्ट होते हैं, उनका यथोक्त रूप से उच्च, नीच और समान स्वर से गान करना चाहिये। उन षड्जादि के लक्षण ये निम्न हैं, जो आपने भी लिखे हैं—

'मोर षड्ज स्वर में बोलता है, ऋषभ स्वर साँड के नर्दन के समान होता है, बकरी की बोली गान्धार स्वर की होती है, क्रौञ्ची का स्वर मध्यम स्वर का है, कोयल का पञ्चम स्वर है, अश्व का हिनहिनाना धैवत स्वर में है और हाथी की चिंघाड़ निषाद स्वर में होती है।'

"षड्जादि किस प्रकार जाने जाते हैं" इसके उत्तर में ऋषि ने बताया कि गन्धर्ववेद में इनके लक्षण प्रसिद्ध हैं, तथा ये गुरुमुख से जाने जाते हैं।

गानों के सित पीतादि वर्ण कार्य ग्राह्य नहीं हैं। स्वरप्रयोग की विभिन्न क्रियायें भी वर्ण कहलाती हैं। वे स्थायी, आरोह, अवरोह, सञ्चारी भेद से चार प्रकार के होते हैं। इसी प्रकार गान में अलङ्कार, आलाप तथा तान भी होते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदुच्यते—"नह्येकेन स्वरेण गानं सम्भवति" तद् ब्रूमः । महाशय ! रागे एकस्मिन् एकः स्वर एव वादी एकश्च संवादी भवति। तथाच प्रातःसवनादिक्रमे गायत्र्यादिच्छन्दसां मयूरादिपक्षिणामुरःकण्ठादीनामुच्चारणस्थानानां प्रबोधनेऽपि तात्पर्यं विशिष्टं गुरुभ्यो ग्रन्थेभ्योऽपि वाऽध्येतव्यं भवता। यथा च पाणिनीयशिक्षायाम्—

'प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ।
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ॥
तारं तृतीयसवनं शीर्षण्यं जागतानुगम् ।'

'प्रातः पठेन्नित्यमुरःस्थितेन,
स्वरेण शार्दूलरुप्तोपमेन ।
मध्यन्दिने कण्ठगतेन चैव,
चक्राह्वसंकूजितसन्निभेन ॥'

'तारं तु विद्यात् सवनं तृतीयम्,
शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणाम्,
तुल्येन नादेन शिरःस्थितेन ॥' इति ।

पृ० १७३४, पं० ६—"ननु भूमिकायामुक्तम्—'येन येन स्वरेण वादित्रपूर्वकं गानं कर्तुं

"एक स्वर से गान नहीं होता" इस कथन से करपात्री जी का क्या तात्पर्य है, जब कि गान मे एक स्वर ही वादी और एक ही स्वर संवादी होता है । तथा प्रातःसवनादि क्रम में गायत्री आदि छन्दों का मयूरादि पक्षियों के उरः कण्ठ आदि उच्चारण-स्थानादि के ज्ञान कराने पर भी विशेष तात्पर्य गुरु तथा ग्रन्थों से आपको सीखना चाहिये । जैसा कि 'पाणिनि-शिक्षा' में कहा है—

'गायत्री छन्द पर आश्रित प्रातःसवन योग को हृदय से, त्रिष्टुभ्-सङ्गत मध्यम स्वर को मध्याह्न मे कण्ठ से, तृतीयसवन में जगती छन्द को शीर्षगत तारस्वर से कहे ।'

ऐसा ही आगे भी कहा है—

'प्रातःकाल शार्दूलरुप्तोपम स्वर से, मध्याह्न में चक्राह्व (चकई-चकवा) के कण्ठगत स्वर से, सायंकाल को शिरोगत तारस्वर से मन्त्रोच्चारण करे ।'

पृ० १७३४, पं० ६—"भूमिका में कहा गया है—'जिन स्वरों की सहायता से वेदमन्त्रों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

योग्यमस्ति तदर्थं षड्जादिस्वरोल्लेखनं कृतमस्ति' तदपि कषायितम्, तद्रीत्या षड्जादीनामपि लक्षणस्य वक्तव्यत्वात्। किञ्च, केन प्रमाणेनैतत् सिध्यति?"

इत्यपि बुद्धिबाह्यम्, सर्वलक्षणानां विधीनामेकत्रात्र सङ्कलयितुमशक्यत्वात् ग्रन्थविस्तरभियाऽनावश्यकत्वाच्च। प्रकृते यावदुपयोगि तावन्मात्रं निरदिशद् ऋषिः। षड्जादीनामुच्चारणमपि यथायथं गुरुपरम्परयैव विज्ञेयं भवता। तथापि मया संक्षेपेणोच्यते सामगानप्रकारे—

सामवेदोल्लेख ऋग्वेदे एकविंशतिवारम्, यजुषि अनेकवारम्, अथर्ववेदे ऊनविंशतिवारमायातः। सामगानसङ्केतस्तु यथा—

(१) 'उभे वाचौ वदति सामगा इव' (ऋ० २।४३।१)।
(२) 'उद्गातेव शकुने साम गायसि' (ऋ० २।४३।२)।
(३) 'तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगमुक्थशासम्' (ऋ० १०।१०७।६)।
(४) 'इन्द्राय साम गायत विप्राय बृहते बृहत्' (ऋ० ८।९८।१)।
(५) 'अशीतिभिस्तिसृभिः सामगेभिः' (अथ० २।१२।४)।
(६) 'ऋक्साम यजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम्।
हिङ्कार उच्छिष्टे स्वरः सामो मेऽडिश्च तन्मयि॥' (अथर्व० ११।७।५)।

को गीत और वाद्य के साथ जोड़ा जा सकता है, इसलिये षड्जादि स्वरों का विधान किया गया है।' हम वहीं इसका उत्तर दे चुके हैं कि यह मात्र बेसुरा प्रलाप है। इसके साथ ही उनको षड्जादि स्वरों का लक्षण भी बताना चाहिये था। आपको यह भी बताना चाहिये था कि इस तरह से मन्त्रों को षड्जादि स्वरों के माध्यम से गीत और वाद्य के जोड़ने में क्या प्रमाण है?"

यह प्रश्न भी इनका बुद्धिबाह्य है। यहाँ तो सब विधियाँ और लक्षण बताये नहीं जा सकते हैं और न बताना उचित ही है। वादित्रों का आविष्कार तो गन्धर्वविद्या-निपुण ऋषि-मुनियों ने किया था और सर्वप्रथम साम ही गाया गया, तो उसे वादित्रादि-सङ्गत न करना तो मूर्खता ही है। षड्जादि का उच्चारण भी गुरुमुख से सुनकर निरन्तर अभ्यास से साध्य है। तथा संकेतमात्र इस विषय में लिखा जा रहा है—

ऋग्वेद में सामवेद का उल्लेख २१ वार, यजुर्वेद में अनेक वार तथा अथर्ववेद में अनेक वार हुआ है। यथा—ऋ० २।४३।१, २।४३।२, १०।१०७।६, ८।९८, १; अथर्ववेद २।१२।४ तथा ११।७।५।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यादिस्थलेषु वेदेषु साम्नो गानं विनिर्दिष्टम्, सर्वविद्यामये वेदे बीजसङ्केत एव।

सामगानपद्धतिश्च—

चतुर्धा गानमन्त्राणामृषिभिः पद्धतयः कृताः—

(क) ग्रामगेयगानं (प्रकृतिगानम्) वेदगानमपि कथ्यते। (ख) आरण्यकगानम्। (ग) ऊहगानम्। (घ) ऊह्यगानम् (रहस्यगानम्) इति।

तत्र पूर्वार्चिकपञ्चमप्रपाठकं यावद् गानरूपा प्रथमा पद्धतिरित्यादिप्रकारेण—

'अष्टौ ग्रामसहस्राणि छन्दोगार्चिकसंहिता।
गानानि तस्य वक्ष्यामि सहस्राणि चतुर्दश॥

अष्टौ शतानि ज्ञेयानि दशोत्तरदशैव च।
ब्राह्मणं चोपनिषदं सहस्रं त्रितयं तथा॥'

सामयोनिमन्त्राणां गानरूपपरिणयनेऽनेकसङ्गीतानुकूलशाब्दिकपरिवर्तनानि जायन्ते, यानि 'सामविकाराः' अभिधीयन्ते। ते च षड् विकार-विश्लेषण-विकर्षण-अभ्यास-विराम-स्तोभभेदात्।

सामगानस्य पञ्चभागा अपि—प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनभेदात्। उदाहरणार्थम्—

इत्यादि स्थलों पर सामगान का विनिर्देश किया है, यह सर्वविद्यामय वेद में संकेत ही है।

सामगानपद्धतिः

ऋषियों ने सामवेद गाने की चार पद्धतियाँ बताई हैं—

(क) ग्रामगेय गान, या प्रकृतिगान, या इसे गेयगान भी कहते हैं। (ख) आरण्यक गान। (ग) ऊहगान। (घ) ऊह्यगान या रहस्यगान।

सामवेद में पूर्वार्चिक पञ्चम प्रपाठक पर्यन्त प्रथम पद्धति है। इत्यादि प्रकार से सामगानों का वर्णन है। यथा—'अष्टौ ग्रामसहस्राणि' इत्यादि।

सामवेद के मन्त्रों के गानरूप में परिणयन करने में अनेक सङ्गीत के अनुकूल शाब्दिक परिवर्तन हो जाते हैं, जिन्हें 'सामविकार' कहते हैं। इससे छः भेद हो जाते हैं—विकार, विश्लेषण, विकर्षण, अभ्यास, विराम और स्तोभ।

सामगान के कहीं-कहीं ५ भाग भी कहे गये हैं। जैसे—प्रस्ताव, उद्गीथ, प्रतिहार, उपद्रव और निधन। उदाहरणार्थ—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'अग्न आयाहि वीतये गृणानो हव्यदातये।
नि होता सत्सि बर्हिषि॥'

(१) हुं ओग्नाइ (प्रस्तावः) ।
(२) ओम् आयाहि वीतये गृणानो हव्यदातये (उद्गीथः) ।
(३) नि होता सत्सि बर्हिषि ओम् (प्रतिहारः) ।
(४) नि होता सत्सि ब (उपद्रवः) ।
(५) र्हिषि ओम् (निधनः) ।

छान्दोग्योपनिषदनुसारं हिङ्कारादिवर्धनेन सप्तधा गानं भवति।

एवमाधुनिकतानतरानादिकं स्तोभनाम्ना प्रसिद्धमासीत् पुराकाले। तथा बहुविधं सङ्गीतज्ञपण्डितेभ्यः शिक्षितुमर्हति कोऽपि।

यथा महर्षिदयानन्दचरणसेवकः श्रीपं० द्वारिकाप्रसादपाठको गुरुरित्यभिधान-

---

'अग्न आयाहि वीतये गृणानो हव्यदातये।
नि होता सत्सि बर्हिषि॥'

इस मन्त्र में—

(१) हुं ओग्नाई (प्रस्ताव)।
(२) ओम् आयाहि वीतये गृणानो हव्यदातये (उद्गीथः)।
(३) नि होता सत्सि बर्हिषि ओम् (प्रतिहारः)।
(४) नि होता सत्सि ब (उपद्रवः)।
(५) र्हिषि ओम् (निधनः)।

छान्दोग्योपनिषद् के अनुसार हिङ्कार आदि के बढ़ाने से और भी सात प्रकार का गान होता है।

इस प्रकार आधुनिक तान, तराना आदि प्राचीनकाल में स्तोभ नाम से प्रसिद्ध थे। इस प्रकार सङ्गीतज्ञ पण्डितों से बहुत प्रकार का गान सीखा जा सकता है।

जैसे महर्षि दयानन्द के साक्षात् चरणों की सेवा करनेवाले, हमारी पत्नी श्रीमती निर्मला मिश्रा के नाना स्व० श्री पं० द्वारिकाप्रसाद गुरु प्राचीन गान विद्या के प्रवीण पण्डित थे, जार्ज पञ्चम के स्वागत-समय में एकमात्र इन्हीं आर्यसमाजी शास्त्रीय गायक ने गाना गाया था। महर्षि दयानन्द

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रसिद्धिः। अयं मम धर्मपत्न्या मातामहः। स सङ्गीतशास्त्रेऽतितरां प्रावीण्यमलभत। 'जार्ज पञ्चम' स्वागते समायोजितेऽयमेक आर्यसामाजिक उपस्थितः शास्त्रीयगानं व्यधात्। महर्षिश्चात्र बदायूँनगरे १८६९ ईसवीये ३१ जुलाईमासे आगत्य उषित्वा च १४ अगस्ते प्रास्थत, तदैवाऽस्य चरणसेवावसर उपालभ्यतेति मां पाठकमहाभागः स्वयमश्रावयत् १९५८ ईसवीये।

ननु स्वामिदयानन्देन स्वरव्यवस्थाप्रारम्भे लिखितं 'वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते' किमेतेन वेदार्थज्ञाने स्वरज्ञानमपरिहार्यम्? अनेके विद्वांसस्तु स्वरज्ञानं नावश्यकं मन्वते वेदार्थज्ञाने, इति चेत् सत्यमिदम्—'यदाचार्याणामिङ्गितेन चेष्टितेन निमिषितेन महानभिप्रायो लक्ष्यते' इति महर्षिपतञ्जलेरुक्त्या स्वामिनाऽत्र 'वेदार्थोपयोगितया' इत्यनेनाभिव्यज्यतेऽनिवार्यता स्वराणाम्। स्वामिदयानन्देन यजु० (४। १०) मन्त्रेऽपि लिखितम्—

'उव्वटमहीधराभ्यामिदं सम्बोधनान्तं पदमबुद्ध्वा व्याख्यातमत एतयोः स्वरज्ञानमपि नास्ति, अर्थज्ञानस्य तु का कथा?'

सरस्वती बदायूँ में १८६९ ईसवी ३१ जुलाई की रात को तीन बजे पधारे और यहाँ १४ अगस्त तक रहकर चले गये। इन्हीं दिनों महर्षि की चरणसेवा करने का पूज्य नाना जी को अवसर मिला था। अपने घर से महर्षि को भोजन भी ले जाते थे, उनका कहना था कि महर्षि को कढ़ी बहुत पसन्द थी।

शङ्का—स्वामी दयानन्द ने स्वरव्यवस्था के प्रारम्भ में लिखा है कि 'वेदार्थ उपयोगी होने से स्वरव्यवस्था लिखी जा रही है।' क्या इस कथन से यह समझना चाहिये कि वेदार्थ-ज्ञान के लिये स्वर का ज्ञान करना अपरिहार्य है? अनेक विद्वान् तो स्वरज्ञान को आवश्यक नहीं मानते हैं?

समाधान—यह ठीक है कि 'आचार्यों के इङ्गित से, चेष्टित से, या पलक मारने से भी बड़ा अभिप्राय लक्षित होता है' ऐसा महर्षि पतञ्जलि की उक्ति से सिद्ध है कि महर्षि दयानन्द द्वारा 'वेदार्थ में उपयोगी होने से' इस कथन से वेदार्थज्ञान में स्वरज्ञान की अनिवार्य उपयोगिता है। स्वामी दयानन्द ने यजु० ४। १० के भाष्य में लिखा है—

'उव्वट और महीधर के द्वारा 'आङ्गिरसि' इस पद की व्यत्यय से नहीं, किन्तु भ्रान्ति से प्रथमान्त मानकर व्याख्या की गई है, जबकि यह स्वर-दृष्टि से सम्बोधनान्त सिद्ध है। इनको स्वरज्ञान भी नहीं था तो अर्थज्ञान की तो बात ही दूर है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इत्यनेन ध्वन्यतेऽर्थज्ञानस्याप्रमेयमहत्तायां स्वरज्ञानस्य सहायकत्वम्। वेदमन्त्राणामुपरिकृतलम्बादिरेखास्तु न स्वराः, परं ताः स्वरचिह्नानि, उच्चैर्नीचैस्त्वादिध्वनिसूचकानि। अर्थाद् यदा प्रथमं ऋषिमुखोच्चारिता जाता मन्त्रा येन ध्वनिना, तद्ध्वनिसूचनार्थमादावेव स्वरचिह्नानि निरधार्यन्त, लिपिलेखनकाले च वर्णेषु चिह्नान्यपि कृतानि, तेषां निर्मलनिर्भ्रान्तज्ञानवतामृषीणां बुद्धिषु यथायथस्वरज्ञानस्थितिसत्त्वात्।

स्वरज्ञानस्य वेदार्थज्ञानोपयोगितायाः समर्थनं स्वरानुक्रमण्यां वेङ्कटमाधवोऽपि कुरुते, यथा—

'अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्।
एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥ १।८॥'

तथा चायम् ऋग्वेदानुक्रमण्यामाह—'नामाख्यातविभागश्च स्वरादेवावगम्यते।'

स्वरनिर्देशनस्य च प्रयोजनानीमानि—

(१) स्वरो हि वर्णोच्चारणध्वनिं सूचयति।

इससे अर्थज्ञान की अप्रमेय महत्ता में स्वरज्ञान का होना सहायक व आवश्यक ध्वनित हो रहा है। वेदमन्त्रों के ऊपर लम्बरूप में या पड़ी रेखा व १-२-३, क आदि संकेत उदात्त अनुदात्त आदि के द्योतक हैं, स्वयं स्वर नहीं हैं, उनके चिह्न हैं। वे चिह्न ऊँचे स्वर या नीचे आदि स्वरों (ध्वनियों) के बोधक हैं, अर्थात् जब सृष्टि के आदि में ऋषियों के मुखों से मन्त्र प्रथम वार उच्चरित हुए थे (जिस-जिस ध्वनि से उच्चरित हुए थे, उसी-उसी ध्वनि के सूचनार्थ ये चिह्न हैं), तभी निर्धारित किये थे। लिपि-लेखन के समय वर्णों पर तद्द्योतक चिह्न भी लगा दिये गये; क्योंकि उन-उन ज्ञानी ऋषियों के निर्मल और निर्भ्रान्त हृदयों में स्वरों की यथायथ ज्ञानस्थिति थी।

स्वरज्ञान वेदार्थज्ञान में उपयोगी है, इस सिद्धान्त का समर्थन श्री वेङ्कटमाधव अपने 'स्वरानुक्रमणी' ग्रन्थ में करते हैं—

'जिस प्रकार अन्धकार में चलता हुआ व्यक्ति दीपक के प्रकाश में ठोकर नहीं खाता, उसी प्रकार वेद के अर्थ स्वरों के द्वारा प्रकाशित हो जाते हैं।'

इसी प्रकार अपनी 'ऋग्वेदानुक्रमणी' में यही माधव जी लिखते हैं कि 'नाम और आख्यात का विभाग भी स्वर से ही जाना जाता है।'

इन स्वरों के निर्देशन के निम्न प्रयोजन हैं—

(१) स्वर वर्णों के उच्चारित ध्वनि को सूचित करते हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(२) स च स्वरः शब्दरचनामपेक्षते ।
(३) शब्दरचना च प्रकृतिप्रत्ययादीनपेक्षते ।
(४) क्वचित् स्वरभेदादप्यर्थभेदस्तस्य ध्वन्याश्रयत्वादपि ।
(५) शब्दानेकार्थत्वे स्वरभेदस्य नानिवार्यता ।
(६) अर्थसन्देहे स्वरोऽवधारकः ।

विवरणम्—

(१) ध्वन्यनुसारमेव स्वरनिर्देशो भवति । साम्प्रतमुच्चारणे सूक्ष्मभेदाकलने प्रायेण विद्वांसोऽप्यक्षमाः । एतदेव दर्शयितुं महाभाष्यकारो महर्षिपतञ्जलिः प्राह—

'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥'

इह प्रयुक्तः शब्दं उच्चारणं द्योतयति न तु चिह्नकरणमात्रम् । यश्च शब्दोऽकारादिवर्णानां स्थानप्रयत्नपूर्वकोच्चारणनियमानामुदात्तादिस्वरनियमानां च विरुद्ध-

---

(२) वह स्वर शब्दरचना की अपेक्षा रखता है ।
(३) और शब्दरचना प्रकृति-प्रत्यय आदि की अपेक्षा रखती है ।
(४) कहीं पर स्वर भेद से भी अर्थभेद हो जाता है; क्योंकि वह स्वर भेद ध्वनि के आश्रित होता है ।
(५) शब्दों के अनेकार्थ में स्वरभेद का होना अनिवार्य नहीं है ।
(६) अर्थ के सन्देह में स्वर अवधारक होता है ।

विवरण—

(१) ध्वनि के अनुसार ही स्वरनिर्देश होता है, अर्थात् स्वरानुकूल उदात्तादि व षड्जादि का उच्चारण करना चाहिये । आजकल वेदमन्त्रों के उच्चारण में सूक्ष्मभेद का आकलन करने में प्रायः विद्वान् लोग भी अक्षम होते हैं । स्वर की इसी स्थिति को अभिव्यक्त करते हुए महाभाष्यकार कहते हैं कि—

'स्वर या वर्ण से हीन मिथ्याप्रयुक्त शब्द उस अभीष्ट अर्थ को नहीं कहता । वह मिथ्याप्रयुक्त शब्द वाणीरूप वज्रवत् बनकर यजमान का हनन करता है, जैसे इन्द्रशत्रुः ।'

इसकी व्याख्या पूर्व भी की जा चुकी है, अतः विशेष नहीं लिखा जा रहा है । उक्त उद्धरण में प्रयुक्त शब्द उच्चारण का ही द्योतन कर रहा है । केवल वर्ण पर रेखादि के चिह्न बनाने को प्रयोग नहीं कहा जा सकता । जो शब्द अकारादि वर्णों के निर्धारित स्थान और प्रयत्नपूर्वक

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मुच्चार्यते, स एव मिथ्याप्रयुक्तो भवति। यतो हि यमर्थं बोधयितुं प्रयोगः क्रियते, तमर्थं स शब्दोऽकथयित्वाऽर्थान्तरं कथयति। अत उच्चारितोऽसौ शब्दोऽभीष्टाशयनाशनाद् वज्रतुल्य-वाणीरूपो भूत्वा यजमानदुःखदः सिध्यति। यथा 'इन्द्रशत्रु' शब्दस्तत्पुरुषबहुव्रीह्योर्भिन्नार्थक एव जायते भिन्नस्वरनिर्देशनात्।

(२-४) शब्दरचनयाऽत्र तात्पर्यं प्रकृति-प्रत्यय-वचन-समासादि। यथा 'स कर्ता' तृजन्तस्तृन्नन्तोऽपि वा भिन्नस्वरः, कर्ता लुट्यपि भिन्नस्वरः। एवं स्वरः सन्देहं निवारयति। एवमुदात्तादिस्वरज्ञानं विना नार्थभ्रान्तिरपाकर्तुं शक्यते। न च तज्ज्ञानमन्तरा मन्त्राणां गानमुच्चारणं वा सम्भवति, षड्जादिस्वराणां गानविद्योपयोगित्वात्।

स्वरबोधं विना युष्मत्शब्दनिष्पन्ने 'मा' इति रूपे, निषेधार्थके 'मा' इत्यस्मिन् वा भेदमाकलयितुं न शक्नुयात् कश्चित्।

अस्मिन्नेव विषये वैयाकरणः 'अलवर' निवासी पं० सत्यानन्दो वेदवागीशोऽपि स्वरज्ञानसार्थकतां प्रतिपादयते। यथा—

उच्चारण के नियमों और उदात्तादि स्वरनियमों का विरुद्ध उच्चारण किया जाता है, वह शब्द मिथ्या प्रयुक्त कहलाता है। क्योंकि जिस अर्थ का बोधन कराने के लिये शब्द प्रयुक्त किया जाता है, उस अर्थ को न कहकर अर्थान्तर को कहता है। इसलिये मिथ्योच्चारित शब्द अभीष्ट आशय का नाश करने से वज्रतुल्य वाणीरूप होकर यजमान के लिए दुःख होता है। जैसे बहुव्रीहि तथा तत्पुरुष में 'इन्द्रशत्रु' शब्द में स्वरभेद हो जाता है।

(२-४) शब्दरचना से यहाँ तात्पर्य प्रकृति, प्रत्यय, समासादि से है। स्वरभेद होने से एक जैसे शब्दों के अर्थभेद ज्ञात होने से प्रकृति प्रत्ययादि भी अनुमित हो जाते हैं। जैसे 'स कर्ता' इसका अर्थ 'वह करनेवाला' है। यह 'कर्ता' शब्द तृजन्त और तृन्नन्त से भी बन जायेगा तथा लुट् लकार में भी 'कर्ता' शब्द बनता है, जिसका अर्थ होगा 'करेगा'। इन शब्दों पर किये स्वरभेद चिह्न से अर्थ का निर्णय सरलता से हो जायेगा। इस प्रकार स्वर से सन्देह का निवारण हो जायेगा। फलतः सिद्ध है कि उदात्तादि स्वरों के ज्ञान के विना अर्थ-भ्रान्ति दूर नहीं की जा सकती और न स्वरज्ञान के विना मन्त्रों का उच्चारण और गान ही सम्भव है; क्योंकि षड्जादि स्वर गानविद्या के मूलाधार हैं।

स्वरज्ञान के विना हम 'युष्मद्' शब्द से निर्मित अन्वादेश में 'मा' अथवा निषेधवाचक 'माङ्' के 'मा' में अन्तर भी नहीं जान सकते।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'वेदमन्त्रार्थकरणे उदात्तादिस्वराणां शास्त्रीयप्रकारावगमो निदिध्यातव्य एव ।'

ऋग्वेदस्य प्रसिद्धपुरुषसूक्तस्य पञ्चममन्त्रे—'तस्माद् विराडजायत.....पश्चाद् भूमिमथो पुरः' (१० । ९० । ५) चतुर्थपादान्तर्गतपुरःशब्दस्य सायणभाष्ये शरीराणीत्यर्थः । इह 'पुरः' शब्दोऽन्तोदात्तः, तस्य नायमर्थः सम्भवति, तत्कारणात् सम्पूर्णपादार्थ एव भ्रष्टः । आद्युदात्तस्य पुनः 'पुरः' (पुर् + अस्) शब्दस्य नगराणि, निवासस्थानानि शरीराणि वार्थः सम्भवति ।

अन्तोदात्तः 'पुरः' शब्दस्तु सप्तम्यन्तात् पञ्चम्यन्तात् प्रथमान्ताद् वा देशकालदिगर्थेषु 'पूर्व' शब्दात् तद्धिते 'असि' प्रत्ययेऽव्ययसंज्ञके विभक्तेर्लुकि सिध्यति । प्रत्ययस्वरेणाद्युदात्तत्वम्, शिष्टं सर्वमनुदात्तम् । एवं पुरःशब्दस्य आद्युदात्तत्वेऽर्थः शरीराणि, अपरस्य पूर्वदिशाद्यर्थाः भवन्ति । तन्न स्वरज्ञानमन्तरा व्यवस्थापयितुं शक्यते ।

(५) शब्दस्यानेकार्थत्वे न स्वरभेदप्रतिपादनं केनाऽपि व्यधायि । आम्, एवं नाम सम्भवति समानरूपशब्दानां स्वरभेदेऽर्थभेदोऽवश्यम्भाव्यः । अतो व्याप्तिर्न तत्र यत् 'यत्र

इसी विषय पर अलवरनिवासी वैयाकरण पं० सत्यानन्द वेदवागीश ने स्वरज्ञान की आवश्यकता व सार्थकता प्रतिपादित करते हुए लिखा है । यथा—

'वेदमन्त्रार्थ करने में उदात्तादि स्वरों के शास्त्रीय विधान की अवगति अवश्य होनी चाहिये ।'

उदाहरण देते हुए वे स्पष्ट करते हैं कि ऋग्वेद के प्रसिद्ध पुरुषसूक्त के पाँचवें मन्त्र में 'पश्चाद् भूमिमथो पुरः' (१० । ९० । ५) इस चतुर्थ पाद में पठित 'पुरः' शब्द का सायणाचार्य ने 'शरीर' अर्थ किया है । इस मन्त्र में 'पुरः' शब्द अन्तोदात्त है, जिसका शरीर अर्थ नहीं हो सकता । फलतः सम्पूर्ण पदार्थ ही भ्रष्ट हो गया । आद्युदात्त 'पुरः' शब्द का अर्थ नगर, निवासस्थान व शरीर हो सकता है । यह 'पुरः' शब्द 'पृ पालनपूरणयोः' धातु से क्विप् प्रत्यय करने पर सिद्ध होता है, जो वेद में सर्वत्र कर्म कारक में प्रयुक्त होता है । यह 'अस्' प्रत्ययान्त होने से विभक्तिस्वर से अनुदात्त होगा ।

अन्तोदात्त 'पुरः' शब्द सप्तमी, पञ्चमी या प्रथमान्त 'पूर्व' शब्द से देश, काल वा दिशा अर्थ में सिद्ध होता है, जिसका अर्थ पूर्व दिशा, पूर्व देश या पूर्व काल होता है । तद्धित के 'अस्' प्रत्यय में अव्ययसंज्ञक पुरः शब्द है । इस प्रकार स्वरभेद से ही निर्धारण होता है कि आद्युदात्त 'पुरः' शब्द का अर्थ नगर, शरीर होगा और अन्तोदात्त का पूर्व काल आदि ।

(५) शब्द के अनेकार्थ होने में स्वरभेद का प्रतिपादन किसी ने भी नहीं किया है । हाँ, ऐसा अवश्य सम्भव है कि स्वरभेद होने पर एक शब्द के अनेकार्थ होने पर अर्थभेद हो जाते हैं ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यत्रानेकार्थत्वं तत्र तत्र स्वरभेदत्वम्, परं यत्र यत्र स्वरभेदत्वं तत्र तत्रार्थभेदत्वं भवत्येव।

यथा वा 'कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम। को नो मह्या अदितये पुनर्दात्' (ऋ० १। २४। १) अत्र 'को' उदात्तः सुखस्वरूपोऽर्थः। 'कस्त्वा परि०' (ऋ० १। ५४। ५) इत्यत्र कश्चिदेवार्थः। 'कोऽसि कतमोऽसि कस्याऽसि०' (यजु:० ७। २९) अत्र प्रश्नार्थे 'कः'। तस्मिन्नेव स्वरे भिन्नार्थः। यथा चापि—'अदितिर्द्यौरदितिरन्तरिक्षम्०' अत्र 'अदिति' शब्दोऽभिन्नस्वरोऽपि अनेकार्थः। एवमनेकार्थत्वे निघण्टुरध्येतव्यः।

यजु:० (१०। २२) मन्त्रे 'अब्रह्मता' इत्यत्र मध्योदात्तस्वरोऽभीष्टः। एवं सति 'न ब्रह्म इत्यब्रह्म तस्य भावस्तता' इत्येवं विग्रहीतव्यम्, तदा तलि प्रत्यये 'लिति' इत्यनेन सूत्रेण तल् प्रत्ययपूर्वस्य 'अब्रह्म' इत्यस्य मकारस्योदात्तत्वमितीष्टसिद्धिः। महीधरेण तु 'ब्रह्म विज्ञानानन्दस्वभावमनश्वरं तस्य भावो ब्रह्मता न ब्रह्मता अब्रह्मता' इति विगृहीतम्। अस्मिन् विग्रहे 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' (अ० ६। २। २) इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे नञोऽकारस्योदात्तत्वे 'अब्रह्मता' शब्दे आद्युदात्तोऽनभीष्टः सिध्यति। एवमत्र स्वरोऽर्थकरणे सन्देहं निवर्तयति।

(६) सन्देहनिवृत्त्यर्थाऽपि स्वरव्यवस्था। स्वरविषयेऽधिकं जिज्ञासुभिः श्रीपं०

इसलिये जहाँ-जहाँ स्वरभेद है, वहाँ-वहाँ प्रायः अर्थभेद भी होता है, पर जहाँ-जहाँ अर्थभेद है, वहाँ-वहाँ स्वरभेद होने में व्याप्ति नहीं है।

जैसे 'कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम। को नो मह्या अदितये पुनर्दात्' यहाँ पर 'को' उदात्त है, जिसका अर्थ सुखस्वरूप है। तथा 'कस्त्वा परि०' इसमें 'कः' शब्द का 'कोई भी' यह अर्थ है। 'कोऽसि०' इसमें प्रश्नार्थ है। 'अदितिर्द्यौरदितिर०' इसमें 'अदिति' शब्द में स्वरभेद न होते हुए भी अनेकार्थ है। इस प्रकार निघण्टु में अनेकार्थक देखिये।

यजुर्वेद के दसवें अध्याय के बाईसवें मन्त्र में 'अब्रह्मता' शब्द मध्योदात्त पठित है। इस स्थिति में हम पहले 'ब्रह्म' के साथ नञ्समास करेंगे, तब 'तल्' प्रत्यय होने पर 'लिति' सूत्र से पूर्व का मकारगत अकार उदात्त हो जायेगा। पर महीधर ने पहले ब्रह्मता शब्द बनाकर बाद में नञ्समास किया है। इस स्थिति में 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' (अ० ६। २। २) सूत्र से पूर्वपदप्रकृतिस्वर अर्थात् नञ् के अकार को उदात्त होगा, जो अनभीष्ट है। इस प्रकार यहाँ सन्देह के निवारण में स्वर सहायक है, उसके आधार पर ही अर्थ होगा।

(६) सन्देहनिवारणार्थ स्वर होता है, इसमें पूर्व के ही 'कर्ता' और 'पुरः' उदाहरण हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

युधिष्ठिरमीमांसकानां 'वैदिक-स्वर-मीमांसा' ग्रन्थोऽधिगन्तव्यः।

"वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते' (ऋ० भा० भू०) इति महर्षिदयानन्दसरस्वती। स्वामिदयानन्दस्य सौवरस्य विश्लेषेण न स्वरज्ञानं वेदार्थोपयोगि सिध्यति। अर्थाद् वेदार्थानुपयोगितया विस्तरशः स्वराणामव्यवस्था लिख्यते।" (इति डा० सुधीरकुमारगुप्तः, संवत् २०४५ वेदोद्धारिणी, अङ्क २, पृ० ३८, पंक्तिः २७)।

इति विरोधिलेखमवलम्ब्य किञ्चिद् विविच्यते मया कतिपयप्रश्नान् सम्प्रति प्रासङ्गिकान् विचारणीयांश्चावबुध्य, येन महर्षिदयानन्ददृष्टिकोणोऽधिकस्पष्टतया भ्रान्तीरपनेतुं शक्नुयात्।

कतिपये विद्वांसो वेदमन्त्रेषु निर्दिष्टस्वरैरेव वेदार्थज्ञानं भवितुं शक्यते नान्यथेति वाक्यं प्रतिज्ञारूपे कल्पनया आस्थाप्य 'न कदाऽपि स्वरैरर्थावबोधो भविष्यति' इति प्रतिपक्षमवलम्ब्य लेखान् ग्रन्थान् वा रचयितुं प्रावर्तिषत। परन्तु नैतद् विज्ञायते यदुक्ता प्रतिज्ञा स्वयं कल्पितैतैरथवा कस्यचिदपि विदुषः समुद्धृता ?

एतन्निराकरणपरायणैर्वयमिदं ज्ञातुमभिलषामो यदेतत्प्रतिपक्षपोषणेन ते किं सिषाधयिषवः ? किं न स्वराणां वेदार्थे कथमपि कश्चिदुपयोगोऽस्ति अथवा क्वचिदुपयोगो-

---

अधिक जिज्ञासुओं को श्री पं० युधिष्ठिर मीमांसक जी की 'वैदिक-स्वर-मीमांसा' पढ़नी चाहिये।

"वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते' (ऋ० भा० भू०) इति महर्षिदयानन्दसरस्वती। स्वामिदयानन्दस्य सौवरस्य विश्लेषेण न स्वरज्ञानं वेदार्थोपयोगि सिध्यति।" (डा० सुधीरकुमार गुप्त, संवत् २०४५ वेदोद्धारिणी अङ्क पृ० ३८, पं० २७)। अर्थाद् वेदार्थानुपयोगितया संक्षेपतः स्वराणामव्यवस्था लिख्यते।

उक्त विरोधी लेख को देखकर कतिपय प्रश्नों को हम सम्प्रति प्रासङ्गिक व विचारणीय समझकर यहाँ प्रस्तुत कर रहे हैं, जिससे महर्षि दयानन्द का दृष्टिकोण अधिक स्पष्ट होकर भ्रान्तियों का अपनयन हो सके।

कतिपय विद्वान् 'निर्दिष्ट स्वरों के द्वारा ही वेदार्थज्ञान हो सकता है' इसको प्रतिज्ञावाक्य के रूप में स्थापित कर इसके निराकरण में ही ग्रन्थ और लेख लिख रहे हैं। परन्तु न जाने यह प्रतिज्ञा उन विद्वानों द्वारा स्वकल्पित है या किसी अन्य द्वारा स्थापित है ? यह वे बतायें।

इन निराकरणकर्ताओं से हम यह भी जानना चाहेंगे कि वे इससे क्या सिद्ध करना चाहते हैं ? क्या स्वर वेदार्थ में कदाऽपि कुछ भी उपयोगी नहीं अथवा यत्र-तत्र उपयोगी भी है अथवा

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऽप्यस्ति, उताहो अर्थावबोधे स्वरा न सहायका अपितु अनिवार्यतया अनावश्यका एवेति? एवमनेके प्रश्नाः समुद्भवन्ति।

अमीषां समक्षे 'ऋग्वेदादिभाष्यभूमिकायाः' शब्दावलीं प्रस्तुमो येनोदात्तषड्जादि-चतुर्दशस्वराणामुपयोगिताविषयिणी भ्रान्तिर्दूरेऽपनीयेत। यथा—

"अथ वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते।"

प्रश्नः—कतिपयविद्वांसः कथयन्ति—'उञ्छादीनां च' (अ० ६। १। १६०) इति आद्युदात्तस्थाने अन्तोदात्तं विधत्ते। सर्वत्र चान्तोदात्ताभीष्टत्वादेतत्स्वरविधानस्य वेदार्थे न कश्चिदुपयोगः। एवमेव 'स्तुयुद्रुवश्छन्दसि' इत्यनेनाऽपि क्विबन्तरूपाणां 'परिष्टुत् संयुत्, परिद्रुत्' इत्येतेषामन्तोदात्ततया अर्थावबोधने धातुक्विबन्तज्ञानमेवानिवार्यम्।

समा०—एभिर्विचारकैर्ऋषिशब्दावली गम्भीरतया विचारणीया। तत्र वेदेभ्य इति वेदार्थोऽथवा वेदानामर्थे उपयोगितया स्वरव्यवस्थोपयोगिनीति।

वेद के अर्थज्ञान के लिये स्वर सहायक मात्र न होकर अनिवार्यतया अनावश्यक या आवश्यक है? ऐसे अनेक प्रश्न उद्भूत होते हैं।

इनके समक्ष हम तो 'ऋग्वेदादिभाष्यभूमिका' की शब्दावली तथा उसके भावार्थ को ही प्रस्तुत करना चाहेंगे, जिससे उदात्त षड्जादि चौदह स्वरों की उपयोगिता-विषय की भ्रान्ति दूर हो। यथा—

"अथ वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते।" अर्थात् वेद के लिये तथा वेदार्थज्ञान के लिये स्वरों की उपयोगिता के कारण उनकी व्यवस्था लिखी जाती है।

प्रश्न—कुछ विद्वान् कहते हैं कि 'उञ्छादीनां च' (अ० ६। १। १६०) यह सूत्र उञ्छादि में आद्युदात्त के स्थान पर अन्तोदात्त करता है और यह सर्वत्र अन्तोदात्त ही अभीष्ट है। अतः इस स्वरविधान का वेदार्थज्ञान में कोई उपयोग नहीं है। इसी प्रकार 'स्तुयुद्रुवश्छन्दसि' से विहित क्विबन्त रूप 'परिष्टुत्, संयुत्, परिद्रुत्' के अन्तोदात्तत्व से अर्थावबोधन में कोई सहायता नहीं मिलती; क्योंकि स्वरचिह्न से युक्त या वियुक्त उभयविध प्रयोगों में इनके अर्थ को समझने के लिए इनके धातु आदि और क्विबन्तत्व का ज्ञान अनिवार्य है।

समाधान—इन विद्वानों को ऋषि की शब्दावली का गम्भीर दृष्टि से विचार करना चाहिये। स्वरव्यवस्था के विषय में ऋषि की शब्दावली है—"वेदार्थोपयोगितया' अर्थात् वेद के (उच्चारणादि के) लिये नैत्यिकी उपयोगिता अर्थात् स्वर का उपयोग अपरिहार्य है, तथा वेदार्थज्ञान के लिये स्वरव्यवस्था के सामयिकी अर्थात् सन्देहनिवारण, अर्थसंकेतादि में आवश्यक उपयोगी होने से।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रथमार्थे वेदानामुच्चारणायेति। अत एव महाभाष्यकार आह—'त्रैस्वर्येणाधीमहे, त्रिप्रकारकैरज्भिरधीमहे' इति वेदार्थज्ञानस्योपयोगितायां तूदाहृतं पूर्वमेव। त्रैस्वर्यस्य स्पष्टीकरणं तु 'आयामो दारुण्यमणुता खस्येत्युच्चैःकराणि शब्दस्य' इत्यादिना।

प्रकृतविषये 'उपयोगिता' शब्दः सम्यगवबोधनीयो यन्नैतस्य शब्दस्यार्थोऽस्ति वेदार्थ-ज्ञानेऽपरिहार्यताऽनिवार्यता वा स्वराणाम्। यथा जीवनाय जलवायू अनिवार्यौ, परं त्रिफला-द्योषधयः, आम्रादिफलानि, वास्तुककारवेल्लकादिशाकानि विशिष्टरोगाद्युपद्रवप्रशमनाय स्वास्थ्यं च सम्यग् विधातुमावश्यकतायामुपयोगीनि भवन्ति, तथैव क्वचिदर्थसन्देहे प्रकृति-प्रत्ययादिबोधनद्योतने स्वराणामुपयोगिता तथा यत्र कुत्राऽप्यनिवार्यताऽपि प्रसिध्येति, न तु सार्वत्रिकी। परं वेदाध्ययननोच्चारणे स्वराणां सार्वत्रिकी अनिवार्यता वर्तते।

ध्यातव्यं चैतद् यन्नार्थावबोधनानुरोधेन स्वरविधानं प्रायशः क्रियते, प्रत्युत स्वरानु-रोधेनार्थावबोधनमार्गः प्रशस्तो जायते। फलतः स्वरेणार्थावबोधनं न जायत इत्यसकृद् रटनं कश्चिदारोपितपक्षग्रहनिर्बन्ध एव। किञ्च, व्याकरणस्य तु 'रक्षोहागमलघ्वसन्देहाः' इति प्रयोजनानि ख्यातानि तस्माद् वेदस्य स्वरादिस्थितिरक्षकं हि व्याकरणम्। श्री भारथीमहाभागः

प्रथमार्थ 'वेद के (उच्चारणादि के) लिये' इसका स्पष्टीकरण महाभाष्यकार पतञ्जलि के इन शब्दों से समझना चाहिये कि—'त्रैस्वर्येणाधीमहे, त्रिप्रकारकैरज्भिरधीमहे' अर्थात् हम वेदों को उदात्तानुदात्तस्वरित त्रैस्वर्य से पढ़ते हैं या पढ़ें।

रही वेदार्थ के ज्ञान के लिये उपयोगिता, इसमें पूर्व भी अनेक उदाहरण दिये हैं, अन्यत्र भी बहुत हैं। त्रैस्वर्य का स्पष्टीकरण 'आयामो दारुण्यमणुता खस्येत्युच्चैःकराणि शब्दस्य' इत्यादि है।

प्रकृत विषय में 'उपयोगिता' शब्द को ठीक-ठीक समझना चाहिये। इसका अर्थ वेदार्थज्ञान के लिए स्वरों (चिह्नों) की अपरिहार्यता या अनिवार्यता नहीं है। जैसे जीवन के लिये जलवायु अनिवार्य है, पर त्रिफलादि ओषधियाँ, आम्रादि फल, वास्तुककार वेल्लक आदि शाक रोगादि होने पर आवश्यकता होने से उपयोगी होते हैं, उसी प्रकार अर्थसन्देह, प्रकृति-प्रत्ययादि के बोधन या द्योतन में स्वर उपयोगी हैं, तथा कहीं-कहीं अनिवार्यता सिद्ध हो सकती है; किन्तु सर्वत्र अनिवार्यता नहीं। वेदाध्ययनोच्चारण में स्वरों की सर्वत्र अनिवार्यता रहेगी।

सर्वत्र यह ध्यान रखना चाहिये कि अर्थावबोधन के अनुरोध से प्रायः स्वरविधान नहीं किया जाता है, प्रत्युत स्वरानुरोध से अर्थावबोधन का मार्ग मिल भी सकता है। फलतः स्वर से अर्थावबोधन नहीं होने की रट लगाना पाक्षिकग्रहिलता है। दूसरे, व्याकरण तो 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' वेदों की स्वरादि-स्थिति का रक्षक है। स्वयं श्री भारथी जी ने

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सम्यगसमर्थयद् यद् 'बहुधा स्वरैरर्थावबोधो जायते' इति।

प्रश्नः—एकशब्दो निरुक्तकारेणानेकधातुभिर्निर्मीयते, तदानेकार्थसङ्गमनायानेकानेक-प्रत्ययानामूहनं भविष्यति तदा वेदमन्त्रेषु निर्दिष्टस्वरोपलब्धिः कथङ्कारं सम्भाव्या स्यात्?

समा०—सत्यमस्ति, अनेकधातुप्रत्ययोहनं तु 'अर्थगत्यर्थः शब्दप्रयोगः, अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते' (महाभाष्ये १।१।४४, आ० ७) तथा 'सिद्धे शब्दार्थ-सम्बन्धे' 'न स्वरसंस्कारमाद्रियेत' इत्याद्युक्तीरभिलक्ष्यैव 'अर्थनित्यः परीक्षेत' इति साधनार्थमेव विद्यते। एतस्यायमाशयो यन् निर्दिष्टचिह्नं संस्कारश्च (शब्दनिष्पत्तिः) बाधकौ स्यातां तदोपेक्षणीयौ। परमर्थं प्रकरणानुकूलमवश्यं कुर्वीत।

सार्धमेतदपि ध्यायेद् यन् महावैयाकरणपाणिन्यादिपूर्ववैयाकरणा यान् धातुप्रत्ययान् प्राकल्पयन् तैस्तैरुपलभ्यमानस्वरान् साधयेत् सङ्गतिं च योजयेत्। एवमेव निर्दिष्टानिर्दिष्टार्थेषु अर्थेषु ऊहितधातुभिर्यथासम्भवमुपलभ्यमानस्वरसिध्यर्थं प्रत्ययाः कल्पनीयाः।

प्रश्नः—यदा धातुप्रत्ययानां कल्पनैव कर्तव्याऽस्ति, तदा तस्यैव निर्दिष्टस्वरस्यैव सिध्यर्थं

'वेदोद्धारिणी' (संवत् २०४५) के अङ्क दो पृ० १९ पर 'बहुधा उनसे (स्वरों से) अर्थावबोध भी होता है' स्वीकार किया है।

प्रश्न—एक शब्द को विशेषरूपेण निरुक्तकार ने अनेक धातु का ऊहन करके बनाया तथा बनाना निर्दिष्ट किया है, तब अनेकार्थों के सङ्गमन के लिये अनेकानेक प्रत्ययों का भी ऊहन करना पड़ेगा, तब निर्दिष्ट स्वर की उपलब्धि सर्वथा असम्भव हो जायेगी।

समाधान—अनेक धातु तथा अनेक प्रत्ययों का ऊहन कर 'अर्थगत्यर्थः शब्दप्रयोगः, अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते' (महाभाष्य १।१।४४, आह्निक ७) तथा 'सिद्धे शब्दार्थ-सम्बन्धे' 'न स्वरसंस्कारमाद्रियेत' इत्यादि वचनों का एक ही उद्देश्य है कि 'अर्थनित्यः परीक्षेत' अर्थात् शब्द का प्रयोग तो अर्थज्ञान के लिये होता है। यदि स्वर (निर्दिष्ट चिह्न) या संस्कार (शब्द निर्माण) बाधक हों, तो उनकी उपेक्षा करदे, पर अर्थ प्रकरणानुकूल अवश्य करें।

साथ ही यह ध्यान भी रहे कि महावैयाकरण पाणिनि आदि से पूर्व के वैयाकरणों ने जो धातु-प्रत्यय की कल्पना करके उन-उन उपलभ्यमान स्वरों को ही सिद्ध करने के लिये सङ्गति बिठाई है, इसी प्रकार हमें ऊहित धातुओं (निर्दिष्ट या अनिर्दिष्ट अर्थों में) से उपलभ्यमान स्वरों की यथासम्भव सिद्धि करनेवाले प्रत्ययों की कल्पना करनी चाहिये।

प्रश्न—जब धातु-प्रत्ययों की कल्पना ही करना है तो उसी निर्दिष्ट स्वर की ही सिद्धि के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

कथं प्रयासः कार्यः ? नवीनार्थोहने पूर्वस्य स्थाने नवीनस्वरोऽपि जायेत तदा किं काऽपि हानिः स्यात् ?

समा०—अस्मिन् सर्वाधिका तु इयमेव हानिः स्याद् यत् प्रत्येकोऽधिकारी अनधिकारी वा अयोग्योऽशास्त्रज्ञः स्वकीयाः स्वकीया अनर्गला विशिरःपादाः कल्पनाः करिष्यति। कोटिवर्षभूरिश्रमर्षिभिः सुचिन्तितसञ्चितज्ञानस्य नोपयोगः स्यात् तथा शब्दशास्त्रशब्द-प्रयोगस्यानन्तत्वादपरिमेयत्वादगाधत्वात् सामान्यस्य तु का कथा, विशिष्टप्रज्ञस्याऽपि जनस्य न निर्वाहस्तदाश्रयेण विना।

किञ्चैतदप्यवगन्तव्यं यद् ये स्वरा लक्षकोटिवर्षेभ्य ऋषिभिर्विरचिताः सुरक्षिता वा सुस्थिरीकृताश्चाद्यावधि तेषामेव सुस्थिरतायां कल्याणम्। कदाचिन्नार्थोत्तमता सम्भाव्यते स्वरश्च प्रातिकूल्यं भजते चेत्, अर्थः साध्यः साधीयान् स्वरश्चाऽपि 'सुप्तिङ्०' आदिव्यत्ययेन साधनीयः। व्यत्ययस्यात्रैष एवोपयोगः। तदोद्दिष्टार्थायैव विभक्त्यादिव्यत्ययो विहितः।

प्रश्नः—'सप्त मर्यादाः कवयस्ततक्षुः' (ऋ० १०।५।६) अत्र 'मर्यादाः' एतन्मध्योदात्त-

---

लिये प्रयास क्यों किया जाये, तथा अर्थ निकालने में यदि नया स्वर भी पूर्व के स्थान पर लग जाये तो क्या कुछ हानि है ?

समाधान—इसमें सबसे बड़ी हानि तो यह होगी कि प्रत्येक अधिकारी और अनधिकारी (अयोग्य अशास्त्रज्ञ) अपनी-अपनी बे सिर-पैर की कल्पनायें करेगा, करोड़ों वर्ष का सुचिन्तित सञ्चित ज्ञान का कोई उपयोग न होगा तथा शब्दशास्त्र और शब्दप्रयोग के अनन्त और अथाह होने से किसी सामान्य ही की क्या विशेष प्रखर प्रज्ञ की बुद्धि भी पूर्व ऋषियों के ज्ञान का विना सहारा लिये सर्वथा असमर्थ ही रहेगी।

इसके साथ ही यह भी समझना चाहिये कि जो स्वर (व चिह्न) लक्षकोटि वर्षों से ऋषियों ने सुस्थिर किये, उन्हीं की रक्षा करने में स्थिरता है। यदि कदाचित् अर्थ उत्तम निकलता है और प्रत्यय स्वरानुकूल नहीं पड़ रहा है, एतदर्थ ही 'व्यत्ययमिच्छति शास्त्रकृदेषाम्' तथा 'यथार्थं विभक्तीः सन्नमयेत्' की भावना में यही निहित है कि व्यत्यय से अर्थ उपलब्ध कर लिया जाये, पर शब्द स्वरादि की पूर्वपठित स्थिति ही रक्खी जावे। अर्थ के लिये अन्य विभक्ति मान ले, जैसे ऋषि ने 'अघ्न्या' (यजु:० १।१) में सर्वानुदात्त को भी द्वितीया-बहुवचनान्त माना।

प्रश्न—'सप्त मर्यादाः कवयस्ततक्षुः' (ऋ० १०।५।६) यहाँ 'मर्यादाः' इस मध्योदात्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पदनिर्वचने (१) स्तेयम्, (२) तल्पारोहणम् (३) ब्रह्महत्या, (४) भ्रूणहत्या, (५) सुरापानम्, (६) दुष्कर्मपुनरावृत्तिः, (७) पापकर्तुरसत्यप्रलापः—एतेषु सप्तार्थेषु कृतेषु विज्ञा बोधयन्तु यत् क्वास्ति स्वरानुरोधः ?

समा०—महोदय ! स्वरानुरोधेऽर्थविनिश्चितिरन्या, परं स्वरोपयोगस्तु भ्रान्तिसंशयादि-स्थितावन्य एव। ऋषिणा तु स्वरोपयोगितैव विनिर्दिष्टा। अथ चेदिह नास्ति स्वरानुरोधस्तर्हि स्वरविरोधोऽपि कीदृशः ?

वयमाश्चर्ये स्मो यत् स्वरानुरोधोपक्रमापातः कुतः किमर्थकश्च। अतः 'ततनुष्टिम्, नना, वृत्रः' आदीनां यावन्तोऽर्था निर्वचनसम्भाव्या, उपलब्धव्याः, तदा व्यत्ययेन निर्दिष्टः स्वर एव कर्तव्यः। तदनुरूपा च प्रकृतिप्रत्ययलोपागमवर्णविकारादिकल्पना करणीया।

प्रश्नः—समाधानं समीचीनतरन्त्विदमेव स्याद् यद् वेदे स्वरा निश्चिता एव न मन्तव्याः, पुनर्यावन्तोऽप्यर्थाः कल्पयितव्या न तत्र कश्चिद् गत्यवरोधे कण्टकः कश्चित्।

पद के निर्वचन में (१) स्तेय, (२) तल्पारोहण, (३) ब्रह्महत्या, (४) भ्रूणहत्या, (५) सुरापान, (६) दुष्कर्मों की पुनरावृत्ति, (७) पापकर्ता का असत्यप्रलाप—ये सात अर्थ किये हैं। विज्ञ जन देखें कि यहाँ स्वरानुरोध कहाँ है ?

समाधान—महोदय ! स्वर के अनुरोध से अर्थ करना और बात है और स्वर का उपयोग भ्रान्त्यादि स्थिति में करना अन्य बात है। ऋषि ने स्वरोपयोगिता कही है। यहाँ पर यदि स्वरानुरोध नहीं है तो स्वरविरोध भी तो नहीं है।

हमें आश्चर्य है कि स्वरानुरोध की बात कहाँ का सार्वत्रिक सिद्धान्त है ? अतः 'ततनुष्टिम्, नना, वृत्रः' आदि के जितने अर्थ निर्वचन से सम्भव हैं, कर लीजिये, तब व्यत्यय से निर्दिष्ट स्वर ही कर लीजिये तथा निर्दिष्ट स्वर से जितने अर्थ निकल सकते हैं, वे निकाल लीजिये, फिर तदनुरूप प्रकृति, प्रत्यय, लोपागम, वर्णविकार आदि की इष्ट कल्पना कर लीजिये। देखिये 'वेदोऽसि' (यजुः० २। २१) में दर्भमुष्टिरूढ महीधर ने और ऋषि ने 'वेत्ति चराचरम्' में 'पचाद्यच्' तथा 'विदन्ति येन स ऋग्वेदादिर्वा' अर्थ में 'हलश्च' से घञ् प्रत्यय कर अन्तोदात्त 'वेद' से ही दो अर्थ निकाल लिये।

प्रश्न—सब से अच्छा यही रहेगा कि वेद में स्वर निश्चित ही नहीं माना जाये, फिर तो जितने अर्थ सम्भव हों, करते रहिये। निष्कण्टक मार्ग हो जायेगा।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

समा०—वेदे हि स्वरा उदात्तादय उच्चारणार्थाः सन्ति। अद्यावधि महता यत्नेन यद् वेदस्वरूपं स्वरक्ष्यत, अनिश्चिततास्थितौ मन्यमानायां न च तद् रक्षितुं शक्येत। अतो न स्वराणामुपादेयतोपयोगिताऽस्वीकर्तुमर्हा। निर्मलोक्तिरियं मनोहारिणी—

मन्ये स्वरैर्भाति न चार्थसङ्गतिः,
त्याज्याः स्वरा नैव बुधा तथापि च।
स्वरैरियं वाक् श्रुतिमूलजीविता,
अनित्यदोषादिविवर्जिताऽविता ॥ १ ॥

स्वर्गोपमां मोहकतां दधाना,
साहित्यसङ्गीतकलादिभूषिता।
विशेषतो वैदिकवाङ्मयेऽखिले,
बिभर्ति वाग् दिव्यचमत्कृतिं निजाम् ॥ २ ॥

स्वरा उदात्ताद्यभिधानधारकाः,
साहित्यशृङ्गारशिरोविचुम्बिनः।
अलौकिके रूप उपस्फुटन्ति ते,
प्रयोजनानीह प्रकाशयन्ति च ॥ ३ ॥

समाधान—वेद में स्वर उदात्तादि उच्चारणार्थ हैं। अनिश्चितता की स्थिति में अद्यावधि जो स्वरूप उच्चारण कर सुरक्षित रखा गया है, वही न रह सकेगा। अतः स्वरों की उपादेयता या उपयोगिता को नकारा नहीं जा सकता। यहाँ सुन्दर निर्मलोक्ति प्रस्तुत है—

मानते हैं कि स्वरों से कहीं पर अर्थसङ्गति शोभित नहीं हो रही है, तथापि विद्वान् को कदापि स्वर त्याज्य नहीं है; क्योंकि स्वरों के द्वारा ही श्रुतिमूल में जीवित वाणी अनित्य दोष आदि से विवर्जित होकर भी आज भी स्वरों के कारण सुरक्षित है ॥ १ ॥

स्वर्गोपम माधुर्य और मोहकता को धारण करती हुई, साहित्य, सङ्गीत (साम), कला आदि से विभूषित विशेषरूप से सम्पूर्ण वैदिकसाहित्य में यह स्वरालङ्कृत वेदवाणी अपना दिव्य चमत्कार रखती है ॥ २ ॥

उदात्त आदि नामवाले स्वर समस्त वाङ्मय के शृङ्गारशिखर को चूमते हैं, अलौकिक रूप में वे प्रस्फुटित होकर प्रयोजनों को प्रकाशित करते हैं ॥ ३ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अर्थप्रतीत्यै खलु धातुप्रत्ययौ,
समूह्यमानौ भवतो निरन्तरम्।
स्वरानुदेशोऽपि तदाश्रयो भवेत्,
स्वरोपयोगः किल चार्थसंशये ॥ ४ ॥

प्रश्नः—किं सौवरस्य भूमिकायां स्वामी दयानन्द एतमुद्दिष्टं निष्कर्षमामन्यत यत् पाणिन्यादिद्वाराप्रदत्तस्वरविषयकसूत्रादीनां वेदार्थावबोधने न हि किञ्चिद्विशिष्टमुल्लेखनीयं महत्त्वपूर्णं योगदानमस्ति।

समा०—सौवरभूमिकाधारप्रयास एवंविध ऋषिदयानन्दमस्तके मण्डितोनुचित एव, यतो नर्षेरभीष्टमुद्दिष्टं च यन्न वेदार्थसाधकाः स्वराः कर्हिचिदपि। सौवरभूमिकायामृषिर्लिखति—

"यावदुदात्तादिस्वरान् साधु सम्यग् न जानीते, तावल्लौकिकवैदिकानां वाक्यानां छन्दसां वा स्पष्टं प्रियमुच्चारणं गानं सम्यगर्थमपि ज्ञातुं न शक्यते।

यादृशः स्वकीय इष्टोऽर्थः स्यात् तादृशं स्वरवर्णयोर्नियमपूर्वकमेवोच्चारणं कर्तव्यम्।

शब्द में ऊह्यमान धातु और प्रत्यय सदा अर्थप्रतीति के लिये होते हैं। धातु और प्रत्ययों के आश्रित स्वरनिर्देश होता है तथा अर्थसंशय स्थल पर स्वर का उपयोग होता है ॥ ४ ॥

प्रश्न—क्या 'सौवर' की भूमिका में स्वामी दयानन्द का यह उद्दिष्ट है या उन्होंने यह निष्कर्ष निकाला है कि पाणिनि आदि द्वारा प्रदत्त स्वरविषयक मन्त्रों आदि का वेदार्थ के अवबोध में कोई विशेष उल्लेखनीय या महत्त्वपूर्ण योग नहीं है?

समाधान—भूमिका में इस प्रकार का प्रयास ऋषि दयानन्द के मत्थे मढ़ना अनुचित है; क्योंकि ऋषि का यहाँ पर यह उद्दिष्ट या अभीष्ट नहीं कि स्वर वेदार्थ में साधक नहीं। सौवरभूमिका में ऋषि लिखते हैं—

"जब तक उदात्तादि स्वरों को ठीक-ठीक नहीं जानते, तब तक लौकिक वैदिक वाक्यों वा छन्दों का स्पष्ट, प्रिय उच्चारण, गान और ठीक-ठीक अर्थ भी नहीं जान सकते।

जैसा अपना इष्ट अर्थ हो वैसे स्वर और वर्ण का नियमपूर्वक ही उच्चारण करना चाहिये।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यदा मनुष्य उदात्तादिस्वरान् सम्यगवबुध्यते, तदा स्वरचिह्नितलौकिक(वैदिक) शब्दानां नियतार्थान् शीघ्रं ज्ञातुं प्रवर्तते। यथा कश्चिदेकं शब्दमाद्युदात्तस्वरयुक्तमपश्यत् तदा ज्ञास्यति यदमुकार्थेऽमुको ञित् नित् वा प्रत्ययोऽभूत्। अत एतस्यायमेवाऽर्थो भवितव्यः, एतद्विरुद्धोऽर्थो भवितुं न शक्यते, ईदृङ् निश्चयः स्वरज्ञस्य पुरुषस्य सम्भवति। यथा 'स कर्ता, स कुर्ता'।

एवमेकप्रकारकशब्दानामर्थभेदः स्वरव्यवस्थाज्ञानेनैव जायते। यदि स्वरव्यवस्थाबोधो न स्यात् तदाऽर्थानां विपरिवर्तन-व्यभिचारेण महती दुर्व्यवस्थोत्पद्येत। एवमेव समासानां पृथक् पृथङ् नियतस्वरान् ज्ञात्वा तत्तत्समासानां नियतार्थान् शीघ्रं जानाति अर्थादुदात्तादिस्वरज्ञानेन विनाऽर्थभ्रान्तिर्नापहीयते, उदात्तादिस्वरबोधनं विना वेदमन्त्राणां गानमुच्चारणमपि यथार्थं नहि भवितुं शक्नोति।"

शिष्टमुक्तमुपरि नाहमवगन्तुं पारये यत् स्वराणां वेदार्थे पूर्णतयानुपयोगितासाधने कतमदद्भुतं नूतनं पाण्डित्यम्। स्वराणां यस्मिन् यस्मिन् रूपे उपयोगिता विद्यते साऽपि ऋषिणा यथाप्रसङ्गं बोधिता। ब्रूतां तावत् 'केवलार्थावबोधनमेव प्रयोजनं स्वराणाम्' इति मतं कस्य।

प्रश्नः—किं यज्ञे 'यज्ञकर्मण्यजपन्यूङ्खसामसु' (अ० १। २। ३४) इत्यनेन एकश्रुति-

---

जब मनुष्य को उदात्तादि स्वरों का ठीक-ठीक बोध हो जाता है, तब स्वर लगे हुए लौकिक (वैदिक) शब्दों के नियत अर्थों को शीघ्र जान लेता है। जैसे किसी एक शब्द को आद्युदात्त स्वरयुक्त देखा, तो जान लेगा कि अमुक अर्थ में अमुक 'ञित्' या 'नित्' प्रत्यय हुआ है, इसलिये इसका यही अर्थ होना चाहिये, जिसके विरुद्ध अर्थ नहीं हो सकता, ऐसा निश्चय स्वरज्ञ पुरुष को हो जाता है। जैसे 'स कर्ता, स कुर्ता'।

इसी प्रकार एक प्रकार के शब्दों का अर्थ-भेद स्वरव्यवस्था जानने से ही निकलता है। जो स्वरव्यवस्था का बोध न हो तो अर्थों का लौट-पौट व्यभिचार हो जाने से बड़ा अन्धेर फैल जावे। इसी प्रकार समासों के पृथक्-पृथक् नियत स्वरों को जानके उन-उन समासों के नियत अर्थों को शीघ्र जान लेता है, अर्थात् उदात्तादि स्वरज्ञान के विना अर्थ की भ्रान्ति नहीं छूटती और उदात्तादि स्वरबोध के विना वेदमन्त्रों का गान और उच्चारण भी यथार्थ नहीं हो सकता।"

शेष ऊपर कहा जा चुका है। मैं नहीं समझ पाता कि स्वरों का वेद के लिए पूर्णतया अनुपयोगी सिद्ध करने में कौन सा अनोखा नूतन पाण्डित्य है? स्वरों की जिस-जिस रूप में उपयोगिता है, वह भी ऋषि ने यथाप्रसङ्ग बता दी है। 'केवल अर्थावबोधन के लिये ही स्वर लगाया जाता है' यह पक्ष किसका है? यह बताना चाहिये।

प्रश्न—क्या यज्ञ में 'यज्ञकर्मण्यजपन्यूङ्खसामसु' (अ० १। २। ३४) इससे एकश्रुति-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

विधानस्य लक्ष्यमनेकार्थावबोधनमेवाऽस्ति, यतो न त्रैस्वर्येणाभीष्टानेकार्थावबोधनं भविष्यति स्वरयुक्तोच्चारणेनानेकार्थानां व्यावर्तितत्वात् ?

समा०—सुधीवर! स्वराणां केवलार्थपरिज्ञानार्थ एवोपयोगितागवेषणा विविध-स्वास्थ्यप्रयोजनरत्नभस्मनि रसनास्वादस्यैवान्वेषणनिर्बन्धस्तु बलप्रयोग एव। पृच्छामि यत् स्वरविहीनोच्चारणे कोऽयमवैयाकरणोऽनिरुक्तज्ञः पण्डितम्मन्यो यस्तदाऽनेकार्थस्फुरणं कुरुते युगपत्, इष्टस्वरे च लग्ने ते चार्था व्यावर्त्यन्ते तिरोधीयन्ते वा य एकश्रुतौ प्रतिभासिता भवन्ति।

श्रीमन्! शब्दस्य सम्बन्धस्तूच्चारणेन, अर्थपरिज्ञानस्थितेश्च बौद्धिकचिन्तनेनास्ति। अत एव मन्त्रस्य यथार्थदर्शनमृषीणां समाधावेवाऽभूत्।

मुनिप्रवरपाणिनिसूत्रेण (१। २। ३४) तु तात्कालिकयज्ञप्रचलितप्रथानुरूपमेक-श्रुतिविधानं कृतमस्ति। तस्मिन् काले लोके वैदिकस्वरोच्चारणे यज्ञेषु शैथिल्यं विशेषरूपेणा-ऽऽपद्यत, केवलं जपन्यूङ्खसामसु त्रैस्वर्योच्चारणे मान्यताऽवाशिष्यत। जैमिनिमीमांसानुसारं 'भाषास्वरोपदेशादैरवत् प्रावचनप्रतिषेधः स्यात्' 'तदुत्पत्तेर्वा प्रवचनलक्षणत्वात्' (१२। ३। २०,

---

विधान का लक्ष्य अनेक अर्थों का अवबोधन करना है, त्रैस्वर्य से अनेकार्थ का अवबोधन न हो सकेगा; क्योंकि स्वरयुक्त उच्चारण से अनेकार्थ व्यावर्तित हो जाते हैं।

समाधान—महाशय! स्वरों की केवल अर्थपरिज्ञानार्थ ही उपयोगिता ढूँढना विविध प्रयोजनवाली रत्न-भस्म से केवल रसना का स्वाद ढूँढने के समान बलप्रयोग है। स्वरविहीन बोलने पर कौन सा अवैयाकरण और निरुक्तज्ञानवञ्चित पण्डितम्मन्य है, जिसे अनेकार्थों का प्रस्फुरण युगपत् होता जाता है और इष्ट स्वर लग जाने पर जो अर्थ व्यावर्तित (निवृत्त) व तिरोहित हो जाते थे, वे भी अब एकश्रुति में प्रतिभासित होते जाते हैं।

श्रीमन्! शब्द का सम्बन्ध उच्चारण से है और अर्थपरिज्ञान की स्थिति का सम्बन्ध मानस या बौद्धिक चिन्तन से है। इसीलिये मन्त्रार्थदर्शन ऋषियों को समाधि में होता है।

मुनिवर पाणिनि के (१। २। ३४) सूत्र से तात्कालिक स्थिति के अनुरूप एकश्रुति का विधान किया है। वैदिक स्वरों के उच्चारण में ढिलाई उस समय लोक में विशेषरूप से यज्ञों में आ चुकी थी, केवल जप, न्यूङ्ख और सामों में उच्चारण (त्रैस्वर्य की) मान्यता शेष थी। वैसे तो वैदिक मन्त्रों को जैमिनि की मीमांसा 'भाषास्वरोपदेशादैरवत् प्रावचनप्रतिषेधः स्यात्' 'तदुत्पत्तेर्वा प्रवचनलक्षणत्वात्' (मी० १२। ३। २०, २४) के अनुसार यज्ञ और स्वाध्याय दोनों में त्रैस्वर्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

२४) तु यज्ञे स्वाध्याये च मन्त्रास्त्रैस्वर्येण पठनीयाः। परमेष प्रयासो महर्षेर्जैमिनेर्लोकस्य शिथिलायमानप्रवृत्तेः समक्षे न स्थातुं शशाक। कात्यायन एतां प्रवृत्तिं 'तान' इत्यभ्यदधात्, यदा तैत्तिरीयप्रातिशाख्य एकश्रुतिरेव गदिता।

प्रश्नः—किं पाणिनेरेकश्रुतिविधाननिषेधो जपे व्यर्थ एव, यतः 'तज्जपस्तदर्थभावनम्' 'जप मानसे च' इत्येताभ्यां स्पष्टोच्चारणाभावात् श्रुतेरभावे विधानस्याप्रयोजनत्वात्।

समा०—कथनमिदं भ्रान्तिसम्बलितम्, जल्पजपधात्वोर्व्यक्तवाचार्थत्वादपि। अत एव यजमानेन 'मयीदमिन्द्रऽइन्द्रियम्' (यजुः० २।१०) इत्यस्य त्रैस्वर्योच्चारणस्य विधानं कृतम्। अयं हि मन्त्रो यजमानस्य जपः। जपार्थः स्वाध्यायावृत्तिरपि व्यक्तोच्चारणे। योगदर्शने तु 'ओ३म्' जपावृत्तौ अर्थभावनग्रहणस्यौचित्यमेव।

प्रश्नः—किन्तदा भवन्मते निर्दिष्टोदात्तादिस्वरा अनेकार्थानां व्यावर्तनं निवर्तनं वा न कुर्वते?

समा०—कदापि नैव, यतः शब्दानां धातुप्रत्ययनिष्पत्तेरनन्तरमेव स्वरविधायकसूत्र-

---

के साथ ही पढ़ना चाहिये, पर महर्षि जैमिनि का यह प्रयत्न लोक की शिथिल होती हुई इस प्रवृत्ति के सामने न टिक सका। कात्यायन अपने समय की इस एकश्रुति की ओर झुकनेवाली लोकप्रवृत्ति को 'तान' कहते हैं। जबकि तैत्तिरीयप्रातिशाख्य ने एकश्रुति ही कहा है।

प्रश्न—क्या पाणिनि का एकश्रुतिविधान का निषेध जप में व्यर्थ ही है; क्योंकि 'तज्जपस्तदर्थभावनम्' तथा 'जप मानसे च' इससे उपांशु होने से उच्चारण में आ ही नहीं सकता, अतः श्रुतिविधान न होने से निषेध व्यर्थ है।

समाधान—यह कथन भ्रान्तिपूर्ण है; क्योंकि 'जल्प' 'जप' धातुएँ 'व्यक्तायां वाचि' अर्थ में भी हैं, अत एव यजमान के द्वारा त्रैस्वर्य से युक्त 'मयीदमिन्द्रऽइन्द्रियम्' (यजुः० २।१०) इस मन्त्र के उच्चारण का विधान किया गया है। यह यजमान का जप-मन्त्र है। जप का अर्थ स्वाध्यायाऽऽवृत्ति में व्यक्त उच्चारण करना भी है। योगदर्शन में तो 'ओम्' की जपावृत्ति में अर्थभावन अर्थ ग्राह्य होना उचित है।

प्रश्न—तो क्या आपकी सम्मति में लगाये उदात्तादि स्वर बहुत से अर्थों का व्यावर्तन या निवर्तन नहीं करेंगे?

समाधान—कदापि नहीं; क्योंकि शब्द के धातु और प्रत्यय से निष्पन्न हो जाने के बाद

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रवृत्तिरुपतिष्ठति। कः खलु व्याकरणादिशास्त्रप्रतिबन्धो यन्नोदात्तादिस्वरविधानात् प्राक् तच्छब्दस्य विविधार्था नोपस्थास्यन्ति ? प्रतिबन्धाऽभावे उपस्थास्यन्त्येव। मन्ये, उदात्तादिस्वर-विधानेन शब्दो धातुप्रत्ययसमासाद्याश्रितः स्वरोऽमुकप्रत्ययादिसङ्केतकोऽवश्यमर्हः। एतदेवाभिप्रेत्य श्रीवेङ्कटः प्राह—

'अन्धकारे दीपिकाभिर्गच्छन् न स्खलति क्वचित्।
एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥'

अर्थाद् अन्धकारे पदार्थदर्शनाभावे दीपिकाभिः प्रकाशसाधनैरुच्चावचस्थलेषु शब्दे सम्भाव्यमानानेकधातुप्रत्ययादिविचारेषु दृष्ट्वा चलन् न स्खलति अर्थाद् यथार्थमूहत्येव तथैव दीपिकातुल्यस्वरप्रणीतशब्दानामर्थाः स्फुटा भवन्ति।

इदन्तु ध्यातव्यमेव यत् स्वरस्योदात्ताद्यर्थव्यतिरिक्तो न कश्चित् स्वीयोऽर्थः। अतः 'नः' (द्वितीयाचतुर्थीषष्ठीषु) इत्यस्यानुदात्तत्वेऽपि तत्तदर्था जायन्ते। तथैवासमानस्वरत्वेऽपि वेदे नार्थे तेषां भेदः।

ही स्वरविधायक सूत्र की उपस्थिति होगी। तब तक अर्थात् उदात्तादि स्वरविधान से पूर्व कौन सा ऐसा व्याकरणादि शास्त्र का प्रतिबन्धक विधान है, जिसके कारण नियत या अनेक विविध अर्थ उस शब्द के प्रतीत न हो सकेंगे, अर्थात् प्रतिबन्धक नियम के अभाव में वे-वे अर्थ शब्द के निष्पन्न होने पर होंगे ही। हाँ, उदात्तादि स्वरविधान से शब्द धातु, समास, प्रत्यय आदि के आश्रित होनेवाला स्वर अमुक शब्द, प्रत्ययादि का संकेतक अवश्य हो सकता है। इसी अभिप्राय से वेङ्कटमाधव भी कहते हैं—

'अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्।
एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥'

अर्थात् अन्धकार (पदार्थदर्शन के अभाव) में दीपिकाओं (टार्च) के द्वारा उच्चावच स्थलों (शब्द के धातु-प्रत्यय-विचारस्थलों) को देखकर चलता हुआ कहीं स्खलित नहीं होता, इसी प्रकार दीपिकाओं के समान स्वरों से प्रणीत शब्दों के अर्थ स्फुट हो जाते हैं।

एक बात यहाँ फिर समझ लेनी चाहिये कि स्वर का अपना कोई निज अर्थ नहीं होता, इसीलिये 'नः' (द्वितीया, चतुर्थी, षष्ठी में) के अनुदात्त होने पर विभिन्नार्थ होते हैं, तथा वेद में बहुत्र असमान स्वर होने पर भी उनके अर्थभेद नहीं होते।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

निष्कर्षोऽयम्—'ये तैः (ऋषिभिः) ईश्वरस्य ध्यानेनानुग्रहेण च महता प्रयत्नेन वेदमन्त्रार्थान् विज्ञाय यथावत् सर्वमनुष्येभ्यः पूर्णोपकारः कृतोऽस्ति' इति ऋग्वेदादिभाष्यभूमिकायाः प्रश्नोत्तरविषये लेखितम्, तत्रार्थज्ञानहेतुषु ईश्वरस्य ध्यानानुग्रहौ चाऽपि मतौ। अस्मिन् विषये ऋषिदयानन्दस्य स्पष्टं मतमिदमस्ति (सौवरभूमिकायाम्) —

"यद्यपि 'अर्यस्य स्वाम्याख्या चेत्' इत्यादिफिट्सूत्रैर्विशिष्टार्थे अर्यादिशब्दानामन्तोदात्तादिविधानं क्रियते, किन्तु तत्रार्थश्च भिन्नो भासितो भवति, तत्रैवं मन्तव्यं यद् वेदः सनातनस्तत्र न कस्यचिन्मतं प्रचलति।" (सौवरे, पृ० ६) इति।

प्रश्नः—यथा भवतान्याचार्यप्रणीतसूत्राणां न वेदोपरि नियन्त्रणं स्वीकृतं तथा न पाणिन्यादीनां निषिद्धम्, किं कारणमत्र?

समा०—तत्र प्रथमन्त्वेतदेव यन्निर्भ्रान्तैः पाणिन्यादिभिस्त्रिभिरपि वेदरक्षार्थं व्याकरणं रचितमासीत्। तथा च तत्तदर्थेषु प्रयुक्तानां शब्दानां लौकिकानामपि स्पष्टीकरणं कृतम्। तदर्थं च पाणिनिः स्वरोपयोगितां प्राकाशयत्। यथा—

निष्कर्ष यह है कि 'जो उन्होंने (ऋषियों ने) ईश्वर के ध्यान और अनुग्रह से बड़े-बड़े प्रयत्न के साथ वेदमन्त्रों के अर्थों को यथावत् जानकर सब मनुष्यों के लिये पूर्ण उपकार किया है' (ऋग्वेदादिभाष्यभूमिका, प्रश्नोत्तरविषय), इससे अर्थज्ञान में हेतु ऋषियों द्वारा ईश्वर का ध्यान व अनुग्रह बताया। इस विषय में ऋषि दयानन्द का स्पष्ट मत यह है ('सौवर' की भूमिका का उद्धरण देखिये)—

"यदि फिट्सूत्र (अर्यस्य स्वाम्याख्या चेत्) आदि विशिष्ट अर्थ में 'अर्य' आदि को अन्तोदात्तादि विधान करते हैं, पर अर्थ भिन्न भासित होता है तो 'वेद सनातन हैं, वहाँ किसी का मत नहीं चलता' सनातन वेद पर वह नियन्त्रण नहीं चलेगा।" (सौवर, पृ० ६)

प्रश्न—आपने ऊपर शान्तनवाचार्यादि के सूत्रों के लागू होने को वेद के लिये अनिवार्य नहीं ठहराया, फिर उसी प्रकार पाणिनि, कात्यायन और पतञ्जलि के प्रदिष्ट नियमों के उपयोग का निषेध आपने क्यों नहीं किया, इसका क्या कारण है?

समाधान—प्रथम कारण तो यह है कि ये निर्भ्रान्त थे, इन्होंने वेदरक्षार्थ व्याकरण की रचना की तथा लौकिक तत्तदर्थों में प्रयुक्त शब्दों का स्पष्टीकरण दिया। लौकिक शब्दों के अर्थों को स्पष्ट करने के लिये पाणिनि द्वारा स्वर की उपयोगिता भी सुन्दर रूप में प्रकट की गयी है। इसका एक उदाहरण देखिये—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

व्यासनद्या दक्षिणे वामे च तटे स्थितानां कूपानामपक्वानामनुदात्तस्वरेण (अ० ३ । १ । ३) , पक्वानां चोदात्तस्वरेणोच्चारणमक्रियत। इदं सकलं व्यवहारे प्रयुक्तभाषां संकेतयति।

फलतो शाब्दिकानामेतत् कर्तव्यं यत्तेऽन्वितेऽर्थे एव शब्दसिद्धिं कुर्वीरन्। यतः 'योऽनन्वितेऽर्थे सञ्चस्कार स तेन गर्ह्यः, सैषा पुरुषगर्हा, न शास्त्रगर्हा' (निरु० १ । १ । ४) ।

द्वितीयं च पाणिनिकाले व्यवहृतशब्दानां सिद्धिरेव पाणिनीयस्य कार्यमासीत्। यथा च— दाधिकमिति शब्दो दध्ना संसृष्टे, उपसिक्ते, संस्कृते, दधनि संस्कृते—इत्यर्थचतुष्टये वर्तते। पाणिनिरिव मुनियास्कोऽपि प्रयुक्त-प्रयोक्तव्य-सम्भाव्योह्यार्थेषु शब्दविविधनिर्वचनं प्रस्तौति। अत्र समानस्वरेऽपि भिन्नार्थोपलब्धौ न काचिद् व्यापत्तिर्जायते।

व्यास नदी के दक्षिणतट तथा बायें तट पर स्थित कुओं का भेद-प्रदर्शन स्वरों से स्पष्ट किया गया है। बायें तट पर स्थित खादर कुएँ कच्चे होते थे। कच्चे कुओं के नाम अनुदात्त स्वर से (अ० ३ । १ । ३ सूत्र से अण् प्रत्ययान्त होने के कारण) उच्चरित होते थे और दाहिने किनारे के बाँगर के पक्के कुएँ अ० ६ । १ । १९७ सूत्र से अञ् प्रत्ययान्त होने से उदात्त स्वर से उच्चरित होते थे। यह सामग्री बोलचाल की भाषा की ओर संकेत करती है। ('पाणिनिकालीन भारतवर्ष'— शिक्षा और साहित्य)

फलतः वैयाकरणों का यह कर्तव्य है कि वे अखिल अर्थ में शब्द का संस्कार (सिद्धि) करें। यथा—'योऽनन्वितेऽर्थे सञ्चस्कार स तेन गर्ह्यः, सैषा पुरुषगर्हा, न शास्त्रगर्हा' (निरु० १ । १ । ४)। अर्थात् जो अघटित अर्थ में शब्द की रचना करता है, उससे वह पुरुष गर्हणीय है, शास्त्र नहीं।

दूसरे पाणिनि के समय के विभिन्न अर्थों में व्यवहृत शब्दों की तत्तदर्थों में सिद्धि कर देना पाणिनि-व्याकरण का कार्य है। उदाहरण के लिये एक शब्द 'दाधिकम्' है, किन्तु इसका अर्थ अलग-अलग है। अत एव अर्थ और प्रत्ययों की दृष्टि से 'दध्ना संसृष्टम् (४ । २ । २२), दध्ना उपसिक्तम् (४ । ४ । २६), दध्ना संस्कृतम् (४ । ४ । ३), दधनि संस्कृतम् (४ । २ । १८)'— ये चार शब्द बने। पाणिनि के समान आचार्य यास्क भी प्रयुक्त, प्रयोक्तव्य तथा उनसे सम्भाव्य पर ऊह्य अर्थों में शब्द का निर्वचन (विविध) प्रस्तुत करते हैं। यहाँ समान स्वर होने पर भी भिन्नार्थ करने में कोई बाधा नहीं है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'स्वरव्यवस्था-विषयः'
॥ सम्पूर्णः ॥

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'स्वरव्यवस्था-विषय'
॥ सम्पूर्ण हुआ ॥

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथ व्याकरणनियमविषयः

यद्यप्यस्मिन् प्रकरणेऽभिधया नाक्षिप्तं तथाप्यज्ञानभ्रमावर्तनिपतितेनानेन भ्रामकमुद्रया-ऽऽक्षिप्तं सव्यङ्ग्यम् । तद्यथा—

"तत्र महाभाष्यीयसिद्धान्तस्य वैयाकरणेषु मान्यत्वेऽपि तदभिप्रायवर्णनं पारम्पर्येणैव युक्तम् । (न मनोमान्योऽभिप्रायो निःसार्यः) ।"

अत्र विषये एवं ब्रूमो यन्न क्वाऽपि स्वामिदयानन्देन स्वैरिताऽऽचरिता, किन्तु भवन्मानितपण्डितैरेव महाभाष्यविरोधोऽप्याचरितः । तद्दिङ्मात्रमिह निदर्श्यते, यथा—

'अचो यत्' (अ० ३ । १ । ९०) सूत्रे 'अज्ग्रहणं शक्यमकर्तुम्, योगविभागोऽप्येवम्' इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन पाणिनिपतञ्जलिमुन्योरपि त्रुटिसाधनाय दुःसाहसं कृतम् । यदा च भाष्ये लिखितमन्यथा—

"एतावन्तश्च धातवो यदुताजन्ता हलन्ताश्च। उच्यन्ते च तव्यदादयस्ते वचनाद्

यद्यपि इस व्याकरण-प्रकरण में अभिधा से तो सीधा कोई आक्षेप नहीं किया गया है, तथापि इनके कौटिल्य का लक्ष्य और व्यङ्ग्य स्वामी दयानन्द पर अवश्य है, यथा—

"पातञ्जल महाभाष्य में प्रतिपादित सिद्धान्त वैयाकरणों में सर्वमान्य अवश्य है, किन्तु उनका मनमाना अभिप्राय नहीं निकाला जा सकता, परम्पराप्राप्त पद्धति के अनुसार ही उसका अर्थ करना पड़ता है ।"

पारिजात के इस कथन पर हम यह कहना चाहते हैं कि स्वामी दयानन्द सरस्वती ने कहीं पर भी मनमानी नहीं वरती है और न अन्धपरम्परा का अनुसरण किया है । जो बात ऋषिसम्मत है, उसी को माना है, किन्तु आपके अभिमानी पण्डितम्मन्यों ने ही व्याकरण में महाभाष्य तक का विरोध कर अशास्त्रीय मनमाना आचरण किया है । उसमें से हम यहाँ दिङ्मात्र ही दिखा पा रहे हैं, यथा—

'अचो यत्' (अ० ३ । १ । ९०) सूत्र में भट्टोजिदीक्षित ने 'सिद्धान्तकौमुदी' में लिखा है कि—'यहाँ अज्ग्रहण नहीं करना चाहिये और ऐसे ही योगविभाग भी ।' यहाँ तो दीक्षित ने कमाल ही कर दिखाया, जोकि आचार्य पाणिनि तथा पतञ्जलि दोनों की ही त्रुटि निकालने का दुःसाहस किया, जो भाष्यविरुद्ध होने से उक्त आचार्यों का अपमान है; क्योंकि महाभाष्य में लिखा है—

"केवल अजन्त या हलन्त धातुएँ हैं और तव्यदादि प्रत्ययों का विधान किया है, अतः

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

भविष्यन्ति। इदं तर्हि प्रयोजनम्। अजन्तभूतपूर्वमात्रादपि यथा स्यात्। लव्यम्, पव्यम्। आर्धधातुकसामान्ये गुणे कृतेऽपि प्रत्ययसामान्येऽपि वान्तादेशे कृते हलन्तादिति ण्यत् प्राप्नोति तथा। दित्स्यम्। आर्धधातुकसामान्येऽकारलोपे कृते हलन्तादिति ण्यत् प्राप्नोति, अज्ग्रहणसामर्थ्याद् यदेव भवति। इति।"

भाष्ये एतावत्स्पष्टेऽपि व्याख्याने, न जाने कया मत्या 'अज्ग्रहणं कर्तुमशक्यम्' इति विलिख्य अज्ग्रहणस्य प्रत्याख्यानं कृत्वा पतञ्जलिं परिभावयाञ्चकार?

पारिजातकार इदमपि व्यङ्ग्येनाक्षिपति यत् 'धातोरपि मनोमानितेऽर्थे न प्रयोगो भवितुमर्हति' इति, तदुत्तरेऽनुपदमेवोत्तरितं यत् स्वामिदयानन्देन चक्षिङः 'दर्शनेऽपि' इति पाठं दृष्ट्वा दर्शनार्थे प्रयोगः कृतः। परं भवतामेव महीधरो यजुः० (१०। २०) मन्त्रे 'क्रिवि हिंसाकरणयोः' इति अयथार्थमसत्ताकं धातुमेवाकल्पयत्।

सिद्धान्तकौमुदीकारोऽनेकत्र धातूनाममानितेऽर्थे एव प्रयोगमकरोत्। तत्रैकं निदर्शनम्—दीक्षितमहाभागः सिद्धान्तकौमुद्या आदावेव यत् श्लोकमलेखीत्—'मुनित्रयं नमस्कृत्य

वे वचनसामर्थ्य से हो जायेंगे। तो फिर यह प्रयोजन है कि अज् ग्रहणसामर्थ्य से आर्धधातुक प्रत्यय करने से पूर्व अजन्त जैसे 'लू' 'पू' आदि धातुओं से 'लव्यम्, पव्यम्' आदि की सिद्धि के लिये यत् प्रत्यय हो जावे, ण्यत् न हो और ऐसे ही अजन्त धातुओं के अकार-लोप हो जाने पर 'दित्स्यम्, धित्स्यम्' इत्यादि में ण्यत् प्रत्यय होता है, उसका बाधक यत् हो जावे, इसलिये इस सूत्र में 'अज्' ग्रहण किया गया है।"

भाष्य में इतना स्पष्ट व्याख्यान होने पर भी न जाने किस समझ से 'अज्ग्रहणं कर्तुमशक्यम्' लिखकर अज् ग्रहण का प्रत्याख्यान कर पतञ्जलि को परिभावित किया है?

पारिजातकार यह भी व्यङ्ग्य से आक्षेप करते हैं कि—'धातु का मनमाना अर्थ करने में धाँधली नहीं चल सकती।' (पृ० १७३७, पं० हिन्दी १९)। ऐसा ही आक्षेप आप 'चक्षिङ्' धातु के अर्थ के विषय में कर चुके हैं कि 'स्वामी दयानन्द ने मनमाने ढंग से देखने के अर्थ में इस धातु का प्रयोग किया है', परन्तु हमने वहाँ यथार्थ समाधान दिया है कि धातुपाठ में 'दर्शनेऽपि' पाठ भी लिखा है तथा वेदप्रमाण भी है। परन्तु धाँधली तो आपके जडमूर्त्युपासक भट्टोजिदीक्षित आदि की है, जो मनमाने अर्थ में प्रयोग करते हैं और उस नये अर्थ करने में कोई प्रमाण भी नहीं दे पाते। जैसे महीधर ने (यजुः० १०। २०) मन्त्र में 'क्रिवि हिंसाकरणयोः' इस अयथार्थ नई धातु को गढ़ डाला।

भट्टोजिदीक्षित ने 'सिद्धान्तकौमुदी के आदि में ही लिखा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तदुक्तीः परिभाव्य च ।' अत्र 'परिभाव्य' इत्यस्यार्थं सर्वे टीकाकारा आदृत्येत्यलिखन् । वयं तु निदध्मो यदेष आशयो ग्रन्थकारविपर्यये ।

तत्रानन्यशरणो दाधिमथः 'परिभावस्तिरस्क्रिया' इत्यर्थवत्त्वात् कोशे 'धातूनामनेकार्थत्वात्' इत्येव समादधौ ।

न चैतद् वक्तव्यं यन्न कोशस्य प्रामाण्यम्, 'शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद् व्यवहारतश्च' इत्यभियुक्तोक्त्या कोशस्याप्रत्यायकत्वापरपर्यायशक्तिग्राहकत्वस्य सर्वैरङ्गीकृतत्वाच्च ।

एतस्यार्थोऽयं कथङ्कारं निष्कर्ष्यते येन भवान् एतस्यार्थमशनपानगमनरोदनादिषु घटयेत् । आशयो ह्ययं यत् शिष्टपुरुषैः कमपि शास्त्रीयमाधारमाकलय्य कस्मिन्नपि विशिष्टेऽर्थे धातुपाठेऽपठितस्याऽपि धातोर्विशालवाङ्मयप्रयुक्तत्वात् प्रयोगो विहितः ।

वस्तुतस्त्वत्र मूलग्रन्थप्रणेतृत्वादाचार्यान् प्रणनाम दीक्षितः । परं तदुक्तिविपर्यये बहुत्र व्याख्यानात् तदुक्तीः परभाव्य अर्थान्निरादृत्यैवेत्येवार्थो दीक्षितस्याभीष्टः । नेह विरोधसामग्री

'मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।' यहाँ पर 'परिभाव्य' का अर्थ सभी टीकाकारों ने 'आदर करके' किया है, जबकि हमारी समझ में ग्रन्थकार ने 'निरादर करके' अर्थ में ही 'परिभाव्य' का प्रयोग किया है; क्योंकि पाणिनि और भाष्यकार के विरोध में लिखने तक का उसे अपने पाण्डित्य का दम्भ पीड़ित कर रहा है ।

दाधिमथ अमरकोश का प्रमाण देते हुए 'परीभावस्तिरस्क्रिया' अर्थात् 'निरादर' अर्थ करने में प्रमाण देते हैं, परन्तु साथ ही 'परिभाव्य' का अर्थ 'विचिन्त्य' भी करते हैं । उसमें प्रमाण देते हैं कि 'धातुओं के अनेकार्थ होते हैं' ।

इसके अर्थ भला ये कैसे निकल सकते हैं कि आप इसका अर्थ खाने, पीने, जाने, रोने, हसने आदि सभी से घटालें । आशय यह है कि शिष्ट व्यक्तियों ने कोई शास्त्रीय आधार लेकर किसी अर्थ में जो धातु 'धातुपाठ' में भी पठित नहीं है, पर वाङ्मय की विशालता में उसका कहीं तदर्थ में प्रयोग हुआ है, तो उस अर्थ में सम्भव है ।

आप यहाँ यह नहीं कह सकते कि कोश का अर्थनिर्धारण में प्रमाण मान्य नहीं; क्योंकि 'शक्तिग्रह में व्याकरण, उपमान, कोश, आप्तवाक्यादि' सभी का ग्रहण किया गया है ।

वास्तव में यहाँ दीक्षित ने तीन मुनियों को प्रमाण इसलिये किया है कि वे मूलग्रन्थों के

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्रस्तोतुं शक्यते ग्रन्थविस्तरभिया।

वास्तवेनाऽयं न समग्रसूत्राणां प्रणेतारमेव मनुत आचार्यपाणिनिम्, येनागादीदयं चतुर्दशप्रत्याहारसूत्राणामन्ते—'इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि'। माहेश्वराणि इत्यस्य च दाधिमथादयो महेश्वरादागतानि इति व्याख्यानमकार्षुः।

पण्डितम्मन्यास्त्वेतादृशस्तु हृद्यचलं विश्वासं निदधति यन्नेमानि पाणिनिप्रणीतानि। परमेतत् समग्रं महाभाष्यं विरुणद्धि 'हयवरट्' सूत्रगतम्। यथा च—

"एषा ह्याचार्यस्य शैली लक्ष्यते यत् तुल्यजातीयांस्तुल्यजातीयेषूपदिशति, अचोऽक्षु हलो हल्सु।"

अत एतदनुसारमेषाम् 'अइउण्' आदिसूत्राणां प्रणेता आचार्यपाणिनिरेव। एतच्चाऽपि न तिरोहितं महाभाष्याध्येतॄणां यन् महर्षिपतञ्जलिराचार्यशब्देन पाणिनिमेव बोधयति बहुत्र। यथा—

प्रणेता हैं, पर उनकी उक्ति का दीक्षित के द्वारा आगे खण्डन किया जायेगा, अतः उनका यही अभिप्राय है कि उनके कथनों को पराजित करके कौमुदी की यह रचना की जा रही है।

वास्तव में ये पाणिनि आदि की सभी उक्तियों से सहमत भी नहीं हैं; यद्यपि इन्हीं के वंशज नागेश वैयाकरण ने भाष्यविपरीतता बरतने में इनकी मान्यताओं की धज्जियाँ उड़ा दी हैं। ये तो आचार्य पाणिनि को चतुर्दश प्रत्याहारसूत्रों का प्रणेता तक स्वीकार करने को तैयार नहीं है। जैसा कि इन्होंने लिखा है—

'नटराज शङ्कर ने १४ वार अपना डमरू बजाया और उससे १४ सूत्र प्रकट हो गये।'

इसी के आधार पर आप जैसे पण्डिताभिमानी आर्षपद्धति से अध्ययनरहित इसी में आस्था वा विश्वास रखते हैं कि ये सूत्र पाणिनि जी ने नहीं बनाये। परन्तु यह सारा विश्वास ही महाभाष्य ('हयवरट्' सूत्र पर) के विरुद्ध है। जैसे वहाँ लिखा है कि—

"यह आचार्य की वर्णन-शैली लक्षित होती है कि तुल्यजातीयों का उपदेश तुल्यजातीयों में करते हैं, अर्थात् अचों का अचों में तथा हलों का हलों में उपदेश करते हैं।"

अतः इस भाष्य के अनुसार 'अइउण्' आदि सूत्रों के भी प्रणेता आचार्य पाणिनि ही हैं। यह भी महाभाष्य के अध्येताओं से तिरोहित नहीं है कि महर्षि पतञ्जलि आचार्य शब्द से पाणिनि को ही बहुत स्थानों पर बोधित करते हैं। यथा—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

१—"आचार्यप्रवृत्तिर्ज्ञापयति नो दीर्घे ह्रस्वाश्रयो विधिर्भवतीति यदयं दीर्घाच्छे तुकं शास्ति।"

२—"आचार्यप्रवृत्तिर्ज्ञापयति भवत्यृकाराण्णत्वमिति। यदयं 'क्षुभ्नादिषु' (अ० ८।४।३८) नृनमनशब्दं पठति।"

यथा 'दीर्घात्' (अ० ६।१।७३) 'क्षुभ्नादिषु च' (अ० ८।४।३८) इति सूत्रे नान्येन प्रणीते, तथैव प्रत्याहारसूत्राणामपि प्रणेताऽऽचार्यपाणिनिरेवेति विवेकः।

अस्मिन् प्रकरणे इदन्तूक्तमनेन यत्—"न तु स्वेच्छया शिष्टप्रयोगानाम् (णाम्) अन्यथार्थव्यवस्थापनं कार्यं न वा स्वेच्छयाऽप्रसिद्धार्थे धातूनां प्रयोगो युक्तः। अन्यथा शाब्दनयेऽराजकतापत्तिः। यथा दयानन्दीये भाष्येऽविगणय्य पाणिनीयादिनियमात् स्वाच्छन्द्यं दृश्यते।" इति।

परमेतावद् बह्वनर्गलं प्रलप्यापि नैकमपि निदर्शनं प्रस्तुतमनेन यत् का मनोमानिता महर्षेः। यदा हि पाणिनिः 'बहुलं छन्दसि' इति सूत्रं विभिन्नप्रकरणेष्वेकादशवारमपठत्,

---

१—"आचार्य की प्रवृत्ति ज्ञापित करती है कि दीर्घ में ह्रस्वाश्रय विधि नहीं होती; क्योंकि यह दीर्घ से 'छ' परे होने पर 'तुक्' का विधान करता है।" तथा यहाँ भी देखिये—

२—"आचार्यप्रवृत्ति बताती है कि ऋकार से परे णत्व होता है, जो कि इन्होंने 'क्षुभ्नादिगण' में 'नृनमन' शब्द का पाठ पढ़ा है।"

इस प्रकार 'दीर्घात्' (अ० ६।१।७३) तथा 'क्षुभ्नादिषु च' (अ० ८।४।३८) ये सूत्र पाणिनि के अतिरिक्त किसी अन्य आचार्य ने नहीं बनाये, इसी प्रकार सिद्ध है कि प्रत्याहारसूत्रों के प्रणेता भी आचार्य पाणिनि ही हैं।

इस प्रकरण में श्री करपात्री जी ने कहा है कि—"शिष्ट जनों के प्रयोग को अन्यथा अर्थ में व्यवस्थापन किसी ने नहीं किया और न स्वेच्छा से अप्रसिद्ध अर्थ में धातुओं का प्रयोग ही किया है, नहीं तो शब्दशास्त्र में अराजकता ही उत्पन्न हो जाती, जैसा कि दयानन्द के भाष्य में पाणिनि प्रभृति आचार्यों के नियमों का विना विचार किये मनमाने तरीके से शब्दों का अर्थ किया जाता है।"

परन्तु यह बहुत सा आरोप लगाकर भी उस अनियमितता का कोई उदाहरण इन्होंने नहीं दिया, जिससे कि आचार्य दयानन्द की मनमानी सिद्ध होती। जबकि पाणिनि आचार्य ने 'बहुलं छन्दसि' इस सूत्र को विभिन्न प्रकरणों में ग्यारह बार पढ़ा है। महाभाष्य में (३।१।८५) सूत्र

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

महाभाष्ये (३। १। ८५) इति सूत्रे पतञ्जलिर्योगविभागेन 'बहुलम्' इति पठित्वा 'सुप्तिङुपग्रहलिङ्गादीनां व्यत्ययं पठति। यास्काचार्योऽपि—

'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥'

(निरु० २।१)

इति प्रत्यपादयत्। एतत्त्रयानुसारं दयानन्दभाष्यं सर्वथा शिष्टानुमतमेव, न क्वाऽपि स्वाच्छन्द्यं सिध्यति।

स्वाच्छन्द्यं तावदनेनाथवा महाप्रज्ञेनैतस्याराध्यदेवेन सायणाचार्येणैव वर्तितम्। अयं त्विहैव विषयस्य शीर्षकपरिवर्तन एव स्वाच्छन्द्यमाचरति। यथा तत्र शीर्षकमस्ति—'अथ व्याकरणनियमविषयः' इति, तत्र परिवर्त्यायोजयदयं पूर्वं 'वैदिक' इति।

श्रीसायणाचार्योऽपि 'वेदाश्च यज्ञार्थमभिप्रवृत्ताः' एतां धारणां निधाय हृदये प्रावर्तिष्ट वेदभाष्यकरणे। यदोपनेत्रमेव कृष्णं धारितं तदा निखिलं कृष्णमेव प्रत्येष्यते। अत एव तेन वेदानामर्थाः संकुचितकर्मकाण्डपरका एव स्वाच्छन्द्येन कृताः। निदर्शनरूपे—

'यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत् सत्यमङ्गिरः।'

(ऋ० १।१।६)

पर भी भाष्यकार पतञ्जलि ने योगविभाग में पृथक् 'बहुलम्' पढ़कर सुप् तिङ् आदि का व्यत्यय पढ़ा है। आचार्य यास्क ने भी 'वर्णागम, वर्णविपर्यय' आदि बताया है। इसके अनुरूप दयानन्द ऋषि का वेदभाष्य सर्वथा शिष्टानुमत है।

भाष्य करने में स्वच्छन्दता महर्षि दयानन्द ने तो नहीं की, किन्तु आपने और आपके महाप्रज्ञाचार्य सायण ने वर्ती है। आपके अनुवादक ने तो यहीं पर शीर्षक में 'वैदिक' शब्द और बढ़ा दिया।

श्री सायणाचार्य ने समस्त वेदों का प्रयोजन केवल यज्ञार्थ माना। वे इसी धारणा को हृदय में रखकर वेदभाष्य करने में प्रवृत्त हो गये। जब आपने चश्मा ही काला लगा लिया तो सारा काला ही दीखेगा। आपको ऋषि के भाष्य की उज्ज्वल धवलिमा कैसे दीख सकती है? इसीलिये आचार्य सायण ने वेदों के अर्थ संकुचित कर्मकाण्डपरक कर ही डाले, तो स्वाच्छन्द्य तो इन्होंने वर्ता है। उदाहरणस्वरूप—

'यदङ्ग दाशुषे०' का अर्थ सायण ने किया कि 'हे अग्नि! तुम यजमान की प्रसन्नता के लिये प्रजा पशु रूप कल्याण करोगे, यह तुम्हारा सत्यव्रत है।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

सायणस्य यथा—'अङ्ग अग्ने त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यद् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद् भद्रं तवैव सत्यं व्रतम्, नाऽत्र विसंवादोऽस्ति।'

परं महर्षिदयानन्दस्य भावनापूर्णार्थो मनोज्ञोऽस्ति कियानिति सहृदयाः पश्यन्तु—'हे प्रियतम देव ! शरणागतस्य कल्याणकरणं तव सत्यव्रतमस्ति।' इति।

अत्राऽपि सायणाचार्यः सप्रसभं सर्वाणि विशेषणानि भौतिकाग्नावेव सङ्गमयितुं प्रवर्तते। यथा—

'त्वमग्ने प्रमतिस्त्वं पिताऽसि नस्त्वं वयस्कृत्तव जामयो वयम्।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य॥'
(ऋ० १।३१।१०)

मुख्यवृत्त्या तूक्तविशेषणानि प्रकृष्टमतिः, पिता, सन्तानवान्, सुवीरः, व्रतपा असंख्यधनवान् इत्यादीनि कस्मिंश्चिच्चेतन एव घटन्ते, परं स्वाच्छन्द्येन सर्वत्र रूढिवादितामेवाश्रित्य भाष्यं विदधात्ययम्। अतो नैष आरोपो महर्षौ सम्भवति। महर्षिणा तु वेदपादेषु बद्धान् अनुचितविनियोग-रूढि-निगडांश्छित्त्वा स्वतपोनिशितबुद्धिकर्तर्या वेदोद्धारः कृतः।

पृ० १७३९, पं० ४—यच्चाह—"तस्मादाख्यातजत्वेऽपि तेषु तेष्वर्थेषु योगरूढत्वमेषां शब्दानां मन्तव्यम्।" इत्यप्यविचारितम्। यतो हि केचन शब्दा लोके यस्मिन्नर्थे रूढा न ते

परन्तु महर्षि दयानन्द ने कैसा भक्तिभावनापूर्ण कितना सुन्दर अर्थ किया, इस बात को सहृदय पाठक देखें—'हे अग्ने प्रियतम देव परमेश्वर ! आप शरणागत का कल्याण करते हैं, यह आपका अटल व्रत है।'

तथा—'त्वमग्ने प्रमतिः०' इस मन्त्र में आये प्रकृष्टमति, पिता, सन्तानवान्, सुवीर, व्रतपा, असंख्य धनवान् इत्यादि विशेषण मुख्यावृत्ति से ही किसी चेतन में घटित हो सकते हैं, परन्तु सायणाचार्य सर्वत्र स्वच्छन्दता से रूढिवादिता का आधार लेकर ही भाष्य करते हैं। यह आरोप ऋषि दयानन्द पर कदापि घटित नहीं हो सकता। महर्षि ने तो वेद के पादों में डाली हुई अनुचित विनियोग की बेड़ियाँ तर्क की छेनी से काटकर पृथक् कर दीं, जिससे वेदोद्धार सम्भव हो गया।

पृ० १७३९, पं० ४— यह कथन भी ठीक नहीं है कि—"इसलिये नाम को धातु से बना हुआ मानने पर भी सब स्थलों में यौगिक व्युत्पत्ति के साथ रूढ अर्थ को भी प्रधानता दी जाती है।" क्योंकि कुछ शब्द लोक में जिस अर्थ में रूढ हैं, वे शब्द वेद में भी वही अर्थ रक्खेंगे, यह

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदेऽपि तस्मिन्नेवार्थे ग्राह्या इति वाच्यम्, यथा ऋषिशब्दो न क्वाऽपि लोके तर्कार्थे रूढः, परं यास्काचार्येण तर्कोऽपि ऋषिर्मतः। अतः स्वामिदयानन्देन (ऋ० १। १। २) मन्त्रे 'ऋषिभिस्तर्कैः' इत्यर्थो विहितः। परं न सायणादिभिः क्वाऽपि तर्कार्थे प्रयुक्तः।

नहि रूढप्रसिद्धार्था लोके वेदे सर्वे आद्रियन्ते। यथा च आचार्यसायणः प्रस्तौति तथ्यम्—

'उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि।
सुतं सोमं न हस्तिभिरापद्भिर्धावतं नरा बिभ्रतावर्चनानसम्॥'
(ऋ० ५।६४।७)

इह सायणो 'हस्तिभिः' इत्यस्यार्थम् 'अश्वैः' इति व्यधात्। प्रकारं च दर्शयति—'इदानीं हस्तिभिर्हस्तवद्भिः हन्तेर्गतिकर्मणो हस्तशब्दः, गमनसाधन-पादवद्भिरित्यर्थः, पद्भिः पादचतुष्टयोपेतैरश्वैः।' सायणोऽत्र हस्तिनोऽश्वमरचयत्, न पुनरत्र मनोमानितादोषारोपः? एतत्सूक्तस्याश्विदेवतास्तुतौ विनियोगस्तस्मादेव। अहो विनियोगस्य महिमा!

अन्यच्चाऽपि (ऋ० ६।६५।५) इति मन्त्रे 'गोत्रा' पदस्य दयानन्देन ऋषिणा 'पृथिवी' अर्थः कृतः, न चाऽन्यः कश्चिद् ऊहशक्तिसम्पन्नः प्राभवत् पृथिव्यर्थं क्वाऽपि विधातुम्।

समझना बुद्धिमान्य न होगा। जैसे लोक में 'ऋषि' शब्द अन्यार्थ में ही रूढ है, तर्क अर्थ में नहीं; परन्तु यास्क आचार्य ने 'ऋषि' का 'तर्क' अर्थ भी माना है। अतः स्वामी दयानन्द ने ऋग्वेद १। १। २ मन्त्र में 'ऋषिभिस्तर्कैः' यह अर्थ किया है। पर सायण आदि को 'ऋषि' का 'तर्क' अर्थ कहीं भी नहीं सूझा।

लोक में रूढ शब्द के प्रसिद्ध अर्थ सभी वेद पर नहीं लादे जा सकते। सायणाचार्य ने तो आपके इस रूढप्रसिद्ध अर्थ को दुत्कारने में कमाल ही दिखा दिया। देखिये—

'उच्छन्त्याम्०' इत्यादि में 'हस्तिभिः' का अर्थ 'अश्वैः' कर डाला। और वहाँ इस अर्थ के ग्रहण करने की विधि भी बता डाली कि 'पैरों से अर्थात् चार पैरवाले घोड़ों के द्वारा'। यहाँ पर सायण ने हाथी का घोड़ा बना दिया। कहिये, यहाँ पर आपको कोई खींचातानी नहीं दीखी? कारण यह है कि इस सूक्त का अश्वि देवता की स्तुति में विनियोग है, इसलिये 'हाथी' का 'घोड़ा' बनाना पड़ा। कैसी विचित्र महिमा है विनियोग की! विनियोग की बेड़ियाँ वेद के पादों में लगभग दो सहस्र वर्षों के बाद सुदृढ़ता से कस दी गईं।

दूसरे (ऋ० ६।६५।५) मन्त्र में ऋषि दयानन्द ने 'गोत्रा' का अर्थ 'पृथिवी' किया है और कोई भाष्यकार ऊहशक्तिसम्पन्न ही नहीं हुआ। किसी ने 'गोत्रा' का अर्थ 'पृथिवी' नहीं किया।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दुर्गस्तु 'निगमोऽन्वेषणीयः' इति ब्रुवन् स्वीयपिण्डममोचयत्। एवं महर्षेर्व्याकरणप्रतिभा तु सर्वातिशायिनी आसीदित्येव निष्कर्षः।

१७३८ पृष्ठे द्वितीयपंक्त्यां 'प्रयोगानाम्' इति शुद्धिस्तु चिन्त्यैव।

यदयमाह यत्—"पाणिनिप्रभृत्याचार्याणां नियमानविचार्य मनोमानितप्रकारेण मन्त्रार्थाः कृता दयानन्देन" तत्र विशिष्टमावश्यकं निदर्श्यते किञ्चिद् वेदवेदाङ्गतत्त्वज्ञश्रीपं० ब्रह्मदत्त-जिज्ञासुदिशा—

निरुक्तकारः 'अघ्न्या' पदस्य बहुप्रकारां निरुक्तिं दर्शयति। अत्राथवान्यत्र 'सन्दिग्धे नावगृह्णन्ति' एतन्नियममादृत्य पदकारोऽत्रावग्रहं न कुरुते। व्याख्यातृभेदेन पदविभागे भेदो जायते।

ऋषिदयानन्देनाऽत्र 'प्रजावतीः, अनमीवाः, अयक्ष्माः' एतत्पदैः सह 'अघ्न्या' पदस्यार्थो द्वितीयाबहुवचने कृतोऽस्ति। असावत्र 'व्यत्ययमिच्छति शास्त्रकृदेषाम्' इत्यादिमहाभाष्यस्य (३।१।८५) आधारे छान्दसव्यत्ययेन स्वरसन्धिः कृतो वान्।

आचार्य दुर्ग ने तो 'निगमोऽन्वेषणीयः' कहकर अपना पिण्ड छुड़ा लिया। इस प्रकार यही निष्कर्ष निकलता है कि योगाभ्यास से तीक्ष्ण बनी हुई ऋषि की प्रतिभा तो सर्वातिशायिनी थी।

१७३८ पृ० की द्वितीय पंक्ति में 'प्रयोगानाम्' यह आपका प्रयोग व्याकरण की दृष्टि से अशुद्ध है।

यह जो कहा जा रहा है कि—"पाणिनि प्रभृति आचार्यों के नियमों को विना विचारे मनमाने ढंग से दयानन्द ने मन्त्रार्थ किये हैं।" इस विषय में तो आपके ही मान्य सायणादि ने मनमाने ढंग से अर्थ किये हैं। यह हम यहाँ पर वेदवेदाङ्गतत्त्वज्ञ श्री पं० ब्रह्मदत्त जिज्ञासु महाभाग की दर्शित दिशा से ही कुछ निदर्शित करते हैं। यथा—

निरुक्तकार ने 'अघ्न्याः' पद की अनेक प्रकार की निरुक्तियाँ प्रदर्शित की हैं, अतः 'सन्दिग्धे नावगृह्णन्ति' निर्वचन में सन्देह होने पर अवग्रह नहीं किया जाता। इस विषय से पदकार यहाँ अवग्रह नहीं करते हैं। व्याख्यातृ-भेद से पदविभाग में भेद हो जाता है।

ऋषि दयानन्द ने 'इषे त्वोर्जे त्वा०' इस मन्त्र में 'प्रजावतीः, अनमीवाः, अयक्ष्माः' इन पदों के साथ 'अघ्न्या' पद का अर्थ द्वितीया विभक्ति के बहुवचन में किया है। यहाँ पर 'व्यत्ययमिच्छति शास्त्रकृदेषाम्' इत्यादि महाभाष्य (३।१।८५) के आधार पर छान्दस व्यत्यय से स्वरसिद्धि मान रहे हैं।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्राऽयं पूर्वपक्षः—स्वामी दयानन्दः 'व्यत्ययो बहुलम्' (अ० ३ । १ । ८५) तथा 'बहुलं छन्दसि' इत्यादि छान्दसं बहुलं मत्वा प्रायेण वेदमन्त्राणामनर्थं कुरुते। अस्मिन् यजुःप्रथममन्त्रे 'अघ्न्या' पदं निघातमस्ति, यद् 'आमन्त्रितस्य च' (अ० ८ । १ । १९) एतत्पाणिनीयसूत्रेण सम्बोधनं मत्वैव भवितुमर्हति। एवं द्वितीयाविभक्तिबहुवचने कदाप्यर्थो न सम्भवति, सर्वानुदात्तस्य केवलं सम्बोधन एव सत्त्वात्। स्वामिदयानन्दमतिरिच्य नान्योऽमन्यत।

उत्तरपक्षः—इदं हि प्रश्नोद्भावनमकिञ्चित्करम्।

(१) निरुक्ते—'तत्कथमनुदात्तप्रकृति नाम स्याद् दृष्टव्ययं तु भवति' (५। २३) अस्मिन् शङ्कनं कृतमस्ति यत् 'समस्य' तथा 'समस्मिन्' इति द्वयेऽपि पदे विभक्त्यन्ते पठिते, अतो नाम्नी स्तः। पुनर्नाम्नि सति सर्वानुदात्तं कथम्? एतत्प्रश्नस्योत्तरं यास्कः स्वयं प्रस्तौति—'दृष्टव्ययं तु भवति' अर्थात् व्यत्ययेनानुप्रकृति जायते।

अत एव फिट्सूत्रकारोऽपि 'सम' इति पदं नाम मत्वैव 'त्वत्यसमसिमेत्यनुच्चानि' (फि० सू० ७८) एतत्सूत्रेणोदात्तमपनेतुमनुदात्तविधानं कृतम्।

पूर्वपक्ष—स्वामी दयानन्द 'व्यत्ययो बहुलम्' (अ० ३ । १ । ८५) वा 'बहुलं छन्दसि' इत्यादि छान्दस बहुल को मानकर प्रायः वेदमन्त्रों के अर्थों का अनर्थ करते हैं। इसी मन्त्र में 'अघ्न्याः' पद निघात (अनुदात्त) है, जो 'आमन्त्रितस्य च' (अ० ८ । १ । १९) इस पाणिनीय सूत्र से सम्बोधन मानकर हो सकता है। ऐसी अवस्था में इसका अर्थ 'हे गौओ!' ही होगा। 'गौओं को' यह द्वितीयाविभक्ति में अर्थ नहीं हो सकता; क्योंकि सर्वानुदात्त केवल सम्बोधन में ही हो सकता है। स्वामी दयानन्द की यह अपनी कल्पना है, ऐसा आज तक अन्य किसी आचार्य ने नहीं माना।

उत्तरपक्ष—स्वामी दयानन्द के ऐसा मानने में सप्रमाण औचित्य है। देखिये—

(१) निरु० (५ । २३) में यास्क मुनि 'तत्कथमनुदात्तप्रकृति नाम स्यात्, दृष्टव्ययं तु भवति।' इस में स्वयं शङ्का करते हैं कि 'समस्य' तथा 'समस्मिन्' ये दोनों पद विभक्त्यन्त पढ़े ही हैं, अतः ये नाम हैं, यह स्पष्ट सिद्ध है, फिर नाम होते हुए उसमें सर्वानुदात्त कैसे हो सकता है? इस प्रश्न का उत्तर यास्क मुनि स्वयं देते हैं कि 'दृष्टव्ययं तु भवति' अर्थात् यहाँ व्यत्यय से नाम अनुदात्तप्रकृति हो जाता है।

इसलिये फिट्सूत्र से भी 'सम' इस पद को नाम मानकर 'त्वत्यसमसिमेत्यनुच्चानि' (फिट्सूत्र ७८) इस सूत्र से उदात्तत्व को हटाने के लिये अनुदात्तत्व का विधान किया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(२) अत्र दुर्गस्कन्दौ अप्येवमाहतुः। एवं महाभाष्यकृतो 'व्यत्ययमिच्छति' इति सिद्धान्तं यास्कोऽपि स्वीकुरुते।

(३) वयमेवं प्रमाणं प्रस्तुमो यत् प्रकृतमनुसरति—स्कन्दनिरुक्तटीकायां (नि० ६। ७) लिखितम्, ऋग्० १। १६५। ७ इत्यत्र 'मरुतः' पदं निघातमस्ति, यत् पूर्वपक्षि-विचारानुसारमामन्त्रित एव भवति। परन्तु स्कन्दाचार्य एतत्पदस्यार्थं सम्बोधनेऽविधाय प्रथमाबहुवचने करोति। इदमप्यलेखीदसौ यत् सर्वानुदात्तमपि 'मरुतः' इति पदं नामन्त्रितम्। यद्येवं तदा कथमनुदात्तम्, एतदुत्तरं 'छान्दसो व्यत्यय एव, यथा आमन्त्रितत्वाभावाच्छान्द-समनुदात्तमिति।'

एवं सम्बोधनपदस्य व्यत्ययेनान्यविभक्तिष्वप्यर्थो भवति। एतत्सकलमनुध्याय महर्षिः 'अघ्न्याः' इति द्वितीयान्तं कृत्वा अर्थं व्यधात्।

(४) आचार्यस्कन्दोऽपि नि० ४। २ टीकायामेवमेवादर्शयत्। तत्राऽपि 'मर्याः' पदं सर्वानुदात्तं सम्बोधनेऽपि सत् प्रथमाबहुवचनेऽर्थदृशाऽमन्यत।

---

(२) इसी स्थान में दुर्ग तथा स्कन्द ने भी यही बात कही है। इस प्रकार 'व्यत्ययमिच्छति शास्त्रकृदेषाम्' महाभाष्यकार के इस सिद्धान्त को यास्क मुनि भी मान रहे हैं, यह स्पष्ट सिद्ध है।

(३) अब हम एक ऐसा प्रमाण देते हैं, जो प्रकृत विषय से पूर्णतया सङ्गत है—स्कन्द निरुक्तटीका भाग २ (निरु० ६। ७) में ऋ० १। १६५। ७ में 'मरुतः' पद निघात (सर्वानुदात्त) है, जो पूर्वपक्षी के विचारानुसार आमन्त्रित (सम्बोधन) में ही हो सकता है, उसका अर्थ सम्बोधन में न करते हुए आचार्य स्कन्द ने प्रथमाविभक्ति के बहुवचन में किया है। साथ ही उन्होंने यह भी लिखा है कि यह 'मरुतः' पद सर्वानुदात्त होता हुआ भी आमन्त्रित (सम्बोधन) में नहीं है, यदि ऐसा है तो अनुदात्त कैसे है? इसका उत्तर 'छान्दस व्यत्यय' है, यही दिया है 'आमन्त्रितत्वाभावाच्छान्द-समनुदात्तम्'।

यहाँ हमें यही दिखाना है कि सम्बोधन पद का व्यत्यय से अन्य विभक्तियों में भी अर्थ हो सकता है, यह बात स्कन्द स्वामी कहते हैं। इसी सिद्धान्तानुसार ऋषि दयानन्द ने भी सम्बोधन में होनेवाले सर्वानुदात्त 'अघ्न्याः' पद को द्वितीया के बहुवचन में माना है।

(४) यही सिद्धान्त आचार्य स्कन्द स्वामी ने निरु० (४। २) की टीका पर भी दर्शाया है। वहाँ भी 'मर्याः' पद सर्वानुदात्त होने से सम्बोधनपरक होता हुआ प्रथमा के बहुवचन में माना है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

(५) दुर्जनतोषन्यायेनोक्तप्रसङ्गे सायणमपि प्रस्तुमः—(ऋ० १ । १६५ । ७) अत्रासौ लिखति—'यतो वयं मरुतः । छान्दसमनुदात्तम् । न सम्बोधनेनानुदात्तम्' ।

साम्प्रतं पूर्वपक्षिणो न कश्चिदवशिष्यते सन्देहः सायणे प्रस्तुते । सन्देहस्तु तावदेव तिष्ठति यावन्महर्षिदयानन्दो ब्रवीति । संसारे यावदेतावान् पक्षपातो न तावदायास्यति समक्षे वेदविशुद्धस्वरूपम् ।

किञ्चिदधिकं प्रस्तूयतेऽत्र—यदैकवाक्यतां मत्वा 'प्रजावतीः, अनमीवाः, अयक्ष्माः' एतत्पदैः साकम् 'अघ्न्याः' पदस्य सामानाधिकरण्यं मत्वार्थं कुर्मः, यथोव्वटादयोऽकुर्वन् तदैकतोऽध्याहारः कर्तव्यस्त्रिष्वपि पदेष्वनिष्टस्वरप्राप्तिर्भवति, अस्मदिमानि त्रीण्यपि पदान्यामन्त्रितानि सर्वानुदात्तानि च मंस्यन्ते । यदा न तान्यामन्त्रितानि तदा कथं तैः सह 'अघ्न्याः' पदस्यैकवाक्यता सम्पत्स्यते । सामानाधिकरण्यमपि वा कथम् ? उभयतःपाशा रज्जुरियम् ।

यदि दयानन्दमतश्छान्दसव्यत्ययसिद्धान्तो मन्येत तदा न काचिद् विप्रतिपत्तिः । अथवा 'प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति, न काञ्चित् प्राधान्येन विभक्तिमाश्रयन्ति, यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या' (महाभा० १ । १ । ५५) ।

---

(५) दुर्जनतोषन्याय से यहाँ उपर्युक्त (ऋ० १ । १६५ । ७) में सायणाचार्य का भी मत देते हैं—'यतो वयं मरुतः । छान्दसमनुदात्तम् ।' क्योंकि हम 'मरुत' यहाँ छान्दस अनुदात्त है, अर्थात् अनुदात्त सम्बोधन होने के कारण नहीं है ।

मेरे विचार से अब पूर्वपक्षी को कुछ भी सन्देह नहीं रह जायेगा, सन्देह तो तब ही था जब स्वामी दयानन्द लिख रहे थे । यही बात जब सायण कहते हैं तो पूर्वपक्षी का कोई आक्षेप नहीं रहता । संसार में जब तक ऐसा पक्षपात रहेगा, तो वेदार्थ का शुद्ध स्वरूप सामने कैसे आ सकेगा ?

जब एकवाक्यता मानकर 'प्रजावतीः, अनमीवाः, अयक्ष्माः' इन पदों के साथ 'अघ्न्याः' पद का समानाधिकरण मानकर अर्थ करेंगे, जैसाकि उव्वटादि ने किया है, तब एक तो अध्याहार मानना पड़ेगा तथा इन तीनों पदों में अनिष्ट स्वर की प्राप्ति होगी, अर्थात् ये तीनों पद आमन्त्रित और सर्वानुदात्त मानने पड़ेंगे । यदि ये आमन्त्रित नहीं हैं तो 'अघ्न्याः' पद की 'प्रजावतीः, अनमीवाः, अयक्ष्माः' के साथ एकवाक्यता कैसे होगी ? समानाधिकरण कैसे बनेगा ? 'उभयतःपाशा रज्जुः' अर्थात् 'इधर कुआँ तो उधर खाई' के रूप में अगति होगी ।

यदि छान्दस व्यत्यय के सिद्धान्त को माना जावे, जैसा कि ऋषि दयानन्द मानते हैं, तब कोई दोष नहीं आता । वेदादि शास्त्रों में जो शब्द पढ़े जाते हैं, उन सब के बीच में यह नियम है कि—'जिस विभक्ति में युक्ति और प्रमाण के अनुकूल अर्थ बनता हो, उस विभक्ति का आश्रय कर अर्थ करना चाहिये ।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पाणिनिप्रभृत्याचार्याणां तु आचार्यसायणादय एवोल्लंघनमकार्षुः। यथा—सायणः तै० सं० भाष्ये 'इन्द्र' शब्दं वृकादित्वादाद्युदात्तममनुत न तत् सम्यक्, तथा सति परस्परविरोधः, यतः ऋग्वेद (१।२।६) भाष्ये इन्द्रशब्दव्युत्पत्तिपक्षे 'रन्' प्रत्ययं विधायासाधयत्। अव्युत्पत्तिपक्षेऽपि 'ग्रामादीनां च' (फि० सू० ३८) इत्यनेनेष्टस्वरसिद्धिः, काऽऽवश्यकता वृषादिपाठमनने।

'अयक्ष्माः' इत्यत्रोव्वटः पाणिनिप्रभृत्याचार्यानलङ्घयत्, यथा—'अयः क्ष्मायां यासाम्'। एवमिह बहुव्रीहिसमासदर्शनं न सम्यक्, तथा सति 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (अ० ६।२।१) इत्यनेन पूर्वपदान्तोदात्ते अनिष्टस्वरप्राप्तिः। स्वरव्यत्ययसिद्धान्ते मते छान्दसव्यत्ययेन सर्वं समाधानम्।

'ईशत' इत्यत्र 'माङि लुङ्' (अ० ३।३।१७५) इति छान्दसत्वान्न प्रवर्तते। उव्वटस्तथा लुङ्मनुते, तन्न सम्यक्। छान्दसव्यत्यये तु लुङ्लकारे च्लिस्थाने 'अङि' कथमपि साधु।

'अघशंसः' आचार्यदयानन्दोऽस्य पदस्य व्युत्पत्तिं द्विधा व्यधात्। अत्र 'अघं पापं शंसति' इति व्युत्पत्त्या उपपदमदर्शयत्। तथा यजुः० ३३।६१ भाष्ये 'अघस्य पापस्य स्तोता चौरः' इति

सायणाचार्य ने भी तो तै० सं० के भाष्य में 'इन्द्र' शब्द को वृषादि होने से आद्युदात्त माना है, जो ठीक नहीं, तथा परस्पर विरोध भी है; क्योंकि जब ऋ० १।२।६ के भाष्य में सायण ने स्वयं इन्द्र शब्द की व्युत्पत्ति में 'रन्' प्रत्ययान्त होने से नित् स्वर से आद्युदात्त माना, सो यहाँ भी वही हो सकता है। अव्युत्पत्तिपक्ष में तो 'ग्रामादीनां च' (फिट्सूत्र ३८) इतने से ही इष्ट स्वर सिद्ध हो जाता है, वृषादि में मानने का काम ही नहीं है; क्योंकि 'ञ्नित्यादिर्नित्यम्' (अ० ६।१।१९१) से इष्ट स्वर सिद्ध हो जाता है।

'अयक्ष्माः' यहाँ पर उव्वट ने 'अयः क्ष्मायां' इस प्रकार बहुव्रीहि समास दिखाया है, जो ठीक नहीं है; क्योंकि बहुव्रीहि मानने में 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (अ० ६।२।१) से पूर्वपदान्तोदात्त अनिष्ट स्वर की प्राप्ति होती है। स्वरव्यत्यय माननेवालों के पक्ष में तो छान्दस व्यत्यय से भी इष्ट स्वर की सिद्धि हो सकती है।

'ईशत' यहाँ 'माङि लुङ्' (अ० ३।३।१७५) छान्दस होने से नहीं लगा। 'न माङ्योगे' (अ० ६।४।७४) से 'अट्' का अभाव होता है। यहाँ तो उव्वट ने 'माङि लुङ्' करके लुङ् लकार माना, जो उनकी भूल है। हाँ, छान्दस व्यत्यय मानकर लुङ् लकार में 'च्लि' के स्थान में 'अङ्' मानें, तब तो किसी प्रकार सिद्ध भी हो सकता है।

'अघशंसः' आचार्य दयानन्द ने इस पद की व्युत्पत्ति दो प्रकार से की है। यहाँ पर 'योऽघं पापं शंसति' इस व्युत्पत्ति से उपपदसमास दर्शाया है। तथा यजुः० ३३।६१ के भाष्य में 'अघस्य

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

षष्ठ्यन्तेन विग्रहं कृतवान्। तथा निरुक्तकारोऽपि (६।११) अदर्शयत्। परं षष्ठ्यन्तं विग्रहं केवलमर्थमवबोधयितुं विद्यते। अथवा नाऽर्थपरकोऽपि वा विग्रहो मन्येत न तथापि दोषः। 'दासीभाराणां च' (अ० ६।२।४२) इतीष्टसिद्धिः।

उपपदसमासे त्विष्टसिद्धिर्यथा—'कर्मण्यण्' (अ० ३।२।१) इत्यनेनाऽण्प्रत्यये 'उपपदमतिङ्' (अ० २।२।१९) इत्यनेन समासः। 'आहन्तीति' (निरु०) आङ्पूर्वकाद् हन्धातोरघशब्दः 'गतिकारकोपपदात् कृत्' (अ० ६।२।१३८) इति सूत्रेणान्तोदात्तः। पुनः 'शंस' इत्यनेन सह समासे 'समासस्य' (अ० ६।१।२१७) इत्यन्तोदात्तस्वरप्राप्तिं बाधित्वा 'गतिकारकोपपदात् कृत्' (अ० ६।२।१३८) इत्युत्तरपदप्रकृतिस्वरं प्राप्तम्। वैदिकग्रन्थेषु 'अघशंसः' इति पूर्वपदान्तोदात्त एवोपलभ्यते। अतः तत्पुरुषसमासे 'कुरुगार्हपतरिक्तगुर्वसूत-जरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च' (अ० ६।२।४२) सूत्रेण पूर्वपदप्रकृतिस्वरत्वं भवति।

पुनर्महीधरोऽत्र 'अघं शंसति' इति व्युत्पत्त्या 'शसि इच्छायाम्' इति धातुना 'अघशंसः' इति साधयति, तथा 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' (अ० ६।२।२) इति सूत्रेण पूर्वपदप्रकृतिस्वरं साधयति, तद् भ्रान्तम्। तथा व्युत्पत्तौ उपपदसमास-

---

पापस्य स्तोता चौरः' इत्यादि षष्ठ्यन्त से विग्रह किया है, जैसा कि निरुक्तकार ने भी (६।११ में) दर्शाया है। षष्ठ्यन्त से विग्रह अर्थ समझाने के लिये किया है, ऐसा समझना चाहिये। अथवा यदि विग्रह अर्थपरक न भी माना जाये तो भी कोई दोष नहीं आता। 'दासीभाराणां च' (अ० ६।२।४२) से ही इष्ट स्वर की सिद्धि हो जाती है।

उपपदसमास में इष्ट स्वर की सिद्धि निम्न प्रकार होगी—'कर्मण्यण्' (अ० ३।२।१) इस सूत्र से अण् प्रत्यय होकर 'उपपदमतिङ्' (अ० २।२।१९) से समास हुआ। आङ् पूर्वक हन् धातु से 'अघ' शब्द 'गतिकारकोपपदात् कृत्' (अ० ६।२।१३८) से अन्तोदात्त है। पुनः 'शंस' के साथ समास होने पर 'समासस्य' (अ० ६।१।२१७) से अन्तोदात्त स्वर की प्राप्ति होती है। उसका बाधन कर पुनः 'गतिकारकोपपदात् कृत्' (अ० ६।२।१३८) से उत्तरपद-प्रकृतिस्वर की प्राप्ति हुई। वैदिक ग्रन्थों में सर्वत्र 'अघशंसः' पद पूर्वपदान्तोदात्त ही उपलब्ध होता है। अतः तत्पुरुषसमास में 'कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च' (अ० ६।२।४२) सूत्र से पूर्वपद का प्रकृतिस्वर होता है।

यहाँ महीधर लिखता है 'अघं शंसति' इस व्युत्पत्ति से 'शसि इच्छायाम्' इस धातु से यह शब्द सिद्ध होता है। यह उसकी भ्रान्ति है; क्योंकि 'अघं शंसति' इस व्युत्पत्ति से उपपदसमास की प्राप्ति अनिवार्य है। उपपदस्वर के पर होने से 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमाना-व्ययद्वितीयाकृत्याः' (अ० ६।२।२) सूत्र इसका बाधक नहीं हो सकता, अतः इस सूत्र से

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

प्राप्तिरपरिहार्या। उपपदस्वरस्य परत्वात् 'तत्पुरुषे तुल्यार्थ०' इत्यनेन न पूर्वपदप्रकृतिस्वरः।

नेदं यत् 'अघं शंसति' व्युत्पत्त्यर्थमात्रदर्शनम् 'अघेन शंसः, अघे शंसः? इत्यनेन सेत्स्यति, तृतीयया सप्तम्या वा नार्थसिद्धिस्तदा 'तत्पुरुषे०' इति नेष्टस्वरसिद्धिः।

पृ० १७३८, पं० ३—यदुच्यते—"यथा दयानन्दीये भाष्येऽविगणय्य पाणिनीयादिनियमान् स्वाच्छन्द्यं दृश्यते" इत्यपि भ्रामकम्, परमेतच्छायायां केचनार्यप्रशस्यमित्रादयो विलिखन्ति यदाचार्यसायणसदृशी व्याकरणप्रक्रिया स्वामिदयानन्देन नोपन्यस्ता, तत्र महीधरेणाऽपि तुलयन् ऋषिं हीनं साधयितुं प्रचक्रमे। तत्र प्रसङ्गेपात्तं किञ्चिद् विविच्यते—

स्वामिदयानन्दस्योद्दिष्टमासीद् वेदोद्धारः। वेदाश्च रूढिग्रस्तसंस्कारभाष्यैर्मध्यकालिकैर्ग्रस्ता अभूवन्। तत्र सायणादिभिर्वेदानामपौरुषेयाणां नित्यानां यद् भाष्यं व्यधायि, तेन वेदगौरवं समग्रं निगलितमासीत्। व्याकरणेन शब्दसिद्धयस्तु भवन्त्येव। व्याकरणपाठनं

पूर्वपदप्रकृतिस्वर की प्राप्ति ही कैसे होगी।

यदि कोई कहे कि 'अघं शंसति' यह केवल अर्थप्रदर्शनमात्र है, व्युत्पत्ति नहीं, 'अघेन शंसः, अघे शंसः' तृतीयान्त और सप्तम्यन्त हैं, इस प्रकार 'तत्पुरुषे तुल्यार्थ०' सूत्र से इष्ट स्वर की सिद्धि हो जायेगी, यह कहना भी ठीक नहीं; क्योंकि उपर्युक्त तृतीया व सप्तमी से कोई अर्थ नहीं बनता।

पृ० १७३८, पं० ३—यह कहना कि—"जैसे दयानन्द के भाष्य में ही पाणिनि प्रभृति आचार्यों के नियमों का विना विचार किये मनमाने तरीके से मन्त्रों का अर्थ किया जाता है।" भ्रामक है; परन्तु इस प्रकार के कथन की आड़ लेकर कुछ आर्यमित्र प्रशस्य विद्वानों ने भी लिखना प्रारम्भ कर दिया कि सायण के समान व्याकरण की प्रक्रिया स्वामी दयानन्द ने अपने भाष्य में नहीं लिखी। इन्होंने 'आचार्य महीधर और स्वामी दयानन्द का माध्यन्दिन भाष्य' अपने शोधग्रन्थ में महीधर से तुलना करते हुए ऋषि दयानन्द को अवर सिद्ध किया है। तो प्रसङ्गतः प्राप्त कुछ उक्त पुस्तक में उद्धृत व्याकरण-प्रयोगों का भी विवेचन प्रस्तुत किया जाता है—

इस विषय में प्रथम यह समझ लेना चाहिये कि व्याकरणविषय को सुलभ और सरलरूप में स्वामी जी ने वेदाङ्गप्रकाश ग्रन्थ में प्रस्तुत किया है। इस सब का उद्दिष्ट वेदोद्धार था; क्योंकि इससे पूर्व वेदों के भाष्य रूढिग्रस्त संस्कारों के आधार पर मध्यकालिकों द्वारा किये गये थे। सायणाचार्य आदि के द्वारा जो अपौरुषेय नित्य वेदों के भाष्य किये गये थे, उनसे वेदों का समस्त गौरव ही निगलित हो चुका था। व्याकरण के द्वारा शब्दों की रचना सिद्धि तो कर ली जाती थी, परन्तु व्याकरण वेद के लिये है, फलतः व्याकरण नहीं, वरन् वेद अभीष्टतर हैं, यह बात उनके ध्यान

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदभाष्यकरणकाले नाऽभीष्टतरम्, व्याकरणार्थं च पृथग् वेदाङ्गानां रचितत्वात्। यत्र यत्र पूर्वाचार्यकृतभाष्येषु व्याकरणमशुद्धं प्रतीतमभवत् तत्र प्रायशोऽबोधयत्।

आर्यमित्रेण स्वशोधप्रबन्धे माहीधरभाष्यगतव्याकरणप्रक्रियायां या अनेका अशुद्धयः प्रदर्शितास्तास्तु समा एव पदवाक्यप्रमाणज्ञैः पण्डितप्रवरैः श्रीब्रह्मदत्तजिज्ञासुभिरेव दर्शिताः सन्ति। न तत्र किमप्यस्य मौलिकं प्रतिभाति। यथा—

'अघशंसः, पवित्रे, स्तुपः, सजूः (जि० भा० पृ० २६२), वह्नयः (जि० भा० पृ० २७४)' एवमन्येऽपि माहीधरप्रयोगा निदर्शिताः।

दन्दह्यते चेतस्त्वेतेन न प्रयतितं स्वामिवर्यस्याशुद्धाभासानां शब्दानां साधुत्व-साधनप्रदर्शनाय।

यथाऽयं प्रस्तौति यत् स्वामिना स्वभाष्ये 'कृश्यति' इति स्थाने 'कृशति' इति विग्रहेण कृशानुरिति साधितम्, नायं कृशधातुस्तुदादौ दिवादिगणान्तर्गतत्वात्।

परमग्रे 'शमीष्व' (१५।१५) इत्यत्र महीधरेण शपो लुगिति विहितम्, तत्रायं समादधात् 'शबादेशाः श्यन्नादयः करिष्यन्ते' (महाभा० ३।१।६७) शपा विकरणस्याऽभिधानं क्रियत

में नहीं रही। वेदभाष्य करते समय पूर्वाचार्यों के किये भाष्य में यदि कोई त्रुटि स्वामी जी ने पाई, तो उसकी ओर भी संकेत कर दिया।

इस लेखक ने अपने शोधग्रन्थ में महीधरभाष्य के व्याकरण की जो अनेक अशुद्धियाँ प्रदर्शित की हैं, वे सभी पदवाक्यप्रमाणज्ञ पण्डितप्रवर श्री पं० ब्रह्मदत्त जी जिज्ञासु द्वारा दिखाई गई हैं, उसमें इस लेखक का कोई मौलिक अन्वेषण नहीं है। जैसे—

'अघशंसः, पवित्रे, स्तुपः, सजूः, वह्नयः' इत्यादि अन्य भी महीधर के शब्दों में स्वरादि की अशुद्धि मानी है और स्वामी दयानन्द द्वारा शब्दरचना को शुद्ध व निर्भ्रान्त माना है।

मेरे मानस को पीड़ा पहुंची कि इस प्रतिभासम्पन्न विद्वान् ने अशुद्धाभास (वस्तुतः शुद्ध) शब्दों की शुद्धिसाधना के लिये प्रयास स्वयं बिल्कुल नहीं किया, फलतः स्वामी जी पर आक्षेप किये हैं।

जैसा कि ये प्रस्तुत कर रहे हैं कि स्वामी जी ने अपने यजुर्भाष्य में 'कृश्यति' इसके स्थान में 'कृशति' यह विग्रह करके 'कृशानो' (४। २७) शब्द सिद्ध किया है, जबकि 'कृश' धातु तुदादिगण में नहीं, प्रत्युत दिवादिगण में पढ़ी गई है।

परन्तु आगे 'शमीष्व' (१५। १५) में महीधर ने शप् के लुक् का विधान किया है, वहाँ पर इन्होंने 'शबादेशाः श्यन्नादयः करिष्यन्ते' इस महाभाष्य के प्रमाण को देकर यह लिखा है कि शप्

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति मत्वा। पुनरिदं समाधानं 'कृशति इति कृशानुः' इति स्वामिनो विग्रहे कथं न सङ्गतं भवति? अथवा धातुगणपाठो निदर्शनार्थो न परिगणनार्थ इति मते तु न कश्चिद् दोषः।

ननु स्वामिदयानन्देनैव यदा श्यनादीनां स्थाने 'श' प्रयोगो विहितो यथा 'कृशति', तथैव महीधरेण 'शमीष्व शमय शमु उपशमे व्यत्ययेन शपो लुक्' इति कृतं तदसत्, शमुधातोर्भ्वादावदर्शनात्। यदि तु 'व्यत्ययेन शपो लुक्' इत्यस्यायमर्थः—शमुधातोर्व्यत्ययेन शब् भवति तस्य च लुगिति तदप्यसारम्, श्यना लुकैव इष्टे सिद्धे शपः कल्पनाया अन्याय्यत्वात्। यदि महीधरस्यायमाशयो मन्येत यत् 'शपो लुकि श्यन्न भवति' इति न दोषः। परं च तस्य नैष आशयः। अन्यथा तस्य 'व्यत्ययेन शपो लुक्' इति कथनं व्यर्थमेव स्यात्।

यदप्यार्यमित्र आह तन्न प्रशस्यम्। 'वृद्ध इव आचरन्तम्' इति विग्रहे 'क्याच्छन्दसि' (अ० ३।२।१७०) इति 'उ', एवं वृद्धायुः प्रत्ययस्वरेणान्तोदात्तत्वं प्राप्नोति तदनिष्टम्, एवं सति स्वरे व्यत्ययस्यानादिष्टत्वात्छान्दसत्वान् मध्योदात्तो भविष्यत्येव न कश्चिद् दोषः।

के द्वारा विकरण का भी अभिधान कर दिया जाता है। तो स्वामी जी के 'कृशति' विग्रह में धातु-गणपाठ उन-उन गणों में निदर्शनार्थ है, परिगणनार्थ नहीं। इससे दोष नहीं रहता। अथवा 'कृश इव चरतीति कृशति'। विग्रह अर्थप्रदर्शनार्थ भी हुआ करता है; क्योंकि कहा है—'अर्थतन्त्रा हि व्युत्पत्तयो भवन्ति'।

यदि यह कहा जाये कि स्वामी जी द्वारा जब 'श्यन्' आदि के स्थान में 'श' का प्रयोग किया है, जैसे 'कृशति', उसी प्रकार महीधर ने 'शमीष्व' और 'शमय' शमु उपशमार्थक धातु से व्यत्यय द्वारा शप् का लुक् किया है।

पर यह कहना ठीक नहीं है; क्योंकि शमु धातु का पाठ भ्वादिगण में नहीं है। यदि यह कहो कि 'व्यत्यय से शप् के लुक् होने का यह अर्थ है कि शमु धातु से व्यत्यय से शप् हुआ और तब उसका लुक् हुआ' यह भी निःसार है; क्योंकि श्यन् के लुक् से ही इष्टसिद्धि हो जाती है, तब शप् की कल्पना करना न्यायसङ्गत नहीं है। यदि महीधर का यह आशय माना जाये कि शप् के लुक् होने पर श्यन् नहीं होता, यह कोई दोष नहीं है। पर ऐसा उन का आशय नहीं है। अन्यथा 'व्यत्यय से शप् का लुक् होता है' यह उनका (महीधर का) कथन व्यर्थ ही हो जायेगा।

जो यह आर्यमित्र कह रहे हैं, वह प्रशस्य नहीं है। ऋषि द्वारा 'वृद्ध के समान आचरण करता है' इस विग्रह में 'क्याच्छन्दसि' (अ० ३।२।१७०) से 'उ' प्रत्यय होने पर 'वृद्धायु' में प्रत्ययस्वर से अन्तोदात्त प्राप्त होता है, वह इष्ट नहीं है; क्योंकि यहाँ छान्दस मध्योदात्त हो जाने से इष्ट स्वर की सिद्धि हो जायेगी।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

'शपामहे' (यजु:० ६। २२) —अत्रायं वक्ति भ्वादिगणीयशपधातोर्हि सार्थकात् तु माहीधरं भाष्यं न युक्तम्, परमृषिदयानन्दभाष्येऽपि न वैशिष्ट्यं किमपि।

महोदय! महीधरनिन्दनमेव न पर्याप्तं भविष्यति यावत् तस्य कृतो गो (अघ्न्या) हिंसापरकोऽर्थो न खण्डयिष्यते। अत एव ऋषिणा मौलिकं परिवर्तनं कृतं यद् उपालम्भनार्थकशपधातोः साधीयान् 'शपामहे' इति प्रयोगः।

महीधराचार्यः स्वभाष्ये लिखति—"हे वरुण! तस्मादघ्न्यावधजातादेनसो नोऽस्मान् मोचय" एतेन गोवधो वेदविहितः करणीयः सन्ततं च तस्मात् पापान् मोचनस्य प्रार्थनाऽपि विधातव्या।

महर्षिदयानन्दस्तु तद्गोवधस्य वेदेऽसम्भवनीयतामेव प्रत्यपादयत, यद् भवानिदमुक्त्वोपेक्षते यन्न स्वामिदयानन्दस्यार्थे किमपि वैशिष्ट्यमस्ति। किन्तु ऋषिस्तु एतद्धातोः 'शपामहे=शपथं कुर्महे' इत्यर्थं विधाय हिंसार्थमूलमेवाच्छिनत्। किमिदं वेदार्थप्रक्रियादिशायां क्रान्तिकारि वैशिष्ट्यं नैवास्ति?

'शपामहे' (यजु:० ६। २२)—यहाँ पर इस विद्वान् का कहना है कि भ्वादिगणीय 'शप आक्रोशे' धातु से हिंसार्थक मानकर आचार्य महीधर ने 'शपामहे' की रचना की है, जो चिन्त्य है। पर साथ ही वे कहते हैं कि स्वामी दयानन्द के भाष्य में भी कोई वैशिष्ट्य नहीं है।

महोदय! 'आचार्य महीधर ने कात्यायनश्रौतसूत्र में प्रदत्त अग्निष्टोम की प्रक्रिया के आधार पर यज्ञ में अग्निष्टोमीय पशु की हिंसा का इस मन्त्र में समर्थन किया है, जो ठीक नहीं है। तथा धात्वर्थ की उपेक्षा कर मनमाना अर्थ किया है' यह कहकर महीधर की निन्दामात्र करना पर्याप्त नहीं है, जब तक उनका 'अघ्न्या वध' वाले अर्थ का खण्डन नहीं किया जाता कि यह अर्थ असम्भव है। इसीलिये ऋषि दयानन्द ने यहाँ मौलिक परिवर्तन किया है कि उपालम्भन अर्थवाले 'शप्' धातुएँ 'शपामहे' यह प्रयोग साधीयान् है।

महीधराचार्य अपने भाष्य में लिखते हैं—'हे वरुण! तस्मादघ्न्यावधजातादेनसो नोऽस्मान् मोचय' कि 'वरुण! हमें गोवध के किये पाप से छुड़ाइये'। इससे अर्थ यह हुआ कि गोवध वेदविहित बताकर करते रहें और उस पाप से छूटने की प्रार्थना भी करते रहें।

वाह! क्या खूब! महर्षि दयानन्द ने उस गोवध के विधान की असम्भवता बताई, जिसे आप यह कहकर टाल रहे हैं कि स्वामी दयानन्द के अर्थ में कोई वैशिष्ट्य नहीं है। किन्तु ऋषि ने हिंसा अर्थ की जड़ ही काट दी 'शपामहे' का 'शपथ करते हैं' यह अर्थ करके। क्या यह वेदार्थ-प्रक्रिया की दिशा में क्रान्तिकारी वैशिष्ट्य नहीं है? ऋषि ने आत्मनेपदी उपलम्भनार्थक 'शप' धातु से 'शपामहे' बनाया, यह स्पष्ट है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उपालम्भनं हि 'वाचा शरीरस्योपालम्भनम्' इति वृत्तिः। अत्र हरिदत्तः—'त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येवंरूपः शपथविशेषः।' भागवृत्तिकारस्तु—'उपलम्भनं प्रकाशनम्'। कैयटे च—'उपलम्भनं प्रकाशनम्' इति। शाकटायनोऽपि—'उपलम्भनं प्रकाशनम्। अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथः'। चन्द्रभोजकौमारास्तु—"प्रोषितस्य देवदत्तस्य भावाभावयोरुपलब्धव्ययोः किञ्चिदासेवत इत्यर्थः। भोजीयास्तु..... । शपः शपथ इति, अत्र *औणादिकः* 'शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः' इत्यथः प्रत्ययः" इत्यात्मकार्थक-शपधातोः 'शपामहे' इत्यभिलक्षितः साधने। हिंसार्थकशपधातोस्तु न दूरतोऽपि सम्बन्धोऽवशेषितः। तेन अहिंस्याया अघ्न्याया हिंसने न कदाऽपि वेदाऽभिप्रायः साधनीय इति ऋषिणा ध्वन्यते। ततो 'दयानन्दभाष्ये न वैशिष्ट्यं किमपि' इति वचः परास्तम्।

'वृद्धायुम्' (यजुः० ५। २९) —'वृद्धमिवाचरन्तम्' इत्यर्थे 'क्याच्छन्दसि' (अ० ३। २। १७०) सूत्रेण उप्रत्यये प्रत्ययस्वरेणोदात्तत्वेऽन्तोदात्ते सिद्धेऽनभीष्टस्वरापत्तिस्तदा छान्द-सत्वान्मध्योदात्वेऽभीष्टः स्वरः। छान्दसकल्पनायां को दोष इति नोक्तम्।

काशिका (१। ३। २१) में 'वाचा शरीरस्पर्शनमेवोपलम्भनम्' कि 'वाणी से बोलते हुए शरीर का स्पर्श करना' कहा है। और ऋषि दयानन्द ने कहा कि शपथ अर्थात् प्रतिज्ञा कर रहे हैं। यह अर्थ एक वैशिष्ट्य रखता है। भागवृत्तिकार तथा कैयट ने 'उपलम्भन' का अर्थ 'प्रकाशन' किया, अथवा अपने अभिप्राय का अन्यत्र आविष्करण भी उपलम्भन का अर्थ है। चन्द्रभोज कौमार ने 'आसेवन' अर्थ किया है। 'शपथ' शब्द की सिद्धि 'शप्' *आक्रोशे* धातु से 'शीङ्-शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः' इस औणादिक सूत्र से 'अथ' प्रत्यय करने पर होती है। 'शपामहे' में हिंसार्थक 'शप' का तो दूर का भी सम्बन्ध नहीं है। इस विवेचन से ऋषि के अर्थ का वैशिष्ट्य स्पष्ट है।

'वृद्धायुम्' (यजुः० ५। २९)—यहाँ पर 'वृद्ध की भाँति आचरण करते हुए को' इस अर्थ में 'उ' प्रत्यय कर प्रत्ययस्वर से उदात्त करने पर अन्तोदात्त सिद्ध हुआ। इस प्रकार यहाँ अनभीष्ट स्वर होगा, पर छान्दसत्वात् मध्योदात्त होने पर अभीष्ट स्वरसिद्धि हो जायेगी। इस पर लेखक का कथन है कि कल्पना-गौरव होगा। पर इस गौरव में क्या दोष है, यह नहीं बताया। फिर इसे मान्यता क्यों न दी जाये ?

प्रश्न—महीधर के 'वृद्धा आयवो मनुष्या यस्य तम्' इस विग्रह में 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (अ० ६। २। १) इस सूत्र से पूर्वपदप्रकृतिस्वर होने पर 'एकादेश उदात्तेनोदात्तः' (अ० ८। २। ५) सूत्र से मध्योदात्त सिद्ध होने पर इसी विग्रह से सिद्धि को मान्यता क्यों न दी जाये ?

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ननु 'वृद्धा आयवो मनुष्या यस्य तम्' इति महीधरकृतेऽपि 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (अ० ६ । २ । १) इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'एकादेश उदात्तेनोदात्तः' (अ० ८ । २ । ५) इति स्वरसिद्धिस्तदा स एव स्वरः कथन्नादर्तव्य इति चेन्, अग्रे तेन तत्पुरुषसमासेनाभीष्टतरार्थद्योत्यत्वेन यथावद् दोषस्यैव स्थितिरापतिता ।

तदाऽपि कथन्न पूर्वविग्रहः स्वीकार्यः ? तथा सति वृद्धमनुष्यमिति इन्द्रस्य विशेषणत्वेऽन्यासम्बद्धत्वे पक्षपातापत्तिः । यज्ञातिरिक्तार्थे ईश्वरपक्षे सभाध्यक्षपक्षे वा वृद्ध इवाचरन्तमित्यर्थे सर्वार्थसामञ्जस्यम् । प्राधान्येनार्थोद्दिष्टत्वात् स्वरस्तु छन्दसः साध्यो न कश्चिद् दोषः ।

'सुशमि' (यजुः० १ । १५) —इदं पदं स्वामिदयानन्दो महीधर इव क्रियाविशेषणं मत्वा 'हविः' पदस्य विशेषणममन्यत । तत्राऽयं विद्वान् प्रशस्योऽप्रशस्यमाक्षिपति यत् स्वामिदयानन्दः 'सुशमि' शब्दं घिनुण्प्रत्ययान्तमसाधयत् । तथा सति प्रत्ययस्वरेणान्तोदात्तत्वे स्वरदोषः सम्भाव्यते । परमौणादिके 'सर्वधातुभ्य इन्' इतीनि गतिसमासे 'गतिकारकोपपदात् कृत्' (६ । २ । १३८) इत्यनेन उत्तरपदप्रकृतिस्वरे 'ञ्नित्यादिर्नित्यम्' (अ० ६ । १ । १९१) इति नित्स्वरे मध्योदात्तोऽभीष्टः । किन्तु औणादिकप्रत्ययानां सामान्यतया कर्तरि विहितत्वान्न कथमपि

उत्तर—बाद में महीधर 'वृद्धः आयुः' यह कर्मधारयसमास को रखने से बहुव्रीहि समास की अपेक्षा स्वयं तत्पुरुष को अच्छा समझ रहे हैं, पर इस अभीष्टतर अर्थ के द्योत्यत्व होने पर 'समासस्य' (अ० ६ । १ । २१७) इस सूत्र से अन्तोदात्तत्व अनिष्ट स्वर की प्राप्ति होगी, अतः यह ठीक नहीं है ।

तब भी 'बहुव्रीहिविग्रह' महीधर का ही क्यों न स्वीकृत कर लिया जावे, स्वामी जी के अर्थ को ही क्यों माना जाये ? बहुव्रीह्यन्त पद 'वृद्धायु' के इन्द्रपद-विशेषण मानने पर अन्यों के इन्द्र से असम्बद्ध होने पर इन्द्र का पक्षपात सिद्ध होगा । महीधर के यज्ञपरक अर्थ के अतिरिक्त ईश्वर तथा सभाध्यक्ष पक्ष में 'वृद्ध इवाचरन्तम्' अर्थ की उत्तम सङ्गति लगती है । वेद में अर्थ प्रधानतया उद्दिष्ट होता है, कभी-कभी स्वर छान्दसत्वात् ही सिद्ध मान लिया जाता है ।

'सुशमि' (यजुः० १ । १५)—इस पद को महीधर ने क्रियाविशेषण और स्वामी दयानन्द ने 'हविः' का विशेषण माना है । उस पर इस प्रशस्य विद्वान् का अप्रशस्य आक्षेप है कि स्वामी दयानन्द ने 'सुशमि' शब्द घिनुण्प्रत्ययान्त सिद्ध किया है, ऐसा होने से प्रत्ययस्वर से अन्तोदात्त होने पर स्वरदोष होगा । परन्तु औणादिक इन् प्रत्यय करने पर भी 'गतिकारकोपपदात् कृत्' (अ० ६ । २ । १३८) सूत्र उत्तरपदप्रकृतिस्वर करें तो मध्योदात्त अभीष्ट स्वर हो जायेगा, किन्तु औणादिक प्रत्यय सामान्यतया कर्ता में विहित होने के कारण से किसी प्रकार भी महीधर का अभीष्ट क्रिया-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

माहीधरं क्रियाविशेषणं सिध्यति, एवं पूर्वस्थितो दोष एव। स्वामिदयानन्दमते हविषो विशेषणत्वे धिनुणि प्रत्ययस्वरेणोक्तोऽन्तोदात्तदोषो नोपतिष्ठति। सुष्ठु शाम्यतीति विग्रहे 'परादिभ्यश्छन्दसि बहुलम्' (अ० ६ । २ । १९८) इत्युत्तरपदाद्युदात्तविधानात्।

'धिषणा' (यजु:० १ । १९) —अत्र स्वामिदयानन्दः स्वभाष्ये लिखति—'धृष्णोति सर्वा विद्या यया सा' इति विग्रहे 'धृषेर्धिष च संज्ञायाम्' इत्यनेनायं शब्दः सिद्धः। महीधरेण धिषणेदं पदं 'धियं बुद्धिं कर्म वा सिनोति व्याप्नोति' इति भ्रान्त्या व्याख्यातम्।

अत्रायमाक्षिपति महीधर-दयानन्द-भाष्यतुलनाकारो यदत्र स्वामिना भ्रान्तेः कारणं नोल्लिखितम्, पुनर्वन्दनीयविद्वांसं जिज्ञासुमाधृत्य कल्पयते, धृष्धातोरेव सिद्धे धातुद्वयकल्पनागौरवं स्वरदोषं च कारणम्। परन्त्वग्रेऽयं प्रस्तौति यन्नैषा विशिष्टभ्रान्तिः शब्दनिर्माणकर्त्रधीनकल्पनात्। यथा सत्याग्न्यादिशब्दानामनेकधातुभिर्निर्माणस्योहितत्वात्, अतो महीधरव्युत्पत्तिर्निर्भ्रान्तैव, स्वामिना व्यर्थ एव भ्रान्तिदोषेण दूषित इति भावः।

विशेषण नहीं बन सकता, तो दोष की स्थिति तो महीधर में भी बनी रही, अतः स्वामी दयानन्द ने 'इदमपि यदुव्वटमहीधराभ्यामशुद्धं व्याख्यातम्' यह बात विचार के ही कही कि 'सुष्ठु शाम्यति' इस विग्रह के करने पर 'परादिभ्यश्छन्दसि बहुलम्' (अ० ६ । २ । १९८) इस सूत्र से आद्युदात्त होने की सम्भावना उपस्थित ही नहीं होगी।

'धिषणा' (यजु:० १ । १९)—इस प्रयोग पर स्वामी दयानन्द ने अपने भाष्य में लिखा है 'धृष्णोति सर्वा विद्या यया सा'। इस विग्रह में धृष् को संज्ञा में धिष आदेश होकर 'धिषणा' की सिद्धि हो जायेगी। महीधर ने भी 'धी अर्थात् बुद्धि और कर्म को व्याप्त करती है' यह विग्रह लिखा है, वह भ्रान्ति है, ऐसा स्वामी दयानन्द ने लिखा है।

इस पर डा० प्रशस्य जी का आरोप है कि स्वामी दयानन्द ने यहाँ प्रक्रिया में कैसी भ्रान्ति की है, यह नहीं लिखा। इसके साथ ही लेखक ने वन्दनीय विद्वान् जिज्ञासु जी का ही सुझाया हुआ आधार लेकर कल्पना की है कि सम्भवतः स्वामी दयानन्द ने 'धिषणा' शब्द की सिद्धि महीधर द्वारा दो पदों पर आधारित होने तथा स्वर के सम्भावित दोष से दूषित व भ्रान्तियुक्त मानी है। परन्तु वे अनुपद ही कहते हैं कि यह कोई बड़ी भ्रान्ति नहीं है; क्योंकि यह तो शब्दनिर्माणकर्ता के अधीन है कि वह शब्द की रचना में कितनी धातुओं की कल्पना करता है। जैसे कि सत्य और अग्नि शब्दों की रचना में अनेक धातुओं की कल्पना की गई है। अतः महीधर की व्युत्पति निर्भ्रान्त है, स्वामी जी ने व्यर्थ ही भ्रान्ति का दोष लगाया है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

परमग्रे जिज्ञासुदिशैवोहति यन्महीधरमनुसारं धियं बुद्धिं सनोतीति पचाद्यचि 'थाथघञ्क्ताजबित्रकाणाम्' (अ० ६। २। १४३) इत्युत्तरपदान्तोदात्तस्वरः प्राप्नोति, मध्योदात्तश्चेष्यते। औणादिकक्युप्रत्यये न कश्चिद् दोषः। पुनरप्यनेन प्रयासो मुधाऽनुष्ठितो दोषनिवारणाय यत् 'परादिभ्यश्छन्दसि बहुलम्' (अ० ६। २। १९८) इत्यनेन सिध्येत् तदा न भ्रान्तिर्मन्तव्या। तत्र पृच्छामो बहुलवचनेन सिध्येन्नाम स्वरः कथमपि परं धिषणाशब्दो द्यावापृथिव्योर्वाचश्च वाचको निघण्टौ निरुक्ते च वर्तते तदा तदनुल्लेखोऽपि भ्रान्त्यैवेति विज्ञेयं स्वामिनोद्भावितो दोषो यथायथं स्थित एवेति दिक्।

'उपगेषम्' (यजुः० ५।५) —एतत्प्रयोगसाधने महीधरो लिखति—

"उपपूर्वस्य गायतेर्लेट्युत्तमैकवचने 'सिब्बहुलं लेटि' (अ० ३। १। ३४) इत्यडागमे च रूपम्। 'इतश्च लोपः परस्मैपदेषु' (अ० ३। ४। ९७) इति इलोपः।"

एतत्प्रक्रियां दूषितां मन्वानः स्वामी दयानन्दः स्वभाष्ये लिखति—'इदं पदमवैयाकरणेन महीधरेण लेट्लकारस्य रूपमित्यशुद्धं व्याख्यातम्'।

परन्तु आगे यही लेखक जिज्ञासु जी की दिशा से स्वयं कैसा ऊहन करता है कि महीधर की व्युत्पत्ति के अनुसार 'अच्' प्रत्यय कर लेने पर 'थाथघञ्क्ताजबित्रकाणाम्' (अ० ६। २। १४३) सूत्र से उत्तरपदान्तोदात्त स्वर प्राप्त होगा, जबकि इष्ट स्वर मध्योदात्त है। औणादिक 'क्यु' प्रत्यय करने पर कोई दोष नहीं होता। तब फिर इस लेखक ने दोष-निवारण के लिये भी व्यर्थ प्रयास क्यों किया कि 'परादिभ्यश्छन्दसि बहुलम्' (अ० ६। २। १९८) से सिद्ध हो जायेगा, इस प्रकार भ्रान्ति नहीं कही जा सकेगी। तब भी आपसे प्रश्न है कि 'बहुल' वचन से सिद्ध हो जाने पर भी 'धिषणा' शब्द द्यावापृथिवी और वाणी का वाचक है, इसका अनुल्लेख करना भी तो भ्रान्ति ही मानी जायेगी। ऋष्युद्भावित दोष तो बना ही रहा।

'उपगेषम्' (यजुः० ५।५)—इस प्रयोग की सिद्धि में महीधर लिखते हैं कि—

"उपपूर्वक गै धातु से लेट् उत्तमपुरुष के एकवचन में सिप् में इडागम करने तथा अडागम करने पर 'उपगेषम्' सिद्ध हो जायेगा"।

परन्तु इस माहीधर प्रक्रिया को महर्षि दयानन्द दूषित मानकर लिखते हैं कि यह पद अवैयाकरण महीधर ने लेट् लकार में बनाया है, यह अशुद्ध है।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

तत्रायमाक्षिपति—'स्वामिदयानन्देनास्य लेट्लकाररूपस्य मान्यता खण्डिता, न परं सिद्धिप्रकारो दर्शितः।'

तद् ब्रूमो यद् ऋषेर्वेदार्थ एवोद्दिष्ट आसीद् विधेयत्वेन, भाष्यकारैस्तस्यैव दूषितत्वेनानर्थपरम्पराप्रचारात्। व्याकरणे तु पाणिन्यादिप्रणीतशास्त्रेषु जीवितेषु शोधनसम्भवात्। तत्रेदमेव पर्याप्तं कठोरमालोचितं यद् अवैयाकरणेन महीधरेणेति।

शुद्धरूपप्रक्रिया तु महावैयाकरणेन महर्षिभक्तेन विद्वद्वरेण जिज्ञासुमहाभागेनास्मत्सौविध्यावगमाय प्रस्फुटितीकृता। यथा लेटि तु 'उपगासम्' इति रूपं स्यात्। 'गै' अनिड्धातुस्तस्य सेट्त्वकल्पनात्, 'आतो लोप इटि च' (अ० ६।४।६४) इत्यनेनाकारलोपस्य प्रापणात्। 'उपगेषम्' इति रूपं तु आशिषि लिङि लुङि चोभयथाऽपि सम्भवति। महाभाष्यकारेण 'लिङ्याशिष्यङ्' (अ० ३।१।८६) इत्यत्र 'अञ्जसा सत्यमुपगेयम्' इति शाखाकृतस्वल्पभेदेन 'उपगेषं' स्थाने 'उपगेयम्' अस्या एवानुपूर्व्याः प्रदर्शनाद् आशिषि लिङ्येतद् रूपमिति ध्वनितम्। अन्यत्र च मैत्रायणीसंहितायां (१।२।७), काठकसंहितायां (२।८) 'अञ्जसा सत्यमुपागाम्'

इस पर प्रशस्य जी आक्षेप करते हैं कि स्वामी दयानन्द ने इसके लेट् लकार में बनने की मान्यता तो खण्डित कर दी, परन्तु यह रूप कहाँ बनेगा, यह नहीं दिखलाया।

साधारण सी सोचने की बात है कि गुरु छात्रों द्वारा अशुद्ध बताये रूप को इतना भर कहकर कि 'अशुद्ध है' और भी सोचने और पढ़ने का अवसर देता है। सही जानने का प्रकार यही है कि व्याकरण का अधिक अभ्यास करिये। अतः ऋषि दयानन्द का उद्दिष्ट तो वेदभाष्य करना था, यहीं पर व्याकरण पढ़ाना नहीं; क्योंकि भाष्यकारों ने वेदार्थ को ही दूषित कर अनर्थपरम्परा का प्रचलन किया था। व्याकरण में तो आचार्य पाणिनि आदि प्रणीत शास्त्रों के जीवित रहते शोधन सम्भव है। स्थान-स्थान पर अशुद्ध वा अवैयाकरण कहकर कठोर आलोचना कर देना मात्र महीधरानुयायियों के लिये पर्याप्त था। क्या आज कोई उन अनुयायियों में माँ का लाल है, जो 'उपगेषम्' की सिद्धि लेट् लकार में करके दिखाये ?

रूप की शुद्ध प्रक्रिया तो महावैयाकरण महर्षिभक्त विद्वद्वर श्री जिज्ञासुजी महाभाग ने हमारी सुविधा के लिये प्रस्फुटित कर दी है। यथा—लेट् में तो 'उपगासम्' यह रूप बनेगा। 'गै' धातु अनिट् है, उसके सेट्कत्व की कल्पना की गई है। 'आतो लोप इटि च' (अ० ६।४।६४) सूत्र से आकार का लोप करने से 'उपगेषम्' यह रूप आशीर्लिङ् और लुङ् दोनों में ही सम्भव है। महाभाष्यकार ने 'लिङ्याशिष्यङ्' (अ० ३।१।८६) इस सूत्र पर स्वल्प भेदवाले 'उपगेयम्' को 'उपगेषम्' के स्थान पर दिखाया है। इस शाखाकृत आनुपूर्वी के प्रदर्शन से ध्वनित किया है कि आशिषि लिङ् में इस रूप की सिद्धि होगी। अन्यत्र मैत्रायणी, काठक में 'अञ्जसा सत्यमुपागाम्'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

इति लुङि दर्शनाद् 'उपगेषम्' इति लुङ्यपि स्यादित्यवगन्तुं शक्यते।

लिङि तु 'कै गै शब्दे' इति धातोराशिषि लिङि 'छन्दस्युभयथा' (अ० ३।४।११७) इति सार्वधातुकत्वाद् 'अङ्', 'आतो लोप इटि च' (अ० ६।४।६४) इत्याकारस्य लोपोऽङे-ऽकाराद् यासुटः 'अतो येयः' (अ० ७।२।८०) इतीयादेशः, आर्धधातुकत्वात् सलोपाभावः, 'लोपो व्योर्वलि' (अ० ६।१।६६) इति यलोपः। लुङि च उपपूर्वाद् इण्धातोः 'इणो गा लुङि' (अ० २।४।४५) इति गादेशः। आकारस्येकारश्छान्दसः, 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' (अ० २।४।७७) इति सलोपोऽपि छान्दसव्यत्ययेनैवात्र न प्रवर्तते। 'बहुलं छन्दस्यमाङ्योगेऽपि' (अ० ६।४।७५) इत्यडभावः।

महर्षिरत्र भाष्ये नादर्शयत् 'उपगेषम्' इत्यस्य व्याकरणप्रक्रियामित्यत्राऽपि कारणमासीद् यदन्यैर्भट्टभास्करादिभिरपि रूपसाधनिका प्रदर्शिताऽऽसीदतो न पिष्टपेषणस्वभावो महामनीषिणामिति दिक्।

पदपाठविषयेऽपि प्रशस्यो महाभाग आक्षिपति यन्महीधरवत् स्वामिदयानन्देनाऽपि पदपाठोल्लंघनं कृतम्। यथा—'वलगहनम्' (यजुः० ५।२३) इति मन्त्रे 'वलऽगहनम्' इति पदपाठः कृतोऽनेनेत्याक्षिप्तम्, परम्परया च 'वलगऽहनम्' इति, नात्रोल्लंघने प्रमाणं किमपि।

अत्र ब्रूमो यद् वलपूर्वकाद् 'गाहू विलोडने' धातोः 'कृपृवृजिमन्दिनिधाञः क्यु:' (उ०

यह लुङ् में दिखाने से और 'उपगेषम्' यह रूप भी बनेगा, ऐसा समझना चाहिये।

लिङ् में तो 'कै गै शब्दे' में गै धातु से आशिषि लिङ् में अङ्, आकारलोप, अङ् के अकार से उत्तर यासुट्, आदेश, सलोपाभाव व यलोप होकर रूपसिद्धि होगी तथा लुङ् में उपपूर्वक 'इण्' को 'गा' आदेश, छान्दस इयादेश, छान्दस व्यत्यय से सलोपाभाव तथा अडागम होने पर रूपसिद्धि होती है।

महर्षि ने पदसिद्धि का प्रकार नहीं दिखाया, उसमें भी कारण था कि भट्ट भास्कर आदि के द्वारा व्याकरण में अन्यत्र रूपसाधनिका दिखाई ही गई है, अतः पिष्टपेषण करना महामनीषियों को शोभा नहीं देता, इस दृष्टि से भी ऐसा किया है।

'वलगहनम्' (यजुः० ५।२३)—इस पर भी इस लेखक ने आक्षेप किया है कि स्वामी दयानन्द ने यहाँ 'वलऽगहनम्' यह नया पदपाठ कर दिया, जबकि परम्परा से 'वलगऽहनम्' यह चला आ रहा है। इस पदपाठ के उल्लंघन करने में कोई प्रामाणिक आधार नहीं है।

इस पर हमारा कहना है कि 'वल' पूर्वक 'गाहू विलोडने' धातु से 'कृपृवृजिमन्दिनिधाञः

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

२।८१) इति बाहुलकाद् गाहतेः क्युप्रत्यये धातोर्ह्रस्वत्वे च 'गतिकारकोपपदात् कृत्' (अ० ६।२।१३८) इत्युत्तरपदप्रकृतिस्वरे प्रत्ययस्वरे सिध्यति।

वलऽगहनमिति पदपाठे प्रमाणमाह—'विचित्रा हि पदकाराणां वृत्तयः' इति कृत्वा सम्यक्।

देवराजोऽपि 'गाहू विलोडने' धातोरेव युचि साधयति। साधीयांसमर्थमभिलक्ष्य कृतोऽयं पाठोऽपि साधीयान्।

वस्तुतस्त्वस्य माहीधरदयानन्दभाष्यतुलनाकर्तुर्लेखकस्य विचाराणां तारुण्यमपरिपाको वा स्वच्छन्दचिन्तकविद्वच्छ्रेण्यामात्मानं गणयितुं लालायितस्य विमर्शनस्य सवेगपदक्रमकस्याकिञ्चित् पूर्वाङ्गीकृताधारभूमिपृष्ठमाश्रयितुमवरुणद्धि। अन्यथा नाऽयमलेखिष्यत् पृ० १, ७ मपंक्त्याम्—"अपनी प्रतिभा व ज्ञानचक्षु के सहारे साक्षात्कृतधर्मा ऋषियों के द्वारा अनुभूत अध्यात्मशास्त्र के तत्त्वों की विशाल विमल राशि का नाम ही वेद है।"

इह 'अनुभूत' पदं न विवेकमाचष्टे।

क्युः' (उ० २।८१) सूत्र से 'क्यु' प्रत्यय करने पर धातु को ह्रस्व तथा प्रत्ययस्वर करने पर सिद्ध है।

यहाँ पर परम्परा के उल्लंघन में ऋषि का यह आशय है कि चाहे वह पदपाठ हो या नियोगबन्धन हो, कदाचित् वेद के उत्तमार्थ ऊहन करने में बाधा डाले तो वे वेद के बाद को अपनाई गई रूढियाँ वेदार्थ से बड़ी न समझी जायें। इसमें अन्य विद्वानों के आधार भी हैं, जैसे कहा गया है कि 'पदकारों की गतियाँ तो बड़ी विचित्र होती हैं।

देवराज ने भी 'गाहू विलोडने' धातु से 'युच्' प्रत्यय करने पर 'गहनम्' की सिद्धि की है। अधिक उत्तमार्थ को लक्ष्य कर किया हुआ यह पदपाठ विकल्प भी उत्तम है। वैसे महीधर आदि ने 'वयोधसाधीतेनाधीतं जिन्वाभिजिता०' (यजु:० १५।७), 'यो मम' (यजु:० ५।६) आदि स्थलों पर पद-पाठ का उल्लंघन बहुत किया है।

वास्तव में तो आचार्य महीधर तथा स्वामी दयानन्द के भाष्यों की तुलना-कर्ता के विचारों का तारुण्य और अपरिपाक स्वच्छन्द चिन्तक विद्वानों की गणना में गिने जाने की ललक के कारण विमर्शन के सवेग पदक्रम को किसी पूर्वाङ्गीकृत पृष्ठभूमि पर पैर टेकने को रोकते रहे। अन्यथा यह लेखक कदापि ऐसा पृ० १ पंक्ति ७ पर न लिखता—"अपनी प्रतिभा व ज्ञानचक्षु के सहारे साक्षात्कृतधर्मा ऋषियों के द्वारा अनुभूत अध्यात्मशास्त्र के तत्वों की विशाल विमल राशि का नाम ही वेद है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १, १८ पंक्तौ—"ईश्वरविरोध तो सह्य है, किन्तु वेदविरोध वर्ज्य है। यही कारण है कि ईश्वर की सत्ता न माननेवाले दर्शन (सांख्य-मीमांसा) आस्तिकता से विहीन नहीं माने जाते।"

किं लेखकदृशेमे दर्शने नेश्वरसत्ताऽऽख्यापके ?

परमिह प्रासङ्गिकतया व्याकरणविषयकप्रयोग एवाऽऽलोचिताः शिष्टस्यानालोच्यत्वात्। इति दिक्।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थकल्पद्रुम' नामग्रन्थे
'व्याकरणनियम-विषयः'
॥ सम्पूर्णः ॥

यहाँ पर पढ़ा हुआ 'अनुभूत' विशेषण वेदसद्विवेक की कसौटी पर कसा हुआ नहीं है; क्योंकि वेद के अध्यात्म तत्त्व ऋषियों की मौलिक अनुभूति नहीं अथवा ऋषियों की अनुभूति से पूर्व ही अग्न्यादि के विमल हृदयों में ईश्वर द्वारा प्रादुर्भूत ज्ञानराशि ही वेद है।

पृ० १ पंक्ति १८ में—"ईश्वरविरोध तो सह्य है किन्तु वेदविरोध वर्ज्य है। यही कारण है कि ईश्वर की सत्ता न माननेवाले दर्शन (सांख्यमीमांसा) आस्तिकता से विहीन नहीं माने जाते।"

क्या लेखक की दृष्टि में ये दोनों ईश्वरसत्ताऽऽख्यापक दर्शन नहीं हैं? तथा क्या ईश्वर की सत्ता न मानना वेदविरोध नहीं है? फिर मान्यता कैसे मिल गई?

किन्तु यहाँ पर केवल प्रसङ्गोपात्त व्याकरणविषयक प्रयोगों की ही आलोचना की गई है, यहाँ अन्य विषय हमारे अनालोच्य हैं। इति दिक्।

श्रीमान् पण्डित बिहारीलालजी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'व्याकरणनियम-विषय'
॥ सम्पूर्ण हुआ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अथालङ्कारविषयः संक्षेपतः

पृ० १७३९—अनेन खलु पारिजातकृतोक्तम्—"अदितिर्द्यौः' इत्यस्मिन् मन्त्रे अदिति-शब्दार्था द्यौरित्यादयः सन्ति, तेऽपि वेदभाष्येऽदितिशब्देन ग्राहिष्यन्ते' इति भूमिकोक्तं न युक्तम्, अत्र मन्त्रेऽदितिशब्दार्थानुक्तेः। नह्यत्र मन्त्रेऽदितिशब्दार्थनिरूपणम्, किन्त्वदितेर्वि-भूतिनिरूपणमस्ति। नहि—'अश्वत्थः सर्ववृक्षाणाम्' इत्युक्त्या कृष्णशब्दस्यार्थोऽश्वत्थो भवति।"

एतत् सर्वं भ्रामकम्, मन्त्रेऽदितिशब्देन द्यौरित्याद्यर्थानां प्रतिपादितत्वात्। तथा चाह दुर्गोऽपि—'नैरुक्तपक्षेण पुनर्यान्येतस्यामविवक्ष्यमाणायां द्यौरित्येवमादीनि पदानि श्रूयन्ते एतान्येवादितिशब्देनोच्यन्ते'(नि० ४।४।१-२३) इति। अर्थात् अदितिशब्दो हि द्यौरित्यादीनां वाचकः, इमानि च पदानि वाच्यानि। अर्थोऽपि वाच्यो भवति। '.....एतानि द्युलोकादीनि सर्वाणि अदीनानि अनुपक्षीणानि इति योज्यम्, न ह्येषां क्षमोऽस्तीति'(नि० ४।४।१-२३)।

इत्येवमाकाशस्वरूपत्वात् परमेश्वरो द्यौरदितिरेव, अन्तर्यामित्वादन्तरिक्षमदितिः। यदुच्यते विभूतिनिरूपणम्, तदपि तु मदुक्तार्थसङ्गमनादेव साधयितुं युज्यते। अत एव

पृ० १७३९—पारिजातकर्ता ने यहाँ लिखा है कि—"स्वामी दयानन्द ने 'अदितिर्द्यौः०' इस मन्त्र को उद्धृत कर लिखा है कि 'इस मन्त्र में अदितिशब्द के बहुत से अर्थ हैं, उन सब का उल्लेख हम अपने वेदभाष्य में स्थान-स्थान पर करेंगे। वे अर्थ हैं—द्यौ, अन्तरिक्ष, माता, पिता, पुत्र, विश्वदेव आदि।" किन्तु यह कथन इसलिये ठीक नहीं, क्योंकि यहाँ अदिति शब्द के अर्थों का वर्णन नहीं किया गया है। इस मन्त्र में तो अदिति की विभूति का वर्णन किया गया है। 'अश्वत्थः सर्ववृक्षाणाम्' गीता की इस उक्ति का अभिप्राय यह नहीं है कि कृष्ण शब्द का अर्थ अश्वत्थ है।"

परन्तु श्री करपात्री जी का यह लेख भ्रामक है; क्योंकि मन्त्र में अदिति शब्द के अर्थ द्यौ आदि प्रतिपादित किये गये हैं, जैसाकि दुर्गाचार्य भी कहते हैं—'नैरुक्त पक्ष से फिर जो इसके अविवक्ष्यमाण होने पर द्यौ इत्यादि पद सुने जाते हैं, ये ही अदिति शब्द से कहे जाते हैं'। अर्थात् अदिति शब्द वाचक है और द्यौ, अन्तरिक्ष आदि वाच्य हैं। ये अर्थ होने से वाच्य हैं।

इस प्रकार आकाशस्वरूप होने से द्यौ अदिति अर्थात् अखण्डनीय ही है। अन्तर्यामी होने से अन्तरिक्ष भी अदिति है। इसमें अदिति की विभूतियों का निरूपण तो आप स्वयं ही स्वीकार करते हैं तो विभूतिमान् से विभूति दूर नहीं है, विभूति भी तत्स्वरूप होने से भूमिकार्थ प्रशस्त

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ऋषिदयानन्देन कारणरूपेण प्रवाहरूपेण वा द्युलोकादीनामदितित्वमनश्वरत्वमुक्तम्।

ऋषिदयानन्देन स्वभाष्ये विशेष्यविशेषणभावप्रक्रियायां दिग्दर्शनमात्रं कारितम्। एतद्विशेष्यविशेषणभावविषये स्कन्दाचार्योऽपि लिखति—

"अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि' (१।१।४) इत्यत्र अध्वरशब्दोऽयं यज्ञमित्यनेन पौनरुक्त्यान्न यज्ञनाम, किन्तर्हि ? विशेषणम्।"

छलारीटीकायामपि (२।४) 'विशेष्यविशेषणभावे कामचारः ?' इत्युक्तम्। अस्मिन् विशेष्यविशेषणभावे महाभाष्यकार आह—'विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनस्याऽप्रसिद्धिः' (२।१।५७)।

कृष्णतिला इति कृष्णशब्दोऽयं तिलशब्देनाभिसम्बध्यमानो विशेषणवचनः सम्पद्यते, तथा तिलशब्दः कृष्णशब्देनाऽभिसम्पद्यमानो विशेषणवचनः सम्पद्यते, तदुभयं विशेषणं भवत्युभयं च विशेष्यम्।

है। इसीलिये ऋषि दयानन्द ने कारणरूप या प्रवाहरूप से द्युलोक आदि का अदितित्व अर्थात् अनश्वरत्व कहा है। गीता में सर्ववृक्षों में अश्वत्थ की प्रमुखता होने से 'मैं अश्वत्थ हूँ' कहा गया, अर्थात् तद्वत् मेरा प्राधान्य है। परन्तु 'अदितिर्द्यौः०' इस मन्त्र में द्यौः की समानता न कहकर तद्रूपता कही गई है।

'अदितिर्द्यौः०' इस मन्त्र के सन्दर्भ में विशिष्ट कथनीय यह है कि ऋषि दयानन्द ने अपने भाष्य में विशेष्य-विशेषणभाव प्रक्रिया का दिग्दर्शनमात्र कराया है। इस विशेष्य-विशेषणभाव के विषय में आचार्य स्कन्द भी लिखते हैं—

'अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि' (१।१।४) इस मन्त्र में अध्वर और यज्ञ शब्द दोनों यज्ञ के वाचक होने से पुनरुक्ति दोष होगा, तो वे कहते हैं कि ऐसा नहीं है; क्योंकि अध्वर शब्द विशेषण है।

छलारी टीका में विशेष्य-विशेषणभाव के विषय में कामचार कहा है। इस विशेष्य-विशेषणभाव के विषय में महाभाष्यकार ने कहा है कि विशेष्य और विशेषणभाव के विषय में दोनों को ही विशेष्य और विशेषण माना जायेगा, इसमें किसी की गौणता नहीं है।

जैसे 'कृष्णतिलाः' में कृष्ण शब्द तिल शब्द से अभिसम्बध्यमान होकर तिल का विशेषण होता है, उसी प्रकार तिल शब्द कृष्ण शब्द से अभिसम्बद्ध होकर कृष्ण शब्द का विशेषण हो जायेगा। तो दोनों ही परस्पर विशेषण और विशेष्य हो जायेंगे।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

ननु एवन्तर्ह्युभयस्याप्रधानत्वे तिलकृष्णा इति प्रयोजनीयं भविष्यतीति नाशङ्कनीयम्, न ह्यत्र द्वन्द्वो न चाऽपि षष्ठीसमासः। द्वाविमौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते, इति। तत्रैष सिद्धान्तः पर्यवस्यति—यः शब्दो द्रव्यवाची, असौ प्रधानो यश्च गुणवाची सोऽप्रधान इति।

उपमालङ्कारविषये यदुक्तमनेन तद्ग्रन्थस्थौल्यापादनाय, न तत्र ऋषिवचनखण्डनम्।

अत्रेदं विचारणीयं यत् श्रीकरपात्रिणा भूमिकातो भिन्नमेव 'अलङ्कारविषयो विचारः' इति शीर्षकं दत्तम्। तदाऽलङ्कारविषयः को विचारोऽनेन कृत इति न ज्ञायते। महर्षिणा तु अनुशीर्षकं संक्षेपेण मुख्या अलङ्कारा निरूपिता वैदिकाः भवन्ति। अयं यद्यपि निरूपितवान् तदपि न समीचीनम्। यथा—

"तच्च परम्परितं साङ्गं निरङ्गमिति त्रिधा भवति। आहवे जगदुद्दण्डराजमण्डलराहवे। पद्मोदयदिनाधीशः सदागतिसमीरणः। भूभृदावलिदम्भोलिरेक एव भवान् भुवि। अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनम्, भूभृतो राजान एव पर्वताः।"

शङ्का—इस प्रकार जब किसी की अप्रधानता नहीं है तो 'तिलकृष्णाः' ऐसा प्रयोग करना चाहिये।

समाधान—यहाँ पर द्वन्द्व समास नहीं है और न षष्ठीसमास है। ये दोनों ही प्रधान शब्द एक ही अर्थ में एक साथ अवरुद्ध हो जाते हैं। इस पर यह सिद्धान्त हुआ कि जो शब्द द्रव्यवाची हो, वह प्रधान तथा जो गुणवाची हो, वह अप्रधान होगा।

उपमालङ्कार के विषय में पारिजातकार ने ग्रन्थ की स्थूलता बढ़ाने के लिये बहुत सारा लिखा है, जिसका सम्बन्ध ऋषि के लेख से बिल्कुल नहीं है।

इन्होंने ऋषि के शीर्षक को परिवर्तित कर लिखा है कि 'अलङ्कारविषयो विचारः'। इससे इन्होंने क्या विचार किया है, यह कुछ प्रकट नहीं किया। महर्षि दयानन्द ने तो शीर्षक के अनुरूप मुख्य अलङ्कारों का संक्षेप से निरूपण किया है। इन करपात्री जी ने जो कुछ थोड़ा सा निरूपण किया है, वह भी समीचीन नहीं है। जैसे इन्होंने पृ० १७४२, पं० ३ में कहा है—

"यह रूपक परम्परित, साङ्ग और निरङ्गभेद से तीन तरह का होता है। 'आहवे जगदुद्दण्डराजमण्डलराहवे' इस श्लोक में राजमण्डल को थोड़ी देर के लिये चन्द्रमा मान लिया गया है, इसलिये इस राजमण्डल को ही थोड़ी देर के लिये राजा के बाहुओं को राहु की संज्ञा दे दी गई है। 'पद्मोदयदिनाधीशः सदागतिसमीरणः। भूभृदावलिदम्भोलिरेक एव भवान् भुवि' इस में पद्मा के उदय को ही कमलों का विकास, सज्जनों के आगमन को ही अच्छा आगमन और राजा को ही थोड़ी देर के लिये पहाड़ मानकर उस में सूर्य को आरोपित कर दिया गया है।"

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अत्र नानेन स्पष्टं कृतं यत् त्रिष्वपि भेदेषु कतमस्य कतरदुदाहरणम्। यदा हीमे श्लिष्टपरम्परितस्य श्लिष्टनिबन्धनकेवलमालायाश्चोदाहरणे भविष्यतः।

एवमदितेर्विभूतिनिरूपणेऽपि 'अदितिर्द्यौरदितिः०' इति मन्त्रे अदितिशब्दो विशेष्यः शिष्टा गुणवाचिनः सर्वे शब्दा विशेषणानि सन्ति।

यदाह—"नहि अश्वत्थः सर्ववृक्षाणाम्" इत्युक्त्या कृष्णशब्दस्यार्थोऽश्वत्थो भवति" इत्यपि अबुधजनभ्रामकम्, वैभवस्य साधर्म्यवैधर्म्याभ्यामुभाभ्यामपि प्रकाशितत्वात्। यदा हि साधर्म्यकथनेन वैभवं प्रकाश्यते, तदा वाच्यवाचकता विशेष्यविशेषणभावो वा सङ्गच्छते। तवोदाहरणे वैषम्यम्, नहि अश्वत्थार्थं सर्वेऽपि वृक्षाः कथयन्ति न वाऽपि विशेषणानि।

एवं 'सर्वं खल्विदं ब्रह्म' इति कथनेऽपि बुद्ध्या सङ्गमनीयं विचक्षणैः साहित्यिकप्रज्ञान-

---

इन्होंने यहाँ रूपक के तीन भेद तो कहे, और दो उदाहरण भी दे दिये, पर यह विवेचन नहीं किया कि तीन भेदों में से ये उदाहरण किस-किस भेद के हैं।

ज्ञात होता है अलङ्कारशास्त्र में इनकी गति नहीं है। इनको यहाँ पर यह भी लिखना चाहिये था कि जहां किसी का आरोप दूसरे के आरोप का कारण हो, वह परम्परित रूपक होता है। वह श्लिष्ट शब्दनिबन्धन तथा अश्लिष्ट शब्दनिबन्धन रूप में दो प्रकार का होता है। यह दोनों प्रकार का रूपक 'केवल रूपक' भी होता है और यह 'मालारूपक' भी होता है। इस प्रकार 'आहवे जगदुद्दण्ड०' यह श्लिष्ट शब्दमूलक केवल परम्परित का उदाहरण है, तथा श्लिष्टशब्दमूलक 'माला परम्परित' का उदाहरण—'पद्मोदयदिनाधीशः' है। जब आप इस विषय को जानते ही नहीं, तो छेड़ा क्यों?

इस प्रकार 'अदितिर्द्यौ०' इस मन्त्र में विभूतिनिरूपण होने पर भी अदिति शब्द विशेष्य और शिष्ट सभी शब्द विशेषण हैं अथवा अन्यों के विशेष्य होने पर अदिति शब्द विशेषण भी हो सकता है।

यह कहना कि —"कृष्ण शब्द का अर्थ अश्वत्थ नहीं होता" अबुधजनों के लिये भ्रामक है; क्योंकि साधर्म्य और वैधर्म्य दोनों ही प्रकार से वैभव का प्रकाशन हो जायेगा। जब साधर्म्य कथन से वैभव का प्रकाशन होता है, तब वाच्य-वाचकता या विशेष्य-विशेषणभाव सङ्गत होता है। आपके उदाहरण में वैषम्य है। सभी वृक्ष अश्वत्थ अर्थ को नहीं कहते और न विशेषण हैं।

इसी प्रकार 'सर्वं खल्विदं ब्रह्म' इस कथन को भी बुद्धि द्वारा साहित्यिक प्रज्ञानशील विद्वानों

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

शीलैः । ये हि बहुप्रज्ञास्त एव वेदार्थं विज्ञातुमर्हा महर्षिसदृशाः । तथाह दुर्गाचार्यः—

'अनुपक्षीयमाणशक्तयो हि विभवो वेदशब्दा यथाप्रज्ञपुरुषाणामर्थाभिधाने विपरिणममानाः सर्वतोमुखा अनेकार्थान् प्रकुर्वन्तीत्येतदनेन प्रदर्शितं भवति ।' (निरु० दुर्गटीकायाम् १ । २०)

इह हि वैशिष्ट्यं विशेष्यविशेषणभावरूपं पारस्परिकं वेद एव सम्भवति न लौकिकसाहित्ये। एकरूढार्थवाचकत्वं द्वयोर्भवेत् तदैकतरं विशेषणं भवितुमर्हति, एतद्धि यौगिकप्रक्रियाश्रयणेन सम्भवति तस्या धातुजत्वाश्रयित्वात्। तस्माद् वेदे 'अदितिः, अङ्गिरा, कण्वः इन्द्रः' आदयः शब्दा विशेष्या विशेषणानि उभयथाऽपि यथार्थमुपपद्यन्ते। वेदे चैतस्यानेकस्थलानि निदर्शयितुं शक्यन्ते। यथा—

'क्षितिर्न पृथ्वी (ऋ० १ । ६५ । ३) 'वाजिनमश्वम्' (ऋ० १ । १३५ । ५) 'अघ्न्याया धेनोः' (ऋ० ४ । १ । ६), 'गावो धेनवः' (ऋ० ६ । ४५ । २८) इत्यादीनि।

एवं विशेषणस्य प्रकृतिप्रत्ययसम्बन्धवत्त्वे सम्भवति, पौनरुक्त्यं वैयर्थ्यं वाऽपि न जायते।

को सङ्गत कर लेना चाहिये । अतः महर्षि के सदृश जो बहुप्रज्ञ हैं, वे ही वेदार्थविज्ञान में समर्थ हो सकते हैं । इस पर दुर्गाचार्य भी कहते हैं कि—

'वेद के शब्द व्यापक अनुपक्षीण शक्तिवाले होते हैं, जैसे प्रज्ञ पुरुषों के अर्थाभिधान में विपरिणममान सर्वतोमुख शब्द अनेक अर्थ देते हैं, यह बात इससे प्रदर्शित होती है ।' (निरु० दुर्गटीका १ । २०)

यहाँ पर विशेष्य-विशेषणभाव रूप पारस्परिक वैशिष्ट्य वैदिक साहित्य में ही सम्भव है, लौकिक साहित्य में नहीं । दोनों में से एकतर रूढ़ अर्थ का वाचक मान लिया जावे, तब यह विशेष्य-विशेषण भाव घटित होगा । यह यौगिक प्रक्रिया का आश्रय लेने से ही होगा, क्योंकि वह यौगिक प्रक्रिया धातुजत्व का आश्रय लेती है । इसलिये वेद में 'अदिति, अङ्गिरा, कण्व, इन्द्र' आदि शब्द विशेष्य और विशेषण दोनों ही प्रकार अर्थानुसार हो जाते हैं । वेद में ऐसे अनेक स्थल दिखाये जा सकते हैं । जैसे—

'क्षितिर्न पृथ्वी' (ऋ० १ । ६५ । ३), 'वाजिनमश्वम्' (ऋ० १ । १३५ । ५), 'अघ्न्याया धेनोः' (ऋ० ४ । १ । ६), 'गावो धेनवः' (ऋ० ६ । ४५ । २८) इत्यादि ।

इस प्रकार विशेषण के प्रकृति-प्रत्यय के सम्बन्धवत्त्व से पुनरुक्ति या वैयर्थ्य दोष नहीं होता है ।

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७४०, पं० १—यदुच्यते—"यास्केन चैतत् स्पष्टमुक्तम्—'इत्यदितेर्विभूतिमाचष्टे" तदपि तात्पर्यस्य स्वयमबोधादन्यजनभ्रामकमेव, वैभवस्यादितेर्व्याख्यानरूपत्वात् तदर्थत्वम्, तद्भिन्नार्थत्वे वैभवस्यासम्भवात् साधर्म्ये विशेषतः ।

अधिकस्पष्टप्रतिपत्त्यर्थं मन्त्रार्थः संक्षेपेण प्रस्तूयते—

(क) देवमाताऽदितिपक्षे (श्री ब्रह्ममुनिना) —अदितिः खण्डरहिता या द्युप्रभृतीनां देवानां माता निर्मात्री शक्तिः परमात्मदेवता तस्या द्यौरित्यादयो विभूतिरूपाः सन्ति, तद्द्वारा तेषामुत्पाद्यमानत्वात् प्रकाश्यमानत्वाद् धार्यमाणत्वाच्च । उत्पाद्योत्पादकयोः साध्यसाधकयोरभेदात् 'अन्नमु वा आयुः' (शत० ९ । २ । ३ । १६) इतिवत् । द्यौरदितिः—दिवि यः प्रकाशः स तस्या अदितेरेवाऽस्ति । 'तस्य भासा सर्वमिदं विभाति' (कठोप० ५ । १५, मु० २ । २ । १०) इति प्रतिपादनात् ।

अदितिरन्तरिक्षम्, अन्तरिक्षे योऽवकाशस्तस्या अदितेरेवाऽस्ति, स एवान्तरिक्षेऽवकाशस्य दाता, स सर्वेषामाकाशः, आकाशस्याप्याकाशस्तत्पारे च 'त्वमस्य पारे रजसो व्योमनः' (ऋ० १ । ५२ । १२) इति निर्देशात् ।

पृ० १७४०,पं० १—यह कथन कि—"यास्क आचार्य ने स्पष्ट कहा है कि इससे अदिति का वैभव कहा जा रहा है" भी इसके तात्पर्य को न समझने के कारण आपको भ्रामक सिद्ध हुआ है । यह वैभव तो अदिति का व्याख्यानरूप होने से तदर्थ ही है । यदि इस वैभव को अदिति से भिन्न कहा जाये सो विशेषरूप से साधर्म्य में सम्भव नहीं है ।

अधिक स्पष्ट प्रतिपत्त्यर्थ मन्त्रार्थ भी संक्षेप में दिया जा रहा है—

(क) देवमाता अदिति के पक्ष में (श्री ब्रह्ममुनिकृत)—अदिति अर्थात् अखण्ड जो द्यु प्रभृति देवों की माँ निर्मात्री शक्ति परमात्म देवता है, उसके द्यौ आदि विभूतिरूप हैं, उसके द्वारा उन देवों के उत्पन्न होने तथा प्रकाश्यमान होने अथवा धार्यमाण होने से । क्योंकि उत्पाद्य और उत्पादक तथा साध्य साधक अभिन्न होते हैं । जैसे शतपथ में अन्न को आयु कहा है । द्यौ को अदिति कहने का तात्पर्य है कि द्यौलोक में जो प्रकाश है, वह अदिति का ही है । कठ तथा मुण्डक में कहा कि उसी के प्रकाश से ये सब प्रकाशित होते हैं ।

अदिति अन्तरिक्ष है, अर्थात् अन्तरिक्ष में जो अवकाश है, वह उस अदिति का ही है । वह अपने अन्दर अवकाश का देनेवाला, वह सबका आकाश है और आकाश का भी आकाश है और उसके पार भी है । जैसा कि कहा है—

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अदितिर्माता मातृशक्तिप्रदत्वात्, स हि पिता पितृशक्तिप्रदत्वात्, 'त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ' (ऋ० ८ । ९८ । ११) इत्यादेशनात् । स पुत्रः पुत्रधर्माणां संस्थापकत्वात् । अदितेरेव विश्वेदेवास्तेषु विश्वदेवधर्माणां प्रेरकत्वात् पञ्चजनाः पञ्चसु वर्गेषु ये जायन्ते तेऽपि खल्वदितिस्तेषां जायमानानां जनकत्वात् । जातं पूर्वं जातमदितिस्तदन्तरे प्रसक्तत्वात्, अनित्यं जनिष्यमाणमपि खल्वदितिस्तत्राव्यक्तरूपेण विद्यमानत्वात् ।

अदितेर्विभूतयोऽदितिस्तद्विभूतिशक्तिमत्त्वात् । तस्य परमात्मनोऽग्नेरग्नित्वात्, सूर्यस्य सूर्यत्वात्, आत्मन आत्मत्वात् 'यस्यात्मा शरीरम्' (शत० १४ । ६ । ७ । ३०) इत्युक्तं यथा । इत्थं परमात्मदेवता देवमाता ।

मन्त्रार्थः (ख) —अदीनाऽदितिरिति पक्षे—

द्यौरन्तरिक्षं लोकेषु खल्वदीनौ लोकौ यत्रोपरि स्थितौ स्वाश्रितौ न तु पराश्रितौ स्तः । 'माता, पिता, पुत्रः' इति वंशशक्तयोऽदीनाः सन्ति स्वाभाविक्यः । सर्वा व्यक्तयो मातृपितृपुत्र-शक्तीरपेक्षन्ते । विश्वेदेवा अदीनास्तत्र वैश्वदेव्यात्, पञ्चजनाश्चान्तःस्थलभेदवत्त्वाददीनाः

'त्वमस्य पारे रजसो व्योमनः' (ऋ० १ । ५२ । १२) ।

अदिति माता है; क्योंकि वही मातृशक्ति देनेवाली है । पितृशक्ति देने से वही पिता है । जैसा कहा भी है कि 'तुम हमारे माता और पिता हो' (ऋ० ८ । ९८ । ११) । वह पुत्र-धर्मों का संस्थापक होने से पुत्र है । अदिति विश्वदेव धर्मों की प्रेरिका होने से विश्वेदेव है । पाँच वर्गों में जो उत्पन्न होते हैं, वे भी अदिति हैं, क्योंकि वह उन जायमानों का जनक हैं । जात वस्तुओं में प्रसक्त होने से भी वह अदिति है, जो जनिष्यमाण है, वह भी अदिति है; क्योंकि उसमें वह अव्यक्त रूप से विद्यमान है ।

ये अदिति की विभूतियाँ हैं; क्योंकि अदिति विभूति शक्तिमती है । जैसे वह परमात्मा अग्निमत्ता से अग्नि है, सूर्यत्व से युक्त होने से सूर्य है, इस प्रकार परमात्मदेवता देवमाता है । आत्मत्व धर्म से आत्मा है तथा जिस प्रभु का यह आत्मा शरीर कहलाता है ।

मन्त्रार्थ (ख) अदीन अदिति पक्ष में—

द्यौ और अन्तरिक्ष सब लोकों में अदीन हैं । ये सबके ऊपर स्थित हैं तथा किसी के आश्रित नहीं हैं । माता, पिता और पुत्र—ये वंश की शक्तियाँ भी अदीन हैं, स्वाभाविक हैं । सारी अभिव्यक्तियाँ माता, पिता और पुत्र शक्तियों की अपेक्षा रखती हैं । विश्वेदेव भी अदीन हैं । अन्तःस्थल भेदवाले होने से पञ्चजना अदीन हैं; क्योंकि स्वतन्त्र जायमान धर्मवाले हैं । भूत और

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वतन्त्रजायमानधर्मवत्त्वात् तेषाम्। भूतं भविष्यच्च कालस्यापरप्रान्तावदीनौ स्तस्तयोरसीमत्वात्, न खलु भूतस्यान्तो भविष्यतोऽन्तो लक्ष्यते। इति संसारेऽदीनानि सन्त्येतानि वस्तूनि, येषामाश्रये संसारः प्रवर्तत इति।

पृ० १७४०, पं० १—उपमालङ्कारस्यायं लक्षणं प्रस्तुवन् कुवलयानन्दं सन्दृष्णन् लिखति—'व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते, तत्रोपमालङ्कारो भवति'। परन्तु पृ० १७४१, ११ पंक्तौ—'तस्य मुष्णाति सौभाग्यमित्यादयो व्यञ्जकाः' इति लिखतोऽस्य पारस्परिकविरोध एव। कीदृशो व्यामोहोऽस्यालङ्कारविषये।

वस्तुतस्तु कुवलयानन्दकृतं लक्षणं दूषितमेव। निर्दुष्टं लक्षणं तु साहित्यदर्पणे। यथा—'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः'। रूपकदीपकतुल्ययोगितादिषु लक्षणस्यातिव्याप्तिवारणाय वाच्यमिति पदम्, रूपकादिसादृश्यस्य व्यङ्ग्यत्वात्। उपमायां वैधर्म्यं न कथ्यते व्यतिरेकालङ्कारे तु कथ्यतेऽतस्तद्व्यावृत्तयेऽवैधर्म्यमिति पदं पठितम्। तुल्ययोगितायाः

भविष्यत् अपरप्रान्तीय होने से अदीन हैं; क्योंकि वे असीम हैं, कारण यह है कि भूत और भविष्यत् का कभी अन्त लक्षित नहीं होता। इस संसार में वे समस्त वस्तुएँ अदीन हैं, जिनके आश्रित संसार प्रवर्तित होता है।

पृ० १७४०, पं० १ में उपमा अलङ्कार का लक्षण प्रस्तुत करते हुए ये 'कुवलयानन्द' का सन्दर्भ देते हुए लिखते हैं कि व्यञ्जना आदि वृत्तियों का सहारा लिये विना अपने आप नजर आने लगती है, वहाँ उपमा अलङ्कार की स्थिति मानी जाती है। परन्तु पृ० १७४१, पं० ११ में आप लिखते हैं कि—"मुष्णाति प्रभृति क्रियापदसहित वाक्य उपमा के व्यञ्जक हैं।"

इन लेखों में पारस्परिक विरोध क्यों है? इनका यह उपमालङ्कार के समझने में कैसा व्यामोह है; क्योंकि पहले तो लिखा कि 'व्यञ्जना आदि वृत्तियों का सहारा लिये विना' और यहाँ पर मुष्णाति प्रभृति को उपमा का व्यञ्जक मानते हैं।

वास्तव में कुवलयानन्दकृत लक्षण अपूर्ण है। विश्वनाथ के 'साहित्यदर्पण' का लक्षण अदुष्ट है कि—'एक वाक्य में दो पदार्थों के वैधर्म्यरहित वाच्य सादृश्य को उपमा कहते हैं।' रूपक, दीपक, तुल्ययोगिता आदि अलङ्कारों में अतिव्याप्तिवारण के लिये 'वाच्य' यह पद रक्खा गया है। रूपकादि का सादृश्य वाच्य नहीं होता, व्यङ्ग्य होता है। उपमा में वैधर्म्य नहीं कहा जाता, पर व्यतिरेक में कहा जाता है। इसलिये व्यतिरेक की व्यावृत्ति के लिये 'अवैधर्म्य' पद रक्खा गया। तुल्ययोगिता में अतिव्याप्ति के वारण के लिये 'वाक्यैक्य' पद रखा; क्योंकि तुल्य-

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

मतिव्याप्तिवारणाय वाक्यैक्य इति पदम्, तत्र द्वे वाक्ये भवतः। अनन्वयातिव्याप्तिवारणाय द्वयोरिति पदं न्यस्तम्, अनन्वय एकैकस्य पदार्थस्य सादृश्यनिरूपणात्।

नन्वयं तु आखुवत् कार्पासक्षौमवस्त्रस्य विवेकमधृत्वा कृन्तति एवार्थाद् ऋषिभाष्यखण्डनमेव विदधाति, इह पुनरनाक्षिपन् 'क्वास्तः क्व निपतितः' इति महाभाष्योक्तिमाचरन्निव उपमालक्षणप्रस्तावनायां हि लग्नः सन् कथं प्रतिवादिन आलोचनापात्रमप्रत्याशितो जात इति चेन्न, यदा शृगालस्य मृत्युरायाति तदा स ग्रामं प्रत्येव धावति। अनेन चिन्तितमासीद् यद् एतदुपन्यस्य साहित्यमर्माभिज्ञेष्वपि गणना भविष्यति, परं हा दुर्दैवप्राबल्यं यत् शिरसि मुण्डित एवोपलवृष्टिरजायत। अथवैवं वाच्यम्—

'खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तकः,
वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः,
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः॥'

योगिता में दो वाक्य होते हैं। अनन्वयालङ्कार में अतिव्याप्ति के वारण के लिये 'द्वयोः' पद का निवेश है। अनन्वय में एक ही पदार्थ का सादृश्य कहा जाता है।

शङ्का—यह लेखक मूषकवृत्तिवान् होकर यह वस्त्र कपास का है या रेशम का, इसका विवेक न रखकर बस कुतरने का काम करता है, बहुमूल्य रेशम वस्त्र के समान महर्षि के उत्तम भाष्य का भी खण्डन ही करता है। फिर यहाँ इस प्रकरण में कैसा आश्चर्य है कि यह कुछ भी आक्षेप न कर 'कहाँ फेंका था और कहाँ आ गिरा' के महाभाष्य कथन का आचरण करता हुआ उपमा के लक्षण की प्रस्तावना में उलझ गया और प्रतिवादी की आलोचना का अप्रत्याशित पात्र बन गया।

समाधान—भाई! लोक में कहावत प्रसिद्ध है कि 'जब सियार की मौत आती है तो वह गाँव की तरफ दौड़ता है'। इस परिजातकार ने सोचा तो यह था कि उपमा की चर्चा करके साहित्यमर्माभिज्ञों में गणना हो जायेगी, पर दुर्दैव इतना प्रबल निकला कि सिर मुड़ाते ही उपल (ओलों) की वृष्टि हो गई। अथवा नीतिकार का यह वचन सुघटित हो रहा है कि—

'कोई गंजा सूर्य की किरणों से तप्तमस्तक होकर छाया की टटोल में ताड़ के वृक्ष के नीचे जा खड़ा हुआ, वहाँ पहुँचते ही इस के नग्न शिर पर नारियल का महाफल गिरा और इसका शिर भी फूट गया। सच है दुर्भागी जहाँ जाता है, वहीं उसके साथ ही आपत्तियाँ भी जाती हैं।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

पृ० १७४१, पं० १५—इह रूपकलक्षणोपन्यस्तसंस्कृतभाषायां न सामञ्जस्यमार्यभाषायाः। यथा—'रूपितस्योपमानस्यारोपात्तादात्म्याध्यासाद्रूपकालङ्कारो भवति।' 'अर्थात् उपमेय में उपमान के तादात्म्य का अभ्यास करा देना ही रूपक अलङ्कार का कार्य होता है।' 'तथापि बाधकालीनेच्छाजन्यज्ञानरूपस्य आहार्यस्य तादात्म्याध्यासस्य नाऽसम्भवः।' 'तो भी उपमेय का वाचक अपनी इच्छा से उसमें उपमान का आरोप थोड़ी देर के लिये किया ही जा सकता है।' अत्र भवन्तः कोविदाः प्रमाणम्।

अग्रेऽपि परम्परितरूपकोदाहरणस्य 'आहवे जगदुद्दण्डराजमण्डलराहवे' इत्यस्यानुवादोऽपि विशृङ्खलः—'राजमण्डल को थोड़ी देर के लिये चन्द्रमा मान लिया गया है, इसीलिये इस राजमण्डल को ही चन्द्रमा के लिये थोड़ी देर के लिये राजा के बाहुओं को राहु की संज्ञा दे दी गई है।'

वस्तुतो भाषानुवादकयोर्दर्शनाचार्यस्य श्रीव्रजवल्लभद्विवेदस्य साहित्यसौन्दर्या-

---

पृ० १७४१, पं० १५—इस प्रकरण में लक्षण से उपन्यस्त संस्कृत और हिन्दी अनुवाद में कोई सामञ्जस्य नहीं है। जैसे—'जिस वस्तु को छिपाया नहीं जा सकता, उसको छिपाने के अभिप्राय से उसमें उपमान को आरोपित कर देना अर्थात् उपमेय से उपमान के तादाम्य का अभ्यास करा देना ही रूपक अलङ्कार का कार्य होता है।' 'यद्यपि उपमान और उपमेय के भेद से परिचित व्यक्तियों को इनकी एकता का आभास नहीं हो सकता, तो भी उपमेय का वाचक अपनी इच्छा से उसमें उपमान का आरोप थोड़ी देर के लिये किया ही जा सकता है।' यहाँ की संस्कृत और उसके फूहड़ अनुवाद की वास्तविकता परखने के लिये प्रबुद्ध पाठक ही प्रमाण हैं।

आगे भी—'आहवे जगदुद्दण्डराजमण्डलराहवे' आदि श्लोकों के अनुवाद में जो पहले हम दे चुके हैं, इन वाक्यों में 'थोड़ी देर के लिये' क्या बलाय है ? क्या उस साहित्यिकीय रूपक का सौन्दर्य 'थोड़ी देर के लिये' होगा ? कैसी विचित्र अनुवादक बुद्धि है !

वास्तव में बात यह है कि भाषानुवादक तो अवच्छेदकावच्छिन्नवाला शुष्क नैयायिक है। भला, इससे सरस अनुवाद की आशा रखना बालू से तेल निकालने के समान दुराशामात्र है। ये ठहरे 'अस्माकूणां नैयायिकेषाम् अर्थरि तात्पर्यम्, न तु शब्दरि' अर्थात् हम नैयायिकों का अर्थ में तात्पर्य है, शब्द से कोई मतलब नहीं।

वैयाकरण ने पूछा—'अस्माकूणामिति कथम् ?' उसने उत्तर दिया—जैसे 'इक्ष्वाकूणाम्'। प्र०—'नैयायिकेषामिति कथम् ?' उ०—'यथा सर्वेषाम्।' प्र०—'अर्थरि इति कथम् ?' उ०—'यथा कर्तरि इति।'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

परिचितस्य वराकस्य न क्षमताऽऽस्ति, परं श्रीगजाननशास्त्रमुसलगांवकरः साहित्याचार्यः सन्नपि काव्यरसास्वादनसदभ्यस्ते रसिके लोचने निमील्य स्वेष्टदेवस्य गजाननस्य मुसलधरस्य वा ध्याने निमग्नो नावधानमिहाधात्। इति शम्।

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-
अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-
मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन
विरचिते करपात्रिमतखण्डने दयानन्दीयमत-
मण्डने 'वेदार्थ-कल्पद्रुम' नामग्रन्थे
'अलङ्कार-विषयः'
॥ सम्पूर्णः ॥

पर 'अध्यास' का अनुवाद तो 'अभ्यास' कदापि नहीं हो सकता। माना, दर्शनाचार्य ब्रजवल्लभ साहित्यसौन्दर्य से अपरिचित थे, पर साहित्याचार्य श्री गजानन मुसलगाँवकर, जो काव्यरसास्वादन में सदभ्यस्त रसिक थे, वे भी आँखें बन्द करके अपने इष्टदेव गजानन या मुसलकर के ध्यान में निमग्न हो गये और इस स्थल पर ध्यान नहीं दिया। इति शम्।

श्रीमान् पण्डित बिहारीलाल जी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डन तथा
दयानन्दीय मतमण्डन करनेवाले इस
'वेदार्थ-कल्पद्रुम' नामक ग्रन्थ में
'अलङ्कार-विषय'
॥ सम्पूर्ण हुआ ॥

@Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

उपसंहारः

वन्दनीयवैयाकरणविद्वन्मण्डलमुकुटमयूखमालालालितपादारविन्दानां गीर्वाण-वाण्यध्ययनश्रवणमननिदिध्यासनावाप्तगौरवग्राममांसलमहिममण्डिताखण्डमहीमण्डलानाम् अपरिमितान्तर्नयन-ज्योतिःपरिस्पन्दामन्दानन्द-सुन्दरमन्दिरायमाण-सारस्वतकरुणावताराणाम् अमितवेदविद्याश्रीविभूषितकण्ठानां श्रीदण्डिस्वामिविरजानन्दगुरुवर्याणां चिरार्चितपादुका-पुण्यप्रसादातिशयासादितसमग्रशब्दानुशासनानां स्वामिदयानन्दसरस्वतीमहाभागानाम् अगाध-ज्ञानविषय एतदेव निवेद्य विरम्यते यन्महर्षिः पतञ्जलिराचार्यपाणिनिविषयेऽलेखीद् यत् प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाऽप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण ?'

तथैव ब्रूमो वयम्—'स्वतःप्रमाणभूतवेदज्ञानपवित्रहृदय आचार्यो दयानन्दः शुचौ समाधौ प्रणिधाय सावधान एकान्त उपविश्य भूमिकालेखं प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरेकेनाऽपि वाक्येन' इति शम् ।

वन्दनीय-वैयाकरण-विद्वन्मण्डल-मुकुटमालाओं से लालित पादारविन्द, देववाणी के अध्ययन-श्रवण-मनन और निदिध्यासन से प्राप्तगौरवसमूहवाली महामहिमा से अखण्ड मही-मण्डल को मण्डित करनेवाले, अपरिमित अन्तर्ज्योति के परिस्पन्दन से अमन्द आनन्द के सुन्दर मन्दिर स्वरूप सारस्वतज्ञान के करुणावतार, अपरिमित वेदविद्या की श्री से विभूषित कण्ठवाले श्री दण्डि स्वामि विरजानन्द गुरुवर्य के चिरकाल तक पूजित पादुकाओं के पुण्य प्रसाद के अतिशय से समस्त शब्दानुशासन के ज्ञाता स्वामी दयानन्द सरस्वती महाभाग के अगाध ज्ञान के विषय में इतना ही निवेदन करके विराम लेता हूँ कि जैसा महाभाष्यकार महर्षि पतञ्जलि ने आचार्य पाणिनि के विषय में लिखा है कि—'प्रमाणभूत दर्भ (कुश) पवित्रपाणि आचार्य ने पवित्र अवकाश के समय प्राचीनमुख उपविष्ट होकर महान् प्रयत्नपूर्वक सूत्रों का प्रणयन किया था, उनमें एक वर्ण का भी अनर्थक होना असम्भव है, फिर सम्पूर्ण सूत्र के विषय में तो कहना ही क्या ?'

उसी प्रकार हमलोग भी कहते हैं कि—'स्वतः प्रमाणभूत वेदज्ञान से परिपूतहृदय होकर आचार्य दयानन्द ने पवित्र समाधि में प्रणिधान करके सावधान होकर एकान्त में बैठकर भूमिका लेखों का प्रणयन किया था, उस भूमिका में एक वर्ण का भी अनर्थक होना असम्भव है, फिर एक वाक्य के निरर्थक होने की तो बात ही क्या ?'

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

अद्याऽऽगृहीत इह निग्रहशृङ्खलायाम्,
मुक्तः सुसाधु खलु खेलति तीव्रतर्कः ।
युक्तिप्रमाणजलधिः प्लवबृंहितोऽद्य,
अद्याशु वेपथुमितं करपात्रचेतः ॥ १ ॥

अद्याभिमानि-करपात्र-विजृम्भणं सद्-
वेदार्थरोधककुतर्क-पुराणरूढम् ।
दम्भोलिसन्निभ-सुतीक्ष्ण-सुतर्क-वाचा-
नाराच-सम्प्रहरणैर्भवतीह चूर्णम् ॥ २ ॥

नो कल्पनाऽभवदियं करपात्रकस्य,
सम्मर्दयिष्यति बुधस्तदखर्व-गर्वम् ।
कश्चित् सुतर्क-वचनक्षणुतवाणवृष्ट्या,
'अग्नेः कणास्तृणराशिं दहतीति सत्यम्' ॥ ३ ॥

महर्षेर्भूमिका प्राधाद् वेदार्थाय शिवं विधिम् ।
अनृषीणां च भाष्याणि, निराकृत्य प्रमाणतः ॥ ४ ॥

आज यहाँ निग्रह की शृङ्खलाओं में श्री करपात्र को जकड़ लिया गया है, क्योंकि यह तीव्रतर्क आज उन्मुक्त होकर बड़े कौशल से खेलने लगा है, शास्त्रीय युक्ति और प्रमाणों का समुद्र भी ठाठें मारता दिखाई देने लगा है, फलतः श्री करपात्री जी का चित्त भी कम्पित हो चला है ॥ १ ॥

उत्तम वेदार्थ-शैली का अवरोधक, कुतर्क और पुराणों पर प्रारूढ़, अभिमानी श्री करपात्री जी का विजृम्भण (गर्व) वज्रसदृश तीखे उत्तम तर्कमय वाग्वाणों के प्रहारों से आज चूर-चूर हो गया है ॥ २ ॥

पौराणिक पण्डितों की विशाल वाहिनी के वाहक श्री करपात्री को यह कल्पना भी नहीं थी कि कोई विद्वान् उत्तम तर्कशील वचनों की शाण पर तीक्ष्णीकृत वाण-वृष्टि से उनके अखर्व गर्व का मर्दन कर देगा। निश्चय ही अग्नि का एक ही कण अपार तृण-राशि को क्षण भर में भस्म कर देता है ॥ ३ ॥

अनार्ष भाष्यों का प्रमाणों से निराकरण करके महर्षि दयानन्द की ऋग्वेदादिभाष्यभूमिका ने वेदों के अर्थ करने की प्राचीन आर्ष कल्याणकारक विधि का आधान कर दिया है ॥ ४ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थपारिजातस्य प्रणेताऽपूर्वपद्धतिम् ।
माहीधरीं समाश्रित्य, कृतकृतममन्यत ॥ ५ ॥

कोकिलः कश्च कः काकः, समाना कालिमोभयोः ।
अन्तरं कलयिष्यन्ति, काकलीकाँवकोविदाः ॥ ६ ॥

यथामति यथाशक्ति, सम्परीक्ष्य ब्रवीम्यहम् ।
महर्षेर्भूमिकायां तु, मात्राऽपीह न निष्फला ॥ ७ ॥

पितृप्रसादाय प्रगीयमाना,
श्रीमद्दयानन्द-यशःप्रशस्तिः ।
विभाति नूनं करपात्रराहो-
र्मुक्ता मुखान्निर्मलचन्द्रिकेव ॥ ८ ॥

समाजश्चार्यवर्याणाम्, अन्धविश्वासपादपम् ।
समुन्मूलयितुं सज्जो, विद्यते हि दिवानिशम् ॥ ९ ॥

महाप्रज्ञासमुद्रस्य, दयानन्दस्य सम्मुखे ।
वराकः करपात्रोऽयम्, अवश्याय कणायते ॥ १० ॥

वेदार्थपारिजात के प्रणेता नवीन अनार्ष महीधर की रूढ पद्धति का आश्रय लेकर स्वयं को कृतकृत्य मान बैठे ॥ ५ ॥

कौन कोकिल है और कौन काक है, दोनों का कृष्णवर्ण समान होता है; परन्तु काकली (कोकिलवाणी) और काँव स्वर के भेद का आकलन सदसद्विवेकी जन तो कर ही लेंगे ॥ ६ ॥

यथामति और यथाशक्ति सम्परीक्षण करके मैं कह रहा हूँ कि महर्षि की इस भूमिका में एक मात्रा भी निःसार नहीं है ॥ ७ ॥

प्रातःस्मरणीय पू० माता-पिता की प्रसन्नता के लिये मेरे द्वारा श्रीमद् दयानन्द ऋषि की यशःप्रशस्ति गाई जा रही है । जो श्री करपात्री रूपी राहु के मुख से मुक्त होकर निर्मल चन्द्रिका के समान शोभित हो रही है ॥ ८ ॥

यह ऋषिवर्य का आर्यसमाज अन्धविश्वास के वृक्ष का उन्मूलन करने के लिये सदा ही समुद्यत रहता है ॥ ९ ॥

प्रज्ञा के महासागर महर्षि दयानन्द के समक्ष यह बेचारे करपात्री ओस के कण के समान हैं ॥ १० ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

वेदार्थपारिजाते यद् भूमिकाखण्डनं कृतम्।
कृतं तर्कप्रमाणैश्च, मया खण्डनखण्डनम् ॥ ११ ॥

श्रीकरपात्रं प्रति कृतज्ञताज्ञापनम्—

अन्ते ददामि शतशोऽथ सहस्रशो वा,
तुभ्यं त्वभद्रवचसेऽपि च धन्यवादान्।
येनाऽस्त्यवल्गामुखदुर्वचनैर्वितण्डा,
ग्रन्थं विलिख्य समयोज्यत निर्विशङ्कम् ॥ १ ॥

गाम्भीर्यमस्ति बहुलं प्रतिशब्दमत्र,
वेदार्थदर्शनपरायणभूमिकायाम्।
नैतावदेव समचिन्त्यत पूर्वकाले,
शङ्कास्तवादुरवकाशमधीतवेऽस्याः ॥ २ ॥

सम्प्रत्यगाधममृताम्बुधिबोधमत्र,
ज्ञात्वा समेऽपि विबुधा गहनावगाहम्।
प्रीत्या पुनः पुनरपि प्रतिबुध्यमानाः,
कर्तुं समुज्ज्वलहृदश्च समुत्सुकाः स्युः ॥ ३ ॥

उन करपात्री जी ने अपने वेदार्थपारिजात में ऋषि की भूमिका का जो खण्डन किया है, हमने तर्क और प्रमाणों से उस खण्डन का खण्डन कर दिया है ॥ ११ ॥

श्री करपात्री जी के प्रति कृतज्ञता-ज्ञापन

'वेदार्थ-कल्पद्रुम' के तृतीय खण्ड को पूर्ण करने पर प्रतिपद ऋषि का अभद्रवचन प्रयुक्त करनेवाले आपके लिये शतशः और सहस्रशः धन्यवाद देना चाहता हूँ, जो कि आपने बेलगाम मुख से दुर्वचनों द्वारा ग्रन्थ को बेदहल लिखकर वितण्डा खड़ा कर दिया ॥ १ ॥

आपके प्रति कृतज्ञता इसलिये भी है कि हमने पहले भूमिका का अध्ययन करते समय यह कभी नहीं सोचा था कि वेदार्थदर्शनपरायण महर्षि की इस ऋग्वेदादिभाष्यभूमिका के प्रतिशब्द में इतना महान् गाम्भीर्य होगा, आपकी शङ्काओं ने हमें इस भूमिका के पुनरपि गहन अध्ययन करने का महान् अवसर दिलाया ॥ २ ॥

इस समय इस भूमिका में अगाध ज्ञानामृत समुद्र समाया हुआ है, ऐसा समझकर हमारे ग्रन्थ के पूर्वखण्ड को देखकर सारे उच्च कोटि के विद्वानों ने इस अमृत सागर में गहन अवगाहन करने के लिये पुनः उत्सुकता धारण कर ली है ॥ ३ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

दुःसाहसस्य भवतः स्तवनं करोमि,
वृद्धायुषि प्रयतते स्वपुराणभक्तान् ।
मूर्त्यर्चकान् सपदि तोषयितुं प्रवृत्तः,
भीष्मो यथाऽयतत कौरवपक्षपाते ॥ ४ ॥

मन्ये त्वदीयहृदयं विवशं यदन्न-
पानादिभिः समभिपुष्यदशास्त्रभावम् ।
सत्तर्कसङ्गतप्रमाणितभूमिकायाः,
यत्प्रत्यपादि तदनेन विरोधभावे ॥ ५ ॥

प्रस्तौम्यसूयकभयावहसर्पिणीं ताम्,
वल्मीकिरूपहृदये परिलुण्ठनाय ।
पौराणपङ्कपरिलिप्तमतिस्तदानीम्,
एषोऽन्वमन्यत कथं विवशो ब्रवीतु ॥ ६ ॥

मन्ये तवोपकृतिमेव शुचिस्थलेषु,
वेदप्रमाणबहुतर्कसमाहितेषु ।
निन्दापराणि वचनानि प्रयुज्य दण्डिन्,
भूयः सदार्यहृदयानि बताऽऽहतानि ॥ ७ ॥

हम आपके इस सुदुःसाहस की प्रशंसा विना किये नहीं रह सकते, जिसने आपके मूर्तिपूजक भक्तों को सन्तोष देने के लिये आपको इस वृद्धावस्था में विवश किया। यह आपका ऐसा ही प्रयास है, जैसा भीष्म पितामह ने अपने अन्नदाता कौरवों के प्रति पक्षपात किया था ॥ ४ ॥

हम मानते हैं कि उन भक्तों के अन्न जलपान आदि से आपके शास्त्र (वेद) विरुद्ध भी भाव परिपुष्ट हुए हैं, जिसके कारण आपका हृदय उत्तम तर्क और प्रमाणों से परिपुष्ट भूमिका के विरोध प्रतिपादन करने के लिये विवश हुआ है ॥ ५ ॥

हम आपके इस भाव की भी प्रशंसा करेंगे, जिसने असूया भावना की भयानक काली नागिन को आपके हृदय रूपी बाँबी पर स्वच्छन्द लोटने की अनुमति दे दी है, इस लिये पुराणपङ्क से परिलिप्तमति होकर आपने इस समय न जाने कैसे विवश होकर अनुमति दी थी, यह तो बताइये ॥ ६ ॥

हे दण्डिन् ! हम आपके इस उपकार को भी मानते हैं कि वेदप्रमाण और बहुत से तर्कों और प्रमाणो से समाहित भूमिका के पवित्र स्थलों पर निन्दापरक दुर्वचनों का प्रयोग करके आर्यों के हृदयों को आहत किया है ॥ ७ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

त्वत्सम्प्रहारप्रहता व्रणिता मनीषा,
सूक्ष्मातिसूक्ष्मकलने निशिता क्षमाऽभूत्।
गाम्भीर्यगाहनसमर्थसदर्थभावान्,
बुद्ध्वा मुहुर्मम मुदा च कृतार्थतामैत् ॥ ८ ॥

सुब्रह्मचर्यपरिनिष्ठसमाधिदृष्टम्,
तत्त्वं ह्युदञ्चदमलं निजभूमिकायाम्,
क्षिप्रं च तत्त्वजलधेः कतिचिच्च बिन्दून्,
कल्पद्रुमे समवचेतुमहं प्रवृत्तः ॥ ९ ॥

हे ग्रन्थकार भवतोऽप्यनुवादकस्या-
प्याभारितामुपवहेऽसकृदेव येन।
आपातिताः स्खलतयो ह्यनुवादनेऽस्मिन्,
तत्खण्डनाय गुणितुं खलु साहसं मे ॥ १० ॥

वेदार्थपारिजातीयचक्रव्यूहप्रवेशने
धर्मपत्नीसहायोऽहं सफलोऽभूवमेव हि ॥ ११ ॥

तुम्हारे तीक्ष्ण क्रूर प्रहारों से हमारी बुद्धि चुटीली हो गई, फलतः उसकी सूक्ष्मातिसूक्ष्म आकलन की क्षमता तीक्ष्ण हो गई। फिर वह बुद्धि भूमिका के गम्भीर अवगाहन में समर्थ होकर उत्तमार्थ और भावों को समझकर आपके प्रति कृतज्ञता-ज्ञापन करती हुई कृतार्थ हो गई ॥ ८ ॥

महर्षि ने उत्तम ब्रह्मचर्य से परिनिष्ठित समाधि में देखे गये निर्मल वेदार्थ के वैज्ञानिक तत्त्वों को अपनी भूमिका में ला-लाकर शीघ्र सुप्रकाशित कर दिया। उस भूमिका के तत्त्व-समुद्र से कतिपय बिन्दुओं को चुनकर हम 'वेदार्थ-कल्पद्रुम' में रखने को प्रवृत्त हो गये ॥ ९ ॥

हे ग्रन्थकार करपात्री जी ! आपके अनुवादक के प्रति यदि हम आभारिता व्यक्त न करें तो हमारा कृतज्ञताज्ञापन अधूरा ही होगा, क्योंकि उन्होंने ही अपने अनुवाद की भ्रामक महास्खलतियों (गलतियों) के द्वारा ही पारिजात के खण्डन के हौंसले को द्विगुणित कर दिया है ॥ १० ॥

वेदार्थपारिजातरूपी चक्रव्यूह में प्रवेश करने में केवल धर्मपत्नीसहायक मैं सफल हो गया ॥ ११ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

यद्यप्यासज्जिता आसन् अनीकेषु व्यवस्थिताः ।
सप्तद्विगुणितास्तत्र शास्त्रायुधमहारथाः ॥ १२ ॥

सर्वमर्मस्थला भूमिः प्रहृता परपक्षिभिः ।
परं सा त्वव्रणा सिद्धा वेदामृतनिषिञ्चिता ॥ १३ ॥

शास्त्रालीढक्रियादक्षः प्रहारान् वारयन् पुनः ।
प्रहृत्य तर्कनाराचैस्तेषु चाहं सुरक्षितः ॥ १४ ॥

परन्त्वपूर्णाऽवसदेकलालसा,
स चेदजीविष्यदभेदसाहसः ।
अद्रक्ष्यदेतं सुप्रमाणतर्कभृत्,
कल्पद्रुमं साधु समन्वतप्स्यत ॥ १५ ॥

एतत् खलु निर्विवादमुदीर्यते—

वारं वारमिदं मनुष्यजननं भाग्येन सम्प्राप्नुयाम्,
वारं वारमिदं स्वजीवनमहं श्रौतीयधर्माध्वनि ।
सश्रद्धं च समुत्सृजेयमृषिराट् सम्भाव्यते कर्हिचित्,
आनृण्यं श्रुतिभास्करस्य भवतो नैवोत्तमर्णान् मम ॥ १ ॥

यद्यपि इस चक्रव्यूह में शास्त्र के आयुध धारण करनेवाले चौदह महारथी प्रत्येक मोर्चे पर व्यवस्थित लगे हुए थे ॥ १२ ॥

विपक्षियों ने भूमिका के समस्त मर्मस्थलों पर प्रहार किया, वे मर्मस्थल अव्रण और अक्षत सिद्ध हुए, क्योंकि वे वेद के अमृत से निषिञ्चित थे ॥ १३ ॥

इस प्रकार शास्त्रीय पैंतरेबाजी में दक्ष हम उन प्रहारों को काटते रहे और तत्परता से उन पर पुनः प्रहार करके सुरक्षित वापस आ गये ॥ १४ ॥

परन्तु हृदय में एक लालसा अपूर्ण रह गई कि यदि आज श्री करपात्रीजी जीवित होते और वे तर्क, युक्ति और प्रमाणों से परिपूर्ण हमारे 'वेदार्थ-कल्पद्रुम' को देखते, तो वे निश्चित ही अपने खण्डनाभास प्रयास पर अनुताप अवश्य करते ॥ १५ ॥

यह तो निर्विवाद रूप से कहा जा रहा है—

हे ऋषिराट् ! यदि मैं सौभाग्य से इस मनुष्य-जन्म को बार-बार धारण करूँ और वैदिक धर्म-मार्ग में ही श्रद्धासहित अपने जीवन को बार-बार समर्पित करता रहूँ तब भी वेद भानुस्वरूप आपके उत्तम ऋण से मेरी अनृणता कदापि सम्भावित नहीं है ॥ १ ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra

स्वर्वाचाऽध्ययनोद्यता मम सुताः सश्रद्धयाऽऽजीवनम्,
तेषां सन्ततयोऽपि वेदमनना वेदप्रचारे रताः ।
अस्मादृग्यतना अहर्निशमृणं निर्यातयेयुर्यदा,
आनृण्यं श्रुतिरक्षकस्य भविता नैवोत्तमर्णस्य ते ॥ २ ॥
यावत् सृष्टिरियं चराचरमयी लोकेऽखिला स्थास्यति,
यावद् वेदपवित्रदेवसरिता ज्ञानामृतं वक्ष्यति ।
ऋग्वेदादिकभाष्यभूमिरतुला यावत् स्थितिं धास्यति,
तावत् स्थास्यति भूमिकामतमवन् 'वेदार्थ-कल्पद्रुमः' ॥ ३ ॥

इति श्रीमद्बिहारिलालशास्त्रिशिष्येण श्रीयुतपण्डित-अयोध्याप्रसादमिश्रात्मजेन श्रीमदाचार्यविशुद्धानन्द-मिश्रेण श्रीयुतनिर्मलामिश्रा-सहधर्मिणीसहायेन विरचितः करपात्रिमतखण्डनात्मको दयानन्दीय-मतमण्डनात्मको 'वेदार्थ-कल्पद्रुम' नामग्रन्थ ईश्वरकृपया समाप्तिमगात् ।

॥ इति शम् ॥

देववाणी के अध्ययन करने में तत्पर और उत्सुक मेरे पुत्र (और पुत्रियाँ) श्रद्धासहित जीवन भर तथा उनकी सन्तानें भी वेदाध्ययन-मनन करती हुई वेदप्रचार में लगी रहें और जब हम दोनों की भाँति अहर्निश यत्न करती हुई आपके ऋण को उतारती रहें, तो भी वेदरक्षक उत्तमर्ण आपके ऋण से अनृण नहीं हो सकते ॥ २ ॥

लोक में जब तक यह चराचरमयी सृष्टि रहेगी तथा जब तक वेदों की पवित्र गङ्गा ज्ञानामृत को बहाती रहेगी, एवं जब तक अनुपम 'ऋग्वेदादिभाष्यभूमिका' स्थिर रहेगी, तब तक भूमिका के सिद्धान्तों की रक्षा करता हुआ यह 'वेदार्थ-कल्पद्रुम' भी अमर रहेगा ॥ ३ ॥

श्रीमान् पण्डित बिहारीलाल जी शास्त्री के शिष्य, श्रीयुत पण्डित
अयोध्याप्रसाद मिश्र के आत्मज, श्रीमदाचार्य विशुद्धानन्द
मिश्र द्वारा श्रीयुतनिर्मलामिश्रा सहधर्मिणी की
सहायता से विरचित करपात्रिमतखण्डनात्मक तथा
दयानन्दीयमतमण्डनात्मक 'वेदार्थ-कल्पद्रुम'
नामक ग्रन्थ ईश्वर-कृपा से
सम्पूर्ण हुआ ।

॥ इति शम् ॥

https://t.me/Mimansak_Aarsh_Anusandhan_Kendra